श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## परिमळाद्युपेता

सम्पुटम् - १६

द्वितीयाध्यायस्य द्वितीयपादे

वैशेषिकाधिकरणं (अनुवृत्तं), समुदायाधिकरणं तथा असदधिकरणम्

प्रकाशनम्

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता

सम्पुटम् - १६

प्रथमं मुद्रणम् - ई.सन् २०१५

Śrīman-Nyāyasudhā
Parimaḷādyupetā

Volume - 16

First Edition -2015 A.D.

मन्मथ संवत्सरम्, गतशके १९३७, वैशाख शुक्ल पौर्णिमा, सोमवासरः

मन्त्रालयम्

*Published by :*

**Śrī Gurusārvabhauma Saṁśodhana Mandiram**
**Jagadguru Śrīman Madvāchārya Mūla Mahāsamsthāna**
**Śrī Rāghavendra Swāmy Mutt**
Mantrālayam - 518 345
India.

⁂ *मुद्रकः* ⁂

धनंजयाचार्य बाळाचार्य वरखेडकरः

**सुधा मुद्रणम्**
शंकरपुरम्, बेंगळूर - ५६० ००४
दूरवाणी– २६६००६३०, ६५६० २८३६
मोबाइल– ९२४३० ७४४१४

**SUDHA MUDRANA**
Shankarpuram, Bangalore - 560 004
Phone : 2660 0630, 6560 2836
Mobile : 92430 74414

# समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारङ्गत
सर्वतन्त्रस्वतन्त्र श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य
श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक
जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वराणां
श्रीमद्द्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

## श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-
श्रीमूलरघुपतिपादकमलयोः
समर्पितोऽयं ग्रन्थः ॥

श्रीवेदान्तरसात्मकं भगवतो व्यासस्य हार्द्रानुगं
श्रीमन्मध्वसुतत्त्वबोधनचणं टीकार्यसङ्गुम्फितम् ।
श्रीमन्न्यायसुधाख्यग्रन्थनिचयं व्याख्यासमूहैर्युतं
श्रीशे श्रीसुबुधेन्द्रसंयमिमणिः भक्त्याऽर्पयन्मोक्षदम् ॥

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारङ्गत सर्वतन्त्रस्वतन्त्र
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक
**जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वराणां**
श्रीराघवेन्द्रस्वामिमठीयवेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
**श्रीमत्सुशमीन्द्रतीर्थश्रीचरणकरकमलसञ्जात**
**श्रीमत्सुयतीन्द्रतीर्थवरकुमारकाणां**

## श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानां

# अनुग्रहसन्देशः

अपौरुषेयवेदराशेः तात्पर्यार्थनिर्णयार्थं प्रवृत्तस्य, श्रीनारायणाभिन्नश्रीवेदव्यासमुनिना रचितस्य ब्रह्ममीमांसाशास्त्रस्य, श्रीवेदव्याससम्मतमभिप्रायं मुमुक्षुजीविनां उपकारार्थं स्फुटीकर्तुं, पूर्णप्रज्ञा इति महिताः श्रीमदाचार्याः श्रीमध्वाचार्याः, 'सूत्रभाष्यं, अनुव्याख्यानं, न्यायविवरणं, अणुभाष्यमि'ति चत्वारि ग्रन्थरत्नानि व्यरीरचन् । तत्र परमतखण्डनपूर्वकस्वमतस्थापनोद्देशेन प्रवृत्तं परवादिगजसिंहायितं 'श्रीमदनुव्याख्यानं', विद्वज्जनस्य परमादरपात्रं सत् शोभतेतराम् ।

श्रीमदाचार्यभाववेत्तारः, 'श्रीमत्पूर्णप्रमतिकारुण्यसरणिं प्रपन्नाः', 'श्रीटीकाचार्या' इति प्रथितयशसः मिथ्यावादध्वान्तसन्तानभानुभूताः श्रीजयतीर्थमुनयः श्रीमदनुव्याख्यानाब्धिं निर्मथ्य निर्विषां तत्त्वज्ञानामृतरूपां 'श्रीमन्न्यायसुधां' उत्पाद्य, अन्वर्थनामधेयं श्रीमन्न्यायसुधाग्रन्थं निर्माय, ज्ञानामृतपिपासुजनेभ्यः पातुं प्रददुः । इयं न्यायसुधा वस्तुनिष्ठविषयप्रतिपादनपरा, परमार्थबोधनचणा, विद्वन्मनीषानिकषायिता, परवादविध्वंसननिष्णाता सती विद्वत्प्रपञ्चे सर्वोच्चशास्त्रग्रन्थत्वेन राराजते ।

'टिप्पण्याचार्यचक्रवर्तिनः' इत्येव ख्याताः श्रीराघवेन्द्रतीर्थाः श्रीमन्न्यायसुधायाः अर्थगाम्भीर्यं अर्थवैशाद्यं च जिज्ञासुभ्यः अवगमयितुं 'परिमळा'ख्यां टिप्पणीं विरचय्य, श्रीमन्न्यायसुधायाः क्षोणीगीर्वाणगम्यतां संसाधितवन्तः । परिमळाचार्याणां वाक्यगुम्फैरेव, परिमळस्य सार्थक्यमवगन्तव्यं यथा—

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

विद्वत्परिज्ञेयमहाविशेषाः भाष्यटीकाद्यविरुद्धग्रन्थकर्तारः श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः श्रीमन्न्यायसुधाग्रन्थस्य प्रौढिमामधिकृत्य, एवमुद्घोषयन्ति यथा—

प्रतिवाक्यं (प्रत्यक्षरं) प्रतिपदमनेकाकूतगर्भिता ।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

महान् सन्तोषावहो विषयः यत् अस्मत्पूर्वाश्रमपितृपादानां पण्डितप्रवराणां, महामहोपाध्यायादिबिरुदाङ्कितानां श्री राजा श्री गिरिआचार्याणां आध्यक्ष्ये सम्पन्नस्य परिश्रमस्य फलेन, श्रीमन्न्यायसुधायाः श्रीपरिमळसहितपञ्चविंशति-टिप्पणीनामुपलब्धिः सञ्जाता आसीत् । एवं परिमळादिपञ्चविंशतिटिप्पणीभिरलङ्कृतस्य श्रीमन्न्यायसुधाग्रन्थस्य संशोधन-पूर्वकं प्रकाशनकार्यं अस्माभिः पूर्वाश्रमे एव सङ्कल्प्य प्रारब्धमासीत् । अस्मत्परमगुरूणां परमपूज्य श्रीश्रीसुशमीन्द्रतीर्थ-श्रीपादानां श्रीमठस्य पीठाधिपतित्वसमये प्रथमदशसम्पुटानि प्रकाशितानि । अस्मद्गुरुपादानां परमपूज्य श्रीश्रीसुयतीन्द्र-तीर्थानां पीठाधिपतित्वसमये एकादशसम्पुटादारभ्य पञ्चदशसम्पुटपर्यन्तं, ग्रन्थानां प्रकाशनं विधाय लोकार्पणं संसाधित-मासीत् ।

अधुना, अस्माकं पीठाधिपतित्वसमये षोडशसम्पुटादारभ्य द्वाविंशतिसम्पुटपर्यन्तं प्रकाशनं विधाय, समग्र-सुधाग्रन्थस्य संशोधनप्रकाशनरूपमहत्कार्यं सम्पादितं, श्रीगुरुराजसन्निधौ समर्पितं च दृष्ट्वा, प्रमोमुदीत्यस्मच्चेतः । एतत्सर्वं महत् ज्ञानयज्ञकार्यं हंसनामकपरमात्मनः साक्षात्परम्परायामागतस्य अस्माकं विद्यामठस्य पीठाधिपतिभिः सम्पूजितस्य नित्यं अस्माभिरपि सम्पूज्यमान-चतुर्मुखब्रह्माराधितपादपङ्कजस्य, चतुर्युगमूर्तेः भगवतः श्रीरमारमणस्य श्रीमूलरामस्य, श्रीमध्वकरार्चितश्रीदिग्विजयरामस्य, श्रीजयतीर्थकरार्चितश्रीजयरामस्य च पूजासाधितपुण्यफलेन शक्यमभूदिति संस्मृत्य संस्मृत्य आत्मनः धन्यान् मन्यामहे ।

'सुधा वा पठनीया वसुधा वा पालनीया' इत्युक्तिरीत्या, श्री सुधाऽध्ययनस्य महत्तां, सुधाग्रन्थस्य श्रीकरत्वं च अनुसन्धाय, सर्वे सुधीजनाः परिमळादिपञ्चविंशतिटिप्पणीभूषितानां, श्रीमठेन प्रकाशितानां, समग्रश्रीसुधाग्रन्थानां गुरुमुखेन अध्ययनं विधाय, श्रीमध्वशास्त्रप्रमेयाणां, यथार्थज्ञानं सम्पाद्य श्रीगुरुराजानुग्रहपात्राणि भूत्वा, 'ज्ञानेनैव परं पदमि'त्युक्तरीत्या कृतार्थाः भवेयुरित्याशास्महे ।

श्रीमन्त्रालयक्षेत्रे, प्रतिदिनं एतान् ग्रन्थानेव उपयुज्य, विंशत्यधिकछात्रेभ्यः वयमेव श्रीमन्न्यायसुधापाठकरणे प्रवृत्ताः स्मः इति सामोदं कथयितुमभिलषामः । अनेन श्रीमठप्राकारस्य बौद्धिकाध्यात्मिकसुषमा नूनमभिवर्धिता चकास्ति । जिज्ञासवः सुधीजनाः श्रीमन्न्यायसुधाऽध्ययनस्य कक्ष्यासु भागं ग्रहीतुमर्हन्तीति उद्घोषयितुमुत्सुका वयम् ।

एतज्ज्ञानकार्ये कृतभूरिपरिश्रमाणां समेषां विदुषाम्, अध्यापकानां, सम्पादकमण्डलीसदस्यानां, तथा, पाठ-शोधने, प्रतिकृतिशोधने च सहकृतवतां अन्येषां विद्वज्जनानां च, कृतकार्यस्य आशंसनं कुर्वाणाः वयं, एते सर्वेऽपि अस्मदुपास्य-श्रीमूलरघुपत्यभिन्नवेदव्यासस्य, श्रीगुरुसार्वभौमस्य च अनुग्रहविशेषस्य पात्राणि भवन्तु, तद्बलेन उपो-द्बलिताः सन्तः एवमेव भविष्यत्कालेऽपि ज्ञानकार्येषु बद्धकङ्कणाः भवन्तु इति अस्मदुपास्यश्रीमूलरामे, श्रीगुरुराजे च, भक्त्या सम्प्रार्थयामः ।

अधुना एतद्भूरिप्रमाणस्य मुद्रणादिकार्यस्य बहुसमर्थरीत्या निर्वहणं कृतवद्भ्यः सुधामुद्रणाधिकारिभ्यः वरखेडकर धनञ्जयाचार्येभ्यश्च अस्माकं विशेषानुग्रहवचनानि ।

*इति नारायणस्मृतिः ।*

मन्त्रालयक्षेत्रम्,

मन्मथसंवत्सरम्, गतशाके १९३७,

वैशाख शुक्ल पौर्णिमा ।

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां
श्री श्री सुयतीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

## श्री श्री सुबुधेन्द्रतीर्थश्रीपादानां

परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।

**प्रधानसम्पादकाः**


महामहोपाध्यायाः राष्ट्रपतिप्रशस्तिपुरस्कृताः श्रीपादपुत्राः

## श्री राजा श्री गिरिआचार्याः


**सम्पादकविद्वन्मण्डली**


विद्वान् डॉ. विद्यावाचस्पति श्री वादिराजाचार्य राघवेन्द्राचार्य पञ्चमुखी

*निर्देशकः श्रीगुरुसार्वभौमसंशोधनमन्दिरम्, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः*

विद्वान् डॉ. श्री एन्. वादिराजाचार्यः

*प्रांशुपालाः श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्, मन्त्रालयः*

विद्वान् श्री कडप राघवेन्द्राचार्याः

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः



**प्रकाशनम्**

## जगद्गुरुश्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

# श्रीमन्न्यायसुधा – परिमळाद्युपेता

## टिप्पणीनां क्रमः तथा सङ्क्षिप्तनामानि

| क्र.सं. | कर्तृनाम | टिप्पणीनाम | सङ्क्षिप्तनाम |
|---|---|---|---|
| १ | श्री विजयीन्द्रतीर्थाः | न्यायसुधाबिन्दुः | बिन्दुः— |
| २ | श्री राघवेन्द्रतीर्थाः | परिमळः | परि०— |
| ३ | श्री श्रीपादराजतीर्थाः | वाग्वज्रः | वाग्वज्रः— |
| ४ | श्री वादिराजतीर्थाः | गुर्वर्थदीपिका | गु०दी०— |
| ५ | श्री यदुपत्याचार्याः | टिप्पणी | यादु०— |
| ६ | श्री वंशपल्ली श्रीनिवासाचार्याः | वाक्यार्थविवृतिः | वं०प०— |
| ७ | श्री गलगली नरसिंहाचार्याः | आनन्दः | आनन्दः— |
| ८ | श्री कंबालूरु रामचन्द्रतीर्थाः | विवृतिः | कं०रा०— |
| ९ | श्री श्रीनिधितीर्थाः | टिप्पणी | श्रीनिधि०— |
| १० | श्री विद्याधीशतीर्थाः | वाक्यार्थचन्द्रिका | वा०चं०— |
| ११ | श्री पाण्डुरङ्गि केशवाचार्याः | शेषवाक्यार्थचन्द्रिका | शे०चं०— |
| १२ | श्री पाण्डुरङ्गि नरसिंहाचार्याः | वाक्यार्थरत्नमाला | वा०र०— |
| १३ | श्री सत्यव्रततीर्थाः | सुधाविवृतिः | स०व्र०— |
| १४ | श्री कुण्डलगिरिआचार्याः | रसकूलङ्कषः | कुण्डल०— |
| १५ | श्री सत्यनाथतीर्थाः | दुर्घटवाक्यार्थविचारः | स०ना०— |
| १६ | श्री विट्ठलभट्टाः | टिप्पणी | विट्ठ०— |
| १७ | श्री विष्णुतीर्थाः | रसरञ्जनी | रस०— |
| १८ | श्री अडवी कृष्णाचार्याः | लघुरसरञ्जनी | ल०र०— |
| १९ | श्री मन्नारी कृष्णाचार्याः | चषकः | चषकः— |
| २० | श्री एरी बाळाचार्याः | उपस्पर्शः | ए०बा०— |
| २१ | श्री काशी आचार्याः | काशी टिप्पणी | काशी०— |
| २२ | श्री गूढकर्तृकाचार्याः | गूढकर्तृका | गूढ०— |
| २३ | श्री प्रदीपकाराः | प्रदीपः | प्रदीपः— |
| २४ | श्री पांग्री श्रीनिवासाचार्याः | टिप्पणी | पांग्री०— |
| २५ | श्री कल्लापूर सत्याधिराजाचार्याः | हुग्गि | हुग्गि०— |

# टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातॄणामभिप्राय एव। सः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

**सम्पादकाः**

॥ श्रीमन्मूलरामो विजयते ॥

# प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्ट्यधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्यैव व्यञ्जयति।

| | **व्याख्यातारो महाभागाः** | **व्याख्यानस्य नाम** |
|---|---|---|
| १) | श्री श्रीपादराजतीर्थाः | वाग्वज्रम् |
| २) | श्री विजयीन्द्रतीर्थाः | न्यायसुधाबिन्दुः |
| ३) | श्री वादिराजतीर्थाः | गुर्वर्थदीपिका |
| ४) | श्री राघवेन्द्रतीर्थाः | परिमलः |
| ५) | श्री यदुपत्याचार्याः | टिप्पणी |
| ६) | श्री वंशपल्ली श्रीनिवासाचार्याः | वाक्यार्थविवृतिः |
| ७) | श्री गलगली नरसिंहाचार्याः | आनन्दः |
| ८) | श्री कंबालूरु रामचन्द्रतीर्थाः | विवृतिः |
| ९) | श्री श्रीनिधितीर्थाः | टिप्पणी |

| | | |
|---|---|---|
| १०) | श्री विद्याधीशतीर्थाः | वाक्यार्थचन्द्रिका |
| ११) | श्री पाण्डुरङ्गि नरसिंहाचार्याः | वाक्यार्थरत्नमाला |
| १२) | श्री पाण्डुरङ्गि केशवाचार्याः | शेषवाक्यार्थचन्द्रिका |
| १३) | श्री कुण्डलगिरि आचार्याः | रसकूलङ्कषः |
| १४) | श्री सत्यव्रततीर्थाः | सुधाविवृतिः |
| १५) | श्री सत्यनाथतीर्थाः | दुर्घटवाक्यार्थविचारः |
| १६) | श्री विट्ठलभट्टाः | टिप्पणी |
| १७) | श्री कल्लापूर सत्याधिराजाचार्याः | हुग्गि |
| १८) | श्री विष्णुतीर्थाः | रसरञ्जनी |
| १९) | श्री अडवि कृष्णाचार्याः | लघुरसरञ्जनी |
| २०) | श्री मन्नारि कृष्णाचार्याः | चषकः |
| २१) | श्री एरी बाळाचार्याः | उपस्पर्शः |
| २२) | श्री काशी तिम्मण्णाचार्याः | काशी टिप्पणी |
| २३) | श्री गूढकर्तृकटिप्पणीकाराः | टिप्पणी |
| २४) | श्री प्रदीपकाराः | प्रदीपः |
| २५) | श्री पांग्री श्रीनिवासाचार्याः | टिप्पणी |
| २६) | श्री रोट्टि वेङ्कटभट्टाः | सुधाविवृतिः |
| २७) | श्री ताम्रपर्णी आचार्याः | टिप्पणी |
| २८) | श्री उमर्जी प्रह्लादकृष्णाचार्याः | उमर्जी |
| २९) | श्री व्यासतत्त्वज्ञतीर्थाः | कुलिशम् |
| ३०) | श्री महेश्वरसूरिः | टिप्पणी |
| ३१) | श्री पुट्ट तंबि आचार्याः | टिप्पणी |
| ३२) | श्री रत्नगर्भ ओडेयर् | टिप्पणी |
| ३३) | श्री अनन्तभट्टाः | टिप्पणी |
| ३४) | श्री सत्यनाथाचार्याः | टिप्पणी |
| ३५) | श्री जयवेङ्कटाचार्याः | टिप्पणी |
| ३६) | श्री गूढकर्तृकाचार्याः | सुधासारसङ्ग्रहः |
| ३७) | श्री गलगली गोविन्दाचार्याः | पञ्चरत्नस्तबकः |
| ३८) | श्री श्रीमुष्णाचार्याः | पञ्चाधिकरणी |

| | | |
|---|---|---|
| ३९) | श्री लिङ्गेरि श्रीनिवासाचार्याः | सिद्धान्तप्रभा |
| ४०) | श्री पाण्डुरङ्गि केशवाचार्याः | सुधावाक्यार्थविनोदः |
| ४१) | श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः) | टिप्पणी |
| ४२) | श्री सत्यनाथाः | न्यायसुधापरशुः |
| ४३) | श्री सुमतीन्द्रतीर्थाः | भावरत्नकोशः |
| ४४) | श्री पाण्डुरङ्गि केशवाचार्याः | मञ्जरी |
| ४५) | श्री व्यासतत्त्वज्ञतीर्थाः | लघुरसरञ्जनी |
| ४६) | श्री व्यासतत्त्वज्ञतीर्थाः | गुरुरसरञ्जनी |
| ४७) | श्री भीमराव् कुलकर्णी कुम्बारगेरी | टिप्पणी |
| ४८) | श्री सत्यपराक्रमतीर्थाः | सुधाफक्किका |
| ४९) | श्री हुलिगि श्रीपत्याचार्याः | टिप्पणी |
| ५०) | श्री अहोबिलाचार्याः | टिप्पणी |
| ५१) | श्री सत्यप्रज्ञतीर्थाः | टिप्पणी |

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमत्सुशमीन्द्रतीर्थ-श्रीमत्सुयतीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामि-मठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुबुधेन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विठ्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्प-यामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य संपादनविषये महदुपकृतवद्भ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्ट महाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्या-चार्येभ्यः, तथा विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांग्री श्रीनिवासाचार्याणां टिप्पणीं

दत्तवद्भ्यः विद्वद्भ्यः श्री पांग्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधा-बिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन्. राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री अक्कि राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री बण्डी शामाचार्येभ्यः, विद्वद्भ्यः श्री बाळगारु रोचनाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री एल्. कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री बि. मधुसूदनाचार्येभ्यः, विद्वद्भ्यः श्री हेच्. श्रीकान्ताचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः डॉ. श्री डि. माधवाचार्येभ्यः, विद्वद्भ्यः गरग जयरामाचार्येभ्यः, विद्वद्भ्यः श्री बि. भास्कराचार्येभ्यः, विद्वद्भ्यः श्री रमेशाचार्येभ्यः, विद्वद्भ्यः श्री जगन्नाथाचार्येभ्यः, विद्वद्भ्यः श्री अर्चक वेदव्यासाचार्येभ्यः, विद्वद्भ्यः श्री श्रीनाथाचार्येभ्यः, विद्वद्भ्यः श्री मोहनाचार्येभ्यः, विद्वद्भ्यः श्री प्रदीपसिंहाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, श्री कुर्डि पवनाचार्येभ्यः, विद्वद्भ्यः श्री पुरोहित वेणुगोपालाचार्येभ्यश्च, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यै-श्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे ।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः । अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः । तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्नुमः । येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः ।

इत्थम् ।

भवदीयम्

**श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,**

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

# प्रस्तावना

**यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।**
**न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥**

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्ख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसम्बन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । एतादृशस्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं स्वीकृत्य स्वगुरूणां विद्यारण्यारण्यछेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकेन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त श्रीमज्जयतीर्थश्रीमच्चरणाः। तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यास्य, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके श्रीटीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः।

महानुभावाः श्रीमज्जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन्।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः। तद्यथा—

**न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा**
**न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।**
**परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं**
**प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम्॥**

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति। एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम्। एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म। यथा—

**आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं**
**मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम्।**
**शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः**
**व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम्॥**

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्र्य अत्र प्रकाशं नीयते। महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनासमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम्। श्रीकृष्णार्पणमस्तु॥

*आचार्याः साणूरु भीमभट्टाः*
प्रथमपञ्चदशभागप्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## सम्पुटम् – १६

### विषयानुक्रमणिका


| विषयः | परिच्छेदः | पुटसंख्या |
|---|---|---|
| **वैशेषिकाधिकरणम्** (गतसम्पुटात् अग्रे) | | |
| १)-आ-२-ख-२-चच-३-ट-२-त-१-म-१-य | | |
| २) सामान्यस्यैकैकाश्रितत्वम् | २१४ – २२५ | ७५०१-७५३४ |
| श) तस्य प्रत्यक्षसिद्धता | २१५ | ७५०४ |
| ष) तस्य अनुमानसिद्धता | २१५ – २२१ | ७५०४-७५१९ |
| १) सामान्यस्यानेकवृत्तित्वाभावसाधकधर्मत्वानुमाने आभासोद्धारः | २१६ | ७५०५ |
| २) तदनुमानस्य 'अनेकत्वसङ्ख्यायां व्यभिचार'शङ्का तन्निरासश्च | २१७ | ७५०६ |
| ३) प्राभाकरमतानुसारेण तदनुमाने व्यभिचारशङ्का तन्निरासश्च | २१८ | ७५०८ |
| ४) नरत्वादिसामान्यस्य प्रतिव्यक्तिभिन्नत्वे अनुमानान्तरम् | २१९ – २२१ | ७५१३-७५१९ |
| ह) विनष्टनराश्रितनरत्वस्य अविनाशशङ्का तन्निरासश्च | २२० | ७५१६ |
| १) नष्टानष्टनराश्रितनरत्वयोरेकत्वे प्रमाणाभावः | २२१ | ७५१७ |
| स) तस्य आगमसिद्धता | २२२ | ७५१९ |
| शश)पीलुपाकवाद्युक्तपाकजप्रक्रियानिरासान्नोक्तार्थे बाधकम् | २२३ – २२५ | ७५२१-७५३४ |
| १) उक्तप्रक्रियायाः अप्रामाण्ये अयुक्तताशङ्का तन्निरासश्च | २२४ | ७५२६ |
| ह) शङ्कोक्तानुमानद्वयदूषणे बाधकतर्कशङ्कोद्भावनं तन्निरासश्च | २२५ | ७५२९ |

१)-आ-२-ख-२-चच-३-ट-२-त-१-म-१-य

| | | |
|---|---|---|
| ३) 'नित्यमेकमनेकानुगतं सामान्यम्' इति यत् नैयायिकोक्तं सामान्यं तन्निराकृतेरयुक्तत्वशङ्का तन्निरसनं च | २२६ – २४७ | ७५३४-७५९० |
| श) तत्सामान्यनिराकृतेरयुक्तत्वशङ्का | २२६ – २३२ | ७५३४-७५५२ |
| १) व्युत्पत्त्यभावरूपबाधकसद्भावः | २२६ | ७५३४ |
| ह) बाधकतर्कस्याप्रयोजकताशङ्का तन्निरासश्च | २२७ – २२८ | ७५३५-७५४४ |
| १) पदव्युत्पत्तिहेतुविवरणम् | २२७ | ७५३५ |
| २) तस्य हेतोरप्रयोजकत्वशङ्का तन्निरासश्च | २२८ | ७५३८ |
| २) तथात्वे कार्यकारणभावावधारणाभावरूपबाधकान्तरं च | २२९ | ७५४४ |
| ३) अनन्तेषु उपदेशासम्भवश्च | २३० | ७५४७ |
| ४) व्याप्तिज्ञानानुपपत्तिः | २३१ | ७५४८ |
| ५) सामान्यापवादन्यायानुपपत्तिः | २३२ | ७५४९ |
| ष) गोत्वादेः नित्यत्वमपि अनिवार्यम् इति च शङ्का | २३३ | ७५५३ |
| स) उक्तशङ्कानिराकरणम् | २३४ – २४७ | ७५५३-७५९० |
| १) सामान्यानुगतत्वाभावेऽपि व्युत्पत्त्यादेः साध्येनैव गम्यत्वम् | २३४ – २३९ | ७५५३-७५७२ |
| ह) सादृश्येन शब्दव्युत्पत्तिप्रकारप्रदर्शनम् | २३५ – २३९ | ७५५५-७५७२ |
| १) 'अयं गौः' इत्यादिवाक्यस्य सादृश्यमुखेन व्याप्तिपरत्वम् | २३५ | ७५५५ |
| २) तथात्वेऽपि तटस्थस्य चोद्यं तत्परिहारश्च (पिण्डविशेषे लिङ्गप्रकरणबलात् कार्यप्रतिपत्तिः इति) | २३६ | ७५५८ |
| ३) शब्दशक्तेः सादृश्यव्यापकत्वात् सादृश्यं शब्दशक्तिं ज्ञापयति | २३७ | ७५६० |
| ४) उक्तार्थसङ्ग्रहः | २३८ | ७५६१ |
| ५) उक्तार्थे पुनः शङ्कान्तराणि तन्निरासाश्च | २३९ | ७५६६ |
| २) कार्यकारणभावावधारणादिकस्यापि सादृश्येनैवोपपत्तिः | २४० | ७५७२ |
| ३) 'अनुगतसामान्येनैव व्युत्पत्त्यादिकं नान्यथा' इति मन्वानं प्रति बाधकोक्तिः | २४१ – २४७ | ७५७४-७५९० |
| ह) जातौ जात्यनङ्गीकारात् 'गोत्वं नित्यं जातित्वात्' इत्यादिव्याप्तिज्ञानाद्यभावप्रसङ्गः | २४१ – २४६ | ७५७४-७५८५ |

१) जातौ जातित्वजात्यस्तित्वाङ्गीकारेऽनवस्थितिप्रसङ्गः २४२ ७५७५

२) तन्मते जातिशब्दस्य निमित्ततयोपेतत्वात्, ज्ञापकतयानुपेतत्वात् उपदेशाधीनत्वाङ्गीकरणानुपपत्तिः २४३ ७५७६

३) व्यक्तीनां व्यक्तिशब्दवाच्यत्वविज्ञानमपि व्यक्तित्वजात्यभावेन दूषितम् २४४ – २४५ ७५७७-७५८३

क्ष) सत्तया परापरभावशून्यमपि व्यक्तित्वं द्रव्यगुण-कर्मस्वस्तीति उक्तदूषणस्याप्रयोजकत्वशङ्का, तथात्वेऽनवस्थापत्त्या तन्निरासश्च २४५ ७५८१

४) अनुगतस्य स्वरूपत्वसामान्यस्याभावात् सकलपदार्थस्वरूपं स्वरूपशब्दवाच्यं न स्यादिति स्थलान्तरे च बाधकम् २४६ ७५८३

ळ) उक्तप्रसङ्गस्य असङ्गतत्वशङ्का तन्निरासश्च २४७ ७५८६

शश) अनुगतसामान्यदूषणोपसंहारः २४७ ७५८६

<u>१)-आ-२-ख-२-चच-३-ट-२-त</u>

२) समवायस्य विशेषतो निराकरणम् २४८ – २९५ ७५९०-७६८६

प) समवायस्य सर्वत्रैकत्वं नित्यत्वं च 'तत्त्वम्भावेने'ति सूत्रे यदुक्तं तस्य निराकरणम् २४८ – २६९ ७५९०-७६३२

१) समवायस्य एकत्वनिरासः २४८ – २६७ ७५९०-७६२८

य) 'औपाधिकविशिष्टाद्यं त्रितयान्यदि'ति पक्षनिराकरणम् २४८ – २५२ ७५९०-७६०४

१) औपाधिकं, विशिष्टं, आद्यपदोक्तमुपलक्षितं चेत्येतत्त्रयमपि त्रितयाद्भिन्नमभिन्नं वेत्यस्य प्रश्नस्य स्पष्टीकरणम् २४९ ७५९२

२) औपाधिकविशिष्टाद्यं त्रितयाद्भिन्नमितिपक्षे दोषप्रदर्शनम् २५० ७५९८

३) औपाधिकविशिष्टपदयोरर्थान्तरमपि तत्र निरुपयोगि २५१ ७५९९

४) लीलावतीकारोक्तस्य विशिष्टपदार्थस्य दूषणम् २५२ ७६०१

र) 'औपाधिकविशिष्टाद्यं त्रितयानन्यदि'ति पक्षनिराकरणम् २५३ – २६६ ७६०४-७६२७

१) अनन्यत्वपक्षेऽपि तत्त्रितयस्य विविधविकल्पाः २५३ ७६०४

२) अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थेतरविकल्पानां निराकरणम् २५४ ७६०७

३) अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थविकल्पस्यापि निराकरणम् २५५ – २६६ ७६०८-७६२७

१)-आ-२-ख-२-चच-३-ट-२-त-२-प-१-र-३

श) अग्निमच्छब्दार्थभूत 'पर्वतस्याग्निसंयोगः' इत्यत्रत्यषष्ठ्यर्थविकल्पनिरासः २५५ – २६६ ७६०८-७६२७

१) तच्छष्ठ्याः समवायार्थकत्वे एकत्वा(अभेदत्वा)त्सिद्धसाधनता २५६ – २५७ ७६१०-७६१३

ह) उक्तार्थसङ्ग्रहः २५७ ७६११

२) समवायस्य एकत्वे(अभेदे)ऽपि औपाधिकभेदाङ्गीकारे तदभेदानुपपत्तिः २५८ – २६६ ७६१४-७६२७

ह) उक्तानुपपत्तेः अप्रयोजकत्वशङ्का तन्निराकरणं च २५९ – २६६ ७६१५-७६२७

१) समवाये अभेदभेदयोरविरोधस्य पारमार्थिकत्वा-
पारमार्थिकत्वाभ्यामसम्भावितत्वम् २५९ – २६६ ७६१५-७६२७

क्ष) समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वानङ्गीकारः २५९ ७६१५

ज्ञ) समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वाङ्गीकारेऽपसिद्धान्तः
(मायावादित्वापत्तिः) २६०–२६६ ७६१६-७६२७

१) प्रकारभेदेन विरोधशान्तिशङ्का तन्निरासश्च २६१ – २६६ ७६१७-७६२७

क्षक)औपाधिकत्वस्य उपाधिजन्यत्वे उपाधिगम्यत्वे वाऽपि
समवायानन्त्यप्रसङ्गः २६१ – २६४ ७६१७-७६२७

१) सर्वदेशकालगतानामवयवावयव्याद्युपाधीना-
मनन्तत्वात्तथात्वम् २६१ – २६४ ७६१७-७६२४

क्षच) औपाधिकभेदो नाम न केवलं उपाधीनामेव
भेदः अपि तु तत्समवायभेद एव २६२ – २६३ ७६१९-७६२०

१) औपाधिकस्वाभाविकभेदयोर्मध्ये अभेद-
विरोधाभावसाधकविशेषाभावः २६३ ७६२०

क्षछ) उक्तार्थसङ्ग्रहः २६४ ७६२१

१)-आ-२-ख-२-चच-३-ट-२-त-२-प-१-र-३-श-२-ह-१-ज्ञ-१-क्षक

२) उपाधिगम्यत्वार्थपक्षेण उक्तदोषाभावशङ्का तन्निरासश्च २६५ – २६६ ७६२५-७६२७

क्षच) उपाधिगम्यमौपाधिकमिति पक्षमङ्गीकृत्योक्तदोषाभावशङ्का २६५ ७६२५

क्षछ) तच्छङ्कापरिहारश्च २६६ ७६२६

१)-आ-२-ख-२-चच-३-ट-२-त-२-प-१

ल) समवायैकत्वनिरासोपसंहारः २६७ ७६२७

१)-आ-२-ख-२-चच-३-ट-२-त-२-प

२) समवायस्य नित्यत्वनिराकरणम् २६८ – २६९ ७६२९-७६३२

य) समवायनित्यत्वस्यापि उक्तदोषनिवारकाभावादयुक्तत्वम् २६८ ७६२९

३) समवायस्य एकत्वनित्यत्वनिरासोपसंहारः २६९ ७६३२

१)-आ-२-ख-२-चच-३-ट-२-त-२

फ) प्रकारान्तरेण 'औपाधिकविशिष्टाद्यम्' इत्याद्यनुव्याख्यानस्य सङ्गतिप्रदर्शनम् २७० ७६३२

ब) स्वमतानुसारेण विशिष्टादिपदार्थनिरूपणे द्वाभ्यां प्रकाराभ्यां दोषाभावदर्शनम् २७१ – २७२ ७६३४-७६३९

१) प्रथमप्रकारः २७१ ७६३४

२) द्वितीयप्रकारः २७२ ७६३८

भ) प्रथमप्रकारोक्तार्थानुपपत्तिशङ्का तन्निरासश्च २७३ – २७८ ७६४०-७६५०

१) विशेष्याभिन्नं विशिष्टम् इत्युक्तेः अनुपपत्तिशङ्का तन्निरासश्च २७३ – २७८ ७६४०-७६५०

य) अभावभावयोर्भावाभावात्मकत्वस्य सामान्यतः प्रसिद्धत्वम् २७३ – २७६ ७६४०-७६४६

१) भावाभावयोः अभावभावधर्मत्वस्य क्वचित्प्रमाणसिद्धत्वम् २७३ – २७६ ७६४०-७६४६

श) तत्प्रमाणसिद्धत्वात् सर्वभावाभावानाम् अभावभावत्वानुपपत्त्यभावः २७४ ७६४३

ष) भावाभावयोः अभावभावधर्मत्वानुपपत्तौ द्रव्यादिर्भाव एव प्रागभावादिरभाव एव इति प्रसिद्धभावाभावविभागस्य गतिप्रदर्शनम् २७५ ७६४४

स) अभावभावयोर्भावाभावधर्मत्वस्य प्रत्यक्षादिसिद्धतायाः उपपादनम् २७६ ७६४५

र) भावाभावयोरभावभावधर्मत्वस्योपपन्नत्वात् विशेष्यविशिष्टयोरभेदोपपत्तिः २७७ ७६४७

ल) भावाभावयोरेकत्राविरोधेऽपि घटतदभावयोरप्यभेदापत्तिनिरासः २७८ ७६४८

म) द्वितीयप्रकारोक्त(परिणामवादोक्त)ार्थानुपपत्तिशङ्का तन्निरसनं च २७९ ७६५०

पप) अन्योन्याभावभेदपृथक्त्वानां परस्परभेदे प्रागुक्तदोषस्मारणम् २८० ७६५६

१) उक्तार्थोपपादनम् २८१ ७६५८

पफ) भेदस्य वस्तुस्वरूपत्वे सर्वशून्यतापत्तिवादिमायावादिचोदनानामपाकरणम् २८२ – २९५ ७६५९-७६८६

१) तत्र मायावादिनां चोदनानि २८२ ७६५९

२) तन्मायावादिचोदनानामपाकरणम् २८३ – २९५ ७६६३-७६८६

य) भेदस्य स्वरूपत्वे सर्वशून्यतापादनं अयुक्तम् २८३ – २९२ ७६६३-७६८०

| | | |
|---|---|---|
| १) अन्यस्य प्रतियोगित्ववादिनां अद्भुतता | २८३ | ७६६३ |
| २) अन्यस्य प्रतियोगित्वे उक्तदोषपरिहारप्रकारः | २८४ | ७६६४ |
| ३) उक्तदोषपरिहारस्य अवक्तव्यताया उपपादनम् | २८५ – २८६ | ७६६६-७६६८ |
| श) भेदशब्दस्य करणसाधनतामभ्युपगम्यैवैतत्परिहाराभिधानम् | २८५ | ७६६६ |
| ष) धर्मिभिन्नधर्मभेदवादे कथञ्चिदस्य वक्तव्यता न तु स्वरूपभेदवादे | २८६ | ७६६७ |
| ४) उक्तप्रकारेणैव 'भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयात्' इति चोद्यस्य निरासः | २८७ | ७६६९ |
| ५) प्रतियोगिनिरूप्यस्यापि भेदस्य वस्तुस्वरूपत्वे विरोधाभावः | २८८ | ७६७१ |
| ६) भेदस्य परप्रतियोगितोपपत्तेः स्वस्मिन्विदारणापत्त्यभावः | २८९ | ७६७३ |
| ७) स्वरूपविदारणेऽपि स्वल्पतैव स्यान्न तु शून्यता | २९० | ७६७५ |
| ८) सर्वशून्यतापादनस्य असङ्गतता | २९१ | ७६७६ |
| श) शून्यानां संयोगेन वस्तूत्पत्त्यभावात् 'वस्तुविदारणे संयोगनाशेन कार्यनाशे शून्यावशेष'ाभावः | २९१ | ७६७६ |
| ९) विदारणार्थकधातोः विभागाख्यगुणवाचकत्वं न तु अन्योन्याभावलक्षणभेदवाचकत्वम् | २९२ | ७६७७ |
| श) विभागान्यत्वयोः स्फुटो भेदः | २९२ | ७६७७ |
| र) मायावाद्यैकदेशि(गुणादिप्रक्रियानङ्गीकारि)मतनिरासः | २९३ | ७६८० |
| ल) भेदस्य वस्तुस्वरूपत्वे अद्वैतमतपर्यवसानं यदुक्तं तस्यायुक्तता | २९४ | ७६८२ |
| व) मायावादस्य निराकरणापेक्षयोपेक्षणस्यैवौचित्यम् | २९५ | ७६८५ |

<u>१)-आ-२-ख</u>

| | | |
|---|---|---|
| ३) सम्बन्धप्रसङ्गेन सम्बन्धिनाम् ईश्वरगुणसङ्ख्यादीनामपि विप्रतिपत्तेर्निरासः | २९६ – ३१९ | ७६८६-७७०९ |
| च) ईश्वरगुणसङ्ख्यानां विप्रतिपत्तेर्निरासः | २९६ – ३१९ | ७६८६-७७०९ |
| १) ईश्वरस्य अष्टमात्रगुणवत्त्वाभावः | २९६ | ७६८६ |
| २) ईश्वरस्यानन्तगुणवत्त्वम् | २९७ | ७६८८ |
| ३) ईश्वरज्ञानेच्छाप्रयत्नानामखण्डत्वाभावः | २९८ | ७६९१ |
| ४) ईश्वरगुणानां प्रत्येकमनन्तत्वविशेषवत्त्वानङ्गीकारे बाधकम् | २९९ | ७६९२ |

५) ईश्वरीयनित्यज्ञानादेः विषयापेक्षाभावनिरासः ३०० ७६९३

६) विषयाणां चानन्त्यात् ईश्वरीयज्ञानादेरनन्तविशेषतासिद्धिः ३०१ ७६९४

ट) औपाधिकविशेषस्य पूर्वमेव निराकृतता ३०१ ७६९४

७) वैशेषिकैकदेश्युक्त 'ईश्वरज्ञानस्य स्वप्रकाशत्वाभाव'ापाकरणम् ३०२ – ३०४ ७६९७-७७०२

ट) 'स्वप्रकाशज्ञानाभावेऽपीश्वरस्य सार्वज्ञसम्भवः' इति पक्षदूषणम् ३०३ ७६९८

ठ) ईश्वरज्ञानानामनन्तसङ्ख्याकत्वे कल्पनागौरवम् ३०४ ७७०१

८) ईश्वरस्यानन्तगुणवत्त्वे अनुपपत्तिशङ्का तन्निरासश्च ३०५ – ३१९ ७७०३-७७२३

ट) ईश्वरसुखानङ्गीकारे बाधकोपपन्नानुमानस्य साधकत्वे तत्रानुग्राहकतर्कस्य व्याप्त्यभावरूपदूषितता ३०५ – ३१५ ७७०३-७७१६

१) व्याप्त्यभावस्य श्रुत्युक्तता ३०६ – ३१५ ७७०४-७७१६

त) व्याप्त्यभावप्रतिपादकश्रुत्युदाहरणम् ३०७ – ३१५ ७७०६-७७१६

१) पक्षान्तरेण (श्रुतेः स्वार्थात् प्रच्यावनस्य अङ्गीकारेण) सोपाधिकतया व्याप्त्यभावः ३०८ – ३०९ ७७०६-७७०९

प) ईश्वरेच्छाविषयतया उपाध्यभावशङ्का तन्निरासश्च ३०९ ७७०६

२) पक्षान्तरस्यैव (आनन्दश्रुतेः दुःखाभावपरत्वाङ्गीकरणपक्षस्यैव) असिद्धत्वशङ्का तन्निरासश्च ३१० – ३१५ ७७०९-७७१६

प) श्रुतेः स्वार्थात्प्रच्यावनार्थं बाधकस्यैवाभावः ३१० – ३१५ ७७०९-७७१६

१) व्याप्तिबलप्रवृत्तबाधकाभावः ३११ – ३१२ ७७१०-७७११

२) सहदर्शनमात्रबलप्रवृत्तबाधकाभावः ३१३ – ३१५ ७७१२-७७१६

य) तथात्वे यज्ञादेरपि पापहेतुत्वे अविशेषः ३१३ – ३१५ ७७१२-७७१६

१) निषिद्धताया उपाधित्वात् अविशेषाभावशङ्का ३१४ – ३१५ ७७१३-७७१६

श) तथात्वेऽत्रापि दुःखित्वेनोक्तेरुपाधित्वाद्विशेषसद्भावः (सुखित्वे दुःखित्वं स्यादिति तर्कनिरासः) ३१५ ७७१३

ठ) ईश्वरे सुखाभावसाधकस्य निर्दुःखत्वानुमानस्य दूषणम् ३१६ – ३१८ ७७१६-७७२२

१) आनन्दश्रुतेः प्रामाणिकत्वे विवक्षितार्थासाधकानुमान-स्योपेक्षणीयत्वम् ३१६ ७७१६

२) उपजीव्यत्वादिरहितानुमानस्य श्रुतिबाधकत्वाभावेऽपि बाधकत्वाभ्युपगमे अतिप्रसङ्गः ३१७ ७७१७

३) श्रुतेरनुमानबाधकत्वे धर्मिग्राहिविरोधः कारणम् ३१८ ७७१९

ड) एतन्न्यायेनैव ईश्वरस्य विग्रहराहित्याद्यनुमानानामपि श्रुतिविरोधादप्रामाण्यमित्युपसंहारः ३१९ ७७२२

१)-आ

३) एतदधिकरणस्य चतुर्थसूत्र(ॐ नित्यमेव च भावात् ॐ)व्याख्यानम् (वैशेषिकादिदर्शने अनुपपत्त्यन्तरदर्शनम्) ३२०-३३४ ७७२४-७७५२

क) कालविशेषे द्व्यणुकादिप्रक्रमेण महाभूतसृष्ट्यङ्गीकारे कार्यं सदा भवेत् ३२०-३३४ ७७२४-७७५२

१) कालेच्छादिविशेष एव सृष्ट्यादिहेतुः इति न तत्पक्षे कालेच्छादेर्विभागाभावः ३२१-३३४ ७७२६-७७५२

च) अस्मन्मते कालेच्छादेः स्वभावत एव भेदाभ्युपगमात् नैतद्दोषावकाशः (स्वमते कालविशेषभावाभावप्रयुक्तः सृष्ट्यादेः समयनियमः) ३२२-३२७ ७७२८-७७४१

१) अनुव्याख्यानस्थ 'विशेषकाल','सदातना' इतिपदयोर्व्याकरणशुद्धता ३२३ ७७२८

२) कालादिभेदानां निरन्तरप्रवाहतया अनित्यत्वम् ३२४ – ३२७ ७७३२-७७४१

ट) कालविशेषाणां परमेश्वराज्जन्मनि श्रुतिप्रामाण्यम् ३२५ – ३२६ ७७३५-७७४०

१) 'सर्वे निमेषा जज्ञिरे' इति श्रुतिप्रामाण्यम् ३२५ ७७३५

२) 'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः' इत्यादि श्रुतिप्रामाण्यम् ३२६ ७७३८

ठ) कालस्योत्पत्तौ विरोधाभावोऽपि ३२७ ७७४०

छ) प्रकारान्तरेण सृष्ट्यादेः समयनियमसमर्थनम् (सदातनीयेश्वरेच्छायाः असङ्ख्यातविशेषवत्त्वात् तत्तद्व्यक्त्यव्यक्तिप्रयुक्तः सृष्ट्यादेः समयनियमः) ३२८ ७७४१

ज) उक्तार्थस्य सप्रमाणं विवरणम् ३२९ – ३३४ ७७४३-७७५२

१) ईशः, अव्याकृताकाशः, कालश्च सर्वदा स्वगता एव ३२९ ७७४३

२) 'स्वगताः' इत्युक्त्या देशकालयोः स्वातन्त्र्यशङ्कावारणम् ३३० ७७४४

३) उक्तार्थाभिप्रायः (कालस्योत्पत्तौ न काचिदनुपपत्तिः) ३३१ ७७४५

| | | |
|---|---|---|
| ४) महदादिसृष्टिसंहारकालवैचित्र्यनिमित्तमीशस्वभाव एव | ३३२ | ७७४९ |
| ५) स्वभावोऽपि ईशेच्छावश एव | ३३३ | ७७५० |
| ६) 'नित्या अनित्याश्च ततः' इति श्रुतिरपि सर्वस्येश्वराधीनतामाह | ३३४ | ७७५१ |
| १)-आ | | |
| ४) एतदधिकरणस्य पञ्चमषष्ठ(ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ, ॐ उभयथा च दोषात् ॐ)सूत्रयोर्व्याख्यानम् (वैशेषिकादिमते अनुपपत्त्यन्तरदर्शनम्) | ३३५–३३६ | ७७५२-७७५७ |
| क) पार्थिवादीनां चतुर्विधानां परमाणूनां नित्यतानुपपत्तिः | ३३५–३३६ | ७७५२-७७५७ |
| १) तेषां रूपस्पर्शादिहेतुभ्यः तेषां परमाणूनामनित्यता अनुमेया | ३३५ | ७७५२ |
| २) तेषां अहंमात्रोपचितानां विकृताकाराणामनित्यत्वमेव | ३३६ | ७७५६ |
| १)-आ | | |
| ५) एतदधिकरणस्य सप्तमसूत्र(ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ)स्य व्याख्यानम् | ३३७ | ७७५७ |
| क) श्रुतिविरुद्धत्वान्न तन्मतमुपादेयम् | ३३७ | ७७५७ |
| १)-इ | | |
| १) एतदधिकरणार्थोपसंहारः | ३३८ | ७७५८ |


* * *

## समुदायाधिकरणम्


| | | |
|---|---|---|
| १. प्रस्तावना : | १ | ७७६० |
| एतदाद्यधिकरणत्रये अपाक्रियमाणानां मतानां चातुर्विध्यं प्रदर्श्य अस्मिन्नधिकरणे तद्गतयोः वैभाषिकसौत्रान्तिकमतयोरेव निरसने प्राथम्यनिमित्तभूतं निरस्तवैशेषिकादिमतनिरसनप्रसङ्गातिसाम्यप्रदर्शनम् | १ | ७७६० |
| २. अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासः | २ तः ७ | ७७६३-७७७४ |
| अ) सामान्यतो निरूपणम् | २ तः ५ | ७७६३-७७७० |
| १) जगतः स्वरसक्षणिकता | २ तः ५ | ७७६३-७७७० |

| | | |
|---|---|---|
| क) जगतः स्वरसक्षणिकतायाः स्पष्टीकरणम् | २ | ७७६३ |
| ख) अनात्मप्रञ्चस्य स्वरसक्षणिकता | ३ तः ४ | ७७६५-७७६८ |
| १) जगतः क्षणिकत्वे आपत्तिशङ्का तन्निरासश्च | ३ तः ४ | ७७६५-७७६८ |
| च) अणुसमुदायातिरिक्तावयव्यभावः | ३ | ७७६५ |
| छ) ईश्वरस्य अवयविनश्च समुदायेतरत्वशङ्का तन्निरासश्च | ४ | ७७६६ |
| ग) आत्मप्रपञ्चस्यापि स्वरसक्षणिकता | ५ | ७७६९ |
| आ) विभागनिरूपणम् | ६ तः ७ | ७७७०-७७७४ |
| १) जगतः पञ्चस्कन्धात्मना स्थितिः | ६ तः ७ | ७७७०-७७७४ |
| क) जगतः पञ्च स्कन्धाः | ६ | ७७७० |
| ख) सुखमोक्षयोरपि पञ्चस्कन्धान्तर्गतता | ७ | ७७७२ |
| ३.उपन्यस्तस्य मतस्य निराकरणम् | ८ तः ८४ | ७७४४-७९१८ |
| अ) उपन्यस्तमतनिराकरणपरतया एतदधिकरणगतानाम् अष्टानां सूत्राणां योजना | ८ तः ७६ | ७७७४-७७०२ |
| १) प्रथमसूत्रार्थप्रदर्शनम् | ८ तः १६ | ७७७४-७७८८ |
| क) समुदायनिराकरणम् | ८ तः १६ | ७७७४-७७८८ |
| १) समुदाये एकपरमाणुहेतुकत्वस्यायोगः सहेतुकः | ८ | ७७७४ |
| २) समुदाये अनेकपरमाणुहेतुकत्वस्याप्ययोगः सहेतुकः | ९ तः १५ | ७७७६-७७८६ |
| च) अनेकहेतुकत्वस्यायोगः | ९ | ७७७६ |
| छ) अनेकहेतुकत्वस्यायोगे कारणद्वयं विकल्प्य तदयोगस्य समर्थनम् | १० तः ११ | ७७७७-७७७९ |
| १) असमुदितानेकहेतुकत्वे सर्वत्र गोघटादिबुद्धिप्रसङ्गः, समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्च | १० | ७७७७ |
| २) समुदितानेकहेतुकत्वे अन्योन्याश्रयदोषप्रदर्शनपूर्वकः एतत्सूत्रार्थोपसंहारः | ११ तः १५ | ७७७९-७७८६ |
| ट) अस्य अन्योन्याश्रयदोषस्य उपलक्षणपरतया व्याख्यानम् | १२ तः १४ | ७७७९-७७८५ |
| १) समुदाये अवयवित्वप्रसङ्गापादनम् | १२ तः १३ | ७७७९-७७८२ |
| त) समुदाये विकल्पत्रयकल्पनपूर्वकं तृतीयविकल्पे अवयवित्वप्रसङ्गापादनम् | १२ | ७७७९ |
| थ) समुदाये अवयवित्वप्रसङ्गस्य प्रसङ्गाभावशङ्का तन्निरासश्च | १३ | ७७८१ |

२) समुदायस्यावयवित्वे बाधकशङ्का १४ ७७८२
३) समुदायस्यावयवित्वे बाधकशङ्काया निरासः १५ ७७८५
३) सूत्रकारीयस्य समुदायनिराकरणस्य जात्युत्तरताशङ्का तत्परिहारश्च १६ ७७८७
२) द्वितीयसूत्रार्थप्रदर्शनम् (समुदायस्य समुदितानेकहेतुकत्वे उक्तस्यान्योन्याश्रयदोषस्य आक्षेपपूर्वकं समाधानम्) १७ तः ३४ ७७८९-७८२०
क) उक्ते अन्योन्याश्रयदोषे आक्षेपः १७ तः १९ ७७८९-७७९५
१) उक्ते अन्योन्याश्रयदोषे आक्षेपस्य त्रेधा व्याख्यानम् १७ तः १९ ७७८९-७७९५
च) उक्ते अन्योन्याश्रयदोषे आक्षेपस्य प्रथमं व्याख्यानम् १७ ७७८९
छ) उक्ते अन्योन्याश्रयदोषे आक्षेपस्य द्वितीयं व्याख्यानम् १८ ७७९१
ज) उक्ते अन्योन्याश्रयदोषे आक्षेपस्य तृतीयं व्याख्यानम् १९ ७७९४
ख) उक्तस्य अन्योन्याश्रयदोषे आक्षेपस्य समाधानम् २० तः २१ ७७९५-७७९८
ग) अन्योन्याश्रयदोषे उक्ताक्षेपसमाधानस्य विवरणम् २२ तः ३४ ७७९८-७८२०
१) कारणविकल्पचतुष्टयेन सह बुद्धिस्थकल्पान्तरस्याप्यनुपपत्तिः २२ तः २५ ७७९८-७८०६
च) कारणं चतुर्धा विकल्प्य प्रथमविकल्पानुपपत्तिः २२ ७७९८
छ) चतुर्विधकारणविकल्पगतद्वितीयविकल्पानुपपत्तिः २३ ७८०१
ज) चतुर्विधकारणविकल्पगततृतीयविकल्पानुपपत्तिः २४ ७८०४
झ) चतुर्विधकारणविकल्पगतचतुर्थविकल्पानुपपत्तिः २५ ७८०५
ञ) बुद्धिस्थकल्पान्तरस्यानुपपत्तिः २६ ७८०६
२) उक्तविकल्पितकारणानुपपत्तिसमर्थनम् २७ तः ३४ ७८०७-७८२०
च) उक्तविकल्पितकारणानुपपत्तेः अदृष्टसहकारिवशात् परिहारशङ्का तत्समाधानञ्च २७ तः २९ ७८०७-७८१४
छ) उक्तविकल्पितकारणानुपपत्तेः व्याहतत्वमाशङ्क्य कार्यकारणभावाङ्गीकारेण उक्तान्योन्याश्रयपरिहारशङ्का, कार्यकारणभावाङ्गीकारे नियामकाभावात् तन्निरासश्च ३० तः ३४ ७८१४-७८२०
१) उक्तप्रकारेण उक्तान्योन्याश्रयपरिहारशङ्का तन्निरासश्च ३० ७८१४
२) क्षणभङ्गनये कार्यकारणभावाङ्गीकारायोगः ३१ तः ३४ ७८१६-७८२०
ट) कार्यनियमनिराकरणम् ३२ ७८१८
ठ) कारणनियमनिराकरणम् ३३ ७८१९
ड) कार्यकारणभावावधारणसम्भावनाप्रश्नः तन्निराकरणञ्च ३४ ७८१९

| | | |
|---|---|---|
| ३) अष्टमसप्तमसूत्रयोरर्थप्रदर्शनम् | ३५ तः ६० | ७८२१-७८६६ |
| क) अष्टमसूत्रार्थप्रदर्शनम् | ३५ तः ४० | ७८२१-७८३६ |
| १) क्षणिकतायाः प्रमाणाभावेन प्रमाणविरोधेन चापाकरणम् | ३५ तः ३८ | ७८२१-७८३६ |
| च) क्षणिकतायाः प्रमाणाभावेन अपाकरणम् | ३५ तः ३६ | ७८२१-७८२४ |
| छ) क्षणिकतायाः प्रमाणाभावप्रदर्शनम् | ३५ | ७८२१-७८२३ |
| ज) क्षणिकतायाः प्रमाणाभावस्य समर्थनम् | ३६ | ७८२३ |
| झ) क्षणिकतायाः प्रमाणविरोधेन अपाकरणम् | ३७ | ७८२५ |
| ञ) अस्यापाकरणस्योत्सूत्रितत्वशङ्कानिराकरणम् | ३८ | ७८२५ |
| २) सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति न त्वस्मन्मतम् | ३९ तः ४० | ७८२६-७८३६ |
| च) सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति | ३९ | ७८२६ |
| छ) सौगतानां प्रत्यभिज्ञानिराकरणं नास्मन्मतं स्पृशति | ४० | ७८३१ |
| ख) सप्तमसूत्रार्थप्रदर्शनम् | ४१ तः ४५ | ७८३६-७८४२ |
| १) प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का तन्निरासश्च द्वेधा | ४१ तः ४५ | ७८३६-७८४२ |
| च) प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का प्रत्यक्षबाधकाभावात्तन्निरासश्च | ४१ | ७८३६ |
| छ) अनुमानबाधकाभावात् प्रत्यभिज्ञायाः भ्रान्तित्वशङ्कानिरासः | ४२ तः ४५ | ७८३७-७८४२ |
| १) प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्का | ४२ | ७८३७ |
| २) प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्कानिरासः | ४३ तः ४५ | ७८३८-७८४२ |
| ट) एतच्छङ्कानिरासकानुव्याख्यानस्य टीका | ४३ तः ४५ | ७८३८-७८४२ |
| १) एतच्छङ्कानिरासकानुव्याख्यानस्य द्वेधा विवरणम् | ४३ तः ४४ | ७८३८-७८४२ |
| त) एतच्छङ्कानिरासकानुव्याख्यानस्य प्रथमं विवरणम् | ४३ | ७८३८ |
| थ) एतच्छङ्कानिरासकानुव्याख्यानस्य द्वितीयं विवरणम् | ४४ | ७८४० |
| २) अनेनानुव्याख्यानेन सप्तमसूत्रस्य व्याख्याततता | ४५ | ७८४२ |
| ग) एतदनुव्याख्यानद्वारकाष्टमसप्तमोभयसूत्रव्याख्याततताप्रदर्शनेन दूषणान्तरस्यापि सूचितता | ४६ तः ५१ | ७८४३-७८५५ |
| १) क्षणिकत्वसाधकानुमानस्य सत्प्रतिपक्षत्वं बाधितविषयत्वञ्चेति कथनेन आकाशेऽनैकान्त्यताया अपि सूचना | ४६ तः ५१ | ७८४३-७८५५ |

| | | |
|---|---|---|
| च) अस्या अनैकान्त्यताया उभयपक्षसमानताशङ्का तन्निरासश्च | ४७ | ७८४३ |
| छ) क्षणिकत्वसाधकानुमाने सत्प्रतिपक्षत्वादेः परिहारप्रयत्नस्तन्निरासश्च | ४८ तः ५१ | ७८४४-७८५५ |
| १) आकाशस्य मूर्ताभावत्वप्रयुक्ता सत्त्वाभावशङ्का तन्निरासश्च | ४८ | ७८४४ |
| २) प्रकारान्तरेण आकाशस्य अभावत्वनिवारणम् | ४९ तः ५१ | ७८४६-७८५५ |
| ट) अभावस्य सधर्मिप्रतियोगित्वमेव नियामकम् इति प्रदर्शनम् | ४९ | ७८४६ |
| ठ) अभावस्य धर्मिप्रतियोगिसाहित्यव्याप्तत्वोपपादनम् | ५० | ७८४६ |
| ड) आकाशस्य अधर्मिप्रतियोगित्वात् अभावत्वाभावः | ५१ | ७८४२ |
| घ) अष्टमसप्तमोभयसूत्रार्थोपसंहारः | ५२ | ७८५५ |
| ङ) उक्तार्थगतक्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वान्निरासश्च | ५३ तः ६० | ७८५६-७८६६ |
| १) क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का | ५३ | ७८५६ |
| २) क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कायाः निरासे तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वम् | ५४ तः ६० | ७८६०-७८६६ |
| च) क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कायाः निरासे तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वम् | ५४ | ७८६८ |
| छ) क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कानिरासविवरणम् | ५५ तः ५८ | ७८६०-७८६३ |
| १) अनुमानप्रक्रियाप्रदर्शनपूर्वकं तस्याः क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् | ५५ | ७८६० |
| २) आगमप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् | ५६ | ७८६२ |
| ३) प्रत्यभिज्ञाप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् | ५७ | ७८६२ |
| ४) अनुमानेन तर्कस्यापि व्याख्याततता | ५८ | ७८६३ |
| ज) प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनं तत्समर्थनञ्च | ५९ तः ६० | ७८६३-७८६६ |
| १) प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनम् | ५९ | ७८६३ |
| २) पूर्वोत्तरक्षणवर्तिनामात्मादीनां कार्यकारणभावाङ्गीकारेऽपि प्रसङ्गतादवस्थ्यम् | ६० | ७८६४ |

४) तृतीयसूत्रार्थप्रदर्शनम् ६१ तः ६७ ७८६७-७८८४

क) द्वितीयसूत्रोक्तस्य 'क्षणभङ्गनये कार्यकारणभावायोग'स्य समर्थनम् ६१ तः ६७ ७८६७-७८८४

१) क्षणभङ्गनये 'पूर्ववस्तुन उत्तरोत्पत्तिमात्रेण विनाशात् संस्कारार्पकत्व'य़योगः, तस्माच्च पक्षधर्मताज्ञानाद्ययोगात् अनुमानादिलौकिकव्यवहारस्याप्ययोगः ६१ तः ६७ ७८६७-७८८४

च) सर्वलोकसिद्धानुमानादिव्यवहारबलेन अलौकिकस्य 'सहभाविनः संस्कारार्पकत्व'स्य कल्पनमपि, प्रत्यभिज्ञा-सिद्धम्, आत्मादिकेषु एकत्वादिकं विहाय निर्मानकं भेदादिकमङ्गीकर्तुमशक्यत्वात् अयोग्यम् ६२ तः ६३ ७८६९-७८७२

१) क्षणिकत्वानुमानस्योक्तविधयाऽऽभासत्वेन दुर्बलत्वात् तेन बाधाभावात् प्रत्यभिज्ञायाः प्राबल्यमेव ६३ ७८७१

छ) कार्यकारणयोरेककालीनत्वं विना उत्तरस्य पूर्वसंस्कारयोगित्वाभावात् पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वम् ६४ तः ६७ ७८७२-७८८४

१) संबद्धानामेवान्यत्र संस्काराधायकत्वनियमात् भिन्नकालीनयोश्च संबन्धायोगात् क्षणिकत्वानुमानेऽपि संस्काराधानार्थं कार्यकारणयोरेककालीनत्वनियमोऽबाधितः ६५ तः ६७ ७८७३-७८८४

ट) क्षणभङ्गनये सर्ववस्तूनां क्षणमात्रावस्थायित्वस्य स्वीकृतत्वम् ६६ तः ६७ ७८८२-७८८४

१) तन्मते क्षणस्य पूर्वमध्यापरविभागरहितत्वोक्तत्वात् तद्विभागबलादपि संस्काराधायकत्वायोगः ६७ ७८८२

५) चतुर्थसूत्रार्थप्रदर्शनम् ६८ तः ७३ ७८८४-७८९६

क) स्थायिन इव क्षणिकस्यापि सत्त्वानुपपत्तेः अननुकूलता नाम तर्कदोषः ६८ तः ७३ ७८८४-७८९६

१) सूत्रकृद्भाष्यकृतोरत्र दूषणकथने क्रमव्यत्यासनिमित्ता अर्थविरोधशङ्का, विवक्षाभेदेन तच्छङ्कापरिहारश्च ६९ ७८८९

२) प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, तन्निरासः, तन्निरासस्य समर्थनञ्च ७० तः ७२ ७८९१-७८९३

च) प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावेन तच्छङ्कानिरासश्च ७० ७८९१

| | | |
|---|---|---|
| छ) प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे 'यत्सत्तत्क्षणिकं यथा देहादि' इत्यनुमानेन असिद्धिशङ्का तन्निरासश्च | ७१ तः ७३ | ७८९१-७८९६ |
| १) प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्य समर्थनम् | ७२ तः ७३ | ७८९२-७८९६ |
| ट) प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्याप्यसिद्धिशङ्का तन्निरासश्च द्वेधा | ७२ तः ७३ | ७८९२-७८९६ |
| १) प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च प्रथमः | ७२ | ७८९२ |
| २) प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च द्वितीयः | ७३ | ७८९३ |
| ६) सूत्राणां व्युत्क्रमेण व्याख्याने विशेषप्रदर्शनम् | ७४ | ७८९६ |
| ७) ५-६ सूत्रयोरव्याख्याने कारणप्रदर्शनम् | ७५ | ७८९८ |
| ८) सप्तमसूत्रस्य प्रकारान्तरेण व्याख्यानम् | ७६ | ७८९८ |
| आ) सौत्रान्तिकसिद्धान्तविशेषस्य निराकरणाभावे कारणप्रदर्शनम् | ७७ तः ८३ | ७९०२-७९१७ |
| १) तस्यात्यन्तनिर्दलस्य मायावादवदुपेक्षणीयत्वमेव | ७७ | ७९०२ |
| २) अनिराकृतस्य अनुमततायाः प्रमाणाविरोधे प्रमाणानुसारित्वे चैवाङ्गीकर्तुं शक्यता | ७८ | ७९०५ |
| क) बाह्यार्थस्याप्रत्यक्षत्वे तदसिद्धिरेव | ७९ तः ८१ | ७९०८-७९१४ |
| १) बाह्यार्थस्याप्रत्यक्षत्वे प्रमाणाभावः | ७९ | ७९०८ |
| २) बाह्यार्थस्यानुमेयत्वे पक्षीकरणायोगः, व्याप्त्यसिद्धिश्च | ८० | ७९०९ |
| ३) बाह्यार्थस्य प्रत्यक्षसिद्धत्वे शङ्कान्तरानास्पदता | ८१ | ७९१३ |
| ३) तस्य स्फुटतरानल्पदोषत्वेन शिष्यैरेव हेयतया ज्ञातुं शक्यत्वम् | ८२ | ७९१४ |
| इ) उक्तार्थेऽभिहितानामेतन्मतविरुद्धानुभवानामभिनयेन दर्शनम् | ८३ | ७९१६ |
| ई) वैभाषिकसौत्रान्तिकमतनिराकरणोपसंहारः | ८४ | ७९१७ |

✻ ✻ ✻

## असदधिकरणम्


१. माध्यमिकमतनिराकरणम्

(चतुर्धाविभक्तसौगतमतेषु तृतीयमतस्य निराकरणम्) १ तः ६४ ७९१९-८०६१

अ) उक्तार्थविरोधदर्शनपर्याप्तः माध्यमिकमतोपन्यासः १ तः ५ ७९१९-७९३२

१) तत्त्वविषयविप्रतिपत्तिदर्शनम् १ ७९१९

२) सहेतुकम् उपायोपेयपदार्थयोर्विप्रतिपत्तिदर्शनम् २ तः ४ ७९२३-७९३०

क) शून्यस्य लक्षणकथनम् २ ७९२३

ख) शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का तत्समाधानञ्च द्वेधा ३ तः ४ ७९२६-७९३०

१) शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का तस्याः प्रथमं समाधानञ्च ३ ७९२६

२) तस्याः शङ्कायाः द्वितीयं समाधानं सत्त्वद्वैविध्यदर्शनद्वारा ४ ७९२८

३) सृष्टिप्रलयविषये विगानदर्शनम् ५ ७९३१

आ) उपन्यस्तस्य माध्यमिकमतस्य निरसनम् ६ तः ५६ ७९३२-८०५१

१) उपन्यस्तमाध्यमिकमतनिरासकत्वमस्याधिकरणस्य ६ ७९३२

२) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अप्रामाणिकत्व-रूपातिप्रसङ्गदर्शनम् (तत्रैतदधिकरणीयादिमसूत्रीयव्याख्यानम्) ७ तः ११ ७९३३-७९४५

क) (एतदधिकरणीयप्रथमसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे प्रत्यक्षागमरूपप्रमाणाभावः ७ तः ८ ७९३३-७९३८

१) तत्र प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वकथनम् ७ ७९३३

२) तत्र प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वस्योपयोगे अभिसन्धिप्रदर्शनम् ८ ७९३५

ख) (एतदधिकरणीयद्वितीयसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अनुमानरूपप्रमाणाभावः ९ तः ११ ७९३८-७९४५

१) तत्र सामान्यतो दृष्टानुमानानां तर्कप्रतिघातः ९ तः ११ ७९३८-७९४५

च) एतत्सूत्रस्य त्रेधा व्याख्यानम् ९ तः ११ ७९३८-७९४५

| | | |
|---|---|---|
| १) एतत्सूत्रस्य प्रथमं व्याख्यानम् | ९ | ७९३८ |
| २) एतत्सूत्रस्य द्वितीयं व्याख्यानम् | १० | ७९४२ |
| ३) एतत्सूत्रस्य तृतीयं व्याख्यानम् | ११ | ७९४३ |
| ३) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः आदिकालीनत्वमात्रत्वेऽप्यतिप्रसङ्गदर्शनम् | १२ | ७९४५ |
| ४) उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का तन्निरासश्च | १३ तः ५६ | ७९४६-८०५१ |
| क) उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का | १३ | ७९४६ |
| ख) उक्तार्थस्य सर्वस्य व्याहतत्वशङ्कायाः निरासः (एतदधिकरणीयतृतीयचतुर्थसूत्रयोर्व्याख्यानम्) | १४ तः ५६ | ७९५०-८०५७ |
| १) एतदधिकरणीयतृतीयसूत्रव्याख्यानम् | १४ तः १५ | ७९५०-७९५६ |
| २) एतदधिकरणीयचतुर्थसूत्रव्याख्यानम् | १६ तः १९ | ७९५६-७९६४ |
| च) प्रपञ्चप्रत्ययस्य निवृत्त्यभावात् जगतः सांवृतिक-सत्यत्वाभावात् पारमार्थिकसत्यत्वसमर्थनम् | १६ तः १९ | ७९५६-७९६४ |
| १) प्रपञ्चप्रत्ययस्य उत्तरकाले बाधशङ्का तन्निरासश्च | १७ | ७९५९ |
| ट) दृष्टस्य भ्रान्ततायाः अदृष्टस्य चाभ्रान्ततायाः सर्वसम्मत्यभावः | १८ | ७९६१ |
| १) उक्तार्थस्य दृष्टान्तेन समर्थनम् | १९ | ७९६३ |
| ३) उक्तार्थेन उक्तव्याहतत्वशङ्कानां समीकरणान्तराणाञ्च निरासक्रमप्रदर्शनम् | २० | ७९६४ |
| च) पूर्वपक्ष्युक्तस्य 'सतोऽपि कारणत्वे प्रमाणाभाव'स्य परिहारे तेनापादितायाः व्याहतत्वशङ्कायाः समीकरणान्तराणाञ्च परिहारः | २० | ७९६४ |
| ४) प्रकारान्तरेणाप्यैतदधिकरणीयचतुर्थसूत्रव्याख्यानम् (विश्वमिथ्यात्वेऽभिहितानुमानदूषकत्वेन) | २१ तः ५६ | ७९६९-८०५१ |
| च) विश्वमिथ्यात्वे उक्तस्यानुमानस्य शङ्कनम् | २१ | ७९६९ |
| छ) विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणम् | २२ तः ३५ | ७९७२-७९९४ |
| १) तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दूषणं तत्समर्थनञ्च | २२ तः २४ | ७९७२-७९७८ |

| | | |
|---|---|---|
| ट) तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दूषणम् | २२ | ७९७२ |
| ठ) तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दत्तस्य दूषणस्य समर्थनम् | २३ तः २४ | ७९७३-७९७८ |
| १) दृश्यत्वस्य मिथ्यात्वे साध्यसाधकतादोषस्य निराकरणायोगः | २३ तः २४ | ७९७३-७९७८ |
| त) मिथ्यात्वेन सम्प्रतिपन्ने साधकत्वविप्रतिपत्तेः, साधकत्वेन सम्मते च मिथ्यात्वविप्रतिपत्तेः साध्यासाधकतातादवस्थ्यम् | २३ | ७९७३ |
| थ) विप्रतिपन्नस्य साधनञ्च साध्यासाधकता-अनवस्थाभ्यां अशक्यम् | २४ | ७९७५ |
| २) तत्र दृश्यत्वहेतोः प्रमाणबाधकथनम् | २५ | ७९७८ |
| ३) तत्र जडत्वपरिच्छिन्नत्वादिहेतूनां निराकरणम् | २६ तः २९ | ७९७९-७९८६ |
| ट) जडत्वाद्यनुमानानां अनुभूतिविरोध-व्यभिचार-असिद्ध्यादिभिर्दूषणम् | २६ | ७९७९ |
| १) प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का तन्निवारणञ्च | २७ तः २९ | ७९८०-७९८६ |
| त) प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का, तन्निवारकतया प्रत्यक्षस्य सार्वकालीनत्वञ्च | २७ | ७९८० |
| थ) प्रत्यक्षस्य सार्वकालीनबाधाभावविषयत्वेन साक्षिवेद्यत्वम् | २८ | ७९८२ |
| द) शुक्तिरजतादेश्च सार्वकालिकबाधाभावविषयत्वाभावात् अनुभवविरोधो दुर्निवारः | २९ | ७९८४ |
| ४) विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणे उक्तार्थस्य समर्थनम् | ३० तः ३५ | ७९८६-७९९४ |
| ट) दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वं, तत्समर्थनञ्च | ३० तः ३३ | ७८८६-७९९२ |
| १) दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वम् | ३० | ७९८६ |
| २) प्रातीतिकसांवृतत्वयोर्वैलक्षण्यबलात् उक्तस्य सत्प्रतिपक्षस्य परिहारशङ्का, तद्वैलक्षण्यस्य अप्रामाणिकत्वात् तत्परिहारशङ्कायाः निराकरणञ्च | ३१ | ७९८८ |
| त) प्रातीतिकसांवृतत्वयोर्वैलक्षण्ये अनुमानप्रमाणशङ्का तत्परिहारश्च | ३२ | ७९८९ |
| ३) उक्तस्य प्रतिपक्षानुमानस्य वक्रोक्तिशङ्का, लाघवार्थत्वेन सत्समाधानञ्च | ३३ | ७९९० |
| ठ) एतदनुव्याख्यानस्थश्लोकद्वयस्य प्रकारान्तरेण द्वेधा व्याख्यानम् | ३४ तः ३५ | ७९९३-७९९४ |
| १) प्रपञ्चाबाध्यत्वे परिशेषप्रमाणोक्तिपरतया व्याख्यानम् | ३४ | ७९९३ |
| २) व्यापकानुपलब्धिलिङ्गकानुमानपरतया व्याख्यानम् | ३५ | ७९९४ |

ज) विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य निरूपणपूर्वकं निराकरणम् ३६ तः ५६ ७९९५-८०५१

१) विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य निरूपणम् ३६ ७९९५

२) विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य द्वेधा निराकरणम् ३७ तः ५६ ८००४-८०५१

ट) तस्य तर्कस्य स्वमतेन निराकरणम् ३७ तः ४३ ८००४-८०२२

१) वस्तुग्रहे भेदाग्रहाभावात् भेदस्य वस्तुस्वरूपत्वम् ३७ ८००४

त) तत्र विशेषनिष्ठाया एव व्याप्तेरवधातव्या ३८ ८००७

थ) गौरववशेनारुचौ सत्यां सामान्यव्याप्तावपि दोषाभावप्रदर्शनम् ३९ ८००८

द ) भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनुपपत्तिप्रदर्शनम् ४० तः ४२ ८०११-८०१९

१) भेदस्य वस्तुप्रतीतावप्रतीतत्वे अस्यामुना भेद इति वक्तुमशक्यता ४० ८०११

२) भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनन्तरं स्वस्मात्स्वयं भिन्न इति सविकल्पकभेदाग्रहस्य प्रतीतिविरुद्धत्वापादनम् ४१ ८०१४

प) भेदप्रतियागिनोः स्वरूपज्ञाने प्रतियोगिभेदज्ञानापेक्षतया अन्योन्याश्रयाभावः ४२ ८०१७

फ) भेदप्रतियोगिनोः विशेषरूपज्ञानेऽपि असति प्रतिबन्धके अन्योन्यप्रतियोगिकतया विशिष्टभेदप्रतीतौ बाधकाभावः ४३ ८०१९

ठ) भेदप्रतीतावन्योन्याश्रयस्य परमतेन (भिन्नभेदवादिमतेन) अपि परिहारः ४४ तः ५६ ८०२२-८०५१

१) आपादकानभ्युपगमेन उक्तस्य अन्योन्याश्रयत्वप्रसङ्गस्य निराकरणम् ४४ तः ४५ ८०२२-८०३२

२) उक्ते अन्योन्याश्रयत्वप्रसङ्गे दूषणान्तरप्रतिज्ञानम् ४६ तः ५६ ८०३२-८०५१

त) अस्य दूषणान्तरस्य जात्युत्तरत्वकथनसहितः दूष्यत्वे-नोक्तविषयसदृशान्यविषयेष्वपि तद्दोषस्यातिदेशः ५०तः ५६ ८०३७-८०५१

१) अस्य दूषणस्य जात्युत्तरत्वकथनम् ५० ८०३७

२) उक्तमाध्यमिकमतैकदेशविषयातिदेशेन तन्मतान्यदेशविषयस्यापि जात्युत्तरता ५१ तः ५६ ८०३७-८०५१

प) उक्तमाध्यमिकमतैकदेशविषयवचनसदृशतदन्यदेश-
कतिपयविषयवचनानां प्रदर्शनम् ५१ तः ५४ ८०३७-८०४२
१) तत्सदृशप्रथमविषयवचनप्रदर्शनम् ५१ ८०३७
२) तत्सदृशद्वितीयविषयवचनप्रदर्शनम् ५२ ८०३८
३) तत्सदृशतृतीयविषयवचनप्रदर्शनम् ५३ ८०३९
४) तत्सदृशचतुर्थविषयवचनप्रदर्शनपूर्वकं तादृशा-
न्याधिकविषयाणामप्यस्तित्वसूचनम् ५४ ८०४१
फ) 'एतादृशस्य' इत्यनुव्याख्यानस्थपदस्य पूर्वोत्तरत्रोक्तानां सर्वेषां
विषयवचनानां समानदोषप्रदर्शनार्थता सोपपत्तिका ५५ ८०४३
ब) उक्तस्य जातिदोषस्य अन्तर्भाव्यविभागानां प्रदर्शनम् ५६ ८०४६

१.-

इ) उक्तेन माध्यमिक-शून्यवादनिरासेन मायावादस्यापि निरस्तत्वकथनम् ५७ तः ५९ ८०५१-८०५३
१) 'मायी' इत्यनुव्याख्यानस्थपदस्य व्याकरणदृष्ट्या साधुताप्रदर्शनम् ५७ ८०५१
२) 'मायी च' इत्यनुव्याख्यानोक्तचकारबोध्यातिदेशज्ञापनम् ५८ ८०५२
३) अनुव्याख्यानोक्त'एव'शब्दस्योत्तरवाक्येऽन्वयप्रदर्शनम् ५९ ८०५३
ई) एतदधिकरणीयोक्तव्याख्याने कतिपयशङ्कास्तन्निरासश्च ६० तः ६५ ८०५३-८०६२
१) अस्यान्योन्याश्रत्वादेः सूत्रकृतैव निराकरणकरणाभावे कारणप्रदर्शनम् ६० ८०५३
२) अस्यान्योन्याश्रयत्वादेः अस्माभिर्निराकरणे तु कारणप्रदर्शनम् ६१ ८०५४
३) शून्यवादमायावादयोर्वैषम्याभावात् निरसनातिदेशस्य साधुताप्रदर्शनम् ६२ ८०५४
४) एतत्सूत्रव्याख्यानस्योत्सूत्रितत्वनिरासः ६३ तः ६५ ८०५६-८०६२
क) 'व्यभिचारो न चेद्भवेत्' इत्यनुव्याख्यानेनोक्तस्य 'दृश्यत्वस्य सत्यत्वे
मिथ्यात्वेनासाधकत्वापादन'स्योत्सूत्रितत्वशङ्का तन्निरासश्च ६३ ८०५६
ख) 'सत्त्वञ्चास्यानुभूतितः', 'मिथ्यात्वे मा न काचन'
इत्यनुव्याख्यानोक्तदोषद्वयस्याप्युत्सूत्रितत्वशङ्का तन्निरसनञ्च ६४ ८०५८
ग) 'स्वप्नादिवत् इति सौत्रपदस्य' स्वप्नवत् इति व्याख्याने अभिप्रायोद्घाटनम् ६५ ८०६१

***

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

## श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## ॥ अथ द्वितीयाध्यायस्य द्वितीयः पादः ॥

## ॥ वैशेषिकाधिकरणम् ॥

(गतसम्पुटात् अनुवर्तते)

**॥ अथ उक्तार्थसमर्थने सामान्यस्यैकैकाश्रितत्वम् ॥**

**॥ अथ तत्रादौ तस्य प्रत्यक्षसिद्धता ॥**

२१४ सु०— इदानीं सामान्यस्यैकैकाश्रितत्वमाह **नरत्वादिकमिति** ।

अनु०— नरत्वादिकमप्येवं

एवं संयोगादिवदेकैकवृत्तीत्यर्थः । 'सामान्यमपी'ति वक्तव्ये ब्राह्मणत्वादेरयावद्द्रव्यभावित्वेनापि तत्र परिहारः सम्भवतीति ज्ञापयितुं **'नरत्वादिकम्'** इत्युक्तम् । उपपादनं च नैकप्रकारमिति योगविभागः ।

कुतो नरत्वादिकं प्रतिव्यक्ति भिन्नमित्यत आह तत्तदिति ।

तत्तद्धर्मतयेयते ।

यथा हि नरेषूपलभ्यमानेषु तदीयं रूपादिकं प्रतिनियतमुपलभ्यते । तथा नरत्वादिकमपि तत्तत् नियतधर्मतया एव **ईयते** दृश्यते, इति प्रत्यक्षमुक्तम् ।

**परि०— अयावद्द्रव्यभावित्वेनापीति** । महापातकादिना ब्राह्मणत्वादेर्नाशेन तस्य यावत्स्वाश्रयभावित्वाभावेन स्वाश्रयाद्भेदस्यापि सम्भवाद्ब्राह्मणत्वादेरनेकव्यक्त्यनुगतस्य व्यक्त्या साकमभेदे व्यक्तीनामन्योन्यमभेदः स्यादिति दोषपरिहारः सम्भवति । नरत्वादेरनेकानुगतस्य व्यक्त्यभेदे व्यक्तीनामभेदो दुष्परिहरः । अतस्तस्य प्रतिव्यक्ति भिन्नत्वोक्तौ च व्यक्तिभेदापत्तिदोषपरिहारार्थ इति ज्ञापयितुमित्यर्थः । ननु 'संयोगश्च विभागश्च भेदश्चैव पृथक्पृथगिति' वाक्य एव नरत्वादिसामान्यमपि असङ्गृह्य 'नरत्वादिकमप्येवम्' इति भिन्नवाक्येन सामान्यस्यैकाश्रितत्वं किमर्थमुक्तमित्यत आह **उपपादनं चेति** । संयोगादेः घटः पटेन संयुक्तः पटाद्विभक्त इति पटाद्यन्यप्रतियोगिकतया घटादिधर्मिकतया प्रतीत्या प्रतियोगिधर्मिताऽयोगेनैकधर्मत्वम् । जातेस्त्वेकप्रतीतावेव प्रतीतेरेकधर्मित्वमित्येवं धर्मिप्रतियोगिविभागाद्वाक्यभेदः ।

**गु०दी०— नरत्वादिकमप्येवं तत्तद्धर्मतयेयत** इत्यत्र कथं तर्हि सामान्यशब्दवाच्यतेति शङ्का नरादिशब्दवाच्यतया समानसकलनरसम्बन्धित्वादिति परिहरणीया । एवं तर्हि रूपादावप्युक्तनिमित्तसद्भावे सामान्यशब्दवाच्यता स्यादिति चेन्न । पङ्कजादिशब्दवद्योगरूढत्वेन तत्परिहारसम्भवात् । प्रयोगबाहुल्यं रूढिः । सा च सामान्य एवास्ति । नान्यत्र । अत एवोक्तमाचार्यैः **ईयत इति** । इदमपि ईयत इति पदस्यावृत्त्या तदेव सामान्यपदवदीयते नान्यदिति । मूलकारेणैव सूचितम् ।

**यादु०— अयावद्द्रव्यभावित्वेनापीति** । अयावद्द्रव्यभावित्वे भेदस्यापि सत्त्वेनाश्रयाभेदाप्रसक्तेरिति भावः ।

**वं०प०— परिहार इति** । ब्राह्मणत्वस्य व्यक्त्यभेदे तासामपि परस्परमभेदः स्यादित्याक्षेपेऽयावद्द्रव्यभावित्वेन खण्डितत्वाद्भेदाभेदोक्त्या परिहारः सम्भवतीत्यर्थः । सत्यपि धर्मिणि रसविक्रयादिना ब्राह्मण्यनाशस्य 'मासेन शूद्रो भवति ब्राह्मणो रसविक्रयादि'त्यागमसिद्धत्वादिति भावः । अतो यावद्द्रव्यभावि नरत्वाद्येव गृहीतम् । ननु संयोगादिवन्नरत्वादेरपि प्रातिस्विकत्वे 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक् । नरत्वादि चे'ति तत्रैव कस्मात् संयोगादिसमकक्षत्वेन नोक्तम्, अतो वाक्यभेदो व्यर्थ इत्यत आह **उपपादनमिति** । **योगः** वाक्यम् ।

**कं०रा०— सामान्यस्येति** । यदुक्तं सामान्यं चैकमनेकाश्रितं तस्य व्यक्त्यभेदे व्यक्तीनामप्यभेदः प्रसज्येतेति तत्समाधातुं सामान्यस्यैकाश्रितत्वेन अनेकत्वमाहेत्यर्थः । **सामान्यमपीतीति** । सामान्यमपीति

वक्तव्ये नरत्वादिकमिति वचनं ब्राह्मणत्वादेरयावद्द्रव्यभावित्वेन स्वाश्रयेण भिन्नाभिन्नत्वाद्ब्राह्मणत्वादेरेकत्वेऽपि तदाश्रयव्यक्तीनां नाभेदप्रसक्तिरिति तत्र परिहारः सम्भवति । नरत्वादेस्तु यावद्द्रव्यभावित्वेनोक्तः परिहारः तत्र न सम्भवतीति ज्ञापयितुमित्यर्थः । ननु 'संयोगश्च विभागश्च भेदः सामान्यमेव च पृथक्पृथगि'त्येकयोगेन संयोगविभागभेदसामान्यानां प्रति व्यक्तिभिन्नत्वे प्रतिपादनीये नरत्वादिकमप्येवमिति सामान्यस्य प्रतिव्यक्ति-भिन्नत्वप्रतिपादकपृथग्योगकरणं कुत इत्यत आह **उपपादनं चेति** । संयोगविभागभेदानां सामान्यस्य च प्रतिव्यक्तिभिन्नत्वोपपादनमेकप्रकारं न भवतीति पृथग्योगारम्भ इत्यर्थः ।

**श्रीनिधि०— तत्र परिहारः सम्भवतीति** । सामान्यस्यानेकवृत्तित्वेन तस्य द्रव्याभेदे द्रव्याणामप्यभेदः स्यादिति शङ्काया इति शेषः । ननु संयोगश्च विभागश्च भेदं नरत्वादिकं चेति एकेनैव वाक्येन नरत्वादिकं चोपपाद्य भिन्नवृत्तित्वमुपपादनीयम् । तत्किं वाक्यभेदेनेत्यत आह **उपपादनमिति** । **योगविभागः** वाक्यविभागः । अन्यथा तदुपपादकानां साङ्कर्यं शङ्क्येते **तन्मा शङ्कीति** । योगविभागकरणमिति भावः । तच्च पूर्वोत्तरपर्यालोचनायां स्फुटमेव । एवमित्यस्यां वृत्तिमभिप्रेत्याह **यथा हि नरेषु उपलभ्यमानेष्विति** ।

**शे०वा०—** एवमित्यनेन पृथक् पृथगिति साध्यस्येवान्योन्यप्रतियोगेनेति साधनस्याप्यतिदेश इति भ्रान्तिवारणाय तदर्थमाह **एवमिति** । **ब्राह्मणत्वादेरिति** । महापातकेन ब्राह्मणत्वजातेरपायान्न पिण्डेन तस्या अत्यन्ताभेदः, किन्तु अयावद्द्रव्यभावित्वात् पिण्डेन भेदाभेदावेव । ततश्च तत्र भेदाभेदाभ्यामेव व्यक्त्यभेदेऽपि सामान्यस्याश्रयाभेदादेः परिहारसम्भवान्नैकैकद्रव्यवृत्तित्वापेक्षत्वमिति भावः । न च महापातकेन ब्राह्मणत्व-जातेरपाये मानाभावः शङ्क्यः, 'मासेन शूद्रो भवति ब्राह्मणः क्षीरविक्रयादि'त्यादिस्मृतेरेव तत्र मानत्वात् । नन्वेतैर्वाक्यैर्न विवक्षितार्थसिद्धिः । एतानि कर्मनिन्दावचनानि वर्णत्रयकर्महानिप्रतिपादनार्थानि चेति भाट्टैरुक्त-त्वादिति चेन्न । शूद्रशब्दस्य बाधकं विना जातिरूपस्वार्थपरित्यागेनान्यपरत्वायोगात् । किञ्च कर्मनिन्दापरत्वे तस्माद् ब्राह्मणाय नावगुरेदित्यवगोरणादिनिषेधशेषभूतानां 'योऽवगुरेत्तं शतेन यातयेदि'ति शतयातनादि-वाक्यानामपि कर्मनिन्दापरत्वात् फलपरत्वाभावप्रसङ्गेन अवगोरणनयभङ्गप्रसङ्गात् । वर्णत्रयकर्महानिप्रतिपादनार्थत्वे च 'वसन्ते ब्राह्मणोऽग्नीनादधीते'त्यादावपि ब्राह्मणशब्दस्य क्षत्रियवैश्यकर्मराहित्यपरत्वस्य वक्तुं शक्यत्वा-च्छूद्रस्याप्यग्निविद्यासम्भवेन वैदिककर्माधिकारापत्त्याऽपशूद्राधिकरणभङ्गप्रसङ्गाच्च । विश्वामित्रत्रिशंकादीनां च वरशापादिना क्षत्रियत्वापायेन ब्राह्मणत्वादिप्राप्तिस्मरणाच्च । न च तान्यपि ब्राह्मणकर्मयोग्यत्वप्रतिपादनार्थानीति युक्तम् । ब्राह्मणत्वजातेरभावे ब्राह्मण्योद्देश्येन विहितकर्मयोग्यताया एवासम्भवादित्यास्तां विस्तरः । **योगविभाग इति** । 'संयोगश्च विभागश्चे'ति 'नरत्वादिकमप्येवं' इतीत्येवंरूपो वाक्यभेद इत्यर्थः ।

**वा०र०—** अपि च महापातकादिनेत्याद्यनुगतजातौ बाधकतर्कताण्डवतत्त्वविवेकटीकाव्याख्यानरूप-व्यासतीर्थीयानुसारेणाह **महापातकेन ब्राह्मणत्वजातेरिति** । **नन्वेतैर्वाक्यैः** इत्यादिना **आस्तां विस्तर** इत्य-न्तम् । **एतानीति** । क्षीरविक्रयकर्मादिपराणीत्यर्थः । **वर्णत्रयेति** । ब्रह्मक्षत्रवैश्यानां यत्कर्म तद्धानिप्रतिपाद-

नार्थानीत्यर्थः । अनेन 'मासेने'त्यागमस्य क्षीरविक्रयकर्मनिन्दापरत्वात् । वर्णत्रयकर्महानिप्रतिपादनार्थत्वाद्वा जातिरूपस्यार्थपरत्वाभावेन ब्राह्मणत्वाभावस्यानेनाप्राप्तिरित्यर्थः सूचितो भवति । **भाट्टैरुक्तत्वादिति** । कर्म-निन्दापरत्वेन अन्यथासिद्धिं दूषयति **कर्मनिन्देति** । ब्राह्मणं नागुरेदिति पाठवत् ब्राह्मणायेत्यपि पाठो बहुभिः स्वीकृतः तदनुसारेणायं पाठः । अवगोरणनये 'शंयौ च सर्वपरिदानादि'ति तृतीयाध्यायचतुर्थपादीय-अवगोरण-नयभङ्गेत्यर्थः । तत्र शतयातनादेः क्रत्वर्थपुरुषार्थत्वसंशये पुरुषार्थत्वस्यैव निर्णीतत्वादिति भावः । वर्णत्रय-कर्महानिप्रतिपादनार्थत्वेनान्यथासिद्धिमपि पराह **वर्णेति** । **शूद्रस्यापीति** । तस्यापि क्षत्रियवैश्यकर्मराहित्ययोगा-द्ब्राह्मणपदविषयतासद्भावादिति भावः । **अपशूद्राधिकरणेति** । षष्ठाद्यपादस्य 'चातुर्वर्ण्यमविशेषादि'त्यधिकरणे-त्यर्थः । तत्राग्निहोत्रादिषु किं चतुर्णामपि वर्णानामधिकारः उतापशूद्राणामितीति संशयं प्रापय्य अपशूद्राणां त्रयाणामेवेति सिद्धान्तितत्वादिति भावः । **ब्राह्मणत्वादिप्राप्तिस्मरणाच्चेति** । 'गाधेरभून्महातेजाः समिद्ध इव पावकः । तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसमि'त्यादिरूपागमात् । विश्वामित्रस्य ब्राह्मणत्वप्राप्तेः स्मरणात्, 'तस्य सत्यव्रतः पुत्रः त्रिशङ्कुरिति विश्रुतः । प्राप्तश्चण्डालतां शापाद्गुरोरि'त्यादि नवमस्कन्धसप्तमस्थागमरूपात् त्रिशङ्कोश्चण्डालताप्राप्तिस्मरणाच्च तदेवमन्येषामपि तत्तन्निमित्ततत्तज्जातिप्राप्तिस्मरणाच्चेत्यर्थः । **आस्तां विस्तर इति** । असति बाधके ब्राह्मणशब्दस्य जातिरूपस्वार्थत्यागेनान्यपरत्वायोगात् । जातिनित्यत्वस्याद्याप्यसिद्धेश्चेति तदर्थः ।

**स०व्र०— तत्र परिहारः सम्भवतीति** । आश्रययोरभेदपरिहारसम्भवादिति भावः । **योगविभाग इति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक्' । (नरत्वादिकमप्येवं) वाक्यविभाग इत्यर्थः ।

**विट्ठल०— अयावद्द्रव्यभावित्वेनापीति** । महापातकादिना अयावद्द्रव्यभावित्वे भेदस्यापि सत्त्वेन आश्रयाभेदाप्रसक्तेरिति भावः । **योगविभागः** वाक्यविभागः । वाक्यान्तरेणोपपादनमिति यावत् ।

**चषक— अयावद्द्रव्यभावित्वेनेति** । महापातकादिना ब्राह्मण्याद्यभावस्य स्मृतिसिद्धत्वादिति भावः ।

**॥ इति तस्य प्रत्यक्षसिद्धता ॥**

* * *

**॥ अथ सामान्यस्य एकैकाश्रितत्वे तस्य अनुमानसिद्धता ॥**

**२१५ सु०— यद्वा 'योऽनेकाश्रितो धर्मो नासावेकैकप्रतीतौ प्रतीयते, यथा द्वित्वादि; प्रतीयते च नरत्वादिकमेकैकप्रतीतावतो नानुगतमि'त्यनुमानमनेन सूचयति ।**

**वं०प०— सूचयतीति** । नरत्वादिकं नानेकानुगतमेकैकप्रतीतौ प्रतीयमानत्वाद्व्यतिरेकेण द्वित्वादि-वदित्यनुमानं सूचयतीत्यर्थः ।

**शे०वा०— अनुमानमिति** । नरत्वादिकमनेकाश्रितो धर्मो न, एकैकप्रतीतौ प्रतीयमानत्वादित्यनुमानमित्यर्थः ।

* * *

**॥ अथ तत्राप्यादौ सामान्यस्यानेकवृत्तित्वाभावसाधकधर्मत्वानुमाने आभासोद्धारः ॥**

२१६ **सु०— किञ्च 'नरत्वादिकं नानेकानुवृत्तं धर्मत्वाद्रूपादिवत्' अस्याभासोद्धारं करोति नेति ।**

## अनु०— न सर्वधर्म एकोऽस्ति

**सर्वधर्मः अनेकवृत्तिधर्मः । तेन धर्मत्वं न भग्नव्याप्तिकमिति शेषः । पक्षधर्मता तु स्फुटैवेति ।**

**कं०रा०— धर्मत्वादिति** । भावरूपधर्मत्वादित्यर्थः । तेन शशविषाणाद्यभावे न व्यभिचारः । न च वाच्यं वृत्तिमत्याकाशादौ व्यभिचार इति । धर्मशब्दस्य द्रव्यातिरिक्तार्थकत्वादिति ।

**शे०वा०—** ननु 'न सर्वधर्म एकोऽस्ती'त्येकस्य धर्मस्यानेकवृत्तित्वाभावप्रतिपादनमनर्थकम् । न च धर्मत्वस्य व्याप्तिभङ्गराहित्यप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्यापि प्रकृतोपयोगादर्शनेनानर्थकत्वादित्यतः पूर्वोक्तार्थे तदुपयोगाभावेऽपि सामान्यस्यानेकवृत्तित्वाभावसाधकतयाऽभिप्रेतानुमाने आभासोद्धारार्थकत्वात् तस्य न तत्प्रतिपादनानर्थक्यमिति भावेन अभिप्रेतानुमाने तदुद्धारपरतया तद्योजयितुमभिप्रेतमनुमानं तावदाह **किञ्चेति** । नन्वत्र धर्मस्यानेकवृत्तित्वाभावमात्रमुच्यते न तु धर्मत्वस्य भग्नव्याप्तिकत्वराहित्यमिति कथमस्याभासोद्धारपरत्वमित्यतोऽपेक्षितं शेषमाह **तेनेति** । नन्वेवमाभासोद्धारार्थं प्रवृत्तेन व्याप्तिभङ्गराहित्यवत् अपक्षधर्मत्वराहित्यस्याप्युपदर्शनीयत्वात् पक्षधर्मताया अपि वक्तव्यत्वेनावश्यवक्तव्यानुक्त्या भाष्ये न्यूनत्वमित्याशङ्क्य स्पष्टत्वाच्छिष्यैरेव तस्या ज्ञातुं शक्यत्वेन अवश्यवक्तव्यत्वाभावान्न तदनुक्तिर्न्यूनत्वापादिकेत्याशयेनाह **पक्षधर्मता त्विति** । अतो न स्वयमुपदर्शितेति वाक्यशेषः । उपलक्षणं चैतत् । व्याप्तिवदावश्यकत्वाभावज्ञापनार्थं चेत्यपि द्रष्टव्यम् ।

**॥ इति सामान्यस्यानेकवृत्तित्वाभावसाधकधर्मत्वानुमाने आभासोद्धारः ॥**

* * *

॥ अथ तत्र ततस्तदनुमानस्य 'अनेकत्वसङ्ख्यायां व्यभिचार'शङ्का तन्निरासश्च ॥

२१७ **सु०—** 'नन्वनेकत्वसङ्ख्या तावदनेकाश्रिता, एकैकस्मिन् द्वित्वादेः शङ्कितुमपि अशक्यत्वात्। न हि द्वित्वादिकमेकैकप्रतीतौ प्रतीयते, न च प्रतियोगिनिरूप्यम्, धर्मितयैवानेकेषामनुभवात्। अतो धर्मत्वहेतोस्तत्रानैकान्त्यमि'त्यत आह **समुदायस्त्विति**।

अनु०— समुदायस्तु भिन्नगः।

**समुदायः** अनेकत्वं **भिन्नगः** अनेकाश्रितः।

सत्यम्, अनेकत्वसङ्ख्याऽनेकाश्रिता, तथाऽपि तदन्यत्वेन हेतुविशेषणाददोष इति भावः। सा च अपेक्षाबुद्धिजन्यत्वात् अयावद्द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः।

**परि०—** नन्वेकप्रतीतावप्रतीयमानद्वित्वादिकं संयोगादिवदेकैकाश्रितमस्त्वित्यत आह **न च प्रतियोगिनिरूप्यमिति**। एवं तर्हि प्रागुक्ततदाश्रितव्यक्त्यभेददोषः स्यादेवेत्यत आह **सा चेति**।

**यादु०—** **न हि द्वित्वादिकमिति**। येन नरत्वादिवत् अनेकाश्रितं न स्यादिति भावः। **न च प्रतियोगिनिरूप्यमिति**। तथा च संयोगादिवदपि नैकमात्राश्रितत्वमिति भावः।

**वं०प०—** **न च प्रतियोगिनिरूप्यमिति**। येन, यो यत्प्रतियोगिको नासौ तद्धर्म इत्युक्तव्याप्तिबलात् संयोगनरत्वादिवदेकमात्राश्रितं स्यादिति भावः। कुतो न प्रतियोगिनिरूप्यं द्वित्वमित्यत आह **धर्मितयेति**।

**कं०रा०—** **तदन्यत्वेनेति**। अनेकत्वसङ्ख्यान्यत्वेनेत्यर्थः। नन्वनेकत्वसङ्ख्याया अनेकाश्रिताया एकत्वात् तस्याः स्वाश्रयाभेदे स्वाश्रययोरपि परस्पराभेदः प्रसज्यत इत्यत आह **सा चेति**। अनेकत्वसङ्ख्या अपेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनां अयावद्द्रव्यभावित्वाच्च भिन्नाभिन्नेति न स्वाश्रययोः परस्पराभेदप्रसक्तिरित्यर्थः।

**श्रीनिधि०—** द्वित्वादेरेकैकवृत्तित्वसामान्यवदेकैकप्रतीतौ प्रतीतत्वे वा स्यात् संयोगादिवत् प्रतियोगिनिरूप्यत्वे वा। नोभयमप्यस्तीत्याह **न हि द्वित्वादिकमिति**। तर्हि द्वित्वाद्याश्रयाणां परस्परमभेदः स्यादित्यत आह **सा च अपेक्षाबुद्धिजन्यत्वादिति**। **अयावद्द्रव्यभाविनीति** बुद्धिस्थत्वादिति भावः।

**शे०वा०—** तथाऽपि 'समुदायस्तु भिन्नग' इत्यनेकत्वसङ्ख्याया अनेकाश्रितत्ववर्णनमनर्थकमित्याशङ्क्य अनेकत्वसङ्ख्यायामुक्तहेतोर्व्यभिचारपरिहारार्थत्वान्न तदिति भावेन तच्छङ्कापरिहारकतया तद्योजयितुं

तच्छङ्कामुत्थापयति **नन्विति** । शङ्कितुमशक्यत्वादित्युक्तं तत्कुत इत्यतो बाधकसद्भावादित्याह **न हीति** । एकैकवृत्तित्वे एकैकप्रतीतावेव प्रतीयेत । न च तथा प्रतीयते । तस्मान्न तस्यैकैकवृत्तित्वमिति भावः । एकैकवृत्तित्वेऽपि संयोगादिवत् प्रतियोगिनिरूप्यत्वमात्रेणैकैकप्रतीतावेव प्रतीत्यभावः किन्न स्यादित्यत आह **न चेति** । यद्वा द्वित्वादेरेकैकवृत्तित्वस्य शङ्कितुमशक्यत्वादित्युक्तम्, तत्कुत इत्यत एकैकवृत्तित्वसाधकतया भवदभिमतयुक्तिद्वयस्याप्यत्रासम्भवादित्याशयवान् किं तस्य सामान्यवदेकैकप्रतीतावेव प्रतीयमानतयैकैक-वृत्तित्वमभिमतं किंवा संयोगादिवदन्योन्यप्रतियोगिकत्वादिति विकल्पद्वयं मनसि निधायाद्यं निराचष्टे **न हीति** । धर्मत्वं च गहननिविष्टत्वान्न तत्साधकमित्याशयः । द्वितीयं निराचष्टे **न चेति** । तत्कुत इत्यत आह **धर्मि-तयैवेति** । न तु प्रतियोगितयेत्येवार्थः । यद्यप्यत्र समुदायस्तु भिन्नग इति मूलानुरोधात् समुदायमात्रे व्यभिचारः शङ्कनीय इत्यनेकत्वसङ्ख्याया तच्छङ्का न स्वरसा, तथाऽपि विशिष्टाकारस्य विशेष्याश्रितद्रव्यान्तरतया प्रधान-त्वादुपसर्जनत्वरूपधर्मत्वाभावेन तत्साधारण्येन व्यभिचारशङ्काऽनुदयादनेकत्वसङ्ख्यामात्राश्रयणेन तच्छङ्केति द्रष्टव्यम् । **समुदायोऽनेकत्वमिति** । न च अनेकत्वातिरिक्तसमुदायस्यैवाभावाद्व्यर्थं व्याख्यानमिति वाच्यम् । वनमिति प्रतीतिविषयीभूतवृक्षसमुदायस्य एकस्थानसम्बन्धनिमित्तकविशिष्टाकाररूपत्वेनानेकत्वसङ्ख्यातिरिक्तस्यापि समुदायस्य सत्त्वेन तद्व्यावर्तनार्थत्वात् । न च एकस्थानसम्बन्ध एव वनमिति प्रतीतिविषयो न तु तन्निमित्तक-विशिष्टाकार इति वाच्यम् । तथा सति दण्डीत्यादिप्रतीतेरपि दण्डसम्बन्धमात्रविषयकत्वापत्तौ अतिरिक्तविशिष्टा-सिद्धिप्रसङ्गात् । तथा च तत्रेव वनमित्यत्रापि विशिष्टाकार एव विषय इति कथमनेकत्वातिरिक्तसमुदायाभाव इत्युपपन्नं व्याख्यानमिति ध्येयम् । नन्वनेन वाक्येन समुदायस्यानेकाश्रितत्वाभिधानाद्व्यभिचार एव दृढी-कृतो न तु परिहृत इति कथं तत्परिहारकतया ग्रन्थावतार इत्यतोऽभिप्रायमाह **सत्यमित्यादिना** । एवं तर्हि व्यभिचाराभावेऽप्यनेकत्वसङ्ख्याया आश्रयाभेदादाश्रयाणामभेदप्रसङ्गोऽनेकत्वसङ्ख्याया वा भेदप्रसङ्ग इति प्रागुक्तं दोषं प्रसङ्गात् परिहरति **सा चेति** । नाश्रययोरभेदापत्तिरित्युपलक्षणम् । नानेकत्वसङ्ख्याया भेदापत्तिरित्यपि द्रष्टव्यम् । अनेकत्वसङ्ख्ययेव अयावद्द्रव्यभाविविशेषणविशिष्टाकारेणापि ईश्वरस्य भेदाभेदावेवाभिमतौ समुदायं ऋत इत्यत्र विशिष्टाकारस्याप्यभिमतत्वादिति बहवः ।

**वा०र०— समुदायमृत इत्यत्रेति** । समुदायस्तु भिन्नग इत्यस्यार्थानुवादोऽयमित्यदोषः ।

**विट्ठल०—** किमेकैकप्रतीतौ प्रतीयमानत्वेन हेतुना द्वित्वादेरनुगतिः साध्यते उतान्योन्यप्रतियोगेने-त्युक्तदिशा यद्यत्प्रतियोगिनिरूप्यं तन्न तद्धर्म इति व्याप्त्या प्रतियोगिनिरूप्यत्वेन हेतुना पक्षद्वयमपि क्रमेण दूषयति **न हीत्यादिना** । यद्वा द्वित्वस्य व्यासज्यवृत्तित्वे हेतुमाह **न हीति** । एकैकप्रतीतावप्रतीयमानत्वं संयोगादिवत्प्रतियोगिनिरूप्यतयेति ब्रूम इत्यत आह **न च प्रतियोगिनिरूप्यमिति** ।

**चषक— प्रतियोगिनिरूप्यं** प्रतियोगिप्रतिपत्त्यधीनप्रतिपत्तिकम् ।

**॥ इति तदनुमानस्य 'अनेकत्वसङ्ख्यायां व्यभिचार'शङ्का तन्निरासश्च ॥**

* * *

२१८ सु०— प्राभाकरास्त्वाहुः "सादृश्यं तावदेकमनेकानुगतं, तत्र धर्मत्वहेतोर्व्यभिचारः ॥ न च वाच्यं सामान्यमेव सादृश्यम्, अतः पक्षे व्यभिचारचोदनेयमनुपपन्नेति, जातिसङ्करप्रसङ्गात् । अस्ति हि कयोश्चिदश्वरासभव्यक्त्योः सादृश्यं; तत्र यदि सादृश्यमश्वत्वात्परं तदा सर्वेषामप्यश्वानां रासभसादृश्यं स्यात्, यदि चापरं तदा रासभव्यक्तावप्यश्वत्वं स्यात् । एवं रासभत्वेऽपि वाच्यम् । न सादृश्यमश्वरासभवृत्ति ब्रूमः, किन्तु तदवयववृत्ति, द्रव्यगुणावयवकर्मवृत्तीनि सामान्यान्येव हि सादृश्यनामान्यभ्युपगच्छामोऽतो न जातिसङ्करदोष इति चेन्न; 'गौर्गवयेन सदृशी' इत्यादिव्यवहाराणाममुख्यत्वप्रसङ्गात् । न च 'सामान्यं प्रतियोगिनिरूप्यम्, तन्निरूप्यं च सादृश्यमि'ति स्फुटोऽनयोर्भेद इति ।" अत आह **एतादृशं चेति** ।

## अनु०— एतादृशं च सादृश्यं पदार्थेषु पृथक् पृथक् ।

भवतु सादृश्यं सामान्यतो भिन्नं तथाऽपि तत्पदार्थेषु **पृथक् पृथक्** एवेति न तेन धर्मत्वहेतोर्व्यभिचारः । **एतादृशम्** इति तत्रोक्तहेत्वतिदेशः । न हि सादृश्यस्यानेकवृत्तित्वे प्रमाणमस्ति, 'सदृशाविमावि'त्यादेः 'शुक्लाविमावि'त्यादिवदुपपत्तेः, 'अनयोः सादृश्यमि'-त्यादेश्च 'अस्य अनेन सादृश्यम्', 'अस्य अनेन सादृश्यमि'त्युपपत्तेः । एकवचनस्य (च) 'विप्राणां भोजनमि'त्यादिवदुपपन्नत्वात्, प्रतियोगिनो धर्मित्वासम्भवाच्च । एकाश्रितत्वेऽपि प्रतियोगिनिरूप्यत्वेनैकैकप्रतीतावपि अप्रतीतिसम्भवाच्चेति ।

परि०— **सङ्करप्रसङ्गादिति** । अश्वत्वादिजात्येति योज्यम् । **यदि सादृश्यमिति** । त्वया जातित्वेनोपेतमश्वनिष्ठं रासभव्यक्तिसादृश्यं **अश्वत्वात्परं** अश्वत्वजातिव्यापकजातिरित्यर्थः । अश्वत्वं व्याप्यं स्यादिति यावत् । व्यापकमित्यर्थः । **अपरमिति** । अश्वत्वव्याप्यमित्यर्थः । **रासभव्यक्ताविति** । रासभव्यक्तौ रासभान्तरसादृश्यस्य सत्त्वाद्व्याप्यवृत्तौ व्यापकसत्त्वनियमादिति भावः । **एवं रासभत्वेऽपीति** । रासभविशेषस्थमश्वसाम्यं सादृश्यं जातिरूपं चेत् रासभत्वात् परं चेत् तदा सर्वरासभानामश्वसादृश्यप्रसङ्गः । यदि च अपरं तदा अश्वव्यक्तावपि तत्सादृश्यस्य सत्त्वात् रासभत्वं स्यादित्येवं वाच्यमित्यर्थः । तथा च परस्परपरिहारेण सतोरश्वत्वरासभसादृश्ययोः एकव्यक्तिविशेषे

अश्वादौ समावेशात् साङ्कर्यम्, अतो न जातिः सादृश्यमित्यर्थः । **अश्वरासभवृत्तीति** । सामान्यमिति विशेष्यमनुषज्यते । **तदवयववृत्तीति** । तदवयवादिवृत्तिसामान्यमेव सादृश्यं ब्रूम इत्यर्थः । 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्तिसादृश्यमुच्यत' इति श्लोकार्थोक्त्या पराभिप्रायं व्यनक्ति **द्रव्यगुणेति** । ययोर्द्रव्ययोः सादृश्यमुच्यते तयोर्द्रव्ययोर्ये गुणाः ये चावयवाः यानि च कर्माणि तद्वृत्तीनि सामान्यान्येवेत्यर्थः । भिन्नप्रधानेत्यस्य भिन्ने प्रधानसामान्ये गोत्वगवयत्वे ययोस्तौ गोगवयौ तद्वृत्तीत्यर्थः ॥ अतिदेशमेव व्यनक्ति **न हीत्यादिना** । **प्रतियोगिन इति** । अनयोः सादृश्यमित्यत्रान्यतरस्य प्रतियोगित्वनियमेन तस्य धर्मित्वायोगात् कथमनेकाश्रितत्वं सादृश्यस्येत्यर्थः ।

**यादु०— अश्वत्वात्परमिति** । अश्वत्वव्यापकमित्यर्थः । **एवं रासभत्वेऽपीति** । अश्वसादृश्यस्य रासभत्वव्यापकत्वे सर्वेषामपि रासभानामश्वसादृश्यं स्यात् । तद्व्याप्यत्वे अश्वव्यक्तावपि रासभत्वापत्तिरिति वाच्यमित्यर्थः । अश्वरासभवृत्तीत्यनन्तरं सामान्यमिति शेषः । तदवयववृत्तीत्युपलक्षणम् । तद्गुणकर्मवृत्तीत्यपि द्रष्टव्यम् । **द्रव्यगुणावयवेति** । द्रव्ययोर्यानि गुणावयवकर्माणि तद्वृत्तीनीत्यर्थः । यथाऽऽहुः । 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यते ॥' भिन्ने प्रधानसामान्ये गोत्वगवयत्वरूपे ययोस्तौ गोगवयौ भिन्नप्रधानसामान्यौ तद्वृत्तीत्यर्थः ।

**वं०प०— पक्ष इति** । नरत्वादिसामान्यस्यैव पक्षत्वादिति भावः । **जातीति** । यदि सादृश्यं जातिः तर्ह्यश्वत्वेन रासभत्वेन च साङ्कर्यं स्यादित्यर्थः । कथमिति चेदित्थम् । यद्यश्वत्वाद्रासभसादृश्यं परं व्यापकं तदा यत्राश्वत्वं तत्र सर्वत्रापि रासभसादृश्यमिति व्याप्तिः स्यात् । न चैषा सम्भवति, अश्वान्तरे रासभासदृशे व्यभिचारात् । यदि वा रासभसादृश्यमपरं व्याप्यं तदा यत्र रासभसादृश्यं तत्राश्वत्वमिति न व्याप्तिः । रासभसदृशे रासभान्तरे व्यभिचारात् । समावेशस्तु रासभसादृश्याश्वत्वयो रासभसदृशे कस्मिंश्चिदश्वे । तथाऽश्वसादृश्यमपि न जातिः । रासभत्वेन साङ्कर्यात् । अश्वसादृश्यं रासभत्वं विहाय अश्वान्तरेऽस्ति । रासभत्वं च अश्वसादृश्यं विहाय रासभान्तरे अश्वासदृशेऽप्यस्ति । तयोः समावेशस्तु अश्वसदृशे कस्मिंश्चिद्रासभेऽस्तीत्येवं जातिसाङ्कर्यं भङ्ग्यन्तरेणोपपादयति **अस्ति हीत्यादिना** । अस्ति हीत्यनेन समावेश उक्तो ध्येयः । **सादृश्यं** रासभसादृश्यम् । ननु न साङ्कर्यम् । द्रव्यस्य ये गुणा ये चावयवा यच्च कर्म तन्निष्ठानि यानि सामान्यानि तेषामेव सादृश्यसंज्ञकत्वात् । तथा च रासभसादृश्याश्वत्वयोर्नैकत्र अश्वे समावेशः । रासभसादृश्यस्य अश्वभिन्ने अश्वावयव एव सत्त्वेन अश्वत्वजातेश्च अश्वरूपावयविन्येव सत्त्वेन तयोरेकत्र समावेशायोगात् । तथाऽश्वसादृश्यरासभत्वयोरपि न समावेशो रासभे । अश्वसादृश्यस्य रासभावयवे सत्त्वेन रासभरूपावयविन्येव रासभत्वजातेः सत्त्वेन तयोरेकत्रासमावेशात् । तथा च सादृश्यस्य सामान्यरूपत्वे दोषाभावान्न पक्षे व्यभिचारचोदना युक्ता इत्याशयेन शङ्कते **न सादृश्यमित्यादिना** । **गौरिति** । एतद्व्यवहारेण गोरूपावयविन्येव गवयसादृश्यस्य प्रतीय-

मानत्वेन तस्यावयवनिष्ठत्वे व्यवहारोऽमुख्यः स्यादित्यर्थः । तमेव दर्शयति **न हीत्यादिना** । **इत्यादेरिति** । द्विवचनस्येत्यर्थः । **प्रतियोगिन इति** । सादृश्यस्यानेकवृत्तित्वे प्रतियोगिवृत्तित्वप्राप्त्या तस्य धर्मित्वं प्राप्तं तन्न सम्भवतीत्यर्थः । ननु सादृश्यस्यैकैकाश्रितत्वे एकप्रतीतौ प्रतीतिः स्यादिति चेत् तत्राह **एकाश्रितत्वेऽपीति** ।

**कं०रा०— यदि सादृश्यमिति** । यदि सादृश्यमश्वत्वव्यापकं स्यात् तदा सर्वेषामप्यश्वानां रासभ-सादृश्यं स्यात् । व्याप्यवति सर्वत्र व्यापकसत्त्वावश्यम्भावादिति भावः । **यदि चेति** । यदि च सादृश्यमश्वत्व-व्याप्यं तदा व्यापकं विना व्याप्यस्यानवस्थानादश्वसादृश्योपेतरासभव्यक्तावप्यश्वत्वं स्यादित्यर्थः । **एवमिति** । यदि सादृश्यं रासभत्वव्यापकं स्यात् तदा सर्वेषामपि रासभानामश्वसादृश्यं स्यात् । व्याप्यसत्त्वे व्यापक-सत्त्वावश्यंभावात् । यदि च सादृश्यं रासभत्वव्याप्यं तदा व्यापकं विना व्याप्यस्यानवस्थानात् रासभसादृश्यो-पेताश्वव्यक्तावपि रासभत्वं स्यादित्येवं वाच्यमित्यर्थः । अनेन सादृश्यस्य सामान्यरूपत्वे अश्वत्वरासभत्वाभ्यां सङ्करप्रसङ्ग इत्युक्तं भवति ।

**श्रीनिधि०—** सामान्यमेव सादृश्यमिति वदता वक्तव्यम् । किमश्वत्वादि सामानाधिकरणं जात्यन्तरं उत अश्वत्वादिरूपमेवेति । तत्र नाद्य इत्याह **जातिसङ्करप्रसङ्गादिति** । तदुपपादयति **कयोश्चिदश्वरासभ-व्यक्त्योरिति** । भारवाहकाश्वस्य अश्व्यां रासभाज्जातस्य रासभस्य चेत्यर्थः । **सर्वेषामप्यश्वानां रासभसादृश्यं स्यादिति** । सादृश्यस्य परत्वे अश्वत्वस्य व्याप्यत्वं वक्तव्यम् । व्याप्यवति व्यापकसत्त्वमावश्यकमेवेति भावः। एवमश्वत्वस्यापरत्वेऽपि द्रष्टव्यम् । **एवं रासभत्वेऽपीति** । रासभत्वस्य परत्वे सर्वेषामपि रासभानां अश्वत्व-सादृश्यं स्यात् । अपरत्वे अश्वव्यक्तावपि रासभत्वं स्यादिति द्रष्टव्यमित्यर्थः । द्वितीयमाशङ्कते **न च सादृश्य-मश्वरासभवृत्तीति** । अत्राश्वत्वस्य रासभत्वस्य वा सादृश्यत्वं वक्तुं अशक्यं रासभे अश्वत्वस्य अश्वे वा रासभत्वस्याभावात्, अत आह **किन्त्विति** । **द्रव्यगुणावयवकर्मवृत्तीनीति** । घटो घटेन सदृश इत्यादौ द्रव्यनिष्ठं घटत्वादिसामान्यमेव सादृश्यशब्दार्थः । शब्दः शब्देन सदृश इत्यादौ गुणनिष्ठं शब्दत्वादिसामान्यं चलनं चलनेन सदृशमित्यादौ क्रियानिष्ठं चलनत्वादिकम् । रासभोऽश्वेन सदृश इत्यादौ तदवयववृत्तिसामान्यमिति विवेको द्रष्टव्यः । **अमुख्यत्वप्रसङ्गादिति** । सादृश्यस्य गवादिनिष्ठत्वं शब्दतः प्रतीयते । तस्य तदवयवनिष्ठ-त्वाभ्युपगमे गङ्गापदस्येव गोगवयपदयोः लाक्षणिकत्वं स्यादित्यर्थः । **उक्तहेत्वतिदेश** इत्युक्तम् । तानेव हेतून् दर्शयति **न हि सादृश्यस्येत्यादिना** ।

**शे०वा०—** ननु 'एतादृशं च सादृश्यमि'ति सादृश्यस्यैकैकव्यक्तिमात्रवृत्तित्ववर्णनमनर्थकम् । न च साध्यस्य तत्रोपपादनेन धर्मत्वहेतोर्व्यभिचारपरिहारार्थं तदिति वाच्यम् । परमते सादृश्यस्य सामान्यरूपतया पक्षत्वेन तत्र व्यभिचारस्य शङ्कितुमशक्यत्वादित्यतो नेयं प्रतिवादिनः शङ्का, किन्तु प्राभाकरस्य । तेन च सादृश्यस्य सामान्यातिरिक्तत्वाङ्गीकारेणापक्षतया तत्र व्यभिचारचोदनाया युक्तत्वान्न तत्परिहारकोत्तरग्रन्थवैयर्थ्य-मित्यभिप्रेत्य तदभिमतं सादृश्यसामान्ययोर्भेदसमर्थनप्रकारमुपदर्शयन्नेव प्राभाकररीत्या तत्र व्यभिचारशङ्कामुत्था-

पयति **प्राभाकरास्त्विति** । **अत इति** । सर्वत्र पक्षे व्यभिचारचोदनप्रसङ्गेनानुमानमात्रोच्छेदकत्वादिति भावः । **अश्वत्वात्परमिति** । अश्वत्वव्यापकमित्यर्थः । **तदेति** । यत्राश्वत्वं तत्र रासभसादृश्यमिति व्याप्तेरिति भावः । **अपरमिति** । अश्वत्वव्याप्यमित्यर्थः । **अश्वत्वं स्यादिति** । तत्रापि सादृश्यस्य सत्त्वाद्व्याप्यवति च व्यापकावश्यम्भावनियमादिति भावः । **एवं रासभत्वेऽपीति** । सादृश्यं यदि रासभत्वव्यापकं तर्हि सर्वेषामपि रासभानामश्वसादृश्यं स्यात् । यदि च रासभत्वव्याप्यं तदा अश्वव्यक्तावपि रासभत्वं स्यादिति वाच्यमित्यर्थः । अश्वरासभवृत्तीत्यतःपरं सामान्यमिति शेषः । अश्वरासभवृत्ति सामान्यं न तयोः सादृश्यमित्यर्थः । तर्हि सामान्यमेव सादृश्यमिति रिक्तं वच इति पृच्छति **किन्त्विति** । परिहरति **तदवयववृत्तीति** । अत्रापि सामान्यमिति शेषः । अश्वरासभयोर्येऽवयवास्तद्वृत्तिसामान्यमश्वरासभयोः सादृश्यमित्यर्थः । उपलक्षणं चैतत् । तद्गुणकर्मवृत्तीत्यपि द्रष्टव्यम् । **द्रव्यगुणावयवेति** । द्रव्ययोर्यानि गुणावयवकर्माणि तद्वृत्तीनि सामान्यान्येव इत्यर्थः । अत एवोक्तं 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यत' इति । अयमर्थः । इह गुणादिगतसामान्यापेक्षया गोत्वगवयत्वयोः प्राधान्यं भिन्ने पृथक्कृते प्रधानसामान्ये गोत्वगवयत्वलक्षणे ययोस्तौ गोगवयौ भिन्नप्रधानसामान्यौ तयोर्वर्तमानं सादृश्यं नाम गोगवयसम्बन्धिनां गुणावयवकर्मणां यानि सामान्यानि तान्येव नान्यदिति वादिभिरुच्यत इति । अत्र च प्रधानसामान्ययोर्भिन्नत्वं सम्भवदपेक्षयोक्तम् । तदभावेऽपि द्वयोर्घटयोरेकजातिव्यङ्ग्ययोरेव गुणादिगतसामान्यद्वारेण सादृश्यव्यवहारदर्शनात् । अत्र गुणावयवकर्मणामित्युपलक्षणम् । ततोऽन्यत्रापि जात्या सदृशः, कुलेन सदृशो, विद्यया सदृश इत्यादिव्यवहारदर्शनादित्यवधेयम् । **अमुख्यत्वेति** । तत्रोक्तव्यवहारस्य तद्गुणावयवकर्मगतसामान्यनिबन्धनत्वेन गोगवयगतसामान्यानिबन्धनत्वादिति भावः । तयोर्भेदे युक्त्यन्तरमाह **न चेति** । नापीत्यर्थः । सप्रतियोगिकत्वनिष्प्रतियोगिकत्वरूपविरुद्धधर्माधिकरणत्वाच्च सादृश्यसामान्ययोर्भेद इति भावः । उपलक्षणं चैतत् सादृश्यस्योत्कर्षापकर्षरूपवत्त्वाज्जात्यादौ वर्तमानत्वाच्च । जातेस्तु तदभावात् तयोर्भेद इत्यपि द्रष्टव्यम् ।

'सादृश्यं पदार्थेषु पृथक् पृथगि'त्येतावतैवानेकवृत्तित्वाभावप्रतिपादने सादृश्ये व्यभिचारपरिहारसिद्धेरेतादृशमिति भाष्यखण्डवैयर्थ्यमित्याशङ्क्य पदार्थेषु पृथक्पृथगित्युक्तानेकवृत्तित्वाभावस्यानेकवृत्तित्वे प्रमाणाभावरूपहेतूक्त्या समर्थनेन तदसिद्धिपरिहारार्थत्वान्नानर्थक्यमिति भावेन तत्तात्पर्यमाह **एतादृशमितीति** । तमेव दर्शयति **न हीति** । ननु सदृशौ 'इविमावितीमे सदृशा' इति च अनेकाश्रितत्वेन सादृश्यप्रतीतिरेव तत्र प्रमाणं भविष्यतीति कथं प्रमाणाभाव इत्यत आह **सदृशाविमावित्यादेरिति** । यथा हि 'इमौ शुक्लाविमे शुक्ला' इति प्रतीतावनेके पटा अनेकानि च तद्विशेषणानि शौक्ल्यान्यवभासन्ते तथा 'इमौ सदृशाविमे सदृशा' इत्यादिप्रतीतावप्यनेके पदार्था अनेकानि च सादृश्यानि प्रतीयन्त इत्येवाभ्युपगन्तव्यम् । विशेषप्रमाणाभावात् । ततो नानया प्रतीत्या सादृश्यस्यानेकाश्रितत्वसिद्धिरिति भावः । नन्वनयोः सादृश्यं अमीषां सादृश्यमिति प्रतीतावनेकाश्रितमेव सादृश्यं प्रतीयते तत्कथं तत्र प्रमाणाभाव इति चेत् । किमत्र अनेकस्य धर्मितयाऽवभासं प्रमाणयसि, उत धर्मस्यैकत्वावभासम्, उत उभयावभासम् । पक्षत्रयेऽप्युत्तरमाह **अनयोरित्यादि** । तथा च अनेकस्य धर्मित्वेऽपि

द्विधर्मिकस्यानेकस्य सादृश्यस्यैकत्र प्रतिभासेन धर्मस्यैकत्वावभासासम्मतेननिनाप्यभिमतसिद्धिरिति भावः । ननु वचनलिङ्गो हि वक्तुरभिप्रायः । सादृश्यमिति चात्रैकवचनं प्रयुज्यते । तेनानुमीयतेऽस्यां प्रतीतावेकमेव सादृश्यं द्विधर्मिकं दृष्टमिति । तस्मादन्योन्यप्रतियोगिकानेकधर्मिकानेकसादृश्यविषयत्वं प्रतीतेर्न वक्तुं शक्यत इत्यत आह **एकवचनस्य चेति** । नैकवचनेन प्रतीतेरेकार्थविषयत्वमनुमातुं शक्यते । विप्राणां भोजनमित्यादौ सत्यप्येकवचनप्रयोगे तन्मूलप्रतीतेरेकार्थविषयत्वाभावेनानैकान्त्यात् समुदायविषयत्वेनान्यथासिद्धत्वाच्चेति भावः । स्यादेतदेवं यदि सादृश्यस्यैकैकद्रव्याश्रितत्वे प्रमाणं स्यान्न चैतदस्तीत्यत आह **प्रतियोगिन इति** । पटधर्मः सादृश्यं नान्यधर्मस्तत्प्रतियोगिकत्वात् । यो यत्प्रतियोगिको नासौ तद्धर्मः । यथा स्थविरप्रतियोगिकमपरत्वं न स्थविरधर्म इत्यनुमानमेव तत्र प्रमाणमिति भावः । ननु न सादृश्यमेकैकाश्रितमभ्युपगन्तुं शक्यम् । तथा सत्येकप्रतीतावेव सादृश्यप्रत्ययप्रसङ्गादित्यत आह **एकाश्रितत्वेऽपीति** । **प्रतियोगिनिरूप्यत्वेनेति** । तज्ज्ञानाधीनज्ञानत्वेनेत्यर्थः । यथा स्थविरप्रतियोगिकस्यापरत्वस्य युवमात्रधर्मत्वेऽपि युवप्रतीतावेव न प्रतीतिः । स्थविररूपप्रतियोगिज्ञानविरहेण प्रतीतिसामग्रीविरहात् । तथेहापि प्रतियोगिज्ञानरूपकारणविरहान्नैकैकप्रतीतावपि सादृश्यप्रतीतिरिति भावः ।

**वा०र०— सादृश्यस्य सामान्यातिरिक्तत्वाङ्गीकारेणेति** । वक्ष्यमाणरीत्येति शेषः । **तर्हि सर्वेषामपीति** । यत्र रासभत्वं तत्राश्वसादृश्यमिति व्याप्तेरिति भावः । **रासभत्वं स्यादिति** । तत्रापि अश्वसादृश्यसत्त्वाद्व्याप्यवति व्यापकावश्यंभावनियमादिति भावः । द्रव्यगुणेत्युत्तरमूलानुसारेण शेषमाह **सामान्यमितीति** । शङ्कितुः सामान्यमेव सादृश्यमित्यभिप्रेतमित्याशयेनाह **न हि सामान्यमेवेति** । अश्वेत्यादेरुपक्रमादश्वरासभव्यक्तिस्थल एव गुणावयववृत्तिसामान्यमित्येव न । किन्तु यत्र यत्र सादृश्यमुच्यते तत्र सर्वत्रापीति वक्तुं साधारण्येनाभ्युपगमप्रकारमाह **द्रव्यगुणेति** मूलम् । एतेन तदवयववृत्तीत्यन्तेन पूर्तेरिदं वाक्यमधिकमिति शङ्कानवकाशः । अभ्युपगतत्वादित्येवंरूपेण वाक्ययोजनाया अङ्गीकारात् । **अत एवोक्तमिति** । ..........ति शेषः । .............अनुसारेण व्याचष्टे **अयमर्थ इत्यादि** । **उक्तमिति** भिन्नप्रधानेनेत्यर्थः । एतत्स्थलं व्याख्येयमस्ति । ............ सादृश्यस्योत्कर्षापकर्षेति पाठः । तदभावात् । उत्कर्षापकर्षजात्यादौ वर्तमानत्वाभावादित्यर्थः । अनेकवृत्तित्वाभावस्य समर्थनेनेति सम्बन्धः । **तदसिद्धीति** । तच्छब्देनोक्ताभावपरामर्शः । **तमेव** प्रमाणाभावमेव । न च तदस्तीत्यत आह । प्रतियोगिन इतीति पाठः ।

**स०व्र०— अश्वत्वात्परम्** अश्वत्वव्यापकमित्यर्थः । **तदेति** । यत्राश्वत्वं तत्र रासभसादृश्यमिति व्याप्तेरिति भावः । **एवमिति** । सादृश्यस्य रासभत्वव्यापकत्वे सर्वेषामपि रासभानामश्वसादृश्यापत्त्या तद्व्याप्यत्वे अश्वव्यक्तावपि रासभत्वापत्तिरिति भावः । **न चेति** । नापीत्यर्थः ।

**विठ्ठल०— तत्र यदीति** । जातित्वेनाङ्गीकृतं अश्वनिष्ठं सादृश्यं अश्वत्वव्यापकमिति यद्यङ्गीक्रियत इत्यर्थः । **अपरमिति** । अश्वत्वव्याप्यमित्यर्थः । **रासभव्यक्ताविति** । रासभव्यक्तौ रासभान्तरसादृश्यस्य

सत्त्वाद्व्याप्यवति व्यापकसत्त्वनियमादिति भावः । **एवं रासभत्वेऽपीति** । रासभविशेषस्थमश्वसादृश्यं यदि जातिरूपं रासभत्वात्परं च स्यात्तदा सर्वरासभानाम् अश्वसादृश्यप्रसङ्गः । यदि चापरं तदाऽश्वव्यक्तावपि रासभत्वं स्यादित्येवं वाच्यमित्यर्थः । तथा च परस्परपरिहारेण वर्तमानयोरश्वत्वसादृश्ययो रासभत्वसादृश्ययोर्वा एकत्राश्वव्यक्तौ रासभ एव समावेशेन साङ्कर्यान्न जातित्वं सादृश्येति भावः । **अश्वरासभवृत्तीत्य**तःपरं सामान्यमिति शेषः । **तदवयवृत्तीत्यु**पलक्षणं तद्गुणवृत्तीत्यपि द्रष्टव्यम् । **द्रव्यगुणावयवेति** । द्रव्ययोर्यानि गुणावयवकर्माणि तद्वृत्तीनीत्यर्थः । यथाहुः 'सामान्योऽन्येन भूयांसि गुणावयवकर्मणां भिन्नप्रधानसामान्यवृत्तिसादृश्यमुच्यत' इति । द्रव्यवृत्तीनां गुणावयवकर्मणां भूयांसि सामान्यान्येन भिन्नप्रधानवृत्तिसादृश्यं भिन्ने गोत्वगवयत्वरूपे प्रधानसामान्यौ गोगवयौ तद्वृत्तिसादृश्यमुच्यत इत्यर्थः । तथा च द्रव्यत्वादीन्येव सामान्यानीत्यर्थः । **गौर्गवयेनेति** । तदुभयानुवृत्तिसामान्याभावात् तदवयवत्वरूपस्येहास्फुरणादिति भावः । अतिदेशं व्यनक्ति **न हीति** । किं च 'इमौ सदृशावि'त्यादावन्यतरस्य सादृश्यनिरूपकत्वं वक्तव्यं सादृश्यप्रतियोगिनश्च न सादृश्यं प्रति धर्मित्वं सम्भवति । अतश्च नानेकाश्रितत्वमित्याह **प्रतियोगिन इति** । सादृश्यस्यैकव्यक्तिवृत्तित्वे एकैकप्रतीतावप्रतीत्यनुपपत्तिरित्यत आह **एकाश्रितत्वेऽपीति** ।

**चषक**— परं व्यापकम् । अपरं व्याप्यम् ।

**।। इति प्राभाकरमतानुसारेण तदनुमाने व्यभिचारशङ्का तन्निरासश्च ।।**

* * *

**।। अथ तत्रान्ते नरत्वादिसामान्यस्य प्रतिव्यक्तिभिन्नत्वे अनुमानान्तरम् ।।**

२१९ **सु०**— नरत्वादिसामान्यस्य प्रतिव्यक्ति भिन्नत्वे अनुमानान्तरमाह **एकस्मिन्निति** ।

## अनु०— एकस्मिन् स विनष्टेऽपि यतोऽन्यत्रैव दृश्यते ।

**एकस्मिन्** नरे **नष्टे** तदाश्रितं नरत्वं तावन्नष्टम्, तथापि **स** नरत्वादिलक्षणो धर्मः **अन्यत्र** नरान्तरे **दृश्यत एव यतः** अतोऽपि 'नरत्वादिकमि'त्युक्तेन सम्बन्धः ।

यद्वा विनष्टं विनाशः, सह विनष्टेन वर्तत इति सविनष्टम्, तस्मिन् विनाशवतीति यावत् ।

अथवा आश्रयेण सह विनष्टं सविनष्टं तस्मिन्निति योजना ।

**अयमत्र प्रयोगः । नष्टानष्टवर्ति नरत्वं भेदवत् विरुद्धधर्माश्रयत्वाच्छायाऽऽतपवत् । न च असिद्धो हेतुः; नष्टाश्रयस्य नरत्वस्य नष्टत्वात्, अन्यस्य तु दृश्यमानत्वेन अविनष्टत्वात् ॥ यद्वेदं नरत्वं विनष्टान्नरत्वाद्भिद्यतेऽविनष्टत्वाद्घटवत् ॥ यदि वा तन्नरत्वमविनष्टान्नरत्वाद्भिद्यते विनष्टत्वाद्घटवदिति ।**

**परि०**— विनष्ट इति भावे निष्ठाप्रत्यय इति भावेनाह **विनष्टं विनाश इति । यदि वा तन्नरत्वमिति** । नष्टेऽप्यनष्टभेदस्य कारणात्मत्वेन सत्त्वस्य 'तस्मात्प्रध्वस्तभेदादी'त्यत्र वक्ष्यमाणत्वादयं प्रयोगो नायुक्त इति ध्येयम् ।

**यादु०**— **यदि वा तन्नरत्वमिति** । ननु तन्नरत्वस्य नष्टत्वात् कथं तद्धर्मिकभेदस्य वर्तमानता साधयितुं शक्या । भेदस्य धर्मिस्वरूपत्वादिति चेन्न । भिद्यन्त इति व्यपदेशस्य वर्तमानसामीप्यार्थतया विवक्षितत्वात् । तथा च पूर्वं भिन्नमासीदिति प्रतिज्ञार्थो विवक्षितः । यद्वा तन्नरत्वस्य तन्नराभिन्नस्य कार्याकारेण नाशेऽपि कारणाकारेणावस्थानात् तद्धर्मिकभेदस्यापि तथैवावस्थानमित्यभिप्रेत्येदम् । अत एव 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'ति प्राचां वाच इति ज्ञातव्यम् ।

**वं०प०**— भावे क्तः प्रत्यय इत्याशयेनोक्तं **विनष्टं विनाश इति । सह विनष्टं सविनष्टमिति** । 'सहस्य स' इति सूत्रादिति भावः । **इदं** अविनष्टम् ।

**कं०रा०**— **नरत्वादिकमित्युक्तेनेति** । नरत्वादिकमप्येवमित्युक्तेनेत्यर्थः । **विनष्टं विनाश इति** । 'नपुंसके भावे क्त' इति भावे क्तप्रत्यय इति भावः । **तन्नरत्वमिति** । विनष्टं नरत्वमित्यर्थः ।

**श्रीनिधि०**— नरत्वादिकमिति प्रकृतत्वात् कथं स इति पुल्लिङ्गनिर्देश इत्यत आह **नरत्वादिलक्षणो धर्म इति** । ननु तथापि धर्मपदं पूर्वं न प्रकृतं तथा च कथमिदमित्यतः एकपदत्वाश्रयणान्नायं दोष इत्याह **यद्वेति** । स इत्यस्य तच्छब्दरूपत्वं नाङ्गीक्रियते किन्तु सविनष्ट इति एकपदत्वमेव येनात्र लिङ्गवैषम्यं शङ्क्येतेति भावः । **विनष्टम्** इत्यत्र क्तप्रत्ययस्य कर्त्रर्थत्वाश्रयणेनोक्तार्थलाभे किमर्थं भावार्थत्वमाश्रित्य पदान्तरोपादानमित्यत आह **अथवेति** । इदमपि किमर्थं वक्तव्यमिति चेत् । वक्ष्यमाणहेतोरसिद्धिवारणार्थमिति ब्रूमः । विरुद्धधर्माधिकरणत्वं अन्यतरस्य नष्टत्वात् तच्च नष्टाश्रयत्वात् प्रमाणत्वानुपलब्धिरेवेति ।

**शे०वा०**— 'एकस्मिन्' इत्युत्तरग्रन्थस्य 'एतादृशम्' इति पूर्वग्रन्थेनैकवाक्यत्वासम्भवादानर्थक्यमित्याशङ्क्य तथाऽपि नरत्वादिकमिति व्यवहितग्रन्थेन प्रतिज्ञातेऽर्थे हेत्वन्तरसमर्पकत्वेन तदेकवाक्यतया तत्सङ्गतत्वान्नानर्थक्यमिति भावेन तत्सङ्गततया योजयति **नरत्वादिसामान्यस्येति । तदाश्रितमिति** ।

आश्रयनाशे तदाश्रितनाशस्य रूपादौ दृष्टत्वादिति भावः । स इति नरत्वसामान्यस्य न परामर्शो घटते लिङ्गव्यत्ययदोषादित्यतस्तत्परामृष्टव्यमाह **स नरत्वलक्षणो धर्म इति ।** हेतुत्वज्ञापनाय यत इत्यस्य दृश्यत इत्यनेनान्वयमाह **दृश्यत एव यत इति** । अस्यानुमानान्तरताया मूलारूढतासिद्ध्यर्थमपिशब्दस्यात्रापि सम्बन्धमाह **अतोऽपीति** । अत्र पक्षे नरत्वस्य विनाशित्वोक्तेर्मूलारूढतासिद्ध्यर्थं तदाश्रितं नरत्वमपि नष्टमेवेत्याद्यध्याहारः, स इति पुलिङ्गं च क्लिष्टं भवतीत्यपरितोषात् सविनष्टेऽपीति पदैक्यमङ्गीकृत्य योजयति **यद्वेति** । नन्वस्मिन्पक्षे नरत्वस्य विनष्टेन सह वर्तमानत्वलाभेऽपि विनष्टत्वालाभाद्विनष्टत्वहेतोर्मूलेऽनुक्तिप्रसङ्ग इत्यतो विनष्टशब्दस्य भावसाधनत्वेन विनाशपरत्वान्न तदनुक्तिप्रसङ्ग इत्यभिप्रेत्याह **विनष्टं विनाश इति** । अस्मिन्नपि पक्षे नरत्वस्य विनाशिताया मूलारूढत्वप्राप्तावपि तदुपपादकस्याश्रयनाशस्य तदलाभान्न हेत्वसिद्धि-परिहारसूचकत्वमप्यस्य ग्रन्थस्य सम्भवतीत्यतः तस्यापि लाभाय सविनष्टशब्दस्यार्थान्तरमाह **अथवेति** । 'एकस्मिन् सविनष्टेऽपी'ति यथाश्रुतग्रन्थस्यैवानुमानप्रकारताभ्रमनिरासायाह **अयमत्रेति** । मूलग्रन्थस्याद्ययोजना-नुसारेण प्रयोगप्रकारं दर्शयति **नष्टानष्टेति** । पदैक्ययोजनानुसारेणापि तमाह **यद्वेति** । अनष्टनरवृत्तिनरत्व-मित्यर्थः । **तन्नरत्वमिति** । नष्टनरवर्तिनरत्वमित्यर्थः । ननु तन्नरत्वस्य नष्टत्वेन तद्धर्मिकभेदस्यापि तस्य धर्मिस्वरूपतया नाशावश्यम्भावान्न तद्धर्मिकभेदस्य वर्तमानत्वं साधयितुं शक्यत इति चेन्न । तन्नरत्वस्य तन्नराभिन्नस्य कार्याकारेण नाशेऽपि कारणाकारेणावस्थानात् तद्धर्मिकभेदस्यापि तथैवावस्थानमित्यभिप्रेत्यैत-त्साधनप्रवृत्तेः । अत एवोत्तरत्र 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'त्येकदेशिमतानुसारेणैवमेव नष्टधर्मिक-भेदस्यावस्थानोपपादनमित्यवधेयम् ।

**वा०र०— तत्परामृष्टव्यमितीति** । 'क्वचित्पदार्थशेषः स्यादि'त्युक्तेर्व्याख्यानस्थल इव नरत्व-मित्यस्य नरत्वलक्षणधर्मत्वेन रूपेणानुवादाभिप्रायात् पुल्लिङ्गमिति भावः । 'यथार्थज्ञानजनका यथार्था युक्तय' इति पूर्वपादीयानुव्याख्यानमूले जनका इत्येतत्पुल्लिङ्गोपपादनावसरे अधिकं ज्ञेयम् । **पदैक्ययोजनानुसारेणेति** । सविनष्ट इति पदैक्यमङ्गीकृत्य प्रवृत्तयोजनानुसारेणेत्यर्थः । पूर्वयोजनायामिवोत्तरयोजनाद्वये प्रयोगभेदाभावा-देकीकारेण कथनम् । **अत एव उत्तरत्रेति** । 'तस्मात्प्रध्वस्तभेदादी'त्युत्तरानुव्याख्यानव्याख्यावसर इत्यर्थः ।

**स०व्र०— यद्वा इदं नरत्वं विनष्टान्नरत्वात् भिद्यत इति** । इदं च 'नष्टानामपि वस्तूनां भेदो नैव विनश्यति' इति वदतां टीकाकाराणां मतेनैवेति बोध्यम् । ग्रन्थकृन्मतेन नष्टधर्मिकभेदस्यापि नाशादिति बोध्यम् ।

**विट्ठल०—** भावे क्त इति भावेन **विनष्टं विनाश** इत्युक्तम् । **इति यावदिति** । अनेन सविनष्टे इत्यस्य नरत्वे विनाशयुक्ते सतीत्यर्थ उक्तो भवति । **आश्रयेणेति** । सह विनष्टं सविनष्टमित्येवार्थः । प्रतिसम्बन्धिनो वक्तव्यत्वात् **आश्रयेण** इत्युक्तम् । उक्तयोजनात्रयानुसारेण प्रयोगत्रयमाह **अयमत्रेति** । **यद्वेदं नरत्वमिति** । नष्टानुयोगिकं नरत्वमित्यर्थः । नरत्वस्य कार्याकारेण विनाशेऽपि कारणात्मना सत्त्वस्य

सदसत्कार्यवादिनामस्माकं सिद्धान्ते सद्धीकभेदस्य तथैवावस्थानादयं प्रयोगो नायुक्त इति ध्येयम् । अत एव 'तस्मात्प्रध्वस्तभेदादि भावेनैवास्त्यसत्' इति वक्ष्यत्याचार्यः ।

* * *

॥ अथ तत्र विनष्टनराश्रितनरत्वस्य अविनाशशङ्का तन्निरासश्च ॥

२२० सु०— भवेदेतद्यदि विनष्टनराश्रितमपि नरत्वं विनश्येत् । न चैतदस्ति तस्य नित्यत्वादित्यत आह कुत इति ।

## अनु०— कुतो भस्मत्वमाप्तस्य नरत्वं पुनरिष्यते ।

**भस्मत्वमाप्तस्य** नरस्येति शेषः । **पुनः** (आ)स्वाश्रयनाशोत्तरकालम् । **इष्यते** अस्तित्वेनेति शेषः ।

'नष्टस्ये'ति वक्तव्ये 'भस्मत्वमाप्तस्ये'ति वचनमवस्थान्तरापत्तिरेव विनाशो न तु तार्किकादीनामिव 'सर्वथा नास्तित्वमि'ति सूचयितुम् । आश्रयनाशोत्तरकालं सामान्यसत्त्वं; 'विमतं विनाशवत् विनाशवदाश्रयसमवेतत्वाद्रूपादिवत्' इत्यादिप्रमाणविरुद्धम्, अप्रामाणिकं चेत्यर्थः ।

**परि०**— पुनरित्यनुवादः । **स्वाश्रयनाशोत्तरकालमिति** व्याख्या । **सामान्यसत्त्वमित्यस्य इत्यादिप्रमाणविरुद्धमित्यादिनाऽन्वयः** ।

**वं०प०**— सामान्यसत्त्वं प्रमाणविरुद्धमित्यादिनाऽन्वयः ।

**कं०रा०**— **आश्रयेति** । आश्रयनाशोत्तरकालं सामान्यसत्त्वं वक्ष्यमाणप्रमाणविरुद्धमप्रामाणिकं चेत्यन्वयः । **विनाशवदिति** । विनाशवान् य आश्रयः तत्समवेतत्वादित्यर्थः । यद्यपि सिद्धान्ते समवायो नास्ति । समवेतपदस्य तन्निष्ठत्वार्थकत्वे च सर्वगते अव्याकृताकाशादौ विनाशवदाश्रयनिष्ठत्वरूपहेतोः सत्त्वेऽपि विनाशवत्वरूपसाध्याभावाद्व्यभिचारः । तथापि समवेतपदेनोभयवादिसिद्धस्यायुतसिद्धवृत्तिसम्बन्धस्य विवक्षितत्वान्न कश्चिद्दोष इति ध्येयम् ।

**श्रीनिधि०**— **आश्रयनाशोत्तरकालं सामान्यसत्त्वमिति** । अस्य 'इत्यादिप्रमाणविरुद्धमि'त्यनेन सम्बन्धः ।

**शे०वा०**— ननु 'कुतो भस्मत्वमाप्तस्ये'त्युत्तरग्रन्थे आश्रयनाशोत्तरकाले सामान्यसत्त्वं निराक्रियते तदनर्थकमित्याशङ्क्य विनाशस्यासिद्धिपरिहारार्थत्वान्न तदिति भावेन तदसिद्धिपरिहारकतया तद्योजयितुं विनाशित्वासिद्धिशङ्कामुत्थापयति **भवेदिति** । **न चैतदित्यादि** । ततश्च नष्टत्वानष्टत्वरूपविरुद्धधर्माधिकरणत्वस्य, विनष्टत्वस्य च हेतोरसिद्धिः । अविनष्टत्वहेतोश्च साध्याप्रसिद्धिरिति भावः । मूले **कुत** इत्यस्य साधकप्रमाणाभावाद्बाधकप्रमाणसद्भावाच्च सत्त्वं नेत्याक्षेपार्थतामभिप्रेत्य तत्तात्पर्यमाह **आश्रयनाशेति** ।

**वा०र०**— **साध्याप्रसिद्धिरिति** । नष्टनरत्वस्यैवाभावेन तद्भेदस्याप्रसिद्धिरित्यर्थः ।

**विठ्ठल०**— **न तु तार्किकादीनामिति** । तैरुपादानोपादेययोरत्यन्तभेदमङ्गीकृत्य नरत्वादेः कार्यद्रव्यस्य स्वरूपतो विनाशेन सर्वथा नास्तित्वमेवोच्यते । न तु कार्यकारणतामात्रविनाशेन भस्माद्यात्मनाऽवस्थानमिति भावः ।

**॥ इति विनष्टनराश्रितनरत्वस्य अविनाशशङ्का तन्निरासश्च ॥**

* * *

**॥ अथ तत्रापि नष्टानष्टनराश्रितनरत्वयोरेकत्वे प्रमाणाभावः ॥**

२२१ **सु०**— 'नष्टनराश्रितस्यापि नरत्वस्य पुनः सत्त्वं न निष्प्रमाणकं प्रत्यक्षसिद्धत्वात् । नष्टानष्टनराश्रितं नरत्वं तावदेकम्, तच्चाविनष्टे नरे पुनरुपलभ्यते । अत एवानुमानमपि बाधितविषयमि'त्यत आह **एकत्व इति** ।

## अनु०— एकत्वे नास्ति मानं च

स्यादेतद्यद्येतयोः **एकत्वे मानं** स्यात्, **न च** तद् **अस्ति** इत्यर्थः । **न च प्रत्यभिज्ञानं प्रमाणम्, तस्य स्वरूपतः प्रमाणत्वेन च सन्दिग्धत्वात्** । **चशब्देनान्योन्याश्रयत्वं समुच्चिनोति, 'एकत्वे हि पुनः (तस्य) सत्त्वसिद्धिस्तत्सिद्धौ चैकत्वसिद्धिरि'ति** ।

**परि०**— **प्रत्यभिज्ञानमिति** । चैत्रगतमेव नरत्वं मैत्रे इति प्रत्यभिज्ञानमित्यर्थः ।

**गु०दी०**— **तस्य स्वरूपतः प्रमाणत्वेन च सन्दिग्धत्वात्** इत्यस्य तदेवेदं नरत्वमिति प्रत्यभिज्ञास्वरूपस्यैव सन्दिग्धत्वात् । कस्यचिन्मन्दस्यास्ति चेत् त एवेमे कुन्तलकलापा इतिवत् सादृश्यनिबन्धनत्वेनैकत्वे प्रामाण्यस्य सन्दिग्धत्वादित्यर्थः ।

**यादु०— तस्य स्वरूपत इति** । तदेवेदं नरत्वमिति प्रत्यभिज्ञास्वरूपस्यैवाभावाद्दुर्दर्शनाभ्यासविजृम्भितस्य तत्सत्त्वेऽपि तत्प्रामाण्यस्यासम्मतेरित्यर्थः ।

**वं०प०— एतयोः** नष्टानष्टनरवर्तिनोर्नरत्वयोः । **प्रत्यभिज्ञानं** यन्नष्टाश्रितं नरत्वं तदेवेदं नरत्वमित्येवंरूपम् । **स्वरूपत इति** । तथा चैवं प्रत्यभिज्ञैव नास्तीत्यर्थः । **प्रमाणत्वेनेति** । यद्येवमस्ति प्रत्यभिज्ञा तर्ह्यप्रमाणमेव, भ्रमरूपेत्यर्थः । भेदस्य प्रमाणसिद्धत्वेन तद्बाधादिति भावः ।

**कं०रा०— न चेति** । नष्टानष्टनराश्रितनरत्वैकत्वे प्रत्यभिज्ञानं प्रमाणमिति न च । प्रत्यभिज्ञास्वरूपस्यैव विप्रतिपन्नत्वात् तत्सद्भावेऽपि वा तत्प्रामाण्यस्य विप्रतिपन्नत्वादिति भावः । **एकत्वे हीति** । **नष्टानष्ट**नराश्रितनरत्वैकत्वसिद्धौ हि नरनाशानन्तरमपि तदाश्रितनरत्वस्य सत्त्वसिद्धिः तत्सिद्धौ च तदैकत्वसिद्धिरित्यन्योन्याश्रयत्वमिति भावः ।

**श्रीनिधि०— तस्य स्वरूपतः प्रमाणत्वेन चेति** । यन्नष्टे नरे नरत्वं तदेवेदमिति प्रत्यभिज्ञास्वरूपमेव नास्ति । अस्तु वा स्वरूपं तथापि नास्मदभिमतहानिः । तस्यां 'सोऽयं कुन्तलकलाप' इतिवत् सादृश्यविषयत्वेन तदैक्ये प्रामाण्यायोगात् । एवं चास्मद्विप्रतिपत्तौ जागरूकायां तव सन्देह एव स्यात् । न निश्चयः । विशेषदर्शनं च नास्तीत्यर्थः ।

**शे०वा०—** तथाऽपि नरत्वस्यैकत्वनिराकरणमनर्थकमित्याशङ्क्य पूर्ववाक्योक्तस्याश्रयनाशोत्तरकाले सत्त्वस्याप्रामाणिकत्वप्रमाणबाधितत्वयोरुपपादनार्थत्वान्न तदिति भावेन तदुपपादकतया तद्योजयितुं तदसिद्धिशङ्कामुत्थापयति **नष्टेति** । **अनुमानमपीति** । विनाशवदाश्रयसमवेतत्वादित्यनुमानमित्यर्थः । **बाधितविषयमिति** । ततश्च नष्टनराश्रितस्यापि नरत्वस्य पुनः सत्त्वं न प्रमाणबाधितमपीति भावः । तदेवेदं नरत्वमिति प्रत्यभिज्ञानमेव तत्र प्रमाणमिति कथं प्रमाणाभाव इत्याशङ्क्य निषेधति **न चेति** । तत्कुत इत्यतः स्वरूपतः प्रमाणत्वेन च निश्चितमेव च साधनबाधनक्षमम् । न चेदं तथा । स्वरूपेण प्रमाणत्वेन चास्यानिश्चितत्वात् कथमनेन सत्त्वसिद्धिर्भवेदित्याह **तस्य स्वरूपत इति** । तदेवेदं नरत्वमिति प्रत्यभिज्ञास्वरूपस्यैवाभावाद् दुर्दर्शनाभ्यासविजृम्भितस्य तस्य सत्त्वेऽपि तत्प्रामाण्यस्यासम्मतेरित्यर्थः । नन्वाश्रयनाशोत्तरकालमुपलभ्यमानतया पुनः सत्त्वसिद्धेस्तत एवैकत्वसिद्धिर्भविष्यतीत्यत आह **चशब्देनेति** । अन्योन्याश्रयमेव स्पष्टयति **एकत्वे हीति** ।

**वा०र०—** विनाशवदाश्रयसमवेतत्वानुमानमित्यर्थ इति स्वरसः पाठः ।

**विठ्ठल०—** ननु कथं प्रमाणाभावः । यच्चैत्रगतं नरत्वं तदेव मैत्रेऽस्तीति प्रत्यभिज्ञानस्य सत्त्वादित्यत आह **न च प्रत्यभिज्ञानमिति** । न चैवंविधा प्रत्यभिज्ञानुभूयते । दुर्दर्शनाभ्यासविजृम्भितदुराग्रहेण तदङ्गीकारेऽपि

न तत्प्रामाण्यमस्माकं सम्मतमित्याशयेनाह **तस्य स्वरूपत इति**। **एकत्वे पुनः सत्त्वसिद्धिरिति** नष्टानष्टनरवर्तिनोर्नरत्वयोरेकत्वसिद्धौ नष्टधर्मिकनरत्वस्य पुनर्नरान्तरे सत्त्वसिद्धिरित्यर्थः।

**॥ इति नष्टानष्टनराश्रितनरत्वयोरेकत्वे प्रमाणाभावः ॥**

**॥ इति नरत्वादिसामान्यस्य प्रतिव्यक्तिभिन्नत्वे अनुमानान्तरम् ॥**

**॥ इति सामान्यस्य एकैकाश्रितत्वे तस्य अनुमानसिद्धता ॥**

* * *

**॥ अथ सामान्यस्य एकैकाश्रितत्वे तस्य आगमसिद्धता ॥**

२२२ सु०— एवं सामान्यादीनां प्रत्याश्रयं भेदे प्रत्यक्षानुमानान्युक्त्वा श्रुतिमप्याह **श्रुतिरपीति**।

अनु०— श्रुतिरप्याह सादरम्।
भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि ॥
स्वैः स्वैर्धर्मैरभिन्नाश्च स्वरूपैरपि सर्वशः।
अनिवृत्तविनाशास्तु धर्मा उभयरूपकाः ॥
न केनचिदभिन्नोऽतो भगवान् स्वगुणैर्विना।
इति

**आह** 'सामान्यादीनां प्रत्याश्रयं भेदमि'ति शेषः। **भिन्नाः** परस्परतो भेदवन्तः। अन्योन्यं भिन्ना धर्मा येषां ते **भिन्नधर्माः**। भिन्नधर्मा इत्यनेनाश्रयतोऽपि भेदोऽभिहित इति शङ्कानिरासार्थमुक्तं **स्वैरिति**। **स्वरूपैरपि** यथा भगवान् मत्स्यादिभिः। 'स्वैः स्वैर्धर्मैरभिन्नाश्च' इत्यस्यापवादः **अनिवृत्तेति**। अनिवृत्तेऽप्याश्रये विनाशो येषां ते तथोक्ताः। यथाऽऽमघटश्यामतादयः। **उभयरूपका** भिन्नाभिन्नाः। **न केनचित्** इति श्रुतिः स्वप्रकृतमुपसंहरति। अत्र **सर्वश** इत्यादिवचनादुक्तविवरणाच्चादरः प्रतीयते।

**परि०— प्रत्यक्षानुमानानीति**। 'तत्तद्धर्मतयेयत' इत्यत्रास्य प्रत्यक्षादिपरत्वेन व्याख्यानादिति भावः। 'स्वरूपैरपी'त्यस्य स्वकीयावतारविग्रहैरभिन्ना इत्यर्थमुपेत्य तस्य स्थलमाह **स्वरूपै-**

**रित्यादिना** । **आमघटेति** । अपक्वघटेत्यर्थः । उदाहृतवाक्ये भगवतोऽप्रकृतत्वात् कथं भगवानित्युपसंहार इत्यत आह **न केनचिदिति** । उपसंहरतीत्यन्वयः । कर्त्राद्याकाङ्क्षायां 'श्रुतिः स्वप्रकृतमि'त्युक्तम् । मूलकृदनुदाहृते पूर्वभागे प्रकृतमित्यर्थः । 'श्रुतिरप्याह सादरमि'त्युक्तं मूले । तत्रादरज्ञापकमाह **सर्वश इत्यादीति** । आदिपदेन 'अनिवृत्तविनाशाश्चे'त्यपवादवचनग्रहः । आदराभावे सर्वश इति प्रागुक्तस्यापवादं च न ब्रूयादिति भावः । भिन्नधर्मा इत्यत्राश्रयतोऽपि भेदो नाभिमतः । किन्त्वेकव्यक्तिधर्मापेक्षया व्यक्त्यन्तरधर्माणामेवेति भावेन 'स्वैःस्वैर्धर्मैरभिन्ना' इत्यनेन 'भिन्नधर्मा' इ(त्युक्तस्य)त्यस्य विवरणाच्चेत्यर्थः ।

**यादु०— सर्वश इत्यादिवचनादिति** । अत्रादिपदेनाखिला इति वचनस्य ग्रहणम् । ततश्चाखिला इत्युक्त्यैव विवक्षितार्थलाभे पुनः सर्वश इति वचनादादरो ज्ञायत इत्यर्थः । **उक्तविवरणाच्चेति** । **स्वैः स्वैः** इत्यनेन भिन्नधर्माश्चेत्युक्तस्य विवरणादित्यर्थः । अत्र धर्माणामाश्रयभेदशङ्कापरिहाराय तदभेदोक्त्या परस्परं भेद एव भिन्नधर्मा इत्यत्र विवक्षित इति विवरणं लभ्यत इति ज्ञातव्यम् । तथा **स्वैः स्वैर्धर्मैरभिन्ना** इत्युक्तस्य **अनिवृत्तविनाशा** इत्यपवादोक्त्या येऽनिवृत्तविनाशा न भवन्ति तैरेवाभेद इति विवरणादित्यर्थः ।

**वं०प०— अन्योन्यं** रूपरसादेः परस्परमित्यर्थः । **स्वरूपैरिति** । तथा च स्वैरभिन्नाः स्वैःस्वैर्धर्मैरभिन्नाश्चेति योज्यम् ।

**कं०रा०— भिन्नधर्मा इति** । यद्यपि 'धर्मादनिच् केवलादि'ति समासान्तप्रत्ययेन भाव्यं तथापि छान्दसत्वाद्वा समासान्तप्रत्ययविधेरनित्यत्वाद्वा तदभाव इति द्रष्टव्यम् ।

**श्रीनिधि०— अन्योन्यं भिन्ना धर्मा येषां ते भिन्नधर्मा इति** । तन्निष्ठधर्मापेक्षया एतन्निष्ठधर्मभेदवन्तः एतन्निष्ठधर्मापेक्षया तन्निष्ठधर्मभेदवन्त इति फलितोऽर्थः । केचिदेकनिष्ठधर्माणामपि खण्डितां समकालीनानां अत्यन्तभेद एतद्वाक्यलभ्योऽर्थ इत्याहुः, तन्न, अनुभवविरोधात् । किन्तु भेदाभेदावेवेति । न हि खण्डितत्वमत्यन्तभेदावच्छेदकमुक्तम् । 'खण्डिते भेद ऐक्यं चे'त्युक्तेः । धर्मधर्मिभावाभावस्तु वैधर्म्यमात्रं विग्रहवाक्यं चान्यथासिद्धमिति द्रष्टव्यम् । तर्हि तन्तूनामपि भेदाभेदौ स्यातामिति चेत् प्रमाणविरुद्धत्वान्न भवत इति ब्रूमः । **स्वरूपैरिति** । स्वाश्रयैरित्यर्थः । **सर्वश इत्यादि वचनादिति** । आदिपदेनाखिला इत्युक्तिर्ग्राह्या । **उक्तविवरणादिति** । स्वैःस्वैरित्यादिनापवादकथनेन उक्तविवरणादित्यर्थः ।

**शे०वा०—** श्रुतिरपीत्युत्तरग्रन्थस्याव्यवहितप्रकृतसामान्यमात्रविषयकताभ्रमनिरासाय प्रतिपाद्यमाह **एवमिति** । आदिपदेन संयोगादीनां परिग्रहः । भिन्नाः स्वगतभे[illegible] [illegible]न्यथाप्रतीतिनिरासायाह **भिन्ना इति** । अन्योन्यं आश्रयतश्च भिन्ना धर्मा येषां ते तथोक्ता इत्यन्यथाप्रतीतिनिरासाय भिन्नधर्मा इत्येतद्व्याचष्टे

**अन्योन्यमिति** । ननु प्रतीत एवार्थोऽस्तु किं सङ्कोचेनेत्यत आह **भिन्नधर्मा इत्यनेनेति** । **स्वप्रकृतमिति** । श्रुतौ प्रकृतमित्यर्थः । **सर्वश इत्यादिवचनादिति** । आदिपदेनाखिला इति वचनपरिग्रहः । अखिला इत्युक्त्यैव वा सर्वश इत्युक्त्यैव वा विवक्षितार्थसिद्धावपि यदुभयमुपादीयते तेनादरो वाऽवगम्यत इत्यर्थः । **उक्तविवरणाच्चेति** । 'स्वैः स्वैर्धर्मैरभिन्नाश्चे'त्यनेन भिन्नधर्माश्चेत्यस्य 'अनिवृत्तविनाशास्तु धर्मा उभयरूपका' इत्यनेन 'स्वैः स्वैर्धर्मैरभिन्न'श्चेत्यस्य विवरणादित्यर्थः । तत्र च स्वैः स्वैर्धर्मैरभिन्नाश्चेत्यस्य भिन्नधर्मा इत्यनेनाश्रयतोऽपि धर्माणां भेदोऽभिहित इति शङ्कानिरासकतयाऽनिवृत्तेत्यादेस्तु स्वैः स्वैर्धर्मैरभिन्नाश्चेत्युक्तार्थापवादकथनरूपतया तद्विवरणत्वं बोध्यम् । शङ्कानिरासकत्वादिना विवरणस्यानेकप्रकारत्वं च अनुभाष्यस्थाद्यश्लोकत्रयस्य भाष्यस्थाद्यश्लोकविवरणरूपत्वं वदद्भिष्टीकाकारैरेवोक्तमनुसन्धेयम् ।

**वा०र०— सङ्कोचेनेत्यत इति** । इति शङ्का यतो भवति इति मूलोक्तशङ्कोपपादनम् । अतः तच्छङ्कानिरासाय आहुः स्वैरित्येतत्प्रवृत्तमित्याहेत्यर्थः ।

**विठ्ठल०— अत्र सर्वश इत्यादिवचनादिति** । आदिपदेन अखिला इत्यस्य ग्रहणम् । ततश्च अखिला इत्युक्त्यैव विवक्षितार्थलाभे पुनः सर्वश इति वचनादादरो ज्ञायत इत्यर्थः । **विवरणाच्चेति** । भिन्नधर्माश्चेत्युक्तस्यैव स्वैःस्वैरित्यनेन विवरणादित्यर्थः । अत्र धर्माणामाश्रयभेदशङ्कापरिहाराय तदभेदोक्त्या परस्परं भेद एव भिन्नधर्मा इत्यत्र विवक्षित इति विवरणं लभ्यते । तथा स्वैः स्वैः धर्मैरभिन्ना इत्युक्तस्यानिवृत्तविनाशा इत्यपवादोक्त्या ये अनिवृत्तविनाशास्तैरेवाभेद इति विवरणाच्चेत्यर्थः ।

**।। इति सामान्यस्य एकैकाश्रितत्वे तस्य आगमसिद्धता ।।**

* * *

**।। अथ सामान्यस्य एकैकाश्रितत्वे पीलुपाकवाद्युक्तपाकजप्रक्रियानिरासान्नोक्तार्थे बाधकम् ।।**

**२२३ सु०— ननु घटादेरामद्रव्यस्याग्निना सम्बद्धस्य, अग्न्यभिघातान्नोदनाद्वा तदारम्भकेषु परमाणुषु, कर्माण्युत्पद्यन्ते । तेभ्यो विभागाः, विभागेभ्यस्संयोगविनाशाः । संयोगविनाशेभ्यः कार्यद्रव्यं विनश्यति । तस्मिन्विनष्टे परमाणुष्वग्निसंयोगादौष्ण्यापेक्षाच्छ्यामादीनां विनाशः । पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते । तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यते । तत्र च कारणगुणप्रक्रमेण रूपाद्युत्पत्तिर्भवति । तत्कथमामघटश्यामत्वादीनामयावद्द्रव्यभावित्वमुच्यते ।**

**मैवम् । अत्र प्रमाणाभावात् ।**

**परि०**— पीलुपाकप्रक्रियामाश्रित्य शङ्कते **ननु घटादेरिति**। कुम्भकारेण पाकार्थं निक्षिप्तघटादेरित्यर्थः। अभिघातो नाम बलवदग्निसंयोगः। नोदनं नाम स्वस्थानाद्वस्तुनश्चलनहेतुसंयोगविशेषः। **कार्यद्रव्यमिति**। द्व्यणुकप्रभृत्यन्त्यावयविपर्यन्तं कार्यद्रव्यमित्यर्थः। संयोगनाशविभागादिशब्देन तत्तत्कार्यावयवपरमाणुसंयोगनाशादयो ग्राह्याः। **श्यामादीनामिति**। रसादिरादिपदार्थः। **उत्पन्नपाकजेष्विति**। उत्पन्नानि पाकजानि रूपादीनि येषां तेष्वित्यर्थः। **कारणगुणप्रक्रमेणेति**। कारणगुणाः कार्यगुणानारभन्त इति क्रमेणान्त्यावयविपर्यन्तं रूपाद्युत्पत्तिरित्यर्थः। **अत्रेति**। उक्तविधनाशोत्पत्त्योः प्रमाणाभावादित्यर्थः।

**यादु०**— पीलुपाकवादी शङ्कते **नन्विति**। **अग्निना सम्बद्धस्येति**। आमपाकनिक्षिप्तस्येत्यर्थः। तदारम्भकेषु परमाणुष्वग्न्यभिघातान्नोदनाद्वेत्यन्वयः। अन्यथा घटादेरप्यभिघातादित्यन्वये परमाणुषु कर्मानुपपत्तिः। **अग्न्यभिघातान्नोदनाद्वेति**। नन्वभिघातान्नोदनयोः को विशेषः। उच्यते। यः संयोगविशेषः शब्दे निमित्तकारणं भवति यज्जनितं कर्म संयोगिनोः परस्परं विभागहेतुश्च भवति स संयोगविशेषोऽभिघातः। यथा पाषाणादेः पादादिसंयोगोऽभिघातः। वेगापेक्षेण पादसंयोगेन पाषाणे कर्मोत्पत्तौ तेन तत्र शब्दविभागयोरुत्पत्तेः। यस्तु शब्दे निमित्तकारणं न भवति यज्जनितं कर्म संयोगिनोः परस्परं विभागहेतुश्च न भवति स संयोगविशेषो नोदनम्। यथा पङ्के पादसंयोगो नोदनम्। पङ्के पादसंयोगजेन कर्मणा तत्र शब्दविभागयोरजननात्। यदि तत्रापि शब्दविभागयोरुत्पत्तिस्तर्ह्यभिघात एव स इत्यादि विभावनीयम्। **कार्यद्रव्यमिति**। द्व्यणुकादिघटान्तमित्यर्थः।

**वं०प०**— नन्वामघटस्य पाकेन आपरमाण्वन्तभङ्गे तन्निष्ठश्यामत्वस्यापि नाशेन शामत्वस्यापि यावद्द्रव्यभावित्वात् कथमयावद्द्रव्यभाविधर्मत्वं 'अनिवृत्तविनाशास्त्वि'त्यनेनोच्यते। पीलुपाकप्रक्रियया आश्रयस्यापि नाशेनानिवृत्तेऽप्याश्रये विनाशाभावादित्याशङ्कते **नन्वित्यादिना**। **अग्न्यभिघातादिति**। अग्निरूपस्पर्शवद्वेगवद्द्रव्यसम्बन्धरूपादित्यर्थः। **नोदनाद्वेति**। आमघटे जलेन पूर्णे सत्यामद्रव्यस्य जलेन सम्बद्धस्य जलरूपद्रवद्रव्यसम्बन्धरूपान्नोदनाद्वेत्यर्थः। **जायन्त इति**। पार्थिवपरमाणुरूपादिगुणा जायन्त इत्यर्थः। **उत्पन्नपाकजेषु** उत्पन्नाग्निसंयोगजन्यरूपादिमत्स्वित्यर्थः।

**कं०रा०**— **आत्माणुसंयोगादिति**। अदृष्टवदात्माणुसंयोगादित्यर्थः। एतस्य अणुषु कर्मोत्पत्तावित्यनेनान्वयः।

**श्रीनिधि०**— नन्वग्निसंयोगेन कथं श्यामादिविनाशः। न हि द्रव्यान्तरसंयोगस्य तथात्वं दृष्टमित्यत आह **औष्ण्यापेक्षादिति**। यद्वा नोदाहरणमादातव्यमित्यनेनाह उक्तस्पर्शातपसंयोगादिनापि कदलीफलादौ

रूपपरावृत्तिदर्शनादिति । यद्वा तेजःसंयोगमात्रं न हेतुः किन्त्वनभिभूततेजःसंयोगः । अन्यथा सर्वसंयोगेनापि तत् स्यादित्यनेनाह । एवमुत्तरत्रापि । **उत्पन्नपाकजेष्विति** । उत्पन्नं पाकजं येषु ते उत्पन्नपाकजाः इति विग्रहः । **तत्कथमामघटश्यामत्वादीनामयावद्द्रव्यभावित्वमुच्यत इति** । श्यामत्वादीनां आमद्रव्यनाशानन्तरं नष्टत्वेन रूपनाशानन्तरं तदाश्रयद्रव्यस्याभावात् पीतरूपाश्रयश्चान्य एव उत्पद्यत इति कथमेतदित्याशयः । **अत्र** अपीलुपाकप्रक्रियायाम् ।

**शे०वा०**— 'अनिवृत्तविनाशा' इति पाकजोत्पत्तिस्थले भाष्यकारीयं द्रव्याविनाशाभिधानं न केवलं पाकजानामयावद्द्रव्यभावित्वप्रतिपादनेन तद्भेदाभेदोपपादनार्थं, किन्नाम कार्यद्रव्यविध्वंसवन्तः परमाणव एव पच्यन्त इति पीलुपाकवाद्युक्तपाकजप्रक्रियानिरासार्थं चेत्यभिप्रेत्य तां निरसितुं पीलुपाकवादाश्रयणेनोक्तानुपपत्तिमाशङ्कते **नन्विति** । आदिपदेन सर्वपार्थिवोपादानम् । यद्यप्यामेति न घटावयविनो विशेषणं, तस्य सर्वस्यामत्वेन वैयर्थ्यात् । नापि परमाणोः सर्वस्य तस्य पक्वत्वेन विरोधात् । तथाऽप्यापाकनिक्षिप्ताग्निसाध्यपाकापेक्षया पृथिवीमूलकारणपरमाणोरेवैतद्विशेषणमिति ध्येयम् । **अग्निना सम्बद्धस्य** संयुक्तस्य पाकनिक्षिप्तस्येति यावत् । **तदारम्भकेषु** घटाद्यारम्भकेषु, परम्परयेति शेषः । परमाणुषु कर्माण्युत्पद्यन्ते । अत्र तदारम्भकेष्विति कार्यनाशादिप्रक्रियासिद्ध्यर्थमुक्तम् । कारणनाशस्य कार्यनाशहेतुत्वादिति बोध्यम् । **अभिघातान्नोदनाद्वेत्यस्य** परमाणुष्वित्यनेनैव सम्बन्धः । न तु घटादेरग्न्यभिघातान्नोदनाद्वेति । तथा सति घटादिनिष्ठाभिघातनोदनयोर्घटादावेव कर्मजनकतया परमाणुषु कर्मानुत्पत्तिप्रसङ्गात् ।

कः पुनरभिघातनोदनयोर्विशेष इति चेत् । येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतुर्भवति, यः संयोगः शब्दनिमित्तकारणं च भवति स संयोगविशेषोऽभिघातः । यथा पाषाणादेः पादादिसंयोगः । वेगापेक्षेण पादसंयोगेन पाषाणादौ कर्मोत्पत्तौ तेन तत्र शब्दविभागयोरुत्पत्तेः । येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतुर्न भवति यः संयोगः शब्दकारणनिमित्तं च न भवति स संयोगविशेषो नोदनम् । यथा पङ्के पादसंयोगो नोदनम् । पङ्के पादसंयोगजेन कर्मणा तत्र शब्दविभागयोरजननात् । यदि तत्रापि शब्दविभागयोरुत्पत्तिस्तर्ह्यभिघात एव स इत्यादि विभावनीयम् । एतदेव शाङ्करे काणादसूत्रोपस्कारे पञ्चमाध्यायस्य द्वितीयाह्निके 'नोदनादभिघातात्संयुक्तसंयोगाच्च पृथिव्यां कर्मे'ति सूत्रव्याख्यानावसरे स्पष्टम् ।

प्रशस्तपादभाष्ये तु 'यः संयोगविशेषो विभागापेक्षः परस्परं विभागहेतोरेकस्य कर्मणः कारणं सोऽभिघातः, यस्तु गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तान्व्यस्तान्वाऽपेक्षमाणः परस्परमविभागहेतोरेकस्य कर्मणः कारणं स नोदनमित्यनयोर्विशेषः' इत्युक्तम् । स्वजनकक्रियासमानाधिकरणक्रियाजनकः संयोग एवाभिघातः स्वजनकक्रियाव्यधिकरणक्रियाजनकसंयोगस्तु नोदनमित्यनयोर्भेद इति केचित् । स्पर्शवद्वेगवद्द्रव्यसंयोगोऽभिघातः, वेगरहितस्पर्शवद्द्रव्यसंयोगस्तु नोदनमिति बहवः । तदुभयं जातिरेवेति प्राञ्चः । **तेभ्यः** कर्मभ्यो, विभागाः । विभागेभ्यः **संयोगविनाशः** द्रव्यारम्भकसंयोगनाशः । **कार्यद्रव्यं** द्व्यणुकलक्षणं, तस्यैव साक्षा-

त्परमाणुजन्यत्वात् । यद्यपि द्व्यणुकानां बहुत्वाद्बहुषु बहुवचनमिति कार्यद्रव्याणीति बहुवचनमेव प्रयोक्तुमुचितं, तथाऽपि जात्यभिप्रायमेतदेकवचनमित्यवधेयम् । **उपलक्षणं चैतत्** । द्व्यणुकनाशे सति समवायिकारणनाशात् त्र्यणुकनाश इत्यादिक्रमेण घटान्तं द्रव्यं नश्यतीत्यपि द्रष्टव्यम् ।

द्व्यणुकाद्यन्त्यावयविपर्यन्तं कार्यनाशानन्तरं परमाणुष्वग्निसंयोगाद्रूपादिचतुष्टयं नश्यतीत्याह **तस्मिन्निति** । सौरतेजोवच्चक्षुरादितेजसां न पाचकत्वमिति मन्वानो विशिनष्टि **औष्ण्यापेक्षादिति** । पृथिव्याः श्यामं रूपमनादीति मतं निराकुर्वन् जन्मनो भावमाह **पुनरिति** । अन्यथाऽनादेर्भावस्य नित्यत्वाच्छ्यामादीनां विनाशानुपपत्तिप्रसक्तेरिति भावः । परमाणुषु रूपाद्युत्पादविनाशौ नैकपावकसम्पर्ककारणकौ रूपाद्युत्पादविनाशत्वात् । श्यामाद्युत्पादविनाशवदित्याह **अन्यस्मादिति** । ननु चैक एवाग्निसंयोगः पूर्वरूपादेर्नाशकोऽन्यस्य रूपादेरुत्पादकश्च भविष्यतीति किमित्युत्पादकनाशकयोरग्निसंयोगयोरन्यत्वाश्रयणम् । न चैकस्योत्पादकत्वनाशकत्वे विरुद्धे कथं स्यातामिति वाच्यम् । एकदोत्पाद्यनाश्यव्यक्तिभेदेन तयोरविरोधात् । तद्यथैक एव शब्दः पूर्वशब्दं नाशयत्युत्तरं चोत्पादयति । अन्यथा तदपि न स्यात् । कालभेदाद्वा तयोरविरोधात् । यथोपान्त्यशब्द एकदा अन्त्यशब्दं नाशयत्यन्यदा तमेवोत्पादयति च । अन्यथोपान्त्यशब्दस्याप्यन्त्यशब्दोत्पादकत्वनाशकत्वाभावापातात् । तत्कथमेतदिति चेत् । सत्यम् । तथाऽपि पाकजेषु व्यक्तिभेदेन कालभेदेन वा नैकस्योत्पादकत्वनाशकत्वे सम्भवतः । कार्यविनाशविशिष्टं कालमपेक्ष्यैव हि रूपादिविनाशो भवति, सति कार्ये कार्यावष्टम्भस्यैव तत्प्रतिबन्धकत्वात् । न चात्र नियामकाभावः । अवयवरूपादिसमानकालत्वाव्याप्यत्वादवयविरूपादेः । सति च कार्यद्रव्ये परमाणुरूपादिनाशेऽवयवरूपाद्यभावेऽप्यवयविरूपादिसद्भावेनोक्तनियमभङ्गापत्तेरेव तत्र नियामकत्वात् । तथा रूपादिविनाशविशिष्टं कालमपेक्ष्यैव रूपाद्युत्पादो भवति । एकदैकस्मिन्नाश्रये नानारूपाननुभवेन सति रूपादौ रूपाद्यन्तरानुपपत्तेः । न चैतावन्तं कालमेकोऽग्निसंयोगोऽनुवर्तितुमीष्टे, तेजसोऽविलम्बगमनशीलत्वादित्याशयात् । **पाकजा** रूपरसगन्धस्पर्शाः । स्यादेतत् । यद्येवमापरमाण्वन्तो विनाशः स्वतन्त्राश्च परमाणवः पच्यन्ते, तदा कुलालादिव्यापारमन्तरेण घटादीनां पुनरावृत्तौ लोकव्यवहारोच्छेदः, व्यर्थश्च तेषां प्राच्यः प्रयास इत्यत आह **तदनन्तरमिति** । रूपाद्युत्पत्तेरनन्तरम् । **भोगिनाम्** उदकाद्याहरणद्वारेण तत्साध्यसुखदुःखाद्यनुभवभोगिनाम् । **अदृष्टापेक्षात्** । धर्माधर्मापेक्षात् । **आत्माणुसंयोगादि**त्यत्रात्मग्रहणं स्पष्टार्थं, भोगिनामित्यनेनैवात्मोपादानात् । **अणुष्विति** । परमाणुष्वित्यर्थः । कर्मणामुत्पत्तौ सत्याम् । **तेषां** परमाणूनाम् । **परस्परम्** अन्योन्यम् । **संयोगादिति** जात्यभिप्रायमेकवचनम् । द्व्यणुकम् आदि यस्य क्रमस्य तेन ।

कार्यद्रव्यं घटादिलक्षणमुत्पद्यते । **तत्र कारणगुणप्रक्रमेण रूपाद्युत्पत्तिः** परमाणुरूपादेर्द्व्यणुकेषु रूपादिकं, द्व्यणुकरूपादेस्त्र्यणुकेषु रूपादिकमित्यनेन क्रमेणेत्यर्थः । प्रमाणाभावेनोक्तप्रक्रियाया एवासिद्धत्वान्न तदाश्रयेणोक्ताक्षेपः सम्भवतीत्याशयेनाह **मैवमिति** ।

**वा०र०—** सत्येवाश्रये कार्यद्रव्येऽग्निसंयोगेन पूर्वरूपादिनाशे तत्संयोगान्तरेण रूपाद्यन्तरोत्पत्तिरिति मीमांसकाभिमतपिठरपाकपक्षव्यावर्तयितुमुक्तं **परमाणव एवेत्यादि** । अत्र परमाणव एवेत्युक्त्या पीलुशब्दार्थ

परमाणव इत्युक्तं भवति । पिठरस्त्ववयवी तत्पाक इति चान्यत्रेति सूचितम् । **आमेति** । प्रकृतपाकापेक्षेत्यादि किरणावल्यनुसारेणामपदव्याख्यानाय वर्धमानानुसारेणाशङ्क्य निराकरोति **यद्यप्यामेति** । तदुपपादनं वर्धमान-व्याख्यानानुसारेण ज्ञेयम् । किरणावल्यनुसारेणाह **अग्निना सम्बन्धस्येत्यादिना** । वर्धमानानुसारेणाह **कारणनाशस्येति** । अभिघातादित्यादेः पूर्वान्वियभ्रान्तिं निराकर्तुमाह **अभिघातादित्यादि** । **प्रशस्तपादेति** । कर्मपदार्थनिरूपणावसरे तच्च नोदनमित्यादिना तथा व्युत्पादनादिति भावः । ..........नुसारेणाह **स्वजनकेति** । मुरारिभट्टयनुसारेणाह **स्पर्शवदित्यादिना प्राञ्च इत्यन्तेन** । एतन्मतविवेकस्तत्त्वनिर्णयटीकाव्याख्यानप्रकाशादौ अस्माभिः किञ्चिन्निरूपितोऽस्ति तदनुसारेण ज्ञेयः । किरणावल्यनुसारेणाह **तेभ्य इत्यादिना लक्षणमित्य-न्तेन** । तत्र 'विभागेभ्यः संयोगविनाश' इति मूलानुवादः । द्रव्येत्यादि व्याख्यानं वर्धमानानुसारेणाह **तस्यैव इति** । जात्यभिप्रायमेकवचनमिति किरणावल्यनुसारेणाह **यद्यपीत्यादिना** । तदनुक्तमप्याह **उपलक्षणं चैत-दिति** । एतच्च द्व्यणुकादिप्रक्रमेणेत्युत्तरप्रशस्तदेवाचार्योक्त्यनुसारेणाह । षट्सहस्रगङ्गापुरीस्थतदनन्तरमित्येत-त्समानवाक्यव्याख्यानं तदनुसारेणाह **द्व्यणुकाद्यन्त्यावयवीति** । षट्साहस्रीकिरणावल्यनुसारेणाह **सौरतेजो-वदित्यादिना अन्यस्मादितीत्यन्तेन** । तत्र वर्धमानानुसारेण निमित्तवचनमन्यथानादेरितीति ध्येयम् । यद्यप्येक-स्योत्पत्तिविनाशहेतुत्वमित्यादि किरणावल्यनुसारेण वर्धमानकृततद्व्याख्यानपूर्वकमाह **ननु चैक एवेत्यादिना गन्धस्पर्श इत्यन्तेन** । किरणावल्यनुसारेणाह **तस्मादेतदित्यादिना प्रक्रमेणेत्यर्थ इत्यन्तेन** । **तत्र आपर-माण्वन्तो विनाश इति** । यद्यपि परमाण्वन्त इति वक्तुमुचितं तथाप्यन्तशब्दस्य अवयववचनत्वभ्रमनिरासेन परमाणूनामवधित्वमाविष्कर्तुं आपरमाण्वन्त इत्युक्तम् । तेनैवमुक्तं भवति । तावदयं विनाशो यावत्परमाणवो-ऽवसानमिति । .....टीकायामधिकं चोपपादितमिति ज्ञेयम् । .... । ननु यथा दशायान्तःपट इतीति प्रशस्तदेवीयापरमाण्वन्त इत्येतद्व्याख्यानं द्रव्यकिरणावल्यां कृतं तदत्रानुसन्धेयम् ।

**विठ्ठल०**— यत्प्रागुक्तं यथा आमघटश्यामतादय इति तत्र पीलुपाकप्रक्रियावादी शङ्कते **ननु घटादेरिति** । पाकार्थं स्थापितस्येत्यर्थः । बलवदग्निसंयोगोऽत्राभिघातः यथा दृढतरपाषाणादेः सवेगसंयोगः । द्रव्यांशसम्मेलनहेतुः संयोगविशेषो नोदनम् । यथा पङ्के पाकसंयोगः तेन समीपे पङ्कमेलनादिति विवेकः । **तदारम्भकेष्विति** । परम्परया घटाद्यारम्भकेष्वित्यर्थः । **कार्यद्रव्यमिति** । परमाणूनां परस्परसंयोगविनाशेभ्यो द्व्यणुकमारभ्यान्त्यावयविपर्यन्तकार्यद्रव्यमित्यर्थः । **श्यामादीनामित्यादिशब्देन** रसादीनां ग्रहणम् । **औष्ण्या-पेक्षादित्यस्यात्यौष्णवतोऽग्निसंयोगादित्यर्थः** । **पाकजा जायन्त इति** । परमाणुषु पाकजा रूपादयो जायन्त इत्यर्थः । **भोगिनामिति** । सुखदुःखादिभ्यो योग्यानामात्मनामदृष्टसहितादात्मनां परमाणूनां च संयोगादित्यर्थः। **उत्पन्नपाकजेष्विति** । उत्पन्नानि पाकजानि रूपादीनि येषां तेष्वित्यर्थः । **कारणगुणप्रक्रमेणेति** । परमाणु-द्व्यणुकादिलक्षणकारणगताः गुणाः द्व्यणुकत्र्यणुकादिकार्यगुणानन्त्यावयविपर्यन्तमारभन्त इति क्रमेणेत्यर्थः ।

**चषक**— पीलुपाकप्रक्रियां प्रत्याचिख्यासुस्तद्दिशा शङ्कते **नन्विति** । **अग्न्यभिघातान्नोदनाद्वेति** परमाणुष्वित्यनेनैवान्वेति । न तु घटादेरित्यनेन । तथा सति परमाणुषु कर्मोत्पत्त्यनिर्वाहात् । शब्दनिमित्तकारणत्वे

सति संयुक्तयोः परस्परविभागहेतुभूतकर्मजनकत्वलक्षणलक्षितः संयोगोऽभिघातः, वेगापेक्षपादसंयोगेन पाषाणे कर्मोत्पत्त्या शब्दविभागयोर्जननेन पाषाणादेः पादादिसंयोगोऽभिघातः । शब्दनिमित्तकारणत्वतादृशविभागहेतुभूत-कर्मजनकत्वविनिर्मुक्तत्वाङ्कितः संयोगो नोदनम् । पङ्के पादसंयोगजनितकर्मणा तत्र शब्दविभागयोरजननेन पङ्कादौ पादसंयोगो नोदनमिति स्थितम् । प्रपञ्चनं तु निबन्धान्तरदिशाऽवसेयम् । *जातेः प्रातिस्विकत्वे प्रत्यक्षा-नुमानश्रुतिकथनम् ॥*

* * *

**॥ अथ तत्र उक्तप्रक्रियायाः अप्रामाण्ये अयुक्तताशङ्का तन्निरासश्च ॥**

**२२४ सु०— 'नोदनाद्युत्पत्तौ कर्मोत्पत्तिः प्रमाणम्, कर्मसु विभागाः, तेषु पूर्वसंयोग-निवृत्तिः, तत्र कार्यद्रव्यविनाशः, तत्र च पूर्वरूपादिपरावृत्तिः । तथा रूपाद्यन्तरोत्पत्तिः स्थूलद्रव्योत्पत्तौ प्रमाणम्, सा तदवयवपरम्परायाम्, सा द्व्यणुके, तदुत्पत्तिः परमाणु-संयोगे, स च तत्क्रियायाम्, साऽदृष्टवदात्मसंयोगे' इति चेन्न, परमाणुष्विव कार्यद्रव्येषु पूर्वरूपादिनिवृत्तेरपूर्वरूपाद्युत्पत्तेरुपपत्तेः । 'पार्थिवावयविरूपादयः, स्वाश्रयविनाशादेव विनश्यन्ति, अवयविरूपादित्वात् दग्धपटरूपादिवत्; कारणगुणेभ्य एवोत्पद्यन्ते तत एव तद्वदेवे'ति चेन्न । क्वचित्सत्याश्रयेऽपि रूपा(दीनां वि)दिविनाशेऽग्निसंयोगजत्वे च विरो-धाभावात् । अन्यथा 'कार्यद्रव्यं संयोगविनाशादेव विनश्यति कार्यद्रव्यत्वात् द्व्यणुकवदि'-त्यादिकमपि स्यात् ।**

**परि०**— उत्तरोत्तरकार्याण्येव पूर्वपूर्वकारणरूपार्थेषु प्रमाणमिति शङ्कते **नोदनादीति** । अभिघात आदिपदार्थः । परावृत्तिरिति पर्यन्तं प्रमाणमि(त्यनु)त्यावृत्तिः । **सेति** । रूपाद्यन्तरो-त्पत्त्यनुमितस्थूलद्रव्योत्पत्तिरित्यर्थः । **कारणगुणेभ्य इति** । प्रयोगान्तरे पार्थिवावयविरूपादय इति पक्षस्य अनुवृत्तिर्ज्ञेया । **तत एवेति** । अवयविरूपादित्वात् पटरूपादिवदेवेत्यर्थः । **विनाशेऽग्नि-संयोगजत्वे चेति** । रूपादीनामिति योज्यम् । परमाणाविवेति भावः । तथा च प्रागुक्तप्रयोगा-वप्रयोजकावित्युक्तं भवति । **इत्यादिकमपीति** । कार्यद्रव्यं समवायिनाशान्नश्यति कार्यद्रव्यत्वात् । द्व्यणुकादिवदिति प्रयोग आदिपदार्थः ।

**यादु०**— कार्यमेव कारणे प्रमाणं भविष्यतीत्याशङ्कते **नोदनाद्युत्पत्तावित्यादिना** । कर्मसु विभागा इत्यादौ प्रमाणमित्येतदनुवर्तनीयम् । **क्वचित्सतीति** । क्वचिदवयविनि रूपाद्याश्रये सत्यपि रूपादीनां विनाश

इत्यर्थः । तथा च पूर्वानुमानमप्रयोजकमिति भावः । **अग्निसंयोगजत्वे चेति** । तथा च द्वितीयानुमानमप्रयोजकमिति भावः ।

**वं०प०**— नोदनादिना नाशो नाप्रामाणिकः, यतः कार्यमेव कारणसद्भावे मानमित्याशयेन शङ्कते **नोदनादीत्यादिना** । तथा द्रव्यान्तरोत्पत्तिरपि नाप्रामाणिकीत्याह **तथेत्यादिना** । **परमाणुष्विति** । यथा सत्स्वेव परमाणुषु पाकेन पूर्वरूपनिवृत्तिरूपान्तरोत्पत्ती भवतः, तथा सत्येव कार्यद्रव्ये पूर्वरूपोत्तररूपविनाशोत्पत्त्योः सम्भवेन कार्यद्रव्यनाशस्यावक्तव्यत्वादित्यर्थः । तथा च पिठरपाकप्रक्रियैवास्तु न पीलुपाकप्रक्रियेति भावः । कार्यद्रव्यनाशोऽनुमानसिद्धत्वात् स्वीकार्य इत्याशङ्कते **पार्थिवेति** । **उत्पद्यन्ते** पार्थिवावयविरूपादय इति वर्तते । यदा कारणगुणजन्यत्वं रूपादेस्तदा कार्यद्रव्यनाशेन द्रव्यान्तरमुत्पद्यते । तत्र च गुणाः कारणगुणेभ्यो जायन्त इति स्यादिति भावः । **क्वचिदिति** । अवयविरूपादेराश्रये सत्यपि विनाशस्य सम्भवादाद्यानुमानेऽप्रयोजकता । तथा सत्येवावयविद्रव्येऽवयविरूपादेर्घटाग्निसंयोगरूपपाकासमवायिकारणत्वे सम्भवति सति कार्यद्रव्यनाशमङ्गीकृत्य कारणगुणेभ्य एवोत्पत्तिर्नैव वाच्या । तथा च द्वितीयानुमानेऽप्यप्रयोजकतेति भावः । **अन्यथेति** । यदि रूपादेः स्वाश्रयविनाशेनैव नाशः कारणगुणेभ्य एव चोत्पत्तिरुच्यत इत्यर्थः स्यात् । तथाच समवायिकारणनाशेन द्रव्यनाशः क्वापि न स्यात् । क्वचिद्दृष्टत्वात् तदङ्गीकारे प्रकृतेऽपि तत्तुल्यमिति हृदयम् ।

**श्रीनिधि०**— **परमाणुष्विव कार्यद्रव्य इति** । धर्मिनाशाभावेऽपीत्यर्थः । **पार्थिवावयविरूपादय इति** । प्रथमानुमाने पाकेन नश्यमाना रूपादयः पक्षः । द्वितीये तु पाकजाः । अन्यथा एतत्कालोत्पन्नविनष्टघटरूपाद्यंशे बाधः स्यात् । द्वितीये प्रथमरूपादौ, सिद्धसाधनं स्यादिति द्रष्टव्यम् । परमाणुरूपादौ बाधव्यभिचारपरिहारार्थं पक्षे हेतौ वा अवयविविशेषणम् । **कारणगुणेभ्य एवोत्पद्यन्त इति** । अत्राप्युभयत्रावयविविशेषणकृत्यं द्रष्टव्यम् । **तद्वदेवेति** । पटरूपादिवदित्यर्थः । तत्रापि प्रथमं रूपादिकं द्रष्टव्यं किं विपक्षे सत्त्वादेतदनुमीयते उत सहदर्शनमात्रेण । नाद्य इत्याह **क्वचिदिति** । दग्धपटादिरूपाद्यतिरिक्त इत्यर्थः । एवं चाप्रयोजकमनुमानद्वयमिति भावः । द्वितीयेऽतिप्रसङ्ग इत्याह **अन्यथा कार्यद्रव्यमिति** । **संयोगविनाशादेव** कारणसंयोगनाशादेवेत्यर्थः । तच्चानिष्टम् । दहनादिना पटनाशे तदसम्भवादिति ।

**शे०वा०**— कार्यस्यैव कारणे प्रामाण्यात् कथमुक्तप्रक्रियाया अप्रामाणिकत्वमित्याशयेन शङ्कते **नोदनाद्युत्पत्तावित्यादिना** । कर्मसु विभागा इत्यादौ प्रमाणमित्यनुवर्तनीयम् । विभागशब्दश्च विभागाजन्यविभागपर एव । तस्यैव कर्मकार्यतया स्वकारणे कर्मणि प्रमाणत्वसम्भवात् । न तु विभागसामान्यपरः । तस्यातत्कार्यतयाऽतत्कारणकर्मणि प्रामाण्यानुपपत्तेरित्यवधेयम् । नोदनाद्युत्पत्तौ कर्मोत्पत्तिः प्रमाणं कर्मसु, विभागास्तेषु पूर्वसंयोगनिवृत्तिस्तत्र कार्यद्रव्यविनाश इति इत्यस्तु । एतेषां कार्यकारणभावावधारणात् कारणं विना च कार्यानुत्पत्तेः । कार्यद्रव्यं विनश्यतीत्यत्र तु किं प्रमाणम् । नहि सति द्रव्ये रूपादीनां विनाशोत्पत्ती नोपपद्येते । परमाणुष्विव कार्यद्रव्येऽपि तयोरविरोधादित्याशयेनाह **परमाणुष्विति** । अपूर्वरूपाद्युत्पत्तेरित्यतः परं चेति शेषः ।

स्वाश्रयविनाशादेव नश्यन्तीत्यत्र साध्ये नष्टघटरूपेणार्थान्तरतापरिहारायैवेत्युक्तम् । परमाणुगतरूपादिभिरनैकान्तिकतापरिहारायावयविग्रहणम् । कार्यगतसत्तादिव्यावृत्त्यै रूपादीत्युक्तम् । कारणगुणेभ्य एवेत्यत्र स्वकारणगुणेभ्य एवेत्यर्थः । **तत एवेति** । अवयविरूपादित्वादेवेत्यर्थः । **तद्वदेवेति** । दग्धपटरूपादिवदेवेत्यर्थः । यथा द्रव्यनाशे क्वचित्समवायिकारणनाशो हेतुः क्वचिच्चासमवायिकारणनाशो हेतुः । न तु सर्वत्र द्रव्यनाशे समवायिकारणनाश एव हेतुरिति वाऽसमवायिकारणनाश एव हेतुरिति वा यथा न नियमोऽभिमतः, तथाऽवयविरूपादिनाशेऽपि क्वचिदाश्रयनाशः क्वचिच्चाग्निसंयोगो हेतुर्भविष्यतीत्यप्रयोजकमाद्यमनुमानमित्याशयवानाह **क्वचिदिति** । क्वचिदवयविनि रूपाद्याश्रये सत्यप्यग्निसंयोगाद्रूपादीनां विनाशे विरोधाभावादित्यर्थः । द्वितीयानुमानेऽप्यप्रयोजकतामाह **अग्निसंयोगजत्वे चेति** । क्वचित्पार्थिवावयविरूपादीनामग्निसंयोगजत्वेऽपि विरोधाभावादित्यर्थः । पार्थिवावयविरूपादीनां स्वाश्रयनाशादेव विनाशाभ्युपगमे तत्कारणगुणेभ्य एवोत्पादाङ्गीकारे चातिप्रसङ्गमाह **अन्यथेति** । तथा च समवायिकारणनाशस्य कार्यद्रव्यनाशहेतुत्वं तदभिप्रेतं भज्येतेति भावः । आदिपदेन 'पार्थिवपरमाणुरूपशब्दसुखादय आश्रयनाशविनाश्याः कार्यत्वे सति विशेषगुणत्वाद्घटरूपवदि'त्याभासान्तरपरिग्रहः । एतेनैवायं पार्थिवोऽवयवी द्रव्यनाशजन्यध्वंसप्रतियोगिरूपादिमान् अवयवरूपजन्यरूपवान् वा परमाणुभिन्नरूपित्वाज्जलावयविवदित्यत्र वा, आमश्यामघटरूपनाश आश्रयनाशजन्योऽग्निसंयोगाजन्यो वा घटरूपनाशत्वात् स्फुटितघटरूपनाशवदित्यत्र वा एततात्पर्यमिति वर्धमानोक्तं निरस्तम्, अन्यथेत्युक्ताभाससाम्यस्य अत्राप्यनिस्तारात् ।

**वा०र०**— वर्धमानानुसारेण विभागशब्दसङ्ग्राह्यकथनपूर्वकं स्पष्टमुपपादयति **कर्मस्त्वित्यादिना** । पूर्वोक्तप्रमेयेऽर्धमङ्गीकृत्यार्धानङ्गीकारेण परमाणुष्विवेति मूलं प्रवृत्तमिति मूलाशयं स्पष्टयन् नोदनाद्युत्पत्तावित्यादि किरणावल्यनुसारेण अङ्गीकृतप्रमेयादि विविच्याह **नोदनाद्युत्पत्तावित्यादिना** । अत्र परमाणुष्विवेति वाक्यार्थस्यैवोत्तरत्र कथनेऽपि विशिष्टार्थस्य प्रतिपादनात् तदनुवादोऽयं परमाणुष्विवेत्यादिरिति न दोषः । तयोरित्येतत्स्वारस्यानुसारेण मूलं योजयति **अपूर्वेति** । अत एव न चेत्युत्तरमूलावतारकिरणावल्यां पूर्वरूपादिनिवृत्तिरुत्तररूपाद्युत्पत्तिश्चेत्युक्तमिति भावः । साध्यहेत्वोर्विशेषेण कृत्यं स्वयमाह **स्वाश्रयेत्यादिना** । नष्टो यो घट इत्याश्रयनाशोपपादनम् । यद्यप्येवकारव्यावर्त्यवर्धमानेऽग्निसंयोगेन नाशोऽभिहितः तथापि तमादायाप्रयोजकत्वस्य मूलकृतोक्तेः तत्परित्यागेन कृत्यान्तरं स्वयं कथितं इति वा नियम इति पाठः । न त्वभिप्रेत इति सम्बन्धः । **इत्याभासान्तरेति** । इत्याद्याभासान्तरेत्यर्थः । तेन कार्यगता गुणाः निमित्तकारणादेवोत्पद्यन्ते । कार्यगुणत्वात् इति द्वितीयानुमानीयाभासान्तरपरिग्रहः अतो न न्यूनतेति ध्येयम् । पार्थिवावयवीत्यादि किरणावल्यनुमानस्य परिष्कारो वर्धमाने कृतः तं दूषयितुमनुवादयति **एतेनेत्यादिना** ।

**विट्ठल०**— तत्कार्यमेव तत्कारणे प्रमाणं भविष्यति । अतः कथं प्रमाणाभाव इत्याशयेन शङ्कते **[illegible]त्पत्ताविति** । कर्मसु विभागा इत्यादौ कर्मोत्पत्तौ विभागाः प्रमा[illegible]मित्यादि व्याख्येयम् । **तत्र चेति**। कार्यद्रव्यनाशे सति कार्यद्रव्यगतपूर्वरूपादिनिवृत्तिरित्यर्थः । इत्यापरमाणुगतविनाशे प्रमाणमुक्त्वा अन्त्यावयविन-

मारभ्य परमाणुद्वयसंयोगपर्यन्तमनुमानमाह **तथेति** । एवं वदता सन्ततः सत्सु परमाणुषु रूपादिनिवृत्तेश्चावश्यं वक्तव्यत्वात् तद्वद्घटादावपि वक्तुं शक्यत्वेनाप्रामाणिकीत्येवं कल्पनेत्याशयेन परिहरति **नेति** । **कारणगुणेभ्य एवेत्यत्र** पार्थिवावयविरूपादय इत्यनुवर्तते । **तत एवेति** । पार्थिवरूपादित्वात् । दग्धपटरूपादिवदेवेत्यर्थः । अनुमानद्वयमप्यप्रयोजकमित्याह **क्वचित्सतीति** । क्वचित्सत्यप्याश्रये रूपादीनां विनाशे पुनरग्निसंयोगजत्वे चाङ्गीकृते विरोधाभावादित्यर्थः । पार्थिवपरमाणुरूपादिवत् क्वचिदाश्रये सत्यपि विनाशदर्शनमप्रयोजकीकृत्य दग्धपटादौ क्वचित्सहचारदर्शनमात्रेण पार्थिवावयविरूपादीनामाश्रयनाशविनाश्यत्वसाधने दूषणमाह **अन्यथेति** । तथा च समवायिकारणनाशात् कुत्रापि नाशो नास्ति, द्व्यणुकनाशवत् सर्वत्राप्यसमवायिकारणनाशादेव नाश-सिद्धिः स्यादित्याभासमानयोगक्षेमता स्यादिति भावः । **इत्यादिक**मित्यनेन द्व्यणुकादि समवायिकारणविनाश्यं कार्यद्रव्यत्वादित्यादेर्ग्रहणम् ।

**॥ इति उक्तप्रक्रियायाः अप्रामाण्ये अयुक्तताशङ्का तन्निरासश्च ॥**

* * *

**॥ अथ तत्रापि शङ्कोक्तानुमानद्वयदूषणे बाधकतर्कशङ्कोद्भावनं तन्निरासश्च ॥**

२२५ **सु०— नन्वग्निसंयोगः सर्वावयवेष्वस्ति न वा । न चेत् तत्र रूपादिविनाशोत्पादा-सम्भवः, तथा च अवयवावयविनोर्विलक्षणरूपादिमत्त्वं स्यात् । आद्येऽग्न्यवयवानां सर्वत्र प्रवेशेन अवयविनाशस्यावर्जनीयत्वमिति चेन्न, अवयविद्रव्याणां सच्छिद्रत्वेन प्रवेशोप-पत्तेः, संस्थानापगमाभावेनावयविविनाशायोगात्, तथाविधस्यैवोदाहृतत्वादित्यलम् ॥**

**परि०— संस्थानेति** । पृथुबुध्नाद्याकाररूपसंस्थानेत्यर्थः । ननु निश्छिद्रे परमाण्वादौ कथ-मित्यत आह **तथाविधस्येति** । अनिवृत्तविनाशा इत्यत्र सच्छिद्रतयाऽभिमतस्य घटादेरेव आमघट-श्यामतादय इत्युदाहृतत्वादित्यर्थ इत्येके । प्रत्यभिज्ञाविरोधादिबाधकं पीलुपाकप्रक्रियायां स्फुटमिति भावेनोक्तं **इत्यलमिति** ॥ *जातेः प्रतिव्यक्ति भिन्नत्वे प्रत्यक्षानुमानश्रुतीनामुक्तिः ॥*

**यादु०**— आश्रयनाशोऽसमवायिकारणभूतावयवसंयोगनाश एव प्रमाणम् । तत्र च अन्यथाऽनुपपत्तिरेव मानमित्याशयेन शङ्कते **नन्वग्निसंयोग इत्यादिना** । **अग्न्यवयवानामिति** । घटारम्भकसर्वावयवगताग्निसंयोगस्य प्रदेशवृत्तित्वादिति भावः । **अवयविनाशस्येति** । घटारम्भकसर्वावयवेष्वग्निसंयोगोपपादनायाग्न्यवयवानां सत्त्वं, मूर्तानां समानदेशताविरोधात् घटावयवानां परस्परसंयोगनाशं विना नोपपद्यते । अवयवसंयोगनाशे चावयवि-नाशस्यावर्जनीयत्वम् । असमवायिकारणनाशे कार्यनाशनियमादिति भावः । **सच्छिद्रत्वेनेति** । घटाद्यन्त-

र्निहितानां जलतैलादीनां बहिःस्रवणदर्शनादिति भावः । **संस्थानापगमेति** । अवयवसंयोगापगमाभावेनेत्यर्थः । घटावयवेषु परस्परं संयोगस्यानाशेऽपि वह्न्यवयवानां प्रवेशो नानुपपन्नः । घटादीनां सच्छिद्रत्वेन मूर्तानां समान-देशताया अप्राप्तेरिति भावः । ननु यत्सच्छिद्रं न भवति पाषाणादि तत्र का गतिरित्यत आह **तथाविध-स्येति** । सच्छिद्रघटादिश्यामतादेरेवानिवृत्तविनाशा इत्यत्रोदाहरणतयोक्तत्वादित्यर्थः । किञ्च यद्यामपाके निक्षि-प्तस्य घटादेर्विनाशः कथं तर्हि स एवायं घट इति प्रत्यभिज्ञा । कथं वा सर्वास्ववस्थास्वामपाकादौ घटादे-स्तादृशस्यैव दर्शनम् । घटादेरुपरि निहितानां शरावोदञ्चनादीनां तथैव दर्शनं च । घटादिनाशे हि तेषां पातः स्यात् । कथं वा यावन्त एवामपाके निहितास्तावन्त एव पुनः प्राप्यन्ते । परमाणुभिर्द्व्यणुकादिक्रमेण न्यूनाना-मधिकानां वा तदानीमारम्भसम्भवात् । कथं वा तावत्परिमाणान्येव घटादीन्यामपाकानन्तरमुपलभ्यन्ते । रेखोपरेखादिचिह्नविलोपो वा कथं न भवेदित्यादिदूषणमभिप्रेत्याह **इत्यलमिति** । यत्तु कश्चिदाह तत्र सूच्यग्रेण घटादौ त्रिचतुरत्रसरेणुविभागे सति द्रव्यारम्भकसंयोगनाशेन द्रव्यनाशे सर्वासामनुपपत्तीनामुभयसमाधेयत्वादिति तत्तुच्छम् । तत्र द्रव्यनाशप्रयोजकस्य त्रिचतुरत्रसरेण्वपगमस्य प्रत्यक्षसिद्धत्वेन प्रत्यभिज्ञादेर्भ्रमत्वकल्पनात् । प्रकृते च तथाविधस्य द्रव्यनाशप्रयोजकस्यादर्शनात् । तदिदमुक्तं **तत्र प्रमाणाभावादिति** ।

**वं०प०— तत्रेति** । यत्रावयवेऽग्निसंयोगो नास्ति तत्रेत्यर्थः । इष्टापत्तिरिति चेत् तत्राह **तथा चेति**। तथाऽप्यवयविनाशः कुतो नेति चेत् तत्राह **संस्थानेति** ।

**कं०रा०— आद्य इति** । अग्निसंयोगः सर्वावयवेष्वस्तीत्याद्यपक्षे घटस्यान्तरेऽग्निप्रवेशं विना तत्रत्या-वयवानामग्निसंयोगायोगात् तत्प्रवेशस्य च बाह्यावयवापगमं विनाऽनुपपत्तेर्बाह्यावयवापगमे च संस्थानापगम-स्यावश्यकत्वादवयविनाशस्यावर्जनीयत्वमिति भावः ।

**श्रीनिधि०—** अवयवेषु रूपादिविनाशोत्पादासम्भवः, अस्तु को दोषः इत्यत आह **तथा चेति** । **विलक्षणरूपादिमत्त्वमिति** । अवयविनोऽग्निसंयोगेन पूर्वरूपादिनिवृत्त्या पीतरूपादिमत्त्वम् । अवयवानां तु तदभावेन श्यामरूपादिमत्त्वमिति विलक्षणरूपादिमत्त्वं स्यादित्यर्थः । **अवयविनाशस्यावर्जनीयत्वमिति** । यदाऽग्निसंयोगो जायते तदाऽवयवानां संयोगनाशोऽवश्यम्भावी । एकस्यैवेकावच्छेदेन युगपत् मूर्तद्वयसंयोगस्य बाधितत्वात् । तेन च अवयविनाश इत्यवर्जनीयत्वं तन्नाशस्येत्यर्थः । **सच्छिद्रत्वेनेति** । अतिसूक्ष्मच्छिद्रवत्त्वेन इत्यर्थः । एवं च नावयवप्रवेशार्थं अवयवसंयोगनाशापेक्षेति भावः । नन्ववयवसंयोगनाशं कल्पयामो वा अवयविनां सच्छिद्रत्वं कल्पयामो वेति सन्दिह्यतो नियामकमाह **संस्थानापगमाभावेनेति** । अवयवसंयोगनाशे अवयविनाशः स्यात् तथा च सति संस्थाननाशेऽपि स्यान्न चैवमित्यर्थः । किञ्च सूक्ष्मच्छिद्रवत्त्वमेवाङ्गीकर्तु-मुचितम् । अत एव घटान्तवर्तिजलस्य ईषद् बहिर्गमनं वह्न्यंशानामन्तःप्रवेशेन जलस्यौष्ण्यं च । यदि संयोग-नाश एव स्यात् तदा सर्वस्यापि जलस्य बहिर्गमनेन वह्निशान्तिः स्यात् । संस्थाननाशाभावान्नेति चेत् तर्हि संयोगनाश इति रिक्तं वचः स्यादिति द्रष्टव्यम् । ननु पाकार्थं निक्षिप्यमाणानां घटादीनां अग्निसंयोगेन बहुल-

संस्थानविनाशोऽपि बहुलं दृश्यत इतीष्टापादनमिदमित्यत आह **तथाविधस्यैवेति** । संस्थानापगमो हि तस्यैव इत्यर्थः । न हि पाकेन सर्वसंस्थाननाश इति भावः ।

**शे०वा०—** क्वचित्सत्यप्याश्रये पार्थिवरूपादेरग्निसंयोगेन विनाशेऽग्निसंयोगजत्वे च विरोधाभावादित्यप्रयोजकतयाऽनुमानद्वयं दूषितम् । तत्र बाधकं तर्कमाशङ्कते **नन्विति** । **सर्वावयवेष्वस्ति न वेति** । अन्तर्बहिःसाधारण्येन कार्यद्रव्यसम्बन्धिसर्वावयवेष्वस्ति, किं वा बहिष्ठावयवेष्वेवेत्यर्थः । **तत्रेति** । दृढतरावयवान्तरावरुद्धमध्यभाग इत्यर्थः । पूर्वरूपादिनिवृत्त्यपूर्वरूपाद्युत्पत्तिहेतोरग्निसंयोगस्याभावात्कारणाभावे च कार्यासम्भवादिति भावः । अस्तु तत्र रूपादिविनाशोत्पादासम्भवः, किं तावताऽप्यनिष्टमित्यत आह **तथा चेति** । **विलक्षणेति** । श्यामा अवयवा, अवयवी च रक्त इत्येवं विलक्षणेत्यर्थः । न चेदं युक्तम् । अवयवावयविनोरेकजातीयरूपवत्तानियमादिति भावः । **आद्य इति** । **सर्वत्रेति** । अन्तर्बहिःसाधारण्येन सर्वावयवेष्वित्यर्थः । तेन विना तत्र रूपादिनाशोत्पादासम्भवादिति भावः । **अवयविनाशस्येति** । मूर्तानां समानदेशताविरोधादवयवान्तरसंयुक्ते मध्यभागे तेजःसंयोगस्यैवासम्भवात् कथञ्चित्सम्भवे वा आपरमाणुतेजःसम्बन्धात् तेजसश्च स्पर्शवत् तया च नोदनाभिघातयोरन्यतरस्य संयोगस्य अवश्यम्भावात् द्रव्यारम्भकावयवक्रियोत्पादादिक्रमेण द्रव्यनाशस्य अवर्जनीयत्वादिति भावः ।

अग्निसंयोगः सर्वावयववृत्तिरिति पक्षमभ्युपगम्य तत्रोक्तां दृढतरावयवान्तरावरुद्धमध्ये तेजःसंयोगस्य असम्भावनां तावत्परिहरति **अवयविद्रव्याणामिति** । **सच्छिद्रत्वेनेति** । अन्यथा कुम्भादावन्तर्निहितानां तैलघृतादीनां स्पन्दनस्रवणाद्यनुपपत्तेरिति भावः । तथा च स्फटिकादेः सच्छिद्रतया तन्मध्ये इन्द्रियवत् घटादेः कार्यद्रव्यस्यापि सच्छिद्रतया तन्मध्येऽप्यग्निसंयोगोपपत्तेर्न मध्यभागे पाकानुपपत्तिरित्याशयः । तर्हि स्पर्शवद्वेगवत्तेजस आपरमाणुसम्बन्धान्नोदनादिक्रमेण द्रव्यविनाशावश्यम्भावात् सत्येवाश्रये अग्निसंयोगेन रूपादिनिवृत्त्याद्यभ्युपगमभङ्ग इत्यत आह **संस्थानापगमाभावेनेति** । संस्थानापगम एव हि कार्यद्रव्यनाशहेतुर्न त्वन्यः । तथाहि । न तावत्स्पर्शवद्वेगवद्द्रव्याभिघातमात्रादवयवविनाशो वक्तुं शक्यः । तथा सति प्रबलपवनाभिमुखविनिहितघटादेरपि नाशापत्तेः । अथ तादृशतेजस एवायं स्वभावः । यत्पूर्वव्यूहविनाशेन व्यूहान्तरोत्पादनम् । यथाऽऽह उदयनः । 'ईदृशो हि तेजसो हि वेगातिशयः स्पर्शातिशयो वे'त्यादीत्यभिमतम् । तदसत् । तथा सति मुसलाभिहते घटादावविनाशापातात् । तेजस इत्येतदप्यनैकान्तिकम् । न हि चाक्षुषं चान्द्रं वा तेजो घटादि प्रपाचयतीति परोऽनुमन्यते । तस्माद्यत्र प्रबलं संस्थानापगमलक्षणं विनाशप्रत्यायकमस्ति तत्रैव विनाशो नान्यत्रेत्येव तत्त्वमिति कथमत्र संस्थानापगमाभावे विनाशः स्यादित्याशयः ।

अस्त्वेवं यत्राग्निसंयोगेऽपि संस्थानापगमाभावः । यत्र तु संस्थानापगमोऽपि तेन जातस्तत्र द्रव्यनाशावश्यम्भावात् कथं तद्घटश्यामतादेरयावद्द्रव्यभावित्वमित्यत आह **तथाविधस्यैवेति** । यत्राग्निसंयोगेऽपि संस्थानानपगमो घटादौ तादृशघटादिश्यामतादेरेवानिवृत्तविनाशा इत्यत्रोदाहरणतयोक्तत्वात् यत्राग्निसंयोगेन

संस्थानापगमाद्द्रव्यनाशोऽपि तादृशघटादिश्यामतादेर्यावद्द्रव्यभावित्वेऽपि नास्माकं क्वचित्क्षतिरित्याशयः । यद्वा ननु भवतु यत्सच्छिद्रं घटादि तत्र मध्येऽप्यग्निसंयोगात्पाको, यत्तु सच्छिद्रं न भवति पाषाणादि तत्राग्निसंयोगायोगात् कथं मध्ये पाकः स्यादित्यत आह **तथाविधस्यैवेति** । सच्छिद्रघटादिश्यामतादेरेवानिवृत्तविनाशा इत्यत्रोदाहरणतयोक्तत्वात् निश्छिद्रपाषाणादिश्यामतादेस्तत्त्वेनानुदाहृतत्वात् तत्राग्निसंयोगेन मध्ये पाकासम्भवेऽपि न क्षतिरिति भावः । किञ्च यदि कार्यद्रव्यविनाशः स्यात् तर्हि स एवायं घट इति प्रत्यभिज्ञाविरोधः । तया आमपक्वावस्थयोरैक्यावगमात् । कथं वा सर्वास्ववस्थास्वामपाकादौ घटादेस्तादृशस्यैव दर्शनम् । घटादेरुपरि निहितानां शरावोदञ्चनादीनां तथैव दर्शनम् । अग्निसंयोगेन घटादिस्फुटने हि तेषां पाकावश्यम्भावात् । मुद्गरादिप्रहारे तथा दर्शनात् । कथं वा यावन्त एव पाके निहितास्तावन्त एव पुनः प्राप्यन्ते । परमाणुभिर्द्व्यणुकादिप्रक्रमेण न्यूनानामधिकानां वा तदानीमारम्भसम्भवात् । कथं वा यत्परिमाणा घटादय आपाके निहिताः तत्परिमाणा एव घटादयः परिपक्वा दृश्यन्ते । रेखोपरेखादिचिह्नविलोपो वा कथं न भवेदित्यादिदूषणजातमभिप्रेत्याह **अलमिति** ।

यत्त्वत्रोदयनादिभिरुक्तं सूच्यग्रेण घटादौ त्रिचतुरत्रसरेण्वपगमे सति द्रव्यारम्भकसंयोगनाशेन द्रव्यनाशावश्यम्भावेन सर्वासामनुपपत्तीनामुभयसमाधेयत्वात् । न हि तत्र द्रव्यं न नश्यतीति शक्यते वक्तुमिति । अत्रैकदेशिनः परिहारमाहुः । कतिपयावयवनाशेऽप्यवशिष्टावयवानाश्रित्य कार्यावस्थानसम्भवात् तत्रापि घटादीनां न नाशोऽन्यथा प्रत्यभिज्ञानाद्यनुपपत्तिरेवेति । तदसत् । तावदवयवावस्थानयोग्यस्य घटादेः स्वल्पेष्ववयवेषु वृत्तेरनुपपन्नत्वात् । अविनष्ट एव घटादौ संवृतपटवत्परिमाणसङ्कोचादेतदुपपत्स्यत इति चेन्न । कठिनतरावयवानां काष्ठपाषाणस्तम्भकुम्भादीनां सङ्कोचविकासयोरत्यन्तायोगात् । अस्तु तर्हि तत्र घटादिनाशकाभिमतेन परिमाणस्यैव नाश इति चेन्न । परिमाणस्याश्रयनाशैकनाश्यत्वात् । घटादिप्रत्यभिज्ञानवत् सूचीकरणस्थले परिमाणस्यापि प्रत्यभिज्ञायमानत्वेन तन्मते तन्नाशस्याप्यनुपपत्तेरिति । वयं तु ब्रूमः । तत्र कार्यद्रव्यनाशकस्य त्रिचतुरत्रसरेण्वपगमस्य प्रत्यक्षतया न्यूनाधिकभावस्य प्रत्यक्षेणोपलम्भात् कार्यभेदस्थित्या प्रत्यभिज्ञादेः सादृश्यविषयतयाऽन्यथासिद्धिरेव । न चैकत्र प्रत्यभिज्ञाया अन्यथासिद्धौ प्रकृतेऽपि तथाभावः शङ्कनीयः । बाधाबाधाभ्यामेव व्यवस्थोपपत्तेः । अन्यथाऽतिप्रसङ्गात् । तस्मान्न प्रतिबन्ध्यवकाश इति ।

**वा०र०**— नन्वित्याद्युत्तरानर्थक्यमाशङ्क्य परिहरति **क्वचिदिति** । सर्वावयवेष्वन्तर्बहिश्चेति प्रशस्तदेवोक्त्यनुसारेण विकल्प्यार्थमाह **अन्तरिति** । सूत्रोपस्कारानुसारेण तत्र रूपादीत्यादेः व्याख्यानं दृढतरेण अवर्जनीयत्वादिति भाव इत्यन्तम् । **श्यामा अवयवा इति** । यदा हि बहिष्ठावयवा एव अग्निसंयोगात् रक्ताः तदा बहिरवयवानां रक्तत्वेनावयविनो रक्तता मध्यभागगतावयवानां तु श्यामतैवेत्यापत्त्येत्याशयः । आद्य इतीत्यनन्तरं अग्निसंयोगः । सर्वेत्युक्ताद्य इत्यर्थ इति वाक्ययुतः पाठः । अभिघातयोरन्यतरस्येति पाठः शोध्योऽस्ति । .....सूत्रोपस्कारानुसारेणैवाह **अन्यथेति** । अन्तर्हितस्य विभक्तावयव.....विभागः स्पन्दनम् । अविनष्टा-

वयवबहिरवयवेनान्तर्निहितद्रवद्रव्यसंयोगस्रवणमिति वर्धमानः । ........न हि स्पर्शवद्वेगवदिति संस्थानापगमाभाव एव हीत्यादि । **यथाऽऽहेति** । कार्यद्रव्यविनाशादित्येतद्व्याख्यानावसर इति शेषः । अथ इत्यभिमतमिति सम्बन्धः । ननु यदि द्रव्यनाशः कथं तर्हीत्यादि अवयविष्वेव पाक इति चेदित्यन्तोपस्कारानुसारेण, एतेन प्रत्यभिज्ञानमित्यादि निरस्तमिति किरणावल्यनुसारेणात्र दूषणान्तरपरतयाऽलमित्येतद्व्याचष्टे **किञ्चेत्यादिना** । उदयनादिभिरित्यादिपदेन शङ्करस्य सूत्रोपस्कारकारिणो ग्रहणम् । यद्यपि इदमाशङ्कादि उपस्कारस्थमेव प्रतीयते तथापि अर्थतः किरणावल्यनुसारोऽपि भवतीत्याशयेनोभयोपादानमिति बोध्यम् । **उक्तमिति** । सूचीप्रतिभेदनविदलितेत्यादिना किरणावल्याम् । 'सूच्यग्रेण घटादावि'त्यादिनोपस्कारे चोक्तमित्यर्थः । अथ तत्रापि घटादयो न नश्यन्तीत्यादि दिगन्तग्रन्थे तत्रापीति पूर्ववाक्योक्तमीमांसकपक्षमेकदेशिमतत्वेन अभिधाय तन्निराकरणतयैव दूषयति **अत्रैकदेशिन इति** । स्वयमेव परिहारमाह **वयं त्विति** । **तस्मान्न प्रतिबन्ध्यवकाश इतीति** । अत्र यदुक्तं वर्धमानेन वस्तुतः प्रत्यभिज्ञानगकारादाविव तज्जातीयत्वेनाप्युपपन्नं पूर्वावयविनाशस्योक्तयुक्त्या प्रामाणिकत्वेन तत्कल्पनादिति । तदप्येतेनैव निरस्तम् । गकारादिप्रत्यभिज्ञायां बाधस्य सत्त्वेन प्रामाण्यसंरक्षणाय तज्जातीयविषयत्वकल्पनोपपत्तावपि प्रकृते बाधाभावेन विषयान्तरकल्पनायोगात् । पूर्वावयविनाशस्याद्याप्यसिद्ध्या प्रामाणिकत्वानिश्चयेन कल्पकाभावेन तत्कल्पनानुपपत्तेश्च । स्वमते गकारादिप्रत्यभिज्ञाया वर्णनित्यत्वसाधकत्वाभ्युपगमाच्चेत्यास्तां तावत् । यद्यप्यत्र परेणायावद्द्रव्यभाविगुणाभावसिद्ध्यर्थं परमाण्वन्तविनाशाद्यभ्युपगमेन घटादावामश्यामतानिवृत्तिनिमित्तकतद्रूपस्य यावद्द्रव्यभाविता नास्तीत्येवेति प्रतिपादितम् । न तु सर्वत्र । प्रत्युत तत्परमाणुष्वेवानन्तेषु घटाद्यारम्भकेषु तेजःसंयोगेन श्यामतायाः निवृत्त्यङ्गीकारे तत्रैव रूपादेरयावद्द्रव्यभाविता प्राप्तेति व्यर्थमिदं प्रक्रियान्तरमित्यपि दूषणं वक्तुं शक्यं टीकाकृतावाऽलमर्थतया वक्तुं शक्यम् । तथापि स्पष्टत्वाच्छिष्यैरेव तदूह्यमित्याशयेनोभयत्रापि तदकथनमिति ज्ञेयम् ।

**विठ्ठल०**— ननु घटादावग्निसंयोगाद्रूपादिविनाशोत्पाद अवयवनाशोत्पादाधीन इत्येवाङ्गीकार्यं अवयवेष्वग्निसंयोगानङ्गीकारे तत्र रूपादिविनाशोत्पादायोगात् । घटावयवेष्वग्निसंयोगाङ्गीकारे चावयविनाशोऽवर्जनीयः । घटारम्भकसर्वावयवेष्वग्निसंयोगोपपादनाय अग्न्यवयवानां सर्वत्र सत्त्वस्यावश्यकत्वात् । मूर्तानां समानदेशतानुपपत्त्या घटावयवानां विरलत्वस्यावश्यकतया अवयवसंयोगनाशप्राप्त्या अवयविनाशस्य नियतत्वात् । अतोऽवयविनाशं विना तदवयवेष्वग्निसंयोगान्यथानुपपत्तिरेवावयविनाशे प्रमाणमित्याशयेन शङ्कते **नन्वग्निसंयोग इति** । घटान्तर्निहिते जलतैलादीनां बहिः किञ्चिदास्रवणदर्शनेन घटाद्यवयविद्रव्याणामतिसूक्ष्मच्छिद्रवत्वस्यावश्यकत्वाच्छिद्रद्वारा अवयवानाम् एव प्रवेशोपपत्त्या तदवयवेष्वग्निसंयोगसम्भवेनार्थापत्तेरन्यथैवोपपत्तिरित्याशयेन समाधत्ते **अवयविद्रव्याणामिति** । सच्छिद्रत्वेऽविरलावयवत्वप्राप्तावयविनाशः स्यादित्यत आह **संस्थानेति** । सच्छिद्रत्वेऽपि किञ्चिद्विरलतयाऽवयवसंयोगस्य तदवस्थत्वेन पृथुबुध्नाद्याकाररूपसंस्थानापगमाभावादवयविविनाशप्रसक्तिरिति भावः । ननु यत्सच्छिद्रं न भवति पाषाणादि तत्र का गतिरित्यत आह **तथाविधस्येति** । अनिवृत्तविनाशा इत्यत्र सच्छिद्रतयाभिमतस्य घटादेरेव यथा आमघटश्यामतादय इत्युदाहृतत्वादित्यर्थः । किञ्च

पाके निक्षिप्तस्य घटादेरापरमाण्वन्तं विनाशेन घटाद्यन्तरोत्पत्तौ स एवायं घट इति प्रत्यभिज्ञानुपपत्तिः, अपि च पाकेन घटादिविनाशे तदुपरिनिहितपदार्थपातः स्यात् । परिमाणरेखोपरेखाद्यप्राप्तिरित्याद्यभिप्रेत्याह **इत्यलमिति** ।

**॥ इति शङ्कोक्तानुमानद्वयदूषणे बाधकतर्कशङ्कोद्भावनं तन्निरासश्च ॥**

**॥ इति पीलुपाकवाद्युक्तपाकजप्रक्रियानिरासान्नोक्तार्थे बाधकम् ॥**

**॥ इति सामान्यस्यैकैकाश्रितत्वम् ॥**

* * *

**॥ अथ गुणगुण्याद्यभेदोपपादनोक्तार्थसमर्थने, 'नित्यमेकमनेकानुगतं सामान्यम्' इति यत् नैयायिकोक्तं सामान्यं तन्निराकृतेरयुक्तत्वशङ्का तन्निरसनं च ॥**

**॥ अथ तत्रादौ तत्सामान्यनिराकृतेरयुक्तत्वशङ्का ॥**

**॥ अथ तत्राप्यादौ व्युत्पत्त्यभावरूपबाधकसद्भावः ॥**

**२२६ सु०— एवं सामान्यस्यानेकवृत्तित्वं प्रमाणैरपाकृतम् । तदयुक्तम् । तस्यानेकवृत्तित्वाभावे बाधकसद्भावात् ।**

**तथा हि । सर्वेषु गोपिण्डेषु यद्यनुगतमेकं गोत्वसामान्यं न स्यात् तदा तत्र गोशब्दसङ्गतिग्रहणलक्षणा व्युत्पत्तिर्न स्यात् ।**

**परि०— बाधकेति** । शक्तिग्रह-कार्यकारणभावग्रह-व्याप्तिग्रह-सामान्यापवादभावरूप-बाधकसद्भावादित्यर्थः ।

**श्रीनिधि०— गोशब्दसङ्गतिग्रहणलक्षणेति** । गोशब्दस्य गौः वाच्या अयं वाचक इति सम्बन्ध-ग्रहणलक्षणेत्यर्थः ।

**शे०वा०—** ननु व्युत्पत्तिरपीत्युत्तरभाष्यमनर्थकम् । न चैतत्सादृश्येन सङ्गतिग्रहणादिसम्भवप्रतिपादनार्थमिति वाच्यम् । तत्प्रतिपादनस्य प्रकृतासङ्गतत्वादित्यतः सामान्यस्यानुगतत्वसाधकतया तदभावे बाधकत्वेन पराभिमताया व्युत्पत्त्याद्यन्यथाऽनुपपत्तेः सादृश्येनान्यथोपपत्तिवर्णनान्निरासेन प्रागुक्ततदनुगतत्वोपपादकतया तत्सङ्गतत्वान्न तद्वर्णनानर्थक्यमित्यभिप्रेत्य वृत्तानुवादपूर्वकं पूर्वसङ्गतिं दर्शयंस्तदाक्षेपसमाधानपरतयोत्तरग्रन्थं सङ्गमयति **एवमित्यादिना** । **अपाकृतमिति** । 'नरत्वादिकमप्येवमि'त्यादिनेति शेषः । तदेवोपपादयति **तथाहीत्यादिना** । मूले व्युत्पत्तिपदस्य पदवाक्यसाधारण्येन व्युत्पत्तिमात्रपरतायाः क्रियापदं कारकपदं विना नान्वयबोधकमिति सामान्यज्ञानरूपवाक्यव्युत्पत्तौ अनुगतसामान्यस्यानुपयोगेनासम्भवात् पदव्युत्पत्तिमात्रपरत्वमेवेत्यभिप्रेत्य तद्व्याख्याति **गोशब्दसङ्गतिग्रहणलक्षणा व्युत्पत्तिरिति** ।

१६१ **वा०र०— तदभावे** बाधकत्वेन वेति पाठः । व्युत्पत्त्यन्यथानुपपत्तेर्निरासेनेति सम्बन्धः । **तदनुगतत्वेति** सामान्यानुगतत्वेत्यर्थः । **तत्सङ्गतत्वात्** इत्यत्र तच्छब्दस्य प्रकृतेत्यर्थः । **तदेवेति** । बाधकमेवेत्यर्थः । बाधकसद्भावमिति यावत् । **पदवाक्येति** । पदवाक्यसाधारण्येन या व्युत्पत्तिमात्रपरता तस्या असम्भवादित्यन्वयः । अत्र मूल इत्याद्युक्तिः तद्व्याख्यातीति वचनं च कथम् । मूलावताररूपेण प्रवृत्तशङ्काग्रन्थे मूलस्थपदव्याख्यानस्यानवसरग्रस्तत्वादिति चेन्न । अयमत्राशयो ग्रन्थकारस्य । व्युत्पत्तिरपीति मूले व्युत्पत्तिपदस्य पराभिप्रेतव्युत्पत्तिपरत्वमेवाश्रित्य परेण यस्यां व्युत्पत्तावनुगतसामान्योपयोगः स्वीकृतः तस्या एव सादृश्येनोपपत्तिः प्रतिपादनीया । अन्यथा अनुक्तोपलम्भापातात् । परश्च पदवाक्यसाधारणव्युत्पत्तावनुगतसामान्योपयोगं न मन्यते । वाक्यव्युत्पत्तौ तदनुपयोगात् किन्तु पदव्युत्पत्तावेव । एवं च शङ्काकाले व्युत्पत्तिविशेषस्वरूपप्रदर्शनपूर्वकं तत्रानुगतसामान्योपयोगशङ्कनेन परिहारावसरेऽपि सादृश्येनोपपत्तिप्रतिपादनं व्युत्पत्तिविशेषस्यैवेति सिद्ध्यतीत्येवमर्थतो मूलस्थव्युत्पत्तिपदव्याख्यानं सिद्धम्, अत एवोक्तमित्यभिप्रेत्यमिति । टीका त्वेवं योज्या । व्युत्पत्तिमात्रपरताया असम्भवात् पदव्युत्पत्तिमात्रपरत्वमेवेत्यभिप्रेत्येति सम्बन्धः । असम्भवे हेतुः **क्रियापदमित्यादि** । सामान्यज्ञानरूपा या वाक्यव्युत्पत्तिरिति योज्यम् । अनुपयोगेनेत्यनन्तरं तदंशेऽपि तदुपयोगस्य पूर्वपक्षिणाऽनाशङ्कनीयतया 'तदंशे सादृश्येन व्युत्पत्त्युपपत्तेः । सिद्धान्तिनोऽपि प्रतिपादनीयत्वेने'ति पूरणीयम् । तेन विवक्षितार्थलाभः । अत्रापि सामान्योपयोगः । पदव्युत्पत्तावेव शङ्क्यत इति भावेन व्युत्पत्तिस्वरूपविशेषकथनमित्यप्यनेनैवोक्तं भवतीति न कश्चित्क्षुद्रोपद्रवः । **वाक्यव्युत्पत्तावनुपयोगेन** इत्यनेन पदव्युत्पत्तावुपयोगोऽङ्गीकृत इति सूचितम् ।

**विट्ठल०—** शक्तिग्रहणकार्यकारणभावग्रहणव्याप्तिग्रहणानुपपत्तिरूपबाधकोपपादनाय प्रतिजानाति **तथाहीति** ।

**चषक— बाधकेति** । शक्तिव्याप्तिकार्यकारणभावग्रहानुपपत्तिलक्षणेत्यर्थः । साङ्कर्यादसम्बन्धाच्च न जातित्वमुपाधिश्च नानुगत इति भावः । **सङ्गतिग्रहणलक्षणा** वाच्यवाचकभावसम्बन्धज्ञानरूपा ।

**॥ इति व्युत्पत्त्यभावरूपबाधकसद्भावः ॥**

* * *

**॥ अथ तत्र च बाधकतर्कस्याप्रयोजकताशङ्का तन्निरासश्च ॥**

**॥ अथ तत्राप्यादौ पदव्युत्पत्तिहेतुविवरणम् ॥**

२२७ **सु०— वृद्धव्यवहारोपदेशादिना हि व्युत्पत्तिर्भवति । न च प्रतिपिण्डं व्यवहारादिकमस्ति, तेषामानन्त्येन व्युत्पत्तावेव पुरुषायुषपर्यवसानप्रसङ्गात्; अतो यत्रोपदेशादिकं**

तत्रैव व्युत्पत्तिर्व्यवहारश्चेति स्यात् । अथ विनैवैकेन निमित्तेनोपदेशाद्यभावेऽपि गोपिण्डान्तरे गोशब्द(सङ्गतिं) सङ्केतं गृह्णीयात्; तदाऽश्वपिण्डेऽपि किन्न गृह्णीयात्, अविशेषात् ।

अनुगतगोत्वे तु गोशब्दवृत्तिनिमित्ततयोपदेशादिनाऽवगते नायं दोषः प्रादुष्यात् । तस्मादनेकेष्वेकशब्दसङ्गतिग्रहणान्यथाऽनुपपत्त्याऽनुगतमेकमभ्युपगन्तव्यमेव ।

**परि०— उपदेशादिनेति** । व्याकरणोपमानकोशादिरादिपदार्थः । **पुरुषायुषेति** । 'अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसराजसनिश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वा' इति निपातनात् साधु । **अथ विनैवैकेनेति** । असाधारणैकधर्मेण विनेत्यर्थः ।

**यादु०— अथ विनैवैकेनेति** । शक्यतावच्छेदकरूपप्रवृत्तिनिमित्तेनेत्यर्थः ।

**वं०प०— अविशेषादिति** । निमित्ताभावोपदेशाभावयोरविशेषादित्यर्थः ।

**श्रीनिधि०— वृद्धव्यवहारोपदेशादिनेति** । आदिपदेन व्याकरणोपमानादिकं गृह्यते । **तेषां** पिण्डानाम् । **व्युत्पत्तावेव पुरुषायुषेति** । तथा च पिण्डविशेषे स्वस्य गवादिशब्दव्यवहारो वा परं प्रति उपदेशो वा तच्छ्रवणानन्तरं प्रवृत्तिर्वा न स्यादिति भावः । पिण्डान्तरे उपदिष्टात् वृद्धप्रवृत्तिविषयादेश्चान्यस्मिन् असम्भवात् । **अविशेषात्** विशेषादनुपदिष्टत्वाद्यविशेषात् । **नायं दोषः प्रादुष्यादिति** । यद्धर्मावच्छेदेन यद्धर्मग्रहः तद्धर्मदर्शनस्यैव तद्धर्मदर्शनसामग्रीत्वादिति भावः ।

**शे०वा०**— नन्वनुगतसामान्याभावेऽप्यस्तु पदव्युत्पत्तिरित्यप्रयोजकोऽयं तर्क इत्यतोऽनुगतसामान्यस्य पदव्युत्पत्तौ प्रयोजकतामुपदर्शयितुं सम्प्रतिपन्नान् पदव्युत्पत्तिहेतूंस्तावदाह **वृद्धव्यवहारेति** । चैत्र जलमाहरेति प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य जलाहरणविषया प्रवृत्तिर्वृद्धव्यवहारः । अयं गौरित्याप्तवाक्यमुपदेशः । आदिपदेन व्याकरणोपमानकोशवाक्यशेषविवरणप्रसिद्धपदसमभिव्याहाराणां परिग्रहः । ततश्चानुगतसामान्यरूपप्रवृत्तिनिमित्तावधारणद्वारा उपदेशादेर्व्युत्पत्तिहेतुत्वान्न तस्य व्युत्पत्तावप्रयोजकत्वमित्याशयः । ननु स्वातन्त्र्येण व्यवहारोपदेशादेर्व्युत्पत्तिहेतुत्वसम्भवान्नानुगतसामान्यरूपप्रवृत्तिनिमित्तावधारकतया व्युत्पत्तिहेतुत्वकल्पनमुचितमित्यतः किमेवं वदतः प्रतिपिण्डमुपदेशादिकं व्युत्पत्तिहेतुतयाऽभिमतं, किं वा व्यक्तिविशेषनिष्ठमिति विकल्पद्वयं मनसि निधाय असम्भवेनाद्यं प्रत्याचष्टे **न चेति** । असम्भवे हेतुमाह **तेषामिति** । द्वितीयेऽपि व्यक्तिविशेषनिष्ठमुपदेशादिकं किं तत्रैव व्युत्पत्तिहेतुरित्यभिमतं, किं वा सार्वत्रिकव्युत्पत्तिहेतुरिति विकल्पद्वयं मनसि निधायाद्यं प्रत्याचष्टे **अत इति** । ततश्च गोशब्दादपूर्वार्थधीर्न स्यादिति भावः । द्वितीयमतिप्रसङ्गेन दूषयति

**अथ विनैकेनेति** । शक्यतावच्छेदकरूपप्रवृत्तिनिमित्तेनेत्यर्थः । प्रसङ्गमूलभूतव्याप्त्यभावात् तर्काभासोऽय-मित्याशङ्क्य यदविशिष्टस्य यस्य यद्भवति तदविशिष्टस्यापरस्यापि तद्भवतीत्यविशेषलक्षणव्याप्तिसद्भावान्नानुप-पत्तिरित्याशयेनाह **अविशेषादिति** । नन्वयं प्रसङ्गः त्वत्पक्षेऽपि समान इत्यतोऽनुगतसामान्यरूपप्रवृत्तिनिमित्त-भावाभावाभ्यां विशेषान्नातिप्रसङ्ग इत्यभिप्रेत्योक्तं प्राक् **विनैवैकेन निमित्तेति** । तदेव विभावयन्नभिप्रेत-मुपदेशादेः प्रवृत्तिनिमित्तावधारणद्वारा सार्वत्रिकव्युत्पत्तिहेतुत्वमप्याह **अनुगतेति** ।

**वा०र०— अस्तु पदव्युत्पत्तिरिति** । वृद्धव्यवहारादिनेति शेषः । **उपदर्शयितुमिति** । परिशेषेणेति शेषः । तावदित्यनेन तेषां स्वातन्त्र्येण हेतुत्वानुपपत्तिमनुगतसामान्यस्य तदुपपत्तिं च दर्शयतीत्युक्तं भवति । 'बहवो हि शब्द सङ्गती'त्युत्तरमूलव्याख्यानावसरे उदाहरिष्यमाणशक्तिग्रहं व्याकरणेत्यादिवाक्यानुसारेण क्रम-मविवक्षित्वा आदिपदसङ्ग्राह्यमाह **आदिपदेनेति** । ननूपदेशादेर्व्युत्पत्त्यहेतुत्वे तद्वैयर्थ्यमेव स्यादित्यतस्तदुपयोगो-ऽनुगतसामान्यावधारण एवेति परम्परया तस्य व्युत्पत्तावुपयोगो मूलेऽभिप्रेतः । अत एव **विनैवैकेन निमित्तेनेति** वक्ष्यति । वक्ष्यति च **अनुगतगोत्वेत्यादि** । ततश्च न तद्वैयर्थ्यप्रसङ्गः । नापि सामान्यस्य प्रयोजकत्वालाभ इत्याशयः । अभिप्रेतं प्रयोजकत्वमेतद्वाक्याशयतया दर्शयति **ततश्चानुगतेति** । **तस्येति** । अनुगतसामान्य-स्येत्यर्थः । यद्यपि वृद्धेति वाक्ये व्युत्पत्तिहेतुत्वेन सम्प्रतिपन्नवृद्धव्यवहारादिमात्रं प्रस्ताव्य तस्य स्वातन्त्र्येण व्युत्पत्तिप्रयोजकतानिरासपरत्वेन न च इत्यादिग्रन्थं योजयित्वा परिशेषसिद्धसामान्यप्रयोजकत्वकथनपरतया अनुगतगोत्वेत्युत्तरमूलं प्रवर्त्य तद्वाक्ये ततश्चेत्यादिरयमाशयो वर्णयितुं शक्यते । तथापि विनैवैकेनेति मध्ये व्यवहारानुसारेणानुगतत्वे तु शब्दप्रवृत्तिनिमित्ततयोपदेशादिनाऽवगत इति सिद्धानुवादान्यथानुपपत्त्या चोक्ताशयो वृद्धेति पूर्ववाक्य एव वर्णितः । एतेनैवोपदर्शयितुमित्यादेः सामान्यस्य पदव्युत्पत्तौ प्रयोजकतां प्रवृत्ति-निमित्तावधारणोपायत्वाशयेन पदव्युत्पत्तिहेतुतया सम्प्रतिपन्नहेतूपन्यासेनोपदर्शयतीत्यर्थो व्याख्येय इति सूचितं भवतीति न कश्चिद्दोषः । सति चैवं ननु स्वातन्त्र्येणेत्यादिग्रन्थोऽपि समूलक एवेत्यवधेयम् । एतदभिप्रायस्या-त्रार्थतो लाभेऽप्यनुगतगोत्वेत्युत्तरत्रास्य स्पष्टप्रतिपादनात् तद्विवक्षयोपदर्शयितुमित्युक्तमित्यप्याहुः । **अपूर्वार्थेति** । पूर्वज्ञातपिण्डविशेषरूपार्थातिरिक्तपिण्डान्तरप्रत्ययो न स्यादित्यर्थः ।

**विठ्ठल०— वृद्धव्यवहारोपदेशादिनेति** । प्रयोज्यप्रयोजकवृद्धयोर्व्यवहारः । अयं गौरित्याद्याप्तोपदेशः आदिपदेन व्याकरणोपमादिकं गृह्यते । स्यादितःपरं न तु गोपिण्डान्तर इति शेषः । एकत्रोपदेशादिनैव तदन्यत्र गोपिण्डे सङ्गतिग्रहणं स्यादित्यत आह **अथ विनैवैकेनेति** । शक्यतावच्छेदकेन असाधारणेन एकेन धर्मेण विना इत्यर्थः ।

**चषक— पुरुषायुषेति** । अचतुरेत्यादिना अकारः समासान्तो निपातितः ।

**॥ इति पदव्युत्पत्तिहेतुविवरणम् ॥**

* * *

## ॥ अथ तस्य हेतोरप्रयोजकत्वशङ्का तन्निरासश्च ॥

२२८ **सु०— ननु कथं तर्हि सामान्यरहितेषु पृथिव्यादिषु भूतमूर्तादिशब्दसङ्गतिग्रहणम् । उच्यते । तत्रापि बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वेयत्तावच्छिन्नपरिमाणत्वाद्युपाधिनिबन्धनैव व्युत्पत्तिः, उपाधीनां व्यावृत्तत्वेऽप्यनुगतसामान्याश्रयत्वेन दोषाभावात् ।**

**परि०— सामान्यरहितेष्विति** । भूतमूर्तादिपदशक्यतावच्छेदकतया भूतत्वादिसामान्यरहितेषु पृथिव्यादिषु पञ्चसु गगनं विना मनसा सह पञ्चसु चेत्यर्थः । **बाह्यैकेति** । बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वोपाधिना भूतपदस्यावच्छिन्नपरिमाणत्वलक्षणोपाधिना मूर्तपदस्य व्युत्पत्तिरित्यर्थः । पृथिव्यादिषु पञ्चसु तादृशाः गुणाः गन्धरसरूपस्पर्शशब्दाः अविभुत्वात् परिच्छिन्नपरिमाणत्वं च बोध्यम् । कालादावनतिप्रसक्त्यर्थम् **इन्द्रियग्राह्येति** । आत्मन्यनतिप्रसक्तये **बाह्येन्द्रियग्राह्ये**त्युक्तिः। **एकेति** स्पष्टार्थम् । तच्च स्थूलपृथिव्यादिषु भूतपदव्युत्पत्तिनिमित्तम् । परमाण्वादिसाधारणभूतपदव्युत्पत्तौ तु बहिर्द्रव्यत्वावच्छिन्नविशेषगुणाश्रयत्वादिकं ज्ञेयम् । अत एवादिपदप्रयोगः । केचित्तु बाह्येन्द्रियग्राह्यजातिमद्गुणाश्रयत्वमिति तदर्थः । एवं च परमाण्वादावपि भूतपदव्युत्पत्तिः सुशकेत्याहुः । **अनुगतसामान्येति** । गुणत्वरूपानुगतसामान्याश्रयत्वेनानुगमसम्भवादित्यर्थः ।

**यादु०— सामान्यादिरहितेष्विति** । भूतत्वमूर्तत्वादिसामान्यरहितेष्वित्यर्थः । आदिपदेनोपाधिग्रहणम् । भूतत्वमूर्तत्वयोर्न सामान्यरूपत्वं; साङ्कर्यात् । उपाधेश्च नानुगततेति भावः । **मूर्तादिशब्देति** । आदिपदेन भावाभावादिशब्दसङ्ग्रहः । **तत्रापीति** । भूतशब्दव्युत्पत्तिर्बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वनिबन्धना । मूर्तशब्दव्युत्पत्तिस्त्वियत्तावच्छिन्नपरिमाणवत्त्वनिबन्धनेति विवेकः । आदिपदेन नञर्थानुल्लिखितधीविषयत्वाद्युपाधिनिबन्धना भावादिशब्दव्युत्पत्तिरिति ज्ञातव्यम् । अत्रेन्द्रियग्राह्यगुणाश्रयत्वमात्मन्यतिप्रसक्तम्, अतो **बाह्येति** विशेषणम् । इदं च न भूतशब्दवाच्येषु परमाणुषु सम्भवति । तद्गुणानामतीन्द्रियत्वात् । अतो बाह्येन्द्रियग्राह्यजातिमद्गुणाश्रयत्वं विवक्षितमित्यवश्यं वाच्यम् । एतच्च बाह्येन्द्रियग्राह्यसङ्ख्यात्वादिजातिमत्सङ्ख्याद्याश्रये कालादावतिप्रसक्तम्, अत **एकेति** विशेषणम् । सङ्ख्यात्वादिकं च न बाह्येन्द्रियग्राह्यमिति सर्वं सार्थकमिति ज्ञातव्यम् । **उपाधीनामिति** । उपाधिघटकानां पदार्थानामित्यर्थः । **अनुगतसामान्येति** । अनुगतसामान्यैरनुगतीकृतानां तेषामुपाधिघटकत्वान्नानुगम इति भावः । अत एवाहुः 'परस्परासम्बद्धा जातिरेवोपाधिः' इति ।

**वं०प०— सामान्यरहितेष्विति** । भूतत्वमूर्तत्वरूपजातिरहितेष्वित्यर्थः । **भूतेति** । अनेकेषु पृथिव्यादिपञ्चकेषु 'इदं भूतमि'त्याद्यनुगतव्यवहारान्यथाऽनुपपत्त्यैकस्य भूतशब्दस्य सङ्गतिग्रहणं वाच्यम् । न हि तत्रानुगतं भूतत्वं सामान्यं जातिरूपमस्ति । मूर्तत्वेन साङ्कर्यात् । एवमाकाशं विना मनःसहितेषु पृथिव्यादिषु

मूर्तशब्दव्यवहारेण मूर्तशब्दस्य सङ्गतिग्रहणमपेक्षितम् । न हि तत्रापि मूर्तत्वमनुगतं सामान्यमस्ति । भूतत्वेन साङ्कर्यादिति भावः । गुणाश्रयत्वमवच्छिन्नपरिमाणत्वं चेति द्वन्द्वः । बाह्येन्द्रियग्राह्यगुणाश्रयत्वं भूतशब्दव्युत्पत्तौ निमित्तमवच्छिन्नपरिमाणत्वं मूर्तशब्दव्युत्पत्तौ निमित्तमिति विवेकः । इन्द्रियग्राह्यगुणाश्रयत्वस्यैव भूतशब्दव्युत्पत्तौ निमित्तत्वे मनोरूपान्तरिन्द्रियग्राह्यज्ञानादिगुणाश्रयत्वस्यात्मन्यपि सत्त्वात् तत्रापि भूतशब्दव्युत्पत्तिः स्यादतो **बाह्येति** । एवं तर्हि परमाणौ भूतशब्दव्युत्पत्तिर्न स्यात् । तद्गुणानां बाह्येन्द्रियाग्राह्यत्वेनोक्तनिमित्ताभावादिति चेन्न । तत्रापि बाह्येन्द्रियग्राह्यगुणसजातीयगुणाश्रयत्वस्य सत्त्वात् । एवं तर्ह्यात्मन्यपि पुनर्भूतशब्दव्युत्पत्तिः स्यात् तत्रापि बाह्येन्द्रियग्राह्यघटादिनिष्ठैकत्वादिसङ्ख्यारूपगुणसजातीयगुणाश्रयत्वस्य सत्त्वात् अतो **बाह्यैके-न्द्रियेत्ये**कपदमपि देयमत्रेत्याहुः । **उपाधीनां** तद्घटकपदार्थानाम् । **अनुगतेति** । इन्द्रियत्वगुणत्वादिरूपानु-गतसामान्याश्रयत्वादित्यर्थः । तथाच इन्द्रियत्वादेरनुगतत्वेन इन्द्रियादीनामप्यनुगतत्वात् तद्घटितोपाधीनामप्यनु-गतप्रायत्वमिति भावः ।

**कं०रा०— बाह्यैकेन्द्रियेति** । बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वं भूतशब्दसङ्गतिग्रहणनिबन्धनं परिच्छिन्न-परिमाणत्वं तु मूर्तशब्दसङ्गतिग्रहणनिबन्धनमिति द्रष्टव्यम् । न च वाच्यं पार्थिवपरमाण्वादीनां बाह्यैकेन्द्रिय-ग्राह्यगुणाश्रयत्वाभावाद्भूतत्वं न स्यादिति । बाह्यैकेन्द्रियग्राह्यगुणसजातीयगुणवत्वस्य विवक्षिततत्वात्, तस्य च तत्रापि सत्त्वात् एवं च बाह्येन्द्रियग्राह्यघटादिनिष्ठसङ्ख्यासजातीयसङ्ख्यायुक्तात्मन्यतिव्याप्तिनिरासाय एकपदं सार्थकम्, न चैवमपि बाह्यैकेन्द्रियग्राह्यघटादिगतरूपादिना गुणत्वाकारेण सजातीयं यत्सुखादिकं तद्वत्यात्म-न्यतिव्याप्तितादवस्थ्यमिति वाच्यम् । गुणत्वावान्तरजात्या सजातीयत्वस्य विवक्षिततत्वात् । बाह्यपदं च मनो-रूपेन्द्रियग्राह्यं यदात्मान्तरनिष्ठसुखादिकं तत्सजातीयसुखादिमत्यात्मान्तरेऽतिव्याप्तिनिरासायेति ध्येयम् ।

**श्रीनिधि०— सामान्यरहितेष्विति** । भूतत्वमूर्तत्वादिरूपसामान्यरहितेष्वित्यर्थः । तेषां सामान्य-त्वाभावात् । **बाह्यैकेन्द्रियग्राह्यविशेषगुणाश्रयत्वावच्छिन्नपरिमाणत्वादीति** । बाह्येन्द्रियग्राह्यगुणाश्रयत्वं च अवच्छिन्नपरिमाणत्वं चेति विग्रहः । अवच्छिन्नं परिमाणं यस्य तत् तथा तस्य भावः अवच्छिन्नपरिमाणत्वम् । अवच्छिन्नत्वं नाम परिमितत्वं द्रष्टव्यम् । भूतत्वं विशेषगुणघटितम् । ते चाननुगता एव । मूर्तत्वं परिमाण-घटितम् । तच्च अननुगतमेवेत्यत आह **उपाधीनां व्यावृत्तत्वेऽपीति** ।

**शे०वा०**— ननु भूतत्वमूर्तत्वज्ञेयत्वाभिधेयत्वाद्यनुगतसामान्यरहितेष्वपि पृथिव्यादिषु त्वन्मते एकस्य भूतादिशब्दस्य व्युत्पत्तिवदनुगतसामान्येन विनैव अनेकेष्वपि गोपिण्डेषु एकस्य गोशब्दस्य सङ्गतिग्रहणोपपत्तेः अनुगतसामान्येन विना व्युत्पत्त्यनुपपत्तेरभावान्न तयाऽनुगतसामान्यसिद्धिरित्याशङ्कते **नन्विति** । मूर्तादीत्यादि-पदेन ज्ञेयाभिधेयादिपरिग्रहः । न च भूतत्वादीन्यप्यनुगतानीति वाच्यम् । तथा सति वक्ष्यमाणरीत्या नित्यत्व-स्याप्यनिवार्यतया जातित्वप्रसङ्गात् । न चेष्टापत्तिः । भूतत्वमूर्तत्वयोर्जातित्वस्य सङ्करग्रस्तत्वात् । ज्ञेयत्वादेश्च सामान्यादावपि वृत्तेरित्याशयात् । भवेदेवं व्युत्पत्तेरन्यथोपपत्तिः । यद्यनुगतसामान्येन विना भूतादिशब्दव्युत्पत्ति-

रभिमता स्यात् । न चैतदस्तीत्यभिप्रेत्य तत्कथमित्यतः किमत्र व्युत्पत्तिनिदानं सामान्यमेव नास्तीत्यभिमतं, किंवाऽङ्गीकृत्य सामान्यं तस्यानुगतत्वं नास्तीति विकल्पद्वयं निधायाद्यं दूषयति **तत्रापीति** । भूतशब्दव्युत्पत्तिर्बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वोपाधिनिबन्धना । मूर्तशब्दव्युत्पत्तिः इयत्तावच्छिन्नपरिमाणत्वोपाधिनिबन्धनेति योज्यम् । परिमाणत्वादीत्यादिशब्देन ज्ञानविषयत्वादिपरिग्रहः । ननु बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वं परमाणुष्वव्याप्तमिति चेत् । उच्यते । द्रव्यग्राहकयावदिन्द्रियाग्राह्यबहिरिन्द्रियग्राह्यगुणवृत्तिगुणत्वव्याप्यजातिमद्गुणवत्त्वं तत्त्वमिति विवक्षितत्वात् । अस्यार्थः । द्रव्यग्राहकाणि यावन्तीन्द्रियाणि चक्षुस्त्वङ्मनांसि, तदग्राह्या बहिरिन्द्रियग्राह्या च या गुणत्वन्यूनवृत्तिर्जाती रूपत्वादिः तद्गुणवत्त्वमिति । अस्ति चैतत्परमाणुष्वपीति नाव्याप्तिः । अत्र द्रव्यग्राहकयावदिन्द्रियाग्राह्यत्वविशेषणानुपादाने सङ्ख्यामादाय आत्मादावतिव्याप्तिः । बहिरिन्द्रियग्राह्या या गुणत्वन्यूनवृत्तिः सङ्ख्यात्वजातिस्तद्वत्याः सङ्ख्याया आत्मादौ सत्त्वात् । उपादाने त्वस्य नातिव्याप्तिः । सङ्ख्यात्वस्य यावद्द्रव्यग्राहकेन्द्रियग्राह्यत्वात् । न त्वत्र ग्राह्यान्तं गुणविशेषणम् । तथात्वे तादृशत्रसरेणुसंयोगवृत्तिसंयोगत्वादिजातिनिबन्धनातिव्याप्तितादवस्थ्यात् । द्रव्यग्राहकेत्यपि तदर्थमेव । अन्यथा सङ्ख्यात्वस्यापि यावदिन्द्रियाग्राह्यतयोक्तदोषतादवस्थ्यात् । द्रव्यग्राहकेन्द्रियाणि चक्षुस्त्वङ्मनांसि तदग्राह्यत्वं न रूपत्वादिष्वित्यव्याप्तिरित्यत उक्तं **यावदिति** । तथा च विशिष्टाभावस्य प्रत्येकं ग्राह्यत्वेऽपि सत्त्वान्नाव्याप्तिः । द्रव्यग्राहकयावदग्राह्यत्वमात्रोक्तौ संयोगत्वस्यापि प्राप्तिः । तस्य द्रव्यग्राहकसन्निकर्षविशेषाग्राह्यत्वात् । एवञ्च द्रव्यग्राहकयावदग्राह्या बहिरिन्द्रियग्राह्या च या गुणत्वन्यूनवृत्तिः संयोगत्वजातिः तद्वतः संयोगस्य आत्मन्यपि सत्त्वात् आत्मन्यतिव्याप्तिरित्यत उक्तम् **इन्द्रियेति** । संयोगत्वजातिश्च न द्रव्यग्राहकयावदिन्द्रियाग्राह्येति नातिव्याप्तिः । इन्द्रियग्राह्यत्वविशेषणानुपादानेऽप्यात्मन्यतिव्याप्तिः । अनुमानादिमात्रग्राह्ययावद्द्रव्यग्राहकेन्द्रियाग्राह्यधर्मत्वादिजातिमतो धर्मादेरात्मन्यपि सत्त्वात् । उपादाने तु तस्य नातिव्याप्तिः । धर्मत्वादेरिन्द्रियग्राह्यत्वाभावात् । बहिर्विशेषणानुपादानेऽपि तथा । मनोमात्रग्राह्यतया द्रव्यग्राहकयावदिन्द्रियाग्राह्यज्ञानत्वसुखत्वादिजातिमतो ज्ञानादेस्तत्र सत्त्वात् । उपादाने तु न दोषः । ज्ञानत्वादेर्बहिरिन्द्रियाग्राह्यत्वात् । बहिरिन्द्रियग्राह्यत्वं चात्र बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वमभिमतम् । अन्यथा ज्ञातो घट इति प्रत्यक्षे ज्ञानत्वस्याप्युपनीतभानविषयतया बहिरिन्द्रियग्राह्यत्वेन तद्वज्ज्ञानादिमति आत्मन्यतिव्याप्तितादवस्थ्यात् । प्रभामनोनिष्ठसामान्यगुणसाधारणचक्षुर्मात्रग्राह्योत्कर्षापकर्षरूपजातिमत्परिमाणवन्मनोव्यावृत्तये गुणत्वव्याप्येति जातिविशेषणम् । गुणत्वव्याप्यत्वं चात्र गुणत्वन्यूनवृत्तिजात्यन्यूनवृत्तित्वं विवक्षितम् । उत्कर्षत्वादिरूपजातिस्तु गुणत्वन्यूनवृत्तिपरिमाणत्वन्यूनवृत्तिरेवेति तद्व्युदासः । गुणवृत्तिपदं स्वरूपकथनम् । जातिपदं च आशुविनाशिविशेषगुणत्वशून्यान्यत्वमादाय ज्ञानादिसङ्ग्रहादात्मन्यतिव्याप्तिवारणाय; तस्य शब्दज्ञानादिमात्रवृत्तित्वेनोक्तरूपत्वात् । अग्रिमगुणपदं स्वरूपकथनमेवेति सर्वमनवद्यम् । उपलक्षणं चैतत् । बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वं चेत्यपि द्रष्टव्यम् । यद्यप्येतदपि यथाश्रुतं परमाणुष्वव्याप्तमेव, तथाऽपि महत्त्वाश्रयेन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वव्याप्यजातिमद्गुणवत्त्वमित्यत्र तात्पर्यान्न दोषः । अत्रात्मन्यतिव्याप्तिवारणाय ग्राह्यान्तं गुणविशेषणं, न तु पूर्ववज्जातिविशेषणम् । संस्कारत्वमादाय भावनासाधारण्यादात्मन्यतिव्याप्तितादवस्थ्यात् । महत्त्वाश्रयग्राह्यत्वमिच्छादावप्यस्ति । आत्मग्राह्यत्वात् ।

तद्वृत्तिर्गुणत्वव्याप्या जातिः इच्छात्वादिका । तद्वदिच्छादिगुणवत्ताया आत्मन्यपि सत्त्वात् । तत्रातिव्याप्तिवारणाय इन्द्रियेति विशेषणम् । संयोगत्वजातिमादायात्मन्यतिव्याप्तिवारणायोक्तं **विशेषेति** । सत्तामादाय आत्मन्यतिव्याप्तिवारणाय **गुणत्वव्याप्येति** । गुणत्वशून्यान्यत्वमादाय ज्ञानादिसाधारण्यादात्मन्यतिव्याप्तिवारणाय **जातिपदम्** । अग्रिम**गुणपदं** स्वरूपकथनमेवेत्यनवद्यम् ।

**इयत्तेति** । **इयत्ता** परिच्छेदस्तेनावच्छिन्नं परिच्छिन्नमिति यावत् । एवम्भूतं यत्परिमाणं तद्योगित्वमित्यर्थः । आकाशादिव्यावृत्त्यै **इयत्तावच्छिन्नेत्युक्तम्** । यद्यपि मूर्तत्वं जातिरेव, नोपाधिः । न च भूतत्वेन सङ्करः । सति जातित्वसाधके भूतत्वस्यैवोपाधित्वात् । अवश्यं चैतदेवम् । अन्यथा शरीरत्वेन साङ्कर्यात् पृथिवीत्वमपि जातिर्न स्यात् । गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वं जातिः न तु शरीरत्वम् । जातित्वव्यवस्थापकानां कार्यतावच्छेदकत्वादीनामभावादिति चेत् तुल्यं मूर्तत्वे अपि । जातित्वव्यवस्थापकस्य क्रियासमवायिकारणतावच्छेदकत्वस्य मूर्तत्वे सत्त्वाद्भूतत्वे च तदभावात् । अत एवोक्तं कर्म मूर्तद्रव्यसमवेतमेवेति । तस्मान्मूर्तत्वं जातिरेवेति । जातिनिबन्धनैव मूर्तशब्दव्युत्पत्तिरिति नव्यमतम् । तथाऽपि जरन्नैयायिकादिमतमाश्रित्येदमुपाधिनिबन्धनत्वकथनमित्यवधेयम् । **उपाधिनिबन्धनेति** । उक्तविधभूतत्वाद्यौपाधिकधर्मनिबन्धनेत्यर्थः । न वयं भूतादिशब्दव्युत्पत्तिनिदानं सामान्यमेव नास्तीति ब्रूमः किन्त्वङ्गीकृत्य सामान्यं तस्यानुगतत्वमात्रं निराकुर्म इति द्वितीयं प्रत्याचष्टे **उपाधीनामिति** । भूतत्वाद्यौपाधिकधर्माणामित्यर्थः । **अनुगतसामान्याश्रयत्वेनेति** । अनुगतसामान्यघटितत्वेनेत्यर्थः । औपाधिकधर्माणामुपाध्यतिरेकपक्षे व्यावृत्ततया तेषामननुगतत्वेन व्युत्पत्तिनिदानत्वासम्भवेऽप्युपाध्यनतिरेकवादे तेषां गुणत्वपरिमाणत्वज्ञानत्वाभिधात्वादिजातिमात्ररूपत्वप्राप्त्या तेषां परम्परासम्बन्धेन घटादावप्यनुगतत्वसम्भवाद्युक्तं व्युत्पत्तिनिदानत्वमिति भावः ।

**वा०र०— तथा सति वक्ष्यमाणेति** । 'एवं चाङ्गीकार्ये गोत्वादेरि'ति वक्ष्यमाणेत्यर्थः । **सङ्करेति** । परस्परमिति शेषः । बाह्येकेन्द्रियग्राह्यगुणाश्रयत्वस्य द्रव्यग्राहकेत्यादिरूपेण निरुक्तिर्वर्धमानेन कृता । तन्निमित्तं रुचिदत्तानुसारेणाह **ननु बाह्येति** । अत्र मूलानुसारेण बाह्यैकेन्द्रियेत्युक्तम् । वस्तुत बाह्यैकैकेन्द्रियेति वाच्यम्। किरणावल्यां तथैवोक्तेः । मूलस्यापि तत्रैव तात्पर्यात् । सम्मतं चैतट्टीकाकृतः । द्रव्यग्राहकेति विवक्षायां यावदित्यस्य तदर्थत्वाश्रयणात् । अत एव बाह्येन्द्रियग्राह्यविशेषगुणवत्वमिति द्वितीयोपाधेर्निर्वचने यावत्पदाप्रयोग इति ध्येयम् । **अव्याप्तमिति** । परमाणुगुणानामप्रत्यक्षत्वेन तत्रोक्तलक्षणाभावादिति भावः । अत्र अस्मदादीति विवक्षितम् । अन्यथा योग्यादिकमादायाव्याप्त्यभावापत्तेः । योगिबाह्यैकेन्द्रियग्राह्यपरिमाणादिगुणाश्रयकालादेरपि भूतत्वापत्तेश्चेति ध्येयम् । परमाणुपदं द्व्यणुकस्याप्युपलक्षणम् । तत्रापि उक्ताव्याप्तेः सुवचत्वात् । अत एव परमाण्वादीत्यादिपदं रुचिदत्ते इति द्रष्टव्यम् । वर्धमानोक्त्यनुसारेण तदर्थमाह **अस्यार्थ इत्यादिना** । **गुणत्वव्याप्येत्यस्यार्थो** गुणवन्न्यूनवृत्तिरिति । गुणवृत्तिपदं तु स्वरूपकथनत्वान्नात्रान्तर्भावितम् । उत्तरत्र तत्स्वरूपकथनत्वोक्तिस्तु यद्यस्ति तत्तर्हि तत्स्वरूपकथनमित्यर्थतया व्याख्येया । परमाणुष्वपीत्युपलक्षणं द्व्यणुकेऽपीत्यपि

ग्राह्यम् । पद्मनाभोक्त्यनुसारेण द्रव्यग्राहकयावदिन्द्रियग्राह्यत्वविशेषणकृत्यमाह **अत्र द्रव्येति** । रुचिदत्तानुसारेणाह **न त्वत्रेति** । अत्र ग्राह्यान्तमिति पाठः । रुचिदत्ते मूलकोशे च दर्शनात् युक्तत्वाच्च । **तादृशेति** । द्रव्यग्राहक-यावदिन्द्रियाग्राह्यो बहिरिन्द्रियग्राह्यश्च यस्त्रसरेणुसंयोगरूपो गुणः तद्वृत्तिगुणत्वव्याप्यसंयोगत्वजातिमान् यो गुणः संयोगः तद्वत्त्वस्यात्मनि सत्त्वादव्याप्तितादवस्थ्यमित्यर्थः । संयोगत्वादीत्यादिपदेन सङ्ख्यात्वादि ग्राह्यम् । एतेन प्राक् संयोगादिकमादायापि अतिव्याप्तिवारणमभिप्रेतमिति सूचयति । सङ्ख्यातुल्यत्वात् संयोगादेरिति ध्येयम् । एतच्च गुणवृत्तिपदसद्भाव एव । अन्यथा गुणविशेषणत्वे एतद्दूषणपर्यन्तधावनानर्थक्यम् । तथाहि न तावद्गुणत्वे-त्यत्रत्यगुणविशेषणता । तथा सति बहिरिन्द्रियग्राह्येत्यस्य मध्ये सत्त्वेनानन्वयापत्तेः । तस्यापि तद्गुणविशेषणत्वे च तादृशगुणत्वव्याप्यजातिमद्गुणवत्त्वस्य कथञ्चित् त्रसरेणौ सम्भवेऽपि अन्यत्रासम्भवेनासम्भव एव । नापि उत्तरश्रुतगुणविशेषणता उक्तदोषानिस्तारात् । तस्मादयं विचारो गुणवृत्तिपदान्तर्भावपक्ष एव । उपलक्षणं चैतत्। उत्तरश्रुतगुणविशेषणत्वे उक्तरीत्या दूषणं द्रष्टव्यम् । अग्राह्यान्तमुपलक्षणं ग्राह्यान्तमित्यपि द्रष्टव्यम् । तत्रापि रूपादिनिष्ठरूपत्वादिजातेः बहिरिन्द्रियग्राह्यो यो गुणः तस्या भावः तत्त्वं तद्व्याप्यजातित्वाभावेन तद्वद्रूपादिमति पृथिव्यादावसम्भवप्रसङ्गात् । द्वितीये तु परमाणुष्वव्याप्तिरिति द्रष्टव्यम् । **तदर्थमेवेति** । सङ्ख्यामादायात्मन्यति-व्याप्तिपरिहारायैवेत्यर्थः । सङ्ख्यात्वस्येत्युपलक्षणया संयोगत्वादिपरम् । मध्यदीपिकान्यायेन संयोगत्वादिजातीति मध्ये कीर्तनादिति बोध्यम् । रुचिदत्तानुसारेणाह **द्रव्यग्राहकेति** । द्रव्यग्राहकयावदिन्द्रियेषु चक्षुरादीनां प्रविष्ट-त्वेन चक्षुरादितत्तदिन्द्रियग्राह्ये रूपत्वादौ यावदिन्द्रियाग्राह्यत्वाभावादसम्भव इत्यतोऽत्र यावदिन्द्रियग्राह्यत्वाभावो विवक्षितः । एवं च किञ्चिदिन्द्रियग्राह्याणामपि रूपत्वादीनाम् इन्द्रियान्तरग्राह्यत्वाभावेन यावदिन्द्रियाग्राह्यत्व-सम्भव इत्याशयेनाह **तथा चेति** ।

रुचिदत्तानुसारेणेन्द्रियपदकृत्यमाह **द्रव्यग्राहकयावदिति** । **सन्निकर्षविशेषेति** । स च दूरस्थले दण्डादिस्थले कार्योन्नेय इति भावः । **आत्मनीति** । आत्मादावित्यर्थः । उपपादयति **संयोगत्वेति** । रुचिदत्ता-नुसारेणेन्द्रियग्राह्यत्वबहिःपदयोः कृत्यं स्वयमुपपादनपूर्वकमाह **इन्द्रियेत्यादिना** । **तत्रेति** । आत्मनीत्यर्थः । **अभिमतमिति** । स्वयंसमाध्यभिधानं चैतत् । **प्रभामनोनिष्ठेति** । तादृशः सामान्यगुणस्तु परिमाणरूपः तत्साधारणी च सा चक्षुर्मात्रग्राह्या च एवंरूपा या उत्कर्षापकर्षरूपा जातिः तद्वत्परिमाणं तल्लक्षणो गुण इति यावत् । तद्भन्मनस्तद्व्यावृत्तय इत्यर्थः । उत्कर्षापकर्षजातिरपि गुणत्वव्याप्यत्वादाह **गुणत्वव्याप्यत्वं चेति** । एतच्च वस्तुद्वयगतपरिमाणयोरुत्कर्षापकर्षरूपजातिरस्तीति मतेन तदभावमते तु गुणत्वव्याप्यपदमनादेयमेव । रुचिदत्तानुसारेणाह **गुणगतपदमिति** । यद्यपि पद्मनाभेन चक्षुर्मात्रग्राह्यप्रभावृत्तिप्रभात्वरूपजात्यधिकरणप्रभावत-स्तदवयवस्य प्रभात्वस्यापि गुणत्वन्यूनवृत्तित्वेऽपि गुणत्वन्यूनवृत्तिजात्यपेक्षया न्यूनवृत्तित्वाभावेन गुणत्वव्याप्य-पदार्थत्वेन द्रव्यग्राहकयावदिन्द्रियाग्राह्यबहिरिन्द्रियग्राह्यगुणत्वव्याप्यजातिमदाश्रयत्वमस्तीति प्राप्तातिव्याप्ति-परिहाराय गुणवृत्तीति पदोपादानम् । प्रभायाश्च तेजोरूपतया गुणत्वाभावेन प्रभात्वस्य गुणवृत्तित्वाभावेन न तदावयवेऽतिव्याप्तिरिति स्थलान्तरातिव्याप्तिपरिहारायैव गुणगतेति विशेषणमभिहितमिति तथैव वक्तुमुचितम् ।

अग्रिमगुणपदस्य व्यर्थत्वस्य वक्ष्यमाणत्वेन तस्याव्यावर्तकत्वात् । तथापि प्रभावत्तदवयवस्यापि तेजस्त्वेन लक्ष्यत्वाददतिव्याप्तेरभावेन न तद्व्यावृत्त्यर्थं विशेषणान्तरोपादानं सार्थकमिति भावेन तथाऽनुक्तमिति ध्येयम् । रुचिदत्तानुसारेणाह **जातिपदं चेति** । आशुविनाशी यो विशेषः तस्य भावः तत्त्वं तच्छून्यो यः सामान्यगुणः तदन्यत्वस्योपाधेः द्रव्यग्राहकयावदिन्द्रियग्राह्यबहिरिन्द्रियग्राह्यत्वेन तादृशोपाधिमज्ज्ञानादिमदात्मन्यतिव्याप्ति-वारणायेत्यर्थः । कथं तस्योपाधेः द्रव्यग्राहकेत्यादिविशेषणोपेतत्वमित्यतस्तदुपपादयति **तस्येति** । ततश्चोक्तो-पाधेः उक्तरूपत्वात्तज्ज्ञानादिमदात्मानमादायातिव्याप्तिर्युक्तेति भावः । तादृशजातिमदाश्रयत्वमात्रेणैव सर्वव्यावृत्ते-र्व्यर्थं गुणपदमित्याह **अग्रिमगुणपदमिति** । किरणावलीकृता बाह्यैकेन्द्रियग्राह्यगुणवत्वस्येव बाह्येन्द्रियग्राह्य-विशेषगुणवत्वस्याप्युपाधेरुक्तत्वेन सङ्गृह्यति **उपलक्षणं चेति** । अस्यापि यथाश्रुतस्य परमाणुष्वव्याप्तिमाशङ्क्य वर्धमानोक्तविवक्षाविशेषेण परिहरति **तथापीति** । रुचिदत्तानुसारेण विशेषणकृत्यमाह **अत्रेत्यादिना** ।

**संस्कारत्वमादायेति** । भावनाख्यसंस्कारस्य महत्त्वाश्रयेन्द्रियग्राह्यविशेषगुणभूतभावनावृत्तिर्गुणत्व-न्यूनवृत्तिः या संस्कारत्वजातिस्तत्त्वेन तादृशभावनावदात्मन्यतिव्याप्तिरित्यर्थः । गुणविशेषणत्वे च आत्मगत-भावनाया बहिरिन्द्रियाग्राह्यत्वेन महत्त्वाश्रयेन्द्रियग्राह्यविशेषगुणत्वाभावेन तद्वृत्तिगुणत्वव्याप्यजातिमद्भावनाश्रय-त्वानुपपत्त्या अतिव्याप्तेरभावादिति भावः । इन्द्रियपदकृत्यमाह **महत्त्वेति** । **इयत्ता परिच्छेद इति** । अत्रेय-त्तेतिपदयुक्तपाठानुसारेणेदं व्याख्यानम् । अवच्छिन्नेति किरणावल्यनुसारेण मूलपाठपक्षे तु अवच्छिन्नं यत्परिमाणं तद्योगित्वमित्यर्थोऽवसेयः । अत एव **इयत्तावच्छिन्न**मित्यस्य परिच्छिन्नमित्येव तात्पर्यं वर्णितमिति ध्येयम् । ननु कर्मसमवायिकारणतावच्छेदकत्वेनेत्यादि रुचिदत्तानुसारेण मूर्तत्वस्य जातित्वमाक्षिप्य समाधत्ते **यद्यपि मूर्तत्वादिना** । अत्रार्थे शिवादित्यमिश्रवाक्यसम्मतिमाह **अत एवोक्तमिति** । **जरन्नैयायिकमतमिति** । भूतत्व-विरोधस्तावदात्मत्वादिजातावस्तीति सर्ववादिसिद्धम् । तत्र नात्मत्वत्वं विरोधितावच्छेदकम् अननुगमात् । किन्तु मूर्तत्वसामानाधिकरणात्यन्ताभावप्रतियोगित्वे सति भूतत्वप्रतियोगिकात्यन्ताभावसमानाधिकरणजातित्वम् । एवं च यदि मूर्तत्वं जातिः स्याद्भूतत्वविरुद्धं स्यादिति न मूर्तत्वं जातिरिति तेषामुपपादनप्रकारः । स च अयुक्तः । तथा सति विरोधस्यापि आत्मत्वादौ सत्त्वे उक्तन्यायस्य तत्राप्यापत्त्या पृथिवीत्वं यदि जातिः स्यात् तर्हि शरीरत्वविरोधि स्यादिति न्यायसाम्येन पृथिवीत्वस्यापि जातित्वं न स्यात् । व्यक्त्यभेदाद्यतिरिक्तबाधकान्तरा-पत्तेश्चेति तत्रास्वरसो बोध्यः । उपाधित्वानुगमतादवस्थ्यं मत्त्वा व्याचष्टे **उक्तविधेति** । एवमुत्तरत्रापि ।

**स०व्र०— तत्रापीति** । भूतशब्दव्युत्पत्तौ बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वस्य, मूर्तशब्दव्युत्पत्तौ अव-च्छिन्नपरिमाणत्वस्य निमित्तत्वादुपपत्तिः । अत्र इन्द्रियग्राह्यगुणाश्रयत्वस्यैव निमित्तत्वे आत्ममनसोरपि भूत-शब्दव्युत्पत्त्यापत्त्या **बाह्येति** विशेषणम् । बाह्येन्द्रियग्राह्यगुणाश्रयत्वस्यैव निमित्तत्वे परमाणौ भूतशब्दप्रवृत्तिर्न स्यात् । तद्गुणानामपि बाह्येन्द्रियग्राह्यत्वाभावात् । अतो बाह्येन्द्रियगुणसजातीयसङ्ख्यासंयोगाश्रयगुणाश्रयत्वस्य उक्तौ तस्य आत्मन्यपि सत्त्वात् तत्रापि भूतशब्दव्युत्पत्त्यापत्त्या तत्परिहारार्थत्वेन एकपदस्य सार्थक्यादिति भावः । **अनुगतसामान्याश्रयत्वेनेति** । अनुगतसामान्यघटितत्वेनेत्यर्थः ।

**विठ्ठल०— सामान्यरहितेष्विति** । पृथिव्यादिषु भूतमूर्तादिशब्दास्तावत्प्रयुज्यन्ते । न च तत्र भूतादिशब्दप्रवृत्तिनिमित्तसामान्यमस्ति । भूतत्वमूर्तत्वयोराकाशे मनसि च परस्परपरिहारेणैव वर्तमानयोः पृथिव्यादौ समावेशेन भूतत्वमूर्तत्वयोः पृथिव्यादौ कालादौ च परस्परविरहेणावस्थितयोराकाशे समावेशेन साङ्कर्यात् । अतो न सामान्यं सङ्गतिग्रहणे निमित्तमिति शङ्काभिप्रायः । सामान्यं द्विविधं जातिरुपाधिश्चेति । तत्र भूतत्वादेर्जातित्वाभावेऽपि उपाधित्वमस्त्येव । तथाहि । बाह्येन्द्रियग्राह्यगन्धरसरूपस्पर्शशब्दाख्यगुणाश्रयत्व-रूपोपाधिर्भूतत्वम् । अवच्छिन्नपरिमाणवत्त्वं मूर्तत्वम् । तथा च उक्तोपाधिनिबन्धनैव पृथिव्यादिषु भूतादिशब्द-व्युत्पत्तिरिति नोक्तदोष इत्याशयेन परिहरति **उच्यत इति** । बाह्यैकेन्द्रियग्राह्यगुणाश्रयत्वमित्यत्र गुणाश्रयत्व-मात्रस्य कालादावतिप्रसक्तत्वात् **इन्द्रियग्राह्येति** गुणविशेषणम् । आत्मन्यतिप्रसक्तिवारणाय **बाह्येति** इन्द्रिय-विशेषणम् । अत्र पृथिव्यादिपरमाणुगुणानामतीन्द्रियत्वात् तत्र भूतशब्दव्युत्पत्तिसिद्धये बाह्येन्द्रियग्राह्यजाति-मद्गुणाश्रयत्वमिति वक्तव्यम् । एतच्च बाह्येन्द्रियग्राह्यसङ्ख्यात्वादिजातिमत्सङ्ख्याद्याश्रये कालादावतिप्रसक्तम् । अत **एकेति** विशेषणम् । सङ्ख्यादिकं तु द्वीन्द्रियग्राह्यमिति सर्वं सार्थकम् । यद्वा एकेति स्फुटत्वार्थः । स्थूलपृथि-व्यादावेव भूतशब्दप्रवृत्तिनिमित्तमिदमिति ज्ञेयमित्याहुः । ननूपाधीनां कथं सार्वत्रिकव्युत्पत्त्युपयोगित्वं तेषां प्रतिव्यक्ति भिन्नभिन्नत्वादित्यत आह **उपाधीनामिति** । **अनुगतसामान्येति** । गुणत्वपरिमाणत्वरूपानुगत-सामान्यघटितत्वेनेत्यर्थः । तथा च बाह्येन्द्रियग्राह्यगुणाश्रयत्वप्रविष्टगुणत्वजातेः परिच्छिन्नपरिमाणयोगिताप्रविष्ट-परिमाणत्वजातेश्च सर्वानुगतत्वेन तद्घटितोपाधेरपि सार्वत्रिकव्यवहारनिमित्तत्वं स्यादेवेति भावः ।

**चषक— पृथिव्यादिषु** तदादिपञ्चसु । भूतत्वमूर्तत्वादीनां **बाह्येत्यादि** । आत्मन्यतिप्रसङ्गाय ग्राह्यान्तं, कालादौ तद्व्युदासाय **बाह्येति** । एकपदं स्पष्टार्थम् । इदं च कार्यभूते पृथिव्यादौ भूतपदव्युत्पत्त्यौ-पयिकम् । परमाणुसाधारणतद्व्युत्पत्त्यौपयिकं तु बहिर्द्रव्यत्वावच्छिन्नविशेषणाश्रयत्वमिति स्थितम् । परमाणु-गुणानामतीन्द्रियतया यथाश्रुतस्य परमाण्वसङ्ग्राहकतया बाह्येन्द्रियग्राह्यजातिमद्गुणाश्रयत्वमिति परिष्कृत्य तादृश-सङ्ख्यात्वाद्याश्रयविशेषितकालादावनतिप्रसङ्गायैकपदोपादानमित्यप्याशयमाविर्भावयन्ति । प्रपञ्चनं तु निबन्धान्तरे द्रष्टव्यम् । **अनुगतसामान्येति** । उपाधिघटकसामान्यानामेव पारम्पर्येण तत्तत्पदव्युत्पत्त्यौपयिकतेति भावः ।

**॥ इति तस्य हेतोरप्रयोजकत्वशङ्का तन्निरासश्च ॥**

**॥ इति बाधकतर्कस्याप्रयोजकताशङ्का तन्निरासश्च ॥**

* * *

**॥ अथ च ततस्तथात्वे कार्यकारणभावावधारणाभावरूपबाधकान्तरं च ॥**

**२२९ सु०— किञ्चानुगततन्तुत्वपटत्वादिसामान्याभावे कार्यकारणभावावधारणं न स्यात्; ततश्च कार्यार्थिनः कारणे प्रवृत्तिः न स्यात् ।**

**कार्यकारणभावे ह्यन्वयव्यतिरेकौ वा उपदेशो वा प्रमाणम् । न च व्यावृत्तेषु वस्तुषु अन्वयव्यतिरेकग्रहणमुपपद्यते, नियमव्यभिचारयोर्दुर्ज्ञानत्वात् ।**

**परि०— नियमव्यभिचारयोर्दुर्ज्ञानत्वादिति** । तन्तुपटव्यक्तिविशेषापेक्षया नियमस्य रासभेऽपि सत्त्वात् । पटान्तरं प्रति रासभो व्यभिचारी चेत् तन्तुरपि तथेति तन्त्वादौ नियमस्य रासभादौ व्यभिचारस्य दुर्ज्ञानत्वेन कारणाकारणविभागो न स्यादिति भावः ।

**यादु०— अन्वयव्यतिरेकौ वेति** । व्यभिचारज्ञानाभावसहकृतमन्वयव्यतिरेकसहचारग्रहणमित्यर्थः । **न च व्यावृत्तेष्विति** । तेषामानन्त्येन तत्रैव पुरुषायुषपर्यवसानप्रसङ्गादिति भावः । ननु सर्वेषु वस्तुषु तदसम्भवेऽपि प्रसिद्धेषु कतिपयेषु तद्ग्रहणमुपपद्यत एवेत्यत आह **नियमेति** । अप्रसिद्धेषु वस्तुषु किमेवमन्वयव्यतिरेकयोर्नियम उत क्वचित् तद्व्यभिचार इति निश्चेतुमशक्यत्वादित्यर्थः । तथा च अप्रसिद्धव्यक्त्यन्तरे व्यभिचारसंशयेन क्वाचित्कमन्वयव्यतिरेकग्रहणं न कारणताग्राहकमिति भावः । अनुगतसामान्याङ्गीकारे तु पटत्वतन्तुत्वादौ कार्यकारणभावावच्छेदकतयोपदेशादिनाऽवगते यत्र यत्रावच्छेदकधर्मदर्शनं तत्र तत्रोपदेशाद्यभावेऽपि कार्यकारणभावावधारणमुपपद्यत इति द्रष्टव्यम् ।

**वं०प०— व्यावृत्तेषु** अननुगतैकैकव्यक्तिषु कुतो नोपपद्यत इत्यत आह **नियमव्यभिचारयोरिति** । अन्वयव्यतिरेकयोरित्यर्थः । न ह्येकस्मिंस्तन्तौ पटकारणत्वं गृहीतुं शक्यं, तथा सति क्वचिद्रासभसद्भावदशायामपि पटोत्पत्तेस्तस्यापि कारणत्वं गृह्येत । न वैतत्तन्त्वभावे पटाभाव इति व्यभिचारो व्यतिरेको वा गृहीतुं शक्यते, तथा सत्येतत्तन्त्वभावेऽपि कदाचित्पटोत्पत्तिशङ्कापत्तेः । अनुगतसामान्याङ्गीकारे तु तन्तुत्वावच्छिन्ने सति पटत्वावच्छिन्नं भवति तदभावे तदभाव इति तन्तुत्वावच्छेदेन पटत्वावच्छेदेन च कार्यकारणभावग्रहणे नातिप्रसङ्ग इत्याहुः ।

**श्रीनिधि०— पूर्वं नियमव्यभिचारयोर्दुर्ज्ञानत्वादिति** । यदि तन्तुपटादयो व्यावृत्ताः स्युः तदा पटार्थिनस्तन्तौ प्रवृत्तिर्न स्यात् । पटान्तरं प्रति तन्त्वन्तरं प्रति कारणताया अनवधारणात् । अन्यथा रासभेऽपि प्रवृत्तिः स्यात् । अथ स्वेतरसामग्रीसम्पत्तौ तन्तवः पटं न व्यभिचरन्ति । व्यभिचरन्ति च रासभास्तमिति न तथा चेत् तन्तवोऽपि तथैव । न हि सर्वत्रोत्पादकोत्पद्यमानतन्तुपटयोरेकत्वमस्ति । येनाव्यभिचारः स्यात् । अथ कस्यचित् तन्तोः कञ्चन पटं प्रतित अव्यभिचारो दृश्यत इति चेत् तर्हि कस्यचित् रासभस्यापि तथेति समम् । तस्मात् तन्तूनां पटाव्यभिचारो व्यभिचारश्च रासभादेरिति ज्ञातुमशक्यत्वात् न तदन्वयव्यतिरेकौ गृहीतुं शक्येतेत्यर्थः । अनुगतसामान्ये तु नायं दोषः । व्यक्त्यैक्याभावेऽपि धर्मैक्येनैक्यसम्भवात् । एवञ्च बहुत्वाभावेन तस्मिन्सति तत् भवत्येवेति नियमोऽन्यत्र तद्व्यभिचारश्च गृहीतुं शक्यत एव । तन्तुविशेषस्य पटविशेष-

व्यभिचारेऽपि, तत्सामान्यस्य तत्सामान्ये तदभावात् । रासभविशेषस्य तद्विशेषाव्यभिचारेऽपि, तत्सामान्यस्य तत्सामान्यव्यभिचाराच्चेति तयोर्गृहीतुं शक्यत्वात् अन्वयव्यतिरेकावधारणं युज्यत एवेति ।

**शे०वा०**— एवं मूलेऽन्यथासिद्धत्वेन कण्ठोक्तव्युत्पत्त्यन्यथाऽनुपपत्तिमभिधाय अपिपदेन सङ्गृहीत-कार्यकारणभावावधारणाद्यनुपपत्तिमपि तत्साधकतया विवक्षुः कार्यकारणभावावधारणानुपपत्तिं तावदाह **किञ्चेति** । अनुगतेत्यतःपूर्वं कारणत्वकार्यत्वावच्छेदकेति पूरणीयम् । इष्टापत्त्या तर्कस्याभासतां निरस्यति **ततश्चेति** ।

नन्वनुगततन्तुत्वाद्यभावेऽप्यस्तु कार्यकारणभावावधारणमित्यप्रयोजकोऽयं तर्क इत्यतो अनुगत-सामान्यस्य कार्यकारणभावावधारणे प्रयोजकतामुपदर्शयितुं सम्प्रतिपन्नं तत्प्रमाणं तावदाह **कार्येति** । तर्हि ताभ्यामेव कार्यकारणभावावधारणोपपत्तेर्नानुगतसामान्यस्य तत्रोपयोगसिद्धिरिति अप्रयोजकत्वतादवस्थ्यमित्यतो नान्वयव्यतिरेकयोरज्ञातयोः तदवधारकत्वमतिप्रसङ्गात् । किन्तु ज्ञातयोरेव, तज्ज्ञानं चानुगतसामान्यं विना न सम्भवतीत्यस्त्येवानुगतसामान्यस्यान्वयव्यतिरेकग्रहणोपपादकतया तत्रोपयोग इत्यभिप्रेत्य अनुगतसामान्या-भावे अन्वयव्यतिरेकग्रहणासम्भवमुपपादयति **न च व्यावृत्तेष्विति** । अनुगतकार्यतावच्छेदककारणतावच्छेदक-धर्मशून्येष्वित्यर्थः । कुतोऽनुगतसामान्याभावेऽन्वयव्यतिरेकग्रहणानुपपत्तिर्येन तदुपपादकतयाऽनुगतसामान्यस्य प्रयोजकता स्यादित्यतोऽनुगतसामान्यस्यान्वयव्यतिरेकनियमतदनियमरूपव्यभिचारग्रहहेतुत्वादित्यभिप्रेत्य तदभावे तयोर्दुर्ग्रहत्वमाह **नियमव्यभिचारयोरिति** । व्यक्त्यपेक्षया नियतत्वस्य दण्डादाविव रासभेऽपि सत्त्वात् दण्ड-स्यान्वयव्यतिरेकावेव, रासभस्य च न ताविति न नियमानियमौ ज्ञातुं शक्याविति जात्यपेक्षयैव तौ ग्राह्यौ । ततश्च जातिसद्भावपक्षे दण्डजातीयस्य घटजातीयापेक्षया नियम एव, रासभजातीयस्य च घटजातीयापेक्षया अनियम एवेत्येवं नियमानियमयोर्ज्ञातुं शक्यत्वेऽप्यनुगतसामान्याभाववादिमते रासभादाविव दण्डादावपि जात्य-भावेन तदपेक्षया नियमस्याप्यसम्भवेन दण्डादेर्नियम एव रासभादेश्चानियम इति न नियमव्यभिचारौ ज्ञातुं शक्यावित्यर्थः ।

**वा०र०**— **अन्यथासिद्धत्वेनेति** । अन्यथा सादृश्यरूपप्रकारान्तरेण सिद्धतया कण्ठत उक्ता या व्युत्पत्तिस्तस्याः अन्यथाऽनुगतसामान्यभावेऽनुपपत्तिमित्यर्थः । **कार्यकारणाभावावधारणाद्यनुपपत्तिमिति** । तदन्यथानुपपत्तिमित्यर्थः ।

**अन्वयव्यतिरेकनियमेति** । अन्वयव्यतिरेकनियमस्तु तदनियमरूपो व्यभिचारश्च तद्ग्रहेत्यर्थः ।

**विट्ठल०**— सामान्यस्यानेकवृत्तित्वाभावे प्राक् प्रतिज्ञातं बाधकान्तरमाह **किं च अनुगततन्तुत्व-पटत्वादीति** ।

**अन्वयव्यतिरेकौ वेति** । सत्सु तन्तुषु पटः तदभावे तदभाव इत्यव्यभिचरितान्वयव्यतिरेकग्रहणं वा तन्तवः पटस्य कारणमिति वृद्धोपदेशो वेत्यर्थः । **न च व्यावृत्तेष्विति** । तेषामानन्त्येन तत्रैव पुरुषायुषपर्यवसानप्रसङ्गादिति भावः । कतिपयेषु दृष्टचरेषु अन्वयव्यतिरेकग्रहणमुपपद्यत एवेत्यत आह **नियमेति** । तन्तुपटव्यक्तीनामानन्त्येन सर्वासामदृष्टत्वात् सर्वत्राप्येवमिति नियमस्य क्वचिद्व्यभिचारस्य वा ज्ञातुमशक्यत्वात् । रासभे सति घट इत्यन्वयवतोऽपि क्वचिद्रासभाभावेऽपि घटदर्शनेन व्यभिचारावगमादत्रापि तत्सन्देहात्काचित्कमन्वयव्यतिरेकग्रहणं न कार्यकारणभावग्राहकम् । नाप्युपदेशेन तद्ग्रहः व्यक्तीनामनन्तत्वेन व्युत्पत्तावेव पुरुषायुषपर्यवसानादित्युक्तत्वात् । तन्तुत्वपटत्वजात्यङ्गीकारे तु जातेः प्रत्यक्षसिद्धत्वेन तन्तुत्वादौ कार्यकारणभावावच्छेदकतयोपदेशादिनाऽवगते पश्चात् यत्र यत्र अवच्छेदकधर्मो दृश्यते तत्र सर्वत्रोपदेशाद्यभावेऽपि कार्यकारणभावावधारणमुपपद्यत इति भावः ।

**॥ इति तथात्वे कार्यकारणभावावधारणाभावरूपबाधकान्तरं च ॥**

* * *

**॥ अथ च ततोऽनन्तेषु उपदेशासम्भवश्च ॥**

## २३० सु०— उपदेशश्चानन्तेषु न सम्भवत्येवेत्युक्तम् ।

**परि०— इत्युक्तमिति** । तेषामानन्त्येन व्युत्पत्तावेव पुरुषायुषपर्यवसानादित्यनेनेति भावः ।

**शे०वा०—** ननु तथाऽप्युपदेशेन कार्यकारणभावावधारणं, विनैवानुगतसामान्यं भविष्यतीत्यप्रयोजकत्वमेवेत्यत उपदेशस्य अनुगतकारणतावच्छेदककार्यतावच्छेदकधर्मावधारणद्वारा कार्यकारणभावावधारणहेतुत्वेन स्वातन्त्र्येण तद्धेतुत्वाभावात् अस्त्येवात्राप्यनुगतसामान्यापेक्षेत्यभिप्रेत्य स्वातन्त्र्येणोपदेशस्य कार्यकारणभावावधारणहेतुतां निराचिकीर्षुः किं प्रतिपिण्डमुपदेशः कार्यकारणभावावधारणहेतुरित्यभिमतं, किंवा व्यक्तिविशेषनिष्ठः स तद्धेतुरिति विकल्पद्वयम् । द्वितीयेऽपि व्यक्तिविशेषनिष्ठ उपदेशः किं तत्रैव कार्यकारणभावावधारकः, किं वा सार्वत्रिकतद्धेतुः । नाद्यः । तथा सति अनुपदिष्टे कारणत्वानवधारणेन अप्रवृत्तिप्रसङ्गात् । न द्वितीयः । विनैवैकेन निमित्तेनोपदेशाभावेऽपि व्यक्त्यन्तरे कारणत्वावधारणे रासभादेरपि तदवधारणप्रसङ्गेन व्यक्तिविशेषनिष्ठस्योपदेशस्यानुगतसामान्यावधारकतया सार्वत्रिकव्युत्पत्तिहेतुत्वस्यावश्याश्रवणीयत्वादनुगतसामान्यसिद्धिरिति नाप्रयोजकत्वं तस्येति द्वितीयपक्षदूषणं च अभिप्रेत्य आद्यपक्षदूषणं उक्तदूषणातिदेशेन दूषयति **उपदेशश्चेति** । तथा सति कार्यकारणभावावधारण एव पुरुषायुषपर्यवसानप्रसक्तेरित्यर्थः ।

**वा०र०—** अनुगतं सामान्यं विनैवेति सम्बन्धः । **विकल्पद्वयमित्यस्य** अभिप्रेत्येति वक्ष्यमाणेन सम्बन्धः । **द्वितीयेऽपीत्यस्येति** । द्वितीयदूषणं च इति वक्ष्यमाणेन अन्वयः ।

**स०व्र०— उक्तमिति** । व्युत्पत्तावेव पुरुषायुषपर्यवसानप्रसङ्गात् इत्यादिनोक्तमित्यर्थः ।

**॥ इति अनन्तेषु उपदेशासम्भवश्च ॥**

* * *

**॥ अथ च ततो व्याप्तिज्ञानानुपपत्तिः ॥**

२३१ **सु०— अपि च व्याप्तिज्ञानमप्यनुगतसामान्याभावेऽनुपपन्नं स्यात्, व्यावृत्तवस्तूनामन्वयव्यतिरेकावगमानुपपत्तेः ।**

**परि०— अन्वयव्यतिरेकावगमेति** । व्यक्तिविशेषापेक्षयाऽन्वयस्य रासभेऽपि सत्त्वात् एतत्तन्त्वभावे पटाभाव इति व्यतिरेकस्य तादृशव्यक्तिविशेषेऽनुपलम्भात् पटान्तरापेक्षया च व्यतिरेकस्याभावाच्च तदवगमानुपपत्तेरित्यर्थः । एवमग्न्यादावपि ज्ञेयम् । तथा च कार्यकारणानुमित्याद्ययोग इति भावः । **अन्वयव्यतिरेके**त्यस्य सहचारावगमानुपपत्तेरिति वार्थः । तत्साध्यत्वाद्व्याप्तिग्रहस्येति भावः ।

**यादु०—** नन्वनुगतसामान्याभावेऽपि व्यभिचारज्ञानाभावसहकृतमन्वयव्यतिरेकसहचारदर्शनमेव व्याप्तिज्ञानजनकं भविष्यतीत्यत आह **व्यावृत्तेति** । तेषामानन्त्येन ज्ञातुमशक्यत्वादिति भावः । केषाञ्चित् तदवगमस्तूक्तरीत्या व्यभिचारशङ्काकलङ्कितो न व्याप्तिज्ञानजनकः । अनुगतसामान्याङ्गीकारे तु धूमत्वादौ व्याप्त्यवच्छेदकतयोपदेशादिनाऽवगते यत्र यत्र तद्दर्शनं तत्र तत्र व्याप्त्यवधारणम् उपदेशाद्यभावेऽप्युपपद्यत इति ज्ञातव्यम् ।

**वं०प०— अन्वयव्यतिरेकेति** । व्याप्तीत्यर्थः ।

**शे०वा०— अनुगतेति** । व्याप्यव्यापकतावच्छेदकधूमत्ववह्नित्वाद्यनुगतसामान्येत्यर्थः । नन्वनुगतसामान्यस्य व्याप्तिग्रहणे नोपयोगं पश्याम इत्यप्रयोजकोऽयं तर्क इत्याशङ्क्य अन्वयव्यतिरेकाभ्यां वा उपदेशेन वा व्याप्तिर्ज्ञातव्या । अन्वयव्यतिरेकयोश्च गृहीतयोरेव तद्धेतुत्वम् । तद्ग्रहणं च उक्तरीत्या अनुगतसामान्यसापेक्षमेवेत्यन्वयव्यतिरेकग्रहणोपपादकतया अस्त्येव अनुगतसामान्यस्य तत्रोपयोग इत्यभिप्रेत्य अनुगतसामान्याभावे अन्वयव्यतिरेकग्रहणानुपपत्तिमाह **व्यावृत्तेति** । धूमत्ववह्नित्वाद्यनुगतधर्मशून्यानामित्यर्थः । उक्तरीत्या नियमव्यभिचारयोर्दुर्ज्ञानत्वादिति भावः । उपलक्षणं चैतत् । उपदेशेन व्याप्तिग्रहपक्षेऽपि पूर्ववदुपदेशस्य स्वातन्त्र्येण तद्धेतुत्वानुपपत्त्या धूमत्वादिसामान्यधर्मावधारकतयैव तद्धेतुत्वस्याङ्गीकर्तव्यत्वात् अस्त्येवानुगतसामान्यापेक्षेत्यपि द्रष्टव्यम् ।

**विट्ठल०**— नन्वनुगतसामान्याभावेऽपि व्याप्तिज्ञानं व्यभिचारज्ञानाभावसहकृतान्वयव्यतिरेकसहचार-दर्शनेन सम्भवतीत्यत आह **व्यावृत्तेति** । तेषामानन्त्येन ज्ञातुमशक्यत्वात् क्वचित्तदवगमेऽपि व्यभिचार-शङ्काकलङ्किततया न व्याप्तिर्गृहीतुं शक्या । अनुगतजात्यङ्गीकारे धूमत्वादौ व्याप्त्यवच्छेदकतयोपदेशादिनाऽवगते यत्र यत्र तद्दर्शनं तत्र तत्र व्याप्त्यवधारणमुपदेशाद्यभावेऽप्युपपद्यत इति भावः ।

**।। इति व्याप्तिज्ञानानुपपत्तिः ।।**

* * *

**।। अथ च तत्रान्ते सामान्यापवादन्यायानुपपत्तिः ।।**

२३२ **सु०— सामान्यापवादन्यायश्चानुगतसामान्याभावे न भवेत् । द्वयोः प्रमाणयोरेक-स्वरूपविषयत्वे (ह्य)त्वन्यतरस्याप्रामाण्यमेव स्यात् । भिन्नविषयत्वे नापवादविषयोऽस्ति । अस्ति च तावद्गौरयमित्यनुगताकारप्रत्ययः । न च असौ व्यावृत्तेषु सम्भवति, भ्रान्तत्व-प्रसङ्गात् । न चैतत्सर्वं अन्यापोहनिबन्धनम्, तस्यापि प्रतिपिण्डं व्यावृत्तत्वात् ।**

**अनुगतत्वे वा किमपराद्धं सामान्येन । तथा च विधिरूपः प्रत्ययोऽपि समाहितः स्यात् ।**

**परि०— सामान्यापवादेति** । 'न हिंस्यादि'ति हिंसात्वसामान्यमाश्रित्य प्रवृत्तं सामान्य-शास्त्रम्, 'अग्नीषोमीयं पशुमालभेते'ति विशेषविषयोऽपवाद इति न्यायो न स्यादित्यर्थः । तद्व्यनक्ति **द्वयोरिति** । सामान्यापवादप्रमाणयोरित्यर्थः । **नापवादविषयोऽस्तीति** । प्रसक्तिमत एवापवाद-विषयत्वाज्जात्याश्रयस्यैवापवादविषयेऽपि प्रसज्यमानत्वादिति भावः । अनुगतधर्माभावे बाधक-चतुष्टयमुक्त्वा तत्सत्त्वे प्रत्यक्षं च प्रमाणयति **अस्ति चेति** । **न च असाविति** । प्रतीतिसिद्धो-ऽनुगताकार इत्यर्थः । तथा च भ्रान्तत्वेत्यग्रेतनोक्तिरुपपन्ना । अन्यथा भ्रान्तित्वेत्युक्तिप्रसङ्गात् । **अन्यापोहः** अतद्व्यावृत्तिः ।

**गु०दी०**— द्वयोः प्रमाणयोरेकस्वरूपविषयत्वे इत्यत्र 'न हिंस्यात्सर्वा भूतानि', 'अग्नीषोमीयं पशु-मालभेते'ति वाक्ययोर्यागीयहिंसामात्रविषयत्वे सैव न कार्या कार्या च स्यात् । विरुद्धयोरुभयोः प्रामाण्ये वस्तुनि विकल्पप्रसङ्गादेकस्याप्रामाण्यं स्यादित्यर्थः । **भिन्नविषयत्वे नापवादविषयोऽस्ति** इत्यत्र अयमभिसन्धिः । अत्र एकं वाक्यं हिंसात्वसामान्यमादाय सकलहिंसाविषयम् । अग्नीषोमीयवाक्यं तु क्रतुहिंसामात्रविषयम् । अतः

निरवकाशापवादवाक्येन सावकाशं सामान्यवाक्यं क्रतुहिंसाव्यतिरिक्तहिंसास्वेव प्रवर्तत इति हि सामान्यविशेषाभावः । स च सर्वानुस्यूतसामान्याभावे कथं स्यादिति ।

**यादु०— सामान्यापवादेति** । उत्सर्गापवादन्याय इत्यर्थः । **द्वयोरिति** । उत्सर्गापवादप्रमाणयोरित्यर्थः । न हिंस्यात्सर्वभूतानीत्युत्सर्गप्रमाणम् । अग्नीषोमीयं पशुमालभेतेत्याद्यपवादप्रमाणम् । अनयोश्च यद्यग्नीषोमीयपशुहिंसारूपैकस्वरूपमात्रविषयकत्वं, तदाऽन्यतरस्याप्रामाण्यमेव स्यादित्यर्थः । **भिन्नविषयत्व इति** । यागीयहिंसातदितरहिंसाविषयकत्व इत्यर्थः । **नापवादविषय इति** । हिंसात्वादिसामान्यधर्मपुरस्कारेण प्रवृत्तोत्सर्गप्रमाणविषयत्वप्रसक्तिमानेवापवादप्रमाणविषयः प्रसिद्धः । न चासौ भिन्नविषयत्वे युक्त इत्यर्थः । तथा च अपवादविषयसिद्ध्यर्थमनुगतसामान्यमावश्यकमिति भावः । **भ्रान्तत्वेति** । अत्र भ्रान्तिर्भ्रान्तं, भावे क्तः । 'नपुंसके भावे क्त' इति भावेऽपि तस्य विधानादिति ज्ञातव्यम् ।

**वं०प०— असौ** अनुगतप्रत्ययः । **व्यावृत्तेषु** अननुगतैकैकव्यक्तिषु । कुतो न सम्भवतीत्यत आह **भ्रान्तत्वेति** । भावे क्तः । अनुगतप्रत्ययस्यानुगतनिमित्तविषयकत्वावश्यम्भावात् तदभावेऽपि अनुगतप्रत्ययाङ्गीकारे **तस्य** तद्विषयकप्रत्ययस्य भ्रमत्वं स्यादित्यर्थः । अतद्व्यावृत्तिरूपान्यापोहस्याभावरूपस्य निमित्तस्य सर्वत्र विधिरूपानुगतप्रत्ययनिमित्तत्वमनानुभाविकम् । भावरूपानुगतसामान्याङ्गीकारे तु नायं दोष इत्याह **तथा चेति** ।

**कं०रा०—** अनुगतसामान्याभावे सामान्यापवादन्यायानुपपत्तिं दर्शयति **द्वयोरिति** । **अन्यापोहनिबन्धनमिति** । अतद्व्यावृत्तिनिमित्तकमित्यर्थः । एवं विपक्षे बाधकमुक्त्वा साधकप्रमाणमाह **अस्ति च तावदिति** । **अन्यापोहनिबन्धनमिति** । अन्यव्यावृत्तिनिमित्तकमित्यर्थः । तथापि सामान्यनिबन्धनत्वं वाच्यावृत्तिनिबन्धननिरस्तमिति । कर्मविभागवतोरभेदेन एकार्थसमवायस्यैव सत्त्वादिति भावः ।

**श्रीनिधि०—एकस्वरूपविषयत्वेऽन्यतरस्याप्रामाण्यमेव स्यादिति** । 'न हिंस्यात् सर्वा भूतानी'त्युत्सर्गशास्त्रम् । 'अग्नीषोमीयं पशुमालभेतेति अपवादशास्त्रम् । अत्र जीवत्वलक्षणानुगतजात्यभावे अनयोः शास्त्रयोरेकविषयत्वं वा वक्तव्यं भिन्नविषयत्वं वा । आद्ये अन्यतराप्रामाण्यं वस्तुविकल्पासम्भवात् । द्वितीये त्वपवादविषयत्वासम्भवः । यस्मिन् उत्सर्गप्रमाणं प्रवर्तते तस्मिंश्चेत् प्रवृत्तं तद्विपरीतबोधकं प्रमाणं तदाऽपवादविषयत्वम्, अन्यथा घटोऽस्ति पटो नास्तीत्यत्राप्युत्सर्गापवादन्यायः स्यात् । न चाग्नीषोमीयपशौ उत्सर्गशास्त्रस्यावकाशोऽस्ति । यद्धर्मावच्छिन्ने हिंसाया अनिष्टसाधनत्वं बोध्यते, तस्यानुगतत्वेनैतन्निष्ठत्वाभावात् । अन्यथा घटेऽपि तत्प्राप्तिप्रसङ्गात् । अनुगतसामान्ये सति नायं दोषः । उत्सर्गशास्त्रप्राप्त्यवच्छेदकधर्मस्य तत्रापि सत्त्वात् । एवञ्च न शास्त्रयोरप्यप्रामाण्यम् । उत्सर्गशास्त्रस्य सामान्यविषयस्य तदतिरिक्ते प्रामाण्यसम्भवादिति समुदायार्थः । नन्वेवमपि न सङ्गतिः सर्वभूतमूर्तव्यक्तिषु ग्रहीतुं शक्यते । उपाधीनामनुगतत्वात् तच्चाननुगतधर्मघटितत्वात् । तथा हि । .... (ग्रन्थपातः) इत्यत आह **तथा च विधिरूप इति** ।

**शे०वा०— सामान्यापवादेति** । सामान्यस्योत्सर्गं प्रति विषयत्वादत्र सामान्यग्रहणेनोत्सर्गो लक्ष्यते । ततश्चोत्सर्गापवादेत्यर्थः । सामान्याभावेन तद्विषयकोत्सर्गासम्भवात् उत्सर्गापवादन्यायानुपपत्तेः । तयाऽप्यनुगतसामान्यसिद्धिरिति भावः । भवेदेतदेवं यद्युत्सर्गस्य सामान्यविषयत्वं स्यात् । न चैतदस्ति । अपवादविषयमात्रविषयत्वस्य तद्भिन्नविषयत्वस्य वा सम्भवेन तस्यानावश्यकत्वादित्यतस्तदुभयं निराकरोति **द्वयोः प्रमाणयोरित्यादिना** । 'न हिंस्यादि'त्युत्सर्गस्य, 'अग्नीषोमीयं पशुमालभेत' इत्यपवादस्य चाग्नीषोमीय-पशुहिंसारूपैकस्वरूपविषयत्वे विधिनिषेधयोरन्यतरस्याप्रामाण्यं स्यात् । न चैतद्युक्तम् । उभयोरपि प्रमाण-त्वादित्यर्थः । **भिन्नविषयत्व इति** । अग्नीषोमीयमित्यपवादप्रमाणस्य यागीयहिंसाविषयत्वं, 'न हिंस्यादि'-त्युत्सर्गस्य तदितरहिंसाविषयकत्वमिति भिन्नविषयत्व इत्यर्थः । **नापवादेति** । हिंसात्वादिसामान्यधर्मपुरस्कारेण प्रवृत्तोत्सर्गप्रमाणविषयत्वप्रसक्तिमानेव ह्यपवादप्रमाणविषयतया प्रसिद्धः । न चासौ भिन्नविषयत्वे सम्भवती-त्यतोऽपवादविषयसिद्ध्यर्थमुत्सर्गस्यानुगतसामान्यविषयत्वमवश्यं वाच्यमित्यनुगतसामान्यसिद्धिरिति भावः । एकाकारप्रत्ययान्यथाऽनुपपत्त्याऽपि अनुगतसामान्यसिद्धिरित्यभिप्रेत्य अनुगताकारप्रत्यये विप्रतिपद्यमानं प्रति तत्सद्भावमुपपादयति **अस्ति चेति** । प्रमितस्यापह्नवायोगादिति भावः । अस्त्वनुगताकारप्रत्ययस्तथाऽपि कथं तदनुपपत्तिरित्यतोऽनुगतसामान्यविषयत्वात् तस्योक्तरूपसामान्यसद्भाव एवोपपत्तेरित्यभिप्रेत्यानुगतसामान्याभावे तदसम्भवमाह **न च असाविति** । नन्वनुगतसामान्याभावेऽपि तद्विषयकोऽयं प्रत्ययः अस्तु को दोष इत्याशङ्क्य तथा सति भ्रान्तित्वप्रसङ्गः । न च इष्टापत्तिः । बाधकाभावेन तदसम्भवादित्याशयवानाह **भ्रान्तत्वेति** । भ्रान्तिर्भ्रान्तमिति 'नपुंसके भावे क्तः' इति भावे क्तप्रत्ययः । तस्य भावस्तत्त्वं, तत्प्रसङ्गात् भ्रान्तित्वप्रसङ्गादिति यावत् । ननु सर्वेष्वेव गोपिण्डेष्वगोभ्योऽश्वादिभ्यो व्यावृत्तिरस्ति । सैव गोशब्दप्रवृत्तिनिमित्तं तदवधारकतयैव चोपदेशादेर्व्युत्पत्तिहेतुत्वं भविष्यतीति न विधिरूपं गोवृत्तिसामान्यं विना व्युत्पत्त्यनुपपत्तिरिति न तयोक्तरूप-सामान्यसिद्धिः । एवमन्यव्यावृत्तिरेव नियमव्यभिचारग्रहसम्पादकतया अन्वयव्यतिरेकग्रहोपपादिका भविष्यतीति नानुगतसामान्यं विना कार्यकारणभावस्य व्याप्तेर्वाऽवधारणानुपपत्तिरिति न ताभ्यामप्यभिमतसामान्यसिद्धिः । अहिंसाव्यावृत्तिरूपधर्मपुरस्कारेणैव प्रवृत्तोत्सर्गप्रमाणविषयत्वप्रसक्तिमत्वेनापवादविषयत्वोपपत्तेः नोत्सर्गापवाद-न्यायानुपपत्तिरिति न तयाऽपि तत्सिद्धिः । अनुगतमतिरप्यतद्व्यावृत्त्यैवोपपद्यते । भवति हि गौरयमिति प्रतीतेरगोव्यावृत्तोऽयमिति विषयः । प्रतिवादिनाऽपि गोत्वादिविशिष्टप्रत्ययस्य तद्विषयत्वस्यैवाभ्युपगमात् । न हि तन्मते वैशिष्ट्यमतद्व्यावृत्तेरन्यदस्ति । तथा च नानुगताकारप्रत्ययेनापि तत्सिद्धिरित्यपोहवादिनो बौद्धस्य मत-माशङ्क्य निषेधति **न चेति** । भवेदेवमपोहाश्रयणेन व्युत्पत्त्यादेरन्यथोपपत्तिवर्णनम् । यद्यपोहस्य सर्वानुगतता स्यात् । न च सा अस्तीत्याह **तस्यापीति** । प्रतिपिण्डं भिन्नस्य तस्य न सार्वत्रिकव्युत्पत्त्याद्यङ्गत्वमिति भावः । नन्वनुगतत्वाङ्गीकारात् तस्य नेयमनुपपत्तिरित्यतः तथा सति नरत्वादेर्भिन्नाश्रितत्वसाधकधर्मत्वादेः अत्रैवानैकान्त्यप्रसङ्गादिति दोषे सत्येव दोषान्तरमाह **अनुगतत्वे वेति** । सामान्यस्यानुगतत्वपक्षे प्रसक्त-स्यानेकाश्रितस्य सामान्यस्याश्रयेणात्यन्ताभेदात् आश्रयाणामपि परस्परमभेदप्रसङ्गरूपदोषस्य, अपोहस्यानुगत-त्ववादे अनेकाश्रितस्यापोहस्याश्रयेणात्यन्ताभेदादाश्रयाणामपि परस्परमभेदप्रसङ्ग इत्येवं समानतया सामान्य-

परित्यागेनापोहवादाश्रयणे विशेषहेत्वभावादित्यर्थः । तर्हि तत एवापोहपरित्यागेन सामान्यपरिग्रहोऽपि तव किं निबन्धन इत्यत आह **तथा चेति** । **विधीति** । एकाकारस्य विधिरूपेण यः प्रत्ययः सोऽपीत्यर्थः । प्रत्यये-नानुगताकारस्य विधिरूपत्वसिद्धे अपोहस्य निषेधरूपतया तदयोगादनुगतप्रकारप्रत्ययविषयतया नासावङ्गीकर्तुं शक्यत इति विधिरूपं गोवृत्तिगोत्वमेव तथाऽभ्युपगम्यत इति भावः ।

**वा०र०— सामान्यस्योत्सर्गं प्रतीति** । 'जात्या तेषु त्रिषु स्मृतमि'त्येतत् तत्त्वनिर्णयस्थवाक्य-व्याख्यावसरे जातेरुत्सर्गविषयत्वाज्जातिशब्देनोत्सर्गं लक्ष्यत इति प्रतिपादितम् । तट्टीकायां ग्रन्थकृतोत्सर्ग-प्रतीत्याद्युपपादनमत्र एवं कृतमस्तीति ज्ञेयम् । अनुगतसामान्यविषयत्वमवश्यं वाच्यमिति भाव इत्येव स्वरसः पाठः । अथवोपसंहारार्थमनुगतसामान्यसिद्धिरित्यधिकोक्तिरिति ज्ञेयम् । **इत्यपोहवादिनो बौद्धस्य मतमिति** । एतेन अपोहवादस्य सिद्धान्तिना अनङ्गीकारात् तद्रीत्या शङ्का कथमिति शङ्का निराकृता वेदितव्या । सामान्या-द्भिन्नं परमत इत्यादि अखण्डत्वोक्त्या तद्भिन्नत्वे सतीत्यादिरूपेण निर्वचनं नावश्यकमिति सूचयता पूर्वोक्ता-निर्वचनानुपपत्तिशङ्काऽनवकाशेति ज्ञापितम् । ययोर्यदन्योन्याभावे इत्यादिरूपेण सादृश्यनिर्वचनं यत् तत्रास्माभिः कृतं तदभ्युच्चयेनेति न दोषः ।

**स०व्र०— भ्रान्तत्वेति** । भ्रान्तिः **भ्रान्तम्** । नपुंसके भावे क्तः । तस्य भावः तत्त्वम् । अनुगता-कारप्रत्ययस्य अनुगतप्रवृत्तिनिमित्तविषयकत्वात् । तदभावे तत्प्रत्ययस्य भ्रमत्वप्रसङ्गादित्यर्थः ।

**विठ्ठल०— सामान्यापवादेति** । उत्सर्गापवादन्याय इत्यर्थः । 'न हिंस्यादि'ति हिंसानिषेध-प्रतियोगिभूतं हिंसात्वसामान्यमाश्रित्य प्रवृत्तमुत्सर्गशास्त्रम् । 'अग्नीषोमीयं पशुमालभेते'ति हिंसात्वसामान्य-स्याङ्गीकारे द्वयोरुत्सर्गापवादप्रमाणयोरग्नीषोमीयपशुहिंसालक्षणैकस्वरूपमात्रविषयत्वापत्त्या परस्परविरोधेनान्यतरा-प्रामाण्यमेव स्यादित्यर्थः । ननु 'न हिंस्यादि'त्येतत् हिंसानिषेधविषयकम् अग्नीषोमीयमिति तु यागीयहिंसा-कर्तव्यतापरमि'ति द्वयोर्वाक्ययोर्भिन्नविषयकत्वान्नान्यतराप्रामाण्यमित्यत आह **भिन्नविषयत्व इति** । उत्सर्ग-प्रमाणप्रसक्तविषयैकदेशेऽन्यथात्वप्रतिपादकमपवादप्रमाणम्, अत्यन्तभिन्नविषयत्वे तु अपवादविषयत्वं नास्तीति तत्सिद्ध्यर्थमनुगतसामान्यमवश्यमङ्गीकार्यमिति भावः । एवमनुगतसामान्यानङ्गीकारे बाधकमभिधाय तत्सत्त्वे प्रत्यक्षं प्रमाणमाह **अस्ति चेति** । **न च असाविति** । गौरवमित्यनुभवसिद्धोऽनुगताकार इत्यर्थः । **भ्रान्तत्वेति** । भिन्नभिन्नेषु गोष्वनुगतधर्माभावे प्रतीयमानानुगताकारस्य शुक्तिरजतवद्भ्रान्तत्वप्रसङ्गादित्यर्थः । यद्वा न चासा-वित्यनुगताकारप्रत्यय इत्यर्थः । **भ्रान्तत्वेति** । भावे क्तः भ्रान्तित्वप्रसङ्गादित्यर्थः । अन्यापोहस्याप्यनुगतत्वात् किं सामान्यपक्षपातेनेत्यत आह **विधिरूप इति** । अन्यापोहनिबन्धनत्वे अघटव्यावृत्त्यादेर्निषेधरूपत्वेन घटोऽयं घटोऽयमिति विधिमुखप्रतिषेधोऽनुपपन्नः स्यात् । सामान्यनिबन्धनत्वे तु समाहितः स्यादिति भावः ।

**चषक— अन्यापोहनिबन्धनं** अतद्व्यावृत्तिनिबन्धनम् ।

**॥ इति सामान्यापवादन्यायानुपपत्तिः ॥**

**॥ इति तत्सामान्यनिराकृतेरयुक्तत्वशङ्का ॥**

॥ अथ तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे गोत्वादेः नित्यत्वमपि अनिवार्यम् इति च शङ्का ॥

२३३ **सु०— एवञ्चाङ्गीकार्ये गोत्वादेरनुगमे नित्यत्वमप्यनिवार्यम् ।**

**परि०— नित्यत्वमपीति** । एकव्यक्तिनाशेऽपि व्यक्त्यन्तरे दर्शनादिति भावः ।

**यादु०— नित्यत्वमपीति** । एकव्यक्तिनाशेऽप्यन्यत्र तदवस्थानसम्भवादिति भावः ।

**श्रीनिधि०— नित्यत्वमप्यनिवार्यमिति** । अनुगमो हि अतीतानागतव्यक्तिनिष्ठस्यैक्ये सति युज्यते । न चानित्यत्वे तद्युज्यते । न ह्युत्पत्स्यमानोत्पन्नयोरैक्यं युज्यत इत्यर्थः ।

**शे०वा०— नित्यत्वमनिवार्यमिति** । व्यक्तौ नष्टायामपि जातेरनुभूयमानत्वादनित्यत्वे तदयोगान्नित्यत्वसिद्धिरिति भावः ।

**विट्ठल०— नित्यत्वमपीति** । एकव्यक्तिनाशेऽपि व्यक्त्यन्तरे गोत्वादिदर्शनादिति भावः ।

॥ इति तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे गोत्वादेः नित्यत्वमपि अनिवार्यम् इति च शङ्का ॥

* * *

॥ अथ तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे उक्तशङ्कानिराकरणम् ॥
॥ अथ तत्रादौ सामान्यानुगतत्वाभावेऽपि व्युत्पत्त्यादेः साध्येनैव गम्यत्वम् ॥

२३४ **सु०— इत्यत आह व्युत्पत्तिरपीति ।**

## अनु०— व्युत्पत्तिरपि हि सादृश्येनैव गम्यते ।

**अपिपदं कार्यकारणभावावधारणादिसमुच्चयार्थम् । हिशब्दो यस्मादित्यर्थे । गम्यते अभ्युपगम्यतेऽवगम्यत इति वा ।**

**अस्ति तावत्सादृश्यं नाम पदार्थान्तरम्, गोसदृशो गवय इत्याद्यध्यक्षसिद्धत्वात् । तेनैव चोपपद्यते व्युत्पत्त्यादिकम् । तस्मान्न तदर्थं गोत्वादेरनुगतत्वं कल्पनीयम् ।**

**परि०— अवगम्यत इति वेति** । सादृश्येन शब्दशक्त्यादिकमनुमेयमित्यर्थः । यदि अवयवगुणकर्मवृत्तिसामान्यान्येव सादृश्यं, तदा किमधिकमाचीर्णमित्यत आह **पदार्थान्तरमिति** ।

**यादु०—** नन्वनुगतसामान्याभावे सादृश्यस्याप्यभावः 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यत' इत्युक्तत्वेन गोगवययोर्गुणावयवकर्मगतसामान्यानामेव सादृश्यरूपत्वादित्यत आह **पदार्थान्तरमिति** । सामान्यभिन्नमित्यर्थः । नन्वेवं सादृश्यस्य न निर्वचनं सम्भवति । धर्ममात्रस्य प्रातिस्विकतया तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपस्य निर्वचनस्यासम्भवात् । तद्धर्मसदृशधर्मवत्त्वरूपस्य चात्माश्रयेण दुष्टत्वादिति चेत् । सत्यम् । परमते सामान्यमिवास्मन्मते सादृश्यमखण्डमेवाङ्गीकार्यमिति साम्प्रदायिकाः । अन्ये तु गणनव्यवहारासाधारणकारणं सङ्ख्येत्यादाविव सदृशप्रतीतिविषयत्वमेव सादृश्यमिति तन्निर्वचनेऽपि न दोष इत्याहुः ।

**शे०वा०—** मूले अपिपदानर्थक्यमाशङ्क्य कार्यकारणभावावधारणादिसमुच्चयार्थत्वान्न तदिति भावेन तदर्थतया अपिशब्दं व्याचष्टे **अपिपदमिति** । आदिपदेन व्याप्तिज्ञानादिपरिग्रहः । मूले हिशब्दस्य तत् आशङ्क्य एतद्वाक्यार्थस्य हेतुत्वसूचनार्थत्वान्न तदिति भावेन हिशब्दं तदर्थतया व्याचष्टे **हिशब्द इति** । उपसर्गा हि धातुलीनस्यार्थस्य व्यञ्जका एवेति मतमाश्रित्य गम्यत इत्येतद्व्याचष्टे **गम्यतेऽभ्युपगम्यत इति** । अभ्युपगममात्रस्य वस्तुव्यवस्थापकत्वाभावान्न तेन व्युत्पत्त्यादेरन्यथैवोपपत्तिसिद्धिरिति तदर्थैकैवशब्दानुपपत्तिमाशङ्क्य तदुक्तान्यथैवोपपत्तिसिद्ध्यर्थं गम्यत इत्येतत्प्रकारान्तरेण व्याचष्टे **अवगम्यत इति वेति** । ननु प्रमाणाभावात् सादृश्यमेव नास्ति । सत्त्वेऽपि वा सिद्धान्ते तदनुपपत्तिरेव । तथा हि । न तावत् 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यत' इत्युक्तरीत्या गोगवययोर्गुणावयवकर्मगतसामान्यान्येव सादृश्यमिति वक्तुं शक्यम् । अनुगतसामान्यानभ्युपगमात् । नापि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, धर्ममात्रस्य प्रातिस्विकताङ्गीकारेण गोगवययोः परस्परगतधर्मवत्त्वाभावेन सादृश्याभावप्रसङ्गात् । तद्गतधर्मशब्देन तद्गतधर्मसदृशधर्माभिधाने च स्फुटमात्माश्रयत्वम् । तत्कथं सादृश्येन व्युत्पत्त्यादेरन्यथोपपत्तिवर्णनमित्यतः प्रमाणोपन्यासेन तत्सद्भावं तावदाह **अस्ति तावदिति** । सामान्यात् भिन्नं परमते सामान्यादिवदखण्डमेव सादृश्यमित्यङ्गीकारान्न सिद्धान्ते तदनुपपत्तिरपीत्याशयेनोक्तं **पदार्थान्तरमिति** ।

**स०व्र०—** ननु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमित्येवंरूपसादृश्यस्य भवन्मतेऽसम्भवात् कथं तेन शक्तिग्रहः । तथा हि धर्ममात्रस्य प्रातिस्विकत्वेन तद्गतधर्मवत्त्वाभावात् । तत्सदृशधर्मवत्त्वे चात्माश्रयापातादित्यतो नेदं सादृश्यलक्षणं किं त्वन्यदेवेत्याह **अस्ति तावदिति** । तथा च गणनव्यवहारासाधारणकारणं सङ्ख्येत्यादाविव सदृशप्रतीतिविषयत्वमेव सादृश्यमित्यत्रापि नात्माश्रयत्वम् ।

**विठ्ठल०—** नन्वनुगतसामान्यातिरिक्तसादृश्यसिद्धे तेन व्युत्पत्त्याद्युपपत्तिः स्यात् । न चैतदस्ति । 'सामान्यान्येव भूयांसि गुणावयवकर्मणाम् । भिन्नप्रधानसामान्यवृत्ति सादृश्यमुच्यत' इत्युक्तत्वेन गोगवयादि-

गतगुणावयवकर्मगतसामान्यानामेव सादृश्यरूपत्वादित्येतत् आह **पदार्थान्तरमिति** । अस्तु वा सादृश्यं नाम सामान्यभिन्नं पदार्थान्तरं तथाप्यनुगतसामान्याभावः कुत इत्यत आह **अस्ति तावदिति** । **अध्यक्षसिद्धत्वादिति** । सामान्यभिन्नतयेति शेषः । कल्पनीयमित्यतःपरं कल्पकाभावेन गौरवप्राप्तेरिति शेषः । ननु किमिदं सादृश्यं नाम न तावत्तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, 'भिन्नाश्च भिन्नधर्माश्चे'त्युक्तेरन्यगतधर्माणामन्यत्र सत्त्वाभावात्, नापि सदृशधर्मत्वम् आत्माश्रयप्रसङ्गात्, नापि सदृशाविमाविति प्रतीतिविषयत्वम् उक्तदोषानतिवृत्तेः, नाप्यखण्डवस्त्वन्तरं, 'न चानवयवं वस्त्वि'ति कस्याप्यखण्डस्यास्माभिरङ्गीकारादिति चेत् एकप्रकारगुणोपादानादिना शिष्टसङ्ख्यानोपेततया प्रतीयमानत्वं सादृश्यमित्यनुभवसिद्धत्वात् । न चैकप्रकारेति कोऽर्थः । अभिन्नप्रकारेति वा सदृशप्रकारेति वा । नाद्यः, भिन्नत्वस्य प्रमितत्वात् । द्वितीये स्फुट आत्माश्रयः इति चेत्सत्यम् । यथा देशस्य विभुत्वं सर्वदेशगतत्वं सर्वकालगतत्वमित्यादौ नात्माश्रयो दूषणं प्रकारान्तरेण बोधयितुमशक्यत्वात् तथा साक्षिसिद्धत्वाच्च, तथा सादृश्यमप्यनुभवसिद्धं परन्तु तद्बोधनमात्रं तद्घटितमित्यदोष इति साम्प्रदायिका मन्यन्त इति ।

**चषक— अवगम्यते** सादृश्येन शब्दशक्त्यादिकमनुमीयते । **पदार्थान्तरम्** । अवयवगुणकर्मवृत्तिसामान्यातिरिक्तम् । अत्र व्याकर्तारः निखिलधर्माणां प्रातिस्विकतया तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपस्य, आत्माश्रयप्रसङ्गेन तद्धर्मसदृशधर्मवत्त्वरूपस्य च सादृश्यस्य दुर्वचत्वेऽपि न्यायनये सामान्यवदखण्डमेव सादृश्यमङ्गीकार्यमिति न्यभान्त्सुः ।

* * *

**॥ अथ तत्रापि सादृश्येन शब्दव्युत्पत्तिप्रकारप्रदर्शनम् ॥**
**॥ अथ तत्राप्यादौ 'अयं गौः' इत्यादिवाक्यस्य सादृश्यमुखेन व्याप्तिपरत्वम् ॥**

२३५ **सु०— सादृश्येन तावत् शब्दव्युत्पत्तिप्रकारं दर्शयितुमुपक्रमते सर्वेष्विति ।**

## अनु०— सर्वेषु युगपच्छब्दः सदृशेषु प्रवर्तते ।

**बहवो हि शब्दसङ्गतिग्रहणोपायाः । तत्र यदोपदेशतो व्युत्पद्यते तदाऽयं गौरित्युपदेशवाक्यं व्याप्तिग्राहकतयोपयुज्यते । कथम् । सादृश्योपधानेन सर्वेषु गोपिण्डेषु, युगपद् एककालम्, अयमित्यादिशब्दः, प्रवर्तते । 'अयं गौरि'त्यस्य अयमेतत्सदृशाः सर्वेऽपि गोशब्दवाच्या इत्यर्थो वक्त्रा अभिप्रेयते, श्रोत्रा च अवधार्यत इति यावत् । द्वयोरपि सार्वत्रिकव्युत्पत्तिकामत्वेन वाक्यस्यैकपिण्डविषय(क)त्वकल्पनानुपपत्तेरिति भावः ।**

**परि॰— बहवो हीति** । 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्युक्तदिशा व्याकरणादयो बहव इत्यर्थः । **उपदेशत इति** । आप्तवाक्यरूपादित्यर्थः । **सादृश्योपधानेनेति** । सादृश्यरूपनिमित्तेनेत्यर्थः ।

**यादु॰— बहवो हीति** । 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्युक्तेरिति भावः । **सादृश्योपधानेनेति** । सादृश्यरूपनिमित्तेनेत्यर्थः । तथा चायमितिशब्दस्य सन्निहितगवि मुख्यैव वृत्तिरसन्निहितगोषु गौणी, सादृश्येन निमित्तेन प्रवृत्तत्वादित्युक्तं भवति । युगपद्वृत्तिद्वयविरोधश्च नास्मन्मते दोष इति भावः । **श्रोत्रा चेति** । यष्टीः प्रवेशयेत्यादाविव प्रकरणबलादिति भावः । **सार्वत्रिकेति** । श्रोतुर्मम सार्वत्रिकव्युत्पत्तिर्भूयादिति कामनावत्त्वेन वक्तुरप्यस्य सार्वत्रिकव्युत्पत्तिर्भवत्विति कामनावत्त्वेनेत्यर्थः । अनेन तात्पर्यानुपपत्तिरमुख्यवृत्त्याश्रयणे बीजभूतोपपादिता भवतीति ज्ञातव्यम् ।

**वं॰प॰— बहवो हीति** । 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्युक्तेरिति भावः । **उपदेशतः** आप्तवाक्यादित्यर्थः ।

**श्रीनिधि॰— सादृश्योपधानेनेति** । सादृश्यलक्षणव्याप्तिनिरूपकगर्भीकारेणेत्यर्थः । ननु शब्दः प्रवर्तत इति कथं, प्रवृत्तेश्चेतनधर्मत्वादित्यत आह **अयं गौरितीति** । ननु अयं गौरित्यस्य किमेतदर्थाभिप्रायत्वकल्पकमित्यत आह **द्वयोरपीति** । तथा चायमित्येतत् स्वार्थमजहल्लाक्षणिकमिदमेव च तद्बीजमित्युक्तं भवति ।

**शे॰वा॰—** ननु सर्वेष्वित्युत्तरवाक्यमनर्थकम् । न चोपदेशस्य व्याप्तिग्राहकतामुपदर्शयितुं तदिति वाच्यम् । तदुपदर्शनस्य प्रकृतानुपयोगादित्याशङ्क्य 'व्युत्पत्तिरपि ही'ति पूर्ववाक्यप्रतिज्ञातस्य सादृश्येन व्युत्पत्तिभवनप्रकारस्योपदर्शनाय तदुपक्रमरूपत्वात् तस्य न तदिति भावेन तदुपक्रमरूपतया तद्योजयति **सादृश्येनेति** । उपक्रमे उपदेशस्य व्याप्तिग्राहकत्वोक्त्या प्रसक्तां भाष्ये तन्मात्रस्य शब्दसङ्गतिग्रहणोपायत्वभ्रान्तिं तदुपायानेकत्वकथनेन तावत्परिहरति **बहवो हीति** । 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' इत्यादिप्रसिद्धिद्योतनार्थो हिशब्दः । तर्ह्युपदेशस्य व्याप्तिग्राहकत्वोक्तिर्भाष्यकारीया अनुपपन्ना स्यादित्यतो भवेदेवं यदि सा उपदेशमात्रस्य सङ्गतिग्रहणोपायत्वाभिप्राया स्यात् । न चैवम् । उपायानेकत्वस्य प्रमितत्वेन तदयोगात् । किन्त्वन्याभिप्रायैवेत्यतो नानुपपत्तिरित्यभिप्रेत्य तदुक्तेरभिप्रायमाह **तत्रेति** । बहुषु उपायेषु । व्यक्तिविशेषस्य गोशब्दवाच्यत्वपरतया प्रतिभासादुपदेशस्य व्याप्तिग्राहकत्वं न सम्भवतीति भाष्यकारीयं तद्वर्णनमनुपपन्नमित्याशयेन पृच्छति **कथमिति** ।

उपदेशवाक्यस्थस्यायमित्यादेर्व्यक्तिविशेषनिष्ठत्वाभावात् तद्ग्राहकत्वोपपत्तिरिति भावेनायं गौरित्युपदेशवाक्यस्य व्याप्तिग्राहकत्वोपपादकतया भाष्यं योजयति **सादृश्योपधानेनेति** । तेन निमित्तेनेत्यर्थः । तथा चायमिति शब्दस्य सन्निहिते गवि मुख्यैव वृत्तिः । असन्निहितगोव्यक्तिषु सादृश्येन निमित्तेन प्रवृत्तत्वाद्गौणी । युगपद्वृत्तिद्वयविरोधश्च न दूषणमित्युक्तं भवति । तथाऽप्युपदेशस्य कथं व्याप्तिग्राहकत्वसिद्धिरित्यतः तत्तात्पर्यमाह **अयं गौरित्येतस्येति** । ननु नायमित्यादेर्गौण्याऽसन्निहितपिण्डपरत्वं सम्भवति । तन्निमित्तभूताया अन्वयानुपपत्तेरभावेन गौण्याश्रयणस्यानुचितत्वादित्यतो अन्वयानुपपत्तिरेव न तत्र निमित्तम् । तथा सति यष्टीः प्रवेशयेत्यादौ तदभावेन लक्षणाभावप्रसङ्गात् । किन्तु क्वचित्तात्पर्यानुपपत्तिरपि । तथा च इह अन्वयानुपपत्तेः अभावेऽपि तात्पर्यानुपपत्तेः सद्भावाद्युक्तममुख्यवृत्त्याश्रयणमित्यभिप्रेत्य तात्पर्यानुपपत्तिमुपपादयति **द्वयोरिति** । वक्तृश्रोत्रोरित्यर्थः । **सार्वत्रिकेति** । श्रोतुर्मम सार्वत्रिकव्युत्पत्तिर्भवत्विति कामनावत्त्वेन वक्तुरप्यस्य सार्वत्रिकव्युत्पत्तिर्भवत्विति कामनावत्त्वेनेत्यर्थः ।

**स०व्र०— द्वयोरपीति** । वक्तृश्रोत्रोरित्यर्थः । श्रोतुः सार्वत्रिकव्युत्पत्तिकामत्वात्, वक्तुरपि अस्य सार्वत्रिकव्युत्पत्तिर्भवतु इति कामनाया विद्यमानत्वादिति भावः ।

**विट्ठल०—** नन्वयं गौरित्युपदेशरूपशब्दस्य सर्वगोविषयत्वं कुतोऽङ्गीकरणीयमित्याशङ्क्य व्याकरणादेरपि व्युत्पत्तिसाधनत्वान्मूले शब्द इत्युपदेशग्रहणमुदाहरणत्वेनेति सूचयन् व्याख्याति **बहवो हीत्यादिना** । 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा' इत्युक्तेर्बहव इत्यर्थः । कोशोऽभिधानम् । आप्तवाक्यमुपदेशः । तत्पदघटितवाक्यस्य शेषाद्विवृतेर्वर्णनात् सिद्धस्य व्युत्पन्नपदस्य तद्वाक्यसान्निध्यत इत्यर्थः । नन्वयं गौरिति वाक्यस्य सन्निहितगोव्यक्तिमात्रविषयत्वे कथं यो यो सास्नादिमान् स सर्वोऽपि गोशब्दवाच्य इति व्याप्तिग्राहकतेत्याक्षिपति **कथमिति** । अयमिति शब्दस्य न सन्निहितव्यक्तिमात्रपरत्वं किं तु अयमेतत्सदृशाश्च सर्वेऽपीत्येवम्परत्वमेव अतो व्याप्तिग्राहकतयोपयुज्यत इत्युक्तमुपपन्नमित्याशयेन समाधत्ते **सादृश्योपधानेनेति** । सादृश्यरूपनिमित्तेनेत्यर्थः । **द्वयोरपीति** । श्रोतुर्मम सार्वत्रिकव्युत्पत्तिर्भूयादिति कामनावत्त्वेन वक्तुरप्यस्य सार्वत्रिकव्युत्पत्तिर्भवत्विति कामनावत्त्वेनेत्यर्थः ।

**चषक— सादृश्योपधानेन** सादृश्यरूपनिमित्तेन । तथाच अयमिति शब्दस्य सन्निहिते गवि मुख्यैव वृत्तिरसन्निहितगोव्यक्तिषु सादृश्येन निमित्तेन प्रवृत्तत्वाद्गौणी । युगपद्वृत्तिद्वयविरोधश्च सिद्धान्ते नेति न क्षतिरिति भावः ।

**॥ इति 'अयं गौः' इत्यादिवाक्यस्य सादृश्यमुखेन व्याप्तिपरत्वम् ॥**

* * *

॥ अथ तत्र ततस्तथात्वेऽपि तटस्थस्य चोद्यं तत्परिहारश्च
(पिण्डविशेषे लिङ्गप्रकरणबलात् कार्यप्रतिपत्तिः इति) ॥

२३६ **सु०—** यदि 'अयं गौः' इत्यादिवाक्यं नैकपिण्डमात्रविषयम्, किन्तु 'अयं चैतत्सदृशाश्च सर्वे गोशब्दवाच्याः' इति व्याप्तिपरं तदा सङ्गतिग्रहणोत्तरकालं 'गामानय' इत्युक्ते गोशब्दात्सर्वगोप्रतिपत्तिः स्यात् । अभीष्टगोप्रतिपत्तिस्तु जायते 'सा कथमि'ति तटस्थस्य चोद्यं परिहरति **तथाऽपीति** ।

## अनु०— तथाऽपि प्राप्तितस्त्वेकवचनाच्च विशेषतः । अभीष्टावगतिश्च स्यात्

यद्यप्युपदेशो नैकपिण्डविशेषगोचरः **तथाऽपि** गामानयेत्युक्ते **अभीष्टगोपिण्डावगतिः स्यात्** एव । कथम् । **प्राप्तितः** योग्यत्वात् । अतीतानागतानाम् अत्यन्तविप्रकृष्टदेशस्थानां गवाम् आनयनयोग्यताऽभावमालोच्य तत्परित्याग इत्यर्थः । तर्हि सन्निहितसर्वगोप्रतिपत्तिः कुतो न भवतीति चेन्न, गामिति **एकवचनात्** । 'तथापि यस्य कस्यचिदेकस्य गोपिण्डस्य प्रतिपत्तिः स्यात्, नाभीष्टस्यैवे'ति चेन्न, शबलां बहुलां कालाक्षीमित्यादि**विशेषणात्** ।

एतदुक्तं भवति । गोशब्दाद्भवत्येव सर्वगोप्रतिपत्तिः, किन्तु लिङ्गप्रकरणादिबलात्पिण्डविशेषे कार्यप्रतिपत्तिरिति ।

**परि०— एतत्सदृशा** इत्यस्यायमेतत्सदृशश्चेत्यर्थो ध्येयः । सामान्यप्रत्यासत्तिवादिनं प्रतीदं चोद्यं सममिति वा शक्त्याद्यग्रहचोद्यसमाधिप्रस्तावे एतच्चोद्यसमाध्योर्विजातीयत्वात् **तटस्थस्य चोद्यमित्युक्तम्** । **विशेषत** इत्यस्यार्थः **इत्यादिविशेषणादिति** । **लिङ्गप्रकरणादीति** । शबलत्वादिलिङ्गेत्यर्थः । आदिपदेन सान्निध्ययोग्यत्वादिग्रहः । **कार्येति** । आनयनबन्धनादिकार्यप्रतिपत्तिरित्यर्थः ।

**यादु०— तटस्थस्येति** । वैशेषिकमते शक्तिग्रहकाले गोत्वसामान्यलक्षणया सर्वगोव्यक्त्युपस्थितौ तत्र सर्वगोशब्दसङ्गतेर्गृहीतत्वेनास्याः शङ्कायास्तेनापि समाधेयत्वान्न तस्येयं शङ्केति भावः । **कार्यप्रतिपत्तिरिति** ।

कृतिसाध्यानयनादिप्रतिपत्तिरित्यर्थः । अनेन असन्निहितपिण्डेष्वानयनं कृत्यसाध्यमिति तत्परित्याग इति सूचयति ।

**वं०प०— बहुलां** कपिलाम् । 'बहुला कपिला धेनुरि'त्यमरः । **कार्यप्रतिपत्तिरिति** । आनयनादेः कर्तव्यताप्रतिपत्तिरित्यर्थः ।

**कं०रा०— तटस्थस्येति** । अनुगतसामान्यमस्तीति वैशेषिकमतेऽपि सङ्गतिग्रहणस्य सर्वगोपिण्डविषयतया गामानयेतिशब्दादभीष्टगोप्रतिपत्तिः न स्यात् किन्तु सर्वगोप्रतिपत्तिः स्यादिति चोद्यस्य साम्येन तच्चोद्यत्वायोगात् **तटस्थस्य चोद्यं** इत्युक्तम् । **कार्यप्रतिपत्तिरिति** । आनयनादिरूपकार्यप्रतिपत्तिरित्यर्थः ।

**श्रीनिधि०—** "वादिना नैवं शङ्कितुं शक्यम् । तेनापि समाधेयत्वात् । यथोक्तम् । यश्चोभयोः समो दोषः परिहारोऽपि वा समः । नैकः पर्यनुयोक्तव्यः तादृगर्थविचारण" इति । **अतस्तटस्थस्य चोद्यमि-त्युक्तम्** । **शबलामिति** । शबलं वर्णविशेषः । **बहुलामिति** । बहुलं वृष्टिः । **कालाक्षीमिति** । काष्ण्र्ययुक्ताक्षिणीमित्यर्थः । **पिण्डविशेषे कार्यप्रतिपत्तिरिति** । पिण्डविशेषविषयकानयनादिप्रतिपत्तिरित्यर्थः ।

**शे०वा०—** ननु तथाऽपीत्युत्तरभाष्यमनर्थकम् । न च गामानयेत्यादिवाक्यस्याभीष्टावगमकत्वव्युत्पादनार्थं तदिति वाच्यम् । तद्व्युत्पादनस्याप्यनर्थकत्वात् । न चोक्तरीत्या गोशब्दस्य सकलगोपिण्डेषु सङ्गतिग्रहणाभ्युपगमे तदुत्तरकालं गामानयेत्युक्ते गोशब्दात् सर्वगोव्यक्त्युपस्थित्या सर्वत्र कार्यप्रतीतिप्रसङ्गेन पिण्डविशेषे कार्यप्रतिपत्त्यनुपपत्तिशङ्कापरिहारार्थत्वात् तद्व्युत्पादनमर्थवदिति वाच्यम् । तथा सति पूर्ववादिमतेऽपि सङ्गतिग्रहणकाले गोत्वसामान्यलक्षणप्रत्यासत्त्या सर्वगोव्यक्तीनामुपस्थित्या सर्वोपसंहारेणैव सङ्गतिग्रहणात् तदुत्तरकालं गामानयेत्युक्ते गोशब्दात् सर्वगोव्यक्तीनामुपस्थित्या सर्वत्र कार्यप्रतिपत्तिप्रसङ्गेन पिण्डविशेषे तदनुपपत्तिप्रसङ्गस्य तुल्यत्वेन तस्योभयसमाधेयतया तेनोक्तविधयाऽतिप्रसङ्गशङ्कायाः कर्तुमशक्यत्वेन तत्परिहारार्थत्वायोगादित्यतः प्रतिवादिनस्तथा शङ्काया असम्भवेऽपि तटस्थस्य तच्छङ्कायाः सम्भवेन तत्परिहारार्थतया न तदानर्थक्यमिति भावेन तटस्थशङ्कानिवर्तकतया तद्योजयितुं तामुत्थापयति **यदीति** । ननु च गामानयेत्यादौ गोशब्दात् सर्वगोप्रतीतिरिष्टैवेति न तदापादनं युक्तमित्यतः तथा सति सर्वत्र कार्यप्रतिपत्तिप्रसङ्गेन व्यक्तिविशेष एव तदनुपपत्तिप्रसक्तिरिति भावेन पिण्डविशेषे कार्यप्रतिपत्त्यनुपपत्तिमाह **अभीष्टेति** । अभीष्टगोपिण्डावगतिरित्यादौ सर्वत्रायमेवार्थः । ननु नानेन भाष्येणोक्तशङ्कापरिहारः । प्रसिद्धस्योक्तावगतिकरणस्यात्रानुपन्यासादित्यतो यद्यप्युपदेशो नैकपिण्डगोचरो यद्यपि च सङ्गतिग्रहणोत्तरकालं गामानयेत्युक्ते गोशब्दात् सर्वगोप्रतिपत्तिरेव भवति, तथापि **अभीष्टावगतिः** पिण्डविशेषे कार्यप्रतिपत्तिर्युज्यत एवेति मूलयोजनामभिप्रेत्योक्तशङ्कापरिहारं भाष्यारूढतया दर्शयति **एतदुक्तं भवतीति** । **गोशब्दादिति** । तथा च तदापादनमिष्टापादनत्वान्नायुक्तमिति भावः । तर्हि सर्वत्र कार्यप्रतिपत्तिप्रसङ्गेन व्यक्तिविशेष एव तदनुपपत्तिः स्यादित्यभिप्रेत्य पृच्छति **किन्स्विति** । मूले

प्राप्ति इत्याद्यनेकविशेषणसूचितहेतुबलात् तदुपपत्तिरिति समाधत्ते **लिङ्गेति** । अभीष्टावगतिरित्यस्य विवरणं **पिण्डविशेषे कार्यप्रतिपत्तिरितीति** । आनयनप्रतिपत्तिरित्यर्थः । इतीत्यस्येत्येतदिति पूर्वेणान्वयः ।

**स०व्र०— गोशब्दादिति** । अत्रादौ सर्वगोप्रतीतिः ततो व्याप्त्यनुसन्धानेन विशेषप्रतिपत्तिरिति प्रतीतिद्वयं नाभिप्रेतम् । किं तु सैन्धवादिशब्दानां प्रकरणाद्यनुसारेण विशेषार्थबोधकत्ववत् प्रकृतेऽपि प्रकरणादेव गोशब्दात् विशेषप्रतीतेरेव जायमानत्वादिति बोध्यम् ।

**विठ्ठल०—** वैशेषिकमते शक्तिग्रहकाले गोत्वसामान्ये लक्षणया सर्वगोव्यक्त्युपस्थितौ तत्र सर्व-गोशब्दसङ्गतेः गृहीतत्वेनास्याः शङ्कायाः तेनापि समाधेयत्वान्न तस्येयं शङ्केति भावेनोक्तं **तटस्थस्येति** । **विशेषत** इत्यस्यार्थः **इत्यादिविशेषणादिति** । अयं गौरित्युपदेशस्यानेकगोव्यक्तिविषयतामङ्गीकृत्याप्यभीष्ट-गोप्रतिपत्त्यनुपपत्तिशङ्कापरिहारं मूलोक्तं व्यञ्जयन् शबलामित्यादिविशेषणमन्तरा केवलं गामानयेत्युक्तेऽपि गोविशेषप्रतिपत्तेरनुभवसिद्धत्वात् सा कथमुपपद्यत इत्यतो मूले **विशेषत इति** प्रकरणाद्युपलक्षकं तथा च प्रकरणादिनिबन्धना केवलं गामानयेत्युक्तेऽपि गोविशेषप्रतिपत्तिरिति ज्ञायत इति भावेनाह **एतदुक्तं भवतीति** । लिङ्गप्रकरणादीत्यादिशब्देन योग्यताग्रहणम् । **कार्यप्रतिपत्तिरिति** । कृतिसाध्यानयनादिप्रतिपत्तिरित्यर्थः ।

**।। इति तथात्वेऽपि तटस्थस्य चोद्यं तत्परिहारश्च**
**(पिण्डविशेषे लिङ्गप्रकरणबलात् कार्यप्रतिपत्तिः इति) ।।**

* * *

**।। अथ च तत्र ततः शब्दशक्तेः सादृश्यव्यापकत्वात् सादृश्यं शब्दशक्तिं ज्ञापयति ।।**

२३७ **सु०— अस्तु 'अयं गौः' इत्यादिवाक्यं व्याप्तिपरम् । ततः किमित्यत आह शक्तिरिति ।**

**अनु०—** शक्तिः सादृश्यगा यतः ।
तादृशोऽयं च तच्छब्द इति ज्ञापयति स्फुटम् ।।

**यतः वाचकत्वशक्तिः शब्दस्य सादृश्यगा सादृश्यसम्बन्धिनी सादृश्य(स्य) व्यापिकेति यावत् । अस्माद्वाक्यादवधारितेति शेषः । अतस्तां शक्तिं तत्तद्विषयतया सादृश्यं स्फुटं ज्ञापयति । कथमित्यतः प्रयोगप्रकारं दर्शयति तादृश इति ।**

**च**ः यस्मादित्यर्थे । **अयं परिदृश्यमानो यस्मात् तादृश उपदेशकाले सन्निहितेन पिण्डेन सदृशास्तस्मात्** । **तच्छब्दः स शब्दो यस्य वाचकोऽसौ तथोक्त**ः । **इतिशब्द**ः प्रकारवाची ।

**परि०— अस्माद्वाक्यादिति** । अयं गौरित्यादिवाक्यादित्यर्थः ।

**वं०प०— सादृश्यव्यापिकेति** । सादृश्यस्य व्यापिकेत्यर्थः । **तत्तद्विषयतया** गवादिविषयकतया, तद्वाचकतया ।

**कं०रा०— तत्तद्विषयतयेति** । गवादिविषयतयेत्यर्थः ।

**श्रीनिधि०—** प्रयोगप्रकारं दर्शयतीत्युक्तम् । तदनुरोधेन इतिशब्दार्थमाह **इतिशब्द इति** ।

**विठ्ठल०— ततः किमित्यत आहेति** । अयं गौरित्युपदेशवाक्यस्य यत्र पुरस्थितगोसादृश्यं तत्र सर्वगोशब्दवाच्यत्वमिति व्याप्तिपरत्वेऽपि सादृश्येन व्युत्पत्तिः कथमित्यत आहेत्यर्थः । **अस्माद्वाक्यादवधारितेति शेष इति** । तथा च अयं गौरित्यस्माद्वाक्यादवधारिता गोशब्दशक्तिर्यतः सादृश्यगा गोसादृश्यव्यापिका अतः कारणादयः परिदृश्यमानगोपिण्डश्च यस्मात्तादृशः उपदेशकाले सन्निहितेन गोपिण्डेन सदृशः तस्माच्छब्दाद्गोशब्दाद्वाच्यः इति प्रकारेण गोशब्दशक्तिं तद्गोपिण्डविषयतया सादृश्यमेव स्फुटं ज्ञापयतीति समग्रवाक्ययोजना ।

**॥ इति शब्दशक्तेः सादृश्यव्यापकत्वात् सादृश्यं शब्दशक्तिं ज्ञापयति ॥**

* * *

**॥ अथ च तत्र तत उक्तार्थसङ्ग्रहः ॥**

२३८ **सु०— अयमत्र समुदायार्थः । व्युत्पत्त्यर्थं तावन्नानुगतं किमप्यङ्गीकरणीयम्, सादृश्येनैव तदुपपत्तेः । न च वाच्यं सादृश्यमप्यनुगतं चेत्किं सामान्येनापराद्धम्, व्यावृत्तत्वे कथं सार्वत्रिकव्युत्पत्त्यङ्गमिति । न हि सादृश्यं शब्दशक्तिविषयतया प्रवृत्तिनिमित्ततया वा अभ्युपगम्यते, किन्नाम लिङ्गतया । यथा हि गन्धवत्त्वं न पृथिवीशब्दवाच्यम्, नापि तत्प्रवृत्तिनिमित्तम्, किन्तु पृथिवीत्ववत्या व्यक्तेः पृथिवीशब्दवाच्यत्वे लिङ्गमेव; तथा ते ते व्यावृत्ताकारा एव तैस्तैर्व्यावृत्तैर्द्रव्यगुणकर्मसामान्यादिभिर्निमित्तैस्तत्तच्छब्दवाच्याः ।**

**साद्दश्यं तु व्यावृत्तमपि तदवबोधे लिङ्गतयोपयुज्यते । तथाहि । यदा 'अयं गौः' इत्युपदेशपूर्विका व्युत्पत्तिस्तदा तद्वाक्यं व्याप्तिग्राहकम्, 'अयं चैतत्सद्दशाश्च सर्वे गोशब्दवाच्याः' इत्येवम्परत्वात् । व्यवहारादिपूर्विकायां तु व्युत्पत्तौ भूयोव्यवहारादिदर्शनेन साद्दश्यव्याप्यताऽवगमो भवति । ततश्चैतद्वाक्यादिनाऽवगतव्याप्तिरनुमिमीते 'अयं गोशब्दवाच्यो भवितुमर्हति, तत्सद्दशत्वात्, यस्तत्सद्दशस्स गोशब्दवाच्यः, तथा चायं तत्सद्दशः, तस्माद्गोशब्दवाच्यः' इति ।**

**परि०— कथं सार्वत्रिकेति** । विप्रकृष्टानामनुपस्थितेः शक्तिं प्रति विषयत्वेन वा निमित्तत्वेन वा सादृश्यमनुप्रविशेत् तदानन्त्येन तद्विषयकत्वादिना शक्तिग्रहस्याशक्यत्वाच्चेति भावः । **नहीति** । एतेन गोशब्दात् सादृश्यधीप्रसङ्गोऽपि प्रत्युक्तः । **व्यावृत्ताकाराः** पदार्था इति शेषः । अत्र तैस्तैर्व्यावृत्तैः सामान्यैरित्येव प्रकृतत्वाद्वक्तव्ये द्रव्यगुणकर्मणामप्युक्तिर्दृष्टान्तार्था । यथा दण्डी चैत्रः शुक्लः पटः पाचको याजक इत्यादौ दण्डादिद्रव्यगुणकर्मणामननुगमेऽपि दण्ड्यादिषु दण्ड्यादिशब्दव्युत्पत्तिः तथा गोत्वादिसामान्यस्याननुगमेऽपि गवादिशब्दानां व्युत्पत्तिरस्तु । न च तत्र दण्डत्वशुक्लत्वादिकमनुगतमिति वाच्यम् । तथापि निमित्तस्य दण्डादेरननुगमात् । ''न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवती''त्युक्तं तर्कताण्डवे । **भूयो व्यवहारादीति** । विसदृशेऽप्रयोगात् सदृशेष्वेव प्रयोगात् सादृश्यं शक्तिव्याप्यमिति गृह्यतीत्यर्थः । आदिपदेन विसदृशे व्यवहाराभावग्रहः ।

**गु०दी०— यदा अयं गौः** इत्यत्र **अयं गौः** एतत्सदृशगौरित्यर्थः ।

**यादु०— शब्दशक्तिविषयतयेत्यादि** । येनाननुगतसादृश्येषु शब्दशक्तिग्रहे प्रवृत्तिनिमित्तताग्रहे वा पुरुषायुषपर्यवसानं स्यादिति भावः । **ते ते व्यावृत्ताकारा इति** । ते ते व्यक्तिविशेषा इत्यर्थः । **द्रव्यगुणकर्मेत्यादि** । दण्ड्यादिशब्दे द्रव्यं, शुक्लादिशब्दे गुणः, पाचकादिशब्दे कर्म, गवादिशब्दे सामान्यं, प्रवृत्तिनिमित्तमिति विवेको द्रष्टव्यः । आदिशब्दात् डित्थादिशब्दप्रवृत्तिनिमित्तभूतः आकारविशेषो ग्राह्यः । सहयोगे चेयं तृतीया । ततश्च प्रवृत्तिनिमित्तानामपि तत्तच्छब्दवाच्यता अनेनोक्ता भवतीति ज्ञातव्यम् । युक्तं चैतत् । यो ह्येतच्छब्दनिष्ठशक्तेरयं विषय इति ज्ञाने शक्तिं प्रति विषयतया भासते स एव वाच्यः । शक्तिं प्रति विषयतया भानं च विशेष्यरूपायां व्यक्ताविव विशेषणभूतेषु निमित्तेष्वस्त्येवेति । वाच्यत्वाविशेषेऽपीदं प्रवृत्तिनिमित्तम् इदं नेति व्यवस्था तु विशेषणत्वविशेष्यत्वाभ्यामेव युक्ता । 'व्यक्तय एव वाच्या' इति पद्धतिवाक्यं तु विशेष्यतयेति शेषपूरणेन व्याख्येयम् । अतो न विरोध इति ज्ञातव्यम् । 'हेतावियं तृतीया । तेन व्यक्तीनामेव वाच्यत्वं न निमित्तानाम् । पूर्वोक्तज्ञानशक्तिं प्रति विषयतया भासमानत्वे सति यद्विशेष्यं तस्यैव वाच्यत्वात् । शब्द-

प्रवृत्तिनिमित्तधीस्तु वाच्यत्ववद्वाच्यतावच्छेदकत्वस्यापि शाब्दधीविषयत्वे तन्त्रत्वाद्युक्ता । कथमन्यथा परमते पारिभाषिकाकाशादिपदाशक्यस्य शब्दाश्रयत्वस्य धीरि'त्यप्याहुः । **द्रव्यगुणकर्मसामान्यादिभिरिति** वदता द्रव्यादीनां निमित्तानामननुगमेऽपि यथा दण्ड्यादिशब्दव्युत्पत्तिस्तथा सामान्यस्याप्यननुगमे गवादिशब्दव्युत्पत्त्युपपत्तिरस्तु । न च तत्रापि दण्डत्वादिकमनुगतमिति वाच्यम् । तथाऽपि निमित्तदण्डादेरननुगमात् । न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवतीति सूचितमिति ज्ञातव्यम् । **तदवबोध इति** । तत्तत्प्रवृत्तिनिमित्तविशिष्टव्यक्तिविशेषाणां तत्तच्छब्दवाच्यताबोध इत्यर्थः ।

**वं०प०— शब्दशक्तीत्यादि** । यथा परमते गोपदस्य गोत्वरूपजातौ शक्तिः तथाच अनुगतं गोत्वमेव गोपदशक्यम्, तत्पदशक्तिविषयः । तदेव च गोपदप्रवृत्तौ निमित्तम् । न हि तथा सादृश्यमस्माभिरुच्यमानं गवादिपदशक्तिविषयः । गोपदस्य सादृश्ये शक्तिर्नेति यावत् । गवादिपदप्रवृत्तिनिमित्तं वाऽभ्युपगम्यते । यद्यनुगतं सादृश्यमेव पदशक्यं प्रवृत्तिनिमित्तं चेत्यभ्युपगम्येत तर्ह्येव सादृश्यमप्यनुगतं चेत् किं सामान्येनापराद्धम् । व्यावृत्तत्वे कथं सार्वत्रिकव्युत्पत्त्यङ्गत्वमिति दूषणावकाशः स्यान्न चैवमभ्युपगम्यते किन्नाम लिङ्गतयेत्यर्थः । **सादृश्यव्याप्यतेति** । गोशब्दवाच्यत्वं प्रति सादृश्यस्य व्याप्यतेत्यर्थः ।

**श्रीनिधि०— कथं सार्वत्रिकव्युत्पत्त्यङ्गमिति** वदतः कोऽभिप्रायः । किं प्रवृत्तिनिमित्तया तदङ्गत्वं न युज्यत इति । किं वा कथमपि तदुपयोगित्वं न भवतीति । नाद्यः इष्टापत्तेरित्याह **न हि सादृश्यमिति** । **शब्दशक्तिविषयतयेति** दृष्टान्तार्थमुपात्तम् । वस्तुवृत्तमिदमुक्तम् । न च प्रवृत्तिनिमित्तस्यापि अनुगतत्वनियम इत्यभिप्रेत्याह **तथा ते ते व्यावृत्ताकारा इति** । **द्रव्यगुणकर्मसामान्यादिभिर्निमित्तैरिति** । द्रव्यनिमित्तो दण्डीति । गुणनिमित्तो यथा शुक्ल इति । कर्मनिमित्तो यथा गच्छतीति । जातिनिमित्तो यथा ब्राह्मण इति । अत्र द्रव्यादिग्रहणं दृष्टान्तार्थम् । तेषामननुगतत्वेऽपि यथा प्रवृत्तिनिमित्तत्वं तथा सामान्यस्यापीति । तत्रापि दण्डत्वादिकमेव परम्परासम्बन्धेन देवदत्तादिनिष्ठं प्रवृत्तिनिमित्तमिति चेत् । तथा अननुभवात् । दण्डत्वादिकं सदप्यवच्छेदकत्वेनावर्जनीयसन्निधीति । द्वितीयं दूषयति **सादृश्यं तु व्यावृत्तमपीति** । अन्यथा तृणत्वादिनापि वह्निसाधनत्वमपि न स्यादिति भावः ।

**शे०वा०—** मूले स्फुटपदानर्थक्यमाशङ्क्य सादृश्यस्य सङ्गतिग्राहकत्वपक्षेऽनुपपत्तिलेशो नास्तीति सूचनार्थत्वान्न तदिति भावेन तत्रानुपपत्त्यभावमुपपादयन्नेवाकाङ्क्षाक्रमेण 'व्युत्पत्तिरपि' इत्यादेः स्फुटमित्यन्तस्य ग्रन्थस्याभिप्रायमाह **अयमत्रेति** । **किमपीति** । सामान्यमपोहश्चेत्येवं किमपीत्यर्थः । तत्कुत इत्यतो भवेदेवं सामान्यादेरनुगतस्याङ्गीकर्तव्यत्वं, यदि तेन विना व्युत्पत्त्यनुपपत्तिः स्यात् । न च साऽस्तीत्याशयेनान्यथैव तदुपपत्तिमाह **सादृश्येनैवेति** । ननु सादृश्यस्य न व्युत्पत्त्यङ्गत्वं वक्तुं शक्यते । तद्धि गवादिव्यक्तिवत् सादृश्यस्य शब्दशक्तिविषयतया वा वाच्यं, गोत्वादिवत् प्रवृत्तिनिमित्ततया वा, तृतीयप्रकाराभावात् । तदुभयं च सादृश्यस्यानुगतत्वपक्षे यद्यपि सम्भवति । तत्र सादृश्यस्यैकत्वप्राप्त्या तत्र शक्तिग्रहे प्रवृत्तिनिमित्तताग्रहे वा

पुरुषायुषपर्यवसानाप्रसङ्गात् । तथाऽप्यनुगतत्वं न तस्य त्वया वक्तुं शक्यम् । तथा सति धर्माणामनुगतत्वपक्षे बाधकस्य तदाश्रयाभेदप्रसङ्गस्य सामान्यानुगतत्वे इव, सादृश्यानुगत्वेऽप्यविशिष्टत्वेन सामान्यसादृश्ययोरुभयोरप्यनुगतत्वस्यैव वाऽननुगतत्वस्यैव वाऽङ्गीकर्तव्यत्वेन तथाऽनङ्गीकृत्य सामान्यमननुगतं सादृश्यं त्वनुगतमित्यर्धजरतीयाश्रयणायोगात् । अतो व्यावृत्तत्वमेव तस्य त्वया वाच्यम् । न च तत्पक्षे व्युत्पत्त्यङ्गत्वं तस्योक्तविधया सम्भवति । तत्पक्षे सादृश्यानामनन्तत्वप्रसक्त्या तत्र शक्तिग्रहे प्रवृत्तिनिमित्ताग्रहे वा तत्रैव पुरुषायुषपर्यवसानप्रसङ्गात् तत्कथं तेन व्युत्पत्तेरन्यथैवोपपत्तिवर्णनमित्याशङ्क्य निषेधति **न चेति** । कुतो नेत्यतः सादृश्यस्योक्तप्रकारद्वयेन व्युत्पत्त्यङ्गत्वपक्षेऽनुगतत्वाननुगतत्वविकल्पतद्दोषप्रसक्तावपि तथा व्युत्पत्त्यङ्गत्वानभ्युपगमान्न तत्प्रसङ्ग इत्याह **नहीति** । तर्हि प्रकारान्तराभावात् सादृश्येनैव तदुपपत्तिरिति रिक्तं वच इत्याशङ्कते **किन्नामेति** । अस्ति लिङ्गतया व्युत्पत्त्यङ्गत्वं नाम तृतीयप्रकार इति परिहरति **लिङ्गतयेति** । उक्तरूपतृतीयप्रकारे विप्रतिपद्यमानं प्रति अनुरूपदृष्टान्तोपदर्शनव्याजेन विपक्षे बाधकमाह **यथा हीति** । **न पृथिवीशब्दवाच्यमिति** । तच्छब्दात् तदप्रतिभासादिति भावः । **नापीति** । गन्धवत्त्वस्य पृथिवीशब्दशक्यतया सह समनियतत्वेऽपि गोत्ववत्तया ज्ञात एव गोशब्दशक्तिग्रहवद्गन्धवत्तया ज्ञात एव पृथिवीशब्दशक्तेरग्रहान्न प्रवृत्तिनिमित्तत्वं तस्येति भावः । **व्यावृत्ताकारा इति** । व्यक्तिविशेषा इत्यर्थः । **द्रव्यगुणकर्मेत्यादि** । दण्ड्यादिशब्दे द्रव्यं, शुक्लादिशब्दे गुणः, पाचकादिशब्दे कर्म, गवादिशब्दे सामान्यं, डित्थादिशब्दे त्वादिशब्दोक्त आकारविशेषः प्रवृत्तिनिमित्तमिति विवेको द्रष्टव्यः । सहयोगे चेयं तृतीया । ततश्च व्यक्तीनामिव प्रवृत्तिनिमित्तानामपि तच्छब्दवाच्यत्वमेवात्राभिमतम् । न च गोत्वस्य प्रवृत्तिनिमित्तत्वे शक्यतावच्छेदकत्वेन पृथिवीशब्दे गन्धवत्त्वस्येव अशक्यत्वं स्यात् । ततश्च गोशब्दजन्यधीविषयत्वं न स्यादिति वाच्यम् । अवच्छेदकं हि द्विविधम् । एकं सत्तया, यथा पृथिवीत्वजातिनिमित्तके पृथिवीशब्दे गन्धवत्त्वम् । तस्य पृथिवीशब्दशक्यतया सह समनियतत्वेऽपि गन्धवत्तया ज्ञात एव पृथिवीशब्दशक्तेरग्रहात् । अपरं ज्ञाततया यथा गोत्वजातिनिमित्तके गोशब्दे गोत्वम् । गोत्ववत्तया ज्ञात एव गोशब्दशक्तिग्रहात् । तत्राद्यं न प्रवृत्तिनिमित्तं किन्तु द्वितीयमेव । तच्च शक्यमेव । यो ह्येतच्छब्दनिष्ठशक्तेरयं विषय इति ज्ञाने शक्तिं प्रति विषयतया भासते स एव शक्यः । शक्तिं प्रति विषयतया भानं विशेष्यरूपायां व्यक्ताविव विशेषणभूते गोत्वेऽप्यस्त्येव । तथा च कथं शक्यत्वव्याप्येन प्रवृत्तिनिमित्तत्वेन तस्याशक्यत्वापादनम् । युक्तं च घटादिनिष्ठसाक्षात्कारजनकतावच्छेदकस्यापि उद्भूतरूपस्य तज्जनकत्ववत् घटोऽयमिति ज्ञानं प्रति घटनिष्ठविषयतावच्छेदकस्यापि घटत्वस्य तद्विषयत्ववच्च, शक्यतावच्छेदकस्यापि शक्यत्वम् । शक्यत्वाविशेषे अपीदं प्रवृत्तिनिमित्तमिदं नेति व्यवस्था तु विशेषणत्वविशेष्यत्वाभ्यामेव युक्ता । व्यक्तय एव वाच्या इति पद्धतिग्रन्थे तु 'विशेष्यतये'ति शेषपूरणान्न तद्विरोध इत्यवधेयम् । यद्वा हेतावियं तृतीया । तेन व्यक्तीनामेव वाच्यत्वं न निमित्तानामिति सिद्ध्यति । तथा च पद्धतिग्रन्थोऽपि यथाश्रुत एव सङ्गच्छते । अत्र च पक्षे पूर्वोक्तज्ञाने शक्तिं प्रति विषयतया भासमानत्वे सति यद्विशेष्यं तदेव शक्यमभिमतम् । तथा च गोत्वमप्यशक्यमेव शक्यतावच्छेदकम् । शब्दात्तद्धीस्तु शक्यत्ववच्छक्यतावच्छेदकत्वस्यापि शाब्दधीविषयत्वे तन्त्रत्वाद्युक्ता । अत एव च परमते पारिभाषिकाकाशादिपदात्

अशक्यस्यापि शब्दाश्रयत्वस्य धीरिति द्रष्टव्यम् । अत्र च द्रव्यगुणकर्मसामान्यादिभिरिति वदता द्रव्यादीनां निमित्तानामननुगमेऽपि यथा दण्ड्यादिशब्दव्युत्पत्तिः तथा गोत्वादिसामान्यस्याननुगमेऽपि गवादिशब्दानां व्युत्पत्तिरित्यस्तु । न च तत्रापि दण्डत्वादिकमनुगतमिति वाच्यम् । तथाऽपि निमित्तीभूतदण्डादेरनुगतत्वालाभात् । 'न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवती'ति सूचितमिति ज्ञातव्यम् । **तदवबोध इति** । तत्तत्प्रवृत्तिनिमित्तविशिष्टव्यक्तिविशेषाणां तत्तच्छब्दवाच्यतावबोध इत्यर्थः ।

नन्वस्त्वेवं यत्रोपदेशतो व्युत्पद्यते तत्रोपदेशस्योक्तरीत्या व्याप्तिग्राहकत्वेन सादृश्यस्य व्याप्त्यवधारणात् तेन तच्छब्दवाच्यत्वानुमितिः । यत्र तु व्यवहारादिना व्युत्पद्यते तत्र सादृश्यस्य व्याप्यत्वानवधारणात् कथं तेन तदनुमितिः । न ह्युपदेशात एव व्युत्पद्यते न व्यवहारादिनेति तवापि मनोगतं भविष्यति । नापि युक्तमेतदित्यतः तत्पक्षे सादृश्यस्य व्याप्यावधारणे उपायमाह **व्यवहारादीति** ।

**वा०र०— सहयोगे चेयमित्यादि** । स्वमते पदशक्तिनिर्णयतर्कताण्डवे ते ते व्यावृत्तेत्यत्रत्यमूलसम्मतिकथनानन्तरं न च गोत्वस्येत्यादिशङ्कादिकमस्ति । तदनुसारेण प्रवृत्तो यो न च गोत्वस्येत्यादिरुत्तरटीकाग्रन्थः तदनुसारेण सहयोगे च यमित्येतद्व्याख्यातप्रायमिति मन्वानः तदभिप्रायं कथयन् तर्कताण्डवानुसारेण प्रवृत्तिनिमित्तस्य वाच्यत्वादिकमुपपादयति **न च गोत्वस्येत्यादिना** । यद्वा हेतावित्यादिकमप्युक्तग्रन्थानुसारेण ।

**स०व्र०— व्यावृत्तत्व इति** । सादृश्यस्य गोत्वादिवदननुगतत्वे यत्र गोत्वज्ञानं, तत्रैव गोशब्दवाच्यत्वज्ञानसम्भवेऽपि अन्यत्र तदज्ञानवत् प्रकृतेऽपि यत्र सादृश्यज्ञानं, तस्यैव गोशब्दवाच्यत्वज्ञानेऽपि अन्यत्र तज्ज्ञानाभावे तच्छब्दवाच्यत्वज्ञानं न सम्भवतीति भावः । **प्रवृत्तिनिमित्ततया** इत्यस्याप्ययमेवार्थः ।

**विठ्ठल०—** व्युत्पत्त्यर्थम् अनुगतसामान्यमङ्गीकर्तव्यमिति चोदिते तन्निरासाय 'व्युत्पत्तिरपि ही'त्यादिनोक्तमर्थं निष्कृष्य दर्शयति **अयमत्र समुदायार्थ इति । व्यावृत्तत्वे कथमिति** । गोव्यक्तीनामनन्तत्वेन तत्र सर्वत्र व्युत्पत्त्यर्थं खलु सादृश्यनिमित्तमङ्गीकृतम् । तस्य सार्वत्रिकव्युत्पत्तिहेतुत्वं गोव्यक्तौ शब्दशक्तिविषयत्वेन वा गुणकर्मादितच्छब्दप्रवृत्तिनिमित्तत्वेन वा वक्तव्यम् । तथा च सादृश्यस्यापि व्यावृत्ततया अनन्तत्वे व्यावृत्तसादृश्येषु शब्दशक्तिग्रहे प्रवृत्तिनिमित्तताग्रहे वा पुरुषायुषपर्यवसानान्न सादृश्यं सार्वत्रिकव्युत्पत्त्यङ्गमिति भावः । **लिङ्गतयेति** । गोशब्दस्य सर्वगोव्यक्तिषु वृत्तौ लिङ्गतयेत्यर्थः । शब्दशक्तिविषयत्वाद्यभावे लिङ्गत्वमपि कथं युज्यत इत्यतस्तद्दृष्टान्तेनोपपादयति **यथा हीति । ते ते व्यावृत्ताकारा इति** । ते ते भिन्नभिन्ना व्यक्तिविशेषा इत्यर्थः । **तैस्तैरिति** । तैस्तैर्भिन्नैर्भिन्नैर्द्रव्यादिभिस्सह व्यक्तिविशेषास्तत्तच्छब्दवाच्या इत्यर्थः । तत्र दण्डीत्यादौ द्रव्यं, शुक्लः इत्यादौ गुणः, पाचकादिशब्दे कर्म गोब्राह्मणत्वादिशब्दे सामान्यम्, आदिशब्दात् डित्थादिशब्दे आकारविशेषः तैस्सहेति विवेको ज्ञेयः । तैस्तैरिति हेतौ च तृतीया । तथात्वे द्रव्यादिभिः व्यावृत्तेरपि यथा ।

शाब्दबोधस्तथा व्यावृत्तेन सादृश्येनापीति दृष्टान्तार्थं द्रव्यादिग्रहणमुपयुज्यते । न च दण्डीशुक्लादिद्रव्यगुणादीनां प्रतिव्यक्ति व्यावृत्तत्वेऽपि दण्डत्वशुक्लत्वाद्यनुगतजात्यवच्छिन्नत्वात् सार्वत्रिकव्युत्पत्तिहेतुत्वमिति वाच्यम् । निमित्तभूतदण्डादेरननुगमात् । तत्सम्बन्धिसामान्यानुगतिस्त्वप्रयोजका, न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवतीति नैव सादृश्यं द्रव्यगुणादि च निमित्तं किन्तु गन्धवत्वलिङ्गमेव तदित्याह **सादृश्यं त्विति** । तुशब्दो विशेषार्थः । **भूयोव्यवहारादिदर्शनेनेति** । पुनःपुनर्वृद्धव्यवहारदर्शनेत्यर्थः । आदिपदेन विसदृशे महिषादौ तच्छब्दव्यवहाराभावग्रहणम् । दर्शन इति पाठे सतीति ग्राह्यम् । तथा च गामानयेति वाक्यश्रवणानन्तरं सास्नादिव्यक्तिविशेषानयनं पश्यन् पुनःपुनर्गामानयेत्युक्ते तादृशव्यक्तेरेवानयनं दृष्ट्वा गोशब्दवाच्यत्वे पूर्वदृष्ट-व्यक्तिविशेष-सादृश्यं लिङ्गतयाऽवगच्छतीति भावः । **एतद्वाक्यादिनेति** । अयं गौरित्युपदेशवाक्येनेत्यर्थः । आदिपदेन वृद्धव्यवहारग्रहणम् । अवगतव्याप्तिः पुमान् अनुमिनोतीत्यर्थः ।

**॥ इति उक्तार्थसङ्ग्रहः ॥**

* * *

**॥ अथ च तत्रान्ते उक्तार्थे पुनः शङ्कान्तराणि तन्निरासाश्च ॥**

**२३९ मु०— नन्वत्र को दृष्टान्तः । उपदेशकाले सन्निहितो गोपिण्ड इति चेन्न, तस्य तत्सदृशत्वाभावात् । मैवम् । दृष्टान्तनियमस्य निरस्तत्वात् ।**

**न च सास्नादिमत्त्वमेव लिङ्गमस्तु किं सादृश्येनेति वाच्यम्; तस्य गोत्ववत्प्रति-व्यक्ति व्यावृत्तत्वात्, सादृश्यस्य तु व्यावृत्तत्वेऽपि प्रतियोगिनिरूप्यत्वेनानुगतफलसाधक-त्वानुभवात् ।**

**सास्नादिमत्त्वस्यापि सादृश्योपहितस्य लिङ्गत्वमभ्युपगच्छामः । न च वाच्यं 'गोसादृश्यमश्वेऽप्यस्तीति तत्रापि गोशब्दवाच्यतानुमानप्रसङ्गः' इति, जातिनिमित्तत्वेऽप्येवं प्रसङ्गस्य समानत्वात् ।**

**जातिविशेषो निमित्ततयाऽङ्गीक्रियते योऽव्यभिचारीति चेत्, तर्हि सादृश्यविशेष एव लिङ्गं यो लक्षणभूत इति वदामः ।**

**परि०— दृष्टान्तनियमस्य निरस्तत्वादिति** । 'व्याप्तिरेव तु सा स्मृते'त्येतद्व्याख्याना-वसरे न विलक्षणत्वाधिकरणे व्याप्तिरेवानुमानाङ्गं न पुनः सपक्षे तदुपदर्शनमपीति 'लिङ्गराहित्य-

मव्याप्तिरि'त्येतद्व्याख्यावसरे चागमिकानुमानिकव्याप्तेर्दृष्टान्तानपेक्षणादिति निरस्तत्वादित्यर्थः । तथा च प्रकृते उपदेशगम्यत्वात् व्याप्तेरागमिकत्वान्न दृष्टान्तापेक्षा । व्यवहारावगतव्याप्तेरपि व्युत्पन्नपिण्डेषु कश्चित्पिण्डो दृष्टान्तः व्यतिरेकदृष्टान्तो वेति भावः । सादृश्यमपि नानुगतमित्यत आह **सादृश्यस्य त्विति** । पक्षीकृते पुरोवर्तिनि विद्यमानं देशकालव्यवहितानन्तगोव्यक्तिप्रतियोगिकमपि परमतेऽनन्त-गोपिण्डसम्बद्धगोत्वमिव प्रतियोग्यनुयोगिभावसम्बन्धेन देशकालविप्रकृष्टानन्तगोसम्बद्धं पुरोवर्ति-धर्मिकतया पुरोवर्तिसम्बद्धं च भवतीत्यनुगतधर्मस्य यत्फलम् अनन्तव्यक्त्युपस्थितिरूपमुक्तरूपेण अनन्तगोव्यक्तिसम्बन्धेन क्रोडीकृतानन्तव्यक्तिषु शक्तिग्रहरूपं वा तस्य साधकत्वानुभवादित्यर्थ-स्तर्कताण्डवे व्यक्तः । **सादृश्योपहितस्येति** । सादृश्योपाधियुक्तस्य । अयं गोशब्दवाच्यः पूर्वदृष्ट-गोधर्मसदृशसास्नादिमत्त्वादित्येवंरूपेण लिङ्गत्वमित्यर्थः । एतच्च सास्नादिमान् गौरिति लक्षण-वा(क्यस्थयुक्ति)क्याच्छक्तिग्रहाभिप्रायेणेति ज्ञेयम् । **जातीति** । अयं गौरित्युपदेशेन शक्तिग्रहे त्वन्मतेऽपि गोत्वन्यायेन द्रव्यत्वादिजात्यन्तरस्य निमित्तताप्रतीत्या अश्वेऽपि गोशब्दवाच्यत्वधीः स्यादित्यर्थः । **जातिविशेष इति** । गोत्वादिः । अन्तरङ्गत्वादिति भावः । **लक्षणभूत इति** । अतिव्याप्तिशून्य इत्यर्थः ।

**गु०दी०— तस्य तत्सदृशत्वाभावात्** इत्यत्र कथं तर्हि तत्र तच्छब्दव्युत्पत्तिरिति चेन्न तत्र गुरूपदेशादेव व्युत्पत्तिः । अन्यत्र तूपदेशाभावात् सादृश्याख्यलिङ्गनिबन्धनेति परिहारात् । **दृष्टान्तनियमस्य निरस्तत्वात्** इत्यत्र आगमसिद्धव्याप्तिके । इयं न पदा स्पृष्टव्या गोत्वात् । 'गौ न पदा स्पृष्टव्ये'ति श्रुते-रित्येतावतैव व्याप्तिनिश्चयस्य सर्वानुभवसिद्धत्वादिति भावः । **सादृश्यस्य तु व्यावृत्तत्वेऽपि प्रतियोगि-निरूप्यत्वेन** इत्यत्रैकस्मिन्धर्मिणि सप्रतियोगित्वस्वभावं सादृश्यमनुभवन्नेतन्निष्ठसादृश्यप्रतियोगित्वेन तत्सदृ-शान् सर्वानप्यनुभवति । यमयोरेकस्य दर्शने तन्निष्ठसादृश्यप्रतियोगिनो यमान्तरस्याप्यनुभूतेः सर्वजनसम्प्रति-पन्नत्वात् । यदाऽल्पसादृश्येऽप्येवं तदा सर्वसादृश्ये किमु वक्तव्यम् । सप्रतियोगिकाभावादिप्रतीतौ प्रति-योगिनोऽपि सहोपलम्भनियमाभावः सादृश्याख्यप्रयोजनाभावनिबन्धन इति भावः ।

**यादु०— निरस्तत्वादिति** । न हि सर्वत्र दृष्टान्त एव व्याप्तिर्दर्शनीयेत्यस्ति नियमः । 'आनुमानि-कागमिकव्याप्तेस्तदनपेक्षणादि'त्यादिना युक्तिपादे निरस्तत्वादित्यर्थः । तथा च यदोपदेशपूर्विका व्युत्पत्तिस्तदा व्याप्तेरागमगम्यत्वान्न दृष्टान्तापेक्षा । यदा च व्यवहारादिपूर्विका तदापि भूयोव्यवहारादिदर्शनेन व्यतिरेक-व्याप्त्यवगमे तेन सादृश्यस्य शक्तिव्याप्यतावगमोऽनुमितिरूपो भवतीति न तत्रापि दृष्टान्तापेक्षेति भावः । ननु तथाऽप्यनुगतसामान्याभावे प्रत्यासत्त्यभावेन सर्वव्यक्त्युपस्थित्यसम्भवात् सर्वोपसंहारेण व्याप्तिग्रहानुपपत्तौ कथमनुमानेन वाच्यताग्रह इति चेन्न । सामान्याकारेण सर्वव्यक्त्युपस्थितेः साक्षिरूपत्वेन प्राणभृन्मात्रसिद्ध-

त्वात् । यद्वक्ष्यति 'अतः सर्वे पदार्थाश्च सामान्यात्साक्षिगोचराः' इति । **प्रतिव्यक्ति व्यावृत्तत्वादिति** । तथा च **नैकस्य** सास्नादिमत्त्वस्य सन्निहितासन्निहितगोपिण्डसम्बन्धः सम्भवतीति भावः । **प्रतियोगिनिरूप्यत्वेनेति** । अनेनासन्निहितगोपिण्डवृत्तिसादृश्यस्य सन्निहितगोपिण्डेनापि सम्बन्ध उक्तो भवतीति ज्ञातव्यम् । **अनुगतफलेति** । अतिप्रसङ्गवारणाय सार्वत्रिकव्युत्पत्त्यादिरूपं यदनुगतफलं तत्साधकत्वानुभवादित्यर्थः । अयमाशयः । उपदेशादिना यत्र पिण्डे शक्तिग्रहः तत्सम्बद्धेनैकेन निमित्तेन विनोपदेशाद्यभावेऽपि यदि गोपिण्डान्तरे शक्तिं गृह्णीयात् तदाऽश्वपिण्डेऽपि किन्न गृह्णीयादविशेषादित्यतिप्रसङ्गवारणाय तावदुपदेशादिकाले सन्निहितासन्निहितपिण्डसम्बद्धमेकं निमित्तं वाच्यम् । तच्च त्वन्मते यथा प्रवृत्तिनिमित्तरूपं गोत्वं तथा मन्मते लिङ्गभूतं सादृश्यमेव । इयांस्तु विशेषः । त्वन्मते गोत्वं सन्निहितासन्निहितगोपिण्डाश्रितम् । मन्मते त्वसन्निहितपिण्डाश्रितं सादृश्यं प्रतियोगिनिरूप्यत्वेन सन्निहितगोपिण्डेनापि सम्बद्धमिति । सास्नादिमत्त्वं तु न सादृश्यवत् सन्निहितासन्निहितगोपिण्डसम्बद्धमेकमस्ति । अतो न तदुक्तानुगतफलसाधकमिति । नन्वेवं सास्नादिमत्त्वस्य गोलक्षणत्वेन प्रसिद्धस्य व्यवहारार्थत्वानुपपत्तिरित्यत आह **सास्नादिमत्त्वस्यापीति** । **सादृश्योपहितस्येति** । सादृश्यविशिष्टस्येत्यर्थः । सन्निहितगोपिण्डवृत्तिसास्नादिमत्त्वसदृशसास्नादिमत्त्वमेव लिङ्गं, न केवलं, येन सन्निहितासन्निहितगोपिण्डसम्बन्धस्यैकस्मिन्नभावेन व्यवहारार्थता न स्यादिति भावः । **एवं प्रसङ्गस्येति** । अतिप्रसक्तद्रव्यत्वादिजातिमादायेति भावः । **लक्षणभूत इति** । अतिव्याप्त्यादिशून्य इत्यर्थः ।

**वं०प०— अश्वेऽप्यस्तीति** । चतुष्पात्त्वादिसादृश्यमश्वेऽप्यस्तीत्यर्थः । **प्रसङ्ग इतीति** । तथा चोक्तानुमाने व्यभिचार इति भावः । **एवं प्रसङ्गस्येति** । यदि गोशब्दप्रवृत्तौ जातिर्निमित्तं तर्हि गवादिनिष्ठद्रव्यत्वादिजातेरश्वेऽपि सत्त्वेन तत्रापि गोशब्दप्रवृत्तिः स्यादिति भावः । **जातिविशेषो** गोत्वरूपः ।

**कं०रा०— सादृश्यस्य त्विति** । सादृश्यस्य तु व्यावृत्तत्वेऽप्येकगोव्यक्तिप्रतियोगिकत्वेनेतरसकलगोव्यक्त्यनुयोगिकत्वेन च सकलगोव्यक्तिसम्बन्धत्वादनुमितेन सामान्येन यत्फलं तत्फलसाधकत्वमनुभूयत इति भावः । यदा सादृश्यस्य तु व्यावृत्तत्वेऽपि प्रतियोगिनिरूप्यत्वं, तदा सन्निहितगोप्रतियोगिकत्वेन अनुगतीकरणादनुगतफलसाधनत्वमनुभूयत इत्याशयः । नन्वेवं सास्नादिमत्त्वस्यापि सन्निहितनिष्ठसास्नादिमत्त्वप्रतियोगिकसादृश्यवत्त्वेनानुगतीकरणात् तस्यापि लिङ्गत्वं किं न स्यादित्यत्र इष्टापत्तिमाह **सास्नादिमत्त्वस्येति** ।

**श्रीनिधि०— दृष्टान्तनियमस्य निरस्तत्वादिति** । 'लिङ्गोक्तावपि चैवं स्यादि'त्यादिनेत्यर्थः । तथाऽपि व्याप्तिजिज्ञासायां दृष्टान्तापेक्षेति चेत् व्यवहारपूर्विकायां व्युत्पत्तौ द्वितीयविषया व्याप्तिः । आगमिकव्याप्तौ तु न तदपेक्षा । आप्तवाक्यत्वेन व्यभिचारशङ्काभावादिति । **तस्य गोत्ववत् प्रतिव्यक्तिव्यावृत्तत्वादिति** । एवं चोपदेशकाले सर्वासां सास्नामसन्निहितत्वात् तदुपधानेन व्याप्तिग्रहे गवान्तरे शब्दवाच्यतानुमानं न स्यात् इति भावः । ननु तर्हि सादृश्यस्य लिङ्गत्वपक्षेऽपि समोऽयं दोष इत्यत आह **सादृश्यस्य त्विति** । **प्रतियोगिनिरूप्यत्वेनेति** । एकं सादृश्यं तावत् सर्वसम्बन्धि । तथाहि । एकमेव सादृश्यं प्रति-

योगित्वेन अनुयोगित्वेन सम्बध्यते अन्ये सर्वेऽपि प्रतियोगित्वेनेति सर्वसिद्धम् । तथा च अनुगतस्य यत्फलं सर्वव्यक्त्युपस्थितिरूपं प्रत्यासत्तित्वेनोपस्थापकत्वं तत्साधकत्वं चानुभूयत इत्यर्थः । अयमत्र विवेकः । अयं चैतत् सदृशाश्च गोशब्दवाच्य इत्युपदेशो सादृश्योपधानेन सार्वत्रिकः शक्तिग्रह इत्यत्र 'अतः सर्वपदार्थाश्च सामान्यात् साक्षिगोचरा' इति वक्ष्यमाणरीत्या सर्वगोव्यक्तिज्ञानं साक्षिणा । न च सर्वत्वेनोपस्थितिः सङ्गृहीतुं शक्यते अतिप्रसङ्गादिति । गोत्वमपि बोध्यत्वात् प्रवृत्तिनिमित्तज्ञानस्य च आवश्यकम् । न च साक्षी समर्थ इति चक्षुष एव सामर्थ्यं वाच्यम् । न च अप्रत्यासन्नस्य तद्युज्यत इति सादृश्यमेव ज्ञातं तदंशे प्रत्यासत्तिः सादृश्यं च चक्षुषा उपस्थीयते । तत्र प्रत्यासत्तिस्तु पुरोवर्ती गोव्यक्तिरेव । तस्याः सकलसादृश्यं प्रति प्रतियोगित्वेन सम्बन्धात् । यथा परस्य चक्षुस्सन्निकृष्टं गोत्वमेव सकलगोसम्बन्धि चक्षुःप्रत्यासत्तिः सादृश्यस्य तद्घटिततया प्रतीतिदर्शनाच्चेति । **जातिनिमित्तत्वेऽप्येवं प्रसङ्गसाम्यादिति** । गोनिष्ठपशुत्वजातेस्तत्रापि सत्त्वादिति भावः । **अव्यभिचारीति** । गोव्यक्त्यतिरिक्तव्यक्तिरित्यर्थः । **लक्षणभूत इति** । असाधारणधर्मरूप इत्यर्थः ।

**शे०वा०— तस्येति** । पुरोवर्तिगोपिण्डस्य स्वप्रतियोगिकसादृश्यभावादित्यर्थः । **दृष्टान्तनियमस्येति** । दृष्टान्त एव व्याप्तिरुपदर्शनीयेति नियमस्येत्यर्थः । **निरस्तत्वादिति** । 'असार्वत्रिकश्च दृष्टान्तदोषः । न हि सर्वत्र दृष्टान्त एव व्याप्तिरुपदर्शनीयेत्यस्ति नियमः । आनुमानिकागमिकव्याप्तेस्तदनपेक्षणादि'त्यादिना युक्तिपाद इति शेषः । तथा च यदा उपदेशपूर्विका व्युत्पत्तिः तदा व्याप्तेरागमगम्यत्वात् । यदा च व्यवहारादिपूर्विका व्युत्पत्तिः तदा भूयोदर्शनाद्यवगतव्यतिरेकव्याप्त्या सादृश्यस्य शक्तिव्याप्यत्वानुमानेन तस्यानुमानिकत्वान्न दृष्टान्तापेक्षेति भावः । ननु तथाऽप्यनुगतसामान्याभावे प्रत्यासत्त्यभावेन सर्वव्यक्त्युपस्थित्यभावात् सर्वोपसंहारेण व्याप्तिग्रहानुपपत्तौ कथमनुमानेन वाच्यताग्रह इति चेन्न । सामान्याकारेण सर्वव्यक्त्युपस्थितेः साक्षिरूपत्वेन प्राणभृन्मात्रसिद्धत्वात् । यद्वक्ष्यति 'अतः सर्वपदार्थाश्च सामान्यात्साक्षिगोचराः' इति । किं सास्नादिमत्त्वमात्रं लिङ्गमस्त्वित्यभिप्राय उत सदृशसास्नादिमत्त्वमिति विकल्पद्वयं मनसि निधायाद्यं दूषयति **तस्येति** । एकस्य सास्नादिमत्त्वस्य सन्निहितासन्निहितसकलपिण्डसम्बन्धाभावान्न तन्मात्रस्य लिङ्गत्वमित्यर्थः । तर्हि तद्वदेव सादृश्यस्यापि प्रतिव्यक्तिव्यावृत्तत्वादलिङ्गत्वं स्यादित्यतो व्यावृत्तस्यापि सादृश्यस्य अस्त्येव सन्निहितासन्निहितसर्वसम्बन्धित्वम् । यथा हि त्रिविक्रम एकेन पादेन ऊर्ध्वलोकं अन्येनाधरं लोकं स्पृशति तथा सादृश्यं प्रतियोगितारूपसम्बन्धेन अतीतादिकं धर्मित्वरूपसम्बन्धेन पुरोवर्तिनमपि स्पृशत्येव । न च वैरूप्यं उभयानुगतस्य निरूपकत्वस्यैकरूपत्वात् । ततश्च सर्वसम्बन्धित्वात् युज्यते तस्य सार्वत्रिकव्युत्पत्त्यङ्गत्वम् इत्याशयवानाह **सादृश्यस्य तु व्यावृत्तत्वेऽपीति** । अत्र सादृश्यस्य प्रतियोगिनिरूप्यत्वेन तत्सम्बन्धित्वस्यापि सम्भवात् सर्वसम्बन्धितया शक्तिग्राहकत्वोपपत्तेरिति वक्तव्ये यदनुगतफलसाधकत्वानुभवादिति सामान्येन वचनं तदनुगतजात्यभावे सर्वव्यक्त्युपस्थितिरेव न स्यात् । कथञ्चित्तत्सम्भवेऽपि क्रोडीकारकस्यैकस्य गोत्वादेरभावेन सर्वगवादिव्यक्त्युपसंहारेण शक्तिग्रहो न स्यात् । तथा विनैवैकेन निमित्तेनोपदेशाद्यभावेऽपि यदि गोपिण्डान्तरे शक्तिं गृह्णीयात् तदाऽश्वपिण्डेऽपि तां गृह्णीयादित्यतिप्रसङ्गश्चेत्युपदेशादिना शक्तिग्रहे प्रसक्तदोषत्रयस्यापि परिहारार्थ-

मिति ज्ञेयम् । तथाहि । न तावत्सर्वव्यक्त्यनुपस्थितिप्रसङ्गदोषः । परमते सामान्यप्रत्यासत्तिभूतेन शक्यत्वावच्छेदकेनैवैकेन गोत्वेनेव मन्मतेऽप्युपदेशव्यवहारभूयोदर्शनादिना शक्तिग्रहकाले उपस्थितगवादिव्यक्तिविशेषधर्मिकेण अतीतानागतसकलगवादिव्यक्तिप्रतियोगिकेनैकेन सादृश्येन अतीतानागतसकलशक्यव्यक्तीनामुपस्थितिसम्भवात् । इयांस्तु भेदः । त्वन्मते जातिरतीताद्याश्रिता, मन्मते तु सादृश्यं ध्वंसादिवत् प्रतियोगित्वेन तत्सम्बद्धमिति । युक्तं च तदनाश्रितत्वेऽपि संस्कारवत् प्रत्यासत्तित्वेन तदुपस्थापकत्वम् । प्रत्युत त्वन्मत एव अतीतादेरसत्त्वाज्जात्याश्रयत्वमयुक्तमिति । नापि द्वितीयो दोषः । त्वन्मते एकजात्येव मन्मतेऽप्युक्तरीत्या सर्वव्यक्तिसम्बन्धिनैकेन सादृश्येन क्रोडीकृतासु व्यक्तिषु शक्तिसङ्ग्रहसम्भवात् । इयांस्तु भेदः । त्वन्मते गोत्वं ज्ञातं सत् प्रत्यासत्तिः, मन्मते तु सादृश्यमज्ञातमेव प्रत्यासत्तिः । एवं त्वन्मते गोत्वं शक्तिग्रहे विशेषणत्वाच्छाब्दज्ञाने विषयत्वेन प्रविशति, मन्मते तु सादृश्यं प्रत्यासत्तिमात्रत्वान्न तत्र प्रविशतीति गोशब्दाद्गोसदृशधीर्न भवति । यद्वा तवेव ममापि पुरोवृत्तिगोवृत्तिगोत्वं ज्ञातमेव प्रत्यासत्तिः किन्तु तदेकमिति स्वविशिष्टव्यक्त्युपस्थापकं, मम तु नानेति स्वविशिष्टसादृश्यप्रतियोगिगोत्वान्तरविशिष्टोपस्थापकमिति । विस्तरस्तु तर्कताण्डवे द्रष्टव्यः । नापि तृतीयो दोषः । सादृश्यस्योक्तरीत्या सन्निहितासन्निहितसकलसम्बद्धत्वेन तद्भावाभावाभ्यां विशेषवत्त्वेन तदनवकाशात् । एवञ्चात्र टीकायामनुगतं फलं, सर्वव्यक्त्युपस्थितिः सर्वत्र शक्तिग्रहोऽतिप्रसङ्गपरिहारश्चेति त्रितयमपि, विवक्षितमित्यवधेयम् । सदृशसास्नादिमत्त्वं लिङ्गमस्त्विति द्वितीयपक्षाङ्गीकारेण समाधत्ते **सास्नादीति** । **सादृश्येति** । सादृश्यविशिष्टस्येत्यर्थः । सन्निहितगोपिण्डवृत्तिसास्नादिमत्त्वं लिङ्गं भवत्येवेत्यर्थः । **अनुमानप्रसङ्ग इतीति** । अन्यथा तत्रैव व्यभिचरितं गोसादृश्यं गव्यपि तच्छब्दवाच्यत्वानुमापकं न स्यादिति भावः । अव्यभिचरितसादृश्यविशेषस्यैव लिङ्गत्वान्न व्यभिचार इत्यभिप्रेत्य विशेषस्य निमित्ततां परमुखेनैव वाचयितुं प्रतिबन्दीं तावद् गृह्णाति **जातिनिमित्तत्वेऽपीति** । गोगतद्रव्यत्वादिजातेर्गोव्यक्त्यन्तर इवाश्वादिव्यक्तावपि सत्त्वेन तस्यापि गोशब्दवाच्यताप्रसङ्गादित्यर्थः । उपलक्षणं चैतत् । उपमितौ गोसदृशपश्वन्तरस्य गवयशब्दवाच्यताधीः स्यादित्यपि द्रष्टव्यम् । आवापोद्वापाभ्यां गोत्वादिजातेरेव निमित्तताया ग्रहात् न अतिप्रसक्तजातिमादाय अश्वादेः गोशब्दवाच्यताप्रसङ्गः । उपमितावपि अन्तरङ्गसादृश्यस्यैव आवापोद्वापाभ्यां निमित्ततया ग्रहात् न गोसदृशपश्वन्तरस्य गवयशब्दवाच्यताधीप्रसङ्ग इत्याशयेन शङ्कते **जातिविशेष इति** । अत्रापि पूर्ववदुपलक्षणम् । एवं तर्ह्यत्राप्यश्वादिव्यावृत्तमन्तरङ्गं सास्नादिमत्त्वगोत्वादिप्रयुक्तं सादृश्यमेव तत्र लिङ्गमिति नाश्वादौ गोशब्दवाच्यतानुमानप्रसङ्गो न वा तत्रैव व्यभिचारप्रसङ्ग इत्याह **तर्हीति** । **लक्षणभूतः** अव्याप्त्यादिशून्यः ।

**वा०र०— तर्हि तद्वदेवेति** । **अत्र** प्रकरणे । तथाहि । न तावत्सर्वव्यक्त्यनुपस्थितीत्यादितर्कताण्डवानुसारेण न चैतत्सर्वमन्यापोहनिबन्धनमित्यारभ्यैवमनुगतसामान्यानभ्युपगमेनैवेत्येतत्पर्यन्तं मूलटीकाविचारः कर्तव्योऽस्ति । ..... ।

**स०व्र०— दृष्टान्तनियमस्य निरस्तत्वादिति** । 'असार्वत्रिकश्च दृष्टान्तदोषः । न हि सर्वत्र दृष्टान्त एव व्याप्तिः प्रदर्शनीयेत्यस्ति नियमः । आनुमानिकागमिकव्याप्तेस्तदनपेक्षणात्' इत्यादिना युक्तिपादे निरूपितत्वादित्यर्थः । साम्नादिमत्त्वमेव लिङ्गमित्यभिप्रायो वा सदृशसाम्नादिमत्त्वमेवेत्यभिप्रायो वेति विकल्प्याद्यं दूषयति **न चेति । सादृश्यस्य त्विति** । द्वितीयमङ्गीकृत्य समाधत्ते **साम्नादिमत्त्वस्येति** । सदृशसाम्नादिमत्त्वस्य इत्यर्थः ।

**विठ्ठल०— दृष्टान्तनियमस्येति** । 'व्याप्तिरेवानुमानाङ्गं न पुनः सपक्षे तत् प्रदर्शनमपी'ति । 'न हि दृष्टान्त एव व्याप्तिर्दर्शनीयेत्यस्ति नियमः । आनुमानिकागमिकव्याप्तेः तदनपेक्षणादि'ति च युक्तिपादे निरस्तत्वादित्यर्थः । तथा च यदा व्युत्पत्तिरुपदेशपूर्विका तदा व्याप्तेरागमगम्यत्वान्नास्ति दृष्टान्तापेक्षा, यदा तु व्यवहारपूर्विका तदानुमानगम्या व्याप्तिरिति सर्वथा दृष्टान्तापेक्षेति भावः । ननु तथापि सर्वगोव्यक्त्युपस्थितावयवसर्वव्यक्तिषु सादृश्यध्यानम् । तद्व्यापकतया वाच्यतावगतिश्च स्यात् । सर्वोपस्थितिश्चानुगतसामान्याङ्गीकारे सामान्यप्रत्यासत्त्या भवेत् । सामान्यानङ्गीकारे कथं सर्वोपस्थितिः कथं वा सादृश्यलिङ्गेन वाच्यताग्रह इति चेन्न । अतः 'सर्वपदार्थाश्च सामान्यात्साक्षिगोचरा' इति वक्ष्यमाणरीत्या साक्षिणा सर्वोपस्थितेः प्राणभृन्मात्रसिद्धत्वादिति । **प्रतिव्यक्ति व्यावृत्तत्वादिति** । सन्निहितासन्निहितगोव्यक्तिषु गोशब्दे वाच्यताप्रतिपत्त्यर्थं खलु लिङ्गमपेक्षितम् । तादृशं च लिङ्गं सर्वव्यक्तिसम्बन्धमेकं चेत् सर्वत्र गोशब्दवाच्यताप्रत्यायकं भवेत् । न चैकं साम्नादिमत्त्वं सर्वगोपिण्डसम्बन्धम् । तस्य गोत्वजातिवत् प्रतियोगिपिण्डेषु भिन्नभिन्नत्वादित्यर्थः । ननु सादृश्यं सर्वगोव्यक्तीनां गोशब्दवाच्यत्वे लिङ्गमिति पक्षेऽपि अयं दोषः समानः, सादृश्यस्यापि प्रतिव्यक्ति भिन्नभिन्नत्वादित्यत आह **सादृश्यस्य त्विति** । सत्यं सादृश्यमपि प्रतिव्यक्ति व्यावृत्तमिति, तथाप्यस्त्यत्र विशेषः । साम्नादिमत्त्वं न प्रतियोगिनिरूप्यं सादृश्यं त्वनेनायं सदृश इति निरूपकसापेक्षम् । निरूपकमिह प्रतियोगीत्युच्यते । तथा च सन्निहितसकलगोव्यक्तिसम्बन्धस्य विद्यमानत्वेन सार्वत्रिकव्युत्पत्त्यादिरूपं यत्सर्वानुगतैकधर्मफलं तत्साधनत्वस्यानुभवसिद्धत्वात् वैशेषिकैरप्येकगोत्वसम्बन्धित्वेनैवासन्निहितसर्वव्यक्त्युपस्थितेरङ्गीक्रियमाणत्वेन तद्वत्सन्निहितैकगोव्यक्तिनिरूपितसादृश्यं पृथक् पृथक् सर्वत्रास्तीत्युक्तफलसाधनत्वस्य युक्तत्वाच्चेति भावः । ननु साम्नादिमत्त्वं गोर्लक्षणम् । लक्षणप्रयोजनं च सार्वत्रिकव्यवहार इति सर्वसम्मतं तत् कथमुच्यते न साम्नादिमत्त्वं वाच्यतायां लिङ्गमित्यत आह **साम्नादिमत्वस्येति । सादृश्योपहितस्य** सादृश्यघटितस्येत्यर्थः । केवलस्य साम्नादिमत्त्वस्य प्रतिव्यक्तिव्यावृत्तत्वेन सर्वोपस्थापकत्वाभावात् सादृश्यविशिष्टस्य सार्वत्रिकव्यवहारोपयिकताया उपपादितत्वादिति भावः । **एवं प्रसङ्गस्येति** । अतिप्रसक्तद्रव्यत्वादिजातिमादायेति शेषः ।

**चषक— सादृश्यस्य तु व्यावृत्तत्वेऽपि** । पक्षीकृते पुरोवर्तिनि विद्यमानं देशकालविप्रकृष्टानन्तव्यक्तिप्रतियोगिकमपि परमतेऽनन्तगोपिण्डसम्बद्धगोत्वमिव प्रतियोग्यनुयोगिभावसम्बन्धेन देशकालविप्रकृष्टानन्तगोसम्बद्धं पुरोवर्तिधर्मिकतया पुरोवर्तिसम्बद्धं च भवतीत्यनुगतधर्मस्य यत्फलमनन्तव्यक्त्युपस्थितिरूपमुक्तरूपेण अनन्तगोव्यक्तिसम्बन्धेन क्रोडीकृतानन्तव्यक्तिषु शक्तिग्रहरूपं च तस्य साधकत्वानुभवादित्यर्थस्तर्कताण्डवे व्यक्त

इति स्थितम् । **साद्दश्योपहितस्य** सादृश्यघटितस्य । सन्निकृष्टगोव्यक्तिवृत्तिसास्नादिमत्त्वसदृशसास्नादिमत्त्वस्य तु हेतुतामूरीकुर्म इति भावः ।

**।। इति उक्तार्थे पुनः शङ्कान्तराणि तन्निरासाश्च ।।**

**।। इति साद्दश्येन शब्दव्युत्पत्तिप्रकारप्रदर्शनम् ।।**

**।। इति सामान्यानुगतत्वाभावेऽपि व्युत्पत्त्यादेः साध्येनैव गम्यत्वम् ।।**

* * *

**।। अथ तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे ततः कार्यकारणभावावधारणादिकस्यापि साद्दश्येनैवोपपत्तिः ।।**

**२४० सु०— एतेन कार्यकारणभावावधारणादिकमपि समाहितं वेदितव्यम्, साद्दश्येनैव तदुपपत्तेः । अन्त्यविशेषे हि न किञ्चिदनुगतमस्ति, नाप्यनुगताश्रय उपाधिः, तद्भावे द्रव्य-गुणकर्मवदत्यन्तव्यावर्तकत्वस्वरूपहानिप्रसङ्गात् । तथाऽप्यस्ति तत्र विशेषशब्दव्युत्पत्तिः अत्यन्तव्यावृ(त्ति)त्तबुद्धिं प्रति कारणत्वावधारणमित्यादि । तत्र परेणापि लक्षणरूपं साद्दश्यमेवादरणीयमिति ।**

**परि०— एतेन कार्यकारणभावावधारणादिकमिति** । **व्याप्त्यवधारणं** लक्ष्यलक्षणा-वधारणम् उत्सर्गापवादावधारणम् आदिपदार्थः । विवृतमेतत् तर्कताण्डवे 'घटजातीयोत्पत्तौ दण्ड-जातीयस्य नियमो दण्डस्य घटकारणत्वम् । धूमजातीयस्य वह्निजातीयरहितेऽवृत्तिः धूमस्य वह्नि-व्याप्तिः । लक्षणजातीयस्य लक्ष्यजातीयेऽवृत्तिरव्याप्तिः, अलक्ष्यजातीये वृत्तिरतिव्याप्तिरित्यादि-व्यवस्था युक्ता । इयांस्तु विशेषः । परमते साजात्यमेकजात्याश्रयत्वमेव, मन्मते त्वेकजातीयसदृश-जात्याश्रयत्वमि'त्यादिना । **लक्षणरूपम्** अव्यभिचारिरूपम् । **अनुगतजात्यभावेऽपि साद्दश्येनैव व्युत्पत्त्याद्युक्तिः** ।।

**यादु०—** एतेनेत्युक्तं विवृणोति **साद्दश्येनैवेति** । उपदेशादिना सन्निहितकार्यकारणव्यक्तिप्रतियोगिक-सादृश्यस्य कार्यकारणभावव्याप्यतावगमे तेनैवासन्निहितदण्डादावपि कारणत्वाद्यवधारणस्योक्तरीत्योपपत्ते-रित्यर्थः । आदिपदेन व्याप्त्यवधारणसामान्यापवादन्यायपरिग्रहः । उपदेशादिना सन्निहितधूमादिसादृश्यस्य वह्न्यादिव्याप्तिव्याप्यतावगमेऽसन्निहितधूमादावनुमानेनैव व्याप्त्यवधारणसम्भवात् । एवं सन्निहितासन्निहित-सम्बन्धसादृश्यपुरस्कारेण प्रवृत्तस्योत्सर्गप्रमाणस्यापवादविषयेऽपि प्रवृत्तिसम्भवात् सामान्यापवादन्यायोऽपि नानुपपन्न इति भावः । सादृश्येन व्युत्पत्त्यादिकं परेणाप्याश्रयणीयमिति वक्तुमाह **अन्त्यविशेषे हीति** ।

**अत्यन्तेति** । केवलेत्यर्थः । तथा च यथा द्रव्यगुणकर्मणामनुगतसामान्याश्रयत्वेनानुवृत्तिहेतुत्वान्न व्यावृत्तिमात्र-हेतुत्वरूपमत्यन्तव्यावर्तकत्वं तथा विशेषाणामप्यनुगतधर्माश्रयत्वेऽनुवृत्तिहेतुत्वस्यापि प्रसङ्गेनात्यन्तव्यावर्तक-त्वरूपं यद्विशेषाणां स्वरूपं तद्धानिप्रसङ्गादित्यर्थः । **लक्षणरूपमिति** । अतिव्याप्त्यादिशून्यमित्यर्थः । अथवा लक्षणं रूपं घटकं यस्य तल्लक्षणरूपं लक्षणघटितमित्यर्थः । न चैवं तत्र सादृश्याङ्गीकारेऽप्यत्यन्तव्यावर्तकत्व-हानिप्रसङ्गः । सादृश्यस्य परेण सामान्यवदनुवृत्तिहेतुत्वानङ्गीकारादित्याशयात् ।

**वं०प०— कार्येत्यादि** । एतद्दण्डसदृशे दण्डे सति एतद्घटसदृशघटो जायते, तदभावे तदभावः इत्यादिरूपेणेत्यर्थः । **अस्तीति** । तथा च विशेषेष्वनुगतसामान्यानङ्गीकारात् तत्रानुगतव्यवहारो न स्यात् इत्यर्थः । **अनुगताश्रय इति** । अनुगताश्रयघटित इत्यर्थः । तथा च विशेषेष्वनुगतव्यवहारे अनुगतजातेः निमित्तत्वाभावेऽप्यनुगतं यद्द्रव्यत्वं तदाश्रयभूतं यत् यावन्नित्यद्रव्यजातं तद्घटितो यावन्नित्यद्रव्यवृत्तित्वरूपो य औपाधिको धर्मः स एव विशेषेष्वनुगतव्यवहारे निमित्तभूत इति भावः ।

**श्रीनिधि०— तत्र परेणापि लक्षणभूतं सादृश्यमेवादरणीयमिति** । तत्र सामान्येन सकलव्यक्त्युप-स्थित्यसम्भवात् सादृश्योपधानेनैव उक्तप्रकारेण शक्तिग्रहे सम्बन्धव्याप्यं सादृश्यमेव असाधारणं लिङ्गं व्यक्त्यन्तरे तदनुमापकं वक्तव्यम् । तथाऽनुगतबुद्धिं प्रति कारणतावधारणं च तेनैवातिप्रसङ्गादिति वक्तव्यमित्यर्थः ।

**शे०वा०—** शक्तिग्रहे उक्तं प्रकारं कार्यकारणभावावधारणादावप्यतिदिशति **एतेनेति** । तथा च न तदन्यथाऽनुपपत्त्याऽप्यनुगतसामान्यसिद्धिरिति भावः । एतेनेत्युक्तमेव विशदयति **सादृश्येनैवेति** । उपदेशादिना सन्निहितदण्डघटप्रतियोगिकसादृश्यस्य कार्यकारणभावव्याप्तत्वमवधार्यते । ततश्चैतद्वाक्यादिनाऽवगतव्याप्तिरस-न्निहितेऽपि पिण्डे उपदेशसन्निहितपिण्डसादृश्येन लिङ्गेन कार्यकारणभावमनुमिमीत इति सादृश्येनैव कार्यकारण-भावावधारणम् । आदिपदेन व्याप्त्यवधारणादिपरिग्रहः । तत्राप्युपदेशादिना सन्निहितधूमादिपिण्डसादृश्यस्य वह्न्यादिव्याप्यताव्याप्तिरवधार्यते । ततश्चोपदेशादिनाऽवगतव्याप्तिरसन्निहितधूमादिपिण्डे सन्निहितधूमादिप्रति-योगिकसादृश्येन वह्न्यादिव्याप्यतामनुमिमीत इति सादृश्येनैव व्याप्त्यवधारणम् । एवं सन्निहितासन्निहित-सम्बद्धसादृश्यपुरस्कारेण प्रवृत्तस्य उत्सर्गप्रमाणस्यापवादविषयेऽपि प्रवृत्तिसम्भवान्न सामान्यापवादानुपपत्तिरपी-त्याशयः । मूले सादृश्येनैवेत्यवधारणानर्थक्यमाशङ्क्य क्वचिद्व्युत्पत्त्याद्यङ्गत्वेन सादृश्यस्यैव परेण समाश्रय-णीयत्वात् तस्यैव सर्वत्र व्युत्पत्त्याद्यङ्गत्वकल्पने कल्पनालाघवम् । इतरथा क्वचित्सादृश्यं व्युत्पत्त्याद्यङ्गम् अन्यत्र सामान्यमिति कल्पनागौरवमित्येतदर्थसूचकत्वान्न तदानर्थक्यमित्याशयेन भवेदेवं यदि क्वचिदपि व्युत्पत्त्या-द्यङ्गत्वेन सादृश्यं परेण समाश्रयणीयं स्यात्, तदेव तु कुत इत्यतस्तदुपपादयति **अन्त्यविशेषे हीति** । **किञ्चिदिति** । सामान्यमपोहश्चेत्येवं किञ्चिदित्यर्थः । **अनुगताश्रय इति** । अनुगतजातिघटित इत्यर्थः । उभयाभावे हेतुमाह **तद्भाव इति** । अन्त्यविशेषेषु जातिरूपस्यौपाधिकस्य वा उक्तरूपस्य धर्मस्य स्वीकारे तादृशद्रव्यगुणकर्मवत् तेषामनुगतत्वप्रसङ्गेन व्यावृत्तैकस्वभावात्मकस्वरूपहानिः स्यात् । न हि साक्षात्सम्बद्धेन

धर्मेणानुगमे व्यावृत्तैकस्वभावहानिः । न तु परम्परासम्बद्धेनानुगम इति सम्भवतीति भावः । **लक्षणरूपमिति** । अव्यभिचरितमित्यर्थः । न च, न लक्षणरूपसादृश्यमपि तत्र परेणाङ्गीकर्तुं शक्यम्, तदङ्गीकारेऽप्यत्यन्तव्यावर्तकत्वस्वरूपहानिप्रसङ्गस्य तुल्यत्वादिति वाच्यम् । सादृश्यस्य परेणानुवृत्तिहेतुताया अनङ्गीकारादित्याशयात् ।

**विठ्ठल०— कार्यकारणभावादिकमिति** । आदिपदेन व्याप्त्यवधारणं लक्षणावधारणमुत्सर्गापवादावधारणं गृह्यन्ते । एतेनेत्युक्तं विवृणोति **सादृश्येनैवेति** । यथा परमते सन्निहित पटदण्डादिगतपटत्वाद्यनुगतजातिमादाय कार्यकारणभावावधारणं सन्निहितधर्मादिगतधूमत्वादिजातिमादाय व्याप्यव्यापकभावावधारणमित्यादि । तथाऽस्मन्मते सन्निहितपटादिनिरूपितसादृश्येनैवानुभवसिद्धेन कार्यकारणभावव्याप्त्यवधारणलक्षणावधारणोपपत्तेः नाप्रामाणिकमनुगतसामान्यमङ्गीकरणीयम् । एवं सन्निहितासन्निहितहिंसादिसम्बन्धसादृश्यपुरस्कारेण प्रवृत्तस्य उत्सर्गप्रमाणस्यापवादस्य विषयेऽपि प्रवृत्तिसम्भवात् तत्प्रमाणविषयैकदेशेऽपवादप्रमाणप्रवृत्त्या सामान्यापवादन्याय उपपद्यत इति भावः । सादृश्येन व्युत्पत्त्यादिकं परेणाप्यवश्यमङ्गीकरणीयमिति वक्तुमाह **अन्त्यविशेषे हीति** । केवलं व्यावर्तकशिरोमणित्वेन वैशेषिकेनाभ्युपगतविशेष इत्यर्थः । **तद्भाव इति** । विशेषे अनुगतसामान्यसद्भावे, भूतत्वमूर्तत्वादिवद्द्रव्यत्वाद्यनुगतजात्याश्रयोपाधिसद्भावे वा । यथा द्रव्यगुणकर्मणामनुगतसामान्याश्रयत्वेनानुगताश्रयोपाधिमत्त्वेन च अनुवृत्तिप्रत्ययस्यापि हेतुत्वान्न व्यावृत्तिमात्रहेतुत्वरूपमत्यन्तव्यावर्तकत्वं तथान्त्यविशेषाणामप्यनुगतधर्माद्याश्रयत्वेऽनुवृत्तिहेतुत्वस्यापि प्रसङ्गेनात्यन्तव्यावर्तकत्वरूपं याद्विशेषाणां स्वरूपं तद्धानिप्रसङ्गादित्यर्थः । **कारणत्वावधारणमित्यादी**त्यादिपदेन नित्यद्रव्यवृत्तित्वे अत्यन्तव्यावर्तकत्वरूपलक्षणावधारणम् । **लक्षणरूपमि**त्यस्य अतिव्याप्त्यादिरहितमिति वा लक्षणं रूपं घटकं यस्येति लक्षणोपहितमिति वा अर्थः । न च विशेषे सादृश्याङ्गीकारे अत्यन्तव्यावर्तकत्वहानिः परस्येति वाच्यं, परेण सादृश्यस्यानुवृत्तिहेतुत्वानङ्गीकारात् ।

**॥ इति तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे ततः कार्यकारणभावावधारणादिकस्यापि सादृश्येनैवोपपत्तिः ॥**

* * *

**॥ अथ तत्सामान्यनिराकृतेरयुक्तत्वशङ्कानिरासे ततः 'अनुगतसामान्येनैव व्युत्पत्त्यादिकं नान्यथा' इति मन्वानं प्रति बाधकोक्तिः ॥**

**॥ अथ तत्र चादौ जातौ जात्यनङ्गीकारात् 'गोत्वं नित्यं जातित्वात्' इत्यादिव्याप्तिज्ञानाद्यभावप्रसङ्गः ॥**

२४१ **सु०— एवमनुगतसामान्यानभ्युपगमेनैव व्युत्पत्त्यादिकं समर्थितम् । यस्तु मन्यते अनुगतसामान्येनैव व्युत्पत्त्यादिकं नान्यथेति तस्य बाधकमाह जातितश्चेदिति ।**

अनु०— जातितश्चेत्कथं तासु

यद्यनुगतजातिनिमित्तैव सर्वत्र व्युत्पत्तिः कार्यकारणभावावधारणादिकं च स्यात् तदा **तासु** जातिषु **कथं** जात्यादिशब्दव्युत्पत्तिरनुगतबुद्धिकारणत्वावधारणं, 'गोत्वं नित्यं जातित्वादि'त्यादिव्याप्तिज्ञानमित्यादिकं स्यात् । जातिषु जात्यभावेन तत्र व्युत्पत्त्यादिकं न स्यादित्यर्थः ।

परि०— **अनुगतबुद्धीति** । इयं जातिरियं जातिरित्येवंरूपानुगतबुद्धीत्यर्थः । **इत्यादिकमिति** । जातिर्व्यक्तिरिति द्वेधेत्युत्सर्गः, दोषात्तु नेत्यपवादः, इत्युत्सर्गापवाद आदिपदार्थः ।

शे०वा०— जातित इत्याद्युत्तरग्रन्थस्य व्युत्पत्त्याद्यङ्गत्वोपपादकपूर्वग्रन्थशेषत्वभ्रमनिरासाय वृत्तानुवादपूर्वकं प्रयोजनमाह **एवमिति** ।

चषक— **व्युत्पत्त्यादिकं** शक्तिज्ञानादिकम् । अनुगतधर्मानुपगमेऽपि सादृश्येनैव व्युत्पत्त्यादिनिर्वाहः ।

* * *

**।। अथ तत्रापि चादौ जातौ जातित्वजात्यस्तित्वाङ्गीकारेऽनवस्थितिप्रसङ्गः ।।**

२४२ **सु०—** यदि वैयात्यात् कश्चिद् ब्रूयात् 'अस्ति जातिष्वपि जातित्वं नाम जातिः तद्वशात् तत्र सर्वमुपपद्यते' इति; तं प्रत्याह **तत्र चेदिति** ।

अनु०— तत्र चेदनवस्थितिः ।

यदि **तत्र** जातिष्वपि जातित्वं नाम जातिरङ्गीक्रियते तदा **अनवस्थितिः** स्यात् ।

तथाहि; गोत्वादिजातिषु जातिशब्दप्रवृत्तिनिमित्तं या जातित्वं नाम जातिः सा न तावत्स्वरूपे वर्तते, स्ववृत्तेरप्रामाणिकत्वात्; अतः स्वव्यतिरिक्तास्वेव जातिषु वर्तत इति वाच्यम् । तथा च स्वव्यतिरिक्तजातिषु जातिशब्दप्रवृत्तावियं निमित्तं स्यान्न तु स्वरूपेऽपि । अतस्तस्यां तद्व्यतिरिक्तासु जातिष्वेकस्य जातिशब्दस्य प्रवृत्तौ निमित्तं जात्यन्तरमङ्गीकरणीयम् । तत्राप्येवमेवेत्यनवस्थेति ।

**वं०प०— स्वरूप इति** । स्वस्मिञ्जातित्व इत्यर्थः । **तस्यां** जातित्वरूपजातौ ।

**शे०वा०— स्ववृत्तेरप्रामाणिकत्वादिति** । देशकालादेः स्ववृत्तिस्तु प्रमाणबलादाश्रीयते । न च जातित्वस्य स्वस्मिन्वृत्तौ प्रमाणमस्तीत्यतो न स्ववृत्तित्वं तस्येति भावः । **तत्राप्येवमिति** । जातित्वजातौ तद्व्यतिरिक्तासु गोत्वादिजातिषु च जातिशब्दप्रवृत्तिनिमित्तं यज्जात्यन्तरमङ्गीक्रियते तन्न तावत्स्वरूपेऽपि वर्तते । स्ववृत्तेरप्रामाणिकत्वादित्यतः स्वव्यतिरिक्तास्वेव जातिषु तद्वर्तत इति वाच्यम् । तथा च स्वव्यतिरिक्तजातिषु जातिशब्दप्रवृत्ताविदं निमित्तं स्यात् । न तु स्वरूप इत्यतः तस्मिंस्तद्व्यतिरिक्तासु जातिषु च एकजातिशब्दप्रवृत्तौ निमित्तं जात्यन्तरमेवाङ्गीकरणीयमित्येवमर्थः ।

**विठ्ठल०—** जातित्वं नाम जातिः किं स्वस्यां जातित्वजातावपि वर्तते । उत स्वातिरक्तासु गोत्वादि-जातिष्विति विकल्प्याद्ये दूषणमुक्त्वा द्वितीयोत्तरत्वेन तत्र चेदिति मूलं सङ्गमयति **सा न तावदिति** ।

**॥ इति जातौ जातित्वजात्यस्तित्वाङ्गीकारेऽनवस्थितिप्रसङ्गः ॥**

* * *

**॥ अथ तत्र ततस्तन्मते जातिशब्दस्य निमित्ततयोपेतत्वात्,**
**ज्ञापकतयानुपेतत्वात् उपदेशाधीनत्वाङ्गीकरणानुपपत्तिः ॥**

२४३ **सु०— ननु गोत्वादिजातिषु जातित्वप्रयुक्तो जातिशब्दः, जातित्वे तूपदेशाधीनो भवतु तस्या एकत्वादिति । मैवम् । न ह्यस्माभिः सादृश्यमिव भवता जातिः (जाति)-शब्दवृत्तौ ज्ञापकतयोपेयते, येन क्वचिदुपदेशो निवेश्यते; किन्तु निमित्ततया । तत्रोपदेशो-पन्यासस्य क्वोपयोगः ।**

**परि०— ज्ञापकतयोपेयत इति** । तथात्वे उपदेशेन ज्ञापकेन जातित्वे जातिविशेषपद-शक्तिर्ज्ञाप्या स्यात् । न चैवम् । निमित्तत्वेन त्वया स्वीकारात् । तथा च जातित्वरूपजातौ जात्य-न्तरस्य अभावे निमित्ताभावेन तत्र जातिपदशक्तिग्रहो न स्यादित्यर्थः ।

**यादु०— क्वचिदिति** । जातिरूपज्ञापकाभावस्थल इत्यर्थः । **निमित्ततयेति** । शक्तिस्थित्यव-च्छेदकतयेत्यर्थः ।

**वं०प०— तस्याः** जातिनिष्ठाया जातित्वरूपजातेः । तथा च उपदेशस्यानन्त्येन कर्तुमशक्यत्वा-दित्युक्तदूषणावकाशो नेत्यर्थः । **ज्ञापकतया** लिङ्गत्वेनेत्यर्थः । एवं च अस्मन्मते सादृश्यस्य लिङ्गत्वात् तज्ज्ञानं

क्वचिदुपदेशेन सम्भवति । न हि तद्वत् त्वया जातेर्लिङ्गत्वमङ्गीकृतमिति भावः । **किन्तु निमित्ततयेति** । जातित्वे जातिशब्दः किंप्रयुक्त इति शङ्कायामुपदेशाधीन इत्येतदसङ्गततरम् । यथाऽस्मन्मते सादृश्यं शब्द-वाच्यत्वे लिङ्गत्वेनोपयुज्यते इति क्वचिदुपदेशो लिङ्गभूततज्ज्ञापकत्वेनोपयुज्यते । तथा त्वन्मते जातिर्न ज्ञापक-तया लिङ्गत्वेनोपयुज्यते, किन्नामायं शब्दोऽत्रास्मान्निमित्तात् प्रवर्तत इति शब्दप्रवृत्तौ निमित्ततया । ततश्च जातित्वे जातिशब्दः केन प्रवृत्तिनिमित्तेन प्रवर्तत इत्याशङ्कायामुपदेशाधीनो जातित्वे जातिशब्द इत्यस्य असङ्गतत्वात् । न ह्युपदेशो जातित्वे जातिशब्दप्रवृत्तौ निमित्तं, येनेदं वचनं सङ्गतं स्यादित्यर्थः ।

**श्रीनिधि०— तस्या एकत्वादिति** । बहुत्वे खलु पदशक्तिकाले व्यवहितत्वेनोपस्थित्यसम्भवात् तदर्थं सामान्यं प्रत्यासत्तित्वेनाभ्युपेयमिति भावः । **क्वोपयोग इति** । एवञ्च प्रवृत्तिनिमित्तत्वेन जातिरवश्य-मङ्गीकार्येति नानवस्थोद्धार इति भावः ।

**शे०वा०— जातित्वप्रयुक्त इति** । गोत्वादिजातीनामनन्तत्वेन तत्र जातिशब्दव्युत्पत्तेरुपदेशाधीन-तायाः तत्रैव पुरुषायुषपर्यवसानप्रसङ्गबाधितत्वेनासम्भवादिति भावः । **तस्या इति** । तथा च न तत्र जाति-शब्दव्युत्पत्तेरुपदेशाधीनतायां तत्रैव पुरुषायुषपर्यवसानप्रसङ्ग इति भावः । **क्वचिदिति** । जातिरूपज्ञापकाभाव-वत्यां जातित्वजातावित्यर्थः । ज्ञापकाननुगमस्यादोषत्वादिति भावः । **निमित्ततयेति** । शक्तिस्थित्यवच्छेदक-तयेत्यर्थः । **उपयोग इति** । प्रवृत्तिनिमित्ताननुगमस्य दोषत्वादिति भावः ।

**विठ्ठल०— क्वचिदिति** । स्वस्यां जातिरूपज्ञापकरहितायां जातित्वजातावित्यर्थः । **निमित्ततयेति** । शब्दस्य तद्वाचकत्वे प्रवृत्तिनिमित्ततयेत्यर्थः । **उपदेशोपन्यासस्येति** । उपदेशस्य ज्ञापकत्वेन निमित्तत्वाभावे उपदेशत्वाधीनत्वकथनमयुक्तमित्यर्थः ।

**॥ इति तन्मते जातिशब्दस्य निमित्ततयोपेतत्वात्,**
**ज्ञापकतयानुपेतत्वात् उपदेशाधीनत्वाङ्गीकरणानुपपत्तिः ॥**

* * *

**॥ अथ च तत्र ततो व्यक्तानां व्यक्तिशब्दवाच्यत्वविज्ञानमपि व्यक्तित्वजात्यभावेन दूषितम् ॥**

२४४ **सु०**— स्थानान्तरेऽपि बाधकमाह **तथैवेति** ।

## अनु०— तथैव व्यक्तिविज्ञानं व्यक्तित्वाभावदूषितम् ।

**यथा जातिविज्ञानं जातित्वाभावेन दूषितं, तथैव व्यक्तिविज्ञानं व्यक्तीनां व्यक्ति-शब्दवाच्यत्वविज्ञानं तन्निमित्तव्यक्तित्वजात्यभावेन दूषितम् ।**

**द्रव्यगुणकर्माणि खलु व्यक्तय उच्यन्ते । न च तत्र व्यक्तित्वं नाम सामान्यमस्ति, सत्तया परापरभावाभावात् । तस्मात् तत्र व्यक्तिशब्दवाच्यत्वज्ञानं न स्यात् । 'माभूद्व्यतिरिक्तं व्यक्तित्वं, सत्तैव व्यक्तिशब्दप्रवृत्तौ निमित्तं भविष्यती'ति चेन्न; सामान्यस्य पर्यायप्रवृत्तौ निमित्तत्वात्, सद्व्यक्तिशब्दयोरपर्यायत्वात्, अन्यथा संयोग्यादिशब्दानामपि द्रव्यादिशब्दपर्यायत्वं स्यात् ।**

**परि०— बाधकमाहेति** । अनुगतजात्यैव शक्त्यादिग्रहाङ्गीकार इति योज्यम् । **परापरभावेति** । व्यापकव्याप्यभावेत्यर्थः । परत्वे जात्यादेरपि व्यक्तित्वापत्तिः । अपरत्वे द्रव्यादिषु कस्यचिद्व्यक्तित्वं न स्यात् । तथा च सत्तया तुल्यव्यक्तिकत्वापत्त्या करीरत्वादेरिव न जातित्वमिति भावः । **सामान्यस्येति** । परजातेरपरजातेर्वे(रेवे)ति भावः । यथा घटत्वस्य करीरकलशकुम्भादिशब्दप्रवृत्तौ निमित्तत्वं तथा सत्तारूपपरसामान्यस्यापि सत् सत्यं पारमार्थिकमबाधितमित्यादिपर्यायशब्दप्रवृत्तौ निमित्तत्वात् सच्छब्दव्यक्तिशब्दयोरपर्यायत्वान्न व्यक्तिशब्दप्रवृत्तौ तस्य निमित्तत्वमित्यर्थः । **अन्यथेति** । सच्छब्दव्यक्तिशब्दयोरन्यूनानधिकविषयत्वमात्रेण पर्यायत्वोपगम इत्यर्थः ।

**यादु०— परापरेति** । न्यूनाधिकवृत्तित्वाभावादित्यर्थः । तथा च तुल्यत्वाख्यं जातिबाधकमायातीति भावः । **पर्यायप्रवृत्ताविति** । यथा घटत्वमेव करीरादिशब्दप्रवृत्तावपि निमित्तमित्यर्थः । **अन्यथेति** । सद्व्यक्तिशब्दयोरप्येकप्रवृत्तिनिमित्तकत्वेन पर्यायत्व इत्यर्थः । **संयोग्यादीति** । तत्रापि द्रव्यत्वस्यैकस्य निमित्तस्योभयत्र सम्भवादिति भावः ।

**वं०प०— व्यतिरिक्तं** व्यक्तिव्यतिरिक्तम् । **अपर्यायत्वादिति** । यथा घटकरीरशब्दयोः पर्यायत्वाद्घटत्वं करीरादिशब्दप्रवृत्तौ निमित्तं दृष्टं, एवं सद्व्यक्तिशब्दयोः पर्यायत्वे हि सत्ता व्यक्तिशब्दप्रवृत्तौ निमित्तं स्यात् । न चैवमित्यर्थः ।

**कं०रा०— सत्तयेति** । यद्यपि द्रव्यगुणकर्ममात्रवृत्तिव्यक्तित्वस्य तन्मात्रवृत्तिसत्तया समनीयततया व्याप्यव्यापकभावसत्त्वात् परापरभावाभावोक्तिरनुपपन्ना तथापि अत्र परापरशब्दाभ्यामधिकवृत्तित्वन्यूनवृत्तित्वे विवक्षिते । तथा च अनेन तुल्यत्वं जातिबाधकत्वेनोच्यते न सङ्कर इति न कश्चिद्दोष इति ध्येयम् । सद्व्यक्तिशब्दयोः समनियतप्रयोगवत्त्वेन पर्यायत्वे संयोग्यादिशब्दानां द्रव्यादिशब्दपर्यायत्वं स्यात् । समनियतप्रयोगवत्त्वस्य तत्रापि साम्यादिति भावः । यद्यपि सामान्यं सदित्यादिसच्छब्दप्रयोगस्य सामान्यादौ सत्त्वेऽपि व्यक्तिशब्दप्रयोगाभावान्नानयोः समनियतत्वं, तथापि प्रयोगशब्देन मुख्यप्रयोगो विवक्षितः । सामान्यादौ च स्वरूपसत्त्वमादायौपचारिकसच्छब्दप्रयोगसत्त्वेऽपि मुख्यस्य तस्याभावेन विवक्षितसच्छब्दप्रयोगव्यक्तिशब्द-

प्रयोगयोः समनियतत्वसद्भावान्न कश्चिद्दोष इति ध्येयम् । केचित्तु सच्छब्दप्रयोगशब्देन सत्तावच्छब्दप्रयोगो विवक्षितः । सामान्यादौ च स्वरूपसत्त्वमादाय सामान्यं सदित्यादि सच्छब्दप्रयोगसत्त्वेऽपि सत्तावच्छब्द-प्रयोगाभावात् न सत्तावच्छब्दप्रयोगव्यक्तिशब्दप्रयोगयोः समनियतत्वहानिरित्यप्याहुः ।

**श्रीनिधि०— परापरभावाभावादिति** । उभयोरपि केवलान्वयित्वादिति भावः । **पर्यायप्रवृत्तौ निमित्तत्वादिति** । पर्यायशब्दप्रवृत्तौ निमित्तत्वादित्यर्थः । एकनिमित्तका अनेके शब्दास्ते पर्यायशब्दाः यथा घटकरीरादयः शब्दा एकघटत्वनिमित्तकाः तथा प्रकृतेऽपि सद्व्यक्तिशब्दयोः सत्तामात्रनिमित्तकत्वे पर्यायत्वं स्यात् । तथा च व्यक्तिः सतीति सहप्रयोगाभावप्रसङ्ग इति भावः । ननु सद्व्यक्तिशब्दयोरपि पर्यायत्व-मस्त्येव । एकविषयत्वादित्यत आह **अन्यथेति** । **संयोग्यादीति** । आदिपदेन एक इत्यादीनां ग्रहणम् । तथा च द्रव्यं संयोगि एकं द्रव्यमिति सहप्रयोगो न स्यादिति भावः ।

**शे०वा०— जातिविज्ञानमिति** । जातीनां गोत्वादीनां विज्ञानं जातिशब्दवाच्यत्वज्ञानं जाति-विज्ञानमित्यर्थः । **जातित्वाभावेन** तन्निमित्तजातित्वजात्यभावेनेत्यर्थः । **सत्तयेति** । द्रव्यगुणकर्मसु विद्यमाना सत्ताभिन्ना सर्वाऽपि जातिः सत्ताव्याप्यैव दृष्टेत्यतस्तत्र वर्तमाना व्यक्तित्वरूपजातिरपि सत्ताव्याप्यैव इत्यतः सत्ता व्यापिका व्यक्तित्वं व्याप्यमित्येवं सत्तया व्याप्यव्यापकभावो व्यक्तित्वस्य वाच्यः । न चासौ युज्यते । सत्ताव्यक्तित्वयोर्द्रव्यगुणकर्ममात्रवृत्तितया सत्ताव्याप्यत्वनियामकस्य तदपेक्षया न्यूनवृत्तित्वस्य व्यक्तित्वे, व्यक्तित्वव्यापकतानियामकस्य तदपेक्षयाऽधिकवृत्तित्वस्य च सत्तायामभावादित्यर्थः । द्रव्यगुणकर्ममात्रवृत्ति-व्यक्तित्वस्य तन्मात्रवृत्तिसत्तापेक्षया न्यूनवृत्तित्वाभावेन सत्ताव्याप्यत्वस्य तदपेक्षयाऽधिकवृत्तित्वाभावेन तद्व्यापकत्वस्य च असम्भवात् समनियतजात्यन्तरस्य च तुल्यत्वरूपबाधकवशात् परेण द्रव्यादावनभ्युप-गमान्न व्यक्तित्वं जातिरित्यर्थ इत्याहुः । **सामान्यस्य पर्यायप्रवृत्ताविति** । घटशब्दप्रवृत्तिनिमित्तघटत्वस्यैव तत्पर्यायकरीरादिशब्दप्रवृत्तिनिमित्ततादर्शनादिति भावः । भवतु तर्हि तद्वदेव सच्छब्दप्रवृत्तिनिमित्तभूतसत्ताया एव तत्पर्यायभूतव्यक्तिशब्दप्रवृत्तावपि निमित्तत्वमित्यतो भवेदेवं यदि घटकरीरादिशब्दवत् सद्व्यक्तिशब्दयोरपि पर्यायत्वं स्यान्न च तदस्तीत्याह **सद्व्यक्तिशब्दयोरिति** । सहप्रयोगदर्शनान्न तयोः पर्यायत्वमिति भावः । **अन्यथेति** । एकप्रवृत्तिनिमित्तकत्वेन सद्व्यक्तिशब्दयोः पर्यायत्वाभ्युपगम इत्यर्थः । **संयोगादीति** । द्रव्यशब्दप्रवृत्तिनिमित्तस्य द्रव्यत्वस्यैव संयोगिशब्दप्रवृत्तिनिमित्तत्वसम्भवेनैकप्रवृत्तिनिमित्तकताया वक्तुं शक्य-त्वादिति भावः ।

**वा०र०—** परापरभावानुपपत्तेरित्येतदन्योन्यनिरूपितव्याप्यव्यापकभावानुपपत्तिरित्यर्थकमिति भ्रान्ति-निरासाय प्रकारान्तरेण व्याचष्टे **द्रव्यगुणकर्मस्विति** । ननु तत्तदपेक्षया न्यूनवृत्तित्वाधिकवृत्तित्वयोः कथं व्याप्यव्यापकाभावनियामकत्वम् । कृतकत्वनित्यत्वादौ तदभावेन व्यभिचारात् । न च समनियतजात्यङ्गीकारे तुल्यत्वं बाधकमित्यत्र तात्पर्यमिति वाच्यम् । तथा सति केचित्पक्षान्तर्भावप्रसङ्गेन अस्य पक्षस्य पार्थक्या-

योगादिति चेन्न । केचित्पक्षे समनियतत्वे तुल्यत्वरूपबाधकोक्तावपि तत्परित्यागेनाव्यवहित-'यदि तच्चास्ती'-त्युत्तरानुव्याख्यानोक्तानवस्थितेरेवात्र पक्षे बाधकत्वाश्रयणे तात्पर्येणादोषात् । अत्र केचित्पक्षे सत्तापेक्षया परत्वाश्रयणेन दोषोक्तिरयुक्ता । न ह्यत्र सङ्करस्थल इव परापरभावोपस्थितिरस्ति । किन्तु द्वयोरेकस्य व्याप्यत्वे अपरस्य तद्व्यापकत्वमित्येव । तथा च सर्वापि जातिः सत्ताव्याप्यैवेत्युक्तरीत्या तावन्मात्रखण्डनं विहाय द्वितीयस्य तद्व्याप्यत्वखण्डनं च व्यर्थमित्यस्वरसो ध्येयः ।

ननु सद्व्यक्तिशब्दयोः समनियतप्रवृत्तिमत्त्वात् पर्यायता इत्यत आह **अन्यथेति** । संयोग्यादीत्यादि-शब्देन प्रमेयत्वाभिधेयत्वादीनां समनियतानां ग्रहणम् । अथवा इत्येतावान् ग्रन्थः **अन्यथेति** । एकप्रवृत्ति-निमित्तकत्वेनेत्यतः प्राक् टीकायां पूरणीयः । नन्वत्र एकप्रवृत्तिनिमित्तकत्वे शङ्किते अपर्यायत्वेन तदनुपपत्तौ सिद्धान्तिनोक्तायां पर्यायत्वाङ्गीकारः परस्य अन्योन्याश्रयापत्त्या कल्पकाभावेन चायुक्त इति चेन्न । तुल्यत्व-रूपजातिबाधकं वदता परापरभावानापन्नतावन्मात्रव्यक्तिवृत्तिद्वितीयजात्यनङ्गीकारेण घटादिषु घटत्वाद्येकैकजात्यैव सङ्गतिग्रहणाद्युपपत्तिरिति तावत्परेण स्वीकृतम् । तत एव सत्तायाः प्रवृत्तिनिमित्तत्वमाशङ्कितम् । तत्रैकप्रवृत्ति-निमित्तकत्वमपर्यायत्वान्नेत्युक्ते परो वदति, नापर्यायत्वं स्वीक्रियते अपि तु अनेनैव निमित्तेन पर्यायत्वं च । एकप्रवृत्तिनिमित्तकत्वोपपत्तये पर्यायत्वं चाभ्युपगम्यत इति यावत् । एवं च सिद्धान्तिना सत्तया परापरभावा-नुपपत्तावुक्तायां परेणैकैव जातिः प्रवृत्तिनिमित्तभूता स्वीकृता । तदुपपत्तये पर्यायत्वं चाङ्गीकृतमिति न कश्चिद्दोष इति । पर्यायत्वं च क्रमप्रयोज्यत्वम् । वक्ष्यति च 'पर्यायत्वेन ते शब्दाः' इत्युत्तरानुव्याख्यानमूले क्रमप्रयोज्य-त्वेनेत्यर्थ इति । यद्यप्येकप्रवृत्तिनिमित्तकत्वस्थले तदुपपादकं पर्यायत्वमप्यस्तीत्युच्यते । तर्हि त्वद्रीत्यैव परापर-भावतापन्नधर्मान्तरमनभ्युपगम्य द्रव्यशब्दप्रवृत्तिनिमित्तस्य द्रव्यत्वस्यैव संयोगिशब्दप्रवृत्तिनिमित्तत्वसम्भवेनैक-प्रवृत्तिनिमित्तकतया वक्तुं शक्यत्वात् तत्रापि तदुपपादकं पर्यायत्वं स्वीक्रियतामित्याशयेन व्याचष्टे **द्रव्य-शब्देतीति** सर्वमनवद्यम् । मूले **संयोग्यादी**त्यादिपदेन सङ्ख्यावदादिशब्दचतुष्टयपरिग्रहः ।

**स०व्र०— सत्तया परापरभावाभावादिति** । व्यक्तित्वस्य द्रव्यगुणकर्ममात्रवर्तिनः तन्मात्रवृत्ति-सत्तापेक्षया न्यूनवृत्तित्वाभावेन सत्ताव्याप्यत्वानुपपत्तेः । तदपेक्षया अधिकवृत्तित्वाभावेन सत्ताव्यापकत्वा-सम्भवाच्चेत्यर्थः । न च सत्तासमानव्याप्तत्वमेव व्यक्तित्वस्य किं न स्यादिति वाच्यम् । सत्तासमानव्याप्त-जात्यन्तरस्य द्रव्यादौ परेणानभ्युपगमादिति भावः ।

**विठ्ठल०— परापरभावेति** । सामान्यादित्रयस्य निःसामान्यत्वेन सत्तासामान्यस्य द्रव्यादित्रयवृत्ति-तया व्यक्तित्वस्यापि तत्त्रितयमात्रवृत्तित्वेन न्यूनाधिकवृत्तित्वाभावात्तुल्यत्वं जातिबाधकमापतेदिति भावः । **सामान्यस्येति** । यथा घटत्वस्य करीरकलशादिशब्दप्रवृत्तौ निमित्तत्वं तथा सत्तासामान्यस्य सच्छब्दपर्यायभूत-सत्याबाधितपारमार्थिकादिपर्यायशब्दप्रवृत्तौ निमित्तत्वाद्व्यक्तिशब्दप्रवृत्तावपि सामान्यनिमित्तत्वे सद्व्यक्तिशब्दयोः पर्यायत्वं स्यात् । न चैतद्युज्यते । सद्व्यक्तिशब्दयोः पर्यायत्वस्याप्रमितत्वादित्यर्थः । सद्व्यक्तिपदयोरन्यूना-

धिकार्थत्वादस्तु पर्यायत्वमित्यत आह **अन्यथेति** । संयोगी समवायिकारणमित्यादिशब्दानामप्यन्यूनानधिकार्थत्वादिति भावः ।

**चषक— परापरभावाभावात्** व्याप्यव्यापकभावाभावात् । **सामान्यस्य** घटत्वादेः । **पर्यायप्रवृत्तौ** एकधर्मावच्छिन्ननिरूपकताकशक्तिघटकरीरादिपदप्रयोगे ।

* * *

**॥ अथ तत्रापि सत्तया परापरभावशून्यमपि व्यक्तित्वं द्रव्यगुणकर्मस्वस्तीति उक्तदूषणस्याप्रयोजकत्वशङ्का, तथात्वेऽनवस्थापत्त्या तन्निरासश्च ॥**

**२४५ सु०— ननु शब्दमात्रस्य जातिनिमित्तत्वात् सत्तया परापरभावशून्यमपि द्रव्यगुणकर्मसु व्यक्तित्वमस्त्येवेत्यतो नोक्तदोष इत्यत आह यदीति ।**

## अनु०— यदि तच्चास्ति तस्यापि विशेषेष्वनवस्थितिः ।

**तर्हि तस्य व्यक्तित्वस्य अपि विशेषेषु व्यक्तिषु प्रवेशः स्यात् । तथा च अनवस्थितिः इति योजना ।**

**तथाहि । यः शब्दोऽनेकवाचकः स सर्वो जातिनिमित्तक इति स्वीकृत्य द्रव्यगुणकर्मसु व्यक्तित्वं नाम जातिर्यद्यङ्गीक्रियते, तर्हि तस्यामन्यासु च जातिषु जातिशब्दप्रवृत्तये जातित्वं नाम जातिरङ्गीकर्तव्या स्यात् । ओमिति चेत् । तर्हि सा व्यक्तित्वजातिरपि जातित्वजातिं प्रति व्यक्तिः स्यात्, न च सा स्वरूपे वर्तते; ततो द्रव्यादित्रये तस्यां च व्यक्तिशब्दप्रवृत्त्यर्थमपरं व्यक्तित्वमङ्गीकरणीयम् । तत्र पुनर्जातिशब्दप्रवृत्तये जातित्वमभ्युपगन्तव्यमिति साऽपि तदाश्रयतया व्यक्तिः स्यात् । तस्यां पुनर्व्यक्तित्वान्तरमित्येवमनवस्थेति ।**

**परि०—** अन्यथानुपपत्त्या सत्त(आप्तत)या तुल्यव्यक्तिकस्यापि व्यक्तित्वस्य जातित्वमुपेयत इति शङ्कते **ननु शब्दमात्रेति** । **तस्यामन्यासु चेति** । व्यक्तित्वरूपजातौ द्रव्यगुणकर्मत्वादिरूपासु चेत्यर्थः ॥ **न च सेति** । व्यक्ति(जाति)त्वजातिरित्यर्थः । स्ववृत्तित्वस्याप्रामाणिकत्वादिति भावः । **तस्यां चेति** । व्यक्तित्वजातौ चेत्यर्थः ।

**गु०दी०— न च सा स्वरूपे वर्तत** इत्यत्र **सा** पूर्वं सकलव्यक्तिषु व्यक्तिशब्दव्यवहाराय कल्पिता व्यक्तित्वजातिः **स्वरूपे** स्वस्वरूपे न वर्तते किन्तु स्वेतरव्यक्तिष्वेव । **ततो द्रव्यादित्रये तस्यां च** इत्यत्र **तस्यां** जातित्वजातौ व्यक्तीभूतायां व्यक्तित्वजातावपरं प्राक्कल्पितव्यक्तित्वजातेरन्यद्व्यक्तित्वमित्यर्थः । **जातित्वमभ्युपगन्तव्यम्** इत्यत्र जातित्वं प्राक्कल्पितजातित्वादन्यज्जातित्वम् । **साऽपि तदाश्रयतया** इत्यत्र **साऽपि** जातित्वजातिरपीतरजातिषु स्वस्यां च जातित्वव्यवहाराय स्वव्यतिरिक्तजातित्वाख्यजात्यन्तरवती वक्तव्या ।

**वं०प०— अनेकवाचक इति** । एकवाचकत्वे तच्छब्दस्य तत्र प्रवृत्तौ न जातिर्निमित्तम् । व्यक्त्यभेदस्य जातिबाधकत्वेन तत्र जातेरभावात् । यथाऽऽकाशत्वमिति भावः । **तस्यां** व्यक्तित्वजातौ । **अन्यासु** द्रव्यत्वादिरूपासु । **सा** व्यक्तित्वजातिः । **तस्यां** व्यक्तित्वजातौ । **तत्र** व्यक्तित्वे । **साऽपि** व्यक्तित्वरूपव्यक्तिनिष्ठा व्यक्तित्वजातिः ।

**श्रीनिधि०— द्रव्यादित्रये तस्यां च** इत्यत्र द्रव्यादिग्रहणं जातेरनेकव्यक्तिसिद्ध्यर्थम् । अनवस्थोपयोगाभावादिति द्रष्टव्यम् ।

**शे०वा०—** द्रव्यगुणकर्मसु व्यक्तित्वसामान्यनिराकरणावसरे विशेषेष्वनवस्थितिप्रतिपादनासङ्गतिमाशङ्क्यापेक्षितं पूरयन् प्रकृतोपयोगितया व्याचष्टे **तर्हीत्यादिना** । ननु कथं व्यक्तित्वस्य व्यक्तिषु प्रवेशः कथं च तन्मात्रेणानवस्था इत्यतस्तदुभयमुपपादयितुं प्रतिजानीते **तथा हीति** । **अङ्गीकर्तव्येति** । अनेकवाचकस्य सर्वस्यापि शब्दस्य जातिनिमित्तकत्वाङ्गीकाराज्जातिशब्दस्य च अनेकवाचकत्वादिति भावः । **न च सेति** । स्ववृत्तेरप्रामाणिकत्वादिति भावः । **तत्रेति** । अपरस्मिन्व्यक्तित्व इत्यर्थः । **साऽपीति** । व्यक्तित्वान्तररूपा जातिरपीत्यर्थः । **तदाश्रयतयेति** । जातित्वजात्याश्रयतयेत्यर्थः । **तस्यामिति** । व्यक्तित्वजातिरूपव्यक्तावित्यर्थः । **व्यक्तित्वान्तरमिति** । अन्यथा व्यक्तिशब्दप्रवृत्त्यनुपपत्तेः । स्ववाक्ये स्ववृत्तेश्च अप्रामाणिकत्वादिति भावः ।

**वा०र०— प्रतिपादनासङ्गतिमिति** । विशेषाख्यषष्ठपदार्थस्येहाप्रस्तुतत्वेनानवस्थित्या तन्निराकरणस्यासङ्गतत्वादित्यर्थः । **प्रकृतेति** । नायं विशेषशब्दः षष्ठपदार्थपरः । अपि तु सामान्यविशेषेत्यादौ प्रयुज्यमानव्यक्तिरूपविशेषविषय इति । प्रकृते व्यक्तिष्वित्येवोक्तं भवतीत्येवं प्रकृतोपयोगितयेत्यर्थः । अप्रामाणिकत्वादिति भाव इत्यनन्तरं तस्यां चेति व्यक्तित्वजातिरूपव्यक्तावित्यर्थ इति वाक्यं, तदनन्तरं तत्रेतीति ग्रन्थपाठः । तस्यामितीत्यनन्तरं व्यक्तित्वावान्तरजातिरूपव्यक्तावित्यर्थ इति पाठः । **अन्यथा व्यक्तीति** । स्ववाक्ये स्ववृत्तेश्चाप्रामाणिकत्वादिति पाठः । अन्यथापाठो लेखकदोषात् ।

**विट्ठल०—** व्यक्तिशब्दव्युत्पत्त्यन्यथानुपपत्त्या तुल्यत्वं न जातिबाधकम्, अतो व्यक्तित्वजातिमङ्गीकृत्य व्यक्तिशब्दव्युत्पत्तिं ब्रूम इति शङ्कते **ननु शब्दमात्रस्येति** । व्यक्तित्वजातेर्जातित्वजातिं प्रति

व्यक्तित्वेऽपि तत्र व्यक्तिशब्दव्युत्पत्त्यर्थं नापरा व्यक्तित्वजातिरङ्गीकार्या व्यक्तित्वे व्यक्तिशब्दस्य स्वरूपनिब-न्धनत्वोपपत्तेरित्यत आह **न च सेति** । **तस्यां च** इत्यस्य व्यक्तित्वजातावित्यर्थः । **तत्र पुनरिति** । तत्र व्यक्तित्वजातिधर्मिकव्यक्तित्वजातावित्यर्थः । **साऽपीति** । व्यक्तित्वधर्मिकव्यक्तित्वजातिरपीत्यर्थः ।

**॥ इति सत्तया परापरभावशून्यमपि व्यक्तित्वं द्रव्यगुणकर्मस्वस्तीति उक्तदूषणस्याप्रयोजकत्वशङ्का, तथात्वेऽनवस्थापत्त्या तन्निरासश्च ॥**

**॥ इति व्यक्तीनां व्यक्तिशब्दवाच्यत्वविज्ञानमपि व्यक्तित्वजात्यभावेन दूषितम् ॥**

* * *

**॥ अथ तत्रान्ते अनुगतस्य स्वरूपत्वसामान्यस्याभावात् सकलपदार्थस्वरूपं स्वरूपशब्दवाच्यं न स्यादिति स्थलान्तरे च बाधकम् ॥**

२४६ **सु०**— स्थलान्तरे बाधकमाह **कथमिति** ।

अनु०— कथं स्वरूपत्वमपि ज्ञायतेऽनुगतं यदि ।
एकव्युत्पत्तिपर्यन्तमनवस्थादिदूषितम् ॥

अत्र 'स्वरूपमि'त्यध्याहर्तव्यम् ।

ततश्चायमर्थः । यद्यनुगतसामान्यनिबन्धनैव सर्वत्र व्युत्पत्तिः तदा सकलपदार्थ-स्वरूपं स्वरूपशब्दवाच्यतया कथं ज्ञायते, अनुगतस्य स्वरूपत्वसामान्यस्याभावात् स्वरूपेषु स्वरूपशब्दव्युत्पत्तिर्न स्यादिति ।

ननु च सर्वस्वरूपेष्वनुगतं स्वरूपत्वमङ्गीक्रियते मया अतो नोक्तदोष इत्यत उक्तं '**स्वरूपत्वमपि यद्यनुगतमङ्गीक्रियते** तदा **अनवस्थादिदूषितं** भवती'ति । तथा हि । सर्वेषु स्वरूपेषु यत्स्वरूपशब्दप्रवृत्तिनिमित्तं स्वरूपत्वं नाम सामान्यमभ्युपगम्यते, तदपि ताव-त्स्वरूपमेव । न च तत्र स्वयमेव वर्तते, आत्माश्रयत्वस्यालौकिकत्वात्; अतस्तस्मिन्नन्येषु च स्वरूपेषु स्वरूपशब्दप्रवृत्तयेऽन्यत्स्वरूपत्वं नाम सामान्यमङ्गीकार्यम्, तदपि स्वरूप-मेवेत्यनवस्था ।

**आदिपदेन अन्त्यविशेषस्वरूपेषु स्वरूपत्वसामान्याङ्गीकारेऽत्यन्तव्यावृत्तिधीहेतुत्वं न स्यात् । समवायाभावस्वरूपे च सम्बन्धाभाव इति ज्ञातव्यम् ।**

**अनवस्थाद्यनिष्टप्रसङ्गस्य विपर्यये पर्यवसानं सूचयति एकव्युत्पत्तिपर्यन्तमिति ।**

**एकं केवलमनुगतसामान्यहीनमिति यावत् । तस्मिन्व्युत्पत्तिरेकव्युत्पत्तिः, तत्पर्यन्तं, तावदिदं दूषणमुपप्लवत एव । यावदनुगतसामान्यनिबन्धनैव सर्वत्र व्युत्पत्तिरिति पक्षं परित्यज्य सामान्यहीनेऽपि व्युत्पत्तिमङ्गीकुर्यादित्यर्थः । अनवस्थादिपरिहाराय अनुगत-सामान्येन विनाऽपि व्युत्पत्तिरङ्गीकरणीयेति भावः ।**

**परि०— बाधकमाहेति** । व्युत्पत्त्यादेरनुगतजातिहेतुकत्वे इति योज्यम् । **समवायाभाव-स्वरूपे चेति** । समवायाभावयोः स्वरूपे च स्वरूपत्वजातिस्वीकारे तत्र समवायानभ्युपगमेन सम्बन्धाभाव इत्यर्थः । **इदं दूषणमिति** । मूले दूषितमिति पदं भावार्थनिष्ठान्तमिति भावः ।

**गु०दी०— अनवस्थादिदूषितम्** इति मूलस्य अनवस्थादिदूषितं परमतं स्यात् । अनवस्थादिदूषणं स्यादिति वा योजना ।

**यादु०— दूषणं भवतीति** । अनेनानवस्थादिदूषितमिति मूले भावे क्तो भवतीत्यध्याहार इति सूचयति ।

**वं०प०— न स्यादिति** । विशेषेष्वनुगतस्वरूपत्वजात्यङ्गीकारे तेषामपि साजात्यापत्त्यैकस्मिन्पार्थिवे परमाणौ सजातीयपरमाण्वन्तरव्यावृत्तिबोधकत्वं न स्यादित्यर्थः । रूपहानिरिति त्वदुक्तेरिति भावः । **स्वरूपे चेति** । स्वरूपत्वजात्यङ्गीकारे इति वर्तते । समवायस्वरूपस्य तन्निष्ठस्वरूपत्वस्य च न संयोगोऽद्रव्यत्वात् । नापि समवायः समवायान्तराभावात् । तस्यैव चाङ्गीकारे आत्माश्रयात् । तथाऽभावस्वरूपतन्निष्ठस्वरूपत्वयोश्च न संयोगसमवायौ । उक्तरीत्याऽसम्भवादेवेत्यर्थः । 'रूपहानिरसम्बन्धः' इति समवायस्वरूपे जात्यङ्गीकारे सम्बन्धाभावस्य बाधकतया परेणोक्तत्वादिति भावः । **अङ्गीकुर्यादिति** । एवमङ्गीकारे तु नोपप्लव इत्याशयः । सूचितं विपर्ययपर्यवसानं दर्शयति **अनवस्थादीति** ।

**श्रीनिधि०— समवायाभावस्वरूपे च सम्बन्धाभाव इति** । न स्यादिति अनुवर्तते । **अन-वस्थाद्यनिष्टप्रसङ्गस्येति** । आदिपदेन रूपहान्यादिकं गृह्यते । यद्यनु[illegible]निमित्त एव व्युत्पत्तिः स्यात् तर्हि अनवस्था स्यादित्यस्य प्रसङ्गस्य । अननुगतधर्मनिमित्तेत्यनुक्तेः सूचयतीत्युक्तम् ।

**शे०वा०— अत्र स्वरूपमित्यध्याहर्तव्यमिति** । उपलक्षणं चैतत् । स्वरूपशब्दवाच्यतयेत्यध्याहर्तव्यमित्यपि द्रष्टव्यम् । दूषितं भवतीत्यत्र दूषितमिति भावे क्तः । भवतीत्यध्याहृतोक्तिः । तथा च दूषणं भवतीत्यर्थः । अत एवोत्तरत्र दूषणमित्येवानुवाद इति द्रष्टव्यम् । **अत्यन्तव्यावृत्तिधीहेतुत्वं न स्यादिति** । अनुगतस्वरूपत्वसामान्याश्रयत्वात् तेषां द्रव्यगुणकर्मवदनुगतकल्पत्वेनानुवृत्तिबुद्धिहेतुत्वस्यापि सद्भावादिति भावः। ततश्च स्वरूपहानिरिति हृदयम् । समवायाभावस्वरूपे चेत्यतःपरं स्वरूपत्वसामान्याङ्गीकार इत्यनुवर्तते ।

**वा०र०—** 'तथैव व्यक्तिविज्ञानमि'ति पूर्वत्र स्वरूपं अनुगतस्वरूपत्वाभावे कथं ज्ञायत इति प्रथमतो वचनानन्तरं स्वरूपत्वमनुगतं यदीत्यादेर्वक्तव्यत्वात् प्रथमत एवैतद्वचनासङ्गतिरित्यतोऽत्रापि अध्याहारेण वाक्यभेदाश्रयणेन योजनाया अभिप्रेतत्वान्नानुपपत्तिरित्याशयेनाह मूले **अत्रेत्यादिना** । अनेनानुगतं यदि सामान्यं तदा स्वरूपं कथं ज्ञायते इत्येका योजना । अनुगतं स्वरूपत्वमनुगतं यदि तदा अनवस्थादिदूषितमित्यपरा योजनेति सूचितमिति ज्ञेयम् । स्वरूपमित्यध्याहारोक्तेरध्याहारान्तरोपलक्षणत्वमाह **उपलक्षणं चेति । अनुवाद इति । तावदिदं दूषणमुपप्लवत एवेति** मूले अनवस्थादि दूषितमिति दूषितशब्दस्य दूषणपदेनानुवादः । **ततश्च स्वरूपहानिरितीति** । अनेन रूपहानिरूपं जातिबाधकमुक्तम् । एवमुत्तरत्रापि रूपहानिरूपजातिबाधकैव ग्राह्या । अत एवोत्तरत्र न रूपहानिरिति मूलकृद्वक्ष्यतीति ज्ञेयम् । आदिपदेनेति मूलवाक्ये 'इति ज्ञातव्यमि'त्यतः प्राग् 'इति दूषणस्य सङ्ग्रह' इति शेषः ।

**विठ्ठल०— स्वरूपमित्यध्याहर्तव्यमिति** । तथा च कथं स्वरूपं ज्ञायत इत्येतावद्भिन्नं वाक्यमिति भावः । **आदिपदेनेति** । तथा च द्रव्यादिसप्तपदार्थस्वरूपेषु स्वरूपत्वजात्यभ्युपगमे अनवस्था साधारणं दूषणं, विशेषसमवायाभावस्वरूपेषु तदभ्युपगमे, असाधारणं च दूषणं मूलोक्तमिति भावः । **समवायाभावस्वरूप इति** । समवायाभावयोः स्वरूपे स्वरूपत्वजातिस्वीकारे तत्र संयोगसमवाययोरनभ्युपगमात् सम्बन्धाभाव इत्यर्थः । **तस्मिन्व्युत्पत्तिरिति** । अनुगतसामान्यहीने शक्तिग्रह इत्यर्थः । **इदं दूषणमिति** । अनेनानवस्थादिदूषितमिति मूले भावे क्तप्रत्यय इत्युक्तं भवति । उपप्लवत इत्यध्याहारः । भवतीति क्वचित्पाठः । पर्यन्तपदाभिप्रेतमाह **यावदनुगतेति** । विपर्ययपर्यवसानाभिप्रायमाह **अनवस्थादिपरिहारायेति** ।

**चषक— समवायाभावस्वरूपे** समवायस्वरूपाभावस्वरूपे । **सामान्यनिबन्धनेति** बहुव्रीहिः । निबन्धनशब्दो नियामकवचनः ।

**॥ इति अनुगतस्य स्वरूपत्वसामान्यस्याभावात् सकलपदार्थस्वरूपं**
**स्वरूपशब्दवाच्यं न स्यादिति स्थलान्तरे च बाधकम् ॥**
**॥ इति जातौ जात्यनङ्गीकारात् 'गोत्वं नित्यं जातित्वात्' इत्यादिव्याप्तिज्ञानाद्यभावप्रसङ्गः ॥**

* * *

॥ अथ तत्र तत उक्तप्रसङ्गस्य असङ्गतत्वशङ्का तन्निरासश्च ॥

॥ अथ च तत्र अनुगतसामान्यदूषणोपसंहारः ॥

२४७ **सु०**— "नन्विदं सकलमप्यसङ्गतम् ॥ तथा हि । यदुक्तं 'जातितश्चेत् कथं तास्वि'ति; तत्तावदसत् । जातिषु जात्यन्तराभावेऽपि नित्यत्वे सत्यनेकानुगतत्वेनोपाधिना जातिशब्दव्युत्पत्त्युपपत्तेः । अस्तु वा जातिषु जातित्वं नाम जातिः; न च अनवस्था, जातित्वे जातिशब्दस्य स्वरूपनिबन्धनत्वोपपत्तेः ॥ 'तथैव व्यक्तिविज्ञानमि'त्येतदप्यसत् । व्यक्तित्वाभावेऽपि जातिव्यञ्जकत्वोपाधिना द्रव्यादिषु व्यक्तिशब्दप्रवृत्त्युपपत्तेः । व्यक्तित्व-जात्यङ्गीकारेऽपि नानवस्था, व्यक्तित्वे व्यक्तिशब्दस्य स्वरूपनिमित्तत्वसम्भवात् ॥ यदपि 'कथमि'त्यादि तदयुक्तम्, प्रमाणगम्यत्वोपाधिनैव स्वरूपशब्दव्युत्पत्त्युपपत्तेः । स्वरूप-त्वाभ्युपगमेऽपि नानवस्था, तत्र स्वरूपशब्दस्य स्वरूपमात्रनिबन्धनत्वात् । अन्त्यविशेषेषु उपाधिनिबन्धन एवेति न रूपहानिः । समवायादौ स्वरूपमेव सम्बन्धः ॥ इत्यतो न कश्चिद्दोषः" इत्याशङ्कां परिहरन्ननुगतसामान्यदूषणमुपसंहरति **कल्पनेति** ।

## अनु०— कल्पनागौरवात्तेन युक्ता नानुगकल्पना ।

'सर्वत्र व्यावृत्तमेव वाच्यं, शब्दप्रवृत्तौ निमित्तं च । व्युत्पत्तिस्तु सादृश्य-निबन्धने'त्येकरूपकल्पनेन सर्वसामञ्जस्ये, क्वचिदनुगतं सामान्यं निमित्तं, क्वचिदुपाधिः, क्वचित्स्वरूपमेवेत्यनेककल्पने कल्पनागौरवं स्यादित्यर्थः । **तेन** बाधकसद्भावेन साधका-भावेन च ।

नन्वनुगतत्वाभावे कथं गोत्वादिकं सामान्यम् । अननुगतत्वेऽपि गुणकर्मवदवान्तर-भेदस्य कल्पनीयत्वादिति ।

परि०— **कथं गोत्वादिकं सामान्यमिति** । योगार्थस्याभावादिति भावः । **अवान्तर-भेदस्येति** । द्रव्याश्रितयोर्गुणकर्मणोः प्रत्येकव्यक्तिनिष्ठत्वाविशेषेऽपि कर्मान्यत्वे सति जातिमात्रा-श्रयत्वा(भावा)द्युपाधिना गुण इति, संयोगविभागासमवायित्वोपाधिना कर्मेति भेदः कल्प्यते तथा त्वदभिमतजातेर्द्रव्यगुणकर्मसामान्याश्रितायाः प्रतिव्यक्ति व्यावृत्तत्वाविशेषेऽप्यनेकेष्वेकशब्दव्युत्पत्ति-हेतुसादृश्यं प्रति प्रयोजकत्वाद्युपाधिना सामान्यमित्युच्यत इत्यवान्तरभेदस्य कल्प्यत्वादित्यर्थः ।

*अनुगतजात्यैव व्युत्पत्त्याद्यङ्गीकारे बाधकोक्तिः ॥*

**यादु०— कथं गोत्वादिकं सामान्यमिति** । समानानां भावः सामान्यमिति योगेन हि सामान्यशब्दवाच्यत्वं गोत्वादीनां वाच्यं, तत्तेषामननुगतत्वे **कथं** न कथमपि सम्भवतीति भावः । न सामान्यशब्द उक्तरीत्या सर्वत्र यौगिकः । तथात्वे रूपादिविशेषापेक्षया गुणे उत्क्षेपणादिविशेषापेक्षया कर्मणि च सामान्यशब्दप्रयोगानुपपत्तेः । न हि त्वन्मते गोत्वादिकमिव गुणकर्मणी अप्यनुगते । किन्त्ववान्तरभेदभिन्नसर्वात्मके वस्तुनि रूढे एवेत्याशयेनोत्तरमाह **गुणकर्मवदिति** । यथा रूपादिसर्वविशेषात्मकेऽननुगतेऽपि गुणेऽवान्तरभेदवत्त्वमात्रेण रूपादिविशेषापेक्षया सामान्यशब्दव्यवहारः । यथा वा तेनैव निमित्तेनोत्क्षेपणादिसर्वविशेषात्मकेऽननुगतेऽपि कर्मण्युत्क्षेपणादिविशेषापेक्षया सामान्यशब्दव्यवहारः तथा सर्वतत्तद्गोत्वरूपविशेषात्मकेऽननुगतेऽपि गोत्वे सामान्यशब्दव्यवहार उपपद्यत एव । अवान्तरभेदवत्त्वरूपस्य निमित्तस्यात्रापि कल्पयितुं शक्यत्वात् इत्यर्थः । न च गुणकर्मणोरनुगतसामान्याश्रयत्वादेव सामान्यरूपत्वमिति वाच्यम् । तथाऽपि गुणादेरननुगतत्वात् । न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवतीति भावः । समानानां भावः सामान्यमिति योगेन सामान्यशब्दवाच्यमस्मन्मते सादृश्यमेवेत्यवधेयम् ।

**वं०प०— स्वरूपनिबन्धनत्वेति** । जातित्वस्वरूपनिबन्धनत्वेत्यर्थः । तथा च जातित्वं स्वनिर्वाहकमिति भावः । एवमग्रेऽपि । **उपाधिनिबन्धन एवेति** । यावन्नित्यद्रव्यवृत्तित्वेनोपाधीत्यर्थः । जातिनिबन्धनतायामेव हि असम्बन्धनं जातिबाधकमिति भावः । **समवायादाविति** । समवायेऽङ्गीकृतेन स्वरूपत्वसामान्येन सह स्वरूपमेव सम्बन्धः । असम्बद्ध इत्यस्यातिरिक्तसम्बन्धाङ्गीकारविषयत्वात् । आदिपदेनाभावो ग्राह्यः । तथा च अभावेऽपि स्वरूपत्वसामान्येन सह स्वरूपमेव सम्बन्ध इत्यर्थः । **क्वचिद्** द्रव्यादौ । **क्वचित्** सामान्यादौ । **क्वचित्** समवायाभावयोः । नन्वनुगतजात्यभावे गोत्वादीनां सामान्यशब्दवाच्यत्वं न सम्भवति । समानानां सदृशानामनेकेषां भाव एको धर्म एव हि सामान्यम् । तथा च अनेकानुगतत्वरूपतल्लक्षणाभावात् सामान्यशब्दवाच्यत्वं कथमित्याशङ्कते **नन्वनुगतत्वाभाव इति** । उक्तरीत्या सामान्यशब्दो गोत्वादौ न यौगिकः । तथात्वे रूपादिविशेषापेक्षया कर्मणि च सामान्यशब्दप्रयोगानुपपत्तेः । न हि गोत्वादिकमिव गुणकर्मणी अप्यनुगते । अतोऽवान्तरभेदभिन्नसर्वविशेषात्मके वस्तुनि रूढः । तथा च अवान्तरभेदभिन्नरूपादिसर्वविशेषात्मकत्वात् अननुगतोऽपि गुणः सामान्यमित्युच्यते । एवमवान्तरभेदभिन्नोत्क्षेपणादिसर्वविशेषात्मकत्वादननुगतमपि कर्म सामान्यमित्युच्यते । एवमिहापि तत्तद्गोत्वादीनामननुगतानां बहूनां प्रातिस्विकानां विद्यमानत्वात् तत्तद्गोत्वादिरूपसर्वविशेषात्मकत्वादननुगतमपि गोत्वादिकं सामान्यमित्युच्यते । तथा च अवान्तरभेदवत्त्वमेव सामान्यशब्दार्थ इत्याह **गुणकर्मवदिति** । **भेदस्येति** । भेदवत्त्वस्येत्यर्थः ।

**कं०रा०— स्वरूपनिबन्धनत्वेति** । जातित्वस्य स्वरूपतयैवानुगतत्वेन तत्र जात्यन्तरापेक्षाविरहाज्जातित्वे जातिशब्दस्य स्वरूपनिमित्तकत्वमुपपन्नमिति भावः । **निमित्तं चेति** । व्यावृत्तमेवेत्यन्वयः ।

**श्रीनिधि०— उपाधिनिबन्धन एवेति** । अन्त्यव्यावर्तकत्वलक्षणोपाधिनिबन्धन इत्यर्थः । एवं च

प्रसङ्गस्यापादकासिद्धिरिति भावः । समवायादौ तस्मिन्नभावे च जातिनिमित्तक एव तत्र शब्दः, तथा च सम्बन्धाभावो न स्यादिति तु इष्टापादनमिति भावः । **क्वचिदनुगतं सामान्यं निमित्तमिति** । गवादिशब्दाप्रवृत्तावित्यर्थः । **क्वचिदुपाधि**रित्यादि स्पष्टम् । **कथं गोत्वादिकं सामान्य**मिति वदतः कोऽभिप्रायः । किं नित्यमेकमनेकानुगतं सामान्यमिति लक्षणासम्भवः स्यादिति, उत गोव्यक्त्यन्तरे तदभावात् गोत्वप्रतीतिरेव न स्यादिति । आद्यस्त्विष्ट एव । द्वितीय आह **गुणकर्मादिवदिति** । अयमाशयः । गोत्वादिकं नानुगतमिति वदतां नैकमेकत्रैव गोत्वमङ्गीकार्यमित्याशयः, किन्तु तदनेकाश्रितमपि अवान्तरभेदभिन्नं नैकमित्यङ्गीकार्यमिति । एवञ्चान्यत्र प्रतीतिरप्युपयुज्यते । यथा गुणकर्मादीनामननुगतत्वेऽपि अवान्तरभेदमादाय सर्वत्र गुणप्रतीतिः क्रियाप्रतीतिश्च । एकाकारप्रतीतिस्तु सादृश्यनिबन्धनैवेति ।

**शे०वा०— उपाधिनिबन्धन एवेति** । न च उपाधेरप्यनुगतसामान्यघटितत्वेन तदाश्रयत्वे विशेषाणामनुगतसामान्याश्रयत्वम् अवर्जनीयमित्यनुगतत्वप्राप्तेः कथं न स्वरूपहानिरिति वाच्यम् । तावता परम्परासम्बन्धेनानुगतधर्माश्रयत्वप्राप्तावपि साक्षात्सम्बन्धेन तदनाश्रयत्वेनानुगतत्वाप्राप्तेः साक्षात्सम्बन्धेन तदाश्रयताया एवानुगतत्वप्रयोजकत्वादित्याशयात् ।

गोत्वादेरननुगतत्वे सामान्यशब्दवाच्यत्वानुपपत्तिमाशङ्कते **नन्विति** । समानानां भावः सामान्यमिति यौगिकसामान्यशब्दवाच्यतायास्तदनुगततायामेवोपपत्तेरित्याशयः । सत्यम् । समानानां भावः सामान्यमिति सामान्यशब्दो यौगिक इति, किन्तु सादृश्य एव तथा, न तु सर्वत्र । अन्यथा रूपादिविशेषापेक्षया गुणे, उत्क्षेपणादिविशेषापेक्षया कर्मणि च सामान्यशब्दप्रयोगाभावप्रसङ्गात् । त्वन्मते गोत्वादेरिव गुणकर्मणोरप्यनुगतत्वाभावात् किन्त्ववान्तरभेदभिन्नसर्वात्मके वस्तुनि रूढश्च । ततश्च रूढ्या सामान्यशब्दवाच्यत्वाद्गोत्वादेः न तेनानुगतत्वसिद्धिरित्याशयेन समाधत्ते **गुणकर्मवदिति** । यथा हि रूपादिसर्वविशेषात्मकेषु अननुगतेऽपि गुणेऽवान्तरभेदवत्त्वमात्रेण रूपादिविशेषापेक्षया सामान्यमिति व्यवहारो, यथा वा उत्क्षेपणादिसर्वविशेषात्मके अननुगतेऽपि कर्मण्युत्क्षेपणाद्यपेक्षयोक्तेनैव निमित्तेन सामान्यमिति व्यवहारः । तथा सर्वतत्तद्गोत्वरूपविशेषात्मकेऽननुगतेऽपि गोत्वेऽवान्तरभेदवत्त्वरूपनिमित्तमात्रकल्पनया युज्यत एव सामान्यमिति व्यवहारः । न च गुणकर्मणोरप्यनुगतसामान्याश्रयत्वात् सामान्यव्यवहारविषयत्वमिति वाच्यम् । तथाऽपि गुणकर्मणोरननुगतत्वापरिहारात् । न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवतीत्याशयः । केचित्त्वननुगतत्वस्य गुणकर्ममात्रवृत्तितानियमाद्गोत्वादेरप्यननुगततायां गुणकर्मणोरन्यतरत्वप्रसक्त्या तद्भिन्नसामान्यरूपपदार्थान्तरत्वानुपपत्तिप्रसङ्गान्न तस्याननुगतत्वमिति शङ्कार्थः । एवं सति गुणकर्मणोरप्यननुगतत्वं न स्यात् । तत्राप्यननुगतत्वस्य गुणमात्रवृत्तित्वनियमाश्रयणेनोत्क्षेपणादेरननुगततायां गुणत्वप्रसक्त्या तद्भिन्नकर्मरूपपदार्थान्तरत्वानुपपत्तिप्रसङ्गस्य, कर्ममात्रवृत्तित्वनियमाश्रयणेन च रूपादेरननुगततायां कर्मत्वप्रसक्त्या तद्भिन्नगुणरूपपदार्थान्तरत्वानुपपत्तिप्रसङ्गस्य च तद्बाधकस्य तुल्यत्वात् । यदि च अननुगतत्वस्य गुणमात्रवृत्तित्वे कर्ममात्रवृत्तित्वे च प्रमाणाभावेन तन्नियमा-

सिद्ध्योभयवृत्तित्वादुत्क्षेपणादेर्वा रूपादेर्वाऽननुगततायामप्यवान्तरभेदसद्भावेन गुणत्वकर्मत्वयोरप्रसङ्गान्नोक्तरीत्या पदार्थान्तरत्वानुपपत्तिरिति मन्यसे, हन्त तर्ह्यननुगतत्वस्य प्रमाणाभावेन गुणकर्ममात्रवृत्तित्वनियमस्याप्यसिद्ध्या गोत्वादेरननुगतत्वेऽप्यवान्तरभेदसद्भावेन गुणकर्मान्यतरत्वाप्रसङ्गान्न गुणकर्मभिन्नपदार्थत्वानुपपत्तिरिति युज्यते तस्याननुगतत्वमिति परिहारार्थं इत्यप्याहुः ।

**वा०र०— गोत्वादेरिवेति** व्यतिरेकदृष्टान्तः । तर्हि गुणकर्मादौ कथं सामान्यशब्दः प्रवर्तत इति । **किं त्विति** । उत्तरमाह **अवान्तरेति** । सामान्यशब्द इति वर्तते । सादृश्यविषयकयोगापेक्षया चशब्दः । अनुगतेऽप्यवान्तरेति सम्बन्धाशयेन गुणकर्मवदिति प्रतीकोपादानमित्यदोषः ।

**विठ्ठल०— स्वरूपनिबन्धनत्वेति** । ईश्वरे ईश्वरशब्दस्य जात्यभावेऽपि ईश्वरस्वरूपनिबन्धनत्ववदिति भावः । **व्यक्तित्वजात्यङ्गीकार इति** । व्यक्तित्वजातौ जातिशब्दप्रवृत्तये जातित्वे जातेरभावस्योक्तत्वादिति भावः । **यदपि कथमिति** । कथं स्वरूपत्वमपीत्यत्र स्वरूपेषु स्वरूपशब्दव्युत्पत्तिर्न स्यादिति यदुक्तं तदयुक्तमित्यर्थः । **सर्वत्र व्यावृत्तमेवेति** । सर्वत्र व्यावृत्तं अनुगमत्वेऽभिधेयं शब्दप्रवृत्तौ निमित्तं च गोत्वादिकमननुगतमेवेत्यर्थः । केचित्सर्वत्र शब्दप्रवृत्तौ निमित्तमितरव्यावृत्तमसाधारणधर्मोपेतमभिधेयमित्यर्थः । **कल्पनागौरवादिति** मूलस्य अनुगतसामान्यपक्षे कल्पनागौरवप्रसङ्गात् । तेन प्रागुक्तेन बाधकसद्भावेन साधकाभावेन न तद्धर्मकल्पना युक्तेत्यर्थः । ननु समानानां भावो हि सामान्यं गोत्वादीनां समानेषु सर्वगोपिण्डेषु अनुगतत्वाभावे कथं तेषु सामान्यप्रवृत्तिः । सर्वगोष्वनुगतैकधर्माभावेन सर्वगवां समानत्वाभावात् तद्गतगोत्वस्य सामान्यत्वायोगादित्याशयेन शङ्कते **नन्वनुगतत्वाभाव इति** । न सामान्यशब्दस्तदुक्तरीत्या यौगिकत्वं सामान्यविशेषभाव इति व्यवहारन्यायेन स्वावान्तरविशेषमादायैव गोत्वं सामान्यमित्युच्यते । यथा रूपरसाद्यनेकविशेषात्मके प्रतिव्यक्ति भिन्नत्वेनानुगतेऽपि गुणे रूपरसादिप्रकारकविशेषापेक्षया सर्वगुणसामान्यः शब्दव्यवहारः रूपं गुण रसो गुण इति, यथा वा उत्क्षेपणाद्यनेकविशेषात्मके प्रतिधर्मि भिन्नतया अननुगतेऽपि कर्मणि उत्क्षेपणादिरूपविशेषापेक्षया सर्वं कर्मेति सामान्यशब्दव्यवहारः । तथा कपिलादितत्तद्गोनिष्ठतत्तद्गोत्वत्वाद्यनेकविशेषात्मके अननुगतेऽपि गोत्वे गोत्वसामान्यमिति शब्दव्यवहार उपपद्यत एवेत्याशयेन समाधत्ते **अननुगतत्वेऽपीति** । अनेकेषु गोषु एकस्य गोत्वस्य अननुगतत्वेऽपि रूपादिषु गुणशब्दव्यवहारवद्गोत्वेऽपि सामान्यत्वनिर्वाहाय तत्तद्गोत्वरूपावान्तरभेदस्य कल्पनीयत्वात् तदपेक्षया च गोत्वादेः सामान्यत्वमुपपद्यत इत्यर्थः । ननु गुणकर्मणोरननुगतत्वेऽपि तदाश्रितजातेरनुगतत्वरूपादिविशेषापेक्षया गुणकर्मणोः सामान्यत्वं, न ह्यनेकगोत्वाश्रितम् अनुगतं किञ्चिदस्ति । अतो न गुणकर्मप्रतिबन्दीग्रहणमिति चेन्न । गुणादेः स्वतोऽननुगतत्वात् । जातेरनुगतत्वे गुणादेः किमायातम् । न हि पितुः पाण्डित्येन पुत्रः पण्डितो भवतीति भावः ।

**चषक— बाधकसद्भावेन** । अनुगतधर्मेणैव व्युत्पत्त्याद्यङ्गीकारे तत्र तत्र तदनिर्वाहप्रसङ्गेन । ***अनुगतधर्मनियन्त्रितैव सार्वत्रिकी व्युत्पत्तिरित्युपगतौ बाधकोक्तिः ॥***

॥ इति अनुगतसामान्यदूषणोपसंहारः ॥

॥ इति उक्तप्रसङ्गस्य असङ्गतत्वशङ्का तन्निरासश्च ॥

॥ इति 'अनुगतसामान्येनैव व्युत्पत्त्यादिकं नान्यथा' इति मन्वानं प्रति बाधकोक्तिः ॥

॥ इति उक्तशङ्कानिराकरणम् ॥

॥ इति 'नित्यमेकमनेकानुगतं सामान्यम्' इति यत् नैयायिकोक्तं सामान्यं तन्निराकृतेरयुक्तत्वशङ्का तन्निरसनं च ॥

॥ इति उक्तार्थसमर्थनम् ॥

॥ इति अवयवावयव्यादीनां परस्परभेदानुपपत्तिशङ्का तन्निरासश्च ॥

॥ इति उक्तस्य गुणगुण्याद्यभेदस्य उपपादनम् ॥

॥ इति समवायनिराकरणे समवायस्य स्वरूपतो निराकरणम् ॥

* * *

॥ अथ समवायनिराकरणे समवायस्य विशेषतो निराकरणम् ॥

॥ अथ तत्रादौ समवायस्य सर्वत्रैकत्वं नित्यत्वं च 'तत्त्वम्भावेने'ति सूत्रे यदुक्तं तस्य निराकरणम् ॥

॥ अथ तत्राप्यादौ समवायस्य एकत्वनिरासः ॥

॥ अथ च तत्रादौ 'औपाधिकविशिष्टाद्यं त्रितयान्यदि'ति पक्षनिराकरणम् ॥

२४८ सु०— एवं समवायं स्वरूपतो निराकृत्येदानीं यत्समवायस्य सर्वत्रैकत्वं नित्यत्वं च 'तत्त्वं भावेने'ति सूत्रेणोक्तम्, 'तत्त्वं, समवायस्य सर्वत्रैकत्वं नित्यत्वं च, भावेन, सत्तया, व्याख्यातमि'ति । तदपि निराचिकीर्षुरादौ तावदेकत्वं निराकर्तुं पीठमारचयति **औपाधिकेति** ।

## अनु०— औपाधिकविशिष्टाद्यमपि तद्वस्तु किं ततः । अन्यत्

**औपाधिकः** पाचकयाजकादिः, **विशिष्टः** नीलाग्निमदादिः । **आद्य**ग्रहणादुपलक्षित-ग्रहणम् । **अपि**शब्दो दूषणान्तरसमुच्चयार्थः । **तद्वस्तु** उपाध्यादित्रयम् । **किं**शब्दस्योभयतः सम्बन्धः । **तत** उपाध्यादित्रयात् । 'वस्तु' इत्येतद् 'औपाधिकविशिष्टाद्यम्' इत्यनेनापि सम्बध्यते ।

परि०— **तावदेकत्वमिति** । 'एवमेवासतः सत्तासमवाय' इति वक्ष्यमाणनित्यत्वनिरासा-पेक्षया तावच्छब्दः । **दूषणान्तरेति** । समवायपक्षे प्रागुक्ताप्रामाणिकत्वादिदूषणापेक्षया सिद्धसाधन-

त्वादिदूषणान्तरेत्यर्थः । औपाधिकविशिष्टाद्यमित्यनूद्य किं तद्वस्तु किं(वा) ततोऽन्यदिति योजनेति भावेन तद्वस्त्वित्यनूद्य तस्यार्थमाह **तद्वस्तूपाध्यादित्रयमिति** । उपाधिपुरुषतत्सम्बन्धा इत्यर्थः ।

**गु०दी०— औपाधिकविशिष्टाद्यमपि तद्वस्तु किं तत** इति मूलस्यौपाधिकविशिष्टाद्यमपि तद्वस्तूपाध्युपहिततत्सम्बन्धादिवस्तुत्रयं किं वस्तुत्रयेणात्यन्ताभिन्नं वा ततः उक्तत्रयादन्यदत्यन्तभिन्नं किमित्यर्थः । उपहितविशेष्यादिभ्यः भिन्नाभिन्नस्य विशिष्टाख्यपदार्थान्तरस्य मृत्तन्त्वादिभ्यो भिन्नाभिन्नघटपटादिकार्यान्तरवन्महापरिमाणविशिष्टगगनादिवद्वा स्वमतेऽप्यङ्गीकारात् । अत्यन्ताभेदादावुक्तदोषाभावाच्च न तत्प्रत्याख्यातीति भावः ।

**कं०रा०— सत्तयेति** । रूपादेर्नाशेऽपि समवायस्य सत्त्वेनेत्यर्थः । यद्यपि स्वनाशकारणसम्बन्धिनाशानन्तरमपि सतः समवायस्य नित्यत्वसिद्धावप्येकत्वं न सिद्ध्यति । भेदेऽप्युपपत्तेस्तथापि नित्यस्य समवायस्यैकत्वेनैवोपपत्तावनेकत्वकल्पनाया अयोगादेकत्वं सिद्ध्यतीति भावः ।

**श्रीनिधि०— सत्तया व्याख्यातमिति** । सत्ताया यथा एकत्वम् एवं समवायस्यापीति सत्तादृष्टान्तेन इत्यर्थः । **पीठमारचयतीति** । समवायैक्ये सर्वानुमानानां सिद्धसाधनत्वमिति दूषणं वक्ष्यते । अनुमानानां चेदन्यत्साध्यं तदा नैष दोषः । प्रादुष्यात् तदर्थमन्येषां साध्यत्वासम्भवं वक्तुं विकल्पयतीत्यर्थः । **नीलाग्निमदादिरिति** । नीलो घटादिः अग्निमान् पर्वतः । द्वन्द्वान्ते बहुव्रीहिः । **उपलक्षितग्रहणमिति** । सचित्रादिः । स्वस्मिन् स्वापेक्षया व्यावृत्तिसम्पादिकोपाधिः । यथाकाशस्य घटादिः पचनयाजनादिश्च । पूर्वं पाचको न इदानीं पाचकः । पूर्वं न याजकः इदानीं याजक इति स्वस्मिन्नेव स्वभेदप्रतीतेः । स्वस्मिन्नितरव्यावृत्तिसम्पादकं विशेषणं, यथा देवदत्तस्य दण्डः । ननु पूर्वं न दण्डी इदानीं दण्डीति दण्डस्यापि स्वस्मिन् स्वभेदसम्पादकत्वादुपाधित्वम् एवं याजक इत्याद्युक्तेऽपि उत्तरव्यावृत्तेरपि प्रतीतेर्विशेषणत्वमिति साङ्कर्यमिति चेदुच्यते । कालभेदापेक्षयैव व्यवस्थाङ्गीकारात् । इतरव्यावृत्तिफलत्वे यजनादेः स्वाव्यावृत्तिफलत्वे दण्डादेश्च विशेषणत्वोपाधित्वयोरिष्टत्वात् । **अपिशब्दो दूषणान्तरसमुच्चयार्थ इति** । ननु पूर्वं समवायस्वरूपाङ्गीकारे दूषणमुक्तम् । इदानीं तस्यैकत्वे दूषणमुच्यते । तथा च कथं दूषणान्तरत्वम् । उच्यते । समवायसम्बन्धित्वेन दूषणान्तरत्वसम्भवादिति । **औपाधिकविशिष्टाद्यमपीत्यनेनापि सम्बध्यते इति** । अन्यथा विशेष्यानुक्तेः न्यूनता स्यादिति भावः ।

**शे०वा०—** 'औपाधिकविशिष्टाद्यमि'त्युत्तरग्रन्थस्यौपाधिकादेरुपाध्याद्यतिरेकानतिरेकविचारपरस्य पूर्वेण सङ्गत्यप्रतीतेरानर्थक्यं तथाऽपि समवायैकत्वं निराकर्तुं तत्पीठिकारचनरूपत्वेनोत्तरग्रन्थसङ्गतत्वान्न तदानर्थक्यमित्यभिप्रेत्य वृत्तानुवादपूर्वकमुत्तरग्रन्थसङ्गततया तं योजयति **एवमित्यादिना** । **औपाधिकः पाचकयाचकादिति** । न चोपाधेरपि विशेषणोपलक्षणान्यतरत्वात् । औपाधिकस्यापि विशिष्टोपलक्षितान्यतरत्वमेवेति

तद्ग्रहणेनैव गृहीतत्वात् पृथक् तद्ग्रहणं न युक्तमिति वाच्यम् । विशेष्यप्रतियोगिकतन्निष्ठभेदज्ञापकत्वमुपाधित्वम् अन्यप्रतियोगिकविशेष्यनिष्ठभेदज्ञापकत्वं च विशेषणत्वादिकमिति तद्भेदविवक्षया पृथग्ग्रहणसम्भवात् । **उभयत इति** । किं तद्वस्तु किं वा ततोऽन्यदित्युभयत इत्यर्थः । सम्बध्यत इत्यनेनौपाधिकविशिष्टाद्यं वस्तु किं तद्वस्तु किं वा ततोऽन्यदिति वाक्ययोजनोक्ता भवति ।

**वा०र०— तत्त्वम्भावेनेति सूत्रेणोक्तमिति** मूलम् । इदं च ..... शङ्कते । **एकत्वं निराकर्तुं पीठमारचयतीति** मूलम् । अनेन अस्य चैकत्वात् सिद्धसाधनमित्यादिकमेकत्वनिरासकम् । औपाधिकविशिष्टेत्यादिकं पीठिकारचनरूपमिति विवेकः सूचितः । समवायैकत्वं निराकर्तुं तत्पीठिकेति टीकायामपि पूर्वोक्तमेवाभिप्रेतम् । अत एवोत्तरग्रन्थसङ्गतत्वादित्युक्तम् । तेनास्य चेत्याद्युत्तरग्रन्थेन समवायैकत्वनिराकरणोपयोगितया तत्पीठिकारचनरूपतयौपाधिकेत्यादिभाष्यं प्रवृत्तमिति सूचनात् । एवमेव नित्यत्वनिराकरणपरतयैवमेवेत्यादिभाष्यव्याख्यानानन्तरं यद्वा समवायेत्यादिकं यन्मूलं तदवतारे वा ज्ञातस्य समवायैकत्वं निराकर्तुं पीठिकारचनपरतया व्याख्यानमनुचितमिति वाक्येऽपि विवेको ज्ञेयः । **विशेषणत्वादिकमिति** । आदिपदेनोपलक्षणत्वपरिग्रहः ।

**विट्ठल०— सत्तया व्याख्यातमिति** । सत्ताजातेरेकत्वनित्यत्ववदित्यर्थः । **उपलक्षितग्रहणमिति** । उपलक्षिते अनेकविप्रतिपत्तेर्भावान्न तन्निरूपितम् । उदाहरिष्यति चोत्तरत्र **दूषणान्तरेति** । प्रागुक्तदूषणापेक्षया एकत्वादिदूषणान्तरेत्यर्थः । **उपाध्यादित्रयमिति** । उपाधिपुरुषतत्सम्बन्धरूपं त्रयमित्यर्थः । **वस्त्वित्येतदिति** । एतेन औपाधिकविशिष्टाद्यं वस्तु किं तद्वस्तु किं च ततोऽन्यदिति योजनोक्ता भवति ।

**चषक— तावदेकत्वमिति** । 'एवमेवासतः सत्तासमवाय' इत्यादिना समवायनित्यत्वस्य प्रत्याख्यास्यमानतया तदेकत्वप्रत्याख्याने तदवधिकप्राथम्यद्योतनार्थस्तावच्छब्दः ।

* * *

**॥ अथ च तत्राप्यादौ औपाधिकं, विशिष्टं, आद्यपदोक्तमुपलक्षितं चेत्येतत्त्रयमपि त्रितयाद्भिन्नमभिन्नं वेत्यस्य प्रश्नस्य स्पष्टीकरणम् ॥**

**२४९ सु०— अयमर्थः । समवायस्य सर्वत्रैकत्वं वदतेदं तावद्विविच्यताम् । एक एव पुरुषः पचनयजनादिभिरुपाधिभिरवच्छेदकैर्धर्मैः पाचको याजकश्च इत्याद्यभिधीयते । स पाचकयाजकादिरौपाधिकोऽर्थः किं पचनाद्युपाधिपुरुषतत्सम्बन्धेभ्योऽनन्य उतान्य इति ।**

**तथा समानाधिकरणं व्यावर्तकं विशेषणम्, यथोत्पलस्य नीलं रूपं पर्वतस्य चाग्निः; व्यधिकरणं तु व्यावर्तकमुपलक्षणम्, यथा नीलरूपगतं नीलत्वमुत्पलस्य । अन्ये**

**तु कार्यप्रवेशाप्रवेशाभ्यां विशेषणोपलक्षणयोर्भेदमाचक्षते, यथा 'लम्बकर्ण आनीयताम्', 'चित्रगुरानीयताम्' इति । अपरे तु शाब्दसामानाधिकरण्यवैयधिकरण्याभ्याम्, यथा 'दण्डी देवदत्तः', 'जटाभिस्तापसः' इति । केचित्पुनर्व्यवच्छित्तिसमये सत्त्वासत्त्वाभ्याम् । तत्र विशिष्टं नीलमग्निमान् वा, विशेषणविशेष्यतत्सम्बन्धेभ्योऽनन्यत् अन्यद्वा ।**

**उपलक्षितं चोपलक्षणोपलक्ष्यतत्सम्बन्धेभ्योऽनन्यत् अन्यद्वेति ॥**

**परि०— समानाधिकरणमिति** । स्वबोध्यव्यावृत्तिसमानाश्रयमित्यर्थः । एतेन व्यधिकरणमित्युक्तार्थम्(ः) । **अन्यद्वेतीतीति** । इतिशब्दस्यायमर्थ इति पूर्वेणान्वयः ।

**यादु०— समानाधिकरणमिति** । प्रत्याय्यव्यावृत्तिसमानाधिकरणमित्यर्थः । एवं व्यधिकरणमित्यत्रापि प्रत्याय्यव्यावृत्तिव्यधिकरणमित्यर्थः ।

**वं०प०— शाब्दसामानाधिकरण्यं** एकविभक्त्यन्तपदवाच्यत्वम् । भिन्नविभक्त्यन्तपदवाच्यत्वं **वैयधिकरण्यम्** । एताभ्यां विशेषणोपलक्षणयोर्भेदमाचक्षत इत्यनुवर्तते । **व्यवच्छित्तिः** व्यावृत्तिः । तद्बोधसमये यत्सत्तद्विशेषणम् । यथा दण्डो देवदत्तस्य । व्यावृत्तिबोधसमये यदसत्तदुपलक्षणम् । यथा काको गृहस्येति । एताभ्यां विशेषणोपलक्षणयोर्भेदमाचक्षत इति सम्बन्धः ।

**कं०रा०— समानाधिकरणमिति** । विशेष्यत्वसमानाधिकरणमित्यर्थः । यद्वा स्वप्रत्याय्यव्यावृत्तिसमानाधिकरणमित्यर्थः । **कार्यप्रवेशेति** । कार्यान्वयानन्वयाभ्यामित्यर्थः । **लम्बकर्ण इति** । लम्बकर्ण आनीयतामित्यत्र कर्णस्याप्यानयनान्वयित्वाद्विशेषणत्वं चित्रगुरानीयतामित्यत्र तु गवामानयनान्वयाभावादुपलक्षणत्वमिति भावः । **शाब्दसामानाधिकरण्येति** । विशेष्यार्पकशब्दसमानाधिकरणशब्दप्रतिपाद्यत्वतद्व्यधिकरणशब्दप्रतिपाद्यत्वाभ्यां विशेषणोपलक्षणयोः भेदं अपरे त्वाचक्षत इत्यन्वयः । **दण्डीति** । दण्डी देवदत्त इत्यत्र विशेष्यार्पकदेवदत्तशब्दसमानाधिकरणदण्डिशब्दप्रतिपाद्यत्वात् दण्डरूपव्यावर्तकस्य विशेषणत्वं जटाभिस्तापस इत्यत्र तु विशेष्यार्पकेण तापस इत्यनेन जटाभिरित्यस्य भिन्नविभक्तितया तद्व्यधिकरणत्वात् तत्प्रतिपाद्यस्य जटारूपव्यावर्तकस्योपलक्षणत्वमिति भावः । **केचिदिति** । व्यावृत्तिकाले सत्त्वासत्त्वाभ्यां विशेषणोपलक्षणयोर्भेदं केचिदाचक्षत इत्यन्वयः ।

**श्रीनिधि०— समानाधिकरणमिति** । व्यावृत्तिसमानाधिकरणमित्यर्थः । **व्यधिकरणं त्विति** । व्यावृत्त्यधिकरणभिन्नाधिकरणमित्यर्थः । **नीलगतं नीलत्वमिति** । नीलमुत्पलमिति प्रतीतौ यदा नीलसम्बन्धः नैल्यस्यावच्छेदकत्वं च प्रतीयते तदा नीलस्य व्यावर्तकत्वम् । यदा नैल्यसम्बन्ध एव परम्परया प्रतीयते तदा

नैल्यं व्यावर्तकमिति उपलक्षणविशेषणयोः नैकप्रतीतावेवं व्यावर्तकत्वमिति न कश्चिद्दोषः । **कार्यप्रवेशाप्रवेशाभ्यामिति** । कार्यमानयनादिक्रिया तद्विषयत्वतदभावाभ्याम् इत्यर्थः । **सामानाधिकरण्यवैय्यधिकरण्याभ्यामिति** । सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानां एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं, तदभावो वैय्यधिकरण्यम् । एवं च समानाधिकरणशब्दबोध्यं विशेषणं व्यावर्तकम् । व्यधिकरणशब्दबोध्यं व्यावर्तकमुपलक्षणमित्यर्थः । **व्यवच्छित्तिसमय इति** । व्यावृत्तिप्रतीतिसमय इत्यर्थः । यथा देवदत्तस्य दण्डः । यथा वा गृहस्य काक इति स्पष्टत्वात् नोदाहृतम् । अत्र विशेषणोपलक्षणयोर्वक्तव्यविशेषस्य सत्त्वात् औपाधिकविषयविकल्पः पूर्वमेव विवृतः ।

**शे०वा०**— ननु कथमस्य समवायैकत्वनिराकरणं प्रति पीठिकारचनरूपत्वमित्यतस्तद्दर्शयितुमाह **अयमर्थ इति** । **समानाधिकरणमिति** । जटाभिस्तापस इत्यादौ तृतीययोपलक्ष्यमाणोपलक्षणभावे जटादावतिव्याप्तिनिरासाय समानाधिकरणमित्युक्तम् । न च तदपि यत्किञ्चित्समानाधिकरणमिति कथं तेन तन्निरासः । स्वप्रत्याय्यव्यावृत्त्या सहैकाधिकरणत्वस्य समानाधिकरणपदेन विवक्षितत्वात् । तावत्येवोच्यमाने नीलमुत्पलमित्यत्र नैल्यापादिता नीलव्यावृत्त्या सहैकाधिकरणे गगनोत्पलसंयोगादावतिव्याप्तिः । तदर्थं व्यावर्तकमित्युक्तम् । तद्व्यावृत्तिबुद्धिजनकविशिष्टज्ञानावच्छेदकमिति च तदर्थः । अतो न नीलरूपरहितपदार्थव्यावृत्तिसमानाधिकरणे नीलरूपरहितपदार्थतादात्म्याभावलक्षणां व्यावृत्तिं सत्तयैव प्रत्याययति उत्पलेन्द्रियसंयोगादावतिव्याप्तिः । अधिकरणं चात्र देशकालोभयरूपं विवक्षितम् । तेन यत्राश्रये यत्कालीना व्यावृत्तिः प्रत्याय्या तत्कालीनतदधिकरणवृत्ति विशेषणमन्यदुपलक्षणम् इत्यर्थपर्यवसानात् काककालीनगृहव्यावृत्तिपरे प्रयोगे काकस्य विशेषणत्वेऽपि सामान्यतो गृहविशेषव्यावृत्तिपरे प्रयोगे काकस्योपलक्षणत्वसम्भवान्नोपलक्षणाभावप्रसङ्ग इति ध्येयम् । **व्यधिकरणं त्विति** । एतच्च विशेषणेऽतिव्याप्तिपरिहारायोक्तम् । व्यधिकरणत्वं च स्वप्रत्याय्यव्यावृत्त्या सह विवक्षितमिति न यत्किञ्चिद्व्यधिकरणे विशेषणेऽतिप्रसङ्गः । तावन्मात्रं विशेष्यस्याप्यस्तीति तत्रातिप्रसङ्गवारणाय **व्यावर्तकमित्युक्तम्** । व्यावृत्तिबुद्धिजनकविशिष्टज्ञानावच्छेदकमित्यर्थात् नादृष्टेश्वरादावतिव्याप्तिरिति भावः । असम्भावनापरिहाराय तदुभयं क्रमेणोदाहरति **यथेति** । एवमुत्तरत्रापि द्रष्टव्यम् ।

**कार्यप्रवेशेति** । कार्यान्वयि विशेषणं तदनन्वय्युपलक्षणमिति कार्यान्वयानन्वयाभ्यामित्यर्थः । **शाब्देति** । एकविभक्त्यन्तपदवाच्यं विशेषणं भिन्नविभक्त्यन्तपदवाच्यमुपलक्षणमिति शाब्दसामानाधिकरण्यवैयधिकरण्याभ्यामित्यर्थः । अत्र चैकत्वं सारूप्यमभिमतं न त्वभेदः । तथा सति दण्डी पुरुष इत्यादौ प्रथमैकवचनव्यक्तिभेदस्य सत्त्वेनैकत्वाभावादसम्भवप्रसङ्गात् । सारूप्यमप्यत्र व्यावर्त्यवाचकपदविभक्त्यैव विवक्षितम् । अन्यथा यत्किञ्चित्तृतीयान्तपदसारूप्यस्य जटाभिरिति तृतीयायामपि सद्भावेन तत्रातिव्याप्त्यपरिहारापातात् । व्यावर्त्यवाचकपदविभक्त्या सारूप्यविवक्षायां तु न तत्रातिव्याप्तिः । व्यावर्त्यः पुरुषस्तद्वाचकं पदं पुरुष इति पदं तत्र या विभक्तिः प्रथमा तया सह सारूप्यस्य जटाभिरित्युपलक्षणे विद्यमानतृतीयायाम् अभावात् ।

यद्यपि च प्रथमातृतीययोरपि विभक्तित्वादिना सारूप्यसत्त्वान्न तद्विवक्षयाऽपि तत्प्रतीकारः सम्भवति तथाऽपि विभक्तिविभाजकप्रथमात्वादिधर्मपुरस्कारेण तद्विवक्षणान्नातिप्रसङ्गः । न चैवं जटावांस्तापस इति प्रयोगे जटानामप्युक्तरूपसामानाधिकरण्यसत्त्वाद्विशेषणत्वप्रसङ्ग इति वाच्यम् । तत्र तस्येष्टत्वात् । न चैवमुपलक्षणत्ववादविरोधः । तृतीयाप्रयोगकाले तासामुपलक्षणत्वाभिप्रायेण तदुपपत्तेरिति ध्येयम् । एवं व्यावर्त्यवाचकपदविभक्तिविरूपविभक्त्यन्तपदवाच्यत्वस्यैव द्वितीयलक्षणे विवक्षितत्वान्न कश्चित्क्षुद्रोपद्रव इति । **व्यवच्छित्तिसमय इति** । स्वप्रत्याय्यव्यावृत्तिसमय इत्यर्थः । ततश्च यावत्स्वप्रत्याय्यव्यावृत्तिभावि विशेषणं यावत्स्वप्रत्याय्यव्यावृत्त्यभावि तूपलक्षणमित्युक्तं भवति ।

**वा०र०**— शेषानन्तपण्डितेन तृतीययोपलक्ष्यमाणेत्युक्तावपि स्पष्टत्वार्थमुक्तं **तृतीययेति** । तृतीयया उपलक्ष्यमाणः उपलक्षणभावः उपलक्षणत्वे यस्येत्यर्थः । तृतीयाप्रयोगान्यथानुपपत्त्या जटानामुपलक्षणत्वमिति भावः । एते च विशेषणोपलक्षणयोः स्वप्रत्याय्यव्यावृत्त्या सहद्रष्टव्य इति शेषानन्तोक्त्यनुसारेण । समानाधिकरणशब्देन स्वप्रत्याय्येत्यादि हरिहरदीक्षित्यनुसारेण चाह **स्वप्रत्याय्येति** । हरिहरोक्त्यनुसारेणात्र स्वप्रत्याय्येति स्वपदं तच्च स्वरूपकथनार्थकम्, न तु व्यावर्तकम् । अत एव शेषानन्तेन प्रत्याय्येत्येवोक्तम् । अन्यथा जटादौ स्वपदातिरेकेणैव प्रत्याय्येत्यनेनातिव्याप्तिनिरासेन तद्वैयर्थ्यापातात् । वक्ष्यमाणगगनोत्पलसंयोगादावतिव्याप्त्यभिधानानुपपत्तिप्रसङ्गाच्च । सम्मतं चैतट्टीकाकृतः । नैल्यापादितेति स्पष्टमेव नैल्यस्य व्यावृत्तिप्रत्यायकत्वमभिधाय तदेकाधिकरणे गगनोत्पलसंयोगेऽतिव्याप्त्यभिधानात् । तथा अनन्तोक्त्यनुसारेणैव व्यावर्तकत्वस्य तद्व्यावृत्तिबुद्धीत्यादिप्रकारान्तरेण व्याख्यातत्वात् न ज्ञानापेक्ष इति हरिहरेण ज्ञातपदस्योत्पलेन्द्रियसंयोगव्यावर्तकतया स्वीकृतत्वेऽपि तस्याप्यत्र निवेशनाभाव इति ध्येयम् । **प्रत्याय्या** बोध्या । हरिहरदीक्षित्यनुसारेणाह **तावत्येव इति** । **नैल्यापादितेति** । नैल्येन ज्ञापितेत्यर्थः । **तद्व्यावृत्तीति** । तत्र स्वाश्रये या व्यावृत्तिबुद्धिः तज्जनकं यद्विशिष्टज्ञानं तत्र विषयतया अवच्छेदकमित्यर्थः । गगनोत्पलसंयोगस्य व्यावृत्तिबुद्धिजनकत्वस्यैवाभावेन तावन्मात्रेण तत्रातिव्याप्त्यभावात् विशिष्टज्ञानावच्छेदकत्वपर्यन्तधावनेन व्याख्यानानर्थक्यमित्यतः तत्प्रयोजनं हरिहरानुसारेणाह **अतो न नीलेति** । नीलरूपरहितपदार्थव्यावृत्तिश्च वक्ष्यमाणोत्पलेन्द्रियसंयोगजन्या ग्राह्या । अनैल्यात्यन्ताभावरूपव्यावृत्तेर्नैल्यसाध्यत्वादुक्तं **तादात्म्याभावलक्षणमिति** । सत्तयैव प्रत्याययतीत्युक्त्या न तूत्पलेन्द्रियसंयोगज्ञानं व्यावृत्तिबुद्धिजनकं येनोत्पलेन्द्रियसंयोगस्य तज्ज्ञानावच्छेदकत्वेन विशिष्टव्यावर्तकत्वं तत्र स्यादित्येवं अतिव्याप्तिपरिहारप्रकारः सूचितः । उत्पलेन्द्रियसंयोगेन वस्तुतो नीलपदार्थतादात्म्याभावलक्षणव्यावृत्तिबुद्धिजननेऽपि अनीलत्वाप्तेनाभावबुद्धेरजननात् नातिव्याप्तिरित्यर्थः ।

नन्वेवं तर्हि काकस्यापि विशेषणतापत्तिः । तस्यापि स्वप्रत्याय्यव्यावृत्त्या सहैकाधिकरणत्वे सति तद्व्यावृत्तिबुद्धिजनकविशिष्टज्ञानं प्रति विषयतयावच्छेदकत्वात् । ततश्चोपलक्षणाभावप्रसङ्ग इत्यतः अनन्तोक्त्यनुसारेणाह **अधिकरणं चेति** । ननु यत्राश्रय इत्यादिविवक्षायां उत्पलत्वस्य उत्पलरूपाश्रये नैल्यं प्रत्याय्य

व्यावृत्तिकालीनत्वेन तदधिकरणत्वेन व्यावृत्तिबुद्धिविशिष्टज्ञानावच्छेदकत्वेन च तत्रातिव्याप्तिः स्यादिति चेन्न । विशिष्टज्ञानं प्रति विषयत्वस्य नील इवोत्पलत्वेऽप्यविशेषेऽपि विशिष्टज्ञानस्य व्यावर्तकत्वं विशेषणविषयत्वेनैव पर्यवसन्नमिति विषयतयाऽवच्छेदकत्वं नीलरूपस्यैवेति तत्रातिव्याप्तिः । अत एवोत्पलत्वप्रत्याय्यव्यावृत्तिस्थले उत्पलत्वविषयकत्वेनैव ज्ञानस्य व्यावर्तकतेति तादृशज्ञानं प्रति विषयतयाऽवच्छेदकस्योत्पलस्य विशेषणत्वमेवेति बोध्यम् । **एतच्चेति** । व्यावर्तकत्वमात्रं विशेषणेऽतिव्याप्तमिति तत्परिहाराय व्यधिकरणत्वं विशेषणमित्यर्थः । **स्वं प्रत्याय्येति** । अत्रापि स्वपदं स्वरूपकथनं हरिहरोक्त्यनुसारेणाप्रत्याप्येत्येवोक्तावपि अतिप्रसङ्गाभावादिति बोध्यम् । **व्यावृत्तिबुद्धिजनकेति** । अत्रापि पूर्ववद्देवदत्तादिरूपविशेष्यं प्रत्याय्यव्यावृत्तिव्यधिकरणत्वे सति व्यावृत्तिबुद्धिजनकविशिष्टज्ञानं प्रति विषयतयाऽवच्छेदकत्वात् अतिव्याप्तितादवस्थ्यमित्याशङ्कापरिहाराय व्यावृत्तिबुद्धिजनकविशिष्टज्ञाननिष्ठजनकतावच्छेदकत्वमर्थो द्रष्टव्यः ।

नन्वर्थसामानाधिकरण्यनिरूपणावसरे अर्थव्यधिकरणस्य नीलत्वस्यैव सामानाधिकरणपदव्यावर्त्यतया अभिधातव्यत्वेनात्रोपलक्षणयाभिमते नीलत्वे तत्त्वादेव व्यावर्तकेऽतिव्याप्तिपरिहाराय सामानाधिकरणेतीत्येव वक्तव्यतया कथं शाब्दव्यधिकरणजटादिकं व्यावर्त्यत्वेनाभिहितमिति चेत्, सत्यम् । अत्र तथैव वक्तव्ये शेषानन्तोक्त्यनुसारेणोक्तिः किं तत्साधुत्वासाधुत्वाविचारेणेत्यभिप्रायेण । वस्तुतस्तु अर्थव्यधिकरणे नीलत्वेऽतिव्याप्तिपरिहार एव तात्पर्यमिति न दोषः । केचित्तु तथैव पाठ इत्याहुः । **स्वप्रत्याय्यव्यावृत्त्येति** । ननु स्वेतिपदेनैवोत्पलाकाशसंयोगादेर्व्यावृत्तेः सम्भवाद्व्यावर्तकपदवैयर्थ्यमिति चेन्न । तथाप्युत्पलेन्द्रियसंयोगादौ वक्ष्यमाणरीत्या स्वप्रत्याय्यव्यावृत्त्यसमानाधिकरणत्वस्य सत्त्वेन तद्व्यावर्त्यत्वात् । न च व्यावर्तकत्वं च तत्रास्तीति वाच्यम् । व्यावृत्तिबुद्धीत्यादिविवक्षणेन परिहारादिति । वस्तुतः स्वशब्दस्य नीलपरत्वम् । ततश्च नीलरूपप्रत्याय्यव्यावृत्त्या समानाधिकरणत्वलाभे गगनोत्पलसंयोगादावतिव्याप्तेः सम्भवेन तद्व्यावृत्त्यर्थतया व्यावर्तकत्वविशेषणसार्थक्यात् । न च तर्ह्युत्तरत्रापि स्वशब्दस्य नैलपरत्वावष्टम्भेनैवातिव्याप्तिर्वाच्या स्यादिति वाच्यम् । इष्टापत्तेः । अत एव नीलरूपसाध्यव्यावृत्तिं नीलरूपरहितपदार्थव्यावृत्तित्वेनाभिधायोत्पलेन्द्रियसंयोगसाध्यव्यावृत्तिं नीलरूपरहितपदार्थतादात्म्याभावलक्षणामिति सर्वसाधारणव्यावृत्तित्वेनाह । नीलरूपरहितपदार्थान्तरात्मकताव्यावृत्तिहेतुत्वेऽपि नीलसाध्यानीलव्यावृत्तिहेतुत्वाभावात् । नीलत्वसाध्यत्वात् तद्व्यावृत्तेः । अस्तु वा एकप्रकारव्यावृत्तिजनकत्वं तावताऽप्युत्पलेन्द्रियसंयोगे नीलप्रत्याय्यव्यावृत्त्या समानाधिकरणत्वमनिवार्यमिति दिक् । **तदुभयं क्रमेणेति** । यद्यपि मूले विशेषणलक्षणकथनानन्तरमेव विशेषणमुदाहृतमिति तत्स्थल एव तदुदाहरणनिमित्तकथनपूर्वकं तदवतार्य अत्रोपलक्षणमात्रोदाहरणमवतारणीयम् । तथापि बुद्ध्या विवेकेनोभयं मिलित्वैकत्रैवावतारितम् । तत्प्रयोजनं चोत्तरत्रोक्तिलाघवेनोक्तप्रकारातिदेशनमिति ज्ञेयम् । अत्रातीतकाकादेरेवोपलक्षणता विद्यमानस्य तु विशेषणतेति विशेषाश्रयणान्न व्यधिकरणत्वाभावप्रयुक्तकालादावव्याप्तिरिति पूर्वमेव टीकायां प्रतिपादितं द्रष्टव्यम् । शेषानन्तोक्तितद्व्याख्यानपटवर्धनानु[illegible] शाब्दसामानाधिकरण्यमुपपादयति **अत्र चैकत्वमित्यादिना ध्येयमित्यन्तेन । विभक्तिविभाजकेति ।** अत्र प्रथमात्वादिरूपविभक्तिविभाजक-

धर्मविवक्षयैव प्रथमतादिविभक्तिसाम्येऽपि सुब्लोपादिभावाभावाभ्यां विभक्त्योर्वैरूप्यमित्येषा शङ्कापि निराकृता वेदितव्या । अनल्पनीलमुत्पलं पृथूत्पलमित्यादौ सुब्लोपभावाभावरूपवैषम्येऽपि सुबन्तत्वाहानेः सर्वसम्मतत्वेन तद्विभक्तिकत्वादेरविघातात् । अन्यथा यत्किञ्चिद्वैषम्यस्य सर्वत्र वक्तुं शक्यतया साम्यं कुत्रापि न भवेदित्याशयः । व्यधिकरणलक्षणेऽप्येवं विचारः कार्य इत्येतदपि विशेषणोपलक्षणयोर्द्रष्टव्यम् । **न कश्चिदिति** । विशेषणविभक्तिस्थलेऽपि व्यक्तिभेदादतिप्रसङ्ग इति यत्किञ्चिद्वैरूप्यविवक्षायां विशेषणेऽतिव्याप्तिः । सर्वथा तद्विवक्षायामप्रसिद्धिरिति चोपद्रवो नेत्यर्थः । **ततश्च यावदिति** । यावत्स्वप्रत्याय्यव्यावृत्तिभावितदभाविरूपविशेषणोपलक्षणयोरुदाहरणं दण्डकाकादिकं स्पष्टतेवैति नोक्तम् ।

**विठ्ठल०**— अत्रोपाधिस्वरूपनिरूपणपूर्वकमन्यत्वपक्षं बहिरेव दूषयित्वा अन्यत्वपक्षदूषणं मूलोक्तं विशदयितुमाह **अयमर्थ इति** । **समानाधिकरणमिति** । समानाश्रयमित्यर्थः । नीलमुत्पलमित्यत्रेतरव्यावृत्तनीलरूपस्य चोत्पलमेवाधिकरणमिति । व्यधिकरणमित्यत्र व्यावृत्तिरुत्पले नीलत्वं तु नीलरूप इति व्यधिकरणेति ज्ञेयम् । **कार्यप्रवेशेति** । व्यावर्तकस्यानयनकार्यान्वयानन्वयाभ्यामित्यर्थः **व्यवच्छित्तीति** । व्यावृत्तिसमये व्यावर्तकभावाभावाभ्यां, यथा दण्डी देवदत्तः काकवद्देवदत्तगृहमित्युदाहरणम् । ननूपाधिविशेषणयोरुभयोऽपि व्यावर्तकत्वाविशेषात् कथं वा लक्षणमिति चेदुच्यते । अवच्छित्तिप्रत्ययजनक उपाधिः । व्यवच्छित्तिप्रत्ययजनकं विशेषणमिति भेदात् । तथाहि एकत्वेन प्रतीतेऽप्यर्थे तदवान्तरभेदोऽवच्छेदः तज्ज्ञापकं उपाधिः । यथा पटे महारजनादिः। तथा एकस्मिन्नेव देवदत्तपचनयाजनाद्युपाधयः पाचकोऽयं याचकोऽयमिति भेदं सम्पादयन्ति। विशेषणं तु विशेष्यस्यान्यतो व्यावृत्तिमापादयन्ति । यथा दण्डकुण्डलादिकं दण्डादिरहिताद्व्यावर्तकमिति ।

**चषक— समानाधिकरणमिति** । स्वप्रत्येतव्यव्यावृत्तिसमानाधिकरणमित्यर्थः । **व्यधिकरणं** तादृशव्यावृत्त्यधिकरणावृत्ति । **यथेति** । लम्बकर्णयोरानयनक्रियान्वयितेव चित्रगवाणां न सेति भावः । **शाब्देति** । स्वप्रकृतिकविभक्तिवृत्तिविभक्तिविभाजकप्रथमात्वादिसप्तान्यतमधर्मवद्विभक्तिप्रकृतित्वरूपसमानविभक्तिकत्वतदवृत्तितादृशधर्मवद्विभक्तिप्रकृतित्वरूपविरुद्धविभक्तिकत्वाभ्यामित्यर्थः । **व्यवच्छित्तिसमये** व्यावृत्तिप्रतीतिसमये । प्रतियोगितासंसर्गकाभावबुद्धौ प्रतियोग्यंशे भासमानत्वं विशेषणत्वम् । प्रतियोगिताप्रकारकाभावबुद्धौ प्रतियोगितावच्छेदककोट्यप्रविष्टतया तदंशे भासमानत्वमुपलक्षणत्वमित्यपि न्यायनयनिष्णाताः । तद्यथा घटो नास्तीति प्रतीतावभावविशेषणतापन्नघटे विशेषणीभूय भासमानघटत्वस्याद्यं सोन्दलोपाध्यायदिशा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानिति बुद्धौ भासमानव्यापकतावच्छेदकत्वादेः द्वितीयमिति तदीयाकरे व्यक्तम् ।

**॥ इति औपाधिकं, विशिष्टम्, आद्यपदोक्तमुपलक्षितं चेत्येतत्त्रयमपि त्रितयाद्भिन्नमभिन्नं वेत्यस्य प्रश्नस्य स्पष्टीकरणम् ॥**

* * *

॥ अथ च तत्र तत औपाधिकविशिष्टाद्यं त्रितयाद्भिन्नमिति पक्षे दोषप्रदर्शनम् ॥

२५० **सु०—** तत्रान्यत्वपक्षस्तावदनुभवाभ्युपगमोपपत्तिविरुद्धत्वादसम्भावित एव । न हि पाचकादिः पचनादित्रयातिरिक्तोऽनुभूयते; न च योग्यस्याननुभवे सत्त्वं सिद्ध्यति, नाप्यग्निमदादिः पर्वताद्यतिरिक्तोऽनुभूयते; अतिरिक्तत्वे चौपाधिकविशिष्टादेः द्रव्याद्यन्तर्भावासम्भवात् षट्पदार्थातिरेकप्रसङ्गेनाभ्युपगमविरोधः स्यात् ॥ यदि चौपाधिकविशिष्टाद्यमतिरिक्तं स्यात् तदा 'पाचकमानये'त्युक्ते पुरुषाद्यानयनं न क्रियेत, इत्याद्युपपत्तिविरोधः ।

**परि०—** अन्यत्वपक्षं स्वयं निराह **तत्रान्यत्वपक्ष** इत्यादिना **अनुपपन्न एव** इत्यन्तेन । अनुभवादित्रितयविरोधं क्रमेण व्यनक्ति **न हीति, अतिरिक्तत्वे चेति, यदि चेति** ग्रन्थेन । अग्निमदादिरित्यादिपदेन प्रागुक्तचतुर्विधोपलक्षितग्रहः । **द्रव्याद्यन्तर्भावासम्भवादिति** । गुणानाश्रयत्वात् गुणादावपि वैशिष्ट्यादेः सत्त्वादिति भावः ।

**यादु०—** मूलेऽन्यत्वपक्षः स्फुटदूषणत्वान्न दूषित इत्यभिप्रेत्य स्वयं तं दूषयति **तत्रान्यत्वपक्ष इत्यादिना** । **द्रव्याद्यन्तर्भावेति** । गुणादावपि तस्य वृत्तेरिति भावः ।

**वं०प०—** अनुभवादिविरोधं क्रमेणोपपादयति **न हीत्यादिना** । नन्वननुभूयमानस्याप्यतिरिक्ततया सत्त्वं किं न स्यादित्यत आह **न चेति** ।

**कं०रा०—** **अनुभवेति** । अनुभवविरुद्धत्वादभ्युपगमविरुद्धत्वादुपपत्तिविरुद्धत्वाच्चेत्यर्थः । क्रमेण विरोधत्रयं दर्शयति **न हीत्यादिना** ।

**शे०वा०—** मूलेऽन्यत्वपक्षस्यासम्भावितत्वेनानुपपन्नतायाः स्पष्टत्वाददूषणमिति न तददूषणान्न्यूनत्वं शङ्क्यमित्यभिप्रेत्य स्वयं तत्पक्षस्यासम्भावनानिमित्तप्रदर्शनपूर्वकमसम्भाविततामाह **तत्रेति** । तत्कथमित्यतोऽनुभवविरुद्धतां तावदुपदर्शयति **न हीति** । प्रतिज्ञातमभ्युपगमविरोधमुपदर्शयति **अतिरिक्तत्वे चेति** । **द्रव्यान्तर्भावासम्भवादिति** । गुणादावपि तस्य वृत्तेर्न द्रव्यादित्वं तस्येति भावः । उपपत्तिविरोधमप्युपदर्शयति **यदि चेति** ।

**वा०र०—** **स्पष्टत्वाददूषणमिति** । तत्पक्षस्य दूषणं न कृतमित्यर्थः ।

**विठ्ठल०—** **द्रव्याद्यन्तर्भावासम्भवादिति** । गुणाश्रयत्वजातिमात्राश्रयत्वाद्यनुगतत्वाद्यभावादिति भावः ।

॥ इति औपाधिकविशिष्टाद्यं त्रितयाद्भिन्नमिति पक्षे दोषप्रदर्शनम् ॥

* * *

॥ अथ च तत्र तत औपाधिकविशिष्टपदयोरर्थान्तरमपि तत्र निरुपयोगि ॥

२५१ **सु०— नन्ववच्छित्तिरौपाधिकत्वं, व्यवच्छित्तिश्च वैशिष्ट्यं त्रितयाद्भिन्नमेवेति चेन्न।**

**अवच्छित्तेरनिरूपणात् । सा किमुपाधिसम्बन्धो वा, पुरुषस्यैकत्वं वा, स्वगतो भेदो वा । आद्ये न त्रयातिरेकः, द्वितीये त्वनौपाधिकादविशेषः, तृतीये त्वसत्त्वप्रसङ्गः ।**

**व्यवच्छित्तिर्वैशिष्ट्यमिति चायुक्तम्, तस्या नीलादिपदार्थत्वाभावात् । सा हि वैशिष्ट्यप्रतीतिफलविषयतया अनुभूयते ।**

**परि०— असत्त्वप्रसङ्ग इति** । स्वप्रतियोगिकस्वगतभेदस्यासत्त्वादिति भावः । **तस्या इति** । व्यवच्छित्तेरित्यर्थः । **सा हीति** । व्यवच्छित्तिः वैशिष्ट्यप्रतीतेर्यत्फलं व्यावृत्तिधीस्तद्विषयतया साक्षिसिद्धेत्यर्थः ।

**यादु०— सा किमुपाधिसम्बन्धो वेत्यादि** । अत्र ह्युपाधिसम्बन्धादेकमेव वस्तु भिद्यत इति परैरङ्गीकृतत्वादवच्छित्तिशब्दार्थतया क्रमेणोपाधिसम्बन्धादीनां विकल्पकोटितया प्रसक्तिरित्यवधेयम् । **असत्त्व-प्रसङ्ग इति** । स्वाभिन्ने स्वस्मिन्स्वप्रतियोगिकभेदस्य विरुद्धत्वेनासत्त्वात् तदात्मकस्यौपाधिकत्वस्यासत्त्वप्रसङ्ग इत्यर्थः । ननु पुरुषेऽभेदस्य स्वाभाविकत्वेन तत्र स्वाभाविकभेदासम्भवेऽप्यौपाधिको भेदो न विरुद्ध इति कथं तस्यासत्त्वमिति चेन्न । 'यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते । नानिर्वाच्यं हि तेनेष्टमि'त्यादिना अस्याः शङ्काया अग्रे निराकरिष्यमाणत्वात् । **फलविषयतयेति** । फलीभूतप्रतीतिविषयतयेत्यर्थः । नीलादिपदजनित-नीलरूपादिविशिष्टप्रत्ययानन्तरं ह्यनीलादिव्यावृत्तिप्रतीतिर्जायते । तथाच व्यवच्छित्तिर्वैशिष्ट्यज्ञाप्यैव न वैशिष्ट्य-रूपेति भावः ।

**वं०प०— न त्रयातिरेक इति** । पचनाद्युपाधिपुरुषतत्सम्बन्धेभ्योऽतिरेको भेदो न । उपाधिसम्बन्ध-रूपावच्छित्तेरिति शेषः । **अविशेषः** एकत्वस्य पुरुषे स्वाभाविकत्वादुपाधिकथनं व्यर्थमित्याशयः । **तस्याः** व्यवच्छित्तेः । **पदार्थेति** । पदप्रतिपाद्यत्वेत्यर्थः । **सा हि** व्यवच्छित्तिः ।

**कं०रा०— द्वितीय इति** । पुरुषैकत्वरूपव्यवच्छित्तेरौपाधिकशब्दार्थत्वे पचनाद्युपाधिरहितपुरुषेऽपि पुरुषैकत्वस्य सत्त्वादौपाधिकत्वस्यानौपाधिकादविशेषप्रसङ्ग इति भावः । **तृतीय इति** । स्वगतभेदरूपाव-च्छित्तेरौपाधिकशब्दार्थत्वे पचनाद्युपाधियुक्तपुरुषेऽपि स्वगतभेदाभावेनौपाधिकस्यासत्त्वप्रसङ्ग इत्यर्थः । **तस्या इति** । व्यवच्छित्तिशब्दितव्यावृत्तेर्नीलाग्निमदादिपदार्थत्वाभावादित्यर्थः । तत्कुत इत्यत आह **सा हीति** । **हि** यस्मात् सा व्यवच्छित्तिवैशिष्ट्यप्रतीतिफलीभूतबुद्धिविषयतयाऽनुभूयते । इदं नीलमित्यादिवैशिष्ट्यप्रतीत्यनन्तर-

मेवानीलव्यावृत्त्यादिबुद्धिर्जायत इत्यस्य सर्वानुभवसिद्धत्वात् तस्माद्व्यवच्छित्तेर्न नीलादिपदार्थत्वं सम्भवति । न हि धूमप्रतीतिसाध्यबुद्धिविषयो वह्निर्धूमपदार्थ इति भावः ।

**श्रीनिधि०—** औपाधिकविशिष्टयोर्भेदं शङ्कते **नन्ववच्छित्तिरित्यादिना** । नन्वनेनौपाधिकत्व-विशिष्टत्वयोरेव उपाध्यादित्रयविशेषणादित्रयान्यत्वमुक्तं स्यान्न तु औपाधिकविशिष्टयोरिति चेन्न । अत्रावच्छिन्न-मौपाधिकं व्यवच्छिन्नविशिष्टमिति त्रय इति त्रितयभेद इत्याशयात् । **तृतीये त्वसत्त्वप्रसङ्ग इति** । स्वगत-भेदस्यालीकत्वादिति भावः । एवमवच्छित्तिरौपाधिकमिति पक्षं दूषयित्वा व्यवच्छित्तिवैशिष्ट्यमिति पक्षं दूषयति **व्यवच्छित्तिर्वैशिष्ट्यमिति चेति** । **नीलादिपदार्थत्वाभावादिति** । विशिष्टं च नीलादिपदार्थ इति भावः । युक्त्यन्तरमाह **सा चेति** । **वैशिष्ट्यप्रतीतिफलविषयतयेति** । वैशिष्ट्यप्रतीतेर्यत्फलं व्यावृत्तिप्रतीतिस्तद्विषय-तयेत्यर्थः । अतश्च व्यवच्छित्तिर्वैशिष्ट्यमित्ययुक्तमिति सम्बन्धः । यो यत्प्रतीतिफलविषयतयाऽनुभूयते न तस्य तद्रूपत्वम् । यथा धूमप्रतीतिफलविषयतया अनुभूयमानो वह्निर्न धूमो भवतीति व्याप्तेरिति भावः ।

**शे०वा०—** **सा किमिति** । उपाधिसम्बन्धादेकमेव वस्तु भिद्यत इति सर्वैरङ्गीकृतत्वात् औपाधिक-स्थलेऽवच्छित्तिपदार्थतया क्रमेणोपाधिसम्बन्धादीनां विकल्पकोटितया प्रसक्तिरित्यवधेयम् । **आद्य इति** । उपाधिसम्बन्धस्य त्रितयान्तर्भूतत्वादिति भावः । **अविशेष इति** । तत्रापि पुरुषैकत्वसद्भावादिति भावः । **असत्त्वप्रसङ्ग इति** । स्वाभिन्ने स्वस्मिन् स्वप्रतियोगिकभेदस्य विरुद्धत्वेनासत्त्वात् तदात्मकस्यौपाधिकत्व-स्यासत्त्वप्रसङ्ग इत्यर्थः । न च स्वाभिन्ने स्वस्मिन्न स्वभेदो विरुध्यते । स्वस्मिन् स्वाभेदस्य स्वाभाविकत्वा-द्भेदस्य चौपाधिकत्वात् स्वाभाविकौपाधिकयोश्चाविरोधस्य बहुलमुपलम्भादिति वाच्यम् । औपाधिकस्यापि स्वाभाविकवदेव सत्यत्वेन तदविशिष्टतया त्वन्मते विरोधापरिहारादित्याशयात् । नन्वपोहपदार्थवादिनं प्रति व्यावृत्तेर्नीलादिपदार्थत्वाभावोऽसिद्ध इत्यतस्तमनुभवविरोधेन दूषयति **सा हीति** । वैशिष्ट्यप्रतीतेः फलं या व्यावृत्तिप्रतीतिस्तद्विषयतयेत्यर्थः । नीलादिपदजनितनीलरूपादिविशिष्टप्रत्ययानन्तरं ह्यनीलादिप्रतीतिव्यावृत्तिर्हि जायते । तथा च व्यवच्छित्तिर्वैशिष्ट्यज्ञाप्यैव न वैशिष्ट्यरूपेति भावः ।

**वा०र०—** **प्रसक्तिरिति** । व्यक्त्याकृतिजातिसन्निधौ प्रयुज्यमानगोशब्दस्य प्रत्येकं मेलनेन च तत्त-द्वादिरीत्या व्यक्त्यादीनां वाच्यत्वप्रसक्तिदर्शनादिति भावः । **विरोधपरिहारादिति** । 'इति वक्ष्यमाणत्वादि'ति शेषः । **तमिति** । अपोहपदार्थवादमित्यर्थः । **वादिनम्** इत्यत्र बुद्ध्या विवेकेन वादं पृथक्कृत्य परामर्शोऽयम् । **तद्विषयतयेति** । वादिव्यावृत्तिप्रतीतिं प्रति व्यावृत्तेरेव विषयत्वादिति भावः ।

**स०व्र०—** पुरुषस्यैकत्वं वा ।

**विठ्ठल०—** उपाधिसम्बन्धादेक एव पुरुषो भिद्यत इति परस्याभिप्रेतम् । अत्रोपाधिसम्बन्धपुरुष-गतैकत्वगतभेदा इति त्रयोऽर्थाः प्रसक्ताः । तत्रावच्छित्तिशब्दार्थः क इति पृच्छति **सा किमुपाधिसम्बन्ध**

**इति** । **न त्रयातिरेक इति** । तथा च विशेषणविशेष्यतत्सम्बन्धेभ्योऽन्यदित्युक्तमिति भावः । **अनौपाधिकादिति** । महारजनाद्युपाधिरहिते एकत्वस्य विद्यमानत्वादवच्छित्तिरूपौपाधिकत्वं तत्रापि स्यादिति भावः । **असत्त्वप्रसङ्ग इति** । स्वाभिन्ने स्वस्मिन् स्वप्रतियोगिकभेदस्य विरुद्धत्वेनासत्त्वात् तदात्मकस्यौपाधिकत्वस्याश्रयत्वप्रसङ्ग इत्यर्थः । ननु पुरुषे स्वाभाविकभेदाभावादौपाधिको भेदो न विरुद्ध इति कथं तस्यासत्त्वप्राप्तिरिति चेन्न । 'यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते । नानिर्वाच्यं हि तेनेष्टमि'ति उत्तरत्रैव निराकरिष्यमाणत्वात् । **तस्या इति** । वैशिष्ट्यरूपव्यवच्छित्तेर्नीलाग्निमदादिपदार्थत्वाभावादित्यर्थः । कुतो नेत्यत आह **सा हीति** । सा व्यवच्छित्तिर्वैशिष्ट्यप्रतीते यत्फलं व्यावृत्तिधीस्तद्विषया साक्षिणा प्रतीयत इत्यर्थः । नीलादिजनितनीलरूपादिविशिष्टप्रत्ययानन्तरं हि अनीलादिव्यावृत्तप्रतीतिर्जायते तथा च व्यवच्छित्तिवैशिष्ट्यज्ञाप्यैव न वैशिष्ट्यरूपेति भावः ।

**॥ इति औपाधिकविशिष्टपदयोरर्थान्तरमपि तत्र निरुपयोगि ॥**

* * *

**॥ अथ च तत्रान्ते लीलावतीकारोक्तस्य विशिष्टपदार्थस्य दूषणम् ॥**

२५२ **सु०— विशेषणविशेष्यसम्बन्धावगाह्येकं वा विज्ञानमविरलमनेकं वा विशिष्टमिति कश्चित् । यथाऽऽह 'विशेषणं विशेष्यं च तत्सम्बन्धफलार्पकम् । ज्ञानरूपं स्वसामर्थ्याद्विशिष्टमिति कीर्तितमि'ति । तन्न, विशिष्टस्य बाह्यार्थतयाऽनुभवात् । अन्यथा 'साध्यधर्मविशिष्टः पक्षः, सोऽनुमानेन प्रज्ञापनीय' इत्याद्ययुक्तं स्यात् । तस्मादतिरेकपक्षोऽनुपपन्न एव ।**

**परि०— अविरलमिति** । अगृहीतविवेकमनेकं विज्ञानमित्यनुषङ्गः । **यथाऽऽहेति** । ज्ञानरूपमगृहीतविवेकमेकं वाऽनेकरूपं ज्ञानं वा विशिष्टमिति कीर्तितम् । सामर्थ्यात् **तत्सम्बन्धफलार्पकम्** तयोः सम्बन्धे सति सम्बन्धबुद्धौ सत्यां यत्फलं विशिष्टव्यवहारादिकं तदर्पकं सद्विशिष्टमित्युच्यते । तत्सम्बन्धेत्यत्र तच्छब्दपरामर्शविषयः क इत्यत उक्तं **विशेषणमिति** । विशेषणं विशेष्यं च यद्वर्तते तयोः सम्बन्धे सति ।

**यादु०— अविरलमिति** । अगृहीतभेदमित्यर्थः । ननु विशेषणविशेष्यावगाह्यविरलानेकज्ञानं कथं विशिष्टं, तस्य तदुभयसम्बन्धाविषयकत्वेनातद्व्यावृत्तिप्रत्ययादिरूपफलजनकत्वासम्भवादित्याशङ्कां तत्सम्मतिप्रदर्शनव्याजेन परिहरति **यथेति** । ज्ञानरूपमविरलज्ञानयोः स्वरूपसम्बन्धाविषयकत्वेऽप्यगृहीतभेदत्वेन सम्बन्ध-

विषयकैकैकज्ञानसादृश्यरूपात्स्वसामर्थ्यात् । यद्विशेषणं विशेष्यं च तत्सम्बन्धफलार्पकं, तयोर्विशेषणविशेष्ययोः सम्बन्धे तद्विषयकज्ञाने सति यत्फलमतद्व्यावृत्तिप्रत्ययादिरूपं तज्जनकं विशिष्टमिति कीर्तितमित्यर्थः । **इत्याद्ययुक्तमिति** । ज्ञानस्य मानसप्रत्यक्षत्वादिति भावः । आदिपदेन दण्डविशिष्टमानयेत्यादौ विशिष्टस्यानयनादि-कर्मत्वमयुक्तं स्यादिति ग्राह्यम् । ज्ञानस्यानयनाद्यसम्भवादिति द्रष्टव्यम् ।

**वं०प०**— एकं विज्ञानं वेत्यन्वयः । **बाह्यार्थतयेति** । तथा च आन्तरज्ञानरूपत्वकथनमयुक्तमिति भावः । **अन्यथा** बाह्यतयाऽनुभूयमानस्यापि ज्ञानरूपत्वे ।

**कं०रा०**— **अविरलमिति** । नैरन्तर्येणोत्पन्नं विशेषणविशेष्यस्वरूपावगाह्यनेकं वा विज्ञानं विशिष्ट-मित्यर्थः । **विशेषणमिति** । विशेषणं विशेष्यं चावगाहमानं ज्ञानस्वरूपं स्वसामर्थ्यात् तत्सम्बन्धफलार्पकं तयो-र्विशेषणविशेष्ययोः सम्बन्धस्य यत्फलं विशिष्टव्यवहारादिकं तदर्पकं तज्जनकं सद्विशिष्टमिति कीर्तितमित्यर्थः ।

**श्रीनिधि०**— **विशेषणविशेष्यस्वरूपग्राहीति** । सम्बन्धविशेषणविशेष्यस्वरूपग्राहीत्यर्थः । **अविरलं** स्वरूपतो विषयतश्चागृहीतसंसर्गकम् । **अनेकमिति** । विज्ञानमिति वर्तते । अनेकं ज्ञानमिति पक्षे सम्बन्धेति न ग्राह्यम् । संसर्गाग्रहोऽत्राविद्यमानस्येति न ग्रहत्वमिति द्रष्टव्यम् । **विशेषणं विशेष्यं चेति** । यत् विशेषणं विशेष्यं च तयोः यः सम्बन्धः तदर्पकं तद्विषयकमिति प्रथमपक्षानुसारेण । फलार्पकमिति द्वितीय-पक्षानुसारेण तत्सम्बन्धाविषयकमेव तत्सम्बन्धस्य ज्ञातस्य यत्फलं व्यावृत्तिप्रतीत्यादिकं तदर्पकं तत्प्रापकमिति बुद्ध्या विवेकेन योज्यम् । **ज्ञानरूपं** ज्ञानस्वरूपम् । एकं वा गृहीतासंसर्गकम् अनेकं वेति शेषः । **स्वसामर्थ्यात्** स्वस्वभावेन । स्वसामग्र्या तथाप्राप्तमिति यावत् । केचित्तु बुद्ध्या विवेकमकृत्वा द्वितीयपक्षानुसारेणैव योजयन्ति । **अन्यथा** विशिष्टस्य बाह्यार्थत्वाभावे । पक्षः साध्यधर्मविशिष्ट इत्यनेन बाह्यार्थस्य पर्वतादेरेव विशिष्टत्वमनुभूयत इति उक्तं भवति । **सोऽनुमानेन प्रज्ञापनीय** इत्यनेन विशिष्टस्य ज्ञानरूपत्वे बाधक-मुच्यते । न हि ज्ञानस्य ज्ञापनीयत्वमस्ति सुतरामनुमानेन । किन्तु तज्ज्ञानं स्वत एवावर्जनीयसन्निधीति । आदिपदेन साध्यधर्मविशिष्टं चक्षुषा पश्येत्यादि गृह्यते ।

**शे०वा०**— लीलावतीकारोक्तं 'विशेषणविशेष्यतत्सम्बन्धेभ्योऽतिरिक्तं विशिष्टपदार्थं' दूषयितुमनुवदति **विशेषणेति** । अत्र टीकायां विशेषणविशेष्यसम्बन्धावगाहीत्येव पाठः, चिरन्तनकोशेषु तथा दर्शनात् । खण्डनादिषु विशेषणविशेष्ययोरिव तत्सम्बन्धस्याप्येकानेकज्ञानविषयतायाः स्पष्टमुक्तत्वाच्च । क्वचिद्विशेषण-विशेष्यस्वरूपावगाहीति पाठः । तत्रापि स्वरूपपदं सम्बन्धपरमेव । तथा च विशेषणविशेष्यसम्बन्धावगाह्येकं ज्ञानं विशिष्टम् । अथवा तदवगाह्यनेकमविरलं विज्ञानं विशिष्टमिति पक्षद्वयमुक्तं भवति । आद्ये लक्षणे विशेषणाद्येकैकमात्रविषयकेषु ज्ञानेष्वतिप्रसङ्गनिवारणायाद्यं विशेषणम् । घटपटौ रूपं समवेतमित्यनेकप्रतीतिषु तद्वारणाय द्वितीयमिति द्रष्टव्यम् । विशेषणविशेष्यसम्बन्धावगाहिनि भिन्नेन्द्रियजन्यानेकज्ञानात्मके सुरभिचन्दन-

मित्यादिविशिष्टे एकज्ञानत्वाभावादव्याप्तिवारणायाविरलमिति द्वितीयपक्षसङ्कीर्तनम् । अत्र चाविरलत्वमव्यवहितत्वं कालविलम्बेनानुत्पन्नमिति यावत् । अत्र कालविलम्बेनोत्पद्यमानानां विशेषणाद्यवगाहिनानाज्ञानानां विशिष्टत्व-प्रसङ्गं निवारयितुमविरलमित्युक्तम् । उक्तविशेषणकस्य विशेष्यानवगाह्यनेकज्ञानस्य व्यवच्छेदायोक्तं **विशेष्येति** । उक्तविशेष्यकस्य विशेषणानवगाह्यनेकज्ञानस्य तत्प्रसङ्गोच्छेदायोक्तं **विशेषणेति** । उक्तविशेषणकस्य सम्बन्धा-नवगाह्यनेकज्ञानस्य तद्व्यवच्छेदाय सम्बन्धेत्युक्तम् । न चैकज्ञानात्मके विशिष्टे द्वितीयस्यानेकज्ञानात्मके च तस्मिन्नाद्यस्य लक्षणस्याभावात् परस्पराव्याप्तिरिति वाच्यम् । उभयान्यतरत्वे तात्पर्यात् । तस्य चोभयत्रापि सत्त्वेन तदनवकाशात् । नन्वेवंरूपं विशिष्टं लीलावतीकृतोक्तमिति कुतो विज्ञायत इत्यतस्तद्वाक्यादेवेत्यभिप्रेत्य तदुदाहरति **यथेति** । यद्यप्यत्र ज्ञानेन रूप्यते निरूप्यते विषयीक्रियत इति यावत् । ज्ञानरूपं ज्ञानविषयो विशेषणं विशेष्यं चशब्दात्सम्बन्ध इत्येतत्स्वसामर्थ्यात् यतो विशिष्टव्यवहारजनकम् अतो विशिष्टमिति कीर्तितमिति योजना प्रतीयते, सम्मता चेयं सर्वतान्त्रिकाणामेकज्ञानारूढो वाऽविरलानेकज्ञानारूढो वाऽनेकोऽर्थः । सम्बन्धश्च विशिष्टपदार्थ इत्येतन्मतस्य खण्डनादावाशङ्क्य निराकरणादुक्तयोजनानभिमतौ तस्यानवकाशात् । एवं चैक-ज्ञानोपरूढानां वाऽविरलानेकज्ञानोपरूढानां वा विशेषणविशेष्यसम्बन्धानां विशिष्टत्वप्रतिपादक एवायं ग्रन्थः । न त्वेकस्य ज्ञानस्य अनेकस्य ज्ञानस्य वा विशिष्टत्वप्रतिपादक इति नास्योपयोगः प्रकृत इति तदुपन्यासो-ऽनुचित इत्याभाति । तथाऽपि तथा योजनायां विशेषणमित्यादिग्रन्थस्य किं वैशिष्ट्यं ज्ञानविशेष इत्यादिप्रश्न-परिहारात्मकतत्पूर्वग्रन्थविरोधप्रसङ्गात् तामुपेक्ष्योक्तरीत्या ज्ञानरूपं ज्ञानविषयो विशेषणं विशेष्यं चशब्दात् सम्ब-न्धश्च विशेषण-विशेष्यतत्सम्बन्धावगाहिज्ञानमिति यावत् । तच्चैकमविरलमनेकं वा विशिष्टमिति कीर्तितमिति योजनान्तरमाश्रित्य ज्ञानस्य विशिष्टपदार्थत्वप्रतिपादकत्वलाभेन प्रकृतोपयोगोऽस्तीत्याशयेनैतदुपन्यास इति द्रष्टव्यम् । ज्ञानस्य तत्सम्बन्धफलार्थकमिति विशिष्टव्यवहारजनकत्वकथनं तु प्रसिद्धस्यापि विशिष्टस्य विशिष्ट-पदार्थतायां नियामकतया पराभिमतस्य विशिष्टव्यवहारजनकत्वस्य प्रसिद्धे विशिष्ट इवोक्तरूपज्ञानेऽपि सत्त्वाद्युक्तं तस्य विशिष्टपदार्थत्वमित्यभिप्रेत्य, तथाच तत्सम्बन्धफलार्पकं तयोर्विशेषणविशेष्ययोर्यः सम्बन्धो वैशिष्ट्याख्यः स यथा विशिष्टव्यवहारं जनयतीति विशिष्टनामा । तथा ज्ञानमपि, फलं विशिष्टव्यवहारं जनयतीत्यतो विशिष्ट-मिति कीर्तितमिति योज्यम् । स्वसामर्थ्यादिति स्वभाववादानुसरणं तु शङ्कान्तरनिरासाय कृतम् । तथाहि । विशिष्टव्यवहारः सम्बन्धकार्यः । तस्य कथं ज्ञानं हेतुः स्यात् । अन्यकार्यस्यान्येनाजननादन्यथाऽतिप्रसङ्गः स्यादिति शङ्किते यथा वैशिष्ट्यनिमित्तकत्वेऽपि विशिष्टव्यवहारस्य न वैशिष्ट्यं स्वविशिष्टव्यवहारं वैशिष्ट्या-ज्जनयति तत्रैव तद्वृत्तेरप्रामाणिकत्वेनासम्भवात् । किन्तु स्वभावादेव । अत एव नातिप्रसङ्गः । तथा विवक्षित-ज्ञानविशेषोऽपि स्वभावादेव विशिष्टव्यवहारजनकः अतो नातिप्रसङ्ग इति सर्वमनवद्यम् ।

**अनुभवादिति** । तथा च विशिष्टस्य बाह्यार्थत्वस्थित्या नान्तरत्वेनानुभूयमानज्ञानरूपता तस्येत्यर्थः । **इत्याद्ययुक्तं स्यादिति** । ज्ञानस्य मानसप्रत्यक्षत्वादिति भावः । आदिपदेन दण्डिनमानयेत्यादौ विशिष्ट-स्यानयनकर्मत्वानुपपत्तिपरिग्रहः । ज्ञानस्यामूर्तत्वेनानयनाद्यसम्भवादिति द्रष्टव्यम् । अतिरेकपक्षस्योपपादित-

मसम्भावितत्वमुपसंहरति **तस्मादिति** । अनुभवादिविरुद्धत्वादित्यर्थः । 'एव' इत्यतःपरं 'इति स्फुटमेवेत्यतो न मूलकृता दूषितः' इति शेषः ।

**वा०र०—** खण्डनादिष्विति । एकज्ञानारूढो वा विरलनानाज्ञानारूढो वाऽनेकोऽर्थः सम्बन्धश्च विशिष्टपदार्थ इति चेत्यादावित्यर्थः । लीलावतीवाक्यस्य लक्षणद्वयपरत्वं सविवरं ..... अनुसारेण प्रतिपादयति **आद्ये लक्षण इत्यादिना तदनवकाशादित्यन्तेन** । किं वैशिष्ट्यं ज्ञानविशेष इत्यादीति लक्षणविचारे किं वैशिष्ट्यमित्याशङ्क्य तत्परिहारकतया ज्ञानविशेष इत्युत्तरस्याभिहितत्वेन प्रश्नपरिहारात्मकत्वं विशेषणं चेत्येतत्पूर्वग्रन्थस्येत्यर्थः ।

**स०व्र०— अविरलमिति** । अगृहीतभेदमित्यर्थः । 'विशेषणं विशेष्यं च' इत्यादिकारिकाया अयमर्थः । **ज्ञानरूपं** ज्ञानेन रूप्यते निरूप्यते तत् ज्ञानरूपम् । ज्ञानविषय इति यावत् । तादृशं विशेषणं विशेष्यं विशेष्यविशेषणावगाहिज्ञानमिति यावत् । स्वयं विशेषणविशेष्यसम्बन्धविषयकमपि स्वसामर्थ्यादिव विशेषणविशेष्ययोः सम्बन्धव्यवहारजनकं ज्ञानं विशिष्टमिति कीर्तितमिति ।

**विठ्ठल०— अविरलमिति** । अगृहीतविवेकमित्यर्थः । **विशेषणं विशेष्यं चेति** । यद्विशेषणं यच्च विशेष्यं तयोर्विशेषणविशेष्ययोः सम्बन्धः । अत्र सम्बन्धशब्देन सम्बन्धविषयज्ञानं विवक्षितम् । तस्य तत्सम्बन्धज्ञानस्य यत्फलम् इतरव्यावृत्तिप्रत्ययरूपं तस्यार्पकं जनकज्ञानरूपं अविरलज्ञानयोः स्वरूपं सम्बन्धविषयकैकज्ञानस्य रूपमिव रूपं यस्य एकज्ञानसदृशमिति यावत् इति वा तद्विशिष्टमिति कीर्तनम् । ज्ञानद्वयस्य कथं सम्बन्धविषयकस्य सम्बन्धविषयकैकज्ञानजनकत्वमित्यत उक्तं **स्वसामर्थ्यादिति** । अगृहीतभेदत्वेनैकगतसादृश्यरूपस्वसामर्थ्यादित्यर्थः । **अन्यथेति** । विशिष्टस्य ज्ञानरूपत्वमङ्गीकृत्य बाह्यार्थत्वानङ्गीकार इत्यर्थः । विशिष्टस्य ज्ञानत्वे मानसप्रत्यक्षवेद्यत्वेन बाह्यप्रमाणावेद्यत्वादिति भावः । आदिपदेन दण्डविशिष्टमानयेत्यादौ विशिष्टस्यानयनादिकर्मत्वमित्युक्तं स्यात् । ज्ञानस्य नयनाद्ययोगादित्येतद्वह्यते ।

**॥ इति लीलावतीकारोक्तस्य विशिष्टपदार्थस्य दूषणम् ॥**

**॥ इति 'औपाधिकविशिष्टाद्यं त्रितयान्यदि'ति पक्षनिराकरणम् ॥**

* * *

**॥ अथ च तत 'औपाधिकविशिष्टाद्यं त्रितयानन्यदि'ति पक्षनिराकरणम् ॥**

**॥ अथ च तत्रादौ अनन्यत्वपक्षेऽपि तत्त्रितयस्य विविधविकल्पाः ॥**

२५३ **सु०—** अस्तु तर्ह्यौपाधिकविशिष्टाद्यं त्रितयानन्यदित्यत आह **तदेवेति** ।

**अनु०—** तदेव चेदग्निमत्त्वं किं तत्र भण्यते ।

प्रतिपत्तिसौकर्यायोदाहरणनिष्ठतया मतुपा प्रश्नः कृतः 'अग्निमत्त्वमि'ति । धूमाद्यनुमानसाध्यं विशिष्टमित्यर्थः । औपाधिकादेरप्युपलक्षणमेतत् ।

अयमर्थः । अग्निमदादिविशिष्टं च यदि विशेषणविशेष्यतत्सम्बन्धेभ्योऽनन्यदङ्गीक्रियते तदाऽपि वक्तव्यम्, किं तत्त्रितयमपि प्रत्येकं विशिष्टमुता(तत्र)न्यतमम् । द्वितीयेऽपि किं विशेषणभूतोऽग्निरेवाग्निमच्छब्दार्थः, उत विशेष्यरूपः पर्वतः, अथ सम्बन्धः संयोगलक्षणः । संयोगपक्षेऽपि किं निर्विशेषणसंयोगः किंवाऽग्निना संयोगः । उत्तरत्रापि किमग्निसंयोगमात्रम्, उत पर्वतस्याग्निसंयोग इति ।। एवं पाचकादेरपि पचनादित्रयानन्यत्वे विकल्पो द्रष्टव्यः ।

**परि०— तत्रान्यतममिति** । अन्यतममिति पाठः साधुः न त्वन्यतमदिति । 'अड्डतरादिभ्यः पञ्चभ्य' इत्यत्रोपात्तेभ्यो डतरडतमइतरअन्यअन्यतरशब्देभ्योऽन्यतमशब्दस्य पृथगुक्तेः । अन्यतमान्यतरशब्दावव्युत्पन्नौ स्वभावादेव द्विबहुत्वविषयौ । निर्धारणे कर्तृभेद इति पस्पशाह्निके कैयटोक्तेः ।

**यादु०— प्रत्येकं विशिष्टमिति** । विशेषणादिकं समस्तमपि विशिष्टमित्येतत्कल्पार्थः ।

**वं०प०— उदाहरणेति** । अग्निमत्त्वरूपविशिष्टोदाहरणनिष्ठत्वेनाग्निमत्त्वं किं तत्र भण्यत इति प्रश्नः कृतः ।

**श्रीनिधि०— औपाधिकविशिष्टाद्यमिति** । **विशिष्टं** प्राक् सामान्यतयेवोपात्तम् । इदानीम् अग्निमान् तत्त्वेन गृहीतः । तथाऽत्रैवेयं चिन्तेति प्रतीयते । अत आह **प्रतिपत्तीति** । **उदाहरणनिष्ठतयेति** । उदाह्रियत इत्युदाहरणमग्निमदादिः, तन्निष्ठतया । एवं चेदमन्यथासिद्धमिति भावः ।

**शे०वा०—** ननु चात्रौपाधिकविशिष्टोऽयमिति प्रक्रमानुरोधाद्विशिष्टं किं तत्र भण्यत इति विशिष्टमात्रनिष्ठतया विकल्पप्रश्नः कर्तव्यः, तत्कथमग्निमत्त्वं तत्र भण्यत इति विशिष्टविशेषाग्निमत्त्वनिष्ठतया विकल्पप्रश्न इत्यतो मन्दानां प्रतिपत्तिसौकर्यार्थमेवोदाहरणनिष्ठतया प्रश्नः कृतो न त्वस्य यथाश्रुत एवार्थः, किन्तु धूमाद्यनुमानसाध्यं विशिष्टं किं तत्र भण्यत इत्येवेत्यतो न प्रकृताननुगुण्यमित्याह **प्रतिपत्तीति** । ननु तथाऽप्यौपाधिकविशिष्टाद्यं तदेवोपाध्यादित्रितयानन्यदिति शङ्काग्रन्थानुरोधेन विशिष्टस्यैवौपाधिकोपलक्षितयोरप्यत्र ग्राह्यत्वाद्विशिष्टमात्रे विकल्पप्रश्नानुपपत्तिरित्यतो विशिष्टोक्तेरत्रौपाधिकोपलक्षितोपलक्षणत्वेन विशिष्टमात्रपरत्वाभावान्नानुपपत्तिरित्यभिप्रेत्य तदुपलक्षणतया विशिष्टोक्तिं योजयति **औपाधिकेति** । नन्वग्निमत्त्वं किं तत्र भण्यत इति कथं

विकल्पप्रश्नः कोटीनामनिर्देशेन तदलाभात् । न चाग्निसंयोगमात्रं चेदिति भूधरस्याग्निसंयोग इति कोटिद्वय-प्रदर्शनशङ्काग्रन्थानुरोधेनात्राग्निसंयोगो वाऽग्निमच्छब्दार्थः । भूधरस्याग्निसंयोगो वेति कोटिद्वयलाभान्नानुपपत्तिरिति वाच्यम् । विशिष्टस्य विशेषणादित्रितयानन्यत्ववादिना विशेषणविशेष्ययोरपि विशिष्टताया वक्तुं शक्यत्वेन तत्परित्यागेन संयोगमात्रस्यैव विशिष्टपदार्थत्वस्य शङ्कितुमशक्यत्वात् इत्याशङ्क्य साक्षात्परम्परासाधारण्येन कोटीनामतिबाहुल्यादत्र तदनिर्देश इत्यभिप्रेत्य तदुपदर्शनेन विकल्पप्रश्नमुपपादयितुमाह **अयमर्थ इति** । **प्रत्येकं विशिष्टमिति** । अग्निरपि पर्वतोऽपि सम्बन्धोऽपीत्येवं सर्वमपि विशिष्टमित्यर्थः । उत तत्राप्यन्यतम(मि)दिति विशेषणादित्रये यत्किञ्चिदेकमेव विशिष्टं न तु सर्वमित्येतत्कल्पार्थः । **विशेष्यरूपः पर्वत इति** । विशेष्यरूपः पर्वत एवाग्निमच्छब्दार्थ इति पूर्वेणान्वयः । **एवमिति** । अयमर्थः । औपाधिकं यद्युपाधिपुरुषतत्सम्बन्धेभ्यो-ऽनन्यदङ्गीक्रियते तदा वक्तव्यं किं तदुपाध्यादित्रितयमपि प्रत्येकमौपाधिकमुत तत्रान्यतमम् । द्वितीयेऽपि किमुपाधिभूतः पाक एव पाचकशब्दार्थः, उत विशेष्यरूपः पुरुषः, अथ सम्बन्धः समवायलक्षणः । समवाय-पक्षेऽपि किं निर्विशेषणः समवायः किं वा पाकेन समवायः । उत्तरत्रापि पाकसमवायमात्रम्, उत पुरुषस्य पाक-समवाय इति । एवमेवोपलक्षितस्याप्युपलक्षणादित्रितयानन्यत्वे विकल्पो द्रष्टव्यः ।

**वा०र०**— उदाहरणनिष्ठतया प्रश्नः कृत इत्येतावानेव मूलपाठष्टीकाकृदभिप्रेतः । अत एव प्रतिपत्ति-सौकर्यार्थमेवोदाहरणनिष्ठतया प्रश्नः कृत इत्यनुवादः । मतुपेत्यधिकं क्वचिदस्ति । तत्रापि मतुपा चेति चशब्दा-ध्याहारेण प्रतिपत्तिसौकर्यार्थमेवाग्निमतो भावस्याग्निरूपत्वेऽपि कोऽग्निरित्युक्ते विवक्षितार्थाप्रतिभासादग्निमत्त्व-मित्युक्तमित्यर्थो ज्ञेयः । उतान्यतममिति मूलटीकयोः प्रयुक्तम् । यदन्यतममिति जिज्ञासाधिकरणीय 'मिथ्यायाः साधकत्वं चे'ति भाष्यमूले 'ब्रह्माद्यन्यतममि'ति तत्त्वप्रकाशिकायां च तदधिकरणे 'परो दिवा पर' इत्येतद्भाष्य-व्याख्यावसरे प्रयोगः वाक्यत्वादृष्टत्वविषयवाक्यत्वादृष्टविषयप्रमाणवाक्यत्वानामन्यतममिति तत्त्वनिर्णयटीकाया-मपौरुषेयत्ववादे प्रयोगः । एवमन्यत्रापि तथा तथा तत्र तत्र प्रयोगाः ।

ननु किं 'यत्तदोरि'ति सूत्रेण किमादिशब्देभ्य एव तरबादिविधानादन्यशब्दात् तत् एकाच्च प्राचामिति सूत्रप्रक्रियायां तु अन्यशब्दात् डतमच् इति केचिदित्युक्तेः, 'सर्वादीनि सर्वनामानी'ति सूत्रमञ्जर्यां संयोग-समवाययोरन्यतरदिति तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणादिति च प्रयोगात् कथञ्चिद्डतमच् प्राप्तावप्यन्यतर-शब्दपाठवदन्यतमशब्दस्य सर्वादिगणे पाठाभावात् 'अदड्डतरादिभ्यः पञ्चभ्य' इत्युक्तमन्तर्गणकार्यं कथमित्यादि-शङ्कायाः परिहारो जिज्ञासाधिकरणेऽस्माभिः कृतोऽत्राप्यवधेयः । अत्रापि लेख्योऽस्ति ।

**विठ्ठल०**— विशिष्टमिति वक्तव्ये अग्निमत्त्वमिति विशेषग्रहणे निमित्तमाह **प्रतिपत्तिसौकर्यायेति** । तथा धूमानुमानसाध्यमग्निमत्त्वरूपं विशिष्टं तदेव चेद्विशेषणविशेष्यतत्सम्बन्धेभ्योऽनन्यं चेदङ्गीक्रियते । तत्र किमिति भण्यते मया पृच्छत इति मूलार्थः । किं तत्र भण्यत इत्युक्तं विकल्पप्रकारं व्यञ्जयितुमाह **अयमर्थ-मिति** । **तत्त्रितयमिति** । अग्निपर्वते तत्सम्बन्धरूपत्रयमपीत्यर्थः । **उत्तरत्रापि** अग्निना संयोग इत्यत्रापीत्यर्थः ।

**चषक— अन्यतममिति** । अन्यतमशब्दस्य डतरादिशब्दपञ्चकान्यतया 'न अड्डतरादिभ्य' इत्यस्य प्रवृत्तिरिति भावः ।

**॥ इति अनन्यत्वपक्षेऽपि तत्त्रितयस्य विविधविकल्पाः ॥**

* * *

**॥ अथ च ततः अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थेतरविकल्पानां निराकरणम् ॥**

२५४ **सु०—** अन्त्यपक्षातिरिक्तान् सर्वपक्षानपाकरोति **अग्नीति** ।

## अनु०— अग्निसंयोगमात्रं चेद्भवेत्तत्सिद्धसाधनम् ।

**अग्निसंयोगमात्रम्** इति सर्वपक्षोपलक्षणम् । **चेत्** अग्निमच्छब्दार्थ इति शेषः । **तत्** **धूमवत्त्वाद्यनुमानम् । अग्निपर्वतसंयोगानां समस्तानां व्यस्तानामग्निना संयोगस्य चाग्निमच्छब्दवाच्यविशिष्टत्वे, धूमानुमानं सिद्धसाधनं स्यात् । विशिष्टस्यानुमानसाध्यत्वात्, अग्न्यादेर्विशिष्टस्य मानान्तरत एव सिद्धत्वादिति ।**

**परि०—** चेदित्यनूद्य तदन्विततया आकाङ्क्षितं पूरयति **चेदग्निमच्छब्दार्थ इति शेष इति** । 'तदि'ति मूलानुवादः । 'धूमे'त्यादि व्याख्या । **समस्तानामिति** । प्रत्येकं विशिष्टमिति पक्षोक्तानां विशेषणविशेष्यतत्सम्बन्धानां मिलितानां त्रयाणामित्यर्थः । **व्यस्तानामिति** । अन्यतममित्युक्तपक्षावान्तरभेदभिन्नानामित्यर्थः । **संयोगस्य चेति** । संयोगपक्षेऽपीत्युक्तपक्षावान्तरभेदभिन्नस्येत्यर्थः ।

**यादु०— सर्वान्पक्षानिति** । अत्र सर्वशब्देन प्रत्येकं विशिष्टमिति प्रथमपक्षोऽपि सङ्ग्राह्यतया विवक्षितः । तेन तत्पक्षदूषणाभावान्न्यूनतेति शङ्काऽनवकाश इति ध्येयम् । अत एवाह **समस्तानामिति** । सर्वेषामित्यर्थः । **व्यस्तानामिति** । अन्यतमरूपाणामित्यर्थः ।

**वं०प०— समस्तानामिति** । त्रितयमपि प्रत्येकं विशिष्टमिति पक्षे त्रयाणामपीत्यर्थः । उत तत्रान्यतम(मि)दिति पक्षे **व्यस्तानामित्युक्तम्** । एकैकस्य वेति यावत् ।

**श्रीनिधि०— सर्वपक्षानिति** । आद्यविकल्पे प्रथमकोटिरपि सर्वपदेन गृह्यते । **समस्तानामिति** । **आद्ये** आद्यकोट्यनुसारेण ।

**शे०वा०**— नन्वेवमभिप्रायवर्णनेऽग्निसंयोगमात्रं चेदित्याद्युत्तरग्रन्थविरोधः । तत्राग्निसंयोगमात्रस्याग्निमच्छब्दवाच्यविशिष्टतामाशङ्क्य निराकरणादित्यतो भवेदेवं यदि त्वदुक्तरीत्याऽग्निसंयोगमात्रस्य विशिष्टत्वमाशङ्क्य तन्निरासपरमिदं स्यात् । न चैतदस्ति । किं तर्हि विशेषणादीनां सर्वेषामपि विशिष्टतामाशङ्क्य तन्निरासपरमिति न तद्विरोध इत्यभिप्रेत्य विशेषणादित्रितयमपि प्रत्येकमपि विशिष्टमिति विकल्पितानेकपक्षनिरासपरतया योजयति **अन्त्यपक्षेति** । भूधरस्याग्निसंयोग इत्येतत्पक्षव्यतिरिक्तसर्वपक्षानित्यर्थः । नन्वत्राग्निसंयोगमात्रमित्युक्तेः कथमस्य विकल्पिताशेषपक्षनिरासकत्वमित्यतोऽस्य विकल्पितानेकोपलक्षणत्वेन मुख्यवृत्त्याऽग्निसंयोगमात्रपरत्वाभावान्नानुपपत्तिरित्यभिप्रेत्य सर्वपक्षोलक्षणतया तद्योजयति **अग्निसंयोगमात्रमितीति** । **सर्वोपलक्षणम्** अन्त्यपक्षव्यतिरिक्तसर्वोपलक्षणमित्यर्थः । **समस्तानामिति** । अग्निरपि पर्वतोऽपि संयोगोऽपीत्येवं प्रत्येकं विशिष्टभूतानां सर्वेषामित्यर्थः । **व्यस्तानामिति** । अग्निरेव, पर्वत एव, संयोग एवेत्येवमन्यतमरूपेणैव विशिष्टभूतानामित्यर्थः।

**विठ्ठल०**— **समस्तानामिति** । सर्वेषामित्यर्थः । तत्र त्रितयमपि प्रत्येकं विशिष्टमित्यस्यानुवादोऽयम् । तत्रान्यतममित्यस्यानुवादो **व्यस्तानामिति** । अन्यतमरूपाणामित्यर्थः । **अग्निसंयोगस्येति** । अग्निसंयोगमात्रस्येत्यर्थः । निर्विशेषणसङ्गस्यात्र कैमुत्येन लाभः ।

**॥ इति अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थेतरविकल्पानां निराकरणम् ॥**

* * *

**॥ अथ च तत्रान्ते अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थविकल्पस्यापि निराकरणम् ॥**
**॥ अथ च तत्र अग्निमच्छब्दार्थभूत 'पर्वतस्याग्निसंयोगः' इत्यत्रत्यषष्ठ्यर्थविकल्पनिरासः ॥**

**२५५ सु०— 'अस्तु तर्हि पर्वतस्याग्निना संयोगो विशिष्टरूपोऽग्निमच्छब्दार्थोऽनुमानसाध्य इत्यन्तिमः पक्षः, तत्रोक्तदोषाभावात्, पर्वताग्निसंयोगानां समस्तानां व्यस्तानामग्निसंयोगस्य च सिद्धत्वेऽपि पर्वतस्याग्निना यः संयोगस्तस्यानुमानतः प्रागसिद्धेरि'ति शङ्कते भूधरस्येति ।**

## अनु०— भूधरस्याग्निसंयोगो यदि षष्ठ्यर्थ एव कः ।

'अग्निमच्छब्दार्थो विशिष्टोऽनुमानसाध्य' इति शेषः । दूषयितुं पृच्छति **षष्ठ्यर्थ इति** । पर्वतस्याग्निसंयोगस्य च सिद्धत्वेऽपि पर्वतस्य योऽग्निसंयोगः स न सिद्ध इत्यतः, स एव विशिष्टोऽग्निमच्छब्दार्थोऽनुमानवेद्य इति वदता, पर्वतस्येति षष्ठ्या निर्दिष्टः सम्बन्ध एव विशिष्टोऽग्निमच्छब्दार्थोऽनुमानवेद्य इत्युक्तं भवति; अन्यस्य सर्वस्य सिद्धत्वात् ।

**षष्ठ्यर्थाश्च सम्बन्धा वैयाकरणैरनेके गणिताः, अतः कोऽत्र सम्बन्धो विवक्षित इति प्रश्नार्थः । एवशब्दः तस्यैव प्राधान्यद्योतनार्थः ।**

**परि०— वैयाकरणैरनेके गणिता इति** । षष्ठी स्थानेयोगेत्याद्याध्यायाद्यपादीयसूत्रार्थ-महाभाष्ये एकशतं षष्ठ्यर्था इत्युक्तेः । ते च स्वस्वामिभावादयो दण्डके पठिता इति कैयटाद्युक्तेरिति भावः ।

**वं०प०—** कुतः षष्ठ्या निर्दिष्टः सम्बन्ध एव विशिष्टाग्निमच्छब्दार्थोऽनुमानवेद्य इत्याशङ्कायामेव शब्दद्योतितं प्राधान्यं तस्योपपादयति **अन्यस्य सर्वस्येति** । अन्यस्य सर्वस्य पर्वतस्य वाऽग्निसंयोगस्य वा प्रत्यक्षादिमानान्तरतः सिद्धत्वेन पर्वतस्येति षष्ठ्या निर्दिष्टो यः सम्बन्धस्तस्यैवानुमानवेद्यतया प्राधान्यमिति सूचयितुमेवशब्द इत्यर्थः ।

**कं०रा०—** अत्र विशेषणं विशेष्यं चावगाहमानमिति सामान्योक्त्या विशेषणविशेष्यस्वरूपावगाह्येकं वा विज्ञानमविरलमनेकं वा विशिष्टमिति पक्षद्वयं सङ्गृहीतमिति द्रष्टव्यम् । षष्ठ्यर्थ एव क इत्यत्र एवशब्दस्य वैयर्थ्याशङ्कायामाह **एवशब्द इति** । एवशब्दः षष्ठ्यर्थभूतसम्बन्धस्य प्राधान्यद्योतनार्थ इत्यर्थः ।

**श्रीनिधि०—** भूधरस्याग्निसंयोगः साध्यत इति उक्ते षष्ठ्यर्थः क इति प्रश्नो सङ्गतः । सङ्गतौ वा सम्बन्धानेकत्वस्याप्रसिद्धेरनेककोट्यधीनः क इति प्रश्नो न इत्युच्यत इत्यत आह **पर्वतस्याग्निसंयोगस्य च सिद्धत्वेऽपीत्यादिना** । **अनेके** एकशतम् । उक्तं च कैयटे । 'एकशतं षष्ठ्यर्था' इति । **प्राधान्यद्योतनार्थ इति** । पर्वतादिवस्तुपरमित्यर्थः ।

**शे०वा०—** कुतस्तस्य स्वीकार इत्यत आह **तत्रेति** । **उक्तदोषेति** । सिद्धसाधनत्वाभावादित्यर्थः । दोषाभावमेवोपपादयति **पर्वतेति** । अपेक्षितपूरणेनान्तिमपक्षशङ्कापरत्वं घटयति **अग्निमच्छब्दार्थ इत्यादिना** । ननु षष्ठ्यर्थ एव क इति षष्ठ्यर्थसम्बन्धविकल्पोऽनुपपन्नः । प्रकृतशङ्काननुगुणत्वात् । न च षष्ठ्यर्थसम्बन्धस्य अनुमानवेद्यत्वसम्भवप्रदर्शनार्थत्वेन प्रकृतसङ्गत्वात् न तदिति वाच्यम् । भूधरस्याग्निसंयोगमनुमानवेद्यमङ्गीकुर्वता षष्ठ्यर्थसम्बन्धस्यैवानुमानवेद्यतया स्वीकर्तव्यत्वनिर्बन्धे कारणाभावेन तदसिद्धेः । कथञ्चित्तत्सिद्धावपि कः षष्ठ्यर्थ इति षष्ठ्यर्थसम्बन्धविकल्पानुपपत्तिरेव षष्ठ्यर्थसम्बन्धस्यानेकत्वासिद्ध्या निर्बीजत्वादित्यतः षष्ठ्यर्थसम्बन्धस्यानु-मानवेद्यतया स्वीकर्तव्यतोपपादनपूर्वकं विकल्पप्रश्नबीजोपदर्शनेन तमुपपादयति **पर्वतस्येत्यादिना** । **वैया-करणैरिति** । 'षष्ठी स्थानेयोगे'त्यत्र, 'एकशतं षष्ठ्यर्थाः' इति महाभाष्ये, 'ते च स्वस्वामिभावादयः सम्बन्धाः षष्ठीदण्डके पठिताः' इति कैयटे चोक्तेरिति भावः । **प्राधान्यज्ञापनार्थ इति** । प्राधान्यं च 'कस्यात्रासिद्ध्या साध्यत्वमन्यस्यासम्भवात् षष्ठ्यर्थस्य समवायस्येति वाच्यमि'त्यादि चोत्तरत्र स्फुटीभविष्यतीति ध्येयम् ।

**स०व्र०— प्राधान्यद्योतनार्थ इति** । प्राधान्यं च 'कस्य अत्रासिद्ध्या साध्यत्वमि'ति अन्यस्या-सम्भवात् षष्ठ्यर्थस्य समवायस्येति वक्तव्यम्' इत्यादि उत्तरत्र स्फुटम् ।

**विट्ठल०— पर्वतस्याग्निसंयोगस्य चेति** । पर्वतमात्रस्याग्निसंयोगमात्रत्वसिद्धत्वेऽपीत्यर्थः । पर्वतस्य यो अग्निसंयोग इत्यस्य पर्वतीयाग्निसंयोग इत्यर्थः । पर्वतस्येति षष्ठ्या निर्दिष्टः सम्बन्ध एव अग्निमच्छब्दवाच्यो विशिष्टोऽनुमानसाध्य इत्येतत्कुत इत्यत आह **अन्यस्य सर्वस्येति** । षष्ठ्यर्थः सम्बन्ध एवेति निश्चितत्वोक्त इति प्रश्नानुपपत्तिरित्यत आह **षष्ठ्यर्थाश्चेति** । 'एकशतं षष्ठ्यर्था' इति महाभाष्योक्तेरिति भावः । ते च स्वस्वामिभावादय इति कैयटे ।

**चषक— अनेके गणिता इति** । 'एकशतं षष्ठ्यर्था' इति भाष्ये भाषणात् ते च स्वस्वामिभावादयो दण्डके पठिता इति कैयटाद्यभिहितेश्चेति भावः ।

* * *

**॥ अथ च तत्रादौ तच्छष्ठ्याः समवायार्थकत्वे एकत्वा(अभेदत्वा)त्सिद्धसाधनता ॥**

२५६ **सु०— उत्तरं शङ्कते समवाय इति ।**

## अनु०— समवायो यदि हि

**संयोगो हि गुणः, पर्वतश्च गुणी, गुणगुणिनोश्च समवायः सम्बन्धः, इति प्रसिद्ध-मिति 'हि'शब्दार्थः । षष्ठ्यर्थ इति वर्तते ।**

**निराकरोति अस्य चेति ।**

## अस्य चैकत्वात्सिद्धसाधनम् ।

**पर्वतादेरिव अस्य समवायस्य च सिद्धत्वादिति शेषः । सिद्धसाधनं धूमाद्यनुमान-मिति शेषः । कथं समवायस्य सिद्धत्वमित्यत उक्तम् एकत्वादिति ।**

**यस्तन्तुपटयोः समवायः, स एव हि पर्वताग्निसंयोगयोः समवायः परेणाङ्गीकृतः । तन्तुपटयोः समवायश्च प्रत्यक्षेण वाऽनुमानेन वा सिद्ध एवेति ।**

**वं०प०**— समवाय ऐन्द्रियक इति मतानुसारेण प्रत्यक्षेण वेत्युक्तम् । अतीन्द्रिय इति मतानुसारेण अनुमानेन वेत्युक्तम् । इह तन्तुषु पट इत्यादिविशिष्टप्रत्ययः सम्बन्धिभिन्नसम्बन्धनिबन्धनः अबाधितेहप्रत्ययत्वादिह कुण्डे बदराणीति प्रत्ययवदित्यनुमानं द्रष्टव्यम् ।

**शे०वा०**— न्यायमतमाश्रित्याह **प्रत्यक्षेणेति** । वैशेषिकमतमाश्रित्याह **अनुमानेन वेति** ।

* * *

**॥ अथ च तत्र उक्तार्थसङ्ग्रहः ॥**

**२५७ सु०— अयमत्र समुदायार्थः । यद्येक एव सर्वत्र समवायः स्यात् तदा सर्वानुमानानां सिद्धसाधनता स्यात् । यद्यपि याथार्थ्यमेव प्रामाण्यं तथाऽपि शब्दवत्परार्थानुमानस्य परापेक्षया प्रवृत्तत्वात्सिद्धसाधनता दोष एव ।**

**तथा हि । सर्वमप्यनुमानं न वस्तुस्वरूपमात्रपरम्, तस्यासिद्धावाश्रयासिद्धेः, सिद्धौ च सिद्धसाधनत्वात्; किन्तु केनचिदुपहितं वा विशिष्टं वोपलक्षितं वेति वक्तव्यम् । तच्च विशिष्टादिकं न विशेषणादित्रयादन्यदेवेति युक्तम्, अनुपलम्भादिबाधात् । त्रयानन्यत्वेऽपि न विशेषणमात्रम्, तस्य अनुमानात्प्राक् सिद्धत्वात्; असिद्धौ चाप्रसिद्धविशेषणत्वापत्तेः, अग्नेरेवाग्निमच्छब्दार्थत्वे मतुपो वैयर्थ्यापत्तेश्च । नापि धर्मिस्वरूपमात्रम्, उक्तदोषात्, 'पर्वतोऽग्निमानि'त्येतयोरेकार्थत्वापत्तेश्च । न च सम्बन्धमात्रम्; संयोगो हि क्वचित्सम्बन्धः स्यात् यथाऽग्निपर्वतयोः, क्वचित्समवायः यथा रसाद्रूपानुमाने, द्वावपि स्वरूपतः सिद्धाविति सिद्धसाधनमेव । 'संयोगमात्रस्य सिद्धत्वेऽप्यग्न्यादिसंयोगः साध्य' इत्यपि न वाच्यम्, तस्यापि महानसादौ सिद्धत्वात् । अथ पर्वतादेरग्न्यादिसंयोगः साध्यः । अत्रापि विवेक्तव्यम्, कस्यात्रासिद्धया साध्यत्वमिति । अन्यस्यासम्भवात्, षष्ठ्यर्थस्य समवायस्येति वक्तव्यम् । स च सर्वत्रैक एव चेत् पुनः सिद्धसाधनतैव स्यात् । अतः सर्वानुमानोच्छेदप्रसङ्गात् सर्वत्र समवायैक्यमयुक्तमिति ।**

**परि०**— ननु याथार्थ्यमेव मानत्वमित्युक्तत्वात्सिद्धसाधनेऽपि तस्य सत्त्वात् को दोष इत्यत आह **यद्यपीति** । **उपहितमिति** । केनचिदुपाधिना युक्तमित्यर्थः । **अनुपलम्भादीति** । प्रागुक्तदिशाऽनुभवाभ्युपगमोपपत्तिबाधादित्यर्थः ।

**यादु०**— किन्तु केनचिदुपहितं वा विशिष्टं वोपलक्षितं वेत्यस्यानन्तरं यत्तत्परमिति शेषः । **अनुपलम्भादीति** । आदिपदेन अभ्युपगमोपपत्तिपरिग्रहः ।

**वं०प०**— नन्वस्तूक्तानुमानेषु सिद्धसाधनता । अथाऽपि याथार्थ्यरूपं प्रामाण्यं त्वक्षतमेवेति को दोष इत्याशङ्क्य निषेधति **यद्यपीत्यादिना** । **केनचिदिति** । उपाधिना विशेषणेन वोपलक्षणेनेत्यर्थः । **उक्तेति** । न धर्मिस्वरूपमात्रमनुमानवेद्यम् । **सिद्धत्वात्** असिद्धौ चाश्रयासिद्धेरित्युक्तदोषादित्यर्थः । पर्वतस्यैवाग्निमच्छब्दार्थत्वे पौनरुक्त्यं चेत्याह **पर्वत इति** । **रसाद्रूपानुमान इति** । तयोरेकार्थसमवेतत्वमेव सम्बन्धः । समवायस्येत्यनन्तरमसिद्ध्या साध्यत्वमिति शेषः ।

**कं०रा०**— **उक्तेति** । धर्मिस्वरूपमात्रस्य प्रागसिद्धावाश्रयासिद्धिः सिद्धौ चानुमानस्य सिद्धसाधनमित्युक्तदोषादित्यर्थः । **पर्वत इति** । अग्निमच्छब्दितविशिष्टस्य धर्मिस्वरूपमात्रत्वे तन्न्यायेन पर्वतशब्दितविशिष्टस्यापि धर्मिस्वरूपमात्रत्वात्पर्वतोऽग्निमानित्येतयोरेकार्थत्वापत्तेश्च न विशिष्टधर्मिस्वरूपमात्रमिति भावः ।

**श्रीनिधि०**— **आश्रयासिद्धेरिति** । धूमादेरनुमानस्येत्यर्थः । **सिद्धाविति** । उपलक्षणसिद्धावपि । न हि साध्यस्यैवाश्रयत्वं युज्यते । **सिद्धसाधनत्वादिति** । तस्यैव साध्यत्वादिति भावः । **उपलक्षितं वेति वक्तव्यमिति** । अत्रोपलक्षितं वेतीत्यतःपरं अनुमेयमिति शेषः । **अनुपलम्भादीति** । आदिपदेनाभ्युपगमोपपत्ती गृह्येते । **न विशेषणमात्रमिति** । अनुमेयं विशिष्टं विशेषणमात्रमिति नेत्यर्थः । **नापि धर्मिस्वरूपमात्रमिति** । अनुमेयं विशिष्टं धर्मिस्वरूपमात्रमिति नेत्यर्थः । **उक्तदोषादिति** । असिद्धावाश्रयासिद्धिः । सिद्धौ सिद्धसाधनमित्युक्तदोषादित्यर्थः । **आद्ये सिद्धसाधनत्वमिति** । धूमानुमानस्येति शेषः । भेदस्यासत्त्वे अभेदस्यैव वास्तवत्वादिति भावः ।

**शे०वा०**— ननु वस्तुस्वरूपमात्रपरत्वादनुमानस्य मानान्तरसिद्धविशिष्टाद्याकारपरत्वाभावान्न सिद्धसाधनत्वम् । अस्तु वा विशिष्टाकारपरत्वमेव तस्य । न च सिद्धसाधनत्वप्रसङ्गो दोषः । तादृशस्यापि यथावस्थितार्थज्ञानजनकतया प्रामाण्यसम्भवेन तदविघातकतया तस्य दोषत्वासम्मतेरित्यतो वस्तुस्वरूपमात्रपरत्वासम्भवं याथार्थ्येऽपि प्रामाण्यासम्भवं च व्युत्पादयन्नेव प्रतिपत्तिसौकर्याय औपाधिकमित्यादेरेकत्वात्सिद्धसाधनमित्यन्तस्य ग्रन्थस्याकाङ्क्षाक्रमेणाभिप्रायमाह **अयमत्रेति** । केनचिदुपहितं विशिष्टमुपलक्षितं वेत्यतःपरं यत्तत्परमिति पूरणीयम् । अनुपलम्भादिबाधादित्यत्रादिपदेनाभ्युपगमोपपत्त्योः परिग्रहः । **विशेषणमात्रमिति** । नन्वेतत्त्रितयानन्यत्वेऽप्यन्यतमे(दे)व विशिष्टमित्येतत्पक्षस्यैव निराकरणं तत्रैव विशेषणमात्रं विशेष्यमात्रमित्यादिविकल्पानां सत्त्वात् । न तु तत्पक्षे विशेषणादित्रितयमपि विशिष्टमिति प्राग्विकल्पितपक्षनिराकरणं तत्रोक्तविकल्पानामसम्भवात् । तथा च तदनिरासान्न्यूनत्वम् । न च तस्यानिरास्यत्वादेवात्र तदनिरासोपपत्तेर्न तदिति वाच्यम् । 'अन्त्यपक्षव्यतिरिक्तान्पक्षानपाकरोती'ति पर्वताग्निसंयोगानां समस्तानां व्यस्तानामग्निसंयोगस्य

च सिद्धत्वेनेत्यादिपूर्वग्रन्थानुरोधेन तत्पक्षस्यापि निरस्यत्वस्य सिद्धत्वेन तदनिरस्यत्वस्य कल्पयितुमशक्यत्वादिति चेत् । उच्यते । न विशेषणमात्रमित्याद्यन्यतमपक्षनिरासकानां 'प्राक् सिद्धत्वादसिद्धौ चाप्रसिद्धविशेषणत्वापत्तेरि'त्यादियुक्तीनां पक्षद्वयसाधारण्येनैतत्पक्षनिरासेनैव तन्निरासस्यापि सिद्ध्या पृथगनिरासोपपत्तेरिति । यद्वा न विशेषणमात्रमित्यादावुपलक्षणमेतन्न विशेषणमित्यादियोजना पक्षद्वयनिरासपरतयैवायं ग्रन्थो योज्यः । अत एव त्रितयानन्यत्वेऽपीत्येवोक्तम् । अन्यथाऽन्यतमत्वपक्ष इत्येवावक्ष्यदिति द्रष्टव्यम् । अप्रसिद्धविशेषणत्वं न स्वमते दोष इत्याशयेन (इत्यतो) दोषान्तरमाह **अग्रेरेवेति** । **उक्तदोषादिति** । तदसिद्धावाश्रयासिद्धिः सिद्धौ च सिद्धसाधनत्वादित्युक्तदोषादित्यर्थः । आश्रयासिद्धिर्न स्वमते दोष इत्यतोऽत्र दोषान्तरमाह **पर्वतोऽग्निमानित्येतयोरिति** । ततश्च पर्यायत्वप्रसक्त्या सहप्रयोगाभावप्रसङ्गादिति भावः । **सिद्धसाधनतैवेति** । तथा सति यस्तन्तुपटयोः समवायः स एव पर्वताग्निसंयोगयोः समवाय इति प्राप्त्या तन्तुपटसमवायस्य च प्रत्यक्षेणानुमानेन वा सिद्धत्वात् पर्वताग्निसंयोगसमवायस्यापि सिद्धत्वप्राप्तिरिति भावः । इतीत्यस्येत्ययं समुदायार्थ इति पूर्वेण सम्बन्धः ।

**स०व्र०— अनुपलम्भादिबाधादिति** । आदिपदेनाभ्युपगमोपपत्तिपरिग्रहः । **उक्तदोषात्** धर्मिमात्रस्य सिद्धत्वादित्युक्तदोषादित्यर्थः ।

**विठ्ठल०—** समवायस्य प्रत्यक्षत्वं मन्यन्ते । अपरे त्वनुमानवेद्यत्वं तदुभयमतानुसारेणेह प्रत्यक्षेण निष्ठत्वोपपादनमुख्यस्य समवायस्यैकत्वनिराकरणाय पीठिकारचनस्योपयोगं दर्शयन् एकत्वनिरासमुपपादयति **अयमत्र समुदायार्थ इत्यादिना** । **न वस्तुस्वरूपमात्रपरमिति** । साध्यधर्मिस्वरूपमात्रपरं नेत्यर्थः । **उपहितमिति** । पचनयाचनाद्युपाधियुक्तमित्यर्थः । किन्तु केनचिदुपहितं वा विशिष्टं वा उपलक्षितं वा तत्परमिति वक्तव्यमित्यध्याहारेण योजनीयम् । **अनुपलम्भादिबाधादिति** । प्रागुक्तरीत्या अनुभवाभ्युपगमोपपत्तिभिर्बाधादित्यर्थः । **न विशेषणमात्रमिति** । अग्निमच्छब्दवाच्यं विशिष्टं न विशेषणीभूतमग्निमात्रमित्यर्थः । **संयोगो हीति** । सम्बन्धा हि क्वचित्संयोगः स्यादित्यर्थः । **षष्ठ्यर्थस्येति** । सर्वत्रैकेति षष्ठ्यर्थभूतस्य पर्वताग्निसंयोगयोः समवायस्येत्यर्थः । **पुनः सिद्धसाधनतैवेति** । न च समवायमात्रस्य सिद्धत्वेऽपि पर्वतेन तद्गताग्निसंयोगेन च निरूपितस्य समवायस्यासिद्धत्वान्न सिद्धसाधनतेति । षट्पदार्थातिरेकप्रसङ्गेन समवाये पर्वतादिनिरूपितत्वस्याभावात् । तस्य समवायस्वरूपत्वेन सिद्धसाधनताऽनिस्तार इति भावः । **भेदस्याङ्गीकृतावित्यस्याङ्गीकार इत्यर्थः** ।

**॥ इति उक्तार्थसङ्ग्रहः ॥**

**॥ इति तच्छष्ठ्याः समवायार्थकत्वे एकत्वा(अभेदत्वा)त्सिद्धसाधनता ॥**

* * *

॥ अथ च तत्र ततः समवायस्य एकत्वे(अभेदे)ऽपि औपाधिकभेदाङ्गीकारे तदभेदानुपपत्तिः ॥

२५८ **सु०—** ननु तन्तुषु पटादिसमवायः पर्वताग्निसंयोगादिसमवायश्च यद्यपि स्वरूपेणैक एव, तथापि तन्तुपटादिपर्वताग्निसंयोगाद्युपाधिनिमित्तः समवायस्य भेदोऽप्यस्ति; ततः सिद्धत्वेऽपि साध्यत्वमुपपद्यत इत्यत आह **यदीति** ।

## अनु०— यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते ।

**यदि अस्य समवायस्य साध्यत्वसिद्ध्यर्थम् औपाधिको भेद इष्यते तदा एकत्वं कुत इष्यते ।**

**समवायस्यैकत्वं हि न सङ्ख्याविशेषः, निर्गुणत्वात्; किन्त्वभेदः । न च भेदाभेदौ क्वापि परेणाङ्गीकृतौ । तस्मात् समवाये भेदस्याङ्गीकृतौ तद्विरुद्धोऽभेदो नाङ्गीकर्तुमुचित इति ।**

**शे०वा०—** ननु नानिर्वाच्यं हि तेनेष्टमित्यनिर्वाच्यत्वस्य वैशेषिकानङ्गीकृतत्ववर्णनाय न प्रकृतसङ्गतिरिति तद्वर्णनमनर्थकम् । न च भेदस्यापारमार्थिकत्वाभावप्रतिपादनार्थं तदिति वाच्यम् । अनिर्वाच्यत्वाभावे असत्त्वेनैव अपारमार्थिकत्वसम्भवेनानिर्वाच्यत्वाभावमात्रेणापारमार्थिकत्वाभावासिद्ध्या तदयोगात् । अस्तु वा कथञ्चित्तत्सिद्धिः । तथाऽपि तत्प्रतिपादनस्य प्रकृतानुपयोगादसङ्गतिरेव । न च भेदाभेदयोः पारमार्थिकत्वापारमार्थिकत्वाभ्यामविरोधासम्भवप्रदर्शनार्थत्वान्नासङ्गतिरिति वाच्यम् । तयोरविरोधोपपादकत्वस्यैवासिद्ध्या तदयोगात् । सिद्धावपि वा पारमार्थिकत्वापारमार्थिकत्वयोरिवान्येषामविरोधहेतूनां बहूनां सद्भावेन भेदाभेदयोर्विरोधोपपादनाय तावद्धेत्वसम्भवस्यापीह वर्णनीयत्वेन तमव्युत्पाद्य एतन्मात्रासम्भववर्णनस्य तयोर्विरोधानुपपादकतयाऽश्लिष्टत्वादित्यतः सम्प्रतिपन्नानेकतद्धेतून्प्रदर्शयन्नेव तेषामिहासम्भववर्णने निमित्तं च दर्शयन्नेव पारमार्थिकत्वापारमार्थिकत्वाभ्यामविरोधपक्षेऽपि प्रकारान्तरेणापारमार्थिकत्वासम्भवं चोपर्येव दर्शयन्नेव परिशिष्टस्य सत्यत्वानिर्वचनीयत्वाभ्यां भेदाभेदयोरविरोधस्य असम्भवोपपादकतया मूलं योजयति **विरुद्धेत्यादिना** । वस्तुतो विरुद्धयोर्नोपायसहस्रेणाप्यविरोधसिद्धिरिति भावेनाभिमतयोरित्युक्तम् ।

**वा०र०— न प्रकृतसङ्गतिरिति** । स्वाभाविकमेकत्वमित्यादि शङ्कानिरासपरत्वप्रतीत्यभावादसङ्गतिरित्यर्थः । न तु स्थलान्तर इव भाष्यावतारिकायां अवतारोऽयमिति स्फुटम् । प्रकृतानुपयोगादित्यादावपि प्रकृतैतच्छङ्कानिरासोपयोगाभावादिकमेवार्थ इति ज्ञेयम् । **मूलं योजयतीति** । तेन स्वाभाविकत्वमित्यादि शङ्कानिरासोपयोगितयेति पूरणीयम् । ततश्च प्रकृतसङ्गतिरिति भावः ।

* * *

**॥ अथ तत्र उक्तानुपपत्तेः अप्रयोजकत्वशङ्का तन्निराकरणं च ॥**

**॥ अथ तत्रादौ समवाये अभेदभेदयोरविरोधस्य पारमार्थिकत्वापारमार्थिकत्वाभ्यामसम्भावितत्वम् ॥**

**॥ अथ तत्राप्यादौ समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वानङ्गीकारः ॥**

२५९ सु०—"ननु स्वाभाविकमेकत्वं स्वाभाविकेनैव भेदेन विरुद्ध्यते न पुनरौपाधिकेन, स्वभावतः अभिन्नेऽपि गगनादावौपाधिकभेददर्शनात् । समवाये चौपाधिक एव भेदोऽभ्युपगतः । तत्कथं स्वाभाविकैकत्वाङ्गीकारोऽनुचित इति ।" अत आह **नेति** ।

अनु०— नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः ।
सत्यत्वात् को विशेषः स्यात्

विरुद्धाभिमतयोरविरोधो हि कालभेदेन भवति, यथा तत्रैव भूतले तस्यैव घटस्य भावाभावयोः । देशभेदेन वा, यथा तदैव तस्यैव घटस्यास्तित्वनास्तित्वयोः । व्यक्तिभेदेन वा, यथा तत्रैव भूतले यदैकस्य घटस्य भावस्तदैव घटान्तरस्याभावः । पारमार्थिकत्वापारमार्थिकत्वाभ्यां वा, यथा गगने रूपतदभावयोः ।

तत्र तावत् समवायेऽभेदभेदयोर्नाद्यं विधात्रयं सम्भवतीति परस्यापि सम्प्रतिपन्नम् ।

नापि चतुर्थी विधा सम्भवति । समवायभेदस्यापारमार्थिकत्वमसत्त्वमनिर्वाच्यत्वं वा । आद्ये सिद्धसाधनत्वं तदवस्थमेव । द्वितीये त्विदमुपतिष्ठते । **हि** यस्मात् **तेन** वैशेषिकादिना **अनिर्वाच्यं** वस्तु **नेष्टमतः** असत्त्वानिर्वाच्यत्वाभावाद् **औपाधिकस्य** स्वाभाविकस्य च **सत्यत्वात् को विशेषः स्यात्** । औपाधिकस्यापि स्वाभाविकवत् सत्यत्वात् पारमार्थिकत्वापारमार्थिकत्वलक्षणस्य विरोधशान्तिहेतोः अभावादौपाधिकत्वाद्युक्त्या न किञ्चित् कृतं स्यादिति भावः ।

**परि०— भावाभावयोरिति** । अविरोध इत्यनुषङ्गः । एवमस्तित्वनास्तित्वयोरित्यत्र व्यक्तिभेदेनेत्यादौ चानुषङ्गो ध्येयः । **इदमुपतिष्ठत इति** । नानिर्वाच्यमित्यादिमूलवाक्यमित्यर्थः । तद्व्याचष्टे **हि यस्मादित्यादिना** ।

**वं०प०— औपाधिकभेददर्शनादिति** । उपाधिकृतभेददर्शनादित्यर्थः । औपाधिकस्य स्वाभाविकस्य चेत्यत्र स्वाभाविकस्येत्यन्यशब्दार्थः ।

**कं०रा०— विरुद्धेति** । विरुद्धत्वेनाभिमतयोरित्यर्थः । **आद्य इति** । समवायभेदस्यापारमार्थिकत्वे भूधरस्थाग्निसंयोगः साध्य इत्यत्र षष्ठ्यर्थस्यासाध्यत्वेन पर्यवसितसमवायस्य प्रत्यक्षसिद्धतन्तुपटादिसमवायस्य चैकत्वाद्धूमवत्त्वाद्यनुमानस्य सिद्धसाधनत्वं तदवस्थमेवेत्यर्थः ।

**श्रीनिधि०— असत्त्वानिर्वाच्यत्वाभावादिति** । भेदस्यासत्त्वान्निर्वाच्यत्वाङ्गीकाराभावादित्यर्थः । असत्त्वमुक्तदोषतदवस्थभावान्नाङ्गीकृतं अनिर्वाच्यत्वं तु अनिर्वाच्यवस्तुन एवानङ्गीकारादिति भावः ।

**विठ्ठल०— नाद्यं विधात्रयमिति** । समवायस्य नित्यत्वेन कालभेदायोगात् । समवायस्य व्यपदेश-वृत्तित्वेन देशभेदासम्भवात् समवायस्यैकत्वेन व्यक्तिभेदाभावाच्चेति भावः ।

**चषक— विधात्रयं** प्रकारत्रयम् ।

**॥ इति समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वानङ्गीकारः ॥**

* * *

**॥ अथ तत्र ततः समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वाङ्गीकारेऽपसिद्धान्तः (मायावादित्वापत्तिः) ॥**

**२६० सु०— 'इष्यते समवायभेदस्यानिर्वाच्यत्वं मया चेत् तदा को दोष' इति चेदप-सिद्धान्त इत्याह मायेति ।**

**अनु०— मायावाद्यन्यथा भवेत् ।**

**अनिर्वाच्यवस्त्वङ्गीकारे वैशेषिकादिरपि मायावादी भवेदित्यर्थः ।**

* * *

**॥ अथ च तत्र प्रकारभेदेन विरोधशान्तिशङ्का तन्निरासश्च ॥**

**॥ अथ च तत्रापि औपाधिकत्वस्य उपाधिजन्यत्वे उपाधिगम्यत्वे वाऽपि समवायानन्त्यप्रसङ्गः ॥**

**॥ अथ च तत्रादौ सर्वदेशकालगतानामवयवावयव्याद्युपाधीनामनन्तत्वात्तथात्वम् ॥**

२६१ **सु०**— 'ननु प्रकारभेदेनापि विरोधशान्तिर्भव(विष्य)ति, यथा तत्रैव तदैव नीलपटसद्भावेऽपि पीतपटाभावः, तथा समवायेऽप्यौपाधिको भेदो न स्वाभाविकमभेदं विरुणद्धी'त्यत आह **उपाधीति** ।

## अनु०— उपाधिजन्यं तद्गम्यमिति चौपाधिकं भवेत् ।

उपाधिशब्दात्तृतीयासमर्थाज्जन्यगम्ययोः शैषिके ठकि कृते सति **औपाधिकम्** इति भवति ।

ततः किमित्यत आह **उभयत्रेति** ।

## अनु०— उभयत्राप्यनन्ताः स्युः समवाया इतस्ततः ।

'एवं सति समवायभेदस्यौपाधिकत्वं नामोपाधिजन्यत्वं वोपाधिगम्यत्वं वा वक्तव्यम्, तथा च पक्षद्वये **अपि अनन्ताः समवायाः स्युः** । तत्कथमि'त्यत आह **इतस्तत इति** । 'सर्वदेशकालगतानामवयवावयव्याद्युपाधीनामनन्तत्वादि'ति शेषः ।

**परि०— पीतपटाभाव इति** । सत्यपि विशेष्ये पटे विशेषणाभावनिबन्धनस्तदभावो यथा न विरुद्धस्तथौपाधिकभेदसत्त्वेऽपि स्वाभाविकभेदाभावेनाभेदो न विरुद्ध इत्यर्थः । **जन्यगम्ययोरिति** । उपाधिना जन्य उपाधिना गम्य इत्यर्थे शेष इति सूत्रेण ठक्प्रत्यये ठस्येक इतीकादेशे किति चेति सूत्रेणादिवृद्धौ यस्येति सूत्रेणान्त्यवर्णलोपे चौपाधिकेति रूपसिद्धेरुभयथापि विकल्पः कृत इति भावः ।

**यादु०— पीतपटाभाव इति** । तस्यैव पटस्य विशिष्टरूपतयाऽभाव इत्यर्थः । ननु ठकोऽपत्याद्यर्थे विहितस्य कथमत्र प्राप्तिरित्यत आह **शैषिक इति** । इत्यधिकृत्य विहित इत्यर्थः । यद्यप्युपाधिशब्दादुक्तोऽर्थे शैषिके ठक् विहितो न दृश्यते तथाऽपि 'विचित्रा हि तद्धितगतिरि'ति वचनादेतदुक्तमित्यवगव्यम् । तथा

चोपाधिशब्दात्तृतीयासमर्थादुक्तेऽर्थे ठकि कृते, तस्य ठस्येक इतीकादेशे, किति चेत्याद्यचो वृद्धौ, यस्येति चेतीकारलोपे, औपाधिकमिति भवतीति भावः ।

**वं०प०**— ननु यथैकस्मिन्नेव पटे नीलरूपविशिष्टत्वपीतरूपविशिष्टत्वरूपप्रकारभेदेनैकस्यैव पटस्य भावाभावौ न विरुद्धौ, तथैकस्मिन्नेव रूपसमवाये स्वाभाविकेऽभेदे सत्यप्यौपाधिको भेदः सम्भवति तयो-र्भेदाभेदयोरौपाधिकत्वस्वाभाविकत्वरूपप्रकारभेदेनाविरोधसम्भवादित्याशङ्कते **ननु प्रकारेत्यादिना** । नन्वित्यनन्तरं देशकालादिभेदेन वेति शेषः । जन्यगम्ययोरर्थयोर्वाच्ययोः सतोः । तथा चोपाधिशब्दात् **शैषिके** शेषे इत्यधि-कृत्य विहिते ठक्प्रत्यये कृते ठस्येक इतीकादेशे यस्येति चेत्यनेन भसंज्ञकस्य धकारस्थस्येकारस्य लोपे उकार-स्यौकाररूपवृद्धौ सत्यामौपाध इक औपाधिकेति रूपम् ।

**कं०रा०**— **तथेति** । यथा नीलत्वाकारेण पटस्य सद्भावः । पीतत्वाकारेणाभावश्चेति द्वयं न विरुद्धं तथा समवायेऽप्यौपाधिकत्वाकारेण भेदसद्भावः स्वाभाविकत्वाकारेणाभेदश्चेति द्वयं न विरुद्धमिति भावः ।

**श्रीनिधि०**— **प्रकारभेदेन** विशेषभेदेन । **तथा समवायेऽपीति** । यथा भूतले घटाभावाभावौ विशेषणभेदेन न विरुद्धौ । तथा समवाये भेदाभेदौ स्वाभाविकत्वौपाधिकत्वलक्षणविशेषणभेदेन न विरुद्धा-वित्यर्थः । **उपाधिशब्दात्तृतीयासमर्थाज्जन्यगम्ययोः शैषिके ठकि कृते इति** । **तृतीयासमर्था**त्तृतीयान्तात् समभिव्याहृतपदान्वययोग्यात् **शैषिके** 'तत्र भव' इत्याद्यर्थातिरिक्तार्थसम्बन्धिनि । **इतस्तत** इत्यस्यार्थः **सर्वदेशकालगतानामिति** । इत इत्यनेन सन्निहितदेशकालगता उच्यन्ते । तत इत्यनेन व्यवहितदेशकालगता इति भावः ।

**शे०वा०**— ननूपाधिजन्यं तद्गम्यमित्यौपाधिकशब्दनिर्वचनपरोत्तरग्रन्थानर्थक्यम् । न चैतत्प्रकारभेदेन भेदाभेदयोरविरोधशङ्कापरिहारार्थत्वान्न तदिति वाच्यम् । प्रकारभेदस्य विरोधशान्तिहेतुत्वस्यैवासिद्ध्या तमादाय विरोधशङ्काया एवानुदयादित्यतः प्रकारभेदस्य दृष्टान्तोपदर्शनेन विरोधशान्तिहेतुत्वव्युत्पादनपूर्वकं तमादाय विरोधशङ्कामुत्थापयति **नन्विति** । **पीतपटाभाव इति** । तस्यैव पटस्य पीतरूपविशिष्टतयाऽभाव इत्यर्थः । **उपाधिशब्दादित्यादेरयमर्थः** । उपाधिशब्दाज्जन्यगम्ययोरर्थयोष्ठकि ठस्येक इति सूत्रेण तस्येकादेशे किति चेत्याद्यचो वृद्धौ सत्यां यस्येति चेतीकारलोपे औपाधिकशब्दनिष्पत्तिरिति । नन्वपत्याद्यर्थ इव जन्यगम्ययो-रर्थयोष्ठकोऽस्मरणात्कथमुपाधिशब्दादुक्तयोरर्थयोष्ठक् व्याख्यायत इत्यतः शेष इति लक्षणेनापत्यादिचतुरर्था-दन्यस्मिञ्जन्यगम्यादिरूपे शेषे यथायथमणादिप्रत्ययविधानेन चाक्षुषं रूपं, श्रावणः शब्द, इत्यादौ गम्यत इत्याद्यर्थे अणादिवदुपाधिशब्दादप्युक्तार्थे तेनैव ठकोऽप्युपपत्तेरित्याशयेनोक्तं **शैषिक इति** । मूले आपादका-नुक्तेराह **सर्वेति** ।

१९२अ वा०र०— प्रकाराभावप्रयुक्तत्वमुपपादयितुमाह **तस्यैव पटस्येति** । तस्यैवेत्यनुक्तौ कस्यचिन्नीलस्य पटस्याभावः । पीतस्य च पटान्तरस्य सद्भाव इति धर्मिभेदप्राप्त्या विरोधशङ्कापरिहारो व्यक्तिभेदेनैव शङ्क्यत इति प्रतीतिः स्यादिति भावः । **अपत्यादिचतुरर्थादिति** । अपत्यादेर्व्यवहितासन्निहितप्रकृताच्च तदस्मिन्नस्तीति देशे तन्नाम्नि । तेन निवृत्तस्त्वस्य निवासः । अदूरभवश्चेति सूत्रोक्तचतुरर्थादन्यस्मिन्नित्यर्थः । उपयुक्तादन्यो हि शेषः । उपयुक्तश्चापत्यादिरुक्त चतुरर्थान्तः । तथा चोपयुक्तादपत्यादेस्तदस्मिन्नस्तीत्यादि चतुरर्थान्तादन्यस्मिन्नित्युक्तं भवति । शिष्टमुदाहरणादिकं 'रचने'ति सूत्रीय 'नादेयं चापि न सर्पती'त्येतद्व्युत्पादनटीकाप्रपञ्चे प्रागेव निरूपितमिति तत एव प्रतिपत्तव्यम् ।

**विट्ठल०— प्रकारभेदेनापीति** । प्रागुक्तप्रकारचतुष्टयापेक्षया अन्येन प्रकारेणेत्यर्थः । **पीतपटाभाव इति** । तस्यैव पटस्य पीतरूपवैशिष्ट्याभाव इति भावः । नन्वपत्याद्यर्थे विहितस्य ठकः कथमत्र प्राप्तिरित्यत आह **शैषिक इति** । तथा च विचित्रा हि तद्धितगतिरित्युक्तेः । शेष इति सूत्रेण तृतीयासमर्थादुपाधिशब्दाज्जन्यगम्यरूपार्थद्वये ठकि कृते ठस्येक इति इकादेशे किति चेति सूत्रेणादिवृद्धौ यस्येति सूत्रेण धकारे परे इकारलोपे च सति औपाधिकमिति भवतीति भावः ।

* * *

**॥ अथ च तत्राप्यादौ औपाधिकभेदो नाम न केवलं उपाधीनामेव भेदः अपि तु तत्समवायभेद एव ॥**

२६२ **सु०—** उपाधीनामनन्तत्वेऽपि समवायानन्त्यं कुत इत्यत आह **भिन्नत्वमिति** ।

## अनु०— भिन्नत्वं चैव तेष्वस्ति

**चः यस्मादित्यर्थे । न ह्यौपाधिको भेदो नामोपाधीनामेव भेदः, तथा सति समवायस्येति न स्यात्, उक्तदोषपरिहारश्च न भवेत्; किन्तु तेषु समवायेष्वेवोपाधिजन्यं तदवगम्यं वा भिन्नत्वमस्ति । भेदहेतवश्चोपाधयोऽनन्ता इति कथं न समवायानन्त्यम् ।**

**यादु०— उक्तदोषेति** । सिद्धसाधनतारूपोक्तदोषपरिहारश्च न भवेदित्यर्थः ।

**वं०प०— तथा सतीति** । यद्युपाधीनामेव भेदस्तत्प्रयुक्तो भेदः समवाये नास्ति, तर्हि समवायस्य भेद इति न स्यात् । तथा च समवाये भेदाभावेनैकत्वस्यैव सत्त्वेन तस्य तन्तुपटादौ सिद्धतया धूमानुमाने सिद्धसाधनता चेत्युक्तदोषपरिहारोऽपि न स्यादित्यर्थः ।

**श्रीनिधि०—** उक्तदोषपरिहार इति । सिद्धसाधनतादोषपरिहारश्चेत्यर्थः ।

**शे०वा०—** **उक्तदोषपरिहारश्चेति** । सिद्धसाधनतारूपोक्तदोषपरिहारश्चेत्यर्थः ।

**स०व्र०—** **उक्तदोषपरिहारश्चेति** । सिद्धसाधनतापरिहारो न भवेदित्यर्थः ।

**विठ्ठल०—** **समवायस्येति** । उपाधीनां भेद इत्येव वक्तव्यं समवायस्य भेद इति न स्यादित्यर्थः । **उक्तदोषेति** । समवाये भेदाभावे सिद्धसाधनतारूपोक्तदोषपरिहारो न भवेदित्यर्थः ।

* * *

**।। अथ औपाधिकस्वाभाविकभेदयोर्मध्ये अभेदविरोधाभावसाधकविशेषाभावः ।।**

२६३ **सु०—** तथाऽप्यौपाधिकमेव तदानन्त्यमित्युक्तस्य किमायातमित्यत आह **क** इति ।

**अनु०—** को विशेष उपाधिगे ।

**उपाधिगः** तत्सम्बन्धी औपाधिक इति यावत् । औपाधिकभेदे **को विशेषो** येनासौ अभेदं न विरुणद्धीत्यर्थः ।

**श्रीनिधि०—** **तथापि औपाधिकमेव तदानन्त्यमित्युक्तस्य किमायातमिति** । तथापि = समवायानन्त्येऽपि तदानन्त्यमौपाधिकमिति हेतोः औपाधिको भेदः स्वाभाविको भेदः न विरुणद्धि इत्युक्तस्य किं दूषणमुक्तं भवति इत्यर्थः । औपाधिकमानन्त्यमिष्टमेव । एवमपि स्वाभाविकाभेदाविरोधादित्यत .......... इत्यर्थः ।

**।। इति औपाधिकस्वाभाविकभेदयोर्मध्ये अभेदविरोधाभावसाधकविशेषाभावः ।।**
**।। इति औपाधिकभेदो नाम न केवलं उपाधीनामेव भेदः अपि तु तत्समवायभेद एव ।।**

* * *

**१९३।। अथ च तत्रान्ते उक्तार्थसङ्ग्रहः ।।**

२६४ **सु०—** एतदुक्तं भवति । 'नीलपटसद्भावेऽपि पीतपटाभावः' इत्यत्र हि यदि विशिष्टविषयौ विधिनिषेधौ, तदा भिन्नविषयत्वेन विरोधाभावः, नीलपीतपटयोर्भिन्नत्वात् ।

**न चैवं प्रकृते, भेदविशेषाभावेऽपि भेदान्तराभ्युपगमापत्तेः । तथाच एकत्वोक्तिरयुक्तैव । न हि पार्थिवपरमाणौ रूपादयोऽग्निसंयोगजा न त्वाप्यपरमाणुरूपादय इव स्वाभाविका इत्येतावता रूपादिरहितोऽसौ भवति ॥ यदि च विशेषणविषयौ, तदा समवाये भेदोऽस्त्येव । स तु सम्बन्धिभिरुपाधिभिः कृतो न त्वकृत्रिम इत्युक्तं स्यात् । तथा च घटादिभेदेन तुल्य इति रिक्तैवाभेदोक्तिः । उपाधीनां च सर्वदाऽनपायान्न भेदस्यागन्तुकत्वं युक्तमिति ।**

**परि०— नीलपीतपटयोर्भिन्नत्वादिति** । विशेषणभेदे विशिष्टयोर्भेदादिति भावः । **यदि च विशेषणविषयाविति** । नीलपटोऽस्ति पीतपटो नास्ति समवाय उपाधिभेदभिन्नो भवति स्वाभाविकभेदभिन्नो न भवतीत्यादिविधिनिषेधाविति योज्यम् ।

**गु०दी०— भेदविशेषाभावेऽपि** इत्यत्र अकृत्रिमत्वविशिष्टभेदविशेषाभावेऽप्यौपाधिकत्वविशिष्टभेदान्तराभ्युपगमापत्तेरित्यर्थः । महारजनरक्तेऽपि पटे प्राग्विद्यमान एव भेदः उपाधिना व्यक्तीक्रियते । न तु तस्मिन्नेव पटे भेदः सम्पद्यते । किन्तु स एव पटो रक्तो जायत इति व्यवहरन्ति । न तु स एव पटः स्वस्माद्भिन्नो जात इति । एवं चोपाधिना तस्मिन्नेव समवाये भेदः कृतः । पुनस्तत्रैव कथमभेदः स्यादित्याह **तथा चैकत्वोक्तिरयुक्तैवेति । तदा समवाये भेदोऽस्त्येव** इत्यत्र सत्येव पटे नीलत्वविधिवत्पीतत्वनिषेधवच्च सत्येव भेदे औपाधिकत्वविशेषणमस्ति । अकृत्रिमत्वविशेषणं नास्तीत्युक्तं स्यादित्यर्थः ।

**यादु०— भिन्नविषयत्वेनेति** । भिन्नविषयत्वेनैव विरोधाभावस्तत्र न प्रकारभेदेनेति भावः । कथं तत्र भिन्नविषयत्वमित्यतस्तदुपपादयति **नीलपीतपटयोरिति** । विशिष्टस्य खण्डितत्वे विशेष्याद्भिन्नाभिन्नत्वेन नीलरूपविशिष्टपीतरूपविशिष्टपटयोः परस्परं भिन्नत्वादित्यर्थः । नन्वेवमेकविशेष्यकयोर्विशिष्टयोर्भेदे तत्त्वोद्योतादौ सोऽयं देवदत्त इति प्रत्यभिज्ञाविषययोस्तत्तेदन्ताविशिष्टयोः परस्परमैक्यस्योक्तत्वात् तद्विरोध इति चेत् । उच्यते । यत्र खण्डितं विशिष्टद्वयं प्रति केवलं विशेष्यमेवोपादानं, तत्र विशिष्टयोः परस्परं भेदः । यत्र तु विशिष्टमेव विशिष्टान्तरोपादानं, तत्र तयोरभेदः । उपादानोपादेययोरभेदस्यावश्यकत्वात् । एवं च नीलपीतपटयोः पट एवोपादानमिति तयोर्भेदः । प्रत्यभिज्ञाविषययोश्च विशिष्टयोस्तत्तेदन्तान्यतरविशिष्ट एवोपादानमिति तयोरभेद आवश्यक इति तत्राभिप्रायोऽतो न कोऽपि विरोध इति । एवमन्यत्रापि दण्डी कुण्डलीत्यादिविशिष्टवैशिष्ट्यधीविषययोरपि विशिष्टयोरभेदो वाच्यः । तत्राप्येकविशेषणविशिष्टस्यैवापरविशेषणविशिष्टं प्रत्युपादानत्वादिति ज्ञातव्यम् । **न चैवं प्रकृत इति** । स्वाभाविकत्वौपाधिकत्वविशिष्टयोर्भेदयोर्भिन्नत्वादत्रापि भिन्नविषयत्वेनैव विरोधाभाव इति न वाच्यमित्यर्थः । **भेदविशेषेति** । स्वाभाविकभेदाभावेऽप्यौपाधिकभेदाभ्युपगमापत्तेरित्यर्थः । अत्रेष्टापत्तिं परिहरति **तथाच एकत्वोक्तिरिति** । भेदाभावरूपैकत्वोक्तिरित्यर्थः । प्रतियोगिसत्त्वस्याभावविरोधित्वादिति भावः । ननु स्वाभाविकप्रतियोगिसत्त्वमेवाभावविरोधि नौपाधिकं तदित्यत आह **न हि**

**पार्थिवेति । यदि च विशेषणेति** । पटे नैल्यरूपविशेषणविषयो विधिः पैत्यरूपविशेषणविषयो निषेधो यदीत्यर्थः । **तदा समवाय इति** । प्रकृतेऽपि समवायगतभेदे विधिरौपाधिकत्वरूपविशेषणविषयो निषेधस्तु स्वाभाविकत्वरूपविशेषणविषय इति स्यादित्यर्थः । **अकृत्रिमः** स्वाभाविकः । इष्टापत्तिं परिहरति **तथाचेति** । यथा घटपटभेदस्य जन्यत्वेऽपि तस्य सत्यत्वादभेदविरोधित्वम्, एवं समवायभेदस्य जन्यत्वेऽपि सत्त्वाभेद-विरोधित्वं स्यादेव, तथाच समवायेऽभेदोक्तिः रिक्ता निर्विषयेत्यर्थः । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु समवायभेदोऽकृत्रिम एवेत्याह **उपाधीनां चेति** । नित्यानामपि सत्त्वादिति भावः । न चैवमौपाधिकत्वानुप-पत्तिः । उपाधिगम्यतयाऽपि तदुपपत्तेरित्याशयात् ।

**वं०प०— न चैवं प्रकृत इति** । नीलपटसद्भावेऽपि पीतपटाभाव इव समवायेऽप्यौपाधिकभेद-सद्भावेऽपि स्वाभाविकभेदो नास्तीत्येवं विधिनिषेधौ विशिष्टविषयावेवेति भिन्नविषयत्वेनैव विरोधाभावो न प्रकारभेदेनेति न वाच्यमित्यर्थः । कुतो न चेत्यत आह **भेदविशेषेति** । स्वाभाविकभेदाभावेऽपीत्यर्थः । **भेदान्तरेति** । औपाधिकभेदेत्यर्थः । **विशेषणविषयाविति** । विधिनिषेधाविति वर्तते । समवायभेदे स्वाभा-विकत्वरूपविशेषणनिषेध औपाधिकत्वरूपविशेषणविधिरित्यर्थः ।

**कं०रा०— न चैवमिति** । समवाये भेदविधिनिषेधावौपाधिकभेदस्वाभाविकभेदरूपविशिष्टविषयत्वेन भिन्नविषयावित्येतन्न सम्भवति । तथात्वे समवाये स्वाभाविकभेदाभावेऽप्यौपाधिकभेदाभ्युपगमापत्तेरित्यर्थः । अस्त्वौपाधिकभेदाभ्युपगमस्ततः किमित्यत आह **तथा चेति** । औपाधिकभेदाभ्युपगमे सति भेदाभावरूपै-कत्वोक्तिरयुक्तेत्यर्थः । ननु समवाये औपाधिकभेदाभ्युपगमेऽपि स्वाभाविकभेदाभावाभिप्रायेण तस्यैकत्वोक्तिः किं न स्यादित्यत आह **न हीति** । ननु समवायभेदस्य उपाधिकृतस्यागन्तुकत्वान्न घटादिभेदतुल्यत्वमित्यत आह **उपाधीनामिति** ।

**श्रीनिधि०— न चैवं प्रकृत इति** । प्रकृते एवं विधिनिषेधयोरविरोधो न सम्पादयितुं शक्यते । कुत इत्यत आह **भेदविशेषाभावेऽपीति** । यथा तत्र घटविशेषाभावेऽपि घटान्तरस्याभ्युपगमनीयत्वं तथे-त्यर्थः । ननु भेदान्तराभ्युपगमापत्तिः कथं भवति, भेदस्य स्वाभाविकत्वनिषेधेऽपि तत्सामान्याभाव एव कुतो न सिद्ध्येदित्यतो दृष्टान्तमुखेनोपपादयति **न हि पार्थिवपरमाणोरित्यादिना । रूपादिरहितोऽसौ सिद्ध्यतीति** । अन्यथा रूपसामान्याभाव एव सिद्ध्येदिति । **सम्बन्धिभिः कृतो न कृत्रिम इत्युक्तं स्यादिति** । यथा घटे नैल्यं नास्ति अस्ति पीतमिति कथिते घटोऽस्ति स तु पीत इति सिद्ध्यति । न तु घटसामान्याभावः । एवं प्रकृते पीतस्य कृत्रिमत्वमेव सिद्ध्येत् न तु भेदसामान्याभाव इति भावः । **घटादिभेदेनेति** । घटपटादीनां भेदः कृत्रिम एव न तु अनागन्तुकः धर्मणोऽसत्त्वे धर्मानवस्थितेः । न चैतावता घटपटादीनामभेदः स्वाभाविकः । तथैव समवायाभेदोऽपीति भावः । नन्वभेदोक्तिः न रिक्ता । उपाद्ध्यधीनो हि भेदः उपाधयश्चागन्तुकाः । एवं चोपाधिसम्बन्धात् प्राक् तन्नाशानन्तरं च कथं भेदावस्थितिः । न हि संयोग्यधीनस्य संयोगस्य संयोग्य-

भावेऽवस्थितिः सम्भवतीत्यत आह **उपाधीनां चेति** । केषाञ्चित् घटादीनां नाशेऽपि केचिदवतिष्ठन्त एव । प्रलयेऽपि परमाणुत्वादिजातिः तद्गता गुणाश्च सन्त्येवेत्युपाधीनां सर्वथाप्यभावो नास्तीत्यर्थः । अनेन आकाशादिदृष्टान्तोऽपि विप्रतिपन्न इत्युक्तम् ।

**शे०वा०—** ननु तथाऽपि प्रकारभेदेन विरोधशान्तिशङ्काया न परिहार इत्यत आह **एतदुक्तं भवतीति** । **भिन्नविषयत्वेनेति** । ततश्च भिन्नविषयत्वेनैव तत्र विरोधपरिहारो न तु प्रकारभेदेनेति नायं प्रकारभेदेन विरोधपरिहारे दृष्टान्त इति भावः । कथं तत्र भिन्नविषयत्वमित्यतस्तद्दर्शयति **नीलपीतपटयोरिति** । विशिष्टस्य खण्डितत्वेन विशेष्याद्भिन्नाभिन्नतया नीलरूपविशिष्टपीतरूपविशिष्टपटयोः परस्परं भिन्नत्वादित्यर्थः । अस्तु तर्हि तेनैव प्रकारेण प्रकृतेऽपि विरोधपरिहार इत्यत आह **न चैवं प्रकृत इति** । स्वाभाविकत्वौपाधिकत्वविशिष्टयोर्भेदयोरपि भिन्नत्वादत्रापि भिन्नविषयत्वेनैव विरोधपरिहार इति च नेत्यर्थः । तत्र हेतुमाह **भेदविशेषेति** । स्वाभाविकभेदाभावेऽप्यौपाधिकभेदाभ्युपगमापत्तेरित्यर्थः । अत्रेष्टापत्तिं परिहरति **तथा चेति** । भेदाभावरूपैकत्वोक्तिरित्यर्थः । प्रतियोगिसत्त्वस्याभावविरोधित्वादिति भावः । ननु च स्वाभाविकप्रतियोगिसत्त्वमेव विरोधि न त्वौपाधिकमपि तत् । न चैतत्प्रकृत इति नैकत्वोक्तिविरोध इत्यत आह **न हीति** । **यदि चेति** । पटे नैल्यरूपविशेषणविषयो विधिः पीतत्वरूपविशेषणविषयश्च निषेधो यदीत्यर्थः । **तदा समवाय इति** । तथा सति समवायगतभेदेऽपि औपाधिकत्वरूपविशेषणविषयो विधिः निषेधस्तु स्वाभाविकत्वरूपविशेषणविषयः स्यादित्यर्थः । **अकृत्रिमः** स्वाभाविकः । इष्टापत्तिमाशङ्क्याह **तदा चेति** । तथा च यथा घटपटभेदस्य जन्यत्वेऽपि सत्यत्वादभेदविरोधित्वमेवं समवायभेदस्य जन्यत्वेऽपि सत्यत्वादभेदविरोधित्वं स्यादेवेति समवायेऽभेदोक्तिर्निर्विषयैवापाद्यत इत्यर्थः । अङ्गीकृत्य चेदमुदितम् । वस्तुतस्तु समवाये भेदोऽप्यकृत्रिम एवेत्याह **उपाधीनां चेति** । नित्योपाधीनामपि सत्यत्वादिति भावः । न चैवमौपाधिकत्वानुपपत्तिः । उपाधिगम्यत्वेनापि तदुपपत्तेरित्याशयात् । इतीत्यस्येत्येतदिति पूर्वेण सम्बन्धः ।

**विठ्ठल०—** ननु समवाये औपाधिकभेदाङ्गीकारो न स्वाभाविकाभेदविरोधी स्वाभाविकत्वौपाधिकत्वरूपप्रकारभेदात् । एकस्मिन्नेव पटे नीलपटसद्भावपीतपटाभावयोर्विरोधादर्शनादिति परेण शङ्किते औपाधिकभेदाङ्गीकारेऽपि न स्वाभाविकाभेदविरोधाभावः । नीलपटादाविवात्र विशेषाभावादित्युक्तं को विशेष उपाधिग इत्यत्र कथमत्र विशेषाभाव इत्यतस्तदुपपादयितुमाह **एतदुक्तं भवतीति** । दृष्टान्तत्वेनोक्ते नीलपटसद्भावपीतपटाभाव इत्यत्र विधिनिषेधौ किं नीलरूपविशिष्टपीतरूपविशिष्टपटविषयौ किं वा नीलरूपलक्षणविशेषणमात्रविषयाविति विकल्पं मनसि निधायाद्ये तत्र भिन्नविषयत्वेनैव विरोधाभावो न तु प्रकारभेदेन अतो भिन्नविषयत्वरूपो न समवाये विरोधपरिहारको विशेषोऽस्तीत्याह **नीलपटसद्भावेऽपीति** । विशेष्यभूतपटस्यैकत्वेन कथं भिन्नविषयत्वमित्यत आह **नीलपीतपटयोरिति** । खण्डितस्थले हि विशिष्टं विशेष्याद्भिन्नाभिन्नं विशिष्टयोस्तु भेद एव । अतो न नीलरूपं विशिष्टरूपं, विशिष्टपीतरूपविशिष्टयोः परस्परभिन्नत्वमेवेति भावः । नन्वेकविशेष्य-

कयोर्विशिष्टयोर्योऽहं पुरा दण्डी स इदानीं कुण्डलीत्यनुभवात् तत्त्वोद्योते सोऽयं देवदत्त इति प्रत्यभिज्ञया विशिष्टयोरपि परस्परमैक्यस्योक्तत्वात् कथं विशिष्टयोर्भेद चेत् न पूर्वोत्तरकालयोर्विशेषणयोर्व्यावृत्त्या विशेष्य-मात्रैकत्वमेवानुभवः । न तु विशिष्टैक्ये, अन्यथा पुरा इदानीमिति न स्यात् । दण्डविशिष्टस्यैककुण्डलसम्बन्धे दण्डी वा अहं कुण्डलीति अभेदः प्रतीयत इति चेत् सत्यम् । अत्र दण्डविशिष्टं हि विशिष्टान्तरस्य कुण्डल-विशिष्टस्योपादानम् । उपादानोपादेययोश्च भेदाभेदःप्रमितः अतस्तत्राभेदप्रत्ययो युज्यते । एतेन तत्त्वोद्योत-विरोधोऽपि परिहृतः । विशिष्टस्यैव विशिष्टान्तरोपादानस्थल एव विशिष्टयोरभेदस्य तत्राभिप्रेतत्वात् । यत्र तु विशेष्यस्यैवोपादानत्वं तत्र विशिष्टयोर्भेदेऽपि विशेष्यमात्रैक्यं तदभिप्रेतमित्यविरोधात् । नीलपीटयोः पट एवो-पादानमिति विशिष्टयोर्भेद एवेत्यलम् । **न चैवं प्रकृत इति** । प्रकृते समवाये स्वाभाविकाभेदौपाधिकभेदयोर्नील-विशिष्टपीतविशिष्टयोरिव भिन्नविषयत्वमिति न च, येन विरोधाभावः स्यादित्यर्थः । ननु प्रकृतेऽपि स्वाभाविक-त्वविशिष्टभेदाभावः औपाधिकत्वविशिष्टभेदसद्भाव इति भिन्नविषयत्वदर्शनात् कथं भिन्नविषयत्वाभाव इत्यत आह **भेदविशेषाभावेऽपीति** । स्वाभाविकाभेदाभ्युपगमेन स्वाभाविकत्वविशिष्टभेदरूपविशेषाभावेऽपि सम-वायस्य साध्यत्वसिद्ध्यर्थमौपाधिकभेदाभ्युपगमापत्तेरित्यर्थः । औपाधिकभेदाभ्युपगमो ममेष्ट एवेतीष्टापादने नेष्टं तदित्यत आह **तथा चैकत्वोक्तिरिति** । भेदाभ्युपगमे भेदाभावरूपकत्वोक्तिरयुक्ता प्रतियोगिसत्त्वस्याभाव-विरोधित्वादिति भावः । समवायेऽभ्युपगतभेदस्यौपाधिकत्वविशिष्टत्वान्न भेदाभावोक्तिरयुक्तेत्यतो दृष्टान्तोक्त्या दूषयति **न हीति** । भेदस्योपाधिजन्यत्वेऽपि पार्थिवपरमाणुरूपादिवत् सत्यत्वानपायादिति भावः । द्वितीयपक्षे दोषमाह **यदि विशेषणेति** । नीलपटोऽस्ति पीतपटो नास्तीति विधिनिषेधौ यदि नीलरूपपीतरूपलक्षणविशेषण-मात्रविषयावित्युच्यते । तर्हि प्रकृते समुदाये भेदोऽस्त्येव । परन्तु तत्र भेदविधिरौपाधिकत्वरूपविशेषणविषयः । निषेधस्तु स्वाभाविकत्वापरपर्यायाकृत्रिमत्वविशेषणविषय इत्युक्तं स्यादित्यर्थः । अत्रेष्टापत्तिं परिहरति **तथा चेति** । तथा घटगतभेदस्य घटसामग्रीजन्यतया कृत्रिमत्वेऽपि तस्य सत्यत्वादभेदविरोधित्वं एवं समवायभेद-स्योपाधिशब्दितकारणजन्यत्वेन सत्यत्वादभेदविरोधित्वमेव अतः समवाये अभेदोक्तिनिर्विषयैवेत्यर्थः । ननु समवाये अभेदो नागन्तुकः । भेदस्तु उपाधिर्मध्ये प्राप्तः न घटादिभेदसाधारण्यं तस्य जन्यत्वेऽपि यावद्घटादि-भावत्वेनानागन्तुकत्वादित्यत आह **उपाधीनां चेति** । ईश्वराकाशादिगतज्ञानेच्छाप्रयत्नसङ्ख्यापरिमाणादिसमवायो-पाधीनां नित्यत्वात् । अनित्येषु समवायोपाधिपरम्परायाश्च नित्यत्वान्नौपाधिकसमवायभेदस्याप्यागन्तुकत्वमिति भावः । न च वाच्यं समवायभेदस्यानागन्तुकत्वे औपाधिकत्वायोग इति । उपाधिगम्यतोपपत्तेरिति पराभि-प्रेतत्वात् ।

**॥ इति उक्तार्थसङ्ग्रहः ॥**

**॥ इति सर्वदेशकालगतानामवयवावयव्याद्युपाधीनामनन्तत्वात्तथात्वम् ॥**

* * *

॥ अथ च समवायानन्त्यप्रसङ्गे अन्ते उपाधिगम्यत्वार्थपक्षेण उक्तदोषाभावशङ्का तन्निरासश्च ॥

॥ अथ तत्राप्यादौ उपाधिगम्यमौपाधिकमिति पक्षमङ्गीकृत्योक्तदोषाभावशङ्का ॥

२६५ **सु०—** उपाधिगम्यमौपाधिकमिति पक्षमङ्गीकृत्योक्तदोषाभावं शङ्कते **अविद्यमान एवेति** ।

**अनु०—** अविद्यमान एवान्यः समवायोऽधिगम्यते ।
उपाधिना

**सत्यमुपाधिगम्यत्वादौपाधिकः समवायभेदोऽधिगमश्च न प्रमा, येनासौ भेदः पारमार्थिकः स्यात्; किन्तु विभ्रम एव । न चैवं भेदस्यासत्त्वप्राप्त्या सिद्धसाधनतातादवस्थ्यमिति वाच्यम्, यतः अविद्यमान एवान्यः समवायोऽधिगम्यते तत्तद् उपाधिना इति ब्रूमः । यथा अङ्गुल्यवष्टब्धनयनाद्युपाधिवशादविद्यमान एव द्वितीयश्चन्द्रोऽधिगम्यते, तथा तैस्तैः सम्बन्धिलक्षणोपाधिभिरविद्यमाना एवानेके समवायाः प्रतीयन्ते । त एते समवाया औपाधिकभेदभिन्ना इत्युच्यन्ते । त एव चाग्निमदादिशब्दवाच्या अनुमानसाध्या विशिष्टाकाराः । तथा च न समवायैकत्वहानिः, चन्द्रवदारोपितानामनेकत्वेऽप्यनारोपितस्यैकत्वाविरोधात् । नाप्यनुमानानां सिद्धसाधनता, तथाविधसमवायानां प्रागसिद्धत्वादिति ।**

**वं०प०—** **असत्त्वप्राप्त्येति** । भेदप्रतीतेरप्रमात्वे भेदस्यासत्त्वप्राप्त्या वास्तवाभेदस्यैव प्राप्तेरिति भावः । **उपाधिनेति** । यद्युपाधिना समवाया आरोपिता एव प्रतीयन्ते तर्ह्यारोपितस्यान्यत्र सत्त्वेन भाव्यम् । तत्र च प्रधानभूतसमवायस्य प्रतीतिः, विनोपाधिसम्बन्धं केवलं समवाय इति न सम्भवति । तथा अप्रतीतेः । अत सर्वदा उपाधिसम्बन्ध एव प्रतीयत इति वाच्यम् । उपाधिसम्बन्धेन प्रतीयमानश्च सर्वत्राप्यारोपित एवेति कुत्रापि तस्य सत्त्वं न स्यादित्यविद्यमानतैव सर्वत्र प्राप्ता । न हि शशविषाणं त्वन्मते कुत्रचिदारोप्यते । तस्य कुत्रापि सत्त्वाभावात् तद्वदिति भावः ।

**कं०रा०—** **न चैवमिति** । समवाये उपाधिप्रयुक्तभेदाधिगमस्य भ्रमत्वे भेदस्यासत्त्वप्राप्त्या भूधरस्याग्निसंयोगः साध्य इत्यत्र षष्ठ्यर्थस्यानुमानसाध्यत्वेन पर्यवसितस्य भूधराग्निसमवायस्य प्रत्यक्षादिसिद्धतन्तुपटादिसमवायेनाच्छिन्नत्वाद्धूमवत्त्वाद्यनुमानस्य सिद्धसाधनत्वं तदवस्थमिति न वाच्यमित्यर्थः ।

**श्रीनिधि०— औपाधिकभेदभिन्ना इत्युच्यन्ते इति** । उपाधिजन्यभेदप्रतीतिविषयत्वादिति भावः । वस्तुतस्तु भेदो नास्त्येव अधर्मिकभेदस्यायोगादित्येवमुक्तम् ।

**शे०वा०— उक्तदोषाभावमिति** । समवायानन्त्यप्रयुक्ततदेकत्वहानिसिद्धसाधनत्वरूपोक्तदोषाभावमित्यर्थः । उपाधेरविद्यमानान्यसमवायाधिगतिहेतुत्वं कथमित्यतोऽनुरूपदृष्टान्तकथनेन तत्सम्भावयति **यथेति** ।

**विठ्ठल०— उक्तदोषाभावमिति** । उक्तो यो दोषः समवायस्य एकत्वेऽनुमानानां सिद्धसाधनतेत्यादिरूपस्तदभावमित्यर्थः ।

**चषक— द्वितीयश्चन्द्रोऽधिगम्यत इति** । ज्ञायत इत्यर्थः । **समवायैकत्वनिराक्रिया** ॥

**॥ इति उपाधिगम्यमौपाधिकमिति पक्षमङ्गीकृत्योक्तदोषाभावशङ्का ॥**

* * *

**॥ अथ तत्रान्ते तच्छङ्कापरिहारश्च ॥**

२६६ **सु०**— परिहरति **तद्गमकमिति** ।

**अनु०— तद्गमकमनुमानं न मा भवेत् ।**

**यद्यप्यस्मिन्पक्षे न सिद्धसाधनं धूमाद्यनुमानं, तथाऽपि तद्गमकम् अविद्यमानसमवायसत्तां प्रतिपादयद् अनुमानजातं दहनशैत्यानुमानमिव बाधितविषयतया न प्रमाणं भवेत् ।**

**उपलक्षणं चैतत् । उपाधीन्विना समवायावभासस्य क्वाप्यभावात्, सर्वत्रापि तस्याविद्यमानतैव स्यादित्यपि द्रष्टव्यम् ॥**

**परि०**— अनुमानस्य बाधितविषयत्वकथनं समवायस्वरूपासत्त्वस्योपलक्षणमित्याह **उपलक्षणं चैतदिति** । **अभावादित्य**नन्तरमुपाधिनाऽवभातस्याविद्यमानतोपगमाच्चेत्यपि ध्येयम् । **तस्य** समवायस्य । अविद्यमानतैवेत्यर्थः ।

**॥ इति तच्छङ्कापरिहारश्च ॥**

**॥ इति उपाधिगम्यत्वार्थपक्षेण उक्तदोषाभावशङ्का तन्निरासश्च ॥**

॥ इति औपाधिकत्वस्य उपाधिजन्यत्वे उपाधिगम्यत्वे वाऽपि समवायानन्त्यप्रसङ्गः ॥

॥ इति प्रकारभेदेन विरोधशान्तिशङ्का तन्निरासश्च ॥

॥ इति समवायभेदापारमार्थिकत्वस्य अनिर्वाच्यत्वाङ्गीकारेऽपसिद्धान्तः (मायावादित्वापत्तिः) ॥

॥ इति समवाये अभेदभेदयोरविरोधस्य पारमार्थिकत्वापारमार्थिकत्वाभ्यामसम्भावितत्वम् ॥

॥ इति उक्तानुपपत्तेः अप्रयोजकत्वशङ्का तन्निराकरणं च ॥

॥ इति समवायस्य एकत्वे(अभेदे)ऽपि औपाधिकभेदाङ्गीकारे तदभेदानुपपत्तिः ॥

॥ इति अग्निमच्छब्दार्थभूत 'पर्वतस्याग्निसंयोगः' इत्यत्रत्यषष्ठ्यर्थविकल्पनिरासः ॥

॥ इति अग्निमच्छब्दार्थे 'पर्वतस्याग्निसंयोगः' इत्यर्थविकल्पस्यापि निराकरणम् ॥

॥ इति 'औपाधिकविशिष्टाद्यं त्रितयानन्यदि'ति पक्षनिराकरणम् ॥

* * *

॥ अथ च समवायैकत्वनिरासोपसंहारः ॥

२६७ **सु०—** तदेवं सर्वानु(धूमाद्यनु)मानानां सिद्धसाधनत्वादिप्रसङ्गान्न समवायैक्यमुपपन्नमिति ॥

एतच्चोपलक्षणम् । आगमापह्नवश्च समवायैक्ये स्यात्, पदार्थानां तत्संसर्गाणां च सिकतावद्विशकलितानां सिद्धत्वात् ।

**परि०— सिद्धसाधनत्वादिप्रसङ्गादिति** । बाधितविषयत्वं आदिपदार्थः । मूले सर्वानुमानोच्छेदोक्तिरुपलक्षणं सर्वागमप्रामाण्योच्छेदस्येत्याह **एतच्चोपलक्षणमिति** । **पदार्थानामिति** । वाक्यबोध्यसंसर्गप्रतियोगिनां तन्निरूपितसंसर्गाणां विशकलितानां सिद्धत्वेन ज्ञातज्ञापकत्वापत्त्या वाक्यमात्राप्रामाण्यापत्तिरिति भावः । ननु गामानयेत्यादिवाक्येषु गवादिरूपपदार्थानां निर्विशेषेणान्वयमात्रस्य चान्यत्र प्रसिद्धत्वेऽपि गवादेरानयनादेश्च योऽन्वयः स न सिद्ध इति चेन्न । तत्रापि षष्ठ्यर्थस्य समवायानतिरेकात् तस्य चैकत्वेन सिद्धत्वादिति भावः । ***समवायस्यैकत्वनिरासः ॥***

**गु०दी०— पदार्थानां तत्संसर्गाणां च** इत्यत्र अविशकलीकरणं च समवायेन चेत्सोऽप्येक एवेति तस्यापि सिद्धत्वादिति शेषपूरणं कर्तव्यम् ।

**यादु०— आगमापह्नव इति** । ज्ञातज्ञापकत्वादिप्रसङ्गान्नदीतीरे पञ्च फलानि सन्तीत्याद्यागमप्रामाण्यापलापोऽपि स्यादित्यर्थः । तत्रापि नदीतीरादेः फलादिसंयोगस्यैव वाक्यार्थरूपत्वादिति भावः ।

**वं०प०**— 'अग्निसंयोगमात्रं चेद्भवेत्' तत्सिद्धसाधनमि'ति समवायैक्ये सिद्धसाधनतारूपमनुव्याख्यानोक्तं दूषणमुपलक्षणमित्याह **एतच्चेति** । **आगमेति** । समवायैक्ये आगमस्यापि ज्ञातज्ञापकत्वापत्त्याऽप्रामाण्यमेव स्यादित्यर्थः । तत्कथमित्यत आह **पदार्थानामिति** । नदीतीरे फलानि सन्तीत्यत्रोक्तरीत्या नद्यास्तीरस्य वा फलानां वा सत्ताया वा संयोगरूपसम्बन्धमात्रस्य वा फलादिसम्बन्धमात्रस्य वा सिद्धत्वेन नदीतीरस्य यः फलसंयोगः सोऽसिद्धो वाक्यप्रतिपाद्य इति वाच्यम् । तत्रापि समवाय एव षष्ठ्यर्थ इति तस्य सर्वत्रैकत्वेन सिद्धत्वात् ज्ञातज्ञापकतया वाक्यस्यानुपादेयता स्यादेव । तथा च अप्रामाण्यं दुर्वारम् । 'याथार्थ्यमेव मानत्वमपि वाक्यं प्रयोजकम् । मानत्वमेती'त्युक्तेः । एवमेव सर्ववाक्येषु ज्ञेयम् ।

**कं०रा०**— **सिद्धसाधनत्वादीति** । आदिपदेन बाधितविषयत्वं गृह्यते । **आगमापह्नव इति** । आगमप्रामाण्यापह्नव इत्यर्थः । **सिद्धत्वादिति** । पदार्थस्य तन्निरूपितसंसर्गस्य विशकलिततया सिद्धत्वेनागमस्य परासिद्धबोधकत्वेनैव प्रामाण्यस्य वक्तव्यत्वात् परसिद्धबोधने तस्य प्रामाण्यं न सम्भवतीति भावः ।

**श्रीनिधि०**— **सिद्धसाधनत्वादिप्रसङ्गादिति** । आदिपदेनाप्रामाण्यं गृह्यते । **आगमापह्नवश्चेति** । इदं च यत्र पदार्थः संसर्गः समवायः तत्रैवोक्तमिति ध्येयम् ।

**शे०वा०**— 'अग्निसंयोगमात्रं चेद्भवेत्तत्सिद्धसाधनमि'त्यादिना ग्रन्थेन यत्समवायस्यैकत्वे सिद्धसाधनत्वमनुमानानामुक्तं तदुपलक्षणमित्याह **एतच्चेति** । किं तदुपलक्षणमित्यत आह **आगमेति** । नदीतीरे पञ्च फलानि सन्तीत्याद्यागमप्रामाण्यापलापश्च स्यादित्यर्थः । तमेवोपपादयति **पदार्थानामिति** । तथा च ज्ञातज्ञापकत्वप्रसङ्गेन पदार्थमात्रस्य संसर्गमात्रस्य वा वाक्यार्थत्वानुपपत्तेर्नदीतीरस्य यः पञ्चफलसंयोगः स एव वाक्यार्थो वक्तव्यः । अत्रापि विवेक्तव्यं कस्याज्ञातत्वेन ज्ञाप्यत्वमिति अन्यस्यासम्भवात् षष्ठ्यर्थस्य समवायस्येति वाच्यम् । स सर्वत्रैक एव चेत्पुनर्ज्ञातज्ञापकतैव । तन्तुपटसमवायस्य प्रत्यक्षेणानुमानेन वा ज्ञातत्वादतो न तस्यैक्यमित्याशयः ।

**स०व्र०**— **आगमापह्नवश्चेति** । आगमस्यापि ज्ञातज्ञापकत्वापत्त्या प्रामाण्यं न स्यात् । अतोऽपि न समवायैक्यमित्यर्थः । तत्कथमित्यत आह **पदार्थानामिति** ।

**विठ्ठल०**— **सिद्धसाधनतादीत्यत्र** बाधितविषयत्वमादिशब्दार्थः । **एतच्चेति** । समवायस्यैकत्वे सर्वानुमानोच्छेद इति वचनमित्यर्थः । **पदार्थानामिति** । नदीतीरे पञ्चफलादिपदार्थानां तन्निरूपितसंसर्गाणां च सिद्धत्वादित्यर्थः । तथा च विशकलितानां सिद्धत्वेऽपि नदीतीरे पञ्चफलादीनां च सम्बन्ध आगमगम्य इति वक्तव्यम् । अत्रापि षष्ठ्यर्थः **समवाय एवेति** तस्य चैकत्वेन सिद्धत्वादागमस्य ज्ञातज्ञापकतापत्त्या तदपह्नवः स्यादिति भावः ।

**॥ इति समवायैकत्वनिरासोपसंहारः ॥**

**॥ इति समवायस्य एकत्वनिरासः ॥**

* * *

२६८ **सु०—** इदानीं समवायस्य नित्यत्वं निराकरोति **एवमेवेति** ।

## अनु०— एवमेवासतः सत्तासमवायो जनिर्मता ।

यथा समवायस्य सर्वत्रैकत्वाङ्गीकारे सर्वानुमानानां सिद्धसाधनत्वादिदुष्टत्वमुक्तम्, **एवमेव** तन्नित्यत्वाभ्युपगमे, प्राक् **असतः सत्तासमवायो जनिः** दुष्टा **मता** । समवायनित्यत्वे न कस्यापि जनिः स्यादित्यर्थः । तत्कथमित्यत आह **तत्रापीति** ।

## तत्रापि ह्युक्तदोषाणां नैव किञ्चिन्निवारकम् ।

**उक्तदोषाणां** सिद्धसाधनत्वादीनाम् ।

तथा हि । 'प्रागसतः सत्तासमवायो जनिरि'ति परेण जनिलक्षणमभिहितम् । तत्र यदि समवायो नित्यः स्यात् तदा तल्लक्षणा घटजनिः प्राक्कुलालादिव्यापारादस्तीति तदर्थस्य तस्य सिद्धसाधनता स्यात् । ज्ञप्तौ हि सिद्धस्यापि साधनं घटते, किन्तु क्वचिदनपेक्षत्वमित्येव । कृतौ तु प्राक्सिद्धस्य साधनमेवाशक्यमिति कुलालादिव्यापारस्य निष्फलत्वं स्यात् ॥ अथ समवायस्य नित्यत्वेऽपि प्रागसतः सत्तासमवायः साध्यः अस्तु को दोष इति चेन्न, समवायैक्यव्याघातात् । औपाधिकः समवायस्य भेद इति चेत्, यथासम्भवं सर्वमुक्तमनुसन्धेयम् । न हि प्रागसद्विषयो व्यापारः सम्भवति, तस्य सत्करणातिरिक्तकर्तव्याभावात्, सत्करणस्य सत्तासमवायानतिरेकात् । स्वरूपलाभः कुलालादिव्यापारसाध्य इति चेत्, एवं तर्हि किमपरेण सत्तासमवायेन ।

**परि०—** समवायनित्यत्व इति पदच्छेदः । **तदर्थस्य तस्य** व्यापारस्य । नन्वेकत्वपक्षोक्तदोषाणां नित्यत्वपक्षेऽपि साम्यात् तत आधिक्याभावादेवमेवासत इत्यतिदेशो न युक्त इत्यत आधिक्यमाह **ज्ञप्तौ हीति** । **क्वचिदिति** । सर्वाविवादस्थल इत्यर्थः । **यथासम्भवं सर्वमुक्तमिति** । विरोधाभावो देशकालव्यक्तिभेदेन भवति । स च समवाये परस्य न सम्मतः । किन्तु

पारमार्थिकत्वापारमार्थिकत्वाभ्यां भेदाभेदयोरविरोधो वाच्यः । यत्रौपाधिकभेदस्यापारमार्थिक(त्वे अस)त्वमसत्त्वमनिर्वाच्यत्वं वा । आद्ये सिद्धसाधनत्वम् । अन्त्ये मायावादितापत्तिः । सत्तारूपोपाधिनाऽन्योऽविद्यमान एव समवायो भाति । स एव च जनिश्चेत् तर्हि घटादिसर्ववस्तुजनिरसत्या स्यात् इत्येवमनुसन्धेयमित्यर्थः । सत्तारूपोपाधेरेकत्वात् तदानन्त्यप्रयुक्तसमवायानन्त्यमिह नापादयितुं शक्यमिति **यथासम्भवम्** इत्युक्तम् । ननु सत्तासमवायस्य कुलालव्यापारासाध्यत्वेऽपि प्रागसतः सत्तासमवायो जनिरित्युक्तत्वाद्विशेषणांशस्यासतो ऽस्तु कुलालादिव्यापारविषयतेत्यत आह **न हीति** ॥ ***समवायस्य नित्यत्वनिरासः*** ॥

**गु॰दी॰— न हि प्रागसद्विषयो व्यापार** इत्यत्र **व्यापारः** दण्डताडनचक्रभ्रमणादिव्यापारः ।

**यादु॰— यथासम्भवं सर्वमिति** । 'नानिर्वाच्यं हि तेनेष्टमि'त्यादिना 'अनुमानं न मा भवेदि'त्यन्तेन ग्रन्थेन यदुक्तं तत्सर्वमप्यत्रोक्तरीत्याऽनुसन्धेयमित्यर्थः । नन्वत्र प्रागसत इत्युक्तोपाधेरेकत्वात् 'उभयत्राप्यनन्ताः स्युः समवाया इतस्ततः' इत्युक्तं कथमनुसन्धेयमित्यत उक्तं **यथासम्भवमिति** । ननूक्तजनिलक्षणे विशेष्यांशस्य सत्तासमवायस्याजन्यत्वेन कुलालादिव्यापारसाध्यत्वासम्भवेऽपि विशेषणांशस्य प्रागसतस्तत्साध्यत्वोपपत्त्या न कुलालादिव्यापारवैयर्थ्यमित्यत आह **नहीति** ।

**वं॰प॰— तदर्थस्य** घटजनिप्रयोजनकस्य । **तस्य** कुलालादिव्यापारस्य । **सिद्धस्यापि** ज्ञातस्यापि । **साधनं** ज्ञापनम् । धारावाहिकज्ञाने दर्शनादिति भावः । **सिद्धस्य** उत्पन्नस्य । **साधनमेव** उत्पादनमेव । **औपाधिक इति** । प्रागसत इत्युपाधिप्रयुक्त इत्यर्थः । **कर्तव्याभावादिति** । तथा च यः प्रागत्यन्तमसंस्तस्य सत्करणं शतेनापि यत्नानामसम्भावितमिति पूर्वं सत्त्वमङ्गीकार्यमिति शेषः । ततोऽपि किमित्यत आह **सत्करणस्येति** । ततश्च समवायस्य नित्यतया पूर्वं सिद्धत्वात् तदर्थकस्य कुलालादिव्यापारस्य निष्फलत्वमनिवार्यमिति वाक्यशेषः । **स्वरूपलाभः** सत्तासमवायातिरिक्तस्वरूपलाभः ।

**कं॰रा॰—** समवायस्य नित्यत्वेऽपि प्रागसतः सत्तासमवायः साध्योऽस्त्विति वदता समवायभेदोऽङ्गीकृतो भवति । तच्च न युक्तमित्याह **नेति** । ननु कुलालादिव्यापारस्य प्रागसत्कार्यस्वरूपविषयत्वेन साफल्यमस्तु तस्य प्रागसिद्धत्वादित्यत आह **नहीति** । **तस्येति** । प्रागसतो हि कुलालादिव्यापारविषयत्वं तदा स्याद्यदि कुलालादिव्यापारेण प्रागसतः किञ्चित्कर्तव्यं स्यात्, न च तत्सम्भवति, तस्य सत्करणातिरिक्तकर्तव्याभावात्सत्त्वेन करणस्य च सत्तासमवायानतिरेकात्सत्तासमवायस्य च प्राक्सिद्धत्वेन कर्तव्यत्वायोगादिति भावः ।

**श्रीनिधि॰—** कुलालादिव्यापारस्य साफल्यं शङ्कते **अथेति** । **समवायैक्यव्याघातादिति** । समवायः सत्तासमवायः इति सामान्यविशेषभावस्य भेदनियतत्वात् न ह्येकस्मिन् सामान्यविशेषभावौ दृष्टाविति भावः ।

व्याहतिपरिहारं शङ्कते **औपाधिक इति** । प्रागसत् सत्ताद्युपाधिकृत इत्यर्थः । **यथासम्भवमिति** । सम्भवमनतिक्रम्येत्यर्थः । परेण यथा यथा शङ्किते यद्यद्दूषणं सम्भावितं तदेव वक्तव्यमित्यर्थः । एवमुक्तदूषणेन समवायस्य व्यापारविषयत्वेऽपि प्रागसत एव तत्त्वं भवतु तस्यासिद्धत्वेन सिद्धसाधनताद्यवकाशादित्यत आह **न हि प्रागसद्विषय इति** । कुतो न सम्भवतीति चेत् । तस्मिन् साध्याभावादिति ब्रूमः । न हि साध्यरहितस्य गगनादेः कुठारादिव्यापारविषयत्वं दृष्टम् । ननु साध्याभावोऽसिद्ध इति चेत् किमत्र सत्करणातिरिक्तं साध्यं किंवा तदेव । आद्य आह **तस्येति** । प्रागसत इत्यर्थः । द्वितीय आह **सत्करणस्येति** । **सत्तासमवायानतिरेकादिति** । तस्य च व्यापारविषयत्वाङ्गीकारे त्वैक्यव्याघातसिद्धसाधनतेत्युक्तमेव दूषणमिति भावः । ननु सत्करणातिरिक्तकर्तव्याभावादित्यप्यसिद्धं, स्वरूपलाभस्यैव सत्त्वादित्याशङ्क्य परिहरति **स्वरूपलाभ इति** । **किमपरेणेति** । स्वरूपलाभ एव जनिरस्तु सत्तासमवायो जनिरिति तु त्यज्यतामित्याशयः ।

**शे०वा०— यथासम्भवं सर्वमिति** । 'यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते' इत्यादिनोक्तं सर्वमप्युक्तरीत्याऽत्रानुसन्धेयमित्यर्थः । 'अविद्यमान एवान्यः समवायोऽधिगम्यते' इत्यादेरत्राप्रसङ्गादाह **यथासम्भवमिति** । प्रागसत इत्युक्तोपाधेरेकत्वात् 'उभयत्राप्यनन्ताः स्युः समवाया इतस्ततः' इत्यस्यात्राप्रसङ्गादेतदुक्तमित्याशय इत्याहुः । ननु चोक्तजनिलक्षणे विशेष्यांशस्य समवायस्याजन्यतया कुलालादिव्यापारसाध्यत्वासम्भवेऽपि विशेषणांशस्य प्रागसतः तत्साध्यत्वोपपत्त्या न कुलालादिव्यापारवैयर्थ्यमित्यत आह **न हीति** । तत्कुत इत्यतः किं तस्य सत्करणातिरिक्तमेव कर्तव्यमभिमतं किंवा सत्करणम् उत स्वरूपलाभ इति विकल्पान्मनसि निधाय आद्यमसिद्ध्या दूषयति **तस्येति** । द्वितीयं दूषयति **सत्करणस्येति** । तृतीयमाशङ्कते **स्वरूपेति** ।

**वा०र०— अत्राप्रसङ्गादाहेति** । पूर्वत्रोपाधिगम्यमौपाधिकमिति पक्षाश्रयणेनोपाधेरविद्यमानभेदज्ञापकत्वशङ्का युक्ता । नित्यत्वनिराकरणपक्षे तूपाधेः कारकत्वेनैव स्वीकारसिद्धेरविद्यमानस्यान्यस्य समवायस्योत्पत्तिः कुलालादिव्यापारेण भवतीत्यङ्गीकारायोगात् तथा शङ्कादिकमनुपपन्नमित्यर्थः । कारके अविद्यमानस्यैव ज्ञापकता त्वशक्यशङ्केति भावः । अन्यथाख्यातिव्याख्यानमाह **प्रागसत इत्युक्तेति** । इत्यप्याहुरिति पाठः । आहुरित्यस्वरससूचनम् । तद्बीजं तु यथाऽयुतसिद्धयोः समवाय इत्येकोपाधिप्रतीतावपि तन्तुपटादिरूपानन्तायुतसिद्धभेदमाश्रित्योपाध्यनन्तत्वोक्तिरेवं प्रागसत इत्येकोपाधिप्रतीतावपि घटतद्रूपादितत्तदनन्तपदार्थानामेव प्रागसत इत्यनेनोपस्थित्या जनिस्थलेऽपि समवायोपाधीनामनन्तत्वमनिवार्यम् । अन्यथा विशिष्टादिस्थलेऽप्ययुतसिद्धरूपोपाधेरेकत्वेन समवायानन्त्याप्रसङ्गात् तत्र तदानन्त्यापादनायोग इति ।

**विठ्ठल०— तदर्थस्येति** । घटजन्यार्थस्य **तस्य** कुलालव्यापारस्येत्यर्थः । **क्वचिदिति** । निर्विवादस्थल इत्यर्थः । अन्यत्र बहुप्रमाणसंवादस्य दार्ढ्यहेतुत्वेनापेक्षितत्वादिति भावः । **प्राक्सिद्धस्येति** । कृतस्य करणायोगादिति भावः । **सत्तासमवायः साध्य इति** । समवायमात्रस्यान्यत्र सिद्धत्वेऽपि तद्भेदस्यासतः

सत्तासमवायरूपस्यासिद्धत्वात् कुलालव्यापारः तद्विषयोऽस्त्विति भावः । **यथासम्भवं सर्वमिति** । 'नानिर्वाच्यं हि तेनेष्टमि'त्यादिना ग्रन्थेन समवाये औपाधिकभेदाङ्गीकारे यद्दूषणमुक्तं तदनुसन्धेयमित्यर्थः । अत्र जनिरूपत्वे-नाभ्युपगतसत्तासमवाये प्रागसत इत्युक्तोपाधेरेकत्वात् 'अनन्ताः स्युः समवाया इतस्तत' इत्युक्तानुसन्धानं कथमित्यतो यदत्र सम्भावितं तदनुसन्धेयमित्याशयेनोक्तं **यथासम्भवमिति** । ननु जनिलक्षणे विशेष्यांशस्य सत्तासमवायस्य नित्यतयाऽजन्यत्वेन तद्विषये कुलालव्यापारवैयर्थ्येऽपि प्रागसत इत्युक्तविशेषणांशविषये कुलालव्यापारसार्थक्यं घटत इत्यत आह **नहीति** । कुतो नेति चेत् तत्र वक्तव्यं प्रागसतः कुलालव्यापारेण कर्तव्यं किं सत्करणं उत सत्करणातिरिक्तं किञ्चित् इति विकल्पं मनसि निधाय द्वितीयं तावन्निराचष्टे **तस्येति** । असत इत्यर्थः । आद्यं दूषयति **सत्करणस्येति** । सत्तासमवायश्च नित्यसिद्ध एवेति न कुलाल-व्यापारेण प्रागसति सम्पादनीयमस्तीति भावः । असतः स्वरूपलाभः कुलालव्यापारसाध्योऽस्तीति शङ्कते **स्वरूपलाभ इति** । एवं तर्हि स्वरूपलाभो जनिरिति प्राप्तम् । ततश्च सत्तासमवायाभ्युपगमो व्यर्थ इत्याशयेन समाधत्ते **एवं तर्हीति** ।

**॥ इति समवायनित्यत्वस्यापि उक्तदोषनिवारकाभावादयुक्तत्वम् ॥**

* * *

**॥ अथ समवायस्य एकत्वनित्यत्वनिरासोपसंहारः ॥**

२६९ सु०— तदेवं समवायस्यैकत्वनित्यत्वे सर्वथाऽप्ययुक्ते इति ।

चषक— सर्वथाऽप्ययुक्ते इति ॥ *समवायनित्यत्वनिरासः ।*

**॥ इति समवायस्य नित्यत्वनिराकरणम् ॥**

**॥ इति समवायस्य एकत्वनित्यत्वनिरासोपसंहारः ॥**

**॥ इति समवायस्य सर्वत्रैकत्वं नित्यत्वं च 'तत्त्वं भावेने'ति सूत्रे यदुक्तं तस्य निराकरणम् ॥**

* * *

**॥ अथ समवायस्य विशेषतो निराकरणे प्रकारान्तरेण 'औपाधिकविशिष्टाद्यं' इत्याद्यनुव्याख्यानस्य सङ्गतिप्रदर्शनम् ॥**

२७० सु०— यद्वा समवायनिराकरणप्रसङ्गात् परोक्तं विशिष्टादेर्जनेश्च स्वरूपं तन्मता-सामञ्जस्यप्रदर्शनाय 'औपाधिके'त्यादिना निराकृतं (च) वेदितव्यम् ।

**परि०**— 'औपाधिकविशिष्टाद्यमि'त्यादेर्निवारकमित्यन्तस्य व्याख्यानान्तरमाह **यद्वेति** । **विशिष्टादेरिति** । विशिष्टौपाधिकोपलक्षितानामित्यर्थः ।

**शे०वा०**— 'औपाधिकविशिष्टाद्यमि'त्यादिप्रतिज्ञाद्यनुसारेण विशिष्टादिनिराकरणपरतया स्पष्टप्रतिभासस्य वाक्यजातस्य समवायैकत्वं निराकर्तुं पीठिकारचनपरतया व्याख्यानमनुचितमित्यरुचिं मनसि निधाय प्रकारान्तरेण तत्तात्पर्यमाह **यद्वेति** ।

**वा०र०**— **औपाधिकविशिष्टाद्यमित्यादीति** । अयमर्थः । औपाधिकविशिष्टाद्यं किमुपाध्यादित्रिकादेरन्यदुतानन्यदिति विकल्पावसरे विशिष्टादेरेव पुरस्कारप्रतीतेरनन्यत्वनिरासपरे अग्निमत्वं किमित्यादि ग्रन्थेऽपि तस्यैव पुरस्कारप्रतीतेः, समवायस्य च विशिष्टादिनिरासप्रसङ्गागततया तस्य प्राधान्येन शङ्कासमाधानयोरप्रस्तुत्या तन्निरासस्य प्राधान्यमाश्रित्य तत्पीठिकारचनतयौपाधिकादिविकल्पनिरासकरणमित्ययुक्तम् । प्रत्युत विशिष्टादिविषयकविकल्पाद्युपक्रमानुसारेण तन्निरासपरत्वमेव प्राधान्येनाश्रयितुं युक्तम् । एवमेवासत इत्येतदपि प्राधान्येन जनिपदार्थनिराकरणतया प्रतीयमानस्येतदप्यादिपदैः सङ्गृह्यत इति । अत्र प्रतिज्ञापदेनोपक्रमो लक्ष्यते । यद्वौपाधिकविशिष्टाद्यं किमुपाध्यादिप्राधान्यादित्यादिविकल्पानन्तरमाद्यादिपक्षनिराकरणे औपाधिकादिकं नोपाध्यादितोऽन्यत् अनन्यद्वेत्याद्युत्त्यनुसारेण प्रतिज्ञा प्रतीयत इति ज्ञेयम् । आदिपदेन तथाप्रतिज्ञानुसारिनिराकरणपरिग्रहः । **वाक्यजातस्येत्य**नेन पीठिकारचनपरभागस्य बहुत्वात् कस्यचिदेवांशस्य पीठिकारचनपरत्वोपपत्तावपि बहोस्तदङ्गीकारायोग इति सूचयति । **निराकर्तुमिति** । अस्य चैकत्वादित्यादिनेति शेषः । एतच्चोपलक्षणम् । समवायनित्यत्वनिरासपरतयेत्यपि ज्ञेयम् । **प्रकारान्तरेणेति** । विशिष्टादिनिराकरणपरतया इत्यर्थः ।

**विठ्ठल०**— औपाधिकेत्यादिग्रन्थस्य तात्पर्यान्तरमाह **यद्वेति** । समवायनिराकरणप्रस्तावे समवायस्यैकत्वादिनिरासः सङ्गतः । परोक्तविशिष्टादिस्वरूपनिराकरणं कतमत्र सङ्गतमिति चेन्न प्रासङ्गिकत्वेनोपपत्तेः । न च निष्प्रयोजनत्वम् । तन्मतासामञ्जस्यप्रदर्शनस्यैव प्रयोजनत्वादिति भावः । एवं तात्पर्यकथनं चोत्तरमूलस्य सङ्गत्यर्थमिति मन्तव्यम् ।

**॥ इति समवायस्य विशेषतो निराकरणे प्रकारान्तरेण 'औपाधिकविशिष्टाद्यं' इत्याद्यनुव्याख्यानस्य सङ्गतिप्रदर्शनम् ॥**

* * *

॥ अथ समवायस्य विशेषतो निराकरणे स्वमतानुसारेण विशिष्टादिपदार्थनिरूपणे द्वाभ्यां प्रकाराभ्यां दोषाभावदर्शनम् ॥

॥ अथ तत्रादौ प्रथमप्रकारः ॥

२७१ सु०— 'नन्वेतत्सर्वं व्याहतम्, युष्माभिरपि लोकवेदव्यवहारं परिपालयद्भिर्विशिष्टादेः अङ्गीकरणीयत्वात् । तत्राप्युक्तदोषानुषङ्गादि'त्यतो विशिष्टादिनिरूपणे तावद्दोषाभावं स्वमते दर्शयति **अस्मदिति** ।

अनु०— अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतः ।
नास्ति दोषः क्वचित्

विशिष्टाकारो न विशेषणं नापि सम्बन्धः, किन्नाम विशेष्यम् । न च तन्मात्रम् । द्विविधो हि विशिष्टाकारः, यावद्विशेष्यभाव्ययावद्विशेष्यभावी च ।

तत्राद्यो विशेष्येणात्यन्ताभिन्नः, यथेश्वरः स्वरूपेण सर्वज्ञः । एवं यत्र यत्र विशेषणसम्बन्धो यावद्विशेष्यभावी तत्र तत्र विशिष्टाकारोऽपि तथाभूतो विशेष्येणात्यन्ताभिन्नो द्रष्टव्यः ।

तथाऽपि विशेषस्य भेदप्रतिनिधेः सर्वपदार्थेष्वङ्गीकृतत्वेनेश्वरः सर्वज्ञ इत्यपर्यायशब्दप्रवृत्त्याद्यनुपपत्तिदोषो नास्ति । ईश्वर एव सर्वज्ञ इत्यभेदस्तावत्प्रमितः, भेदे तु न निरवकाशं प्रमाणमस्तीति ।

द्वितीयस्तु विशेष्येण भिन्नाभिन्नः, यथा पर्वतेनाग्निमान् । यथा हि संयोगविशेषसचिवास्तन्तवः पटाकारेण परिणमन्ते, तथा आगन्तुकविशेषणसम्बन्धाद्विशेष्यस्वरूपं विशिष्टाकारेण परिणमते । तत्र यद्यपि भेदाभेदौ वस्तुनः स्वरूपभूतौ, तथाऽपि **अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतो न** सङ्करदोषः । तदिदमुक्तं **क्वचिदिति** । अत्यन्ताभेदस्थले भेदाभेदस्थले चेत्यर्थः ।

परि०— **तावद्दोषाभावमिति** । जनेर्निरूपणे दूषणाभावोक्तिपरतया अस्मदित्यादेः करिष्यमाणव्याख्यापेक्षया तावच्छब्दः । **ईश्वरः स्वरूपेण सर्वज्ञ इति** । स्वरूपप्रज्ञप्त्या सर्वज्ञ

इत्यर्थः । **तथाभूतो** यावद्विशेष्यभावीत्यर्थः । भेदेनैवास्त्वपर्यायशब्दप्रवृत्त्यादिकमित्यत आह **ईश्वर एवेति** । 'यः सर्वज्ञ' इत्यादिश्रुतिभिरिति भावः । **न निरवकाशमिति** । धर्मिधर्मभावादिव्यवहारस्तु विशेषेणोपपन्न इति भावः । अग्निमानित्यग्निमत्त्वरूपविशिष्टाकारः पर्वतेन भिन्नाभिन्न इत्येतदुपपादयति **यथा हीति** । **सचिवाः** सहिताः । ननु भेदाभेदयोरपि विशिष्टविशेष्यरूपभेदाभेदस्वरूपत्वात् कथं विशिष्टविशेषाद्यसाङ्कर्यमित्यत आह **तत्र यद्यपीति** ।

**यादु०— न सङ्करदोष इति** । भेदाभेदयोरेकवस्तुस्वरूपत्वेन तयोः परस्परमैक्यं वा परस्परकार्यकारित्वं वा स्यादिति दोषो नेत्यर्थः ।

**वं०प०—** ननु विशिष्टाकारस्य सर्वज्ञस्येश्वररूपविशेष्येणात्यन्ताभेदे ईश्वरसर्वज्ञशब्दयोः पर्यायत्वप्राप्त्येश्वरः सर्वज्ञ इत्यपर्यायशब्दव्यवहारो न स्यादित्यत आह **तथाऽपीति** । **अस्तीति** । अतोऽत्यन्ताभेद एव वाच्य इत्यर्थः । **संयोगविशेषो** व्यतिषङ्गरूपः । ननु भेदाभेदयोरेकवस्तुस्वरूपत्वेन तयोरैक्यरूपं साङ्कर्यं परस्परकार्यकारित्वरूपं वा साङ्कर्यं स्यादित्यत आह **तथाऽपीति** ।

**कं०रा०— ईश्वरः स्वरूपेणेति** । सर्वज्ञत्वविशिष्टाकारस्य यावद्विशेष्यभावित्वाद्विशेष्येणेश्वरस्वरूपेण सोऽत्यन्ताभिन्न इति भावः । **विशिष्टाकारेण परिणमत इति** । परिणामपरिणामिनोश्च भिन्नाभिन्नत्वस्य साधितत्वादग्निविशिष्टाकारस्य विशेष्येण पर्वतेन भिन्नाभिन्नत्वमिति भावः । **वस्तुनः स्वरूपभूताविति** । तथा च भेदाभेदयोः सङ्करः प्रसज्यत इति भावः ।

**श्रीनिधि०— लोकवेदव्यवहारं परिपालयद्भिरिति** । नीलो घटः अग्निमान् पर्वत इत्यादिः लौकिको व्यवहारः । ईश्वरः सर्वज्ञ इत्यादिः वेदव्यवहारः । **विशिष्टादेः** इत्यादिपदेन औपाधिकोपलक्षिते गृह्येते । **उक्तदोषानुषङ्गादिति** । औपाधिकविशिष्टाद्यमपीत्यादिनोक्तदोषानुषङ्गादित्यर्थः । **दोषाभावम्** उक्तदोषाभावम् । तत्र बाधकं तु 'भावो ह्यभावश्च स एव ही'त्यादिना परिहरिष्यत इति तावच्छब्दः । **न च तन्मात्रमिति** । विशेष्यमात्रं नेत्यर्थः । किन्तु विशेषसम्बन्धसमनियतस्तत्प्रयोज्यो वा तदनन्तरभावी तज्जन्यो वा तद्विशेष इति भावः । **ईश्वरः स्वरूपेण सर्वज्ञ इति** । सर्वज्ञानसम्बन्धसमनियतः सर्वज्ञरूपो विशिष्टविशेषः ईश्वरस्वरूपेण अत्यन्ताभिन्न इत्यर्थः । **एवं यत्रेति** । ईश्वरातिरिक्तस्थलेऽपीत्यर्थः । **यावद्विशेष्यभावीति** । पूर्वोत्तरमखण्डित इत्यर्थः । भिन्नाभिन्न इत्युक्तं तत्कुत खण्डितत्वादित्यत आह **यथा हि संयोगविशेषसचिवा इति** । **परिणमत इति** । अवस्थान्तरापन्नः भवतीत्यर्थः । परिणामोऽपि पर्वतत्वाद्यनुपमर्देनैवेति ज्ञापयितुं **संयोगविशेषसचिवास्तन्तव** इति तन्तुदृष्टान्त उक्तः । तेषां पटाकारेण परिणामेऽपि तन्तुत्वानपायात् । न तु मृत्पिण्डदृष्टान्तः । तत्र मृत्पिण्डत्वापायेनैव परिणामादिति बोध्यम् । यदि विशिष्टस्य विशेष्येण अभेदः तदा

पर्वतपदेनापि अग्निमान् प्रतीयेत । अग्निमत्पदेन वा पर्वतमात्रम् । एवञ्च व्यवहारसाङ्कर्यं स्यात् । ननु भेदस्यापि सत्त्वात् न साङ्कर्यमिति चेन्न । तस्याप्यभेदवद् वस्तुस्वरूपभूतत्वात् तथाच नाभेदो कर्तुं शक्य इत्याशङ्कामर्धाङ्गीकारेण परिहरति **तत्र यद्यपीति** ।

**शे०वा०—** ननु 'अस्मत्पक्षे विशेषस्ये'त्युत्तरवाक्यमनर्थकम् । न च स्वमते विशिष्टादिनिरूपणे दोषाभावोपदर्शनार्थं तदिति वाच्यम्, तदुपदर्शनस्याप्यनर्थकत्वात् । न च विशिष्टादिनिरासकन्यायस्य स्वव्याहतत्वेन जात्युत्तरत्वशङ्कानिरासार्थत्वान्न तदिति वाच्यम् । सिद्धान्ते विशिष्टादेरनङ्गीकारेणैव तन्निरासकन्यायस्य स्वव्याहतत्वाभावसिद्ध्या जात्युत्तरत्वशङ्काया अनवसरग्रस्तत्वादित्यतः स्वमते विशिष्टादेरङ्गीकरणीयत्वोपपादनेन जात्युत्तरत्वशङ्कामुत्थाप्य तन्निरासाय स्वमते विशिष्टादिनिरूपणे दोषाभावोपदर्शकतयोत्तरवाक्यं योजयितुं विशिष्टादिनिरासकन्यायस्य स्वव्याहतत्वशङ्कामुत्थापयति **नन्वेतदिति । न तन्मात्रमिति** । तथा सति तच्छब्दयोः पर्यायत्वादिप्रसङ्गादिति भावः । किन्त्वित्यतः क्वचिद्विशेष्येणात्यन्ताभिन्नं क्वचिच्च भिन्नाभिन्नमिति वैलक्षण्यं वक्तुमत्यन्ताभेदावच्छेदकं भेदाभेदावच्छेदकं च तद्विभागकथनमुखेनाह **द्विविधो हीत्यादिना** ।

**विशेषणसम्बन्ध इति** । विशिष्टाकार इत्यर्थः । तथाभूत इत्यस्यैव विवरणं **विशेष्येणात्यन्ताभिन्न इति । अपर्यायशब्दप्रवृत्त्यनुपपत्तिरिति** । सहप्रयोगानुपपत्तिरित्यर्थः । आदिपदेन पदान्तरवैयर्थ्यप्रसङ्गपरिग्रहः । नन्वीश्वरस्य सार्वज्ञादिविशिष्टेन कुतोऽत्यन्ताभेदो येन विशेषमाश्रित्य तत्रोक्तदोषपरिहार उपपद्यते इत्यतः किमत्राभेद एव माऽस्त्वित्यभिप्रायः किंवा भेदोऽप्यास्तामिति विकल्पं मनसि निधाय तादात्म्यव्यवस्थापकतया क्लृप्तसामानाधिकरण्येनाभेदस्य सिद्धत्वान्नाद्य इत्याह **ईश्वर एवेति** । द्वितीयं दूषयति **भेदे त्विति** । येन सोऽपि स्वीकरिष्यत इति भावः । ननु व्यपदेशभेदादिरूपं साधकं प्रमाणमिहाप्यस्त्येवेति कथं तदभाव इत्यत उक्तं **निरवकाशमिति** । तस्मिन्सत्यप्यसत्त्वरूपमित्यर्थः । व्यपदेशभेदादिकमन्यथासिद्धत्वान्न भेदसाधकं किन्तु अनन्यथासिद्धत्वात् तस्मिन्सत्यप्यसत्त्वमेव, तच्चात्र विशिष्टाकारस्य यावद्विशेष्यभावित्वान्नास्तीति नाप्रामाणिकभेदस्वीकारो युक्त इति भावः ।

**वस्तुनः स्वरूपभूताविति** । तदत्यन्ताभिन्नावित्यर्थः । वस्तुना तयोर्भेदस्य भेदाभेदस्य वाऽनवस्थाग्रस्तत्वेनासम्भवादिति भावः । **न सङ्कर इति** । भेदाभेदयोर्वस्तुनाऽत्यन्ताभिन्नत्वे एकेन वस्तुनाऽत्यन्ताभिन्नयोर्भेदाभेदयोरपि यद्यदत्यन्ताभिन्नेनात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नमिति व्याप्तिबलेनात्यन्ताभेदापत्त्या भेदस्याप्यभेदत्वमभेदस्यापि भेदत्वमित्येवंरूपः सङ्करो नेत्यर्थः । उपलक्षणमेतत् । भेदाभेदशब्दयोर्न पर्यायत्वप्रसङ्ग इत्यपि द्रष्टव्यम् । कथमेतदित्यतः प्रकृतोपयोगितया तद्व्याचष्टे **अत्यन्तेति** ।

**वा०र०— किन्त्वित्यत इति** । यदि न विशेष्यमात्रं किं तर्हीत्यत इत्यर्थः । अनेन द्विविधो हीत्यतः प्राक् किन्त्विति पूरणीयमिति सूचितम् । अत्र टीकायां द्विविधो हीत्यादिनेत्यतः परं न केवलमिदमेवोदाहरणमपि

त्वेवं रूपाणि बहूनीति दर्शयितुं विशिष्टाकारस्य यावद्विशेष्यभावित्वावच्छेदकं च दर्शयति **एवं यत्रेति** । **विशेषणसम्बन्ध इति** । विशिष्टाकारप्रयोजक इति शेषः । यद्विशेषणसम्बन्धाधीनो यो विशिष्टाकारः स विशेषणसम्बन्ध इति यावत् । **विशिष्टाकारोऽपीति** । तद्विशेषणसम्बन्धाधीन इति शेषः । **तथाभूत इति** । यावद्विशेष्यभावीत्यर्थः । तत्त्वादेव च विशेष्येणात्यन्ताभिन्न इति योज्यम् । **विशेष इति** । विशिष्टाकार इत्यर्थः । तथाभूत इत्यस्यैव विवरणं विशेष्येणात्यन्ताभिन्न इत्यप्याहुरित्येतावत् ग्रन्थपाठः । **तत्रेदमेवेति** । तावन्मात्रस्यैवोदाहरणतया प्रदर्शनादादिपदादेरप्रयोगाच्च तथा प्रतीतिः स्यात्, तां वारयितुमुदाहरणबाहुल्य-प्रदर्शनस्यावश्यकत्वादिति भावः । **बहूनीति** । ईश्वरः स्वरूपेणैव सर्वकर्तेत्यादीनि पटादितत्तत्पदार्थस्वरूपे रूपादितत्तद्धर्मवानित्यादीनि चेत्यर्थः । **अवच्छेदकं चेति** । विशेषणसम्बन्धस्य यावद्विशेष्यभावित्वावच्छेदक-त्वकथनेनेश्वरेऽप्यनेकादिविशिष्टेनायावद्विशेष्यभाविनात्यन्ताभेदराहित्यस्येश्वरवदन्यत्रापि नित्यानित्यसाधारण्येन यावद्विशेष्यभाविविशिष्टेन विशेष्यस्यात्यन्ताभेदसत्तायाश्च सूचनादिति भावः । यत्किञ्चिद्विशेषणसम्बन्धस्य यावद्विशेष्यभावितया तत्सम्बन्धानधीनविशिष्टाकारस्य यावद्विशेष्यभाविता नायातीत्यतो विशेषणसम्बन्धादिकं विशेषरूपेण व्याकर्तुं शेषं पूरयंस्तात्पर्यं चाह **विशिष्टाकारेत्यादिना** । विशेषणसम्बन्धस्य यावद्विशेष्यभावि-त्वादेव विशेषणात्यन्ताभिन्नश्चेति प्रतीतिनिरासायाह **तत्त्वादेव चेति** । यावद्विशेष्यभावित्वादेव चेत्यर्थः । आद्यो विशेष्येणात्यन्ताभिन्न इत्युक्तिमनुरुध्य प्रसक्तव्याख्यानमनुवदति **तथाभूत इत्यस्यैवेति** । आहुरित्यस्वरस-सूचनम् । तद्बीजं तु विशिष्टाकारयावद्विशेष्यभाविताप्रयोजकत्वेन विशेषणसम्बन्धस्य यावद्विशेष्यभावित्वस्य कथनात् तत्प्रयोज्यतया विशिष्टाकारीययावद्विशेष्यभाविताया एव तथाभूत इत्येतदर्थत्वेन वाच्यतया विशेष्येणा-त्यन्ताभेदार्थकत्वप्राप्तेः पुनरुक्त्यनवकाशेन विवरणत्वाश्रयणायोगः । विशेषणसम्बन्धसमुच्चायकविशिष्टाकारो-ऽपीत्यपिशब्दायोगश्चेतीति द्रष्टव्यम् । अत्र प्रकरणे अंशिनोंऽशैरभेदोऽयमित्येतत्पूर्वभाष्यमूलटीकाविचारावसरे अस्माभिरत्यन्ताभेदादिस्थले उपपादनं कृतमस्ति तदेतद्ग्रन्थावनुगुणतया योजनीयोऽस्ति ।

अपर्यायशब्देत्यादिकं सम्बन्धप्रदर्शनपूर्वकं प्रतीकतयोपादाय व्याचष्टे **अपर्यायेत्यादिना** । अनेन प्रवृत्त्यनुपपत्त्यादिर्दोष इत्यादिपदादिकं योजितं भवति । तथा च प्रवृत्त्यनुपपत्तिरादिपदोक्तो वैयर्थ्यप्रसङ्गश्चेत्येवं-रूपो दोषो नास्तीति मूलार्थः फलित इत्यभिप्रेत्य तदनुसारेणानुपपत्तिरित्यादौ विभक्तिप्रयोगान्न दोषः । **इति विकल्पमित्यत्र** आवृत्त्यादिकं बोध्यम् । **तादात्म्यव्यवस्थापकतयेति** । नीलो घट इत्यादौ तथात्वेन क्लृप्ते-त्यर्थः । **अनवस्थेति** । तथा चैतत्तथा शून्याधिकरणे स्पष्टीभविष्यति । **यद्यदत्यन्ताभिन्नेनेति** । ननु च गुणा-दीनामाश्रयणेत्याद्यन्यथाख्यातिस्थलीयमूलानुसारेण यावद्द्रव्यभाविरूपादिस्थले परस्परमन्त्यताभेदस्यापि सत्त्वेन तत्रैवोक्तव्याप्तिग्रहादिति भावः । प्रपञ्चितं चैतत् प्राक् अंशिनोंऽशैरित्येतद्भाष्यमूलटीकाव्याख्यावसरे ।

**स०व्र०— न सङ्करदोष इति** । भेदाभेदयोर्वस्तुस्वरूपत्वे भेदस्याभेदत्वम् अभेदस्य भेदत्वमिति सङ्कर इति न वाच्यम् । विशेषेण तत्परिहारोपपत्तेरिति भावः ।

**विठ्ठल०— तावद्दोषाभावमिति** । जनेर्निरूपणेऽपि दोषाभावोक्तिपरतयाऽप्यस्मदित्यादेः व्याकरिष्यमाणत्वात् तावच्छब्दः । विशिष्टाकारस्य विशेष्यतन्मात्रत्वाभावे विशेष्यमित्युक्तिरयुक्तेत्यतो यावद्विशेष्यभाविस्थले ततोऽभिन्नत्वेऽपि न विशेषणत्वं विशिष्टाकारस्य किन्तु तद्विशेष्यत्वम् । अयावद्विशेष्यभाविस्थले तु विशिष्टविशेष्ययोर्भेदाभेदसद्भावाद्विशिष्टाकारो 'विशेष्यमिति न च तन्मात्रमिति' चोक्तमित्याशयेनाह **द्विविधो हीति** । किमपर्यायशब्दप्रवृत्त्याद्यर्थं विशेषस्वीकारेण, भेद एव किं न स्यादित्यत आह **ईश्वर एव सर्वज्ञ इति** । अग्निमतो विशिष्टाकारस्य भेदाभेदव्युत्पादनाय विशेष्योपादानत्वमुपपादयति **यथा हीति** । ननु भेदाभेदयोर्वस्तुनो भिन्नत्वे भिन्नाभिन्नत्वे वा तत्रापि भेदादिप्रसङ्गेनानवस्था अतस्तयोरेकवस्तुस्वरूपत्वं वक्तव्यम् । तथा च तयोरैक्यं वा परस्परकार्यकारित्वं वेति सङ्करदोषप्रसङ्ग इत्यत आह **तत्र यद्यपीति** ।

**चषक— सर्वज्ञः** सर्वपदार्थगोचरस्वरूपप्रज्ञप्तिविशिष्टः । **यथाभूतो** यावद्विशेष्यभावी । **न सङ्करदोषः** । अपर्यायशब्दप्रवृत्त्याद्यनुपपत्तिदोषः ।

**॥ इति प्रथमप्रकारः ॥**

* * *

**॥ अथ तत्र ततो द्वितीयप्रकारः ॥**

२७२ **सु०— यद्वा क्वचिद्** इति औपाधिकादित्रय इत्यर्थः, तस्याप्युक्तप्रकारत्वात् ।

एतेन भेदहीनेऽप्याकाशादावौपाधिको भेदो दृष्ट इत्य(प्य)पास्तम्, विशेषनिबन्धनानामेवाकाशाद्यंशानां घटाद्युपाधिभिः स्फुटीकरणादिति ।

जनिनिरूपणे दोषाभावं स्वमते दर्शयति **अस्मदिति** । **विशेषस्य** परिणामस्य, जनित्वेन **अङ्गीकृतत्वतो न कश्चिद् दोषोऽस्ति** इति योजना । मृदादीनां घटाद्याकारापत्तिरेव घटादिजनिर्न तु समवाय इत्यर्थः ।

**परि०— त्रय इति** । औपाधिकविशिष्टोपलक्षितरूपत्रय इत्यर्थः । **स्वमते विशिष्टादिपदार्थस्थित्युक्तिः** ॥

**वं०प०— उक्तप्रकारत्वादिति** । औपाधिकादिकं द्विविधम् । तत्र यावद्विशेष्यभावि चेद्विशेष्येणात्यन्ताभिन्नं न चेद्भिन्नाभिन्नमित्युक्तप्रकारत्वादित्यर्थः । **एतेनेति** । विशेषस्य सर्वत्राङ्गीकृतत्वत इत्यनेन ।

**औपाधिको** भेद इत्यर्थः । **दृष्ट इतीति** । तथा च तद्वद्भेदहीनेऽपि समवाये औपाधिको भेदो जायत इति नोक्तसिद्धसाधनत्वदोष इत्यर्थः । स्यादिदं यदि भेदहीनेऽप्याकाशे उपाधिना भेदो जायेत । न चैवम् । अंशादिना अत्यन्ताभिन्नेऽप्यव्याकृताकाशे उपाधिना भेदो जायेत । न चैवम् । अंशादिनाऽत्यन्ताभिन्नेऽप्यव्याकृताकाशे भेदप्रतिनिधिविशेषनिबन्धना अनेकेंऽशाः सन्ति । त उपाधिभिर्ज्ञाप्यन्त एव । न ह्येवं समवाये भेदोऽस्ति । य उपाधिभिर्ज्ञाप्येत । अतो दृष्टान्तोऽसम्प्रतिपन्न इत्युक्तदोषतादवस्थ्यमेवेत्याह **विशेषेति** । एतदुपपादनं च 'खेऽपि देशान्तरस्य सः । ज्ञापको विद्यमानस्ये'त्यन्यत्र स्पष्टम् । अनेन स्वभावतोऽभिन्ने गगनादावौपाधिकभेद-दर्शनादिति पूर्वपक्षसमयोक्तं निरस्तं भवति । **स्फुटीकरणात्** ज्ञापनादित्यर्थः ।

**कं०रा०— औपाधिकादीति** । औपाधिकविशिष्टोपलक्षितरूपत्रय इत्यर्थः । **तस्यापीति** । औपा-धिकादित्रयस्याप्ययावद्विशेष्यभावित्वे विशेष्येण सह भिन्नाभिन्नत्वेन यावद्विशेष्यभावित्वे त्वभिन्नत्वेनोक्तप्रकार-त्वादित्यर्थः । भेदहीनेऽप्याकाशादावौपाधिकभेदस्य दृष्टत्वाद्भेदहीने समवायेऽपि तद्वदौपाधिकभेदोऽस्त्विति चोद्यं निराकरोति **एतेनेति** । एतच्छब्दपरामृष्टं हेतुमाह **विशेषेति** । **स्फुटीकरणादिति** । तथा च आकाशे उपाधिना क्रियमाणस्य भेदस्याभावेन तद्दृष्टान्तेन समवाये औपाधिकभेदोक्तेरयुक्तत्वादुक्तं चोद्यमपास्तमिति भावः ।

**श्रीनिधि०— तस्याप्युक्तप्रकारत्वादिति** । क्वचिदत्यन्ताभिन्नत्वात् क्वचित् भिन्नाभिन्नत्वादित्यर्थः । **विशेषस्य परिणामस्येति** । अत्र व्याख्यानं **सर्वत्रेति** । सर्वकार्येषु ।

**शे०वा०—** विशिष्टस्वरूप एवावान्तरभेदविवक्षया तत्तात्पर्यवर्णनं न स्वरसं, 'विशिष्टादिनिरूपणे दोषभावं स्वमते दर्शयति' इत्येतत्तात्पर्यकथनविरुद्धं चेत्यरुच्या प्रकारान्तरेण व्याचष्टे **यद्वेति** । नन्वाकाशे औपाधिकभेदस्य स्वयमप्यङ्गीकारात् समवायस्यौपाधिकभेदनिराकरणं स्वव्याहतमित्यत आह **एतेनेति** । एतेने-त्युक्तमेव विशदयति **विशेषेति** ।

**वा०र०—**'नन्वाकाश' इत्यत्र आकाशपदं उपलक्षणम् ।

**विठ्ठल०— त्रय इति** । औपाधिकविशिष्टोपलक्षितत्रय इत्यर्थः । **उक्तप्रकारत्वादिति** । औपाधि-कादेरत्यन्ताभेदेन भेदाभेदाभ्यां चोपहितपुरुषाद्यभिन्नत्वादित्यर्थः । यच्चोक्तं स्वभावतो अभिन्ने गगनादौ औपा-धिकभेददर्शनात् समवाये औपाधिक एव भेदोऽभ्युपगत इति तदप्येतेन विशेषाभ्युपगमेन निरस्तमित्याह **एतेनेति** । तत्रापि भेदासम्मतेरिति भावः ।

**॥ इति द्वितीयप्रकारः ॥**

**॥ इति स्वमतानुसारेण विशिष्टादिपदार्थनिरूपणे द्वाभ्यां प्रकाराभ्यां दोषाभावदर्शनम् ॥**

* * *

२७३ **सु०**— "स्यादेतत् । क्वचिद्भावो विशेष्यो विशिष्टाकारश्चाभावो दृश्यते, यथा 'घटो न जानाति, प्रकृतिर्न कर्त्री'ति । क्वचिच्चाभावो विशेष्यो विशिष्टाकारश्च भावः प्रतीयते, 'अभावोऽस्ति, अभावः प्रमेय' इति । न च विधिनिषेधात्मनोर्भावाभावयोरभेदो युज्यते । तत्कथं विशेष्याभिन्नं विशिष्टमुच्यत" इत्यत आह **भावो हीति** ।

अनु०— भावो ह्यभावश्च स एव हि ।

'क्वचिदि'त्यनुवर्तते । यो **भावः स एव** क्वचिद् **अभावो** भवति, यश्च **अभावः स एव** क्वचिद् **भावो** भवतीत्येतदुभयं प्रसिद्धमेवेत्यर्थः । वाक्यार्थद्वयप्रसिद्धिद्योतनार्थं **हि**शब्दद्वयम् ।

तत्कथमित्यत आह **अभावस्य चेति** ।

अभावस्य च धर्माः स्युर्भावास्तेषां च तेऽखिलाः ।

अस्ति तावदिदं यद् **अभावस्य** अपि **भावा धर्माः स्युः** तथा **तेषां च** भावानां **च ते** अभावा धर्माः **स्युः** इति । **अखिला** इति बहुत्वोपलक्षणम् ।

एतदपि नाङ्गीकरोमीत्यत आह **प्रत्यक्षेति** ।

प्रत्यक्षमानतः सर्वमेतन्नो वारणक्षमम् ।

**प्रत्यक्ष**ग्रहणमुपलक्षणार्थम् । यस्मादभावस्यापि भावा धर्माः सन्ति भावस्य चाभावा इति **एतत्सर्वं प्रत्यक्षादिप्रमाणतः** सिद्धम् । अतो न वारयितुं शक्यम् ।

**परि०— घटो न जानातीति** । ज्ञानकर्तृत्वाभावविशिष्ट इत्यर्थः । **न कर्त्रीति** । कर्तृत्वाभाववतीत्यर्थः । विशेषणस्याभावत्वे च तत्सम्बन्धाद्विशेष्यमभावाद्यात्मकविशिष्टाकारतया परिणमत इति विशिष्टाकारोऽभावो भाव इति चोक्तमिति ज्ञेयम् । स एवेति तच्छब्दश्रवणादाह **यो भाव इति** । **यश्चाभाव इति** । सर्वत्र घटतदभावादावपि नाभेद इति सूचनाय क्वचिदित्युक्तम् । विवरिष्यते चैतत्प्रत्यक्षादिप्रमाणत इत्येतद्व्याख्याने । **वाक्यार्थद्वय इति** । यो भाव इति यश्चाभाव इत्युक्तवाक्यार्थद्वय इत्यर्थः ।

**यादु०— घटो न जानातीत्यादि** । नन्वत्र ज्ञानादिमदन्योन्याभावविशिष्टो घटादिः प्रतीयते । तत्र विशिष्टाकारो घटादिविशेष्याभावरूप एव विशेषणीभूतोऽन्योन्याभावरूपोऽतः कथमिदं विशिष्टाकारस्याभावरूपताप्रदर्शनायोदाहरणमिति चेत् । उच्यते विशेषणीभूतान्योन्याभावस्य विशेष्येण घटादिना अत्यन्ताभिन्नत्वात् तदात्मकस्य विशिष्टाकारस्य अभावरूपता युक्तैव । अत एव पर्युदासस्थलेऽन्योन्याभावविशिष्ट एव नञः शक्तत्वेन तदेव निषेधधीगोचर इति सिद्धान्तः । निषेधधीगोचर एवाभाव इति च । अतो न किञ्चिदत्रानुपपन्नमिति । विशिष्टाकारस्य विशेषणघटितमूर्तिकत्वात् प्रकृते चाभावस्य विशेषणत्वात् तद्घटितमूर्तिको विशिष्टाकारोऽप्यभावात्मैवेत्यप्याहुः ।

**वं०प०—** अभावस्याखिला धर्मा भावाः स्युर्भावानां चाखिला धर्मा अभावरूपा इत्युक्तम् । न हि अभावे स्थिताः सर्वे धर्मा भावरूपाः । अज्ञातृत्वादीनां तदभावात् । न वा भावे स्थिताः सर्वे धर्मा अभावरूपाः । ज्ञेयत्वादेस्तदभावादित्यत आह **अखिला इतीति** ।

**श्रीनिधि०—** यथा घटो न जानाति प्रकृतिर्न कर्त्रीति । नन्वत्र कथमभावस्य विशिष्टत्वम् । ज्ञानकर्तृत्वयोरभावस्य विशेषणत्वात् धर्मिणा भेदभावाच्चेति चेदुच्यते । नात्र नञा संसर्गाभावः उच्यते । किन्तु ज्ञानकर्तृत्ववदन्योन्याभाव एव । सोऽपि विशेषणमेव न विशिष्टमिति चेन्न । अन्योन्याभावस्य धर्मिस्वरूपत्वात् । तदभिन्नेन विशेष्येणाभिन्नं विशिष्टमपि अभाव एवेति न किञ्चिदनुपपन्नम् । **क्वचिदित्यनुवर्तत इति** । भावाभावयोरैक्ये घटस्यापि स्वाभावात्मकत्वं स्यादित्यत एवमुक्तम् । यत्र प्रमाणमस्ति तत्रेत्यर्थः । **वाक्यार्थद्वयेति** । अभावस्य भावत्वं भावस्याभावत्वमित्येवंरूपवाक्यार्थद्वयेत्यर्थः । **अखिला इति बहुत्वोपलक्षणमिति** । गोत्वघटत्वादीनां अभावेऽभावात् अभावत्वप्रध्वंसत्वादीनां च भावे अभावात् कथमखिला इत्युक्तिरित्यत एवमुक्तं **उपलक्षणार्थमिति** । प्रमाणान्तरस्येति शेषः । उपलक्षितमेच दर्शयति **प्रत्यक्षादिप्रमाणत इति** । प्रत्यक्षग्रहणेन तन्मात्रसिद्धत्वभ्रमं वारयितुमेवमुक्तम् ।

**शे०वा०—** ननु भावो ह्यभावश्चेत्यादिना भावस्यैव क्वचिदभावत्वमभावस्यैव क्वचिद्भावत्वमित्युच्यते तदनर्थकम् । न च भावाभावयोरैक्योपदर्शनार्थं तदिति वाच्यम् । तदुपदर्शनस्यापि प्रकृतानुपयुक्तत्वेनानर्थ-

क्यात् । न च प्रागुक्तस्य विशेष्यविशिष्टाकारयोरभेदस्योपपादकतया प्रकृतोपयोगसम्भवान्नानर्थक्यं तस्येति वाच्यम् । ईश्वरसार्वज्ञयोर्वा पर्वताग्निमतोर्वा ऐक्यस्य भावाभावैक्यानपेक्षत्वेन तस्य तदुपपादकत्वासम्भवादित्यतो यत्र विशेष्यस्य विशिष्टाकारस्य च भावरूपता यत्र तदुभयस्याभावरूपताऽस्ति तत्र भावाभावयोरैक्यस्य विशेष्यविशिष्टाकारयोरैक्यस्यानुपपादकत्वेऽपि यत्र विशेष्यविशिष्टयोर्मध्येऽन्यतरस्याभावरूपत्वमन्यतरस्य भाव-रूपत्वं तत्र तयोरैक्योपपादकत्वसम्भवाद्भावाभावयोरैक्यव्युत्पादनस्य प्रकृतोपयोगान्न तदानर्थक्यमित्यभिप्रेत्य तदुपपादकतयोत्तरवाक्यं योजयितुमुदाहरणविशेषनिष्ठतया विशेष्यविशिष्टाकारयोरैक्यानुपपत्तिशङ्कामुत्थापयति **स्यादेतदिति । यथा घटो न जानातीत्यादि** । नन्वत्र ज्ञानादिमत्प्रतियोगिकान्योन्याभाववानेव विशिष्टाकारः प्रतीयते । स च भाव एव । तद्विशेषणीभूतोऽन्योन्याभाव एव स चाभावरूपः । तत्कथमिदं विशिष्टाकारस्या-भावरूपताप्रदर्शनायोदाहरणमिति चेत् । उच्यते । विशिष्टाकारस्य विशेषणघटितमूर्तिकत्वाद्विशेषणस्यान्योन्या-भावस्याभावतायां तद्घटितविशिष्टाकारस्याप्यभावत्वमेव । विशेषणभावाभावत्वयोरेव विशिष्टाकारस्य भावाभाव-त्वयोस्तन्त्रत्वात् । वस्तुतस्तु यथा घटः पटो न भवतीत्यत्र पटात्मको नेति प्रतीतेस्तत्र पटतादात्म्यनिषेध-रूपेऽन्योन्याभाव एव नञ् । अत एवान्योन्याभावस्य मृद्घट इतिवद्घटसामानाधिकरण्येनाभेदस्यैव भानात् तदभेदस्य प्रत्यक्षत्वोपपादनं ग्रन्थान्तरीयं सङ्गच्छते । तथा घटो न जानातीत्यादावपि घटो ज्ञानवदात्मको नेति प्रतीतेरत्र ज्ञानवत्तादाम्यनिषेधरूपेऽन्योन्याभाव एव नञ् । तथाच अत्र ज्ञानवत्तादात्म्यनिषेधरूपोऽन्योन्याभाव एव विशिष्टाकार इति युक्तैव विशिष्टाकारस्याभावत्वोक्तिरिति ध्येयम् । कुतो भावाभावयोरभेदायोग इत्यतो विरुद्ध-स्वभावत्वादिति हेतुमभिप्रेत्य तत्साधकं हेतुमाह **विधिनिषेधात्मनोरिति** । तर्हि घटस्यापि स्वाभावत्वप्रसङ्ग इत्यत आह **क्वचिदित्यनुवर्तत इति** । तथा च यत्र धर्मधर्मिभावः प्रमितस्तत्रैव भावस्याभावत्वाश्रयणान्नाति-प्रसङ्ग इति भावः । 'यो भावः स एवाभाव' इति यथास्थितयोजनायां यत्र भावो विशेष्यो विशिष्टाकारश्चा-भावस्तत्र विशेष्यविशिष्टयोरभेदमात्रोपपादकत्वलाभाद्यत्राभावो विशेष्यो विशिष्टाकारश्च भावः तत्राभेदोपपादक-त्वालाभान्नोक्ताक्षेपपरिहारकत्वमस्य ग्रन्थस्येत्यतस्तत्सिद्ध्यर्थम् 'अभावस्य च धर्माः स्युः' इत्युत्तरग्रन्थं मनसि निधाय उभयथा वाक्यं योजयति **यो भाव इत्यादिना** । प्रत्यक्षादिप्रमाणत इत्युत्तरवाक्यं मनसि निधायाह **प्रत्यक्षग्रहणमुपलक्षणार्थमिति** ।

**वा०र०— भावरूपतेति** । अस्तीत्युत्तरेण सम्बन्धः । **विशेषणभावाभावत्वयोरेवेति** । विशेषणस्य ये भावत्वाभावत्वे तयोरिति षष्ठी । भावाभावत्वयोरिति सप्तमी । भावाभावत्वप्रतीताविति यावत् । अभावरूप-विशेषणघटितत्वेनाभावत्वमित्याश्रयणे पारिभाषिकमभावत्वमिति स्वीकारापत्तिरित्यत आह **वस्तुतस्त्विति** । **अन्योन्याभाव एवेति** । न त्वन्योन्याभाववतीत्यवधारणार्थः । तर्हि पटतादात्म्यनिषेधः पट इति बोधापत्ति-रित्यत इष्टापत्तिरित्येतदन्यसम्मत्यैवाह **अत एवेति** । **ग्रन्थान्तरीयमिति** । विशिष्य भेदखण्डनोद्धारन्यायामृत-स्थमित्यर्थः । अभेदमात्रोपपादकत्वाभावेऽपीति स्वरसः पाठः । **उपपादकत्वालाभादिति** । यद्यपि भावा ह्यभावश्चेति वाक्यमुभयपरतया योजयितुं शक्यमित्येतल्लाभोऽपि सम्भवत्येव । चशब्दस्तु समुच्चायक

उभयपरत्वेन योजनायां ज्ञापकोऽस्ति । अत एव परिहारेऽभावस्य चेत्युत्तरानुव्याख्यानस्य ज्ञापकत्वमनावश्यकं न कथनीयम् । तथापि चशब्देनैवोक्तार्थसमर्पणस्यैव मूलेऽभिधानात् भावविशेष्यकाभावविशिष्टाकारपक्ष एव चशब्दस्य भावत्वाभावत्वयोः समुच्चायकत्वेनोपपत्त्या द्वितीययोजनाज्ञापकत्वेन विनैव वाक्यार्थप्रत्ययोपपत्त्या वक्ष्यमाणज्ञापकस्यैव द्वितीययोजनानियामकत्वमङ्गीकार्यमित्याशयः ।

**विठ्ठल०— घटो न जानातीति** । ननु न जानातीत्यस्य ज्ञानाभावविशिष्ट इत्यर्थकत्वाद्विशेषणस्याभावत्वेऽपि विशिष्टाकारस्य भावत्वमेवेति चेन्न 'पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्' इत्युक्तेरत्र नञः पर्युदासत्वेन ज्ञानान्योन्याभावविशिष्ट एव न जानातीत्यनेनोच्यते । तथाप्यन्योन्याभावो विशेषणमेव । न तु विशिष्टस्याभावत्वं तत्कथं क्वचिदभावो विशिष्टाकार इत्यस्योदाहरणतया घटो न जानातीत्युच्यत इति चेत् । उच्यते । अन्योन्याभावो नाम भेद एव । स च धर्मिस्वरूपभूत इति निर्णीतम् । तथा च ज्ञानादिमदन्योन्याभावस्य धर्मिभूतविशिष्टेनात्यन्ताभिन्नत्वाद्युक्तमुदाहरणमिति । स एवेति तच्छब्दश्रवणादाह **यो भाव इति** । **वाक्यार्थद्वयेति** । यो भावः स एव क्वचिदभावः, यश्चाभावः स एव क्वचिद्भाव इत्युक्तवाक्यार्थद्वयेत्यर्थः ।

**चषक— न जानातीति** । ज्ञाननिरूपिताश्रयतारूपकर्तृत्वाभावविशिष्ट इत्यर्थः । **न कर्त्री** कर्तृत्वावच्छिन्नप्रतियोगिताकभेदविशिष्टा । **अस्ति** किञ्चिन्निरूपिताधेयताविशिष्टः ।

* * *

**।। अथ च तत्राप्यादौ तत्प्रमाणसिद्धत्वात् सर्वभावाभावानां अभावभावत्वानुपपत्त्यभावः ।।**

**२७४ सु०—** अस्त्वभावभावयोर्भावाभावधर्मवत्त्वम्, तथाऽपि 'भावस्याभावत्वमभावस्य च भावत्वं क्वचिदस्ती'त्यत्र किमायातमित्यत आह **सर्व इति** ।

## अनु०— सर्वे भावा अभावाश्च पदार्थास्तेन सर्वदा ।

यतोऽभावभावयोर्भावाभावधर्मवत्त्वं सिद्धम्, सिद्धश्च धर्मधर्मिणोरभेदः, **तेन** कारणेन **सर्वे भावाः पदार्था अभावाश्च** भवन्ति, **अभावाश्च सर्वे पदार्था भावा** भवन्ति, इत्युक्तमुपपन्नमित्यर्थः ।

**।। इति तत्प्रमाणसिद्धत्वात् सर्वभावाभावानां अभावभावत्वानुपपत्त्यभावः ।।**

* * *

**॥ अथ च तत्र ततो भावाभावयोः अभावभावधर्मत्वानुपपत्तौ द्रव्यादिर्भाव एव प्रागभावादिरभाव एव इति प्रसिद्धभावाभावविभागस्य गतिप्रदर्शनम् ॥**

२७५ **सु०—** 'यद्येवं भावस्याप्यभावत्वमभावस्य च भावत्वं, तर्हि द्रव्यादयो भावा एव प्रागभावादयस्त्वभावा एवेति सर्वत्र प्रसिद्धो भावाभावविभागः कथमि'त्यत आह **तथाऽपीति** ।

**अनु०—** तथाऽपि प्रथमं बुद्धेर्यो निषेधस्य गोचरः ।
सोऽभावो विधिबुद्धेस्तु गोचरः प्रथमं परः ॥

**निषेधस्य बुद्धेः** इति सामानाधिकरण्यम् । **परो** भावः । यद्यप्येषोऽर्थः **प्रागेवोक्तः** तथाऽपि प्रसङ्गात् पुनः स्मारित इत्यदोषः ।

**परि०—** निषेधो नामाभावः । तथा च अभावविषयकबुद्धेर्विषयोऽभाव इत्युक्तावात्माश्रयत्वं अत आह **निषेधस्य बुद्धेरिति सामान्याधिकरण्यमिति** । बुद्धेर्निषेधात्मकत्वं नाम नञर्थघटितत्वम् । 'पर' इत्यनुवादः । 'भाव' इति व्याख्या । **प्रागेवोक्त इति** । युक्तिपादे 'असदिति चेन्न प्रतिषेधमात्रत्वादि'ति नये 'प्रतिषेधात्मकत्वं तु भावस्याभावधर्मतः । धर्मधर्म्यैक्यतश्चैव न तु तन्मात्रता भवेदि'त्यादिना 'निषेधविधिरूपत्वं भावाभावत्वमत्र ही'त्यन्तेन ग्रन्थेनोक्त इत्यर्थः ।

**यादु०—** आत्माश्रयपरिहारायाह **निषेधस्येति** । परप्रतिक्षेपरूपाया इत्यर्थः । एवं मूले विधिबुद्धेरित्यत्र परप्रतिक्षेपानात्मकबुद्धेरित्यर्थो ज्ञातव्यः । अतो न तत्रात्माश्रयत्वमिति ध्येयम् । **प्रागेवोक्त इति** । युक्तिपादे 'प्रथमप्रतिपत्तिषु । निषेधविधिरूपत्वं भावाभावत्वमत्र ही'त्यत्रैवोक्त इत्यर्थः ।

**वं०प०—** निषेधस्याभावस्य बुद्धेर्विषयोऽभावः । भावबुद्धिविषयो भाव इत्यात्माश्रयापत्तेः अत आह **सामानाधिकरण्यमिति** । अनेन निषेधरूपत्वं बुद्धौ स्वाभाविकमेव नाभावविषयकत्वप्रयुक्तम् । स्पष्टत्वसाक्षात्त्ववत् । अतो नात्माश्रय इत्याशयः ।

**कं०रा०—** तथापि 'प्रथमं बुद्धेर्यो निषेधस्य गोचरः सोऽभाव' इत्यत्र निषेधस्य बुद्धेरभावविषयकबुद्धेर्गोचरो यः सोऽभाव इति निषेधबुद्धिशब्दयोर्वैयधिकरण्येन योजनायामात्माश्रयप्रसङ्गः । प्रथमशब्दवैयर्थ्यापत्तिश्चेत्यत आह **निषेधस्येति** । न च वाच्यं बुद्धेर्निषेधरूपत्वाभावात् कथं सामानाधिकरण्यमिति । निषेध-

शब्देन नास्तीत्याकारकत्वस्य विवक्षितत्वात् तस्य च बुद्धौ सम्भवात् एवं 'विधिबुद्धेस्तु गोचरः प्रथमं पर' इत्यत्रापि विधिबुद्धिशब्दयोः सामानाधिकरण्यं बुद्धेर्विधित्वं चास्तीत्याकारकत्वमिति ध्येयम् । **एषोऽर्थ इति** । प्रथमं बुद्धेर्यो निषेधस्य गोचरः सोऽभाव इत्यादिरर्थः । प्राक् 'विशेष्यतैव धर्मित्वं प्रथमप्रतिपत्तिषु । निषेध-विधिरूपत्वं भावाभावत्वमत्र ही'त्यत्रैवोक्त इत्यर्थः ।

**श्रीनिधि०—** ननु निषेधो नामाभावः । एवञ्च निषेधस्य बुद्धेरिति कथिते अभावगोचरबुद्धिगोचरो-ऽभाव इत्युक्तं स्यात् तथा च आत्माश्रय इत्यत आह **निषेधस्य बुद्धेरिति** । निषेधरूपाया बुद्धेरित्यर्थः ।

**शे०वा०—** निषेधस्य या बुद्धिः तस्या इति वैयधिकरण्येऽभावलक्षणेऽभावप्रवेशादात्माश्रयत्वं भवतीत्यतोऽन्यथा व्याचष्टे **निषेधस्य बुद्धेरितीति** । बुद्धेर्निषेधत्वं च नास्तीत्याकारत्वम् । तथा च नास्तीति बुद्धिगोचरत्वमिति लक्षणं पर्यवसितं भवति । उपलक्षणं चैतत् । विधिबुद्धेरिति सामानाधिकरण्यमित्यपि द्रष्ट-व्यम् । अन्यथा तत्रापि विधेर्बुद्धिर्विधिबुद्धिस्तस्या इति वैयधिकरण्याश्रयणे भावलक्षणे भावप्रवेशादात्माश्रयत्व-प्रसक्तेरित्यपि द्रष्टव्यम् । **प्रागेवोक्त इति** । 'प्रथमप्रतिपत्तिषु निषेधविधिरूपत्वं भावाभावत्वमत्र ही'त्यादिना युक्तिपाद उक्त इत्यर्थः । **अदोष इति** । तथाऽपि प्रथमं बुद्धेरित्यस्य ग्रन्थस्य प्रथमप्रतिपत्तिष्विति युक्तिपादीय-ग्रन्थेन पुनरुक्तिलक्षणदोषो नेत्यर्थः ।

**स०व्र०—** आत्माश्रयपरिहारायाह **निषेधस्य बुद्धेरिति सामानाधिकरण्यमिति** ।

**विठ्ठल०— निषेधस्य बुद्धेरिति** । नञर्थोल्लिखिन्या बुद्धेरित्यर्थः । एतेन निषेधस्येति षष्ठ्याः सम्बन्धार्थकत्वे निषेधगोचरबुद्धेर्विषयोऽभाव इति प्राप्त्या आत्माश्रयप्रसङ्ग इति निरस्तं वेदितव्यम् । एवं विधिबुद्धेरित्यत्र नञर्थानुल्लिखितबुद्धेरित्यर्थो ज्ञेयः । **प्रागेवोक्त इति** । युक्तिपादे 'भावस्याभावधर्मतः । धर्मधर्मैक्यतश्चैव न तु तन्मात्रता भवेदि'त्यादिना 'निषेधविधिरूपत्वं भावाभावत्वमत्र ही'त्यन्तेन ग्रन्थेनोक्त इत्यर्थः ।

**॥ इति भावाभावयोः अभावभावधर्मत्वानुपपत्तौ द्रव्यादिर्भाव एव प्रागभावादिरभाव एव इति प्रसिद्धभावाभावविभागस्य गतिप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्रान्ते अभावभावयोर्भावाभावधर्मत्वस्य प्रत्यक्षादिसिद्धतायाः उपपादनम् ॥**

२७६ **सु०—** 'अभावभावयोर्भावाभावधर्मवत्त्वं प्रत्यक्षादिसिद्धमित्युक्तम्, तत्कथमि'त्यत आह **तस्मादिति** ।

अनु०— तस्मात्प्रध्वस्तभेदादि सदित्येवावगम्यते ।

**प्रध्वस्तं प्रध्वंसो भेदः पृथक्त्वम् । आदिपदेन प्रमेयत्वादिग्रहणम् । यस्मादभावस्य** भावधर्मत्वमस्ति, **तस्मादेव** हि **प्रध्वंसाभावादेः पृथक्त्वप्रमेयत्वादिभावधर्मजातमस्त्येवेति अवगम्यते** । 'प्रत्यक्षादिने'ति योजना । प्रध्वंसः प्रागभावाद्वा घटाद्वा पृथक् प्रमेयोऽभिधेयश्चेत्यवगम्यते । अभावस्य (च) भावधर्मानभ्युपगमे तद्विरोधः स्यादिति भावः ।

घटः पटो न भवतीति भावस्यान्योन्याभावधर्मत्वं स्फुटत्वान्न प्रदर्शितम् ।

**यादु०— प्रध्वस्तं प्रध्वंस इति** । भावेऽपि नास्य विधानादिति भावः ।

**श्रीनिधि०—** बुद्धेर्निषेधरूपत्वं नाम नञर्थोल्लेखित्वमेव द्रष्टव्यम् । भावे क्त इति भावेनाह **प्रध्वस्तं प्रध्वंस इति** । एवञ्च प्रध्वस्तस्य भेदादिः प्रध्वंस्तभेदादिरिति विग्रहः उक्तो भवति ।

**शे०वा०—** प्रध्वस्तशब्दस्य कर्मसाधनत्वे प्रध्वस्तघटस्यैव विशेष्यतालाभेनाभावस्य विशेष्यताया अलाभात् तल्लाभायार्थमाह **प्रध्वस्तं प्रध्वंस इति** । नपुंसके भावे क्त इति भावेऽपि क्तविधानादिति भावः । मूले सदित्येवेत्यत्र सदेवेति सम्बन्धमभिप्रेत्य तद्व्याख्यानमस्त्येवेतीति । अभावभावयोर्भावाभावधर्मत्वं कथं प्रत्यक्षादिसिद्धमिति शङ्कापरिहाराय प्रवृत्ते तस्मादिति वाक्येऽभावस्य भावधर्मतासिद्ध्यर्थं तत्प्रदर्शनवद्भावस्याभावधर्मतासिद्ध्यर्थं तत्प्रदर्शनस्याप्यवश्यं कर्तव्यत्वात् तत्प्रदर्शनप्रसक्तां न्यूनताशङ्कामप्रदर्शने निमित्तोक्त्या परिहरति **घट इति** ।

**वा०र०— तत्प्रदर्शनवदिति** । अभावस्य भावधर्मताप्रदर्शनवदित्यर्थः ।

**स०व्र०— प्रध्वस्तं प्रध्वंसः इति** । नपुंसके भावे क्तः, इति वचनादिति भावः ।

**विठ्ठल०— प्रध्वस्तं प्रध्वंस इति** भावे क्त इति भावः । प्रमेयत्वादीत्यत्रादिनाभिधेयत्वग्रहणम् ।

**।। इति अभावभावयोर्भावाभावधर्मत्वस्य प्रत्यक्षादिसिद्धतायाः उपपादनम् ।।**

**।। इति भावाभावयोः अभावभावधर्मत्वस्य क्वचित्प्रमाणसिद्धत्वम् ।।**

**।। इति अभावभावयोर्भावाभावात्मकत्वस्य सामान्यतः प्रसिद्धत्वम् ।।**

* * *

**॥ अथ च तत्र ततो भावाभावयोरभावभावधर्मत्वस्योपपन्नत्वात् विशेष्यविशिष्टयोरभेदोपपत्तिः ॥**

२७७ **सु०—** एवमभावभावयोर्भावाभावात्मकत्वं सामान्यतः प्रसाध्य प्रकृते योजयति **अस्तीति** ।

**अनु०— अस्त्यभावोऽस्ति च ध्वंसो देहाभावश्च भस्मता ।
इत्यादि युज्यते सर्वं**

'तस्मादि'त्यनुवर्तते । यत एवमभावस्य भावत्वं भावस्य चाभावत्वमुपपादितम्, तस्माद् **'अभावोऽस्ति, प्रध्वंसोऽस्ति; देहाभावो, भस्मता'** इत्यभावस्य विशेष्यत्वं भावस्य च विशिष्टत्वं तयोश्चाभेदः, तथा 'घटो न जानाती'ति भावो विशेष्योऽभावश्च विशिष्टाकारः तयोश्चाभेद इत्युक्तं **युज्यत** इत्यर्थः ।

**यादु०— देहाभाव इति** । देहध्वंस इत्यर्थः । भस्मतेत्यत्र देहस्येति शेषः । तथा च देहध्वंसो नाम देहस्य भस्मता भस्मनो भावो भस्मावस्थेत्यर्थः । न चैवं विशेष्यस्य देहाभावस्य भस्मावस्थयैवाभेदः प्राप्तो न विशिष्टेन, अतः कथं प्रकृतसङ्गतिरिति वाच्यम् । भस्मावस्थाया अपि विशिष्टविशेषरूपत्वादित्याशयात् ।

**वं०प०— उपपादितमिति** । विशेष्यविशिष्टयोरित्यत्र । भावरूपस्य विशेष्यस्य धर्मित्वादभावरूपस्य विशिष्टस्यापि धर्मत्वात् तयोरैक्यमिति भावः ।

**श्रीनिधि०— देहाभावो भस्मतेत्यभावस्य विशिष्टत्वमिति** । अत्राप्यभावपदेनान्योन्याभावो विवक्षितः । एवञ्च देहाभावो देहप्रतियोगिकोऽन्योन्याभावो भस्मत्वात् तस्यानुयोगिस्वरूपत्वेन भस्मनश्चानुयोगित्वेन च सर्वसामञ्जस्यादिति । तल्प्रत्यय स्वार्थिकः । यद्वा मत्वर्थोऽनेन लक्ष्यत इति । केचित्तु अभावपदं प्रध्वंसपरम् । तस्य च कारणे वृत्तेः भस्मनश्च कारणत्वात् तद्धर्मत्वं युज्यते तल्प्रत्ययोऽपि सार्थक इत्याहुः । तन्न । भस्मनो देहकारणत्वाभावात् । किन्तु तच्छरीरनाशोत्पन्नं द्रव्यान्तरमेव । तत्कारणानां सूक्ष्मरूपाणां न भस्मत्वमिति ।

**शे०वा०— प्रकृते योजयतीति** । विप्रतिपन्नविशिष्टाकारे योजयतीत्यर्थः । **देहाभाव इति** । देहप्रध्वंस इत्यर्थः । भस्मतेत्यत्र देहस्येति शेषः । ततश्च देहध्वंसो नाम देहभस्मता भस्मनो भावो भस्मावस्थेत्यर्थः । न चैवं विशेष्यस्य देहध्वंसस्य भस्मावस्थयैवाभेदः प्राप्तो न विशिष्टेनातः कथमस्य प्रकृतसङ्गतिरिति वाच्यम् । भस्मावस्थाया अपि विशिष्टविशेषरूपत्वादित्याशयात् ।

**विठ्ठल०— प्रकृते योजयतीति** । साधितमभावाभावयोः भावाभावात्मकत्वं विशेष्यविशिष्टयोरभेद इति प्रकृतेऽर्थे योजयतीत्यर्थः । **देहाभाव इति** । देहप्रध्वंस इत्यर्थः । भस्मता देहस्येति शेषः । भस्मनो भावः भस्मावस्थेति यावत् । तथा च प्रध्वंसाभावो नाम देहस्य भस्मावस्थेत्युक्तं भवति । ननु विशेष्यस्य देहाभावस्य भस्मावस्थया अभेद एव प्राप्तो न तु विशिष्टाकारोऽत्रास्ति तत्कथं प्रकृतसङ्गतिरिति चेत् सत्यं, भस्मावस्था-ऽत्र विशिष्टाकारः सोऽपि विशेष्येण देहाभावेनाभिन्नोऽपि विशेषबलाद्विशिष्टो भवतीत्यदोषः । देहाभावपदेन देहान्योन्याभावे विवक्ष्यते भस्मानुयोगिकदेहप्रतियोगिकान्योन्याभावो भस्माभिन्नोऽपि विशिष्टाकारो भवतीति विशेष्यविशिष्टयोरभेदस्येदमुदाहरणं भवतीति तल्प्रत्ययस्तु स्वार्थेत्यवधेयमित्यप्याहुः ।

**॥ इति भावाभावयोरभावभावधर्मत्वस्योपपन्नत्वात् विशेष्यविशिष्टयोरभेदोपपत्तिः ॥**

* * *

**॥ अथ च तत्रान्ते भावाभावयोरेकत्राविरोधेऽपि घटतदभावयोरप्यभेदापत्तिनिरासः ॥**

२७८ **सु०—** यदि भावाभावयोरेकत्वं न विरुद्धं तदा घटोऽपि स्वाभावात्मा किन्न स्यात् इत्यत आह **प्रत्यक्षादीति** ।

## अनु०— प्रत्यक्षादिप्रमाणतः ।

**सिद्धमिति शेषः । भावाभावयोर्विशेष्यविशिष्टयोरैक्यं प्रत्यक्षादिप्रमाणसिद्धं न तु घटतदभावयोः, अतो नातिप्रसङ्ग इत्यर्थः ।**

**यद्वा "भावाभावयोर्धर्मधर्मिभावो, धर्मधर्मिणोश्च अभेदः प्रामाणिक' इत्येतत् किं भावाभावयोर्विशेष्यविशिष्टयोरैक्यस्योपपादकं किं वा सम्भावनाहेतुः । आद्ये तूक्तोऽति-प्रसङ्गः । द्वितीये साधकं वाच्यम्" इत्यत्र इदमुक्तम् । अनेन 'क्वचिदि'त्युक्तं विवृतं भवति।**

**परि०— आद्ये तूक्तोऽतिप्रसङ्ग इति** । घटोऽपि स्वाभावात्मा स्यात्, घटाभावस्य घटेऽपि सत्त्वेन तद्धर्मत्वादित्यर्थः । **इदमुक्तमिति** । 'प्रत्यक्षादिप्रमाणत' इत्युक्तमित्यर्थः । **अनेन क्वचि-दितीति** । यत्र प्रमाणमस्ति तत्रैव भावाभावयोरभावभावात्मकत्वं, नान्यत्रेति भावेनोक्तेन, 'प्रत्य-क्षादिप्रमाणत' इत्यनेन 'क्वचिद्भावो ह्यभावश्चे'त्यत्र क्वचिदित्येतद्घटतदभावादावभेदप्रमाणाभावस्थले नेति विवृतमित्यर्थः ॥ ***क्वाचित्कौपाधिकविशिष्टादेर्विशेष्याभेदोक्तौ बाधकोद्धारः ॥***

**यादु०— अनेन क्वचिदित्युक्तमिति** । ययोर्भावाभावयोरैक्यं प्रत्यक्षादिप्रमाणसिद्धं तावेव प्राक् क्वचिदित्यत्र ग्राह्यौ नान्यौ येनोक्तातिप्रसङ्गः स्यादित्यतिप्रसङ्गपरिहारेण विवृतमित्यर्थः ।

**वं०प०— उक्तोऽतिप्रसङ्ग इति** । यद्येवमुपपाद्य भावाभावयोरैक्यमुच्यते तर्हि घटतदभावयोरप्यैक्यं स्यात् । घटस्याभाव इति तत्रापि धर्मधर्मिभावदर्शनादिति भावः । **इदमुक्तमिति** । उपपादकमेवेदमित्यभिप्रेत्य तत्रोक्तातिप्रसङ्गपरिहाराय प्रत्यक्षादिप्रमाणत इति साधकमित्यर्थः । भावाभावयोरैक्यं न प्रत्यक्षादिप्रमाणसिद्धम् अतो नातिप्रसङ्ग इति भावः ।

**कं०रा०— उक्तोऽतिप्रसङ्ग इति** । घटतदभावयोरप्यैक्यं स्यादित्यतिप्रसङ्ग इत्यर्थः ।

**श्रीनिधि०— भावाभावयोर्विशेष्यविशिष्टयोरिति** । विशेषणविशेष्यभावः । **उक्तोऽतिप्रसङ्ग इति** । घटोऽपि स्वाभावात्मा किं न स्यादित्युक्त इत्यर्थः । **अनेन क्वचिदित्युक्तं विवृतमिति** । यत्र भावस्याभावत्वे अभावस्य भावत्वे वा प्रत्यक्षादिरूपं प्रमाणमस्ति । तत्रैव तयोरेकत्वम् । नान्यत्रेति विवृतमित्यर्थः ।

**शे०वा०—** ननु भावाभावयोर्धर्मधर्मिभावो धर्मधर्मिणोश्चाभेदो भावाभावयोर्विशेष्यविशिष्टाकारयोरैक्यस्य सम्भावकतयैवोच्यते, न तूपपादकत्वेन तत्कथं तत्रातिप्रसङ्गपरिहारकतया प्रत्यक्षादीति ग्रन्थावतार इत्यरुचेराह **यद्वेति** । **उक्तोऽतिप्रसङ्ग इति** । घटोऽपि स्वाभावात्मा किन्न स्यादित्यतिप्रसङ्ग इत्यर्थः । **इदमुक्तमिति** । 'प्रत्यक्षादिप्रमाणत' इतीदमुक्तमित्यर्थः । **अनेनेति** । ययोर्भावाभावरूपयोर्विशेष्यविशिष्टाकारयोरैक्यं प्रत्यक्षादिप्रमाणसिद्धं तावेव भावाभावौ, 'भावो ह्यभावश्च स एव ही'त्यत्र विवक्षितौ, न त्वन्यौ येनातिप्रसङ्गः स्यादित्यतिप्रसङ्गपरिहारेण 'भावो ह्यभावश्चे'ति वाक्येऽनुवर्तितस्य क्वचिदित्यस्य विवरणं कृतं भवतीत्यर्थः ।

**वा०र०—** प्रत्यक्षादीतीति पाठः ।

**स०व्र०— उक्तोऽतिप्रसङ्ग इति** । घटोऽपि स्वाभावात्मा किं न स्यादित्युक्तातिप्रसङ्ग इत्यर्थः । **अनेन क्वचिदित्युक्तं विवृतमिति** । 'भावो ह्यभावश्च स एव हि' इत्यत्र अनुवर्तितस्य क्वचिदित्युक्तस्य विवरणं कृतं भवतीत्यर्थः । यो भावः स एव क्वचिदभावो भवतीत्युक्ते तर्हि घटस्यापि स्वाभावत्वं स्यादिति तत्र प्राप्तातिप्रसङ्गस्य 'प्रत्यक्षादिप्रमाणत' इत्यनेन परिहारेण तद्विवरणादिति भावः ।

**विठ्ठल०— उक्तोऽतिप्रसङ्ग इति** । घटोऽपि स्वाभावात्मा किं न स्यादित्युक्तोऽतिप्रसङ्ग इत्यर्थः । **इदमुक्तमिति** । प्रत्यक्षादिप्रमाणत इत्युक्तमित्यर्थः । **अनेन क्वचिदित्युक्तमिति** । यत्र प्रमाणमस्ति तत्रैव भावाभावयोरेकत्वं नान्यत्रेत्यर्थकेन प्रत्यक्षादिप्रमाणत इत्यनेन भावो ह्यभावश्चेत्यत्र क्वचिदित्येतत् न सर्वत्र भावाभावयोरभेदः स्वीक्रियते येनातिप्रसङ्गः स्यात् । किं तु प्रत्यक्षादिप्रमाणप्रमिते क्वचिदेवेति विवृतमित्यर्थः ।

चषक— स्वाभावात्मा । स्वप्रतियोगिकाभावरूपः ।

॥ इति भावाभावयोरेकत्राविरोधेऽपि घटतदभावयोरप्यभेदापत्तिनिरासः ॥
॥ इति विशेष्याभिन्नं विशिष्टं इत्युक्तेः अनुपपत्तिशङ्का तन्निरासश्च ॥
॥ इति प्रथमप्रकारोक्तार्थानुपपत्तिशङ्का तन्निरासश्च ॥

* * *

॥ अथ समवायस्य विशेषतो निराकरणे द्वितीयप्रकारोक्ता(परिणामवादोक्त)र्था-
नुपपत्तिशङ्का तन्निरसनं च ॥

२७९ सु०— अथवा 'भावो हि' इत्यादिना परिणामवादः प्रपञ्च्यते । तथा हि । केचित् परिणामवादिनः सत एवाभिव्यक्तिं जनिमाहुः, तद्व्युदासार्थमाह **भावो हीति** । अत्र **भावाभाव**शब्दौ सदसत्परौ । यः कारणत्वाभिमतो मृत्पिण्डः स कार्यघटात्मना **अभावः**, **स** एव तदात्मना **भावश्च** । यद्वा स घटः प्रागुत्पत्तेः **भावः** सन्, **स एव** तद**भावः** असंश्च । अथवा यः कुलालादिव्यापारात्प्राक् **अभावः** घटात्मनाऽसन्मृत्पिण्डः, स एव तदनन्तरं **भावः** घटात्मना सन् भवतीति ॥ एतदुक्तं भवति । कार्यं कारणेन भिन्नाभिन्नम् । तत एव प्रागुत्पत्तेः सदसत् । अतः कारणं प्राक्कारकव्यापारादकार्यात्मकं सत्कार्यरूपतामापद्यते यत्सा जनिरिति ।

नन्वेकस्यैव भिन्नत्वमभिन्नत्वं च सत्त्वमसत्त्वं च विरुद्धमित्यतो 'यथैकस्यैव भावत्वमभावत्वं च न विरुद्धं तथैतदपी'त्यादौ सम्भावनां तावदुपदर्शयन्नेकैकस्य भावत्वमभावत्वं च उपपादयति **'अभावस्ये'**ति सार्धश्लोकद्वयेन । पूर्ववदेव व्याख्यानम् ।

'अस्त्वियं सम्भावना, निश्चायकं तु किमि'त्यतो भेदासत्त्वयोः परेणाप्यङ्गीकृतत्वादभेदसत्त्वे प्रमाणेन साधयति **तस्मादिति** । प्रध्वस्तस्य घटादेर्भेदः **प्रध्वस्तभेदः** । **आदि**पदेनानुत्पन्नस्य कारकत्वं गृह्यते । 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'ति यत्प्रध्वस्तभेदस्य सत्त्वमवगम्यते यच्च घटो जायते घटं जनयतीत्यनुत्पन्नस्यापि कर्तृत्वं कर्मत्वं (च) वा, तत् **तस्मात्** कार्यस्य कारणाभेदात्, प्रागुत्पत्तेर्विनाशोत्तरं च सत्त्वादेव हि युज्यते । न ह्यत्यन्तासत्त्वमापन्नस्य स्वरूपभेदः सन्निति युज्यते, नाप्यत्यन्तासतः

कारकत्वम् । **न च** कार्यस्य पृथगेव सत्त्वमस्ति, अनुपलम्भात्; अतः सत्त्वं कारणाभेदश्चाङ्गीकरणीयः । **न च** विनैव बाधकेनोपचारत्वकल्पना युक्ता, अतिप्रसङ्गात् । तदिदमुक्तम् **अवगम्यत एव** इति । न केवलं व्यवह्रियत इत्यर्थः ।

'अभावस्य च भावाः स्युर्धर्माः, ते च प्रत्यक्षादिप्रमाणसिद्धत्वाद्युज्यन्त एव न तु निराकरणार्हा' इत्युक्तम्, तद्विशदयति **अस्तीति । आदिपदेन** घटादेर्भावस्य पटान्योन्याभावधर्मत्वं गृह्यते ।

**परि०— अभाव इति** । असन्नित्यर्थः । **भावश्चेति** । स्वरूपेत्यर्थः । **इति यत्प्रध्वस्तभेदस्य सत्त्वमिति** । तैत्तिरीयभाष्योक्तस्मृत्याऽवगम्यते । **तदिति** युज्यत इत्यन्वयः । कारणाभेदात् सत्त्वादेवेति व्यधिकरणे पञ्चम्यौ हेतुहेतुमद्भावापन्नौ । ननु कार्यस्य प्रागूर्ध्वं पृथक् सत्त्वादेव भेदकारकत्वे स्याताम् । किं कारणात्मना सत्त्वेनेत्यत आह **न च कार्यस्येति** । ननु भेदकारकत्वयोर्नायं प्रत्ययः । किन्तु व्यवहारः । स च(कारणविष)भेदकारकविषयतयोपचर्यत इत्यत आह **न च विनैवेति । घटादेरिति** । घटः पटो न भवतीत्येवं गृह्यत इत्यर्थः ।

**गु०दी०— 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'**त्यादेः 'यं भावः नष्टानामपि वस्तूनां भेदो नैव विनश्यती'ति तैत्तिरीयोपनिषद्भाष्यवाक्यबलादनुभवबलाच्च घटधर्मिकोऽन्योन्याभावः घटे नष्टेऽपि न नश्यतीत्यभ्युपगन्तव्यः । स चान्योन्याभावो घटेन धर्मिणा विनाऽनुपपद्यमानो घटाभिन्नमृत्पिण्डरूपधर्मिणमादाय पर्यवस्यति । घटो जायते इत्यादौ घटस्य कर्तृत्वादिति । भेदस्तु सर्ववस्तूनां स्वरूपमिति प्रतीयते । तच्च घटस्य प्राक् सत्त्वं गमयतीति ।

**यादु०— परिणामवाद इति** । 'अस्मत्पक्षे विशेषस्त्ये'त्यत्रोक्त इति शेषः । 'कार्यं कारणेन भिन्नाभिन्नमि'ति प्रथमयोजनाया लब्धार्थप्रदर्शनम् । 'तत एव प्रागुत्पत्तेरि'ति द्वितीययोजनायाः । 'अतः कारणं प्रागि'ति च तृतीययोजनाया इत्यवधेयम् ।

**वं०प०— सत एव** अत्यन्तसत एव । **घटात्मनाऽभाव इति** । असन्नित्यर्थः । **तदात्मना** कारणात्मना । **भावः** सन्नित्यर्थः । **सम्भावनेति** । एकस्यैव भिन्नत्वमभिन्नत्वं सत्त्वमसत्त्वं चाविरुद्धमित्यत्र यथैकस्यैव भावत्वमभावत्वं च दृष्टमित्येतत्सम्भावकमेव न निश्चायकमिति भावः । नाशोत्तरं च सत्त्वात् प्रध्वस्तभेदस्य सत्त्वं युज्यत इत्येतदुपपादकं **न हीति** । उत्पत्तेः प्राक् सत्त्वात् कर्तृत्वं कर्मत्वं च युज्यत

इत्यस्योपपादकं **नापीति** । **पृथगिति** । कारणसत्ताव्यतिरेकेणेत्यर्थः । ननु प्रध्वस्तभेदप्रतिपादकं नष्टानामपीति वाक्यम्, अनुत्पन्नस्य कर्तृत्वादिप्रतिपादकं घटो जायत इत्यादिवाक्यं चोपचरितार्थं किन्न स्यात् । अत एव प्रध्वस्तभेदसत्त्वमनुत्पन्नस्य कर्तृत्वादिकं व्यवहारमात्रमेव न तु तदनुसारेण तथाऽवगमः कल्पनीय इति चेत्तत्राह **न चेति** ।

**कं०रा०**— ननु घटे नष्टे तदात्मकस्य भेदस्यापि नाशावश्यंभावात् कथं प्रध्वस्तघटादेर्भेदस्य सत्त्वमवगम्यत इत्युच्यते इत्यत आह **नष्टानामपीति** । नष्टानां वस्तूनामनष्टवस्तुप्रतियोगिकभेदाभावे तदात्मकत्वप्रसङ्गात् 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'ति पक्षे प्रध्वस्तभेदस्य सत्त्वमवगम्यत इति भावः । **घट इति** । घटो जायत इत्यनुत्पन्नस्यापि घटस्य कर्तृत्वं घटं जनयतीति तस्य कर्मत्वं चावगम्यत इति । ननु प्रध्वस्तभेदादिसत्त्वान्यथानुपपत्त्या कार्यस्योत्पत्तेः प्राक् विनाशोत्तरं च सत्त्वमस्तु कारणात्मना सत्त्वं तु कुतः कार्यस्य पृथगेव सत्त्वसम्भवादित्यत आह **न च कार्यस्येति** । **अनुपलम्भादिति** । कार्यपृथक्सत्त्वस्येत्यर्थः।

**श्रीनिधि०**— **परिणामवादः प्रपञ्च्यत इति** । 'अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतः' इत्यनेन प्रस्तुत इति शेषः । ननु परिणामो नामावस्थान्तरापत्तिरिति स्फुटमेव तत्किमर्थमत्र प्रपञ्चनमित्यत आह **केचिदिति** । **तदात्मना** कारणमृत्पिण्डात्मना । अत्र घटयोग्यतारहितमृत्पिण्डस्य कारणमृत्पिण्डात्मना भवनं नास्त्येवेति **कारणत्वाभिमत** इत्युक्तम् । **अभिमतः** सम्प्रतिपन्नः इत्यर्थः । प्रथमव्याख्याने स इत्यनेन कारणत्वाभिमतो मृत्पिण्डो गृहीतः । द्वितीयव्याख्याने घटः । तृतीयव्याख्याने मृत्पिण्डस्य ग्रहणेऽपि भाव इत्यस्य घटात्मना भाव इत्यर्थः । प्रथमे तु कारणमृत्पिण्डात्मना भावः इत्यर्थ इति त्रयाणां भेदः । योजनाभेदमात्रं प्रदर्शितं तात्पर्यं त्वेकमेवेति । एवं पदार्थमुक्त्वा वाक्यार्थमाह **एतदुक्तं भवतीति** । **तत एव** भिन्नाभिन्नत्वादेव । 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'ति तैत्तिरीयभाष्यवचनम् । ननु 'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः' इत्यादिश्लोकव्याख्यानावसरे जीवेश्वरप्रकृत्यादिनित्यस्वरूपभूतो नित्य एवेत्युक्त्या नित्यस्वरूपभूतस्य नित्यत्वमनुमतम् । अत एव 'टीकाकारास्तु मन्यन्त' इत्यादिना नित्यभेदस्य नित्यत्वं पक्षान्तरत्वेनैवोक्तं न स्वपक्षत्वेन । अत्र पुनस्तस्यानित्यत्वमभ्युपगतं, तथा च विरोधः इति चेदुच्यते । आशयभेदात्तद्व्यवस्थोपपत्तेः । तथाहि । कार्यकारणयोर्भेदाभेदौ । कार्यं च प्रागुत्पत्तेः विनाशोत्तरं च सदसच्चेति सिद्धान्तः । तत्राभेदसत्त्वे आदाय प्रमाणटीकाभ्युपगममाह । भेदासत्त्वे आदाय पूर्वोक्तिः । अयं च भेदोऽनित्य इत्यस्य स्वाधिकरणेनात्यन्ताभिन्नस्य नाशे स्वस्य तत्सम्बन्धो नश्यतीत्यभिप्रायः । नित्य इत्यस्य स्वाधिकरणेनाभिन्नस्य नित्यत्वात् निवर्तकान्तरस्य प्रतियोगितादात्म्यस्याभावात् तत्सम्बन्धो न कदापि निवर्तत इति सर्वमनवद्यम् । एवं सर्वात्मना सत्त्वे बाधकमुक्त्वा साधकाभावमप्याह **न च कार्यस्येति** । 'नष्टानामपि वस्तूनां भेदो नैव विनश्यति', 'घटो जायते, घटं करोती'त्यादिकं व्यवहारमात्रं 'अग्निर्माणवक' इतिवत् । तथा च कथमनेन विवक्षितार्थसिद्धिरित्यत आह **न च विनैव बाधकेनेति** । नष्टानामपि वस्तूनां भेदो नश्यत्येवेति वा अघटमेव करोतीति वा अघट एव जायतेति वा बाधकेन विनेत्यर्थः ।

**शे०वा०—** 'अस्मत्पक्षे विशेषस्ये'त्येतद्वाक्यद्वितीयव्याख्यानुसारेणापि 'भावो ह्यभावश्चे'त्यादिग्रन्थं व्याख्याति **अथवेति** । **परिणामवाद इति** । 'अस्मत्पक्षे विशेषस्ये'त्यत्रोक्त इति शेषः । **य इति** । अत्र मृत्पिण्डस्य स्वकार्यघटात्मनाऽसत्त्वस्य तदात्मना सत्त्वस्य चोक्त्या कार्यस्य कारणेन भिन्नाभिन्नत्वमुक्तं भवति । ततोऽपि किमित्यत्राप्येतदेवोत्तरमित्यभिप्रेत्य कार्यस्य कारणेन भिन्नाभिन्नत्वोक्त्या लब्धं कार्यस्योत्पत्तेः प्राक् सदसत्त्वमपि तदर्थतया योजयति **यद्वेति** । तावताऽपि किमित्यत्राप्येतदेवोत्तरमित्यभिप्रेत्य सदसत्त्वोक्त्या लब्धमर्थं तदर्थतया योजयति **अथवेति** । व्याख्यातपक्षत्रयस्य फलफलिभावमुपपादयितुमाह **एतदिति** । कार्यं कारणेन भिन्नाभिन्नमिति प्रथमयोजनाया लब्धार्थप्रदर्शनम् । 'तत एव प्रागुत्पत्तेरि'ति द्वितीययोजनायाः । 'अतः कारणं प्रागि'ति च तृतीययोजनाया इति ध्येयम् । इतीत्यस्येत्येतदिति पूर्वेणान्वयः । प्रध्वस्तघटादिभेदसत्त्वस्य प्रागुत्पत्तेर्विनाशोत्तरं च कार्यसत्तापेक्षत्वमुपपादयति **नहीति** । अनुत्पन्नस्य कारकताया अपि तत्सापेक्षत्वमुपपादयति **न हीति** । अस्तु तर्हि तदुभयोपपादकतया कार्यस्य प्रागुत्पत्तेर्विनाशोत्तरं च सत्त्वसिद्धिः । तथाऽपि कारणात्मना तु तत्सिद्धिः कुत इत्यतः पृथक् सत्त्वाभावात्तदित्याशयेनाह **न चेति** । कुतो नेत्यतोऽनुपलम्भबाधितं तदित्याशयेनाह **अनुपलम्भादिति** । ननु घटो जायते घटं जनयतीत्यादेर्मृत्तिका घटीभवति मृत्तिकां घटीकरोतीत्यर्थकत्वेन यथाश्रुतार्थत्वाभावान्न विवक्षितार्थसाधकत्वमित्याशङ्क्य किं बाधकसद्भावान्मुख्यार्थपरित्यागेनोपचाराश्रयणम्, उत तदभावेऽपीति विकल्पं मनसि निधायाद्यमसिद्ध्या दूषयति **न चेति** । द्वितीये त्वाह **अतिप्रसङ्गादिति** । उक्तव्यवहाराणामौपचारिकत्वाभावो ग्रन्थकारस्याप्यभिमत इत्याह **तदिदमुक्तमिति** । कथमनेनौपचारिकत्वाभावसिद्धिरित्यतस्तदुपपादकतया तद्योजयति **अवगम्यत एवेत्यादिना** ।

'ननु कथमसतो भाति भास्यत इति कर्तृत्वं कर्मत्वं वा, समस्तसामर्थ्यरहितत्वात् । अथ सामर्थ्यरहितत्वमपि कथम्, भाववदभावस्यापि सद्धर्मत्वदर्शनात् । बौद्धमेवाभावाश्रयत्वं न वस्तुकृतम् अतो न विरोध इति चेत् समं कर्तृत्वकर्मत्वयोरपि । अन्यथा 'जायते घट' इत्यादि न स्यादिति जिज्ञासासूत्रीयग्रन्थेन घटो जायत इत्यादौ कर्तृत्वादेर्बौद्धत्वाभ्युपगमेनोपपत्तिरुक्ता । तथाऽत्यन्तसत्कार्यवाद्यभिमतासदकरणादित्यादिहेतुनिरासावसरे 'नन्वसतः कथं कर्मत्वं सतः कार्यत्वमपि कथमिति समानम् । अनेन घटो जायत इत्यपि प्रत्युक्तम्। तर्हि घटं करोतीत्यादेः कोऽर्थः । 'मृत्तिकां घटीकरोति मृत्तिका घटीभवती'ति ग्रन्थेन घटो जायत इत्यादीनामर्थान्तराभ्युपगमेनोपपत्तिरुक्ता । अत्र पुनः 'घटो जायते घटं जनयतीत्यनुत्पन्नस्यापि कर्तृत्वं कर्मत्वं च कार्यस्य कारणाभेदात्प्रागुत्पत्तेर्विनाशोत्तरं च सत्त्वादेव युज्यते' इति ग्रन्थेन घटादीनां पूर्वं सत्त्वेन तदुपपत्तिरभिधीयते । तत्कथमेतेषां ग्रन्थानां परस्परं न विरोध इति चेत् अत्र प्राहुः स्वामिनः । न तावज्जिज्ञासासूत्रीयग्रन्थेनैतत्पादीयग्रन्थद्वयस्य विरोधः । तत्र परं प्रति प्रतिबन्दीमुखेन प्रवृत्त्या पराङ्गीकृतात्यन्तासत्कार्यवादस्यानुपपन्नताया वक्ष्यमाणत्वात् । सदसत्कार्यवादस्य परेणानभ्युपगमादभावाश्रयत्वादिवत् कर्तृत्वादेर्बौद्धत्वानङ्गीकारे तव घटो जायत इत्यादेरनुपपत्तिरेवेत्याशयात् । नाप्येतत्पादीयग्रन्थद्वयस्य परस्परविरोधः । अत्यन्तसत्कार्यानभ्युपगमेऽपि कारणात्मना सत्ताऽभ्युपगमात् । कारकव्यापारात्प्रागकार्यात्मकस्य कारणस्य कारकव्यापारेण कार्यरूपतापत्तेः

सदसत्कार्यवादिमते जनित्वात् । मृत्तिका घटीभवतीत्यादिर्घटो जायते इत्यादेरर्थ, इति न कर्तृत्वाद्यनुपपत्तिरिति एतत्पादीयपूर्वग्रन्थाशयः । अस्य तु ग्रन्थस्यात्यन्तिकसत्त्वस्योक्तरीत्याऽनेकानुपपत्तिग्रस्तत्वात् कार्यस्य कारणात्मनाऽपि सत्त्वानभ्युपगमे उक्तजनिपदार्थासम्भवात् घटो जायत इति कर्तृत्वाद्यनुपपत्तिरेव । न चात्रोक्त-(असत्ख्यातिवाद)प्रकारेण बौद्धकर्तृत्वाद्यभ्युपगमेनोपपत्तौ कारणात्मना कार्यसत्त्वसाधकतया कर्तृत्वाद्युक्तिरयुक्तेति वाच्यम् । प्रतीतिसिद्धप्रध्वस्तभेदसत्त्वस्य प्रकारान्तरेणानुपपत्त्या तदर्थतया कारणात्मना सत्त्वस्य, तत एव तादृशजनिपदार्थस्य चावश्याङ्गीकार्यत्वसिद्धेः कर्तृत्वादेरपि निर्वाह इत्याशयेनाभ्युच्चययुक्तितया कर्तृत्वादेरुपन्यासात् । अत एव भाष्ये स्वशब्देन भेदग्रहणम् । आदिपदेन च कर्तृत्वादेरुपादानम् । न तु कर्तृत्वादेरन्यथा-निर्वाहाभावाभिप्रायेण ॥ अथवा भातीत्यादिभानक्रियाकर्तृत्वस्य बौद्धस्यासति व्यवहारवत् बौद्धस्य जनिकर्तृत्वस्य नात्यन्तासति व्यवहार इत्याशयेनास्यापि साधकतयोपन्यास इत्याशयः । एवञ्चैतत्पादीयपूर्वोत्तरग्रन्थयोरेक-वाक्यतायां नानुपपत्तिः । अत एव सत्त्वमात्रे साध्ये सिद्धसाधनमिति पूर्वग्रन्थे । नाप्यत्यन्तासतः कारकत्वं इत्यत्यन्तपदमत्र ग्रन्थे । तस्मान्न कुत्रापि विरोध इति ।

**वा०र०**— धर्मिस्वरूपत्वे भेदस्य तन्नाशे नाशप्रसङ्गोऽन्यथा तत्स्वरूपत्वमेव न स्यादित्येतच्छङ्का-परिहाराय धर्मनाशमङ्गीकृत्य सिद्धान्तः प्रकृत्यधिकरणे कृतः 'नित्यस्वरूपभेदस्त्वनादिनित्य एवे'ति 'पञ्चभेदा इमे नित्या' इत्येतदपि युक्तमिति च निर्णीतम्, 'तस्मात् प्रध्वस्तभेदादिसत्येनावगम्यते' इत्येतद्भाष्यटीकायां 'नष्टानामपि वस्तूनां भेदेनैव विनश्यती'ति तैत्तिरीयभाष्योदाहृततत्त्वनिर्णयाख्यप्रमाणग्रन्थवाक्योदाहरणं प्रमाणत्वेन यत्कृतं तत्कथं युज्यते 'इत्याहुः केचिदज्ञानात्' इत्यादिना अस्य पक्षस्याज्ञानिपक्षतयोक्तेरित्याद्याशङ्क्य समा-धानप्रकारः 'प्रपञ्चो भेदपञ्चकः' इत्येतदनुव्याख्याव्याख्यानरूपमूलव्याख्यानावसरे टीकाकारपक्षोपपादनव्याजेन टीकायां निरूपितो द्रष्टव्यः । अत्र समाधिमाहुः स्वामिन इति पाठः । **प्रतीतिसिद्धेति** । प्रतीतिसिद्धं यत्प्रध्वस्तघटादिभेदसत्त्वं तस्येत्यर्थः । न च असत्ख्यातिग्रन्थोक्तप्रकारेण पाठः । न चात्रोक्तेति जिज्ञासाधिकरणटीकानुसारिपाठस्तु लेखकदोषात् । पूर्वपक्षे कर्तृत्वादेरभ्युच्चययुक्तित्वमाश्रयणीयं भवतीत्यपरि-तोषाद्बौद्धासम्भवोपपादनेन पक्षान्तरमाह **अथवेति** । एतद्विरोधशङ्कापरिहारग्रन्थस्त्वस्माभिः 'असद्विलक्षणज्ञप्त्यै' इति जिज्ञासाधिकरणमूलटीकाव्याख्यावसरे व्याख्यात इति ज्ञेयम् ।

**विठ्ठल०— परिणामवाद इति** । 'अस्मत्पक्षे विशेषस्ये'त्यत्र विशेषस्य परिणामस्य जनित्वेनाङ्गी-कृतत्वतो न कश्चिद्दोष इत्युक्तं तत्प्रपञ्च्यत इति भावः । **केचिदिति** । सत्कार्यवादिनो साङ्ख्यादय इत्यर्थः । **तद्व्युदासार्थ**मित्यनेन प्रपञ्चनस्य प्रयोजनं सूचितं भवति । **भावो हीति** । मूलं त्रेधा योजयति **य इत्या-दिना** । तत्राद्ये सः कारणत्वाभिमतो मृत्पिण्डः, **अभावः** घटसंस्थात्मना प्रागसन्, तद्भिन्न इति यावत् । तत्कारणात्मना भावश्च मृदात्मना सन् घटाभिन्न इति योजना । द्वितीये स घटः प्रागुत्पत्तेः भावोऽभावश्च । मृदात्मना सन् स संस्थात्मना असंश्चेति । तृतीये यः प्राक्कुलालव्यापारादभावोऽसन् न कार्यात्मकः, स एव

तदनन्तरं भावः सन् भवति कार्यात्मको भवतीति योजना । योजनात्रयलब्धमर्थं दर्शयति **एतदुक्तं भवतीति** । कार्यं कारणेन भिन्नाभिन्नमित्याद्ययोजनायां लब्धार्थप्रदर्शनम् । द्वितीये तत एव प्रागुत्पत्तेः सदसदिति । तृतीये अतः कारणं प्रागित्यादीत्यवधेयम् । अत्र पूर्वपूर्वयोजनालब्धार्थस्योत्तरोत्तरार्थे हेतुत्वद्योतनाय **तत एवेत्याद्युक्तिः** । प्रध्वस्तस्य घटादेर्भेद इति । प्रध्वस्तघटधर्मभूतभेद इत्यर्थः । 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'त्याद्युक्त्या 'इत्याहुः । केचिदज्ञानादि'त्युत्तरत्र पूर्वोक्तस्याज्ञानमूलत्वकथनादनुष्ठानानामपीत्यादेर्निषेध्यत्वावगमात् कथं तस्य वाक्यस्य नष्टवस्तुनोऽपि कारणात्मना सत्त्वव्युत्पादनाय प्रध्वस्तपदार्थानुयोगिकभेदस्य तत्कारणस्वरूपेणावस्थानमित्यत्र सम्मतितयोदाहरणम् । तस्योक्ताभिप्रायेण स्वाभ्युपगतार्थत्वे निषेध्यत्वायोगादिति । अत्रोच्यते— 'भेदस्तु सर्ववस्तूनां स्वरूपं नैजमव्ययम् । 'नष्टानामपि वस्तूनां भेदो नैव विनश्यती'-त्यन्तग्रन्थोक्ताभिप्रायेण सिद्धान्त एव । तदुत्तरः अवस्तुनोऽपीत्ययं श्लोको निषेध्यतयाऽनूद्य अर्थपरः । तत्र घटादिरूपकार्यगतभेदस्य नित्यत्वमभिधाय तस्यैव तस्माद्वस्तुविनाशे तु तद्भेदो नास्ति । कुत्रचिदिति निषेधात् । तथा च नष्टानामपीत्यस्याचार्यसिद्धान्तत्वादत्र सम्मतितयोदाहरणं युज्यत इति । केचित्तु नष्टानामित्यस्य नाशानन्तरं पुनस्तत्संस्थानानुयोगिभेदोऽप्यभिप्रेतः नष्टाभिन्नकारणस्वरूपभेदोऽप्यभिप्रेतः । तत्राद्य उत्तरवाक्ये निषेधः । द्वितीयार्थविवक्षया सम्मतितयोदाहरणं युज्यत इत्याहुः । प्रकृत्यधिकरणीयसन्न्यायरत्नावल्यामपि कारणस्वरूपभूतभेदपरेति ध्येयम् । तत्र परवाद्यभ्युपगतजातिवदिति दृष्टान्तस्तु नित्यमात्रे, न तु धर्मिविनाशेऽपि धर्म्यनुयोगिकभेदावस्थान इत्यदोषः । **अत्यन्तासत्त्वमापन्नस्येति** । पटादिनाशानन्तरं पटादेः पुनः कारणभूताद्यात्मनां सत्त्वमनङ्गीकृत्य केवलासत्त्वाङ्गीकारे आत्यन्तिकासत्त्वं प्राप्तम् । तथा च तादृशस्य शून्यतुल्यतेत्यर्थः । अत्यन्तासत्त्वकारणात्मना सत्त्वे तु कारणधर्मिभूतभेद एव प्रध्वस्तघटादिभेद इति भावः । उत्पत्तेः प्राक् नाशानन्तरं च नात्यन्तासत्त्वं कार्यस्य अतः कर्तृत्वाद्युपपत्तिरित्यतः कारणसत्तातिरिक्तकार्यसत्ताया अप्रामाणिकत्वादिति भावेनाह **न च कार्यस्येति** । प्रध्वस्तभेदव्यवहारोऽनुत्पन्नकारणकत्वव्यवहार औपचारिको न सत्त्वाद्यङ्गीकरणीयमित्यत आह **न च विनैवेति** ।

**चषक— घटं जनयतीति** । 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णावि'ति । एषां ण्यन्तावस्थायां कर्तुः कर्मसंज्ञाविधानादण्यन्तावस्थायां घटो जायत इत्यत्र कर्तुर्घटस्य ण्यन्तावस्थायां कर्मता सङ्गच्छत इति भावः ।

**॥ इति द्वितीयप्रकारोक्त(परिणामवादोक्त)ार्थानुपपत्तिशङ्का तन्निरसनं च ॥**

* * *

## ॥ अथ समवायस्य विशेषतो निराकरणे अन्योन्याभावभेदपृथक्त्वानां परस्परभेदे प्रागुक्तदोषस्मारणम् ॥

२८० **सु०—** 'स्यादेतत् । अन्योन्याभावस्य भावधर्मत्वेऽपि तस्य भावात् पृथक्त्वेन कथं भावस्याप्यभावत्वमुच्यते । अन्योन्याभावस्य भेदत्वाद्भेदस्य च स्वरूपत्वाङ्गीकारादिति चेन्न, स्वरूपभेदस्यान्योन्याभावातिरिक्तत्वात् ॥ **यच्चोक्तमभावेऽपि पृथक्त्वमस्तीति** तदसत्, प्रमाणाभावात्, स्वरूपभेदेनैवासङ्करोपपत्तेः । **पृथक्त्वस्य च** स्वरूपभेदातिरिक्तत्वादि'त्यत आह **अन्योन्येति** ।

**अनु०— अन्योन्याभावभेदौ च पृथक्त्वं च पृथक् पृथक् ।**
**यत्कल्पयन्ति तच्चैव कल्पनागौरवाद्गतम् ॥**

**पृथक् पृथक्** विभिन्नानीत्यर्थः । **चशब्दो** दूषणान्तरसमुच्चयार्थः । **गतं** प्रागेव निराकृतम्, **अनेन** पुनरुक्तिदोषः परिहृतो भवति ।

**परि०—** सिद्धान्ती शङ्कते **अन्योन्याभावस्येति** । **दूषणान्तरसमुच्चयार्थ इति** । 'कल्पनागौरवाद्या' इति लिङ्गपादे आद्यपदेनोक्तौ यौ दोषौ दृष्टहानिरदृष्टकल्पना च तत्समुच्चयार्थोऽत्र चशब्द इत्यर्थः । अत एवाग्रे गौरवादिकमित्यादिपदप्रयोगः । **प्रागेवेति** । 'अदृश्यत्वादिगुणक' इति लिङ्गपादीयादृश्यत्वाधिकरणे 'पृथक्त्वाभावतद्रूपान् भेदांस्त्रीन् कल्पयन्ति चेत् । कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिन' इत्यत्र गौरवदृष्टहान्यदृष्टकल्पनारूपदोषैर्निराकृतमित्यर्थः । **अनेनेति** । गतमिति प्रागुक्तस्मारणेनेत्यर्थः ॥ ***अन्योन्याभाव(भेद)पृथक्त्वानां भेदे प्रागुक्तदोषस्मारणम् ॥***

**यादु०— स्वरूपभेदस्येति** । अभावेऽभावान्तरानङ्गीकारेण स्वरूपभेदस्यैव तत्राङ्गीकारादिति भावः । **पृथक्त्वस्य चेति** । तस्य गुणत्वेन द्रव्यमात्रवृत्तित्वादिति भावः । **दूषणान्तरसमुच्चयेति** । वैशेषिकमत इति शेषः । **प्रागेवेति** । 'पृथक्त्वाभावतद्रूपान्भेदांस्त्रीन्कल्पयन्ति चेत् । कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिन' इत्यत्रैवेत्यर्थः ।

**वं०प०— यच्चोक्तमिति** । 'तस्मात्प्रध्वस्तभेदादी'त्यनेन प्रध्वस्तस्य प्रध्वंसस्य भेदः पृथक्त्वमिति व्याख्यानात् । ननु प्रध्वंसे पृथक्त्वाभावे प्रागभावघटाद्यभेदरूपं साङ्कर्यं स्यादित्यत आह **स्वरूपभेदेनैवेति** । **अनेन** गतमिति प्रागुक्तार्थस्मारणेन ।

**कं०रा०**— नन्वभावस्य भावपृथक्त्वाभावे तत्सङ्करापत्तिरित्यत आह **स्वरूपभेदेनैवेति** । नन्वभावे पृथक्त्वाभावे स्वरूपभेदोऽपि न सम्भवति तयोरनतिरिक्तत्वादित्यत आह **पृथक्त्वस्य चेति** । **प्रागेवेति** । 'पृथक्त्वाभावतद्रूपान्भेदांस्त्रीन्कल्पयन्ति चेत् । कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिन' इत्यत्रैवेत्यर्थः ।

**श्रीनिधि०**— **यच्चोक्तमिति** । 'तस्मात् प्रध्वस्तभेदादी'त्यत्र प्रथमव्याख्यानानुसारेणेदम् । ननु प्रमाणाभावादित्ययुक्तम् । अभावसाङ्कर्यान्यथानुपपत्तेरेव प्रमाणत्वादित्यतः तस्यान्यथोपपत्तिमाह **स्वरूप-भेदेनैवेति** । स्वरूपभेदाङ्गीकारे पृथक्त्वमप्यङ्गीकृतमेव । तस्य तदनतिरेकादित्यत आह **पृथक्त्वस्य चेति** । **दूषणान्तरसमुच्चयार्थ इति** । दृष्टहान्यदृष्टकल्पनालक्षणदूषणान्तरसमुच्चयार्थ इत्यर्थः । 'कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिन' इत्यत्र आद्यग्रहणेन दृष्टहान्यदृष्टकल्पने गृह्येते इत्युक्तत्वादुपपादितत्वाच्चेति । **अनेनेति** । गतमित्यनेनेत्यर्थः । **पुनरुक्तिदोषः परिहृतो भवतीति** । गतमित्यनेन प्रागुक्तं निराकरणं ज्ञाप्यते । एवं 'पृथक्त्वाभावतद्रूपानि'त्यनेनैव पुनरुक्तिः । अस्य भाष्यस्य तज्ज्ञापनार्थत्वात् । तत्र प्रतिपादितस्यात्र प्रतिपादने पुनरुक्तिर्न तु तत्प्रतिपादनात् ज्ञापन इति स दोषः परिहृतो भवतीत्यर्थः ।

**शे०वा०**— ननु 'अन्योन्याभावभेदौ चे'त्याद्युत्तरवाक्यमनर्थकम् । न चान्योन्याभावपृथक्त्वस्वरूप-भेदानां पार्थक्याभावप्रतिपादनार्थं तदिति वाच्यम् । तेषां पार्थक्येऽपि प्रकृतविरोधाभावेन तत्प्रतिपादनस्येहानपे-क्षितत्वादित्यतः पार्थक्यवादे प्रागुक्तस्य भावाभावयोरभावभावधर्मत्वेनाभावभावात्मकत्वस्यासिद्धिप्रसङ्गेन पार्थ-क्यव्युत्पादनस्य तदुपपादकतया प्रकृतसङ्गतत्वान्न तदानर्थक्यमिति भावेन तदुपपादकतयोत्तरग्रन्थं योजयितुं तत्पार्थक्यवादमाश्रित्य प्रागुक्तस्य भावाभावयोरभावधर्मताया अभावभावत्वस्याप्यनुपपत्तिशङ्कामुत्थापयति **स्यादेतदिति** । **तस्य भावात्पृथक्त्वेनेति** । अन्योन्याभावस्य धर्मिस्वरूपवत्त्वे प्रमाणाभावादिति भावः । ननु भेदो हि धर्मिस्वरूपमिति सर्वैरङ्गीकर्तव्यम् । अन्यथा अनवस्थादिदोषप्रसङ्गात् । अभावे स्वरूपातिरिक्त-स्यासम्भवेन भेदाभावप्रसक्तेश्च । अन्योन्याभावश्च भेद एवेति कथं न तस्य धर्मिस्वरूपत्वम् । भेदस्य धर्मि-स्वरूपसाधकसामानाधिकरण्यव्यवहारस्यैवान्योन्याभावस्य धर्मिस्वरूपत्वसाधकत्वादित्यभिप्रेत्य शङ्कते **अन्यो-न्याभावस्येति** । भेदस्य धर्मिस्वरूपत्वेऽपि नान्योन्याभावस्य धर्मिस्वरूपत्वम् । अन्योन्याभावस्वरूपभेदयो-र्भिन्नत्वात् । स्वरूपभेदो हि द्रव्यादिसकलपदार्थवृत्तिः, अन्योन्याभावस्तु न तथा । अभाववृत्तित्वाभावात् । तत्राप्यन्योन्याभावाभ्युपगमे अनवस्थाप्रसङ्गात् । ततश्च स्वरूपातिरिक्तभेदत्वादन्योन्याभावस्य न धर्मिस्वरूप-त्वसिद्धिरित्याशयेन परिहरति **न स्वरूपभेदस्येति** । ननु च अभावे पृथक्त्वानभ्युपगमे तस्य पदार्थान्तरेण सङ्कीर्णत्वापत्त्या असङ्कीर्णाभावस्वरूपासिद्धिप्रसङ्गात् । असङ्कीर्णतत्स्वरूपसिद्ध्यन्यथाऽनुपपत्तिरेव तत्र पृथक्त्व-सद्भावे मानमिति न प्रमाणाभाव इत्याशङ्क्य भवेदेतदेवं यदि पृथक्त्वाभावेऽसङ्कीर्णतत्स्वरूपासिद्धिः प्रसज्येत । न चैतदस्ति । स्वरूपभेदेनैव तत्सिद्धिसम्भवादित्याशयेन समाधत्ते **स्वरूपभेदेनैवेति** । ननु स्वरूपभेदानति-रिक्तत्वात् पृथक्त्वस्य अभावे स्वरूपभेदाभ्युपगमे, तत्र पृथक्त्वसत्त्वसिद्धेर्न तत्र पृथक्त्वमस्तीति वचनं रिक्तमि-त्याशङ्क्य भवेदप्येवं कथञ्चिद्यदि स्वरूपभेदात् पृथक्त्वमपृथक् स्यात् । न चैतदस्ति । स्वरूपभेदस्य

द्रव्यादिसकलपदार्थवृत्तित्वात् पृथक्त्वस्य च गुणत्वेन द्रव्यमात्रवृत्तितया सर्ववृत्तित्वाभावेन तस्य ततो भिन्नत्वात् । ततश्चाभावे स्वरूपभेदस्य सद्भावेऽपि तत्र पृथक्त्वाप्राप्तेरभावे तदभावोक्तिर्युक्तैवेत्याशयेनाह **पृथक्त्वस्य चेति** । मूले कल्पनागौरवाच्च गतमित्यन्वयं मनसि निधायाह **चशब्दो दूषणान्तरसमुच्चयार्थ इति** । 'कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिनः' इत्यादिना पूर्वत्रादिशब्दोक्तदृष्टहान्यदृष्टकल्पनारूपदोषान्तरसमुच्चयार्थश्चशब्द इत्यर्थः । ननु गतमित्यस्य पक्षस्य प्रागेव निराकृतत्वकथनमनर्थकमित्यत उक्तार्थस्मारकत्वसूचनेनास्य ग्रन्थस्य पूर्वग्रन्थेन पुनरुक्तिपरिहारार्थत्वान्न तदानर्थक्यमित्याशयेन तत्तात्पर्यमाह **अनेनेति** ।

**स०व्र०— चशब्दो दूषणान्तरसमुच्चयार्थ इति** । 'कल्पनागौरवाद्गतम्' इत्यत्र कल्पनागौरवमात्रस्योक्तत्वेऽपि 'कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिनः' इत्येतदनुव्याख्यानुसारेण दृष्टहान्यदृष्टकल्पनारूपदूषणान्तरसमुच्चयार्थश्चशब्द इत्यर्थः ।

**विठ्ठल०**— अन्योन्याभावस्य न भावात् पृथक्त्वं, तस्यैव भेदरूपत्वात् । भेदस्य च स्वरूपतानिर्णयादिति सिद्धान्त्यभिप्रेतमाशङ्क्य पूर्वपक्षी परिहरति **अन्योन्याभावस्येति** । **स्वरूपभेदस्येति** । सत्यं भेदः स्वरूपभूत इति परन्तु न स एवान्योन्याभावः । अभावेष्वपि भेदस्य विद्यमानत्वात् । अभावे चाभावान्तरानङ्गीकारात् । अतः स्वरूपभेदोऽन्योन्याभावातिरिक्त एवेति भावः । अभावानां परस्परसाङ्कर्यान्यथानुपपत्तिः प्रमाणमित्यत आह **स्वरूपभेदेनैवेति** । तर्हि स्वरूपभेद एव पृथक्त्वमिति ब्रूम इत्यत आह **पृथक्त्वस्य चेति** । पृथक्त्वं हि गुणः स च द्रव्यमात्रवर्ती अतो भावादौ विद्यमानभेदो न पृथक्त्वमिति भावः । **दूषणान्तरसमुच्चयार्थ इति** । कल्पनागौरवेन सह दृष्टहान्यदृष्टकल्पनारूपदूषणद्वयसमुच्चयार्थ इत्यर्थः । **प्रागेवेति** । 'पृथक्त्वाभावतद्रूपान्भेदांस्त्रीन् कल्पयन्ति चेत् । कल्पनागौरवाद्यास्तु दोषास्तत्र विरोधिन' इति लिङ्गपाद इत्यर्थः। तत्र कल्पनागौरवाद्या इत्याद्यपदेन दृष्टहान्यादिग्रहणादत्र तत्सङ्ग्रहाय मूले चशब्द इत्याशयेन दूषणान्तरसमुच्चयार्थ इति व्याख्यानमिति ज्ञेयम् ।

**॥ इति अन्योन्याभावभेदपृथक्त्वानां परस्परभेदे प्रागुक्तदोषस्मारणम् ॥**

* * *

**॥ अथ तत्र उक्तार्थोपपादनम् ॥**

२८१ **सु०— कथं कल्पनागौरवादिकमित्यत आह पर्यायत्वेनेति** ।

## अनु०— पर्यायत्वेन ते शब्दा ज्ञायन्ते सर्व एव हि ।

**क्रमप्रयोज्यत्वेनेत्यर्थः । सर्व एव लौकिका वैदिकाश्च ।**

वं०प०— लौकिका वैदिकाश्च शब्दा इत्यन्वयः ।

शे०वा०— **कथं कल्पनागौरवमिति** । गौरवादिकमित्यर्थः । **क्रमप्रयोज्यत्वेनेति** । पृथग्वाक्यतया प्रयोज्यत्वेनेत्यर्थः । न जात्वेकवाक्यनिवेशेन तेषां प्रयोग इति भावः । 'पृथक्त्वान्यत्वभेदास्तु पर्यायेणैव लौकिकैः । व्यवह्रियन्ते सततं वैदिकैरपि सर्वशः' इति पूर्वग्रन्थं मनसि निधाय सर्वपदार्थमाह **लौकिका वैदिकाश्चेति** । अत्र मूले पर्यायत्वकथनेनैव कल्पनागौरवादिदोषव्युत्पादनसिद्ध्योक्ताक्षेपपरिहारसिद्धेः किं तद्व्युत्पादनेनेत्यभिप्रेत्यात्र टीकायां कल्पनागौरवादिदोषाव्युत्पादनमिति गुरवः । तत्रायं भावः । यथा घटकलशकुम्भव्यवहाराणां पर्यायत्वादेकेनैव निमित्तेनैवोपपत्तौ घटत्वाद्यनेकनिमित्तकल्पने कल्पनागौरवम् । यथा च घटादिव्यवहारान् पर्यायेणैव कुर्वाणैस्तन्निमित्तमेकतयैव दृष्टमिति तत्त्रित्वाङ्गीकारे दृष्टहानिरदृष्टकल्पना च भवति । तथा पृथगादिव्यवहाराणामपि पर्यायत्वादेकेनैव स्वरूपभेदेनैवोपपत्तौ निमित्तत्रयकल्पने कल्पनागौरवं, नियमेनासहप्रयोक्तृभिः पृथक्त्वादीनामैक्यं दृष्टमिति तत्परित्यागेन त्रित्वकल्पनायां दृष्टहानिरदृष्टकल्पना च स्यादिति ।

स०व्र०— 'व्यवह्रियन्ते सततं वैदिकैरपि सर्वशः' इत्येतदनुसारेणाह **सर्व एवेति** ।

**॥ इति उक्तार्थोपपादनम् ॥**

* * *

**॥ अथ समवायस्य विशेषतो निराकरणे अन्ते भेदस्य वस्तुस्वरूपत्वे सर्वशून्यतापत्तिवादिमायावादिचोदनानामपाकरणम् ॥**

**॥ अथ तत्रादौ मायावादिनां चोदनानि ॥**

**२८२ सु०— अत्र मायावादिनश्चोदयन्ति । स्वरूपभेदानतिरिक्तयोरन्योन्याभावपृथक्त्वयोर्भावाभावधर्मत्वोपलम्भात् सर्वपदार्थानामपि भावाभावात्मतासिद्धिरिति यदुक्तं तदयुक्तम्, भेदस्य वस्तुस्वरूपत्वानुपपत्तेः । तथा हि । भेदस्तावद्विदारणात्मा, भिदिर्विदारण इति विदारणार्थभिदिधातुरूपत्वाद्भेदशब्दस्य । तस्य च विदारणात्मनो भावस्वभावत्वे तस्यापि विदारणं स्यात्, तथा तदेकदेशानामपि भेदः स्वभाव इति तत्रापि विदारणं भवेत्, इत्यनेन क्रमेण सर्वशून्यता स्यात् ।**

**किञ्च भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयात्, अभेदैकार्थसमवायिन्या एकताया भेदेन विरोधात् । एकत्वाभावेऽनेकत्वमपि न स्यात्, तत्समाहाररूपत्वात्, तत्कार्यत्वाद्वा तस्य । एकत्वानेकत्वविकलं च शून्यमेवापद्यते ।**

अपि च यदि भेदो वस्तुस्वरूपं स्यात् तदा प्रतियोग्यनपेक्षः प्रसज्येत, स्वरूपस्यानपेक्षत्वात् । न हि घटात्पटस्य भेद इतिवत् घटात्पट इति प्रतीतिरस्ति । 'घटो भिन्नः, घटस्य भेदः' इति विशेषणविशेष्यभावसम्बन्धप्रतिभासोऽपि भेदस्य वस्तुस्वरूपत्वे दुर्घटः स्यात्, न हि स्वयमेव स्वस्य विशेषणं सम्बन्धि वा भवति । संशयविपर्ययौ चैवमुच्छिद्येयाताम्; भेदाग्रहनिमित्तौ हि तौ भवतः; तत्र यदि धर्मिणमवगाह्य तौ भवतस्तदा तत्स्वभावभूतो भेदोऽपि गृहीत इति क्व तयोरवकाशः, न चेन्निर्विषयत्वात् सुतराम् । यदि चास्मादयं भिन्न इति प्रतियोगिघटिततया प्रतीयमानो भेदो वस्तुनः स्वरूपं स्यात् तदा तस्य सपरिकरस्य भेदस्य स्वरूपेऽन्तर्भावात् प्रतियोगिनोऽपि स्वरूपतया निमज्जनादद्वैतमतमेव पर्यवस्येदिति ।

परि०— **भिदिधातुरूपत्वादिति** । भिदिर् इत्यत्रेर् इत्संज्ञा वक्तव्येति वार्तिकेनेर् इत्यस्येत्संज्ञायां तस्य लोप इति तस्येतो लोपे घञ्प्रत्यये पुगन्तलघूपधस्य चेति गुणे कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां च स्वाद्युत्पत्तौ भेद इति सिद्धिरिति ज्ञेयम् । भेदशब्दः करणसाधन इति मन्वानस्य चोद्यमेतत् । **तस्येति** । भावस्य **विदारणं** द्वैधीभावः स्यादित्यर्थः । न तत्रैकतेति पदच्छेदः। **अभेदैकार्थेति** । अभेदेन सहैकार्थे निष्ठाया इत्यर्थः । एकत्वाभावे इति विभागः । मतभेदेनाह **तत्समाहारेति** । अनेकत्वस्यैकत्वानां समाहाररूपत्वादित्यर्थः । अनेकत्वं प्रति एकत्वं समवायिकारणमिति मतेनाह **तत्कार्यत्वाद्वेति** । **घटो भिन्न इति** । पटादिति योज्यम् । **एवमिति** । भेदस्य वस्तुस्वरूपत्व इत्यर्थः । **भेदाग्रहेति** । यत्कोटिकौ संशयविपर्ययौ तन्निरूपितपुरोवृत्तिनिष्ठभेदाज्ञानेत्यर्थः । **न चेदिति** । धर्मिणं विषयीकृत्य न भवतश्चेदित्यर्थः । **सुतरामिति** । संशयविपर्यययोरनवकाश इति योज्यम् । **सपरिकरस्येति** । सम्बन्धिसहितस्येत्यर्थः ।

यादु०— **विदारणात्मेति** । लवित्रादिवद्विदारकरूप इत्यर्थः । **भावस्वभावत्व इति** । भावसम्बद्धत्व इत्यर्थः । विदारकस्य लवित्रादेः स्वसम्बद्धविदारकत्वदर्शनादिति भावः । यद्यपि भेदस्य धर्मिस्वरूपत्वपक्षे नेदमापादकं सम्भवति तथाऽपि भेदस्य प्रतीयमानभावधर्मत्वान्यथाऽनुपपत्त्या भावसम्बन्धोऽप्यवश्यं वाच्य इत्यभिमानेनेदमुदितमिति ज्ञातव्यम् । **किञ्च भेदस्येति** । इदमपि प्रतीतिसिद्धं भेदस्य भावधर्मत्वं न हातुं युक्तमित्यभिप्रेत्येति ज्ञातव्यम् । **भेदेनेति** । भेदैकार्थसमवायिनाऽनेकत्वेनेत्यर्थः । एकत्वानेकत्वयोर्विरोधोपपादनाय तयोरभेदभेदसामानाधिकरण्यमत्रोक्तमिति ध्येयम् । एवं च 'अपि चैकत्वानेकत्वयोः सामानाधिकरण्यमि'ति सिद्धान्तग्रन्थः सङ्गच्छत इति ध्येयम् । **शून्यमेवेति** । [illegible]हितद्रव्यस्यैवाभावादिति भावः । **निर्विषयत्वादिति** । धर्मिज्ञानाभावादित्यर्थः । **सपरिकरस्येति** । प्रतियोगिघटितस्येत्यर्थः ।

**वं०प०— उपालम्भात्** इत्यनन्तरं धर्मधर्मिणोरैक्यादिति शेषः । **धर्मिणमिति** । **धर्मिणमवगाह्य** विषयीकृत्य **तौ** संशयविपर्ययौ जायेते इत्यर्थः । **तदिति** । धर्मीत्यर्थः । **न चेत्** संशयविपर्ययौ धर्मिणमवगाह्य नोत्पद्येते चेदित्यर्थः । **निर्विषयकत्वात्** निर्धर्मिकत्वात् । **सुतरामिति** । धर्मिज्ञानाभावादेव संशयविपर्ययौ कुत्र स्यातामित्यर्थः ।

**कं०रा०— विदारणार्थेति** । विदारणार्थभिदिधातोर्घञि पुगन्तलघूपदस्य चेति गुणे च भेदशब्दो निष्पन्न इति भावः । **एवमिति** । भेदस्य वस्तुस्वरूपत्व इत्यर्थः । **सपरिकरस्येति** । प्रतियोगिसहितस्येत्यर्थः।

**श्रीनिधि०— भिदिधातुरूपत्वादि** । भिदिधातोर्निष्पन्नरूपत्वादित्यर्थः । **तदेकदेशानां** भावाद्येकदेशानाम् । **इत्यनेन क्रमेणेति** । तदेकदेशक्रमेणेत्यर्थः । **शून्यता** निःस्वरूपत्वम् । **अभेदैकार्थसमवायिन्या इति** । अभेदेन सह एकस्मिन्नर्थे सम्बन्धायाः । अभेदव्याप्याया इति फलितोऽर्थः । **तत्कार्यत्वाद्वेति** । अपेक्षाबुद्धिद्वारा एकत्वकार्यत्वादित्यर्थः । मतभेदेनैवमुक्तिः । **न चेत् निर्विषयत्वादिति** । धर्मिणमनवगाह्य चेदित्यर्थः । **निर्विषयत्वात्** निर्विशेषत्वात् । **तदा तस्य सपरिकरस्येति** । 'लम्बकर्णम् आनीयताम्', 'नीलमानीयतामि'त्यादौ परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति दृष्टम् । कर्णनील्योरपि आनयनदर्शनात् । तद्वत् सप्रतियोगिकस्याभेदे प्रतियोगिनोऽपि तद्भवतीति भावः । **अद्वैतमेव पर्यवस्येदिति** । एकनिष्ठभेदस्य सर्वप्रतियोगिकत्वादिति भावः ।

**शे०वा०—** वैशेषिकमतनिरासपरपूर्वोत्तरग्रन्थसन्दष्टत्वाद्भेदस्येत्यादिग्रन्थोऽपि तन्मतनिरासपर इति मन्दाशङ्कापरिहाराय मायावादिमतनिरासपरतयोत्तरग्रन्थं योजयितुं तन्मतमुत्थापयति **अत्रेति** । तत्र हेत्वाकाङ्क्षायां निराकार्यतया मूले सूचितान् हेतूनुपपादयितुं प्रतिजानीते **तथाहीति** । मूले स्वशब्दोक्तां शून्यतापत्तिं तावदुपपादयति **भेदस्तावदिति** । अत्र भेदस्य विदारणत्वं नाम करणसाधनतया विदारकत्वमेवाभिमतम् । अन्यथा उत्तरदूषणासङ्गतेरित्यवधेयम् । **तस्य चेति** । **भावस्वभावत्वे** भावसम्बद्धत्वे चेत्यर्थः । विदारकस्य लवित्रादेः स्वसम्बन्धिविदारकत्वदर्शनाद्विदारकस्य भेदस्य स्वसम्बन्धिधर्मिविदारकत्वमवश्यं वाच्यम् । अन्यथा विदारकत्वरूपस्वभावहानिप्रसङ्गादित्यर्थः । यद्वा भेदस्य वस्तुस्वरूपत्वे प्रतियोगिनिरूप्यत्वमेव न स्यात् । वस्तुस्वरूपस्य प्रतियोग्यनिरूप्यत्वात् । तथा च धर्मिस्वरूपस्य भेदस्य प्रतियोगिनः सकाशाद्धर्मिणो विदारकत्वायोगाद्धर्मिण्येव विदारणं वाच्यम् । अन्यथा स्वभावहानिप्रसङ्गादित्यर्थः । यद्यपि स्वरूपभेदवादे भेदस्य धर्मिसम्बन्धाभावान्न तद्विदारकत्वप्रसञ्जनं युक्तिमत्, तथाऽपि भेदस्य धर्मत्वं चास्तीति भ्रान्त्या शङ्केयम् । अत एव परिहारे तथैव भावयिष्यतीति ध्येयम् । अस्त्वेवं धर्मिणो विदारणम् । तथाऽपि मूलोक्तः शून्यत्वप्रसङ्गः कथमित्यतस्तमुपपादयति **तथेति** ।

मूले स्वरूपत्वे बाधकतयोक्तां शून्यतां रीत्यन्तरेणाप्युपपादयति **किञ्चेति** । भेदो वस्तुधर्मः तत एव तन्निष्ठ इति भ्रान्त्या शङ्केयमिति द्रष्टव्यम् । नन्वेकताया भेदेन कथं विरोध इत्यतो भेदविरुद्धाभेदरूपैकार्थसमवेत-

त्वादेकताया भेदेन विरोध इत्यभिप्रेत्योक्तम् **अभेदैकार्थसमवायिन्या इति**। अत्रैकत्वस्य भेदेन सहोक्तरीत्या विरोधसिद्धौ तत्समानसंवित्संवेद्यत्वादेकत्वविरुद्धानेकत्वरूपैकार्थसमवायित्वाद्भेदस्यैकतया विरोध उक्तो भवति। ततश्च भेदाभेदविरोध एकत्वानेकत्वविरोधश्च पर्यवसन्नो वेदितव्यः। एकत्वानेकत्वविरोधपरिहारन्यायेन भेदाभेद-विरोधस्यापि परिहृतप्रायत्वादेकत्वानेकत्वविरोधाभावमात्रोपपादनमप्युपपन्नमेवेत्यवधेयम्। यद्वा भेदेनेत्यस्य भेदैकार्थसमवायिनाऽनेकत्वेनेत्यर्थः। एकत्वानेकत्वयोर्विरोधोपपादनार्थं तयोरभेदभेदसामानाधिकरण्यसङ्कीर्तनमत्र। एवञ्चापि चैकत्वानेकत्वयोः सामानाधिकरण्यमिति सिद्धान्तग्रन्थः सङ्गच्छत इत्यवधेयम्। अप्रयोजकत्वं परिहरति **तदिति**। एकत्वद्वयसमाहाररूपत्वादनेकत्वस्य नैकत्वाभावे तत्सम्भव इत्यर्थः। एकत्वस्यानेकत्वं प्रत्यसमवायिकारणत्वादसमवायिकारणीभूतैकत्वाभावे न तत्कार्यभूतानेकत्वसम्भव इत्याह **तत्कार्यत्वाद्वेति**॥ **शून्यमेवेति**। सङ्ख्यारहितस्य द्रव्यस्यासत्त्वादिति भावः। मूले 'ये वदन्ति च शून्यतामि'त्यत्र शून्यतां चेत्यन्वयमभिप्रेत्य चशब्दसूचितानि दूषणान्याह **अपि चेति**। **प्रतियोगीति**। तत्प्रतीत्यनपेक्षप्रतीतिविषय इत्यर्थः। विशेषणविशेष्यभावसम्बन्धप्रतिभासोऽपीत्यत्र विशेषणविशेष्यभावश्च सम्बन्धश्च विशेषणविशेष्य-भावसम्बन्धौ, तत्प्रतिभास इत्यर्थः। **घटो भिन्न इति**। विशेषणविशेष्यभावप्रतिभासो घटस्य भेद इति सम्बन्धप्रतिभास इति सम्बन्धः। उभयोर्दौर्घट्यमेवोपपादयति **नहीति**। **निर्विषयत्वादिति**। धर्मिज्ञाना-भावादित्यर्थः। **प्रतियोगिघटिततया** तद्विशिष्टतया। **सपरिकरस्येति**। प्रतियोगिघटितस्येत्यर्थः। **प्रति-योगिनोऽपीति**। परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति व्याप्तेरिति भावः।

**वा०र०— अत एव परिहार इति**। 'किञ्च विदारणमपि लवित्रादी'त्यादिनेति शेषः। प्रतियोग्यन-पेक्षत्वस्य सत्त्वादिष्टापादनत्वम् अत आह **तत्प्रतीतीति**। तद्रूपसम्बन्धः इति भ्रान्तिनिरासायाह **विशेषण-विशेष्यभावश्चेति**। उक्तभ्रान्तिनिरासकरणं च प्रतीतिद्वयविषयलाभायेति ज्ञेयम्।

**स०व्र०— अभेदैकार्थसमवायिन्या इति** इत्यस्यायं भावः। यद्धर्मस्य भेदस्य यत्र समवेतत्वं तत्र अनेकत्वस्यापि समवेतत्वम्। यत्र च भेदस्य धर्मिस्वरूपत्वं तत्र अनेकत्वमपि समवेतमिति। तथा च पटधर्म-भूतभेदस्य पटे समवेतत्वे पटस्याप्यनेकत्वं स्यात् इत्यापादनसम्भवेऽपि मया भेदस्य पटस्वरूपत्वाङ्गीकारात् पटोऽपि अनेकत्वं स्यात् इत्येव आपादनीयम्। पटस्यापि अनेकत्वं स्यादिति आपादनं तु व्यधिकरणमिति भावः।

**विट्ठल०— भिधिधातुरूपत्वादिति**। भिदि इत्यत्र इर् इत्संज्ञा वक्तव्येति वार्तिकेन इर् इत्यस्य लोपे भावे घञ्प्रत्यये लघूपधस्य चेति गुणे कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तौ भेद इति सिद्ध्यतीति ज्ञेयम्। भेदशब्दस्य भिद्यतेऽनेनेति भेद इति करणसाधनताभिप्रायेण शङ्कामुत्थापयति **तस्य चेति**। **विदा-रणात्मन इति**। लवित्रादिवद्विदारकरूपस्येत्यर्थः। **स्वभावत्वे** भावसम्बद्धत्वे। **तस्य च** विदारणभाव-स्यापि। विदारणं द्वैधीभाव इत्यर्थः। यद्यपि भेदस्य धर्मिस्वरूपत्वे नेदमापादकं सम्भवति। तथापि भेदस्य

स्वभावधर्मतया प्रतीतिबलेन भावसम्बन्धित्वं मत्वा चोद्यमिति ज्ञेयम् । **न तत्रैकता समवेयादिति** । तत्र भेदाभिन्नवस्तुनि एकता समवेता न स्यादित्यर्थः । कुतो नेत्यतो भेदैकत्वयोः परस्परविरहव्याप्तत्वेन विरोधादित्याशयेनाह **अभेदैकार्थेति** । तर्हि भेदस्वरूपस्यास्त्वनेकत्वमित्यत आह **एकत्वाभाव इति** । **तत्समाहारेति** । बह्वेकत्वसम्मेलनरूपत्वादित्यर्थः । **तत्कार्यत्वादिति** । अनेकत्वं प्रत्येकत्वस्य समवायिकारणत्वादिति भावः । मास्त्वेकत्वमनेकत्वं वेत्यत आह **एकत्वेति** । सङ्ख्यारहितस्य द्रव्यस्यैवाभावादिति भावः । अस्तु संशयविपर्ययोर्भेदाग्रहनिमित्तत्वं तथापि तदुच्छित्तिः कुत इत्यतः किं संशयविपर्ययौ धर्मिज्ञानानन्तरं भवत इत्युच्यते । उतानुपग्राह्यैव धर्मिणमिति विकल्पं मनसि निधाय क्रमेण दूषयति **तत्र यदीति** । **निर्विषयत्वादिति** । संशयादिधर्मिण एव बुद्धिस्थत्वादिति भावः । **सपरिकरस्येति** । प्रतियोग्यादिसकलसम्बन्धिसहितस्येत्यर्थः ।

**चषक— भिदिधातुरूपत्वादिति** । भिदेर्भावसाधनघञि निष्पन्नत्वाद्भेदशब्दस्येति भावः । **समवेयात्** वर्तेत । **भेदाग्रहनिमित्तौ** ज्ञानाभावाधीनौ ।

**॥ इति तत्र मायावादिनां चोदनानि ॥**

* * *

**॥ अथ ततस्तत्र तन्मायावादिचोदनानामपाकरणम् ॥**

**॥ अथ तत्रादौ भेदस्य स्वरूपत्वे सर्वशून्यतापादनं अयुक्तम् ॥**

**॥ अथ तत्राप्यादौ अन्यस्य प्रतियोगित्ववादिनां अद्भुतता ॥**

२८३ **सु०— तानपाकरोति भेदस्येति** ।

**अनु०— भेदस्य तु स्वरूपत्वे ये वदन्ति च शून्यताम् ।**
**अद्भुतास्ते यतोऽन्यस्य प्रतियोगित्वमिष्यते ॥**

'तु'शब्दः प्रकृताद्वैशेषिकादेर्व्यवच्छिन्दन् 'ये त्वि'ति सम्बध्यते । **स्वरूपत्वे** भेद्यवस्तुस्वरूपत्वे । **शून्यतां** सर्वस्यापीति शेषः । **च**शब्दः पूर्वोक्तदूषणसमुच्चयार्थः । **अद्भुता** आश्चर्याः, न लौकिकेष्वेवंविधा दृश्यन्ते नापि परीक्षकेष्विति यावत् । तत्कथमित्यतः शून्यतापत्तिं तावन्निराकरोति **यत इति** । यो भेदो यस्य स्वरूपमिष्यते तं भेदं प्रति ततः **अन्यस्यैव** वस्तुनः **प्रतियोगित्वमिष्यते** यतः तस्माद् **अद्भुतास्त** इति सम्बन्धः ।

**परि०— चशब्दः पूर्वोक्तेति ।** ये वदन्ति चेति चशब्दः शून्यतां चेत्यत्रान्वितः सन्प्रतियोग्यपेक्षत्वविशेषणविशेष्यभावादिप्रतिभासदौर्घट्यसंशयविपर्ययोच्छेदाद्वैतपर्यवसानरूपदूषणानि चेति ये वदन्तीति समुच्चयार्थ इत्येके । पूर्वं मायावादिनं प्रति तत्र तत्र यानि दूषणान्युक्तानि तैः सह लक्षणपरीक्षकबहिर्भावादिरूपाद्भुतत्वादिदूषणसमुच्चयार्थ इत्यन्ये । समवायदूषणेन समुच्चयार्थ इत्यपरे । संयोगश्च विभागश्च भेदश्चेत्यत्र पूर्वपक्षिणा भेदादेर्युगधर्मत्ववादिनोक्तसर्वाद्वैतदोषसमुच्चयार्थ इति केचित् ।

**यादु०— पूर्वोक्तदूषणेति ।** 'न तत्रैकता समवेयादि'त्यादिनोक्तदूषणानां समुच्चयार्थ इत्यर्थः ।

**वं०प०— पूर्वोक्तेति ।** किञ्च भेदस्येत्यादिना पूर्वोक्तेत्यर्थः ।

**श्रीनिधि०— पूर्वोक्तदूषणसमुच्चयार्थ इति ।** किं च भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयादित्याद्युक्तदूषणसमुच्चयार्थ इत्यर्थः ।

**शे०वा०—** मूले तुशब्दस्यानर्थक्यमाशङ्क्य विशेषार्थत्वान्न तदित्यभिप्रेत्य व्यावर्तकोपदर्शनपूर्वकं तदपेक्षितमन्वयमाह **तुशब्द इति ।** भेदस्य धर्मिस्वरूपत्वे शून्यतापत्तेर्बाधकत्वस्य मूलारूढतासिद्ध्यर्थं स्वरूपत्वत इत्येतत्तथा व्याचष्टे **स्वरूपत्वत इति । पूर्वोक्तदूषणेति ।** अपि च भेदो यदि वस्तुस्वरूपं स्यात् तदा प्रतियोग्यनपेक्षः प्रसज्येतेत्यादिपूर्वोक्तदूषणसमुच्चयार्थ इत्यर्थः ।

**विठ्ठल०— पूर्वोक्तेति ।** चशब्दः शून्यतां चेत्यत्रात्यन्वितः सन्नेकत्वानधिकरणत्वप्रतियोग्यनपेक्षत्वविशेषणविशेष्यभावादिप्रतीत्यनुपपत्तिसंशयाद्युच्छेदादिदूषणसमुच्चय इत्यर्थः ।

**।। इति अन्यस्य प्रतियोगित्ववादिनां अद्भुतता ।।**

* * *

**।। अथ तत्र ततोऽन्यस्य प्रतियोगित्वे उक्तदोषपरिहारप्रकारः ।।**

२८४ **सु०— अन्यस्य प्रतियोगित्वेऽपि कथमुक्तदोषपरिहार इत्यत आह प्रतियोगिनो हीति ।**

## अनु०— प्रतियोगिनो हि भेदोऽयं न तु स्वस्मात्

**हिशब्दः पूर्ववद्धेतौ । अयमित्येवम्भावस्य** प्रत्यक्षादिसिद्धतां सूचयति । **स्वस्मात्** धर्मिस्वरूपात् ।

इदमुक्तं भवति । विदारणात्मा हि भेदो यस्य यतस्तं विदारयेत् । न तु यं कमपि यतः कुतश्चित् । न (हि) च घटस्वरूपस्य भेदस्य घट एव प्रतियोगी, येन स्वस्मिन्विदारणं स्यात्; किन्तु घटादन्य एव । ततो विदारणं तु नानिष्टम्, तस्य शून्यतानापादकत्वादिति ।

**परि०— पूर्ववद्धेताविति** । हेत्वर्थमुपेत्य यत एवम् अतः तेऽद्भुता इति पूर्ववद्योजना कार्येत्यर्थः । **यस्य यत इति** । यद्धर्मिको यन्निरूपित इत्यर्थः । न च घट एव प्रतियोगीत्यस्य किन्तु घटादन्य एवेत्यन्वयः । **तत इति** । अन्यस्मादित्यर्थः ।

**यादु०— घटस्वरूपस्येति** । इदं च स्वमतानुसारेण । वस्तुतस्तु घटधर्मिकस्येत्यर्थः ।

**वं०प०— पूर्ववद्धेताविति** । व्युत्पत्तिरपि हि इत्यत्र हिशब्दो यथा यस्मादिति हेत्वर्थः तथाऽयमपीत्यर्थः । **कमपि** धर्मिणम् । **भावेति** । भेदनं भेद इत्येवंरूपेणेत्यर्थः ।

**श्रीनिधि०— हिशब्दः पूर्ववद्धेताविति** । हिशब्दः हेतौ वर्तते । स च पूर्ववद्धेत्वर्थक यत इतिवद् । अद्भुता इत्यनेन सम्बन्धः तस्येत्यर्थः । एवं च यतः कारणादन्यस्य प्रतियोगित्वमिष्यते, हि यतश्च प्रतियोगिन एव भेदः तस्मात् अद्भुता इति यत्पदेनैकसाध्यसम्बन्धः । न तु प्रत्येकमप्रयोजकत्वादित्युक्तं भवतीति द्रष्टव्यम् ।

**शे०वा०— पूर्ववद्धेताविति** । 'यतोऽन्यस्य प्रतियोगित्वमिष्यते' इति पूर्ववाक्यार्थस्य यथाऽद्भुतास्त इति साध्यभागेनान्वयस्तथा हिशब्दस्यायं भेदः प्रतियोगिन एव न स्वस्माद्धि यस्मात्तस्मादद्भुतास्त इति साध्यभागेनान्वय इत्यर्थः । **एवम्भावस्येति** । प्रतियोगिनः सकाशादेव धर्मिणो भेदको भेदो न स्वस्मात्स्वस्येत्येवम्भावस्येत्यर्थः । ननु विदारकस्य लवित्रादेः स्वसम्बन्धिकाष्ठादिविदारकत्वदर्शनाद्विदारकस्य भेदस्य स्वसम्बन्धिधर्मिविदारकत्वावश्यम्भावान्न प्रतियोगिन एव धर्मिणो विदारको भेद इति नियमः । अस्तु वा उक्तनियमः तथाऽपि घटस्यैव तत्र प्रतियोगित्वात् स्वस्माद्धर्मिस्वरूपविदारकत्वं तस्यावश्यकमिति कथं न तत्प्रसङ्गः । अस्तु वाऽन्यस्यैव प्रतियोगित्वनियमः तथाऽपि तस्माद्धर्मिणो विदारकत्वाभ्युपगमे कथं न शून्यभावापत्तिः । विदारणमात्रस्यैव तदापादकतया तदभ्युपगमे शून्यत्वापत्तेर्वज्रलेपायमानत्वादित्यत आह **इदमुक्तं भवतीति । घटस्वरूपस्येति** । इदं च स्वमतानुसारेण । वस्तुतस्तु घटधर्मिकस्येत्यर्थः । **घट एव प्रति-**

**योगीति** । तथा सति तस्य घटधर्मिकत्वं न स्यात् । यो यत्प्रतियोगिको नासौ तद्धर्मिक इति नियमात् । अन्यथा स्थविरप्रतियोगिकस्यापरत्वस्यापि स्थविरधर्मत्वप्रसक्तेरिति भावः । इतीत्यस्येदमिति पूर्वेण सम्बन्धः ।

**विठ्ठल०— एवम्भावस्येति** । भेदो यतः प्रतियोगिनस्तस्मादेव भेदं विदारयतीत्येवंरूपत्वस्येत्यर्थः । मूलाभिप्रेतमुक्तदोषपरिहारं दर्शयति **इदमुक्तं भवतीति** । **यस्य यत इति** । **यस्य** धर्मभूतस्य । **यतः** प्रतियोगिनः सकाशादित्यर्थः ।

**॥ इति अन्यस्य प्रतियोगित्वे उक्तदोषपरिहारप्रकारः ॥**

* * *

**॥ अथ तत्र तत उक्तदोषपरिहारस्य अवक्तव्यताया उपपादनम् ॥**
**॥ अथ तत्रादौ भेदशब्दस्य करणसाधनतामभ्युपगम्यैवैतत्परिहाराभिधानम् ॥**

२८५ **सु०— किञ्च भिद्यतेऽनेनेति यदि भेदशब्दः करणसाधनो भवेत् तदा भेदः कमपि विदारयेत् । न चैवम्, भावसाधनत्वाङ्गीकारात् । अतोऽभ्युपगम्यैव करणसाधनतां अयं परिहारः अभिहित इत्याशयवानाह कथञ्चनेति ।**

**अनु०— कथञ्चन ।**

**इदमुदितमिति शेषः ।**

**परि०— अयं परिहार इति** । यतोऽन्यस्येत्यादिपरिहार इत्यर्थः । **इदमिति** । यतोऽन्यस्य प्रतियोगित्वमित्यादिकमुदितमित्यर्थः ।

**गु०दी०— भावसाधनत्वाङ्गीकारात्** इत्यत्र भेदनं भेद इति भावसाधनत्वाङ्गीकारादित्यर्थः ।

**वं०प०— कथञ्चन इदमुदितम्** अभ्युपगम्योक्तमित्यर्थः ।

**कं०रा०—** कथञ्चनेत्यस्यापूर्णत्वाच्छेषं पूरयति **इदमिति** । भेदस्य वस्तुस्वरूपत्वे तस्य विदारणं स्यादित्येतदित्यर्थः । कथञ्चनेदमुदितमित्यनेन विवक्षितम् ।

**श्रीनिधि०— भावसाधनत्वाङ्गीकारादिति** । भेदकमेव हि कुठारादिकं विदारणं दृष्टं लोके न तु भेदनमिति भावः ।

**शे०वा०**— कथञ्चनेत्यनेनोक्तपरिहारस्यावक्तव्यत्वं मूले उक्तं तदयुक्तम् । तथा सत्युक्तशङ्कापरिहारोपायाभावेन तदनिवृत्तिप्रसङ्गात् । निवृत्तौ वाऽस्य परिहारस्यावक्तव्यत्वप्रसङ्गाच्चेत्यतः प्रकारान्तरेण शङ्कापरिहारमेतत्परिहारोक्तेर्गतिं चोपदर्शयन्नेव कथञ्चनेत्युक्तावक्तव्यतामुपपादयति **किञ्चेति** ।

**वा०र०**— अवश्यावक्तव्यत्वं मूले उक्तमिति पाठः ।

**विठ्ठल०**— **इदमुदितमिति शेष इति** । तथा च हि यस्मादयमेवम्भूततया प्रत्यक्षादिसिद्धभेदः प्रतियोगिनः सकाशादेव भेद्यं विदारयेत् । न तु स्वस्माद्भेद्यादेव भेद्यं विदारयेदितीदं दूषणं कथञ्चन भेदशब्दस्य करणसाधनत्वमभ्युपगम्योदितं न तु भेदनं भेद इति वास्तवार्थमपेक्ष्येति मूलार्थः ।

**चषक**— **करणसाधनः** करणप्रत्यायकघञन्तः । **भावसाधनत्वाङ्गीकारात्** धात्वर्थानुवादकघञन्तत्वोपगमात् ।

**॥ इति भेदशब्दस्य करणसाधनतामभ्युपगम्यैवैतत्परिहाराभिधानम् ॥**

* * *

**॥ अथ तत्रान्ते धर्मिभिन्नधर्मभेदवादे कथञ्चिदस्य वक्तव्यता न तु स्वरूपभेदवादे ॥**

२८६ **सु०— किञ्च विदारणमपि लवित्रादि, यत्सम्बन्धि तद्विदारयति न तु स्वात्मानम् । अतो धर्मभेदवादे कथञ्चिदिदं वक्तव्यम्, स्वरूपभेदवादे तु क्वास्यावकाशः ।**

**परि०**— करणसाधनत्वेऽपि परोक्तदोषो न लगतीत्याह **किञ्च विदारणमिति** । **लवित्रादीति** । छेत्रादीत्यर्थः । आदिपदेन संहत्रदिर्ग्रहणम् । **इदं वक्तव्यमिति** । धर्मिभूतघटादेर्विदारणमितीदमित्यर्थः ।

**गु०दी०**— **अतो धर्मभेदवाद** इत्यत्र पदार्थस्य धर्मभूतो भेद इति वादे तदाधारसम्बन्धिलगुडमिव स्वयं यत्पदार्थसम्बन्धि तं भिन्द्यात् । पदार्थाभिन्न इति पक्षे पदार्थस्यैव लगुडस्थानीयत्वेन प्रतियोगितया स्वसम्बन्धिपदार्थान्तरमेव भेदयेदिति भावः ।

**कं०रा०**— युक्त्यन्तरमाह **किं चेति** ।

**यादु०**— **धर्मभेदवाद इति** । धर्मिभिन्नधर्मभेदवाद इत्यर्थः । तत्रैव धर्मत्वेन सम्बद्धत्वसिद्धिसम्भवेनापादकासिद्धेरभावादिति भावः । तत्रापि घटं स्वस्मान्न विदारयति । अन्यस्माद्विदारणं तु नानिष्टमित्यभिप्रेत्य **कथञ्चिदित्युक्तम्** । **स्वरूपभेदेति** । न चैवं भेदस्य प्रतीयमानभावधर्मत्वानुपपत्तिः । अभेदेऽपि विशेषबलेन तदुपपत्तेः । तथा चाभिन्ने भेदे धर्मत्वस्य धर्मिसम्बन्धाभावेऽपि सम्भवादापादकासिद्धिरत्रेति भावः ।

**वं०प०**— करणसाधनतापक्षे दोषान्तरमाह **किञ्चेति । अतो धर्मेति** । अयमर्थः । यदि विदारकात्मकभेदरूपो धर्मो धर्मिणः सकाशाद्भिन्नः स्यात् तर्हि धर्मिणि वर्तत इति स्यात् । तथा च यथा केशाद्भिन्नं लवित्रादि यत्केशादिसम्बन्धि तद्विदारयति तद्वदयं भेदोऽपि स्वसम्बद्धं धर्मिणं विदारयेदिति स्यात् । न चैवम् । किन्तु तस्य विदारकस्वरूपस्य भेदस्य धर्मिस्वरूपत्वाङ्गीकाराद्धर्म्यपि लवित्रादिवदन्यस्य विदारकमेव जातम् । न तु स्वात्मनः स्वयं विदारकम् । लवित्रादावदर्शनात् । तस्मात् स्वस्मिन्नपि विदारणापत्तिरिति दूषणमलग्नकमिति ।

**श्रीनिधि०**— अभ्युपगमवादत्वं प्रकारान्तरेण शङ्कासम्भवमुखेन दर्शयति **किञ्चेति । लवित्रादिकमिति** । कुडुगोलु इत्यपभ्रष्टसंज्ञितं वस्तु लवित्रमित्युच्यते । धर्मभेदवादे पदार्थधर्मभेदवादे । तन्मतेऽपि भेदनस्यैव धर्मत्वमभ्युपगतम् । न तु भेदकस्येति **कथञ्चित्** इत्युक्तम् । **क्वास्यावकाश इति** । सर्वथावकाशो नास्ति । विदारकत्वाभावात्सम्बन्धाभावाच्चेत्यर्थः ।

**शे०वा०**— ननु तथाऽपि करणसाधनत्वाश्रयणे प्राप्तशङ्कापरिहारायोक्तपरिहारस्य आवश्यकत्वप्राप्त्या तदवक्तव्यतापरकथञ्चनपदास्वारस्यमित्यतः तदाश्रयणेऽप्युक्तदोषाप्रसङ्गव्युत्पादनेन तस्यावक्तव्यतामुपपादयति **किञ्चेति** । विदारणं विदारकमित्यर्थः । **न तु स्वात्मानमिति** । स्ववृत्तिविरोधादिति भावः । **धर्मभेदवाद इति**। धर्मिभिन्नधर्मभेदवाद इत्यर्थः । धर्मभेदवादे भेदस्य वस्तुधर्मत्वेन तत्सम्बन्धित्वात् तद्विदारकत्वप्रसक्तिरित्यर्थः । विदारकस्य लवित्रादेर्निष्प्रतियोगिकत्वेन स्वसम्बन्धिमात्रविदारकतायामपि भेदस्वरूपस्य विदारकस्य सप्रतियोगिकत्वेन प्रतियोगिनः सकाशादेव धर्मिणो विदारकत्वं न तु स्वस्मादिति न शून्यत्वापत्तिरिति धर्मभेदवादेऽपि परिहारः सम्भवतीत्यभिप्रेत्योक्तं **कथञ्चिदिति** ।

**वा०र०**— तदाश्रयणेऽपीति पाठः । प्रसक्तिरित्यर्थ इति पाठः ।

**विठ्ठल०**—**भिन्नधर्मभेदवाद इति** । यन्मते धर्मधर्मिणोर्भेदः तन्मते भेदः स्वसम्बन्धिधर्मिणं लवित्रादिवत् विदारयेदिति वक्तुं शक्यते । भेदस्य धर्मिस्वरूपतायां तु न स्वधर्मिविदारकत्वम् । लवित्रस्य स्वविदारकत्वादर्शनादिति भावः । तत्रापि धर्मिणं न स्वस्माद्विदारयति । अन्यस्माद्विदारणं तु नानिष्टमित्यभिप्रेत्य कथञ्चिदित्युक्तम् ।

**चषक**— **लवित्रादि** । छिदिक्रियासाधनं कुठारादि ।

**॥ इति धर्मिभिन्नधर्मभेदवादे कथञ्चिदस्य वक्तव्यता न तु स्वरूपभेदवादे ॥**
**॥ इति उक्तदोषपरिहारस्य अवक्तव्यताया उपपादनम् ॥**

* * *

**॥ अथ तत्र तत उक्तप्रकारेणैव 'भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयात्' इति चोद्यस्य निरासः ॥**

२८७ **सु०— भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयादित्यप्यनेनैव निरस्तम् ।**

**न ह्येकताऽनेकते स्वरूपेण विरुद्धे, एकस्यैव घटस्यान्यापेक्षयाऽनेकत्वदर्शनात्; किन्तु यदपेक्षयाऽनेकस्तदपेक्षयैवैक इति विरुद्धम् । तत्र घटस्य परस्मात्प्रतियोगिन एव भेद इति तदपेक्षयैवानेकत्वं स्वापेक्षया त्वेकत्वमिति को विरोधः ।**

**अपि चैकत्वानेकत्वयोः सामानाधिकरण्यं वा विरुद्धं धर्मधर्मिभावो वा । आद्ये नैकताया भेदेन विरोधः, भेदस्य स्वरूपत्वेनैकतासामानाधिकरण्याभावात् । न द्वितीयः, एकं द्वित्वमिति दर्शनात् ।**

**एकत्वानेकत्वाभावेऽपि शून्यत्वं कुतः, वैशेषिकादीनां गुणादिवन्मायावादिनां ब्रह्मवदगुणस्यापि सत्त्वोपपत्तेरिति ।**

**परि०— भेदस्येति** भेदशब्दोऽत्रानेकत्वपर इत्याह । **गुणादिवत्** गुणादेरिव । **ब्रह्मवत्** ब्रह्मण इवेत्यर्थः । **अगुणस्येति** । एकत्वानेकत्वसङ्ख्यारूपगुणहीनस्येत्यर्थः ।

**यादु०— धर्मधर्मिभाव इति** । भेदस्य वस्तुस्वरूपत्वे तत्समनियतानेकत्वस्यापि तथात्वप्राप्तावेकत्वरूपो धर्मः तत्र न समवेयादित्यापादने एकत्वस्यानेकत्वधर्मत्वं विरुद्धं इत्यर्थप्रतीतेः अयं कल्प आशङ्कित इति ध्येयम् । **भेदेनेति** । भेदनियतानेकत्वेनेत्यर्थः । **भेदस्येति** । तन्नियतानेकत्वस्येत्यर्थः ।

**वं०प०— भेदस्येति** । अनेकत्वैकार्थसमवायिनो भेदस्येत्यर्थः । **सामानाधिकरण्याभावादिति** । तस्य भेदगर्भत्वादिति भावः । **द्वित्वमिति** । घटपटनिष्ठं द्वित्वमेकं स्तम्भकुम्भनिष्ठं तु द्वित्वं द्वितीयमिति प्रयोगदर्शनाद् द्वित्वं धर्मितयैकत्वं धर्मतया प्रतीयत इत्यर्थः । **एकत्वानेकत्वाभावेऽपि** एकत्वानेकत्वरूपगुणाभावेऽपीत्यर्थः ।

**कं०रा०— अनेनैवेति** । कथञ्चनेदमुदितमित्येतत्सूचितेन वक्ष्यमाणदूषणेनैवेत्यर्थः । **एकमिति** । एकं द्वित्वमित्येकत्वस्य धर्मत्वेन द्वित्वस्य धर्मित्वेन चावभासदर्शनादेकत्वानेकत्वयोर्धर्मधर्मिभावो न विरुद्ध इति भावः ।

**श्रीनिधि०**— 'अभेदैकार्थसमवायिन्या एकताया भेदेन विरोधादि'ति वदतोऽयमाशयः भेदे सति अनेकत्वं भवति । एवञ्चैकताया न तत्रावकाशः, तयोर्विरोधादिति । तत्राह **न ह्येकतानेकते स्वरूपेण विरुद्धे इति** । गोत्वाश्वत्ववदिति शेषः । **आद्ये नैकताया भेदेन विरोध इति** । एकत्वानेकत्वयोः सामानाधिकरण्यं विरुद्धम् । एकस्मिन्वस्तुनि भेदे अङ्गीक्रियमाणे द्वयोरेकत्र समावेशः स्यान्न च तद्युज्यते । तस्मादेकत्वविरुद्ध-व्याप्यत्वेन विरोधो भेदो नाङ्गीकर्तुमुचित इति हि परस्याभिमतम् । न च तद्युज्यते । भेदस्यैकताविरोधाभावात् । एकतासामानाधिकरण्ये हि तद्विरुद्धव्याप्यत्वेन विरोधः स्यान्न चैवम् । तस्य धर्मिस्वरूपताङ्गीकारात् । एवं च यदि भेद एकतासामानाधिकरण्यः स्यात् तर्हि एकतानेकतयोः सामानाधिकरण्यं स्यादिति तर्कस्यापादकासिद्धि-रुक्ता भवति । एकताव्यधिकरणस्य तस्य तस्मिन् तद्विधासम्पादकत्वात् इत्यर्थः ।

**शे०वा०**— 'भेदस्य धर्मिस्वरूपत्वे न तत्रैकता समवेयादि'त्युक्तदिशा शङ्कितायाः शून्यताया मूले पृथगपरिहारात् न्यूनत्वमित्याशङ्क्य प्रतियोगिनो हीत्यादिमूलेनैव तत्परिहारसिद्धेर्न पृथक् तत्परिहार इत्यभिप्रेत्य तत्परिहारकतयाऽप्येतदेव वाक्यं योजयितुमाह **भेदस्येति** ।

नन्वत्र घटस्य प्रतियोग्यपेक्षया भिन्नत्वं स्वापेक्षया त्वभिन्नत्वमुच्यते न त्वेकत्वानेकत्वविरोधः तत्कथ-मनेन शङ्कापरिहारः । न च यो यदपेक्षयाऽनेको नासौ तदपेक्षयैको यदपेक्षया चैकस्तदपेक्षया नानेक इत्येव-मापेक्षिक एवैकत्वानेकत्वयोर्विरोधः स च परिहृत एव । घटस्य प्रतियोगिनोऽन्यस्माद्भिन्नत्वोक्त्या तदपेक्षया अनेकत्वसूचनमुखेन तदपेक्षयैकत्वाभावस्य स्वापेक्षया च अभिन्नत्वोक्त्या तदपेक्षयैकत्वसूचनमुखेन तदपेक्षया अनेकत्वाभावस्य च सूचनेन यदपेक्षया अनेक एको वा तदपेक्षया एकत्वस्यानेकत्वस्य चाप्राप्तेरिति वाच्यम् । य एको नासौ कथमप्यनेको, यश्चानेको नासौ कथमप्येक इत्येकत्वानेकत्वयोः स्वरूपेणैव विरोधस्य सम्भवेन तत्परित्यागेन आपेक्षिकविरोधकल्पनायोगादित्यतः स्वरूपेण विरोधस्यासम्भवदुक्तिकत्वोपपादनपूर्वकमापेक्षिक-विरोधमेव परिशिष्य तन्निरासपरतया वाक्यं योजयति **न हीत्यादिना** । **धर्मधर्मिभाव इति** । भेदस्य वस्तु-स्वरूपत्वे तत्समनियतानेकत्वस्यापि तथात्वप्राप्तावेकत्वरूपो धर्मः तत्र न समवेयादित्यापादने एकत्वस्यानेकत्व-धर्मित्वं विरुद्धमित्यर्थप्रतीतेरयं कल्प आशङ्कित इति ध्येयम् । **भेदेनेति** । तन्नियतानेकत्वेनेत्यर्थः । **भेदस्येति** । तन्नियतानेकत्वस्येत्यर्थः ।

**वा०र०**— मूले **भेदस्य स्वरूपत्वेनेति** वाक्ये एकतायाः स्वरूपत्वेनेत्यपि ग्राह्यम् । सामानाधि-करण्याभावस्योभयथापि सम्भवात् ।

**विठ्ठल०**— 'भेदस्य वस्तुस्वरूपत्वे न तत्रैकतासमवेयादि'त्यत्र भेदस्यानेकत्वसमवायिन्येव भावादेक-त्वानेकत्वयोर्विरोधादित्यभिप्रेतं न चैतद्युज्यत इत्याह **न ह्येकतेति** । **धर्मधर्मिभावो वेति** । अस्मद्रीत्या भेदस्य धर्मिस्वरूपत्वे तत्समनियतानेकत्वस्यापि तथात्वप्राप्त्या एकत्वरूपधर्मस्यापि धर्मिस्वरूपत्वेन एकत्वस्यानेकत्व-

धर्मवत्त्वं विरुद्धमित्यपि प्रतीतेरेतद्विकल्पावकाश इति ज्ञेयम् । **भेदेनेति** । भेदनियतानेकत्वेनेत्यर्थः । **एकता-सामानाधिकरण्येति** । भेदस्य भेदसमनियतानेकत्वस्योक्तरीत्या धर्मिस्वरूपत्वेन धर्मिणि विद्यमानैकतया सामानाधिकरण्याभावादित्यर्थः । **एकं द्वित्वमिति** । द्वित्वस्यैकत्वधर्मवत्वदर्शनादित्यर्थः ।

**चषक—** **सामानाधिकरण्यम्** एकाश्रयवृत्तित्वम् । **गुणादिवदिति** । गुणादीनां निर्गुणत्वाङ्गीकारादिति हृदयम् । **ब्रह्मवदिति** । निर्विशेषत्वोपगतेरिति भावः । वतिद्वयमपि षष्ठ्यन्तप्रकृतिकम् ।

**॥ इति उक्तप्रकारेणैव 'भेदस्य वस्तुस्वरूपत्वे न तत्रैकता समवेयात्' इति चोद्यस्य निरासः ॥**

* * *

**॥ अथ तत्र ततः प्रतियोगिनिरूप्यस्यापि भेदस्य वस्तुस्वरूपत्वे विरोधाभावः ॥**

**२८८ सु०— 'ननु भेदो वस्तुस्वरूपं चेत् प्रतियोगिनिरूप्य एव न स्यात्, स्वरूपस्य तदभावात् । अतो नायं परिहारो युज्यते । तथा च स्वस्मिन्नेव विदारणे पुनः शून्यतैवे'ति चेन्न, स्वतः परतोऽपि व्याप्त्यसिद्धेः । यथा (हि) परनिरूप्यमपि ब्रह्मणो जीवैक्यं ब्रह्मस्वरूपं मायावादिनाऽङ्गीकृतम्, अस्माभिश्च परत्वादिकं द्रव्यस्वरूपम्; तथा प्रतियोगिनिरूप्यस्यापि भेदस्य वस्तुस्वरूपत्वे को विरोधः ।**

**परि०— नायं परिहार इति** । भेदस्यान्यनिरूप्यत्वेनोक्तः परिहार इत्यर्थः । **तथा चेति** । विदारकस्य भेदस्यान्यनिरूप्यत्वायोगे स्वनिरूप्यत्वावश्यम्भावात् स्वस्मिन्नेव विदारणं स्यादित्यर्थः । **परत्वादिकमिति** । दिगादिनिरूप्यं परत्वं अपरत्वं चेत्यर्थः ।

**वं०प०—** कुत इत्यत आह **स्वरूपस्येति** । वस्तुस्वरूपस्य प्रतियोगिनिरूप्यत्वाभावेन तदात्मकभेदस्यापि प्रतियोगिनिरूप्यत्वं न स्यात् अतः 'प्रतियोगिनो हि भेदोऽयं न तु स्वस्मादि'ति परिहारोऽयुक्त इत्यर्थः। ततोऽपि किमित्यत आह **तथा चेति** । तथा च 'प्रतियोगिनो ही'ति समाधेरयुक्तत्वाद्विदारकात्मनो भेदस्य धर्मिस्वरूपत्वे स्वस्मिन्नेव विदारणप्राप्त्या शून्यतापत्तिरिति भावः । **स्वतः परत इति** । स्वरीत्या शङ्कितुर्मायावादिनो रीत्या, परेषां प्रतिवादिनामस्माकं च रीत्येत्यर्थः । **व्याप्तीति** । यत्परसापेक्षं तत्परनिरपेक्षस्वरूपं न भवतीति व्याप्तिरित्यर्थः । उभयं क्रमेणोपपादयति **यथेत्यादिना** । **परेति** । जीवरूपप्रतियोगीत्यर्थः। **ब्रह्मस्वरूपं** परनिरपेक्षब्रह्मस्वरूपाभिन्नम् । **परत्वेति** । अयमस्मात्पर इति प्रतियोगिसापेक्षं परत्वादिकं तन्निरपेक्षपिण्डरूपद्रव्येणाभिन्नमित्यर्थः । **वस्त्विति** । तदनिरूप्यवस्तुस्वरूपत्व इत्यर्थः ।

**कं०रा०— अस्माभिश्चेति** । अस्माभिश्च परनिरूप्यमपि ।

**श्रीनिधि०— नायं परिहार इति** । 'यतोऽन्यस्य प्रतियोगित्वमिष्यते प्रतियोगिनो हि भेदोऽय'-मित्युक्त इत्यर्थः । **तथा चेति** । अन्यनिरूप्यत्वायोगेन अन्यस्य प्रतियोगित्वासम्भवे स्वस्यैव तद्वाच्यम् । एवञ्च स्वस्मिन्नेव विदारणं वाच्यमिति भावः । **स्वतः परतः** । स्वपरीत्येत्यर्थः ।

**शे०वा०— अयं परिहार इति** । 'यतोऽन्यस्य प्रतियोगित्वमिष्यते, प्रतियोगिनो हि भेदोऽयमि'-त्युक्तपरिहार इत्यर्थः । **स्वस्मिन्नेव विदारण इति** । अविदारणे विदारकत्वस्वभावहान्यापत्तेरिति भावः । स्वतो व्याप्त्यसिद्धिं तावदुपपादयति **यथा हीति** । **परनिरूप्यमिति** । ऐक्यस्य परनिरपेक्षत्वे तत्त्वंपदार्थपराणां सत्यं ज्ञानं विज्ञानमित्यादीनामैक्यमहावाक्यैकवाक्यत्वाभावेन वैयर्थ्यं स्यादिति भावः । **ब्रह्मस्वरूपमिति** । ऐक्यस्य चास्वरूपत्वे च सत्त्वेऽद्वैतहानिः । मिथ्यात्वे च तत्परस्य तत्त्वमसीत्यादेरतत्त्वावेदकत्वप्रसक्तेरिति भावः । परतो व्याप्त्यसिद्धिमुपपादयति **अस्माभिश्चेति** । परत्वादिकमित्यतःपूर्वं परनिरूप्यमपीत्यनुवर्तते । आदिपदेनापरत्व-परिग्रहः ।

**वा०र०— अपरत्वपरिग्रह इति** । यद्यपि द्वित्वादेरपि सङ्ग्रहो व्याख्येयः तथापि अत्यन्ताभेदस्य प्रकृतत्वात् तत्परित्यागः ।

**विठ्ठल०— नायं परिहार इति** । 'यतोऽन्यस्य प्रतियोगित्वमिष्यते, प्रतियोगिनो हि भेदोऽयम्' इत्युक्तपरिहार इत्यर्थः । भेदस्य परनिरूप्यत्वे विदारणात्मा हि भेदो यस्य यतः तं ततो विदारयेदित्युक्तसमानं युज्यते भेदस्य स्वरूपत्वे तु स्वरूपवत्तस्य निरूप्यत्वाभावेनोक्तपरिहारायोगात् स्वस्मिन्नेव विदारकताप्राप्त्या शून्यतापत्तितादवस्थ्यमिति भावः । **परत्वादिकमिति** । अयमस्मात्पर इत्यन्यनिरूप्यमित्यर्थः । दिगादिनिरूप्य-मित्येके । भेदस्य प्रतियोगिनिरूप्यत्वाद्वस्तुस्वरूपस्य तदभावान्न भेदस्य वस्तुस्वरूपत्वमिति शङ्किते प्रतियोगि-निरूप्यस्यापि तदनिरूप्यवस्तुस्वरूपत्वस्य स्वपरसम्मतत्वेन यत्परनिरूप्यं तत्स्वरूपं नेति व्याप्तिभङ्ग इति दूषणमुक्तम् ।

**चषक— प्रतियोगिनिरूप्यः** प्रतियोगिप्रतिपत्त्यधीनप्रतिपत्तिपूर्वकः । **तदभावात्** तादृशप्रतिपत्तिक-त्वाभावात् । **स्वतःपरतः** वादिप्रतिवादिदिशा ।

**॥ इति प्रतियोगिनिरूप्यस्यापि भेदस्य वस्तुस्वरूपत्वे विरोधाभावः ॥**

* * *

**॥ अथ तत्र ततो भेदस्य परप्रतियोगितोपपत्तेः स्वस्मिन्विदारणापत्त्यभावः ॥**

२८९ **सु०— किञ्च भेदो वस्तुस्वरूपमिति ब्रुवाणो वस्तुस्वरूपस्यापरनिरूप्यत्वं कथमभ्युपेयात् । एतावत्तु स्यात्, एकस्यैव वस्तुनः प्रतियोगिप्रतीतिमपेक्ष्यानपेक्ष्य च प्रतीतिः कथम् । तत्रापि न सैव प्रतीतिरुभयीं गतिमश्नुते, किन्तु प्रतीतिद्वयमेतत् । तच्चैकस्मिन्नपि वस्तुनि विशेषबलमवलम्ब्य समञ्जसं भविष्यतीति भेदस्य परप्रतियोगितोपपत्तेः कुतः स्वस्मिन्विदारणापत्तिः ।**

**परि०— कथमिति** । कथंशब्दानन्तरम् इतिशब्दोऽध्याहार्यः । पूर्वेणान्वयः । समाधत्ते **तत्रापीति** । **सैवेति** । अयं घट इति प्रतीतिरित्यर्थः । **उभयीमिति** । अन्यनिरूप्यत्वानिरूप्यत्वरूपाम् ।

**गु०दी०— वस्तुस्वरूपस्यापरनिरूप्यत्वम्** इत्यत्र वस्तुस्वरूपस्य भेदस्य **अपरनिरूप्यत्वं** स्वरूपेणैवापरनिरूप्यत्वम् । **एकस्यैव वस्तुन** इत्यस्य भेदस्य वस्तुनैक्ये वस्त्वेव प्रतियोगिप्रतीतिसापेक्षं तन्निरपेक्षं च स्यादित्यर्थः । **प्रतीतिद्वयम्** इत्यस्य अयं घट इत्येका प्रतीतिः पटाद्भिन्नेत्यपरा । इदं च विशेष्यप्रतियोगिघटितभेदप्रतीतिमपेक्ष्योक्तम् । वस्तुगत्या अयं घट इत्येव प्रतीतिः सर्वतो व्यावृत्तं घटं विषयीकुर्यात् । यतः सर्वाऽपि प्रतीतिः पदार्थान्तरासङ्कीर्णतत्तत्पदार्थविषयिणीति सिद्धान्तरहस्यम् ।

**यादु०— अपरनिरूप्यत्वमिति** । परनिरूप्यत्वाभावमित्यर्थः । कथमित्यस्यानन्तरम् इतिशब्दोऽध्याहार्यः । तथा च विरोधेन परनिरूप्यत्वासम्भवात् स्वस्मिन्नेव विदारणं स्यादित्याशयः । उत्तरमाह **तत्रापीति** । तत्रापि कुतः स्वस्मिन्विदारणापत्तिरित्यन्वयः । **सैवेति** । या, अयं घट, इति प्रतीतिरित्यर्थः । **प्रतीतिद्वयमिति** । आदौ घट इति घटत्वेन प्रतीतिः, पश्चान्न पट इति पटभिन्नत्वेन तस्यैव प्रतीतिरिति प्रतीतिद्वयमित्यर्थः ।

**वं०प०— भेदः** परनिरूपितत्वस्वभावः । **वस्तुस्वरूपस्य** परनिरूप्यभेदाभिन्नस्य । **अपरनिरूप्यत्वं** परनिरूप्यत्वाभावम् । अन्यथा विरुद्धधर्माधिकरणत्वेन भेदस्य वस्तुस्वरूपत्वमेव न स्यादित्यर्थः । **अपेक्ष्य** भेदांशे । **अनपेक्ष्य** वस्तुस्वरूपांशे । कथमित्येतावत् स्यादित्यन्वयः । एतावदेवाशङ्कनीयं स्यादित्यर्थः । तत्रोत्तरं **तत्रापीति** । **सैवेति** । एकैव भेदप्रतीतिः एकैव वस्तुप्रतीतिर्वा । **उभयीं** प्रतियोग्यादिप्रतीतिसापेक्षत्वं तदनपेक्षं चेति द्वयीं गतिं नाश्नुत इत्यर्थः । **द्वयम्** अभेदेऽप्येकस्मिन्नेव वस्तुनि प्रतियोगिसापेक्षा न पट इति भेदप्रतीतिरेका, तन्निरपेक्षा अयं घट इति घटत्वेन वस्तुप्रतीतिरेकेति प्रतीतिद्वयम् । नन्वभेदादेव प्रतीतिद्वयमित्येतद्विरुद्धमित्यत आह **तच्च प्रतीतिद्वयमिति** । **प्रतियोगितेति** । प्रतियोगिकत्वेत्यर्थः ।

**श्रीनिधि०— अपरनिरूप्यत्वं** परनिरूप्यत्वाभावः ।

**शे०वा०—** एवं तर्कमूलभूताया व्याप्तेरभावमभिधाय घटभेदस्य घटस्वरूपत्वं वदता भेदवद्घटस्यापि परनिरूप्यताया घटवच्च भेदस्याप्यपरनिरूप्यतायाश्चाभ्युपगमेन अनपेक्षवस्तुस्वरूपत्वासिद्ध्या आपादकासिद्धिश्चेत्याह **किञ्चेति । अपरनिरूप्यत्वमिति** । परनिरूप्यत्वाभावमित्यर्थः । ननु च घटस्यापरनिरूप्यत्ववत् परनिरूप्यत्वस्याभ्युपगमे तत्प्रतीतेः प्रतियोगिप्रतीत्यनपेक्षत्ववत् तत्प्रतीतिसापेक्षत्वं वाच्यम् । तथा भेदस्यापि परनिरूप्यत्ववत् अपरनिरूप्यत्वस्याप्यभ्युपगमे तत्प्रतीतेः प्रतियोगिप्रतीतिसापेक्षत्ववत् तदनपेक्षत्वं वाच्यम् । न च तद्युज्यते । एकस्य वस्तुनः प्रतियोगिप्रतीतिसापेक्षतदनपेक्षप्रतीतेर्विरुद्धत्वात् । तत्कथं घटस्य भेदस्य च प्रत्येकं परनिरूप्यत्वतदनिरूप्यत्वस्वीकार इत्याशङ्कते **एतावत्त्विति** । कथमित्यतःपरम् इतीति शेषः । तथा च विरोधेन परनिरूप्यत्वासम्भवात् स्वस्मिन्नेव विदारणं स्यादित्याशयः । किमेकस्य वस्तुनः प्रतियोगिप्रतीतिसापेक्षतदनपेक्षप्रतीतिविषयत्वमात्रं विरुद्धं किंवा तादृशैकप्रतीतिविषयत्वम् । नाद्यः । एकस्यामेव तत्तायां संस्कारसापेक्षनिरपेक्षस्मृत्यनुभवविषयत्वस्यैकस्मिन्नेवाग्न्यादौ व्याप्त्यादिधीसापेक्षनिरपेक्षानुमितिप्रत्यक्षविषयत्वादेर्दर्शनेन तद्वदेव एकस्यैव वस्तुनोऽपि प्रतियोगिप्रतीतिसापेक्षतदनपेक्षप्रतीतिविषयत्वस्याविरुद्धत्वात् । अतो द्वितीय एवाश्रयणीयः । न चासाविहास्ति । घटस्य प्रतियोगिप्रतीतिसापेक्षानपेक्षैकप्रतीतिविषयत्वस्यास्माभिरनभ्युपगमादित्याशयेन परिहरति **तत्रापीति** । तत्रापि कुतः स्वस्मिन्विदारणापत्तिरित्यन्वयः । **सैवेति** । घटप्रतीतिरित्यर्थः । घटप्रतीतिर्भेदप्रतीतिर्वा यैव प्रतियोगिप्रतीतिसापेक्षा सैव तदनपेक्षा, यैव च तदनपेक्षा सैव तदपेक्षाऽपीत्येवमित्यर्थः । येन विरोधः शङ्क्येतेति शेषः । तर्हि घटस्य भेदस्य च प्रत्येकं प्रतीतिद्वयाभावात् प्रतियोगिप्रतीतिसापेक्षानपेक्षप्रतीतिविषयत्वाप्राप्तेः घटादिकमपि परनिरूप्यं भेदोऽप्यपरनिरूप्य इति रिक्तमेव वच इति पृच्छति **किन्त्विति** । भवेदेतदेवं यदि घटस्य घटत्वेन भेदस्य भेदत्वेनेत्येवं घटभेदयोरेकैकैव प्रतीतिः स्यात् । न चैवम् । किन्तु घटस्य घटत्वेनेव भेदत्वेनापि, भेदस्य भेदत्वेनेव घटत्वेनापीत्येवं घटभेदयोरस्ति प्रतीतिद्वयम् । तत्र घटस्य घटत्वेन प्रतीतेः प्रतियोगिप्रतीत्यनपेक्षत्वेऽपि भेदत्वेन तत्प्रतीतेस्तत्सापेक्षत्वं, भेदत्वेन तत्प्रतीतेस्तत्सापेक्षत्वेऽपि घटत्वेन तत्प्रतीतेस्तदनपेक्षत्वम् । एवं भेदस्य भेदत्वेन प्रतीतेः प्रतियोगिप्रतीत्यपेक्षत्वेऽपि घटत्वेन तत्प्रतीतेस्तदनपेक्षत्वम् । घटत्वेन भेदप्रतीतेस्तदनपेक्षत्वेऽपि भेदत्वेन तत्प्रतीतेस्तदपेक्षत्वं भविष्यतीति को विरोधः । प्रमेयत्वादिना निरपेक्षस्याप्यभावसादृश्यादेरभावत्वादिना सापेक्षत्वस्य स्वरूपेण निरपेक्षस्यापि दण्डादेर्ब्रह्मणश्च कारणत्वेन ज्ञानत्वेन च सापेक्षत्वस्य दर्शनात् । सप्रतियोगिकनिष्प्रतियोगिकत्वव्यवस्था तु यत् असाधारण्येन स्ववाचकपदप्रवृत्तिनिमित्तावच्छेदेन प्रतीतौ प्रतियोगिप्रतीतिसापेक्षं, तत् सप्रतियोगिकमन्यत्तु निष्प्रतियोगिकमिति युज्यते । यदि च तत्रैकस्यैवार्थस्य लघुत्वकठिनत्वशब्दोल्लेखेन निरपेक्षस्याप्यगुरुत्वाद्रवत्वशब्दोल्लेखेन सापेक्षत्ववद्ब्रह्मशब्दोल्लेखेन निरपेक्षस्याभेदशब्दोल्लेखेन सापेक्षत्वं तर्हीहापि घटशब्दोल्लेखेन निरपेक्षस्यापि भेदशब्दोल्लेखेन सापेक्षत्वं भविष्यतीति न काऽप्यनुपपत्तिरित्याशयेन परिहरति **प्रतीतिद्वयमेतदिति** । आदौ घट इति घटत्वेन प्रतीतिः, पश्चात् न पट इति पटभिन्नत्वेन प्रतीतिरिति प्रतीतिद्वयमित्यर्थ इत्यप्याहुः ।

**वा०र०**— किमेकस्य वस्तुनः प्रतियोगिप्रतीतिसापेक्षेत्यादिकं पूर्वोक्तन्यायामृतानुसारेण घटप्रतीति-भेदप्रतीतिर्नेत्यादिकमप्युक्तानुसारेण । भवेदेतदेवं यदीत्यादिकमप्युक्तानुसारेण ।

**विठ्ठल०**— दूषणान्तरमाह **किं चेति** । तत्रादौ गूढाभिसन्धिराह **भेदो वस्तुस्वरूपमिति** । **अपर-निरूप्यत्वं** परनिरूप्यत्वाभावः । परनिरूप्योऽपि भेदो वस्तुस्वरूपमिति ब्रुवाणः स्वरूपस्यापि परनिरूप्यत्वमङ्गी-करोत्येवेति भावः । अत्र भेदस्य स्वरूपभूतत्वेऽपि न वस्तुतन्मात्रत्वं अपि तु तद्विशेष एव भेदः अतो वस्तुनः परनिरूप्यत्वाभावेऽपि विशेषबलेन तत्स्वरूपस्य भेदस्य परनिरूप्यत्वेन दोष इत्यभिसन्धिः गूढ इति ज्ञेयम् । अविदिताशयस्य शङ्कामनुवदति **एतावत्त्विति** । कथमित्यतःपरम् इतिशब्दोऽध्याहार्यः । तथा च विरोधेन भेदस्य परनिरूप्यत्वासम्भवात् स्वस्मिन्नेव विदारणापत्तिरिति भावः । परिहरति **तत्रापीति** । तथापि कुतः स्वस्मिन्विदारणापत्तिरिति सम्बन्धः । **सैव प्रतीतिरिति** । अयं घट इत्याकारिका प्रतीतिरित्यर्थः । येनैकस्यां प्रतीतावनपेक्षत्वं सापेक्षत्वं च विरुध्यत इति भावः । **प्रतीतिद्वयमिति** । आदौ घट इत्येव प्रतीतिः पश्चात्प्रति-योग्युपस्थित्यनन्तरं न पट इति पटभिन्नतया प्रतीतिरिति प्रतीतिद्वयमित्यर्थः । एकस्मिन्नेव वस्तुनि कथं प्रतीति-द्वयमित्यतः स्वाशयमुद्घाटयति **तच्चेति** ।

**चषक**— **उभयीं गतिं** प्रतियोगिप्रतीतिनियन्त्रितत्वानियन्त्रितत्वे । **प्रतीतिद्वयं** प्रतियोगितासंसर्गा-वच्छिन्नकिञ्चिन्निष्ठप्रकारतानिरूपितभेदत्वावच्छिन्नप्रकारतानिरूपितपटत्वावच्छिन्नविशेष्यताका घटभिन्नः पट इत्याकारिकैका, अयं घट इत्याकारिका तादृशविशेष्यत्वानिरूपिकाऽपरा ।

**।। इति भेदस्य परप्रतियोगितोपपत्तेः स्वस्मिन्विदारणापत्त्यभावः ।।**

* * *

**।। अथ तत्र ततः स्वरूपविदारणेऽपि स्वल्पतैव स्यान्न तु शून्यता ।।**

२९० **सु०**— 'अस्तु वा स्वरूपविदारणम्, तथाऽपि शून्यतापादनमयुक्तमेवे'त्याशय-वानाह **विभागेनेति** ।

## अनु०— विभागेनाल्पतैव स्यात्कुत एव तु शून्यता ।

**लोष्ठादेः खलु, अवयवविभागेन लोष्ठादिविनाशे सति, अल्पपरिमाणावयवावशेषो-ऽवगतो, न तु सर्वशून्यता । तथा सर्वत्रापि विभागेनाल्पता अल्पावयवावशेषता एव स्याच्छून्यता तु कुत एव स्यात् ।**

**शे०वा०**— ननु भेदस्य स्वस्मिन्विदारकत्वाभावप्रतिपादनेन तत्र विभागाभावसिद्धेर्विभागेनाल्पतैव स्यादिति स्वरूपे विभागेनाल्पत्वकथनानुपपत्तिरित्याशङ्क्याङ्गीकृत्य स्वस्मिन्विदारणं शून्यत्वप्रसङ्गनिरासार्थत्वात् तस्येत्यतो नानुपपत्तिरित्याशयेनाङ्गीकारवादेनोत्तरग्रन्थं योजयति **अस्तु वेति** । ननु विभागेनाल्पतैव स्याच्छून्यता न स्यादेवेति कुतोऽवधारणमित्यतो विभागेनाल्पताया एव दृष्टत्वात् शून्यतायाश्चादृष्टत्वात् तत्सिद्धिरित्यभिप्रेत्य विभागेनाल्पत्वशून्यत्वयोर्दृष्टादृष्टत्वे दर्शयति **लोष्ठादेरिति** ।

**॥ इति स्वरूपविदारणेऽपि स्वल्पतैव स्यान्न तु शून्यता ॥**

* * *

**॥ अथ तत्र ततः सर्वशून्यतापादनस्य असङ्गतता ॥**
**॥ अथ तत्र च शून्यानां संयोगेन वस्तूत्पत्त्यभावात् 'वस्तुविदारणे संयोगनाशेन कार्यनाशे शून्यावशेष'ाभावः ॥**

२९१ **सु०**— ननु च पञ्चषेषु स्थलेषु विदारणेनाल्पाल्पतराल्पतमवस्त्ववशेषेऽप्यन्ततः कस्यचिदवयवजातस्य शून्यतायां सर्वशून्यता स्यादित्यत आह **नेति** ।

## अनु०— न शून्यानां हि संयोगाद्भावो वस्तुन इष्यते ।

यत्संयोगेन हि यद्वस्तूत्पन्नं तस्मिन्विदारणे सति संयोगनाशाद्वस्तुनाशानन्तरं तदवशेषो भवति, यथा तन्तुसंयोगेनोत्पन्ने पटे तन्तुविदारणसंयोगनाशक्रमेण विनष्टे तन्त्ववशेषः । एवञ्च यदि केषाञ्चित्परमाल्पानां वस्तूनां शून्यसंयोगादुत्पत्तिः स्यात् तदा विदारणे सति संयोगनाशेन कार्यनाशे शून्यावशेषः स्यात् । **न** चैवं प्रामाणिकैः **इष्यते** । अतोऽसङ्गतं सर्वशून्यतापादनमिति ।

**भावो** जन्म ।

**श्रीनिधि०**— पञ्चषेषु स्थलेषु विभागे नाल्पाल्पतराल्पतमवस्त्ववशेषेऽपीति । अनेके हि घटाद्यवयवाः । तत्रैकैकावयवस्य तदवयवतदनवयवक्रमेणैवं भावेऽपीत्यर्थः । अत एव **कस्यचिदवयवजातस्य** इत्युक्तम् । **अवयवजातस्य** अवयवसमूहस्य । अन्यथा जातपदवैयर्थ्यप्रसङ्ग इति द्रष्टव्यम् । पञ्च वा षड् वा पञ्चशाः इति बहुव्रीहिः । 'बहुव्रीहौ सङ्ख्येये डज् बहुगुणादि'ति डचि कृते डित्वसामर्थ्याट्टिलोपे च पञ्चषा इति रूपसिद्धिः ।

**शे०वा०**— ननु 'न शून्यानां हि संयोगादि'ति शून्यसंयोगस्य वस्तूत्पादकताया अप्रामाणिकत्व-वर्णनमनर्थकमित्यतो विभागेनाल्पपरिमाणावयवाव(वि)शेषाभ्युपगमेऽपि प्रसक्तस्य सर्वशून्यत्वप्रसङ्गस्य निवारणा-र्थत्वान्न तस्यानर्थक्यमित्यभिप्रेत्य तत्प्रसङ्गनिवारकतयोत्तरग्रन्थं योजयितुं विभागेनात्यल्पपरिमाणावयवाव(वि)-शेषपक्षेऽपि शून्यत्वप्रसङ्गमुत्थापयति **नन्विति** । नन्वस्तु शून्यसंयोगेन वस्तूत्पत्तिः, तथाऽपि शून्याव(वि)शेषः कुतो, नियामकाभावादित्यप्रयोजकत्वेनैव शून्यताप्रसङ्गनिवारणसम्भवात् तत्संयोगस्योत्पादकताया अप्रामा-णिकत्ववर्णनमनर्थकमित्यतो नियामकं वदन् शून्याव(वि)शेषप्रसङ्गं समर्थयते **यत्संयोगेन हीति** ।

**विठ्ठल०**— विदारणेन वस्तुनः शून्यतापादने शून्यसंयोगेन वस्तूत्पत्तिनिराकरणमसङ्गतमित्यत उत्पत्तिसमानन्यायत्वाद्विनाशस्येति सदृष्टान्तमुपपादयति **यत्संयोगेनेत्यादिना** ।

**।। इति शून्यानां संयोगेन वस्तूत्पत्त्यभावात्**
**'वस्तुविदारणे संयोगनाशेन कार्यनाशे शून्यावशेष'।भावः ।।**
**।। इति सर्वशून्यतापादनस्य असङ्गतता ।।**

* * *

**।। अथ च तत्रान्ते विदारणार्थकधातोः विभागाख्यगुणवाचकत्वं**
**न तु अन्योन्याभावलक्षणभेदवाचकत्वम् ।।**
**।। अथ च तत्र विभागान्यत्वयोः स्फुटो भेदः ।।**

२९२ **सु०**— 'ननु शून्यत्वं नाम नात्यन्तासत्त्वमापाद्यत्वेन विवक्षितम्, किन्तु सूक्ष्मतमत्वमेव; तच्चानिष्टमि'त्यत आह **विदारणेति** ।

## अनु०— विदारणार्थो धातुश्च विभागगुणवाचकः ।

स्यादेतद्यदि भेदो विदारणात्मा भवेत् । न चैवम्, प्रमाणाभावात् ।

अङ्गीकृत्यैव तु पूर्वः परिहारोऽभिहितः ।

ननूक्तमत्र 'भेदशब्दादेव भेदस्य विदारणात्मकत्वमवगम्यते, स हि भिदेर्धातो रूपम्, स च विदारणार्थतया व्याख्यात' इति । अत्रोत्तरम् । यदा भिदिधा**तुर्विदारणार्थो** विवक्षितः तदा भेदशब्दो **विभागाख्यगुणवाचको** न तु अन्योन्याभावलक्षणभेदवाचक इति ।

एतदुक्तं भवति । "क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः । प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः' इति वचनाद्भिदिर्विभागवचनोऽन्यत्ववचनश्च । भिन्नो घट इत्युक्ते स्फुटित इति गम्यते । भिन्नं गगनं घटादित्यन्यदिति विज्ञायते । तत्र विभागो विदारणात्मा नान्यत्वम् । तदेव चात्र प्रकृतं न विभाग" इत्यन्यतालक्षणस्य भेदस्य वस्तुस्वरूपत्वे विदारणप्रसङ्गेनात्यल्पतापादनमप्यसङ्गतमेव, छलत्वादिति ।

ननु विभागस्यान्यत्वस्य च को विशेषो येनैवमुच्यत इति चेन्न, गुणग्रहणेनैव परिहृतत्वात् । विभागो हि गुणतया वैशेषिकादिभिरुपात्तः, अन्यता चान्योन्याभावः; इति स्फुटो भेदः ।

**परि०— तच्चानिष्टमिति** । महत्त्वेनोपलभ्यमानस्य सूक्ष्मत्वापत्तेरनिष्टत्वादिति भावः । **व्याख्यात इति** । वैयाकरणैरिति भावः ।

**गु०दी०— किन्तु सूक्ष्मतमत्वमेव** इत्यत्र विदारणात्मकभेदस्य घटस्वरूपत्वे तदैव कपालद्वयात्मकत्वेनाल्पत्वम् । कपालद्वयस्यापि विदारणात्मकत्वात् तदैव ततोऽप्यल्पत्वं स्यात् । एवं च तदंशपरम्पराया अपि तदैवाल्पतरत्वमल्पतमत्वं च स्यादित्यर्थः ।

**यादु०— तच्चानिष्टमिति** । घटादेरिदानीं स्थूलतयैव दृश्यमानत्वादिति भावः । **विदारणात्मतयेति** । विदारणार्थतयेत्यर्थः । **व्याख्यातः** पाणिनिनेति शेषः ।

**वं०प०— अङ्गीकृत्य** भेदस्य विदारणात्मत्वमिति शेषः । **स च** धातुः । व्याख्यातो 'भिदिर् विदारणे' इति पाणिनिना । **भेदशब्दो** भिद्धातुनिष्पन्नः । **विभागाख्येति** । विदारणात्मको यो विभागस्तद्रूपगुणेत्यर्थः । गुणशब्दोपरि भारः । **स्फुटितः** कपालद्वयविभागवान् । **एतदेव चेति** । अन्यत्वमन्योन्याभावस्यैव धर्मिस्वरूपत्वाभिप्रायेण भेदो वस्तुस्वरूपमित्युक्ते विभागरूपार्थं गृहीत्वा तद्दूषणं छलोत्तरमिति ज्ञेयम् ।

**कं०रा०—** परत्वादिकं द्रव्यस्वरूपं यथाङ्गीकृतं तथा प्रतियोगिनिरूप्यस्यापि भेदस्य वस्तुस्वरूपत्वे को विरोध इत्यत आह **छलत्वादिति** । अन्योन्याभावाभिप्रायेण भेदो वस्तुस्वरूपमिति स्वरूपप्रयुक्तस्य भेदशब्दस्य विभागार्थत्वं परिकल्प्याल्पतापादनस्य परेण कृतत्वाच्छलत्वमिति भावः ।

**श्रीनिधि०— किन्तु सूक्ष्मत्वमेवेति** । यथा वृक्षस्य क्रकचादिना विदारणे सूक्ष्मत्वमेव इति भावः । **तदेव चात्र प्रकृतमिति** । 'अन्यत्वमेव भावो ह्यभावश्च स एव ही'त्यादौ प्रकृतमित्यर्थः ।

**अत्यल्पतापादनमपीति** । न केवलं शून्यतापादनमित्यप्यर्थः । **छलत्वादितीति** । अन्यथाभिप्रायेण प्रयुक्तस्य शब्दस्य विभागाभिप्रायं परिकल्प्य दूषणादिति भावः ।

**शे०वा०—** ननु 'विदारणार्थ' इत्यादिभाष्यमनर्थकम् । न च भेदशब्दस्य विभागवाचित्वाभावप्रतिपादनार्थं तदिति वाच्यम् । तद्वाचित्वेऽपि दोषाभावेन तत्प्रतिपादनस्यानर्थक्यात् । न च स्वरूपे विभागेन शून्यताप्रसङ्गनिवारणार्थं तदिति वाच्यम् । 'विभागेनाल्पतैव स्यादि'ति तत्प्रसङ्गस्य पूर्वमेव परिहृतत्वादित्यतो विभागार्थत्वे उक्तरीत्याऽत्यन्तासत्त्वरूपशून्यताप्रसङ्गानवकाशेऽपि सूक्ष्मतमत्वरूपशून्यत्वप्रसङ्गापरिहारेण तत्परिहारार्थतया विभागवाचकत्वाभाववर्णनस्य अर्थवत्त्वादित्यभिप्रेत्योक्तातिप्रसङ्गवारकतयोत्तरवाक्यं योजयितुं सूक्ष्मतमत्वप्रसङ्गमुत्थापयति **नन्विति** । येन विभागेन तददर्शनाददृष्टकल्पना प्रसज्येतेति भावः । तर्ह्यतिरिक्तस्य शून्यत्वस्याभावान्न तदापादनं सम्भवतीति पृच्छति **किन्त्विति** । अस्त्यतिरिक्तमपि किञ्चिच्छून्यत्वमिति युक्तमेव तदापादनमिति परिहरति **सूक्ष्मेति** । न चैतदिष्टापादनमित्यतो घटादेरिदानीं स्थूलतयैव दृश्यमानत्वान्न तदित्याह **तच्चानिष्टमिति** । ननु कथमस्याक्षेपस्यानेन वाक्येन परिहारः । अत्र विभागवाचकताया एवोक्तत्वात् । तस्याश्चोक्तप्रसङ्गोपोद्बलकत्वादित्यतोऽस्य साक्षात् तत्परिहारकत्वाभावेऽपि परम्परया तत्रोपयोगान्नानुपपत्तिरिति भावेन परम्परयोपयोगं दर्शयितुमुक्ताक्षेपपरिहारकं तावदादौ पूरयति **स्यादेतदिति** । यदि प्रमाणाभावेन भेदो न विदारणात्मा, कथं तर्हि 'यतोऽन्यस्य प्रतियोगित्वमिष्यते । विभागेनाल्पतैव स्यादि'त्यादिः प्राचीनः परिहार इत्यत आह **अङ्गीकृत्यैवेति** । तर्हि प्रमाणाभावेनैव भेदस्य विभागत्वाभावसिद्धेः किं भाष्येणेत्यतो भेदशब्दस्य विभागवाचकत्वाभावे, हेतोः प्रमाणाभावस्यासिद्धिशङ्कापरिहारार्थत्वेनोपयोगान्न तदानर्थक्यमित्याशयेन तत्परतया भाष्यं योजयति **ननूक्तमत्रेति** । **व्याख्यात इतीति** । पाणिनिनेति शेषः । ननु 'यदा भिदिधातुर्विदारणार्थो विवक्षित' इत्यत्र यदेति व्यर्थम् । अर्थान्तराभावेन व्यावर्त्याभावात् । भावे वा विदारण इति विशेषोक्त्यनुपपत्तेः । उपपत्तौ वा तत्परित्यागेनार्थान्तरग्रहणे नियामकाभावादित्यतोऽर्थान्तरप्रदर्शनपूर्वकं विशेषोक्तिं घटयन्नेवार्थान्तरत्वोपपादनपूर्वकं तत्फलं दर्शयति **एतदुक्तं भवतीति** । कुतो भिदेरुभयवचनत्वमित्यतः प्रयोगप्रत्यययोरविशेषादित्यभिप्रेत्योभयत्र प्रयोगप्रत्ययौ क्रमेण दर्शयति **भिन्न इत्यादिना** । **तदेव चेति** । अन्यत्वमेव वस्तुस्वरूपतया ग्रन्थे प्रतिपाद्यतया प्रकृतमित्यर्थः । इतीत्यस्यैतदिति पूर्वेण सम्बन्धः ।

**वा०र०—** **विशेषोक्तीति** । भिदृ़ विदारण इति शेषोक्तीत्यर्थः ।

**विठ्ठल०—** **तच्चानिष्टमिति** । स्थूलतया दृश्यमानघटादेः सूक्ष्मत्वमनिष्टमित्यर्थः । **व्याख्यात इति** । भिदिर् विदारण इति व्याख्यात इत्यर्थः । ननु पाणिनिना तथा व्याख्याततत्वात् कथमन्यथार्थकत्वं तथापि कुतोऽल्पत्वासम्भव इत्यत आह **एतदुक्तं भवतीति** । **विदारणात्मेति** । विभाग एव विदारणात्मा, भिदिर् विदारण इत्यत्र विदारणपदार्थतया भिदिधात्वर्थो विवक्षितः, नत्वन्यत्वम् । अन्यत्वं तु भिदिधातोरर्थान्तरमित्यर्थः । तर्हि

विदारण इति व्याख्यातो विभाग एवात्र भेदपदेन विवक्षितः किं न स्यात् किमन्यत्वग्रहणेनेत्यत आह **तदेवात्र प्रकृतमिति** । भेदो धर्मिस्वरूपं इत्यत्र भेदपदेनान्यत्वमेव विवक्षितमित्यर्थः ।

**।। इति विभागान्यत्वयोः स्फुटो भेदः ।।**
**।। इति विदारणार्थकधातोः विभागाख्यगुणवाचकत्वं न तु अन्योन्याभावलक्षणभेदवाचकत्वम् ।।**
**।। इति भेदस्य स्वरूपत्वे सर्वशून्यतापादनं अयुक्तम् ।।**

* * *

**।। अथ मायावादिचोदनापाकरणे मायावाद्येकदेशि(गुणादिप्रक्रियानङ्गीकारि)मतनिरासः ।।**

२९३ **सु०—** यस्तु गुणादिप्रक्रियां न मायावादी मन्यते । तं बोधयितुमाह **अविदारणेऽपीति** ।

## अनु०— अविदारणेऽपि ह्यास्यस्य भिन्नावोष्ठौ च तस्य च ।

**आस्यस्येत्या**स्यसम्बन्धिनोरोष्ठयोर्ग्रहणम् । **तस्य च** मायावादिन एव । यदा हि मायावादी निरुत्तरतया तूष्णीमास्ते तदा तदीययोरोष्ठयोर्विदारणलक्षणविभागाभावेऽपि **ओष्ठौ भिन्नौ** अन्योन्याभावलक्षणभेदवन्तौ भवत एव । यदभावे च यदस्ति तत्ततोऽन्यदिति च प्रसिद्धमेव, अतो विभागाद्भेदोऽर्थान्तरमेवेति ज्ञायते । **तस्य च** इत्यनेन नातःपरं स्वरूपभेदे काचिदनुपपत्तिः सम्भाविताऽस्तीति सूचितम् ।

ननु कथं नास्ति, विशेषणविशेष्यभावानुपपत्त्यादेरपरिहृतत्वादिति चेन्न; स्वरूपत्वेऽपि विशेषबलेन विशेषणविशेष्यभावसम्बन्धावभासोपपत्तेः, अन्यथा 'आनन्दं ब्रह्म', 'आनन्दं ब्रह्मणः' इत्यादेरनुपपत्तिप्रसङ्गात् ।

संशयविपर्ययानुपपत्तिरपि नास्ति, सविशेषत्वेन ज्ञाताज्ञातत्वोपपत्तेः । अन्यथा आत्मस्वरूपे स्वयम्प्रकाशमाने तत्स्वरूपमात्राणामद्वितीयत्वानन्दत्वादीनामपि प्रकाशनियमान्न जातु कस्यचित्संशयविपर्ययौ स्याताम् । अविद्यान्[illegible]त तत्र तथेति चेत्, अत्रापि साद्द(श्यादिव)श्यवशात् तथेति सन्तोष्टव्यम् ।

 **वं०प०— नातःपरमिति** । यो मायावादी अस्माभिः पराजितः सन्निरुत्तरतया तूष्णीमास्ते, तस्यैवौष्ठाविति तस्य निरुत्तरत्वकथनेन स्वरूपभेदेऽनुपपत्तिर्नास्तीति सूचितम् । ओष्ठयोः संयुक्तत्वेनानुपपत्तिकथने तस्यासामर्थ्यादिति भावः । **अन्यथा** विशेषणविशेष्ययोः स्वरूपत्वेऽप्यभिन्नत्वेऽपि विशेषणविशेष्यभावसम्बन्धावभावस्य विशेषबलेनानिर्वाह इत्यर्थः । **संशयविपर्ययौ** अद्वितीयत्वादिधर्मसमूह इति शेषः । विशेषबलेन ज्ञाताज्ञातत्वे अत्रोक्त्वा संशयाद्युपपत्तिर्न क्रियते । किन्तु ब्रह्मणि प्रतीतेऽपि तदभिन्नानामप्यद्वितीयत्वादीनामविद्यारूपदोषवशादप्रतीत्या संशयाद्युपपत्तेरिति यद्युच्यते तर्हि इतरभेदस्य घटादिस्वरूपत्वेन धर्मिण इतरासङ्कीर्णतया प्राग्गृह्यमाणत्वेन भेदाग्रहरूपनिमित्ताभावेन संशयाद्यभावेऽपि सादृश्यादिरूपदोषेण सम्भवत्येवेत्याह **अविद्येत्यादिना** ।

**कं०रा०—** 'अविदारणेऽपि ह्यास्यस्ये'त्यत्रास्यशब्दात्सम्बन्धार्थेऽणि कृते आस्यशब्दस्तत्सम्बन्धोष्ठवाची तत्र चैकत्वमविवक्षितमित्याशयेन व्याचष्टे **आस्यस्येति** । **अन्यथेति** । अभेदेऽपि विशेषबलेन विशेषणविशेष्यभावावभास इत्यस्यानङ्गीकारे 'अनन्तं ब्रह्म', 'आनन्दं ब्रह्मण' इत्यादावानन्त्यादेर्ब्रह्मणश्च विशेषणविशेष्यभावावभासो न स्यात् । त्रिविधपरिच्छेदरूपानन्त्यस्य चानन्दस्य ब्रह्मस्वरूपत्वेन भेदाभावादिति भावः । **अविद्येति** । अविद्यावशादात्मनः स्वरूपे प्रकाशमानेऽपि तत्स्वरूपमात्राणामद्वितीयत्वादीनामप्रकाश इत्यर्थः । **अत्रापीति** । अस्मत्पक्षेऽपि वस्तुस्वरूपे प्रकाशमाने तत्स्वरूपभूतभेदाप्रकाशः सादृश्यादिदोषवशादिति सन्तोष्टव्यमित्यर्थः ।

**श्रीनिधि०— गुणादिप्रक्रियामिति** । षट्पदार्थप्रक्रियामित्यर्थः । **तस्य चेत्यनेनेति** । लोकस्येत्यनुक्त्वा तस्येति कथनेनेति भावः । तस्य भेदस्य स्वरूपत्वाङ्गीकारेऽनुपपत्तिं प्रसञ्जयतो निरुत्तरतया तूष्णीं तिष्ठतो मायावादिन इत्यर्थः । **विशेषणविशेष्यभावसम्बन्धावभासोपपत्तेरिति** । घटो भिन्न इति विशेषणविशेष्यभावः, घटस्य भेद इति सम्बन्धप्रतिभासश्चेत्युभयोरुपपत्तेरित्यर्थः । **अन्यथा** भेदस्य स्वरूपत्वेन एतयोरनुपपत्तौ । आनन्त्यानन्दयोर्ब्रह्मस्वरूपत्वस्य उभयसम्प्रतिपत्तेः विशेषबलेन समाधाने तुल्यं प्रकृतेऽपीति भावः ।

**शे०वा०—** ननु यस्य कस्यचिदोष्ठयोरविदारणोक्त्याऽपि विभागाभावेऽपि भेदप्राप्त्या भेदस्य विभागादर्थान्तरत्वसिद्धिसम्भवेन तस्य चेति मायावादिन एवोष्ठयोरविदारणोक्तेर्न विशेषप्रयोजनं किञ्चिदित्यतस्तदीयोष्ठयोरविदारणोक्तेस्तस्य दूषणोद्भावकत्वासामर्थ्यसूचनद्वारा भेदस्य वस्तुस्वरूपतायामनुपपत्त्यभावसूचकत्वान्नानर्थक्यमित्यभिप्रेत्य विशेषोक्तेः प्रयोजनमाह **तस्य चेत्यनेनेति** । **विशेषणविशेष्यभावानुपपत्त्यादेरिति** । विशेषणविशेष्यभावाद्यनुपपत्तेरित्यर्थः । आदिपदेन सम्बन्धपरिग्रहः । ततश्च विशेषणविशेष्यभावानुपपत्तेर्घटस्य भेद इति सम्बन्धानुपपत्तेश्चापरिहृतत्वादित्यर्थः । **विशेषणेति** । विशेषणविशेष्यभावश्च सम्बन्धश्च तयोरवभासोपपत्तेरित्यर्थः । **न जात्विति** । उपलक्षणं चैतत् । उपदेशानर्थक्यं च स्यादित्यपि द्रष्टव्यम् । न चात्मस्वरूपज्ञानेनैक्यस्य स्वतो भानेऽप्यज्ञानविरोधिन्या वृत्तेरभावात् संशयाद्युपपत्तिरिति वाच्यम् । प्रत्यगर्थवदेव

वृत्तेरभावेऽपि स्वतो भानेनैक्ये विप्रतिपत्त्याद्ययोगात् । अन्यथा प्रत्यगर्थेऽपि तत्प्रसङ्गादिति भावः । ऐक्यस्यात्मस्वरूपत्वेऽप्यविद्यावृतत्वादात्मप्रकाशेऽप्यप्रकाशोपपत्तेः संशयाद्युपपत्तिरिति शङ्कते **अविद्येति** । तर्हि भेदस्य वस्तुस्वरूपत्वेऽपि सादृश्यादिदोषवशाद्वस्तुप्रकाशेऽप्यप्रकाशोपपत्त्या विरोधिज्ञानाभावादेव संशयादिकं भविष्यतीत्याह **अत्रापीति** ।

**विट्ठल०**— ननु यस्य कस्यचिदोष्ठविभागाभावेऽपि भिन्नावोष्ठाविति व्यवहारसद्भावात् तस्य चेति मायावादिनो विशेषेणोपादानं व्यर्थमित्यत आह **तस्य चेत्यनेनेति** । **अविद्यावशादिति** । आत्मस्वरूपभूतं अद्वितीयकत्वादिकं अविद्यातिरोहितं नावभासत इत्यर्थः । **अत्रापीति** । रजतभेदः शुक्तिस्वरूपभूतोऽपि रजतसादृश्येन तिरोहितत्वाद्विपर्ययेनावभासत इत्यर्थः ।

**॥ इति मायावादिचोदनापाकरणे मायावाद्येकदेशि(गुणादिप्रक्रियानङ्गीकारि)मतनिरासः ॥**

* * *

**॥ अथ मायावादिचोदनापाकरणे भेदस्य वस्तुस्वरूपत्वे अद्वैतमतपर्यवसानं यदुक्तं तस्यायुक्तता ॥**

२९४ **सु०**— यच्चाद्वैतपर्यवसानमुक्तम्, तत्कुत इति वक्तव्यम् । यदि मन्येत "यथा हि 'लम्बकर्ण आगतः', 'नीलमानीयतामि'त्यादौ परिकरवतो यद्भवति तत्परिकरस्यापि, तथा प्रतियोगिघटितस्य भेदस्य धर्मिस्वरूपत्वे प्रतियोगिनोऽपि त(त्र निम)न्निमज्जनं स्यादि"ति तत्र किं सम्भावनयेदमुच्यते उत व्याप्त्या; नाद्यः प्रशिथिलमूलत्वात्, न द्वितीयः 'चित्रगुरानीयताम्,' 'काशीनिवासी समागत' इत्यादौ तदभावात् । पारमार्थिकीं दृष्टिमवलम्बमानस्य तदप्यसिद्धमिति चेत्; अहो पक्षपातोऽस्य यत्परस्यानिष्टं प्रसञ्जयन् व्याप्तिग्रहणाय लौकिकं दृष्टान्तं बहुमन्यते, व्यभिचारे तु तत्रोदास्ते । परसिद्धेन परस्यैवानिष्टापादनमिति चेत्, तर्हि मूलशैथिल्यमपि परः स्वसिद्धेन प्रतिपत्स्यते । वैचित्र्यं किन्निमित्तमिति चेत्, व्यावर्तकत्वमात्रेण प्रतियोगिनामुपयोगादिति ब्रूमः ।

**परि०**— **तदप्यसिद्धमितीति** । चित्रगुरानीयतामित्यादौ परिकरहीनस्य वाऽनयनमित्येतदसिद्धमित्यर्थः । **वैचित्र्ये किं निमित्तमिति** । लम्बकर्ण आनीयतामित्येतद्वैलक्षण्यं प्रकृतस्य सप्रतियोगिकस्य भेदस्येत्यर्थः । उपलक्षणत्वेन प्रतियोगिनो व्यावर्तकत्वादिति भावेनाह **व्यावर्तकत्वमात्रेणेति** । विवृतमेतत् सम्यङ् न्यायामृते द्वितीयपरिच्छेदे विशिष्यभेदखण्डनोद्धारवादे मायावाद्युक्तभेदखण्डनोद्धारे । *समवायनिरासः ॥*

**यादु०— परः** सिद्धान्ती । **वैचित्र्यं किंनिमित्तमिति** । प्रतियोगिघटितस्य भेदस्य लम्बकर्णाद्युदाहरणवैचित्र्यं किंनिमित्तमित्यर्थः । अत्र किंशब्द आपेक्षे । ननु न परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति व्याप्तिरत्राभिप्रेता, येनोक्तव्यभिचारः स्यात्किन्तु विशिष्टस्य यद्भवति तद्विशेषणस्यापि भवतीत्येव । लम्बकर्ण आगत इत्यादौ तथा दर्शनात् । प्रतियोगिघटितभेदस्य च तद्वैचित्र्ये निमित्ताभावादतस्तस्य धर्मिस्वरूपत्वे प्रतियोगिनोऽपि तत्स्यादित्यापादनं सुस्थमेवेत्याशयेन शङ्कते **वैचित्र्यमिति** । प्रतियोगिघटितस्य भेदस्य लम्बकर्णादिवैचित्र्यं किन्निमित्तमित्यर्थः । किंशब्द आक्षेपे । **व्यावर्तकत्वमात्रेणेति** । चित्रगुरानीयतामित्यादाविव प्रतियोगिनां भेद उपलक्षणतया व्यावर्तकत्वमात्रं, न कार्यान्वयित्वरूपं विशेषणत्वमपि । ततश्चोपलक्षणत्वमेव वैचित्र्ये निमित्तमित्यापादकासिद्धिरिति भावः ।

**वं०प०— तत्र** धर्मिस्वरूपत्वे । **प्रशिथिलेति** । सम्भावनामात्रस्यासाधकत्वेन साधकप्रमाणभूतायाश्च व्याप्तेस्तर्के अभावेन प्रशिथिलमूलत्वं तर्कस्येत्यर्थः । **तदभावात्** परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति व्याप्तेरभावादित्यर्थः । **तदपि** व्यभिचारस्थलभूतमुदाहरणमपि । **दृष्टान्तं** लम्बकर्णमानयेत्यादिकम् । **तत्र** धर्मिणि । **तत्र दृष्टान्ते** । लौकिको दृष्टान्तो मया न स्वीक्रियते । परिकरवतो यद्भवतीत्यादिव्याप्तेर्लम्बकर्णादिदृष्टान्ते भवद्भिरङ्गीकारात् तन्न्यायेन भेदस्य धर्मिस्वरूपत्वेऽप्यापादनं क्रियत इत्याशङ्कते **परसिद्धेनेति** । तर्हि धर्मिभेदस्य धर्मिस्वरूपत्वे प्रतियोगिनोऽपि धर्मिणि निमज्जनं स्यादिति यन्मायावादिना आपादनं क्रियते तस्मिंस्तर्के व्याप्तिग्रहणाय स्वरीत्या दृष्टान्ते तस्य पारमार्थिकस्याभावेन व्याप्त्यभावात् सम्भावनामात्रस्य चासाधकत्वात् प्रशिथिलमूलत्वं स्वतर्कस्य परो मायावादी स्वसिद्धान्तसिद्धेन दृष्टान्ताभावप्रयुक्तव्याप्त्यभावादिना प्रतिपत्स्यत इत्याह **तर्हीति** ।

**कं०रा०— पारमार्थिकीमिति** । सर्वमभिन्नमिति पारमार्थिकीं दृष्टिमवलम्बमानस्य मम चित्रगुरानीयतामित्यादौ परिकरवतो यद्भवति तत्परिकरस्यापि भवतीत्येतन्नास्ति गवादिरूपपरिकरवतो देवदत्तादेरानयनादौ सत्यपि परिकरभूतगवादेरानयनाद्यभावादित्येतदसिद्धम् । पारमार्थिकदृष्ट्या सर्वस्याभिन्नत्वेन परिकरवतो देवदत्तादेरानयनादिकमस्ति परिकरस्य गवादेस्तु तन्नास्तीति प्रतिपादयितुमशक्यत्वादिति भावः । **अहो पक्षपात इति** । घटादिप्रतियोगिकभेदः पटादिस्वरूपमिति वदतः परस्य घटादिभेदस्य पटादिस्वरूपत्वे प्रतियोगिभूतघटादेरपि पटादिस्वरूपत्वं स्यादित्यनिष्टं प्रसञ्जयन् मायावादी परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति व्याप्तिग्रहणाय लम्बकर्णोऽयं आगत इति लोकसिद्धभेदवन्तं लम्बकर्णादिरूपदृष्टान्तं बहुमन्यते, परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति व्याप्तिर्नास्ति 'चित्रगुरानीयतां काशीवासी समागत' इत्यादौ तदभावादिति व्यभिचारे प्रसक्ते तु लोकसिद्धभेदवति दृष्टान्ते उदास्त इति यत्सोऽयमस्य मायावादिनः पक्षपातः **अहो** आश्चर्यमित्यर्थः । ननु न वयं व्याप्तिग्रहणाय लौकिकं दृष्टान्तं बहुमन्यामहे किं नाम परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति नियमस्य लम्बकर्ण आनीयतामिति दृष्टत्वेन परसिद्धत्वात्परसिद्धेन नियमेन घटादिभेदस्य

पटादिस्वरूपत्वे घटादेरपि पटादिस्वरूपत्वं स्यादित्यनिष्टापादनं परस्य कर्म इत्याशयेन शङ्कते **परसिद्धेनेति** । **मूलेति** । आपादनमूलभूतस्य परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति नियमस्य शैथिल्यमपि चित्रगुरानीयतामित्यादौ स्वसिद्धेन व्यभिचारेण परः प्रतिपत्स्यत इत्यर्थः । **वैचित्र्यमिति** । घटादिभेदः पटादिस्वरूपमित्यत्र परिकरवतो यद्भवति तत्परिकरस्यापि भवतीत्येतन्नास्ति लम्बकर्ण आनीयतामित्यादौ तदस्तीतीदं वैचित्र्यं किं निमित्तमित्यर्थः ।

**श्रीनिधि०— लम्बकर्ण आगत इत्यादावित्यादि** । इत्यादिवाक्ये प्रतीयमानं यदानयनादिकं परिकरवतो यद्भवति तत्परिकरस्यापि भवतीत्यर्थः । **परिकरवतः** विशेषणवतः । **प्रशिथिलमूलत्वात्** अविद्यमानव्याप्तिकत्वात् । त्वदुक्तस्य बाधकस्येति शेषः । सम्भावनयेति त्वयैवोक्तत्वादिति । **तदप्यसिद्धमिति** । न केवलं परिकरस्य किन्तु परिकरवतो चित्रगुकाशीवास्यादेरानयनादिकमप्यसिद्धम्, सर्वमिथ्यात्वाभ्युपगमादिति भावः । **अहो पक्षपातोऽस्य** इत्यपहासः । **तर्हि मूलशैथिल्यमपि परःस्वसिद्धेनेति** । तथा च परार्थानुमानं न स्यादिति भावः । **वैचित्र्यमिति** । क्वचित् परिकरस्य क्रियाद्यन्वयित्वेनोपयोगः क्वचित्तदनन्वयित्वेनेति वैचित्र्यमित्यर्थः । **व्यावर्तकत्वमात्रेणेति** । न तु क्रियाद्यन्वयित्वेनापि येन नियामकं वाच्यं स्यादित्यर्थः । क्वचित् क्रियाद्यन्वयस्त्ववर्जनीयसन्निधितयेति भावः । **प्रतियोगिनां** निरूपकाणाम् ।

**शे०वा०— तदभावादिति** । परिकरवतः क्रियान्वयेऽपि परिकरस्य क्रियान्वयाभावादित्यर्थः । **पारमार्थिकीमिति** । तथा च तत्र परिकरवत क्रियान्वयाभावेन हेतोरेवानागमनान्नान्वयव्यभिचार इति भावः । **तत्रोदास्त इति** । तत्प्रमेयानङ्गीकारित्वमेव तत्रोदासीनत्वमिति भावः । **परसिद्धेनैवेति** । ततश्च परस्यानिष्टप्रसञ्जनार्थं व्याप्तिग्रहणाय लौकिकदृष्टान्तरस्याप्यबहुमानान्न पक्षपात इति भावः । ननु चित्रगुन्यायविषयत्वमेव भेदस्य कुतोऽङ्गीकार्यं, लम्बकर्णन्यायविषयत्वस्यापि सम्भवात् । ततश्च भेदस्य वस्तुस्वरूपत्वे प्रतियोगिनोऽपि तत्स्वरूपत्वं भविष्यतीति सुहृद्भावेन पृच्छति **वैचित्र्यमिति** । भेदस्य लम्बकर्णन्यायविषयत्वं किन्निमित्तमित्यर्थः । चित्रगुरानीयतामित्यादाविव भेदे प्रतियोगिनामुपलक्षणतया व्यावर्तकत्वमात्रं, न कार्यान्वयित्वरूपं विशेषणत्वमपि । ततश्चोपलक्षणत्वमेव तन्न्यायविषयत्वे निमित्तमित्याशयेन परिहरति **व्यावर्तकत्वेति** ।

**विठ्ठल०— सम्भावनयेति** । परिकरवतो यद्भवति तत्परिकरस्यापि भवतीति निश्चयानुपपत्तेः प्रतियोगिनो धर्मिणि निमज्जनापादनानुपपत्तेरिति भावः । **पारमार्थिकीमिति** । सर्वस्यापि मिथ्यात्वेनेति चित्रगुरानीयतामित्यादौ परिकरहीनस्यानयनमित्येतदप्यसिद्धमित्यर्थः । **परस्यानिष्टमिति** । प्रतियोगिघटितभेदस्य धर्मिस्वरूपत्वे प्रतियोगिनोऽपि धर्मिस्वरूपता स्यादित्यनिष्टं प्रसञ्जयन्नपरः परिकरवतो यद्भवतीत्युक्तव्याप्तिग्रहणाय लम्बकर्ण आगत इत्यादि दृष्टान्तमङ्गीकरोति । चित्रगुरानीयतामित्यादौ व्यभिचारोऽस्माभिरुक्ते तन्न पारमार्थिकमित्युदास्ते । अतो न मायी न्यायानुसन्धाता किन्तु केवलं स्वोक्ते दुराग्रहवानित्यवगम्यत इति भावः । अनिष्टप्रसञ्जनं न स्वरीत्या अतो न दोष इति शङ्कते **परसिद्धेनेति** । यदि परसिद्धन्यायेनापादनम् । तर्हि परः

चित्रगुरानीयतामित्यादौ व्याप्तिवैकल्यरूपमूलशैथिल्यं स्वसिद्धन्यायेन पश्यत्येवेति न तद्रीत्याप्यपादानमुक्तमिति भावः । ननु लम्बकर्ण आगत इत्यादौ व्यावर्तकस्य कर्णादिरागमनान्वयः । उपलक्षणभूतप्रतियोगिनां तु भेद-ज्ञानोपयोगिज्ञानविषयत्वरूपव्यावर्तकत्वमात्रेणोपयोगः । अतो वैचित्र्यमिति भावेन परिहरति **व्यावर्तकत्व-मात्रेणेति** ।

**चषक—** **परिकरवतः** विशेषणवतः । **परिकरस्य** विशेषणस्य । **प्रतियोगिघटितस्य** स्वनिरूपि-तानुयोगितासंसर्गेण प्रतियोगिविशेषितस्य । **प्रशिथिलमूलत्वात्** । व्याप्तिविकलत्वात् । **तदभावात्** स्वामि-विप्रांशे भासमानयोर्गोकाश्योरानयनागमनान्वयाभावात् । **वैचित्र्यं किन्निमित्तमिति** । लम्बकर्ण आगतो नील-मानीयतामित्यादौ विशेषणीभूतानां विशेष्यान्वय्यन्वयिता, घटभिन्नः पट इत्यादौ भेदविशेषणतापन्नघटे भेदान्वयिघटान्वयिता तादात्म्येन नेति वैलक्षण्यं किं निबन्धनमित्यर्थः । **व्यावर्तकत्वमात्रेणेति** । चित्रगो-स्वामिन्यतादृशाद्व्यावृत्तत्वसाधने चित्रगव्युपलक्षितस्वामितैव हेतुर्न तु तद्विशेषिता सा, तावतैव स्वामितेतर-व्यावर्तनेन सामञ्जस्यादिति यथा, तद्वत् पटधर्मिकघटभेदे दण्डाद्व्यावृत्तत्वसाधनदशायां निरूपितत्वसम्बन्धेन घटोपलक्षितानुयोगिताशालित्वस्यैव हेतुतोपेयते, न तु तद्विशेषिततच्छालित्वस्य, तावतैव दण्डादिनिरूपितानु-योगिताव्यावर्तनेन सामञ्जस्यात् । इत्थं चोदाहरणानां वैचित्री दर्शितोपलक्षणत्वकार्यान्वयित्वरूपविशेषणत्व-विवक्षातद्राहित्यकृतैवेति भावः ।

**॥ इति मायावादिचोदनापाकरणे भेदस्य वस्तुस्वरूपत्वे अद्वैतमतपर्यवसानं यदुक्तं तस्यायुक्तता ॥**

* * *

**॥ अथ मायावादिचोदनापाकरणे मायावादस्य निराकरणापेक्षयोपेक्षणस्यैवौचित्यम् ॥**

**२९५ सु०— 'तदेवं स्वपरमतावलोकानपेक्षयैव दोषोद्भावनादुपेक्षणमेवोन्मत्तवाक्यव-न्मायावादस्योचितम्, किं निराकरणेने'त्याशयवानुपसंहरति अत इति ।**

## अनु०— अत उन्मत्तवाक्यत्वान्मायावादो ह्युपेक्षितः ।

'नन्वेवंविधं मतं सिद्धान्तविरुद्धत्वात् सूत्रकृता कुतोऽत्र न निराकृतमि'त्येतदनेन परिह्रियते । **उपेक्षितः** सूत्रकारेणेति शेषः ।

**श्रीनिधि०—** उपेक्षितः अस्माभिः । अद्भुता इत्यादिना तु छलत्वादिप्रदर्शनेनोन्मत्तवाक्यतुल्यतैव प्रदर्शितेति भावः ।

**शे०वा०— उपेक्षित इति ।** मुख्यत (मुखत) इति शेषः । न्यायसाम्येन निराकरणस्य 'नासत' इत्यादिना करणादिति द्रष्टव्यम् ।

**वा०र०—** ननु 'नासत' इत्यादौ शून्यवादिमतनिराकरणेऽपि न मायावादिमतनिराकरणमित्यत उक्तं **न्यायसाम्येनेति** । तन्मतवैलक्षण्याभावश्च तत्त्वोद्योतटीकोक्तरीत्या बोध्यः ।

**॥ इति मायावादस्य निराकरणापेक्षयोपेक्षणस्यैवौचित्यम् ॥**
**॥ इति तन्मायावादिचोदनानामपाकरणम् ॥**
**॥ इति भेदस्य वस्तुस्वरूपत्वे सर्वशून्यतापत्तिवादिमायावादिचोदनानामपाकरणम् ॥**
**॥ इति समवायस्य विशेषतो निराकरणम् ॥**
**॥ इति समवायनिराकरणम् ॥**
**॥ इति भेदपक्षमपहायाभेदपक्षपाते न केवलं कल्पनागौरवं कारणम् अपि तु समवाये प्रमाणाभावोऽपि तत्र कारणम् ॥**
**॥ इति अवयवावयव्यादीनामभेदस्य निरूपणम् ॥**
**॥ इति भेदपरित्यागेनाभेदस्यैव स्वीकाराय भेदाभेदपक्षयोः साम्यशङ्कानिरासश्च ॥**
**॥ इति उक्तार्थसमर्थनम् ॥**
**॥ इति एतदधिकरणीयतृतीयसूत्रगतशब्दार्थनिरूपणे तन्मतोक्तसमवायसम्बन्धस्य असिद्धता ॥**

* * *

**॥ अथ सम्बन्धप्रसङ्गेन सम्बन्धिनाम् ईश्वरगुणसङ्ख्यादीनामपि विप्रतिपत्तेर्निरासः ॥**
**॥ अथ तत्र ईश्वरगुणसङ्ख्यानां विप्रतिपत्तेर्निरासः ॥**
**॥ अथ तत्रादौ ईश्वरस्य अष्टमात्रगुणवत्त्वाभावः ॥**

२९६ **सु०—** एवं समवायं निराकृत्येदानीं सम्बन्धप्रसङ्गेन सम्बन्धिनामपि गुणादीनां प्रसक्तत्वादीश्वरगुणसङ्ख्याविप्रतिपत्तिं निराकरोति **न चेति** ।

अनु०— न चामन्दसदानन्दस्यन्द्यनन्तगुणार्णवः ।
ईश्वरोऽष्टगुणत्वेन प्रमेयोऽप्रमितत्वतः ॥

**ईश्वरोऽष्टगुणत्वेन** अष्टावेव गुणा अस्य सन्तीत्येवंरूपेण, न प्रमेयो न प्रतिपत्तव्यः । कुतः, अप्रमितत्वतः, अष्टगुणत्वे प्रमाणाभावात् । किन्त्वमन्दसदानन्दस्यन्द्यनन्तगुणार्णवः प्रमेयः । अर्णव इवार्णवः; क्षीरार्णवः सुधास्यन्दी भवति, अयञ्चानल्पविदोषानन्दसुधा-

स्यन्दी । सः, अनन्ता गुणाः शुभपदार्थाश्चिन्तामणिप्रभृतयोऽस्मिन्नित्यनन्तगुणः, अयमप्यानन्दादयोऽनन्ता गुणा अस्मिन्नित्यनन्तगुणः । अमन्दसदानन्दस्यन्दी चासौ अनन्तगुणश्चासौ अर्णवश्चेति विग्रहः ।

**वं०प०— सः** समुद्रः ।

**कं०रा०— अप्रमितत्वत** इत्यस्याष्टगुणत्वाकारेणेश्वरस्याप्रमितत्वादित्यर्थं मनसि निधाय पर्यवसितार्थमाह **अष्टगुणत्व इति** । ईश्वरस्येति शेषः । **अनल्पेति** अमन्दशब्दार्थकथनम् । **विदोषेति** सच्छब्दार्थकथनम् । **स इति** । सः क्षीरार्णवोऽनन्तगुण इत्यन्वयः । कथं क्षीरार्णवोऽनन्तगुण इत्यतो विवक्षितार्थमाह **अनन्ता गुणा इत्यादिना** ।

**श्रीनिधि०— अप्रमितत्वत इति** मूलपदस्याष्टगुणत्वेन अप्रमितत्वत इत्यर्थः । फलितार्थमाह **अष्टगुणत्वे प्रमाणाभावादिति** । अमन्देत्यस्यार्थः **अनल्पेति** । सदित्यस्यार्थः **विदोषेति** । **सुधास्यन्दीति** । कर्तरि निष्पन्नः कृदन्तोऽयं शब्दः । परमात्मपक्षे तु स्यन्दी भरित इति यावत् ।

**शे०वा०—** ननु न चामन्देतीश्वरगुणविप्रतिपत्तिनिराकरणस्य प्रकृतेन सङ्गत्यभावादनुपपत्तिमाशङ्क्य तस्य प्रकृतेन सङ्गत्यन्तराभावेऽपि प्रसङ्गलक्षणसङ्गतिसम्भवान्न तदनुपपत्तिरित्यभिप्रेत्य वृत्तानुवादपूर्वकं प्रसङ्गसङ्गतिं दर्शयन्नुक्तविप्रतिपत्तिनिरासकतयोत्तरग्रन्थं योजयति **एवमित्यादिना** । अष्टगुणत्वमात्रं न विरोधिकोटि । अनन्तगुणेऽष्टगुणत्वस्यापि सद्भावात् । अन्यथाऽनन्तगुणत्वानुपपत्तेरित्यतो विरोधिकोटितानिर्वाहाय सावधारणतयाऽनूद्य व्याचष्टे **अष्टगुणत्वेनेति** । अष्टगुणत्वेनाप्रमितत्वत इत्यप्यन्वयमभिप्रेत्य तल्लब्धहेत्वनुवादोऽयम् **'अष्टगुणत्व' इति** । मूलेऽमन्देत्यादेरानर्थक्यमाशङ्क्य प्रतिपत्तव्यत्वप्रकारोपदर्शनार्थत्वान्न तद्वैयर्थ्यमित्यभिप्रेत्य तदुपदर्शननिवर्त्यामाकाङ्क्षामुत्थापयति **किन्त्विति** । न तावन्न प्रतिपत्तव्य एवेति युक्तिमत् । तथा सति शास्त्रानर्थक्यापातात् । नापि रूपान्तरेण । तदभावादिति प्रश्नार्थः । रूपान्तरेण प्रतिपत्तव्यमिति द्वितीयमङ्गीकृत्य तदाह **अमन्देति** । 'ते चान्तता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुरि'ति भागवततात्पर्यं मनसि निधाय अनन्तगुण इत्येतद्व्याचष्टे **अनन्ता इति** ।

**वा०र०—** ननु श्लेषस्थले विशेषणानामुपमानोपमेययोर्योग्यतानुसारेणान्वयस्योपपाद्यत्वेऽपि प्रकृते श्लेषाभावात् कथम् 'अर्णवः सुधास्यन्दी भवती'त्याद्युपपादनमुभयोः । अत एवार्णव इत्यस्य ईश्वर इत्यनेन सम्बन्धे श्लेषलाभ इति निरस्तम् । ईश्वर इत्यस्य विशेष्यपदतां स्वीकृत्य तद्विशेषणत्वस्य अमन्देत्याद्यर्णव इत्यन्तेन स्वीकारेण तस्य विशेषणप्रवेशनविशेष्यतायोगात् । अत एव विग्रहप्रदर्शनावसरे अमन्दानन्देत्यादि अर्णवश्चेति विग्रह इति विशेषणान्तर्भावेन योजना वक्ष्यते । किं च समस्तैकपदत्वेनान्वयायोगः तत्कथमेतदिति

चेत् सत्यम् । तथापि बुद्ध्या विविक्तस्यार्णव इत्यस्येश्वर इत्यनेनान्वये ईश्वराख्यार्णवं लभ्यते । ततश्च श्लेष-सद्भावाद्युक्तमुपपादनमुभयोः । मूले अन्वयानुक्तिस्तु प्रथमतः ईश्वरोऽष्टगुणत्वेन न प्रतिपत्तव्य इत्येतावतैव पूर्तौ अर्णवपदानुपयोग इति बुध्या नातः कश्चिद्दोष इति ध्येयम् । मूले स्यन्दितानामाश्रयत्वं प्रवाहवत्वमिति वा । 'स्यन्दू प्रस्रवण' इति धातोः । उभयथापि पूर्णत्वं तात्पर्यार्थः ।

**चषक—** **सम्बन्धप्रसङ्गेन** समवायप्रसक्त्या । **सम्बन्धिनाम्** समवायप्रतियोगिनाम् । **प्रसक्तत्वात्** स्मृतत्वात् ।

**॥ इति ईश्वरस्य अष्टमात्रगुणवत्त्वाभावः ॥**

* * *

**॥ अथ तत्र तत ईश्वरस्यानन्तगुणवत्त्वम् ॥**

२९७ **सु०—** अष्टगुणत्ववदनन्तगुणत्वेऽपीश्वरस्य प्रमाणं नास्तीत्यत आह **मयीति** ।

अनु०— मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे ।
अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णवः ।
नारायणः परोऽशेषचेतनेभ्यः परं पदम् ।
इत्यादिवेदतद्वाक्यैरनन्तैश्चावसीयते ।
अनन्तगुणता विष्णोः

**अनन्ता** असङ्ख्याता गुणा यस्यासौ **अनन्तगुणः** । **गुणतोऽनन्त** इति गुणानां प्रत्येकमनवधिकत्वमनन्तावान्तरविशेषवत्त्वं चाभिप्रेयते । 'अनन्तविग्रह' इत्यन्तं भगवद्वाक्यम् । उत्तरं वेदवाक्यम् । **गुणमाहात्म्येति** सामान्यविशेषाभ्यामुक्तम् । **माहात्म्यं** परिमाणातिशयः । 'परं पदमि'त्युद्दिश्य अन्यदुच्यत इति न लिङ्गव्यत्ययदोषः ।

नन्वेतानि वचनान्युपचरितार्थानि किन्न स्युरित्यत आह **कथमेवेति** ।

अनु०— कथमेव ह्यपोद्यते ।

**बाधकवशात् हि मुख्यार्थोऽपोद्यते, न चात्र तदस्ति; इत्यतोऽनन्तगुणता विष्णोः कथमेवापोद्यते ।**

**परि०**— षष्ठस्कन्धे 'प्रत्येक(तो)शो गुणानां तु निस्सीमत्वमुदीर्यते । तदानन्त्यं तु गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव चे'ति चतुर्थाध्यायतात्पर्यानुरोधादाह **प्रत्येकमनवधिकत्वमिति** । 'यद्यनन्तविशेषाश्चे'त्युत्तरानुव्याख्यानानुरोधेनाह **अनन्तावान्तरविशेषवत्त्वं चेति** । प्रत्येकमित्यनुषङ्गः । **भगवदिति** कृष्णवाक्यम् । तेन मयीति व्याख्यातम् । परिमाणातिशयमाहात्म्यस्य शक्तिज्ञानादेश्च गुणत्वात् कथं पृथगुक्तिरित्यत आह **सामान्येति** । पद्यत इति यौगिकतया प्राप्यार्थकत्वे नारायणः परः पद इति विशेष्यनिघ्नतया भाव्यमित्यत आह **परं पदमित्युद्दिश्येति** । **अन्यदिति** । विशेषणान्तरमित्यर्थः ।

**गु०दी०**— **परं पदं** मुक्तप्राप्यपरमात्मस्वरूपम् । 'अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णव' इत्यादियोजनामभिप्रेत्याह **परं पदमुद्दिश्येति** । वस्तुगत्या नित्यनपुंसकत्वान्न काप्यनुपपत्तिः ।

**यादु०**— **अनन्तावान्तरविशेषवत्त्वं चेति** । तथा च प्रत्येकमप्यसङ्ख्यातत्वरूपमेवानन्त्यमत्र विवक्षितमिति भावः । यद्यपि भागवततात्पर्ये गुणतोऽनन्त इत्यस्य प्रत्येकमनवधिकत्वमेकमेवार्थतयोक्तं तथाऽपि 'यद्यनन्तविशेषाश्च तज्ज्ञानादेरि'त्युत्तरानुव्याख्यानानुसारेण गुणानां प्रत्येकमसङ्ख्यातविशेषवत्त्वमपि तदर्थतया अत्र उक्तमिति ज्ञातव्यम् । **न लिङ्गव्यत्ययदोष इति** । अन्यथा परं पदमित्यस्य विधेयत्वेऽनियतलिङ्गस्य विधेयस्योद्देश्यलिङ्गतानियमेन पुल्लिङ्गेन भाव्यमिति भावः । न च पदशब्दस्य नित्यनपुंसकत्वादनियतलिङ्गत्वमेव नास्तीति वाच्यम् । लिङ्गानुशासने पुल्लिङ्गाधिकारे 'नाड्यपजनोपपदानि व्रणाङ्गपदानी'त्यत्र नाडीव्रणोऽपाङ्गो जनपद इत्युदाहृत्य व्रणादीनामुभयलिङ्गत्वात् पुल्लिङ्गार्थोऽयमारम्भ इत्युक्तत्वेन पदशब्दस्योभयलिङ्गत्वावगमात् । अत एव पदशब्दस्य नियतलिङ्गत्वेनैव मूलसामञ्जस्यात् किमर्थमिदमुद्देश्यविधेयभावव्यत्यासेन समाधानमिति चोद्यानवकाश इति ध्येयम् ।

**कं०रा०**— 'अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णव' इत्यत्र माहात्म्यादेरपि गुणत्वात् पृथक्कीर्तनं कथमित्यत आह **गुणमाहात्म्येतीति** । गुणमाहात्म्यशक्तिज्ञानेति 'गावः समागताः बलीवर्दाश्च समागता' इत्यादिवत् सामान्यविशेषाभ्यां पृथगुक्तिरित्यर्थः । ननु 'नारायणः परोऽशेषचेतनेभ्यः परं पदमि'त्यत्र नारायण इत्युद्दिश्य परं पदमिति विधाने पद्यते प्राप्यत इति पदमिति प्राप्यार्थकस्य पदशब्दस्योद्देश्यलिङ्गत्वसम्भवेऽपि नपुंसकप्रयोगे लिङ्गव्यत्ययदोष इत्यत आह **परं पदमिति** । यत्परं पदं तत् एवंविधो नारायण इति परं पदमुद्दिश्य तस्य नारायणत्वं विधीयते । तथा च परं पदमिति सामान्यत उद्दिश्य नारायणत्वे विधीयमाने 'सामान्ये नपुंसकं'

प्रयोक्तव्यमिति पदशब्दस्य नपुंसकताया न्यायप्राप्तत्वान्नारायणशब्दस्य पुलिङ्गताया अभिधानादिसिद्धत्वान्न लिङ्गव्यत्ययदोष इत्यर्थः ।

**श्रीनिधि०— परं पदमित्युद्दिश्यान्यदुच्यत इति** । **परं पदं** उत्तमं प्राप्यम् । **अन्यत्** नारायणत्वम् । तथा च परं पदम् 'अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णवः । अशेषचेतनेभ्यः परो नारायण' इति योजना । माहात्म्यस्यापि गुणत्वात् कथं इयमुक्तिरित्यत आह **सामान्येति** । **परिमाणातिशय इति** । महांश्चासावात्मा च । तस्य भावः माहात्म्यम् । तच्चातिशयितं परिमाणमिति भावः ।

**शे०वा०—** 'प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यते । अनन्तत्वं तु गुणतो गुणतोऽनन्त एव चे'ति तात्पर्यं मनसि निधाय गुणतोऽनन्त इत्येतदनूद्य व्याख्याति **गुणतोऽनन्त इतीति** । 'यद्यनन्तविशेषाश्च तज्ज्ञानादेर्निवारिता' इत्युत्तरानुव्याख्यानानुसारेण प्रत्येकमसङ्ख्यातविशेषत्वमपि तदर्थ इत्याह **अनन्तावान्तर-विशेषवत्त्वं चेति** । **इत्यादिवेदतद्वाक्यैरि**त्यनुरोधेन प्रसक्तां मय्यनन्त इत्यादेर्वेदवाक्यतामनन्तगुणेत्यस्य च भगवद्वाक्यतां परिहरति **अनन्तेति** । **सामान्यविशेषाभ्यामुक्तमिति** । अन्यथा माहात्म्यादेरपि गुणत्वाद्गुणपदेनैव गृहीतत्वात् पुनस्तद्ग्रहणे पौनरुक्त्यप्रसङ्ग इति भावः । ननु 'नारायणो अशेषचेतनेभ्यः पर' इतिवत् परं पदम् इत्यस्यापि विधेयत्वादनियतलिङ्गविधेयशब्दानां चोद्देश्यलिङ्गतानियमात् पुलिङ्गेन भाव्यं, तत्कथं परं पदमिति नपुंसकम् । न च पदशब्दस्य नित्यनपुंसकत्वादनियतलिङ्गत्वस्यैवासिद्धेर्युक्तं नपुंसकत्वमिति वाच्यम् । लिङ्गा-नुशासने पुलिङ्गाधिकारे 'नाड्यपजनोपपदानि व्रणाङ्गपदानी'ति सूत्रवृत्तौ नाडीव्रणः अपाङ्गः जनपद इत्युदाहृत्य व्रणादीनामुभयलिङ्गत्वात् पुलिङ्गार्थोऽयमारम्भ इत्युक्तत्वेन पदशब्दस्योभयलिङ्गत्वस्थित्या नियतलिङ्गत्वायोगा-दित्यतो भवेदेवं यद्युक्तरीत्योद्देश्यविधेयभावः अत्राभिमतः स्यान्न चैवं, किन्तु परं पदमित्युद्दिश्य अन्यस्यैवात्र विधानम् । तच्च तत्पूर्वग्रन्थे किं पदं परमिति जिज्ञासयैव सिद्धमिति नानुपपत्तिरित्याह **परं पदमित्युद्दिश्येति** । **नन्विति** । मय्यनन्त इत्यादीनि वाक्यानि वाचं धेनुमुपासीतेत्यादिवदुपासनार्थानि । उपासनायाः कर्तव्यत्वे-ऽनन्तगुणतायां च तात्पर्ये वाक्यभेदप्रसङ्गात् कथमेतद्वाक्यबलेन विष्णोरनन्तगुणत्वसिद्धिरिति भावः । **बाधक-वशाद्धीति** । अन्यथा ज्ञानानन्दादिबोधकवाक्यानामप्युक्तरीत्या उपचरितार्थत्वप्रसङ्गेन ज्ञानादेरप्यसिद्धिप्रसङ्ग इति भावः । **न चात्रेति** । अयोग्यस्य शङ्कितुमशक्यत्वाद्योग्यस्य चानुपलब्धिबाधितत्वादिति भावः ।

**वा०र०— माहात्म्यादेरपीति** । अनेन माहात्म्येतीति मूलं माहात्म्येत्यादीति व्याख्येयमित्युक्तं भवति । **पुलिङ्गार्थोऽयमारम्भ इत्युक्तत्वेनेति** । 'उभयलिङ्गभेदपदानि नपुंसके' इति पूर्वत्र नपुंसकत्वस्योक्त-त्वात् क्लीबत्वनिवृत्त्यर्थमिति च नाडीति सूत्रवृत्तावुक्तत्वाच्च पुलिङ्गार्थोऽयमित्ययमर्थानुवाद इति ज्ञेयम् ।

**विठ्ठल०— प्रत्येकमनवधिकत्वमिति** । एकैकगुणानां प्रत्येकं निःसीमत्वमित्यर्थः । 'प्रत्येकशो गुणानां तु निःसीमत्वमुदीर्यत' इति तत्तात्पर्योक्तेः । 'यद्यनन्तविशेषाश्च तज्ज्ञानादेरि'ति वक्ष्यमाणानु-

व्याख्यानानुसारेणोक्तम् **अनन्तावान्तरेति** । विवृतं चैतत् सत्तत्त्वरत्नमालायां 'यथानन्दस्य मोदाद्या विज्ञानाद्याश्च संविद' इत्यादिना । **सामान्यविशेषाभ्यामिति** । गुणेति सामान्येन माहात्म्यशक्तीति विशेषेणेत्यर्थः । **परिमाणातिशय इति** । देशतः कालतश्च तथा एकैकगुणगतपरिमाणातिशयोऽपि ग्राह्यः । 'परिमाणः शतगुणोऽप्यानन्दस्फुटतावशादि'त्यादौ गुणेष्वपि परिमाणः प्रसिद्ध इति नोक्तदोषः । ननु नारायण इति पुल्लिङ्गानुसारेण पुल्लिङ्गे वक्तव्ये परंपदमिति कथं नपुंसकनिर्देश इत्यत आह **परंपदमुद्दिश्येति** । वेदाः प्रमाणमित्यादाविवोद्देश्यविधानस्थले लिङ्गव्यत्ययस्यादोषादिति भावः । न च पदशब्दस्य नियतनपुंसकत्वादित्येव किन्नोच्यत इति वाच्यम् । लिङ्गानुशासने पुल्लिङ्गाधिकारे जनपद इत्याद्युदाहृत्य पदशब्दस्योभयलिङ्गतोक्तेः । अत उद्देश्यविधेयव्यत्यासेनैव समाधानं युक्तमिति ध्येयम् ।

**चषक**— षष्ठस्कन्धे 'प्रत्येकतो गुणानां तु निस्सीमत्वमुदीर्यते । तदानन्त्यं तु गुणतस्ते चानन्ता हि सङ्ख्यया । अतोऽनन्तगुणो विष्णुर्गुणतोऽनन्त एव चे'ति तुरीयाध्यायतात्पर्यमनुरुन्धानो व्याकुरुते **अनन्तावान्तरविशेषवत्त्वं चेति** । **न लिङ्गव्यत्ययदोष इति** । लिङ्गानुशासने 'नाड्यपजनोपपदानीति' सूत्रकृता नाडीव्रणः अपाङ्गः जनपद इत्युदाहृत्य व्रणादीनामुभयलिङ्गत्वेन (?) भवितव्यमित्याशङ्कानिरसनायेत्थं समाहितमित्यवसेयम् ।

**॥ इति ईश्वरस्यानन्तगुणवत्त्वम् ॥**

* * *

**॥ अथ तत्र तत ईश्वरज्ञानेच्छाप्रयत्नानामखण्डत्वाभावः ॥**

## २९८ सु०— यच्च वैशेषिकादिभिः ईश्वरज्ञानेच्छाप्रयत्नानाम् अखण्डत्वमुक्तं तदप्यसत्, 'अनन्तं गुणत' इति प्रत्येकं गुणानामनन्तविशेषवत्त्वस्यागमसिद्धत्वात् ।

**कं०रा०**— **अखण्डत्वमिति** । निर्विशेषत्वमित्यर्थः ।

**शे०वा०**— **अखण्डत्वमिति** । निर्विशेषत्वमित्यर्थः ।

**विट्ठल०**— **अखण्डत्वमिति** । निर्विशेषत्वमित्यर्थः ।

**॥ इति ईश्वरज्ञानेच्छाप्रयत्नानामखण्डत्वाभावः ॥**

* * *

॥ अथ तत्र तत ईश्वरगुणानां प्रत्येकमनन्तत्वविशेषवत्त्वानङ्गीकारे बाधकम् ॥

२९९ **सु०— तदनङ्गीकारे बाधकं चाह यदीति ।**

**अनु०— यद्यनन्तविशेषाश्च तज्ज्ञानादेर्निवारिताः ।**
**कथं तत्तद्विषयता सार्वज्ञ्यार्थं विधीयते ।**

**तत्तद्विषयता** घटादिविषयता, **विधीयते** अस्तित्वेनाङ्गीक्रियते । मा भूत् तत्तद्विषयत्वमित्यत उक्तं **सार्वज्ञ्यार्थमिति** । उपलक्षणं चैतत्, 'सर्वकर्तृत्वाद्यर्थं चे'त्यपि द्रष्टव्यम् । अत्र **अनन्तविशेषा** इति यथागमसिद्धोक्तिः ।

वस्तुतस्तु यदि ईश्वरज्ञानादि निर्विशेषं स्यात्, तदा तत्तद्विषयत्वं न स्यात् । तदा च तस्य सार्वज्ञ्यादिकं न स्यात् । सर्वविषयज्ञानवान् हि सर्वज्ञो नाम, तथा सर्वकार्योत्पत्तिविषयेच्छाप्रयत्नवान् सर्वकर्ता, सर्वकार्यविनाशविषयेच्छादिमांश्च सर्वसंहर्ता । अङ्गीकृतं च सार्वज्ञ्यादि परेण परमेश्वरस्य, अतस्तदर्थं ज्ञानादेस्तत्तद्विषयतया भाव्यम्, कथं च तथा सति निर्विशेषत्वमिति ।

**परि०— सर्वकर्तृत्वाद्यर्थमिति** । संहर्तृत्वमादिपदार्थः । अखण्डत्वखण्डनाय सविशेषत्वमात्रे वाच्ये सति यद्यनन्तविशेषाश्चेति किमर्थमुक्तमित्यत आह **अत्रानन्तेति** । 'अनन्तगुणत' इति यथास्थितागमसिद्धस्योक्तिरित्यर्थः ।

**यादु०— सर्वकर्तृत्वाद्यर्थं च** इत्यत्र आदिपदेन सर्वसंहर्तृत्वं ग्राह्यम् ।

**श्रीनिधि०—** यद्यनन्तविशेषाश्च इत्यत्र चशब्दः बाधकसमुच्चयार्थ इत्याह **तदनङ्गीकारे बाधकं चाहेति** । न केवलं गुणतोऽनन्त इति साधकमात्रमुक्तम्, किन्तु बाधकं चास्तीति । एतदर्थमेव पूर्वं गुणतोऽनन्त इति व्याख्यावसरे **अनन्तावान्तरविशेषवत्त्वं चाभिप्रेयत** इत्युक्तम् ।

**शे०वा०— सर्वकर्तृत्वाद्यर्थं च** इत्यत्र आदिपदेन सर्वसंहर्तृत्वपरिग्रहः । **तथा सतीति** । तद्विषयत्वाभ्युपगम इत्यर्थः ।

**वा०र०—** तत्तद्विषयतया परेण विधानाभावाद्व्याचष्टे **विधीयत** इत्यादिना मूले ।

**विठ्ठल०— सर्वकर्तृत्वाद्यर्थमिति** । अत्रादिशब्देन संहर्तृत्वग्रहणम् । अखण्डत्वनिरासाय सविशेषत्वमात्रमलमनन्तविशेषाश्चेति विशेषाणामनन्तत्वोक्तिः किमर्थेत्यत आह **अत्रानन्तेति** । गुणतोऽनन्ते अनन्तगुणेत्याद्यागमसिद्धार्थस्य वस्तुतत्वकथनमित्यर्थः । **तत्तद्विषयत्त्वं न स्यादिति** । घटविषयकज्ञानत्वपटविषयकज्ञानत्वादिरूपविशेषाभावे तत्तद्विषयत्वानुपपत्तेरिति भावः । सर्वकर्तेतीत्यतःपरं न स्यादिति शेषः ।

**॥ इति ईश्वरगुणानां प्रत्येकमनन्तत्वविशेषवत्त्वानङ्गीकारे बाधकम् ॥**

* * *

**॥ अथ तत्र तत ईश्वरीयनित्यज्ञानादेः विषयापेक्षाभावनिरासः ॥**

३०० **सु०— एतेनैतदपि निरस्तम् । यदाहुः, 'अनित्यं हि ज्ञानादि कर्मकारकतया विषयसहितत्वमपेक्षेत, नित्यस्य तु किं विषयेणे'ति ।**

**विषयाणां चानन्त्यादनन्तविशेषतासिद्धिः ।**

**परि०— एतेनेति** । विपक्षे सार्वज्ञ्यसर्वकर्तृत्वादिभङ्गापत्तिबाधककथनेनेत्यर्थः । नन्वेतावता सविशेषत्वमस्तु । अनन्तविशेषाः कुत इत्यत आह **विषयाणां चेति** ।

**कं०रा०**— ननु सार्वज्ञाद्यर्थमीश्वरज्ञानादेस्तत्तद्विषयताऽस्त्वनन्तविशेषता तु कुतः सिद्ध्यतीत्यत आह **विषयाणामिति** ।

**श्रीनिधि०— एतेनैतदपि निरस्तमिति** । तत्तद्विषयत्वस्य सार्वज्ञार्थत्वकथनेनेत्यर्थः । ज्ञानस्वरूपनिष्पत्त्यर्थं त्वस्य अकथनादिति भावः । ननु तर्कस्य विपर्यये पर्यवसाने भवति । सर्वज्ञः तस्मात् तत्तद्विषयमेव तज्ज्ञानं तथा च न निर्विशेषम् । किन्तु सविशेषमेव । तत्तद्विषयत्वस्यैव विशेषत्वादिति सविशेषत्वमेव सिद्ध्येदनन्तविशेषत्वं तु वास्तवः कुत इत्यत आह **विषयाणां चानन्त्यादिति** ।

**शे०वा०— एतेनेति** । सर्वविषयकज्ञानवत्त्वरूपसार्वज्ञस्य सर्वविषयकत्वाभावेऽसम्भवोपपादकेन सार्वज्ञार्थमिति विशेषणेनेत्यर्थः । **अनित्यं हीति** । कार्यं हीत्यर्थः । **नित्यस्येति** । अकार्यस्येत्यर्थः । अयं भावः । कारकमुत्पादकमिति च पर्यायावेतौ । कार्यमेव चोत्पादकमपेक्षते न त्वकार्यमपि । अकार्यं चेश्वरज्ञानमिति न तस्य कर्मकारकतया विषयापेक्षत्वमिति । नोत्पादकमेव कारकमिति नियमोऽस्ति, तथा सत्यस्ति गगनमित्यादौ गगनादीनामकारकत्वप्रसङ्गात् । तत्सत्ताया अकार्यत्वात् । किन्तु धात्वर्थाश्रयः कर्ता तद्विषयः कर्मेत्यादि । तत्र क्रियायाः कर्माद्यन्वितत्वानन्वितत्वे प्रति तदाकाङ्क्षानाकाङ्क्षे एव प्रयोजके, न तु कार्यत्वा-

कार्यत्वे । तथा सति कस्यचिद्धात्वर्थस्य कर्माद्यन्वितत्वं कस्यचिन्नेति व्यवस्थाऽभावप्रसङ्गात् । ततश्चेश्वरज्ञानस्य अकार्यत्वेऽपि जानातेः सकर्मकक्रियावचनत्वेन कर्मान्वयप्रयोजकतदाकाङ्क्षासद्भावात् कर्मसहितत्वापेक्षाऽस्त्येवेत्यङ्गीकार्यम् । अन्यथेश्वरज्ञानस्य विषयानन्वितत्वेन सर्वविषयकज्ञानवत्त्वाभावप्रसङ्गेन सार्वज्ञानुपपत्तिप्रसङ्गादिति निरासप्रकारः । अस्त्वीश्वरज्ञानस्य तत्तद्विषयत्वं तावताऽपि कथमनन्तावान्तरविशेषवत्त्वं तस्येत्यत आह **विषयाणां चेति** ।

**वा०र०—** सर्वथापि तु त एव । 'न चाधिकारिकमपी'त्येतदधिकरणद्वयसम्बन्धि 'नित्यत्वात् तादृशं च स्यादि'तीत्यनुभाष्यसम्बन्धिनित्यत्वमकार्यत्वस्येत्यादि मूलानुसारेण व्याख्याति **कार्यं हीत्यर्थ इत्यादि** । तदनुसारेणाशङ्कातन्निरासयोरभिप्रायस्फोरणेन ते उपपादयति **अयं भाव इत्यादिना प्रकार इत्यन्तेन** । नित्यज्ञानप्रयत्नेच्छामित्येतदधिकरणारम्भभाष्यस्य यद्वा नित्यत्वसङ्कीर्तनत्वमित्येतद्योजनानुसारेणाभावमाह **अयं भाव इत्यादि** ।

**विठ्ठल०—** नन्वीश्वरज्ञानस्य निर्विषयत्वापादनमिष्टापादनमेव नित्यज्ञानस्य विषयानपेक्षत्वाभ्युपगमादित्यत आह **एतेनेति** । निर्विषयत्वे सार्वज्ञानुपपत्तिकथनेनेत्यर्थः । विषयस्य क्वापि ज्ञानं प्रति जनकत्वासम्मतेः । केवलं ज्ञानं प्रति व्यावर्तकत्वं विषयस्य । नित्यज्ञानेऽप्यस्त्येवम् । न चेश्वरव्यावर्तकत्वे विषयसापेक्षत्वतयान्याधीनत्वमापन्नमिति वाच्यम् । 'अन्यापेक्षा यदि स्युष्टे सत्तैवं देशकालगे'ति भक्तिपादे विषयसापेक्षताया निरसिष्यमाणत्वात् । प्रथमस्कन्धतात्पर्ये च 'विषयापेक्षितं ज्ञानं विषयैश्च विशेषितमि'ति । ननु भवतु सविशेषत्वं अनन्ता विशेषा इत्येतत्कुत इत्यत आह **विषयाणां चेति** ।

**चषक— अपेक्षेत इति** । उत्पत्त्यादाविति पूरणीयम् ।

**॥ इति ईश्वरीयनित्यज्ञानादेः विषयापेक्षाभावनिरासः ॥**

* * *

**॥ अथ तत्र ततो विषयाणां चानन्त्यात् ईश्वरीयज्ञानादेरनन्तविशेषतासिद्धिः ॥**
**॥ अथ च तत्र औपाधिकविशेषस्य पूर्वमेव निराकृतता ॥**

**३०१ सु०— स्यादेतत् । निर्विशेषमेवेश्वरज्ञानं ज्ञप्तिरूपम्, तत्तु तैस्तैर्घटाद्युपाधिभिस्तत्तद्विषयमिति व्यपदिश्यते; एवमखण्डैव तस्येच्छा 'अस्तु' इत्येवमाकारा । तथाऽपि तैस्तैः सृष्ट्याद्युपाधिभिः सिसृक्षा सञ्जिहीर्षेत्याद्युच्यते, तथा प्रयत्नोऽपि । अतः स्वतो विशेषाभावेऽप्यौपाधिकविशेषवशात् तत्तद्विषयता सार्वज्ञादिकं च युक्तमित्यत आह औपाधिकेति ।**

अनु०— औपाधिकविशेषस्तु पूर्वमेव निराकृतः ॥

'औपाधिकोऽपि विशेषोऽस्ति न वा । अस्ति चेत् कथं निर्विशेषत्वम् । न चेत् पुनः सार्वज्ञाद्यभावः' इत्यादिपूर्वोक्तन्यायेनैव निरस्तमित्यर्थः ।

किञ्चोपाधिर्ज्ञानादिसम्बद्धो विशेषमापादयेदसम्बद्धो वा । आद्ये सम्बन्धो विषयविषयिभावातिरिक्तो नास्तीति पूर्वमेव तद्विषयतैष्टव्या । द्वितीयेऽतिप्रसङ्गः ।

अपि च 'अस्तु' इत्येवमाकारेणैवेच्छादिना सृष्ट्यादिकं भवति, उत 'सृष्ट्यादिकं भवतु' इत्येवमाकारेण । नाद्यः, अतिप्रसङ्गात् । द्वितीये स्वतः सविशेषत्वमित्येषा दिक् ।

**परि०— पूर्वमेवेति** । उपाधिसम्बन्धात्पूर्वमित्यर्थः । **अतिप्रसङ्ग इति** । घटार्थप्रयत्नेन शरावस्य, शरावार्थयत्नेन घटस्य जन्मेत्याद्यतिप्रसङ्ग इत्यर्थः । **द्वितीये स्वत इति** । उपाधिसम्बन्धात्प्रागेव सृष्ट्यादिविषयकत्वस्य वाच्यत्वात् । सृष्ट्याद्युपाधिसम्बन्धेनैव सृष्ट्यादिकं भवत्वित्याकारकत्वेनात्माश्रयः । किञ्च स्वत एव सिसृक्षुत्वादिविशेषस्येच्छायामभावे सृष्टिर्भवत्वितीच्छा संहारोऽस्त्वित्येवमाकारापि कुतो न स्यात् । तथा च सृष्टिदशायां संहारः संहारदशायां सृष्टिरित्यपि स्यदित्याद्यभिप्रेत्याह **एषा दिगिति** । यद्वा यत्त्वीश्वरे ज्ञानचिकीर्षाप्रयत्नानां नित्यत्वमशरीरेऽपि ज्ञानेच्छादिकं तदप्येवं लोके ज्ञानादेरनित्यशरीरोपाधिकत्वाल्पविषयत्वपूर्वपूर्वहेतुकत्वादेर्दर्शनादिहापि तथाऽनुमानेन निरसनीयमित्याह **एषा दिगिति** ॥ ***ईशज्ञानादेः सविषयत्वोक्तिः ॥***

**यादु०— द्वितीये स्वतः सविशेषत्वमिति** । असम्बद्धस्य सृष्ट्याद्युपाधेरतिप्रसङ्गेन विशेषानापादकत्वात् सम्बद्धस्यैव तदापादकत्वं वाच्यम् । सम्बन्धश्च विषयिविषयभावातिरिक्तो नास्तीति पूर्वमेव तद्विषयतैष्टव्येत्युक्तरीत्येत्यर्थः । किञ्च ज्ञानादावागन्तुकोपाध्यधीनविशेषाङ्गीकारे आगन्तुकोपाधिसिद्धौ ज्ञानादौ विशेषसिद्धिः तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयापत्तिः । तदिदमाह **एषा दिगिति** ।

**कं०रा०— पूर्वमेवेति** । तथा चेश्वरज्ञानादेः स्वाभाविकविशेषवत्त्वमेवावगतमिति भावः ।

**श्रीनिधि०—** अखण्डत्वं चेश्वरज्ञानस्यावान्तरविशेषाभावाभिप्रायेण न तु सर्वविशेषाभिप्रायेणेत्याह **ज्ञप्तिरूपमिति** । पूर्वं 'यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यत' इत्यत्र समवाये औपाधिकभेदवत्त्वं निराकृतम् । न तु ज्ञानादावौपाधिकविशेषत्वं तत्कथं 'पूर्वमेव निराकृत' इत्युच्यते इत्यत आह **पूर्वोक्तेन न्याये-**

**नेति** । **पूर्वमेवेति** । उपाधिना तत्तद्विषयत्वोत्पत्तेः पूर्वमेवेत्यर्थः । एवं च उपाधिकृतं तद्विषयत्वमिति रिक्तमिति भावः । **स्वतः सविशेषत्वमिति** । औपाधिकमेव तदिति चेत् किमुपाधिजन्यमौपाधिकमित्यर्थः । उतोपाधिगम्यमिति । नाद्यः । सृष्ट्यादिकं भवत्वितीच्छासमये सृष्ट्यादेरभावेन तदनुपपत्तेः । अव्यवहितपूर्ववर्तिन एव जनकत्वात् । द्वितीयेऽपि ज्ञानं किं भ्रमः उत प्रमा । नाद्यः । निर्विशेषत्वस्य नामान्तरत्वात् । द्वितीये स्वतः सविशेषत्वमित्यभिप्रेत्याह **स्वतः सविशेषत्वमित्येषा दिगिति** ।

**शे०वा०— तथा प्रयत्नोऽपीति** । निर्विशेष एवेश्वरप्रयत्नः कृतिरूपस्तथाऽपि सृष्ट्याद्युपाधिभिस्तत्तद्विषय इति व्यपदिश्यत इत्यर्थः । तद्विषयतेत्यतःपरं तत्प्रयुक्तमिति शेषः । **आद्य इति** । अद्रव्यत्वान्न संयोगो, अन्यगुणस्यान्येनासमवायान्नेश्वरज्ञानस्य घटादिना समवायोऽपीति भावः । अस्तु तर्हि विषयविषयिभाव एव तयोः सम्बन्ध इत्यतस्तथा सति विशेषापादनप्रयोजकसम्बन्धस्य तदापादनात्पूर्वभावित्वनियमात्पूर्वमेव सतस्तद्विषयत्वस्योपाधिसम्बन्धाप्रयुक्तत्वान्नौपाधिकत्वमिति परिहरति **इति पूर्वमेवेति** । **अतिप्रसङ्ग इति** । तथा सति काश्मीरस्थमहारजनाद्युपाधेरपि केरलदेशवर्तिवाससो विशेषकत्वं स्यादित्यतिप्रसङ्ग इत्यर्थः । **अतिप्रसङ्गादिति** । प्रलयकारणीभूताया अस्त्वित्येवमाकारेच्छायाः सृष्टिकाले, सृष्टिकारणीभूतेच्छायाः प्रलयकालेऽपि सद्भावेन सृष्टिकाले प्रलयः प्रलयकाले सृष्टिः स्यादित्यतिप्रसङ्गादित्यर्थः । **द्वितीये स्वतः सविशेषत्वमिति** । असम्बद्धस्य सृष्ट्याद्युपाधेरतिप्रसङ्गेन विशेषानापादकत्वात् सम्बद्धस्यैव तदापादकत्वं वाच्यम् । सम्बन्धश्च विषयविषयिभावातिरिक्तो नास्तीति पूर्वमेव तद्विषयतैष्टव्येति पूर्वोक्तरीत्येत्यर्थः । किञ्च ज्ञानादावागन्तुकोपाध्यधीनविशेषाङ्गीकारेऽन्योन्याश्रयश्च । सृष्ट्यादिकमन्तरेण सृष्ट्यादीच्छानुपपत्तिः सृष्ट्यादीच्छामन्तरेण सृष्ट्यादेरनुपपत्तिरित्यन्योन्याश्रयापत्त्या सृष्ट्याद्युपाधिनिबन्धनत्वानुपपत्त्या स्वाभाविकत्वावश्यम्भावादिति भावः । स्यादेतत् । सृष्ट्यादिकं प्रति कारणीभूतसृष्ट्यादीच्छाया न स्वकार्यसृष्ट्याद्युपाधिनिबन्धनत्वं ब्रूमः, किन्त्वन्यत्तन्निबन्धनत्वमेवेति कथमन्योन्याश्रय इत्यतः तर्हि चक्रकादिकं स्यादित्याशयेनाह **एषा दिगिति** ।

**विठ्ठल०—** विषयाघटितं केवलं यज्ज्ञानं तदत्र निर्विशेषमित्युच्यत इति स्फोरणाय ज्ञप्तिरूपमित्युक्तम् । **अस्ति चेदिति** । यथाकथञ्चित् विशेषाणामङ्गीकृतत्वादिति भावः । तथापि स्वाभाविको विशेषो नास्तीति चेन्न । उपाधीनां विद्यमानविशेषज्ञापकत्वमेव न तु कारकत्वमिति निर्णीतत्वादिति भावः । **किञ्चोपाधिरिति** । घटादिर्विषयभूत उपाधिरित्यर्थः । **पूर्वमेवेति** । तथा चोपाधिसम्बन्धात्पूर्वमेव ज्ञानादेः सर्वविषयकत्वे स्वाभाविकत्वमेव सविशेषत्वमिति भावः । इच्छादिनेत्यतःपरं सृष्ट्याद्युपपत्तिरित्युच्यते वा किं वा इत्येतदध्याहार्यम् । **नाद्योऽतिप्रसङ्गादिति** । सृष्टिरस्तीत्याकारकेच्छया सृष्ट्यर्थप्रयत्ने संहारस्यापि प्रसक्तेरिति भावः । **द्वितीये स्वत इति** । सृष्ट्यादिकं भवत्यत असम्बन्धस्य सृष्ट्याद्युपाधेः संहारादिव्यावर्तकत्वायोगाद्विषयविषयिभावातिरिक्तसम्बन्धाभावेन पूर्वमेव स्वतस्सद्विषयत्वं लब्धमित्यौपाधिकविशेषत्वं भग्नमिति भावः । किं च ज्ञानादावागन्तुकोपाध्यधीनसर्वदोषत्वाङ्गीकारे उपाधिसिद्धौ ज्ञानादौ विशेषसिद्धिः तत्सिद्धावेव तत्र ज्ञानादिविषयत्व-

रूपोपाधिसिद्धिरित्यन्योन्याश्रयता । किं चेच्छादेः स्वतो निर्विशेषत्वे सृष्टिर्भवत्विति इच्छायाः सकाशात् संहारो भवत्वितीच्छाया विशेषाभावात्सृष्टिसमये संहारोऽपि स्यात्। उपाधेरप्रयोजकत्वादित्यभिप्रेत्याह **इत्येषा दिगिति**।

**चषक**— **अखण्डा** निर्भेदा । **एष्टव्या** अङ्गीकर्तव्या ।

**॥ इति औपाधिकविशेषस्य पूर्वमेव निराकृतता ॥**

**॥ इति विषयाणां चानन्त्यात् ईश्वरीयज्ञानादेरनन्तविशेषतासिद्धिः ॥**

* * *

**॥ अथ तत्र ततो वैशेषिकैकदेश्युक्त 'ईश्वरज्ञानस्य स्वप्रकाशत्वाभाव'पाकरणम् ॥**

३०२ **सु०**— वैशेषिकादयः केचिदीश्वरज्ञानं स्वप्रकाशं न भवतीत्याहुः, तानपाकरोति **स्वप्रकाशत्वमपीति** ।

अनु०— स्वप्रकाशत्वमपि तु यैर्ज्ञानस्य निवारितम् ।
कथं सर्वज्ञता तस्य

**यैस्तु** इति सम्बन्धः । केचिद्वैशेषिकादयः स्वप्रकाशतामङ्गीकुर्वन्तीत्येतत्सूचयितुं तुशब्दः । **ज्ञानस्य** ईश्वरज्ञानस्य । 'तेषां पक्ष' इति शेषः । **तस्य** ईश्वरस्य ।

कथं स्वप्रकाशत्वाभावे सर्वज्ञताऽभाव इत्यत आह **स्वेति** ।

स्वज्ञानाधिगमं विना ।

स्वज्ञानाधिगमाभावादित्यर्थः । एकमेव हीश्वरज्ञानं तच्च स्वव्यतिरिक्तमेव विषयीकरोति, न तु स्वरूपम्, इति कथमीश्वरः सर्वज्ञः स्यादिति ।

**गु०दी०**— **स्वज्ञानाधिगमं विना** इति मूलस्य स्वज्ञानेनेश्वरज्ञानेनाधिगमः ईश्वरज्ञानस्यैवावगमनमित्यर्थः । यद्यपि वेदान्तिनां मते ब्रह्मज्ञानेनैव ब्रह्मणोऽवगमेऽपि स्वप्रकाशत्वं तस्यैव ज्ञानरूपत्वात् । तार्किकस्य त्वीश्वरविषयत्वेऽपि न स्वप्रकाशत्वम् । किन्त्वीश्वरज्ञानेनैवेश्वरज्ञानस्याप्यवगमे सति । अतस्तन्मतानुवादायैवमुक्तिः । अन्यथा स्वाधिगमं विनेत्यवक्ष्यत् । एवमपि स्वेतरसर्वविषयकस्य तस्यैव ज्ञानस्य स्वाविषयकत्वादसार्वज्ञ्यं तदवस्थमिति भावः ।

**विट्ठल०**— ज्ञानस्य स्वप्रकाशत्वाभावे सार्वज्ञाभावः कुत इत्याशङ्कानिरासाय 'स्वज्ञानाधिगमं विने'-त्यस्याभिप्रायं व्यनक्ति **एकमेव हीति** । इतीत्यतःपरं अङ्गीकार इति शेषः ।

चषक— **स्वप्रकाशताम्** । स्वविषयप्रकाशतादात्म्यम् ।

* * *

**॥ अथ च तत्रादौ 'स्वप्रकाशज्ञानाभावेऽपीश्वरस्य सार्वज्ञसम्भवः' इतिपक्षदूषणम् ॥**

३०३ **सु०**— स्वप्रकाशज्ञानाभावेऽपीश्वरस्य सार्वज्ञसम्भवं शङ्कते **ज्ञानमिति** ।

अनु०— ज्ञानं विश्वाधिगं त्वेकं तज्ज्ञानविषयं परम् ।
इति ज्ञानद्वयेनैव सर्ववित्परमेश्वरः ।
इति चेत्

**विश्वाधिगं** स्वव्यतिरिक्तसमस्तविषयम् । तज्ज्ञानं विषयो यस्य तत् तथोक्तम् ।

स्यादयं दोषो यदीश्वरस्यैकमेव ज्ञानं स्यान्न चैवम् । द्वे खल्वीश्वरज्ञाने; तत्रैकं स्वव्यतिरिक्तद्वितीयज्ञानसहितसर्वविषयम्, द्वितीयं तु तज्ज्ञानविषयीकारि । एवञ्च ज्ञानस्य स्वविषयत्वाभावेऽपीश्वरस्यैवंविधज्ञानद्वयेनैव सर्ववित्त्वमुपपद्यत इति ।

तथाऽपि ईश्वरस्य असार्वज्ञं तज्ज्ञानस्य वा स्वप्रकाशत्वं दुष्परिहरमित्याशयवान् उत्तरमाह **एष एवेति** ।

एष एवार्थस्तज्ज्ञानावसितो यदि ।
स्वप्रकाशत्वमेव स्यात्

आस्तां तावत्सजातीयात्मविशेषगुणयौगपद्यानुपपत्तिः । ज्ञानद्वयवानहं, ज्ञानद्वयेन सर्वज्ञोऽस्मि, इदं मे ज्ञानमेतज्ज्ञानविषयं एतच्चैतद्विषयमित्यादिः **एष एवार्थः** ईश्वरेण ज्ञायते न वा । नेति पक्षे तस्य सार्वज्ञं न स्यात् । आद्ये किमेतयोरन्यतरेणोत ज्ञानान्तरेण ।

प्रथमस्येदमुत्तरम् ।। **एष एवार्थः** तयोरन्यतरेण ज्ञानेन **अवसितो** विषयीकृतो **यदि**, तदा तस्य ज्ञानस्य **स्वप्रकाशत्वं स्यादेव** इति ।

तत्कथमित्यत आह **ज्ञानं हीति** ।

**ज्ञानं ह्येतद्विशेषणम् ।**

यद्यप्येतज्ज्ञानं निष्कृष्टं स्वस्य स्वविषयतामापद्यते, तथाऽपि ज्ञानविषयस्यैतस्य ज्ञानद्वयवानहमित्यादेरर्थस्य विशेषणं भवत्येव । तथा च विशिष्टार्थविषयत्वे विशेषणभूत-स्वविषयत्वमवर्जनीयमेव, न हि दण्डिसाक्षात्कारे दण्डो न स्फुरतीति युक्तमिति ।

द्वितीये दोषमाह **ज्ञानान्तरेणेति** ।

**ज्ञानान्तरेण चेदत्र भवेदेवानवस्थितिः ।**

**ज्ञानान्तरेण** तृतीयेन ज्ञानेन, यद्येषोऽर्थो विषयीक्रियते । **अत्र** अस्मिन्पक्षे **अनव-स्थितिः** ज्ञानद्वयवानीश्वर इति नियमाभावो **भवेत्** ।

यस्तु ज्ञानत्रयवानिति नियमं मन्यते स प्रष्टव्यः, किं ज्ञानत्रयवानहमस्मीत्यादिक-मर्थमीश्वरो वेत्ति न वेति । द्वितीये तु पुनरसार्वज्ञम् । आद्ये किमेतत्त्रयान्यतमेन, उत चतुर्थेन । नाद्यः स्वप्रकाशतापत्तेः । द्वितीये पुनरनवस्थैव । एवं ज्ञानान्तरपरम्पराभ्युपगम-व्यसनं दुर्वारं स्यात् ।

परि०— पदार्थमुक्त्वा तात्पर्यमाह **स्यादयं दोष इति** । एवशब्दतात्पर्यमाह **आस्तां तावदिति** । **इदं मे ज्ञानमिति** । द्वितीयज्ञानं प्रथमज्ञानविषयम् । **एतच्च** प्रथमं ज्ञानं च, **एतद्विषयं** स्वातिरिक्तकृत्स्नविषयमित्यर्थः । **इत्यादिरिति** । ज्ञानद्वयस्य यौगपद्यं विषयभेदमित्यादिरादिपदार्थः । तावता कथमनवस्थेत्यत आह **एवं ज्ञानान्तरेति** ।

गु०दी०— 'योऽशनाया पिपासे चे'त्यादिना दुःखनिवृत्तिमुक्त्वा तन्मध्ये आनन्दश्रुतिं च पठता आचार्येण 'विमुक्तदुःखास्सुखिनो भवन्ती'त्यादौ दुःखनिवृत्तिरानन्दश्च सहैवोच्यते । तत्र दुःखनिवृत्तिरेव सुखमिति वदतः पौनरुक्त्यं च स्यादिति सूचितम् ।

**यादु०— द्वितीये पुनरनवस्थैवेति** । ज्ञानत्रयवानीश्वर इति नियमाभावो भवेदित्यर्थः । एवं ज्ञानचतुष्टयादिनियमाभ्युपगमेऽपि पञ्चमादिज्ञानाभ्युपगमप्राप्त्या नियमाभाव एवापादनीय इत्याह **एवं ज्ञानान्तरेति** । प्रसिद्धानवस्था तूत्पत्तिज्ञप्त्यप्रतिबन्धकत्वादत्र नाभिप्रेतेति ज्ञातव्यम् ।

**कं०रा०— स्वप्रकाशतापत्तेरिति** । पूर्वोक्तन्यायेनेति शेषः ।

**श्रीनिधि०— निष्कृष्टं** स्वतन्त्रम् । 'एतद्विशेषणमि'त्यत्र एतस्य विशेषणमिति विग्रहमभिप्रेत्याह **एतस्य ज्ञानद्वयवानित्यादेरर्थस्येति** । **ज्ञानद्वयवानीश्वर इति नियमो न भवेदिति** । अवस्थितिर्नियमः तदभावोऽनवस्थितिरिति अनवस्थितिशब्दार्थमभिप्रेत्य एवं उक्तम् । अनवस्थितिरवस्थानाभाव इत्यर्थमभिप्रेत्याह **एवं ज्ञानान्तरपरम्पराभ्युपगमेति** । चतुर्थपञ्चमाद्यनवस्थितज्ञानान्तरपरम्पराभ्युपगमव्यसनमित्यर्थः ।

**शे०वा०—** एवंविधज्ञानद्वयेनैव सर्ववित्त्वमुपपद्यत इति मूलपाठः स्पष्ट एव । क्वचित्सर्वविषयत्वमुपपाद्यत इति पाठः । तत्र तज्ज्ञानस्येत्यनुवर्तनाद्विवक्षितसिद्धिः । **अनवस्थैवेति** । ज्ञानत्रयवानेवेश्वर इति व्यवस्था न स्यादेवेत्यर्थः । यस्तु ज्ञानचतुष्टयवानीश्वर इति नियमं मन्यते स प्रष्टव्यः । किं ज्ञानचतुष्टयवानहमस्मीत्यादिकमर्थमीश्वरो वेत्ति न वेति । द्वितीये पुनरसार्वज्ञम् । आद्ये किमेतच्चतुष्टयान्यतमेनोत पञ्चमेन । नाद्यः । स्वप्रकाशत्वापत्तेः । द्वितीये ज्ञानचतुष्टयवानीश्वर इति नियमानुपपत्तिरेवेत्याशयेनाह **एवं ज्ञानान्तरेति** । प्रसिद्धानवस्था तूत्पत्तिज्ञप्त्यप्रतिबन्धकत्वादत्र नाभिप्रेतेति ज्ञातव्यमित्याहुः ।

**वा०र०— सर्ववित्त्वमुपपद्यत इति मूलपाठ इति** टीकायां मूलपाठो नाम स्वव्याख्येयं यन्मूलं तत्पाठोऽभिप्रेतः । मूले इत्यादिटीकाकृदुक्तेः स्वव्याख्येयग्रन्थस्य यन्मूलं तत्परत्वेनैव दृष्टत्वेऽपि क्वचित्स्वमूलविवक्षयापि प्रयोगे बाधकाभावेनात्र स्वमूलस्यैव ग्रहणोपपत्तेः । तथा च टीकायामिति फलतीति न दोषः । मूलपाठो मूलकोशपाठानुसारिपाठ इत्यप्याहुः । ज्ञानान्तरेणेत्यस्य तृतीयज्ञानेनेत्यर्थपक्षेऽनवस्थितज्ञानपरम्पराया अप्राप्तेर्भाष्यस्थानवस्थितिशब्दं व्यवस्थित्यभावार्थतया व्याचष्टे **ज्ञानद्वयवानित्यादि** मूलम् । यदि चोक्तदोषपरिहाराय ज्ञानचतुष्टयवानिति नियमः स्वीक्रियते तर्हि तत्राप्युक्तदोषनिरासाय ज्ञानान्तरं स्वीकार्यमित्येवं ज्ञानान्तरपरम्परास्वीकारे पूर्वपूर्वस्वीकृतनियमभङ्गे प्राप्ते पूर्वोक्तानवस्थैव इत्याशयेनोत्तरवाक्यतात्पर्यं वदतस्तद्वाक्यमवतारयति **यस्तु ज्ञानचतुष्टयवानित्यादिना** । अत्रेत्याशयेनेति पाठे तस्येत्याद्याशयेनेत्यर्थः । इत्याद्याशयेनेति मूलकोशानुसारिपाठस्तु स्वरस एव । आदिपदेनैतन्नियमं परित्यज्य ज्ञानपञ्चकवानित्येवं नियमस्वीकारे पूर्वस्वीकृतनियमत्यागेन ज्ञानान्तरं कल्पयतस्तव पञ्चमज्ञानकल्पनेऽपि उक्तदोषप्रसरेण तन्निवृत्त्यर्थं षष्ठम् । तत्रापि चोक्तदोषनिवृत्तये सप्तमं कल्पनीयमित्येवं ज्ञानान्तरपरम्पराभ्युपगमव्यसनं दुर्वारं स्यात् । न तु क्वचिज्ज्ञानान्तरकल्पनमात्रेणानवस्थितिरित्यस्य ग्रहणमिति ज्ञेयम् ।

**विठ्ठल०—** ननु ज्ञानद्वयाङ्गीकारेऽपि न सार्वज्ञसिद्धिः द्वितीयज्ञानविषयकज्ञानाभावादित्यर्थतः शङ्कां विवृणोति **स्यादयं दोष इति** । ईश्वरस्य सार्वज्ञार्थमुक्तरूपज्ञानद्वयस्य यौगपद्याङ्गीकारे सजातीयात्मगुणानां

यौगपद्यासम्भवरूपदोषः परीत्यैव प्रसिद्धः । तस्मिन्सत्यपि दूषणान्तरं मूलेऽभिधीयत इत्येव शब्दाभिप्राय इत्याशयेनाह **आस्तामिति** । **इदं मे ज्ञानमिति** । इदं द्वितीयज्ञानं प्रथमज्ञानविषयम् । एतत्प्रथमं ज्ञानमेतद्विषयं स्वातिरिक्तद्वितीयज्ञानसहितसर्वविषयमित्यर्थः । आदिपदेन एवं ज्ञानद्वयस्य यौगपद्यमस्तीत्यस्य ग्रहणम् । **आद्ये किमिति** । ज्ञानद्वयवानहमित्यादिरूपो उक्तज्ञानद्वयमध्ये अन्यतरेण विषयीक्रियते । उत तृतीयज्ञानेनेत्यर्थः । **ज्ञानं निष्कृष्टमिति** । निष्कृष्टं स्पष्टं यथा भवति तथा । साक्षादिति यावत् । स्वविषयतां नापद्यत इत्यर्थः । **तथापीति** । अन्यतरज्ञानस्य प्राधान्येन स्वग्राहित्वाभावेऽपि ज्ञानद्वयवानहमिति विशिष्टेऽर्थज्ञानद्वयस्य विशेषण-तया अवगाहनस्य विद्यमानत्वात् स्वप्रकाशत्वमापाद्यत एवेति भावः । **अस्मिन्पक्षे** तृतीयज्ञानाङ्गीकारपक्षे । अत्र अपर्यवसितपरम्पराभावादनवस्थितिरवस्थित्यभावः । ज्ञानद्वयवानिति नियमाभाव इत्युक्तम् । **द्वितीये पुनरिति** । ज्ञानत्रयवानीश्वर इति नियमाभावो भवेदित्यर्थः । एवं ज्ञानचतुष्टयनियमाभ्युपगमपञ्चमादिज्ञानाभ्युपगमप्राप्त्या नियमाभाव एवापादनीय इत्याह **एवं ज्ञानान्तरेति** । **व्यसनदुर्वारमित्यनेन** षष्ठसप्तमादिज्ञानाभ्युपगमेऽपि सर्वत्र अनियमप्राप्त्या अपर्यवसितानियमपरम्परारूपानवस्थापि सूचितेति ज्ञेयम् ।

**।। इति 'स्वप्रकाशज्ञानाभावेऽपीश्वरस्य सार्वज्ञसम्भवः' इतिपक्षदूषणम् ।।**

* * *

**।। अथ च तत्रान्ते ईश्वरज्ञानानामनन्तसङ्ख्याकत्वे कल्पनागौरवम् ।।**

३०४ **सु०—** 'नन्वनन्तानीश्वरज्ञानान्यभ्युपगच्छामि को दोष इति चेन्न, कल्पनागौरवाद्वरं एकस्यैव ज्ञानस्य स्वप्रकाशत्वाभ्युपगम' इत्याशयवानुपसंहरति **स्वप्रकाशत्वमिति** ।

## अनु०— स्वप्रकाशत्वमेतस्माद् दुर्निवारं समापतेत् ।

ननु ज्ञानं न स्वप्रकाशं वस्तुत्वादित्यादेः(दि )विरुद्धं स्वप्रकाशत्वं कथमङ्गीकर्तु-मुचितमिति चेत् (न) । 'यत् वस्तु, न तत्स्वप्रकाशमिति व्याप्तिज्ञानं स्वात्मानं न विषयी-करोति चेन्न सर्वोपसंहारवद्व्याप्तिसिद्धिः, विषयीकरणे तु स्वप्रकाशत्वं दुर्निवारमि'त्याशय-वतो वोपसंहारः ।

**परि०—** उत्पत्त्याद्यप्रतिबन्धकत्वान्न दोष इति शङ्कते **नन्वनन्तानीति** । अप्रामाणिकत्व-मेव दोष इत्याह **कल्पनेति** ।

**श्रीनिधि०— को दोष इति चेदिति** । सर्वेषामपि नित्यत्वेनोत्पत्तिज्ञप्त्यप्रतिबन्धादिति भावः । **वस्तुत्वादेरिति** । आदिपदेन गुणत्वादिर्गृह्यते । **न सर्वोपसंहारवद् व्याप्तिसिद्धिरिति** । यावत्साधनाधिकरणे साध्यसम्बन्धज्ञानं हि सर्वोपसंहारवद् व्याप्तिसिद्धिः । अन्यथा व्यभिचारशङ्का स्यादिति भावः ।

**शे०वा०— वस्तुत्वादे**रित्यादिपदेन जडत्वादिपरिग्रहः ।

**वा०र०— मूले को दोष इति** । नेदमनवस्थापादनं दोषः । ईश्वरसार्वज्ञरूपकल्पकस्य सिद्धत्वेन कल्पकपरिक्षयाभावेन बीजाङ्कुरपरम्परावत्सिद्धिविषयत्वात् तदनन्तेश्वरज्ञानपरम्पराभ्युपगमस्येत्यर्थः । ततश्चानवस्थापादनमिष्टापादनमिति भावः । नेयमनवस्थाकल्पकपरिक्षयादिना मूलक्षयकरीत्युच्यते । येनोक्तवैषम्यमुद्भाव्येत । न च तर्हि तद्दोषत्वानिर्वाहः । एकस्यैव ज्ञानस्य स्वप्रकाशत्वाङ्गीकारेण सर्वसामञ्जस्ये वृथा ज्ञानपरम्पराकल्पनायां कल्पनागौरवरूपदोषः स्यात् । एवं च तदात्मकत्वेन तदापादकत्वेन तन्निर्वाहादित्याशयेनाह **कल्पनागौरवादितीति** मूलम् । यत्त्वेवं ज्ञानचतुष्टयादिनियमाभ्युपगमेऽपि पञ्चमादिज्ञानाभ्युपगमप्राप्त्या नियमाभाव एव आपादनीय इत्याहेत्यन्यथाख्यातिस्थं तात्पर्यवर्णनं तदसत् । अनन्तानीत्युत्तरवाक्यानुसारेण पूर्वपूर्वनियमत्यागाङ्गीकारे अनन्तज्ञानस्वीकारापत्तिरिति भाष्योक्तानवस्थितिशब्दस्य यथाश्रुतावस्थानाभावार्थतया योजनार्थं प्रवृत्तैवंज्ञानान्तरेति वाक्ये पूर्वनियमभङ्गस्य परेणैवाभ्युपगतत्वेनेष्टापादनत्वप्राप्तेः । ज्ञानान्तरपरम्पराभ्युपगमव्यसनं दुर्वारं स्यादिति स्पष्टं ज्ञानान्तरपरम्परास्वीकारापत्तेरेवानिष्टतया प्रतीतौ तदनुसारेण योजनीयतया ज्ञानान्तरस्वीकारे पूर्वस्वीकृतनियमभङ्गः स्यादित्येवापादनीयमित्युक्तेर्मूलस्वारस्यविरोधित्वम् । अत एवोत्तरवाक्येनाभ्युपगच्छामि को दोष इति शङ्कादिकम् । सार्वज्ञोपपादकतया ज्ञानान्तरस्य कल्प्यमानत्वेनोत्तरोत्तरज्ञानासिद्धौ पूर्वपूर्वज्ञानासिद्ध्या ज्ञप्तिप्रतिबन्धकसत्त्वेन तदभाववचनायोगश्च । अनेनैव पूर्वस्वीकृतनियमभङ्गरूपदूषणं ज्ञानान्तरस्वीकारेण परिहृतमिति तत्स्वीकर्त्रभिप्राय इति स्पष्टितत्वात् । नियमभङ्गदोषेणैव पूर्तेः ज्ञानान्तरपरम्परा त्वया स्वीकर्तव्यः स्यादित्यष्टाभिधानान्तरवैयर्थ्यमिति शङ्का गर्भस्रावेणैव परिहृतेति च सूचितम् । **व्यसनं दुर्वारमिति** मूले दुर्निवार्यमित्युत्तरानुव्याख्यानमनुसृत्य भवेदेवेत्येवकारार्थकथनाभिप्रायेण दुर्वारमित्यभिधाय भवेदित्येतत्स्यादित्यनूदितम् । वक्ष्यमाणरीत्यैकस्यैव ज्ञानस्य स्वप्रकाशत्वस्वीकारेणैव सार्वज्ञोपपत्तौ वृथा परम्परा नादर्तव्येति सूचयितुं व्यसनपदमिति ज्ञेयम् । **वस्तुत्वादेरित्यादीति** । मूलकोशे परिग्रह इत्यनन्तरं ज्ञानस्य स्वप्रकाशत्वं नाम स्वकर्मकप्रकाशत्वमिति वाच्यम् । अन्यस्यासम्भवात् । ततश्च ज्ञानमेव जन्यं जनकं चेति वाच्यम् । क्रियायाः कर्मकारकजन्यत्वस्य सर्वैरिष्यमाणत्वात् । न च जन्यजनकयोरेकतोचिता । अन्तर्भावितपूर्वापरभावित्वात् तस्य । न च तदेव स्वात्मानं प्रति पूर्वमपरं चेति युज्यत इति नाप्रयोजकत्वमितीत्यन्तो ग्रन्थोऽस्ति । तदनन्तरं च केषाञ्चिदितीत्यादि ग्रन्थोऽस्ति । क्रिया हि कर्मकारकजन्येष्यत इत्यादि सर्वगतत्वाधिकरणानुसारी स ग्रन्थ आवश्यकश्चेत् प्रतौ लेख्यः ।

**विठ्ठल०— को दोष इति** । उत्पत्त्याद्यप्रतिबन्धकत्वादिति भावः । अप्रामाणिकानेककल्पनैव दोष इत्याह **कल्पनागौरवादिति** ।

**॥ इति ईश्वरज्ञानानामनन्तसङ्ख्याकत्वे कल्पनागौरवम् ॥**

**॥ इति वैशेषिकैकदेशयुक्त 'ईश्वरज्ञानस्य स्वप्रकाशत्वाभाव'त्पाकरणम् ॥**

* * *

॥ अथ तत्रान्ते ईश्वरस्यानन्तगुणवत्त्वे अनुपपत्तिशङ्का तन्निरासश्च ॥
॥ अथ च तत्रादौ ईश्वरसुखानङ्गीकारे बाधकोपपन्नानुमानस्य साधकत्वे तत्रानुग्राहकतर्कस्य व्याप्त्यभावरूपदूषितता ॥

३०५ **सु०**— यदुक्तमीश्वरोऽनन्तगुण इति तदनुपपन्नम्, चतुर्विंशतेरधिकानां गुणानामभावात्, तत्रापि केषाञ्चिदीश्वरेऽनुपपत्तेः । तस्मादुपपन्नैरष्टभिरेव गुणैरुपपन्नो भगवानिति । मैवम् । शौर्यौदार्यप्रागल्भ्यप्रभृतीनां गुणानां भावात्, परेण स्वीकृतेष्वपि केषाञ्चिदनुपपत्त्यभावाच्च ।

तथा हि । 'सुखं तावदीश्वरस्य कुतो नाङ्गीकर्तव्यम् । ईश्वरः सुखरहितो दुःखरहितत्वात् घटवत् । सुखवांश्चेद् दुःखवान् प्रसज्यते देवदत्तवदि'ति विपक्षे बाधकोपपन्नादनुमानादिति चेत्, तत्रानुग्राहकस्य तर्कस्य तावद्दूषणमाह **सुखवानिति** ।

**अनु०**— सुखवान्दुःखवांश्चेत्स्यादिति व्याप्तिश्च नो भवेत् ।

यदीश्वरः सुखी स्यात्, तदा दुःखी प्रसज्येतेत्येतत्त कर्ममूलभूता यः सुखवान् स दुःखवांश्च स्यादिति व्याप्तिर्नो भवेत् । चशब्देन वक्ष्यमाणरीत्या विपर्ययावसानं समुच्चिनोति ।

**परि०**— **उपपन्नैरिति** । उपपत्तिसिद्धैरेभिरष्टभिरेवेत्यर्थः । उपपत्तिश्च पूर्वपक्षोपन्यासावसर एवोक्तेति भावः । शौर्यादिर्गुणत्वे विप्रतिपन्नं प्रत्याह **परेण स्वीकृतेष्विति** । गुणत्वेनाङ्गीकृतेषु मध्ये केषाञ्चित्सुखादीनामङ्गीकारेऽनुपपत्त्यभावाच्चेत्यर्थः । **वक्ष्यमाणरीत्येति** । सुखमीश्वरे प्रामाणिकमिति वक्ष्यमाणरीत्येत्यर्थः ।

**यादु०**— **परेण स्वीकृतेष्वपि केषाञ्चिदित्यस्यानन्तरं** अङ्गीकार इति शेषः ।

**श्रीनिधि०**— **तत्रापि केषाञ्चिदनुपपत्तेरिति** । निरवयवत्वेन रूपादीनां चतुर्णामनुपपत्तिः । गुरुत्वद्रवत्वयोश्चोद्भूतत्वेन शब्दस्याविभुत्वेन नित्यत्वेन दिक्कालकृतपरत्वापरत्वयोः सर्वज्ञत्वेन धर्माधर्मद्वेषाणां अधर्माभावादेव दुःखस्य तदभावादेव सुखस्येत्याद्यूह्यम् । प्राक् लभ्यं सौन्दर्यम् । विपर्यये पर्यवसानं कथमित्यत आह **वक्ष्यमाणरीत्येति** । 'आनन्दं ब्रह्मणो विद्वानि'त्यादि श्रुतिसिद्धत्वेनानन्दस्य विपर्यये पर्यवसानं बाधितमित्यर्थः । **रीत्या** न्यायेन श्रुतिसिद्धत्वेन ।

**शे०वा०— केषाञ्चिदिति** । सुखदुःखादीनामित्यर्थः । अयं भावः । नित्ययथार्थज्ञानस्य मोहासम्भवात् तत्प्रभवद्वेषस्याप्यभावः । तदभावे च तन्मूलयोर्धर्माधर्मयोरभावः । इच्छाया अपि मोहाभावेनारागरूपत्वान्न धर्मादिकारणत्वम् । धर्माद्यभावे च तत्कार्ययोः सुखदुःखयोरप्यभाव एव । नित्यज्ञानत्वादेव स्मृत्यसम्भवेन कल्पकाभावाद्भावनाया अप्यसम्भव एवेति । परेण स्वीकृतेष्वपि केषाञ्चिदित्यस्यानन्तरमङ्गीकार इति शेषः । **वक्ष्यमाणरीत्येति** । ईश्वरस्य सुखवत्तायाः श्रुतिसिद्धत्वेन सुखवान्नेति विपर्यये पर्यवसानस्य श्रुतिबाधितत्वेनानुपपत्तेरिति भावः ।

**वा०र०— सुखं तावदीश्वरस्येत्यत्र** मूले तावच्छब्दः उत्तरत्र सुखश्रुतेरन्यथासिद्धिश्चेद्दुःखाभावश्रुतेरप्यन्यथासिद्धिः स्यादिति बाधकाभावे दुःखमप्यङ्गीकार्यं स्यादिति आपादितदुःखाभिप्रायेणेत्याहुः । वस्तुतः 'तस्मान्नानुमात्रोपयोगिनी'त्युत्तरानुव्याख्यानव्याख्यानरूपमूले विग्रहादेरपि समर्थनात् तावदित्युक्तम् । यथा चैतत्तथा तद्व्याख्यानावसरे उत्तरत्र मूले स्पष्टम् । 'सुखवान् दुःखवांश्च स्यादि'ति व्याप्तिरिति भाष्ये मूले च स्यादित्येतद्भवतीत्यर्थकम् । तथा च दुःखवांश्च भवतीत्यर्थः । इकः स्थाने यण् स्यादितिवत् । अत एव जैनाधिकरणे स्यादित्येतत् टीकायां तिङन्तप्रतिरूपकत्वेन व्याख्यातम् ।

**विठ्ठल०— उपपन्नैरिति** । उक्तैरित्यर्थः । केषाञ्चित्त्वित्यतःपरं अङ्गीकार इति शेषो ग्राह्यः ।

**चषक— प्रसज्येत इति** । सुखवत्त्वापादकदुःखवत्त्वापाद्यकापत्तिविशेषितादनुमानादित्यर्थः ।

* * *

**॥ अथ च तत्र व्याप्त्यभावस्य श्रुत्युक्तता ॥**

३०६ **सु०— कथं व्याप्त्यभाव इत्यत आह निर्दुःखत्वमिति ।**

## अनु०— निर्दुःखत्वं महानन्दः श्रुत्यैवेशस्य भण्यते ।

यद्यपि सुखित्वं दुःखित्वेन सहचरितं देवदत्तादावुपलब्धम्, तथाऽपीश्वरे निर्दुःखेऽपि वर्तमानं व्यभिचारित्वाद्व्याप्तिविकलं भवति । व्याप्त्या विना प्रसञ्जने चातिप्रसङ्गः ।

'नन्विदमयुक्तम्, आपादनस्थले व्याप्तिभङ्गाङ्गीकारे प्रसङ्गमात्रोच्छेदापत्तेः । न च वाच्यं प्राक् प्रसञ्जनाद्व्याप्तिग्रहणवेलायामेवेदं व्याप्तिभङ्गोद्भावनमिति, सर्वत्राप्येवं वक्तुं शक्यत्वेनोक्तदोषानिस्तारादि'ति । मैवम् । स्वाभ्युपगममात्रेणापादनस्थले व्याप्तिभङ्गाभि-

**धाने सत्येवमेतत् । न चैवं प्रकृते, श्रुतिबलेनैवेश्वरे सुखित्वस्य दुःखित्व(स्य )व्यभिचारोपपादनात् ।**

**तदिदमुक्तं श्रुत्यैव भण्यत इति । प्रत्येकं सम्बन्धादेकवचनम् ।**

**परि०**— स्पष्टार्थत्वात् तात्पर्यमेवाह **यद्यपि सुखित्वमिति** ।

**यादु०**— श्रुत्यैवेत्येवकाराभिप्रायमाह **स्वाभ्युपगममात्रेणेति** । **प्रत्येकमिति** । अन्यथा भण्येते इति स्यादिति भावः ।

**कं०रा०**— निर्दुःखत्वं महानन्दश्चेशस्य श्रुत्या भण्येत इति वक्तव्ये भण्यत इत्येकवचनं कथमित्यत आह **प्रत्येकमिति** । निर्दुःखत्वमीशस्य श्रुत्या भण्यते, ईशस्य महानन्दः श्रुत्या भण्यत इति प्रत्येकं सम्बन्धादेकवचनं युक्तमिति भावः ।

**शे०वा०**— **अतिप्रसङ्ग इति** । शब्दो यद्यनित्यः स्यात् तर्हि सावयवः स्यादित्यादिप्रसञ्जनस्यापि तर्कत्वं स्यादित्यतिप्रसङ्ग इत्यर्थः । ननु निर्दुःखत्वमहानन्दयोरीश्वरे सत्त्वोक्त्यैव व्याप्तिभङ्गसिद्धेः किं तस्य श्रुतिसिद्धत्वाभिधानेनेत्यत आपादनस्थले व्याप्तिभङ्गस्य दूषणतोपपादनार्थत्वान्न तदानर्थक्यमिति भावेनापादनस्थले तद्भङ्गदूषणत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । **प्रसङ्गमात्रोच्छेदापत्तेरिति** । यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यादिति तर्कमूलभूताया यत्र निर्वह्नित्वं तत्र निर्धूमत्वमिति व्याप्तेरापादनविषये पर्वते, सत्यपि निर्वह्नित्वे निर्धूमत्वाभावेन तद्वैकल्यस्य वक्तुं शक्यत्वादिति भावः । **उक्तदोषेति** । प्रसङ्गमात्रोच्छेदापत्तिरूपोक्तदोषानिस्तारादित्यर्थः । **प्रत्येकं सम्बन्धादिति** । निर्दुःखत्वं भण्यत इति, आनन्दो भण्यत इति प्रत्येकं सम्बन्धाद्भण्यत इत्येकवचनमुपपन्नमिति भावः ।

**वा०र०**— इत्यादिकं प्रसञ्जनं स्यादिति पाठः । मूलकोशे पाठान्तरोपरि रेखा क्षिपेत् । निर्धूमत्वाभावेन व्यभिचरितत्वेनेति पाठः । मूलकोशे सत्त्वात् ।

**विठ्ठल०**— बह्वीनां श्रुतीनां उदाहरिष्यमाणत्वाच्छ्रुत्येत्येकवचनानुपपत्तिरित्यत आह **प्रत्येकमिति** ।

**चषक**— एवम् 'अनुग्राहकं तर्कं निराकृत्ये'त्यवधिकः 'सुखित्वमापद्येते'ति तर्कनिरासकग्रन्थः ।

* * *

॥ अथ च तत्रापि व्याप्त्यभावप्रतिपादकश्रुत्युदाहरणम् ॥

३०७ **सु०**— काऽसौ श्रुतिरित्यतोऽर्थतस्तामुदाहरति **य इति** ।

अनु०— योऽशनायापिपासे च शोकादींश्चातिवर्तते ।
आनन्दं ब्रह्मणो विद्वान्विपाप्मेत्यादिका च सा ।

अनेन 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येती'ति श्रुतिमुपादत्ते । विपाप्मेत्यनेन 'य आत्माऽपहतपाप्मे'त्यादिश्रुतिम् । **सा** निर्दुःखत्वाद्यभिधात्री ।

* * *

॥ अथ च तत्रादौ पक्षान्तरेण (श्रुतेः स्वार्थात् प्रच्यावनस्य अङ्गीकारेण) सोपाधिकतया व्याप्त्यभावः ॥

३०८ **सु०**— 'नन्वानन्दश्रुतेर्दुःखाभावविषयत्वोपपत्तेर्न श्रुत्यवष्टम्भेन प्रसङ्गमूलभूतव्याप्तिभङ्गो वक्तुं शक्यते' इत्यतोऽङ्गीकृत्य तावत्सोपाधिकत्वमाह **ईश्वरस्येति** ।

अनु०— ईश्वरस्य तथेष्टत्वं दुःखित्वोपाधिरित्यपि ।
उक्ते किमुत्तरं ब्रूयात् श्रुत्यनादरतत्परः ॥

**तथेष्टत्वं** 'दुःखी भवत्वि'तीष्टत्वम् । **दुःखित्वोपाधिः** दुःखित्वप्रयोजकम् । **अपि**पदेनाधर्मादिमत्त्वं समुच्चिनोति । **अनादरो** विना बाधकेन प्रतीतार्थपरित्यागः, 'मा भूत् तावत् श्रुत्यवष्टम्भेन व्याप्तिभङ्गः, सोपाधिकतया तु भविष्यति; सोपाधिकसम्बन्धस्य व्यभिचारनियमादि'ति ।

**परि०**— तात्पर्यमाह **मा भूदिति** । भविष्यति व्याप्तिभङ्ग इत्यनुषङ्गः ।

**कं०रा०**— ननु वैशेषिकादेर्बौद्धादिवच्छ्रुत्यप्रामाण्यवादित्वाभावात् कथं श्रुत्यनादर इत्यत आह अनादर इति ।

**श्रीनिधि०**— श्रुतेः प्रतीतार्थपरित्याग एव तदनादरश्चेत् मृदब्रवीदित्यादेः प्रतीतार्थपरित्यागस्यास्माभिरपि क्रियमाणत्वात् अस्माकमपि स दोषः स्यात्, तथा च न पर्यनुयोगार्हतेत्यत आह **विना बाधकेनेति** । अस्माभिस्तु प्रबलबाधकेनैवान्यार्थः कल्प्यते अतो न दोष इति भावः ।

**शे०वा०**— **अङ्गीकृत्येति** । आनन्दश्रुतेर्दुःखाभावपरत्वमङ्गीकृत्येत्यर्थः । सहदर्शनमात्रेणेत्यादिना आनन्दश्रुतेर्दुःखाभावपरत्वस्योत्तरत्र दूषणात् तावच्छब्दः । ननु तथाऽपि नन्वानन्दश्रुतिरित्युत्थापितशङ्कायाः कः परिहार इत्यतोऽभिप्रायमाह **मा भूदिति** । इतीत्यतःपरं आशय इति शेषः ।

**विठ्ठल०**— परेणार्थान्तरस्योक्तत्वात् कथं श्रुत्यनादर इत्यत आह **अनादर इति** । **व्यभिचारनियमादिति** । व्याप्तिग्रहणवेलायामिति भावः । अत एव सोपाधिकसम्बन्धस्येत्युक्तम् ।

* * *

**॥ अथ च तत्रापि ईश्वरेच्छाविषयतया उपाध्यभावशङ्का तन्निरासश्च ॥**

३०९ **सु०— यः सुखी स 'दुःखी भवत्वि'तीश्वरेच्छाविषय एवेति नियमान्नायमुपाधिरित्यत आह न चेति ।**

## अनु०— न चात्मदुःखितेच्छा स्यादत एतन्निवार्यते ।

**ईश्वरस्य हि 'आनन्दं ब्रह्मणो विद्वानि'त्यादिश्रुतेः सुखित्वेऽपि नोपाधिमत्त्वम्, कस्यापि आत्मदुःखितेच्छाऽभावाद् अत एतद् उपाधेर्व्याप्याभिमतव्यापकत्वं निवार्यते । यद्यप्ययं नियमो न दर्शनमात्रेण सिद्ध्यति, अतिप्रसङ्गात्; नियामकं तु नास्तीति वक्तुं शक्यते; तथाऽपि श्रुत्यर्थपरित्यागं वारयितुं प्रसङ्गापादनायेदमुदितमिति द्रष्टव्यम् ।**

**परि०**— **व्याप्याभिमतेति** । व्याप्यत्वेन यदभिमतं तद्व्यापकत्वं निवार्यत इत्यर्थः । तथा च नोपाधिलक्षणाक्रान्तमेवेदमिति भावः । **अयं नियम इति** । सुखवांश्चेद् दुःखवानपि प्रसज्येतेत्ययं नियमो न देवदत्तादौ सहदर्शनमात्रेणेत्यर्थः । **नियामकं त्विति** । नियमग्राहकानुकूलतर्कादिकमित्यर्थः । **इदमुदितमिति** । श्रुत्यवलम्बेनेश्वर एव व्यभिचारोपपादनद्वारा व्याप्तिभङ्गोपपादनपरं 'निर्दुःखत्वं महानन्द' इत्यादिकमुदितमित्यर्थः ।

**यादु०— नियामकं तु नास्तीति** । व्याप्तिग्राहकानुकूलतर्कादिकं नास्तीत्यर्थः । **प्रसङ्गापादनायेति** । सङ्गत्युत्पादनायेत्यर्थः । **इदमुदितमिति** । आनन्दं ब्रह्मण इत्यादि श्रुत्यवष्टम्भेन व्याप्याभिमतसुखित्वस्य दुःखित्वेनेश्वरेष्टत्वरूपोपाधेरव्यापकत्वमुदितमित्यर्थः ।

**वं०प०— नियमादिति** । तथा च साधनव्यापकतेति भावः । **अयं नियम इति** । यः सुखी स दुःखी भवत्वितीश्वरेच्छाविषय एवेति साध्योपाध्योर्व्याप्यव्यापकभावरूपनियम इत्यर्थः । **अतिप्रसङ्गादिति** । वह्नावपि धूमेन सहदर्शनसद्भावादिति भावः । **नियामकं** साध्यव्यापकतानिश्चायकम् । **वक्तुमिति** । तथाच न साध्यव्यापकता वक्तुं शक्येत्यर्थः । **श्रुत्यर्थपरित्यागमिति** । आनन्दश्रुतेरानन्दार्थकत्वमनङ्गीकृत्य यद्दुःखाभावविषयकत्वमुक्तं तद्वारयितुमित्यर्थः ।

**कं०रा०— इति नियमादिति** । सुखित्वरूपसाधनव्यापकत्वाद्दुःखी भवत्वितीश्वरेच्छाविषयत्वं नोपाधिरित्यर्थः । **यद्यपीति** । यः सुखी स दुःखी भवत्वितीश्वरेच्छाविषय इति नियमात् दुःखी भवत्वितीश्वरेच्छाविषयत्वं नोपाधिरिति वदन्तं प्रति नायं नियमः सहदर्शनमात्रेण सिद्ध्यति तथात्वे वह्न्यादेर्धूमादिना व्याप्तिसिद्धिप्रसङ्गात् नियामकं तु नास्तीति वक्तुं शक्यत इति 'आनन्दं ब्रह्मणो विद्वानि'त्यादिश्रुतेः यथाश्रुतार्थपरित्यागं वारयितुं प्रसङ्गसम्पादनायेदमुदितं श्रुतिबलेनेश्वरस्य सुखित्वेऽप्युपाधिमत्त्वाभावान्नोपाधेः साधनव्यापकत्वमित्युक्ते खल्वानन्दश्रुतेः यथाश्रुतार्थपरित्यागे वक्ष्यमाणरीत्या परेण शङ्किते तन्निवारणं कर्तुं शक्यं नान्यथेति द्रष्टव्यमित्यर्थः ।

**श्रीनिधि०— नायमुपाधिरिति** । साधनव्यापकत्वादिति भावः । **यद्यप्ययं नियम इति** । यः सुखी स दुःखीति नियमः । **श्रुत्यर्थपरित्यागं** आनन्दश्रुत्यर्थपरित्यागम् । **प्रसङ्गापादनाय** प्रसक्तिसम्पादनाय **इदमुदितम्** ईश्वरस्य तथेष्टत्वं दुःखित्वोपाधिरित्यादावुक्तम् ।

**शे०वा०— इति नियमादिति** । तथा च साधनव्यापकत्वान्नायमुपाधिरिति भावः । **अतिप्रसङ्गादिति** । तथा सति धूमादीनामग्न्यादिभिरिवाग्न्यादीनामपि धूमादिभिः साहित्यदर्शनमात्रस्य सत्त्वेन व्याप्तिसिद्धिप्रसङ्गादित्यर्थः । **नियामकं तु नास्तीति** । साधनाभिमतस्य साध्याभिमतव्यतिरेकेणासत्त्वेऽक्षजाद्यन्यतमसद्भावरूपं 'यदैवाव्यतिरेकस्य ह्यक्षजं वाऽऽगमो भवेत् । तन्निर्धारितयुक्तिर्वा व्याप्तिः सैवापरा न ही'त्यादिपूर्वग्रन्थोक्तं नास्तीत्यर्थः । **प्रसङ्गापादनायेति** । प्रसङ्गोत्थापनायेत्यर्थः । **इदमुदितमिति** । श्रुत्यवष्टम्भेन व्याप्याभिमताव्यापकत्वमुक्तमित्यर्थः ।

**वा०र०— पूर्वग्रन्थोक्तमिति** । अत्रैवाधिकरण इति शेषः । **प्रसङ्गोत्थापनायेत्यर्थ इति** । यदि सहदर्शनमात्रेणानन्दश्रुत्यर्थापलापः क्रियते तदा या हिंसा सा पापसाधनमिति सहदर्शनेनेत्यादिवक्ष्यमाणतर्कोत्थापनायेत्यर्थः । अयं भावः । श्रुत्यवष्टम्भेन व्याप्याभिमताव्यापकत्वे उक्ते हि परःश्रुतेः स्वार्थपरत्वाभावं

ब्रूयात् । तदुक्तौ चातिप्रसङ्गेन तन्निराकरणमावश्यकं स्यात् । अन्यथा तु परस्यार्थान्तरशङ्काया एव मूलाभावेनायोगेन तत्रातिप्रसङ्गस्यावक्तव्यतया तेन श्रुत्यर्थान्तरनिराकृतिर्न स्यात् । सा चेष्टेति तदर्थं श्रुत्यवष्टम्भेन व्याप्याभिमताव्यापकत्वमुक्तं तस्मिन्नुक्ते तु मूलसद्भावादर्थान्तरशङ्कामपरः कुर्यादेवेति तन्निराकरणाय तद्बाधकतर्कोत्थापनमावश्यकम् । तथा च यज्ञादिश्रुतिदृष्टान्तेनार्थान्तराभावः सिद्ध इति ।

**विट्ठल०**— ईश्वरस्य सुखित्वाभावादेव तत्रोपाध्यभावादित्यत आह **ईश्वरस्य हीति** । **नोपाधिमत्वमिति** । दुःखी भवत्वितीष्टत्वरूपोपाधिमत्त्वमित्यर्थः । **व्याप्याभिमतेति** । व्याप्यत्वेन पराभिमतसुखित्वं प्रति व्यापकत्वमित्यर्थः । यः सुखी स दुःखी भवत्वितीश्वरेच्छाविषय एवेति नियमस्य देवदत्तादौ सर्वत्र दृष्टत्वेन प्रत्यक्षभूतेश्वरेऽप्युपाधेर्भावात्साधनाव्यापकताभङ्ग इत्यभिप्रायेण परेण चोदिते नायं नियमो देवदत्तादौ सहदर्शनमात्रेण सिद्ध्यति । तथात्वे चेतनत्वानीश्वरत्वयोः सहभावदर्शनेन ब्रह्मणोऽनीश्वरत्वं स्यादित्याद्यतिप्रसङ्गप्राप्तेः । न च नियमनियामकानुकूलतर्कादिनाऽतिप्रसङ्गाभावः । तदभावादित्यतः साधनाव्यापकत्वाद्भवत्येवोपाधिरिति वक्तुं शक्यत्वात् किमर्थं श्रुत्यवष्टम्भेनोपाधेर्व्याप्याभिमताव्यापकत्वमस्तीत्युच्यत इत्याशङ्क्याह **यद्यपीति** । **श्रुत्यर्थेति** । आनन्दं ब्रह्मण इत्यादिश्रुतेर्दुःखाभावपरत्वमङ्गीकृत्य प्रतीतार्थपरित्यागमित्यर्थः । **प्रसङ्गापादनायेति** । प्रसक्तिसम्पादनायेत्यर्थः ।

**।। इति ईश्वरेच्छाविषयतया उपाध्यभावशङ्का तन्निरासश्च ।।**

**।। इति पक्षान्तरेण (श्रुतेः स्वार्थात् प्रच्यावनस्य अङ्गीकारेण) सोपाधिकतया व्याप्त्यभावः ।।**

* * *

**।। अथ च तत्र व्याप्त्यभावप्रतिपादकश्रुत्युदाहरणान्ते पक्षान्तरस्यैव (आनन्दश्रुतेः दुःखाभावपरत्वाङ्गीकरणपक्षस्यैव) असिद्धत्वशङ्का तन्निरासश्च ।।**

**।। अथ तत्रापि च श्रुतेः स्वार्थात्प्रच्यावनार्थं बाधकस्यैवाभावः ।।**

३१० **सु०**— भवेदेतद्यद्यानन्दश्रुतिः सुखवादिनी स्यान्न चैतदस्ति, तस्या दुःखाभावपरत्वादिति चेत्; किं बाधकादियं श्रुतिः स्वार्थात्प्रच्याव्यते उतैवमेव ।

न तावद् द्वितीयः, दुःखाभावश्रुतेरप्यन्यथयितुं शक्यत्वेन तर्कस्येष्टापत्तितापत्तेः ।

आद्ये, न तावत् प्रत्यक्षमागमो वा बाधकोऽस्ति, ततः सुखित्वे दुःखित्वप्रसङ्गो वा निर्दुःखत्वानुमानं वा बाधकमिति वाच्यम् ।

तदुभयमपि व्याप्तिबलप्रवृत्तं वा स्यात् सहदर्शनमात्रबलप्रवृत्तं वा ।

**परि०—** श्रुत्यर्थपरित्यागं वारयितुं प्रसङ्गापादनायेत्युक्तम् । तत्कथमित्यतो व्यनक्ति **भवेदेत**दित्यादि **सिद्धिरिती**त्यन्तेन । **तर्कस्येति** । सुखी चेद् दुःख्यपि स्यादिति तर्कस्येत्यर्थः ।

**वं०प०— इष्टापत्तितेति** । यदीश्वरः सुखी स्यात् तर्हि दुःखी स्यादिति तर्के इष्टापत्तिः । तस्यापि दुःखाङ्गीकारात् । न च निर्दुःखश्रुतिविरोधः । तस्या दुःखाभावरूपार्थपरत्वं विना आनन्दादिसद्भावरूपार्थान्तरेऽपि योजयितुं शक्यत्वादिति भावः । **अनुमानं वेति** । ईश्वरो न सुखी निर्दुःखत्वाद्घटवदित्यनुमानमित्यर्थः ।

**कं०रा०— तर्कस्येति** । ईश्वरः सुखवांश्चेत् दुःखवानपि स्यादिति तर्कस्येत्यर्थः । **निर्दुःखत्वानुमानमिति** । ईश्वरः सुखरहितः दुःखरहितत्वाद्घटवदित्यनुमानमित्यर्थः ।

**श्रीनिधि०— दुःखाभावश्रुतेरप्यन्यथयितुं शक्यत्वेनेति** । दुःखाभावश्रुतिः न दुःखाभावविषयिणी किन्तु सुखपरैवेत्यन्यथयितुं शक्यत्वेन तत्कर्मस्येष्टापत्तिता स्यात् । दुःखी स्यादित्यापाद्यं, तच्चेष्टमेव । प्रमाणविरुद्धं ह्यनिष्टं, न च दुःखाभावे प्रमाणमस्ति । विद्यमानस्यापि तस्यान्यार्थत्वादिति त्वद्रीत्यैव यदि कश्चित्त्वां ब्रूयात् तदा निरुत्तरतयैव तव शरणं स्यादिति भावः ।

**वा०र०—** मूले **दुःखाभावश्रुतेरपीति** । वस्तुतः स्वपक्षेऽन्यथाकरणाभावाच्छक्यत्वेनेत्युक्तम् । ततश्चैवं योजना । सुखश्रुतेरन्यथाकरणे दुःखी स्यादिति तर्कस्येष्टापत्तिः स्यात् । बाधकाभावेन दुःखस्याप्यङ्गीकर्तुं शक्यत्वात् । न च दुःखाभावश्रुतिविरोधस्तस्याः अस्मदादिदुःखतुल्यदुःखाभावेनाप्युपपत्त्या सुखश्रुतिवदन्यथाकर्तुं शक्यत्वात् । अत्रैव प्रसङ्गः । यदि सुखश्रुतिरर्थान्तरपरेति तया सुखं न सिद्ध्यतीत्युच्यते तर्हि दुःखाभावश्रुतिरपि अर्थान्तरपरेति दुःखाभावोऽपि तया न सिद्ध्येत् । ततश्च दुःखाङ्गीकारे विरोधाभावेन सुखी चेत्तर्हि दुःखी स्यादिति तर्कस्येष्टापादनत्वं स्यादिति ।

**विठ्ठल०—** अनयैव प्रसक्त्या उत्तरमूलं श्रुत्यर्थपरित्यागनिवारणपरमवतारयति **भवेदेतदित्यादिना** ।

* * *

**॥ अथ तत्रापि चाद्यौ व्याप्तिबलप्रवृत्तबाधकाभावः ॥**

**३११ सु०— नाद्यः इतरेतराश्रयत्वप्रसङ्गात्, 'सिद्धे हि श्रुतेः स्वार्थप्रच्यावने तर्कानुमानयोर्व्याप्तिसिद्धिः, तत्सिद्धौ च श्रुतेः स्वार्थात्प्रच्यावनसिद्धिरि'ति ।**

**वं०प०— तत्सिद्धौ चेति** । तद्बाधादित्यर्थः ।

* * *

३१२ **सु०— "नन्वेतद्भवतामपि समानम्, 'श्रुतेः स्वार्थपरत्वे तर्कानुमानयोर्व्याप्तिभङ्गः, सति च तस्मिन् श्रुतेः स्वार्थपरत्वमि'ति । मैवम् । यतः प्रतीतार्थपरित्याग एव बाधकमपेक्षते, न स्वार्थपरत्वं बाधकाभावम्, तस्य प्रतीत्यैव सिद्धत्वात् ।**

**परि०— बाधकाभावमिति** । अपेक्षत इत्यर्थः ।

**वं०प०— सति च तस्मिन्निति** । तद्बाधाभावादित्यर्थः । स्वार्थपरत्वमिति प्रथमा, बाधकाभावमिति द्वितीया, अपेक्षत इति सम्बन्धः । **तस्य** स्वार्थपरत्वस्य ।

**कं०रा०— स्वार्थपरत्वमिति** । शक्त्या प्रतीयमानार्थपरत्वमित्यर्थः ।

**श्रीनिधि०— न स्वार्थपरत्वं बाधकाभावं तस्य प्रतीत्यैव सिद्धत्वादिति** । नन्वेवं मृदब्रवीत् इत्यादिवाक्यमपि प्रतीतार्थपरं स्यात् । स्वार्थपरत्वस्य बाधकाभावानपेक्षत्वात् । अचेतनत्वानुमानस्य श्रुतिबाधकत्वं च न घटते । व्याप्तिबलप्रवृत्तमेव तथेति वक्तव्यम् । तथा च स्वार्थपरत्वसिद्धे व्याप्तिसिद्धिः तत्सिद्धौ तेन स्वार्थपरत्वाभाव इति तत्रापि वक्तुं शक्यत एवेति चेदत्र ब्रूमः । स्वार्थपरत्वं बाधकाभावमात्रानपेक्षमपि निरवकाशोपजीव्यबाधकभावम् अपेक्षत एव । अचेतनत्वानुमानं च निरवकाशं व्याप्तिपक्षधर्मतोपेतत्वात् । न चान्योन्याश्रयः स्वार्थपरत्वाभावानपेक्षयैव हेतूच्छित्तिलक्षणविपक्षे बाधकतर्केण व्याप्तिसिद्धेः । साध्यं विना हेतुरस्त्विति शङ्का व्याहतत्वेन नोत्पत्तुमर्हति । कारणाभावेऽपि कार्यमस्त्विति शङ्काया व्याहतत्वात् । वचनस्य च ज्ञानकार्यत्वात् । न चैवं प्रकृते तर्कानुमानयोः निरवकाशत्वम् । विपक्षे बाधकाभावात् । न च हेतूच्छित्तिरेव तथेति वाच्यम् । दुःखस्य सुखं प्रति कारणत्वाभावेन व्याहत्यभावात् । स्वार्थपरत्वाभाव एव व्याप्तिसिद्धिरित्यतिवैषम्यमिति न कश्चिद्दोषः ।

**विठ्ठल०— प्रतीतार्थेति** । अप्रामाण्यपरतस्त्वस्य निर्णीतत्वे प्रतीतार्थे वाक्यस्याप्रामाण्यम् । ज्ञप्तौ बाधकसापेक्षमिति भावः । न स्वार्थे प्रतीतार्थपरत्वरूपप्रामाण्यं विना बाधकेन ज्ञानग्राहकमात्रग्राह्यत्वादिति भावः ।

**॥ इति व्याप्तिबलप्रवृत्तबाधकाभावः ॥**

* * *

३१३ सु०— द्वितीये त्वतिप्रसङ्गः स्यादित्याह **सहेति** ।

अनु०— सहदर्शनमात्रेण श्रुतीनामपलापकः ।
यज्ञादेरपि पापस्य हेतुत्वं हिंसया युतेः ।
नानुमाति कथं

आपाद्येन साध्येन वा सहदर्शनं यस्यापादकस्य वा तत् **सहदर्शनम्, तन्मात्रेण, श्रुतीनाम्** ईश्वरस्यानन्दवादिनीनाम्, **अपलापकः** स्वार्थप्रच्यावकः । **यज्ञादेरि**त्यादिपदेन गोभ्यो यवसदानं गृह्यते । **युतेः** योगात् । यदि सहदर्शनमात्रेणानन्दश्रुत्यर्थापलापः क्रियेत तदा 'या हिंसा सा पापहेतुरि'ति सहदर्शनेन ज्योतिष्टोमादिश्रुत्यर्थापलापोऽपि क्रियतामविशेषादिति भावः ।

**परि०— ज्योतिष्टोमादीति** । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिश्रुतेर्योऽर्थः ज्योतिष्टोमयागः सुखसाधनमिति, तदपलापोऽपि स्यात् । ज्योतिष्टोमादेरग्नीषोमीयादिपशुहिंसायुतत्वेन पापहेतुत्वानुमानसम्भवेनापि सुखहेतुत्वायोगादिति भावः ।

**यादु०— यवसदानमिति** । इदमपि तृणच्छेदरूपहिंसायुतमेवातो नासिद्धिरिति द्रष्टव्यम् ।

**श्रीनिधि०—** सहदर्शनमात्रेणेत्यत्र सहदर्शनं यस्येति बहुव्रीहिमभिप्रेत्याह **आपाद्येनेत्यादि** ।

**शे०वा०— यवसदानमिति** । इदमपि तृणच्छेदरूपहिंसायुतमेवेति नासिद्धिरिति ध्येयम् ।

**विट्ठल०— यवसदानमिति** । यवसशब्दोक्ततृणच्छेदस्यापि हिंसारूपत्वेन हिंसया युतेरित्युपपन्नमिति ज्ञेयम् ।

* * *

॥ अथ च तत्र निषिद्धताया उपाधित्वात् अविशेषाभावशङ्का ॥

३१४ **सु०—** 'नन्वविशेषोऽसिद्धः, हिंसात्वपापसाधनत्वयोः साहचर्ये निषिद्धत्वस्योपाधेः विद्यमानत्वात् । न च सुखित्वदुःखित्वसम्बन्धे कश्चिदुपाधिरस्ति । ईश्वरस्य तथेष्टत्वमुपाधिस्त्विदानीमपि गह(नं प्रवि)ननिविष्ट' इत्याशङ्कते **तत्रेति** ।

**अनु०—** तत्र यद्युपाधिर्निषिद्धता ।

'अस्तीत्युच्यते' इति शेषः ।

**परि०— गहनं प्रविष्ट इति** । सुखित्वे दुःखित्वेनेच्छाविषय एवेत्याद्युक्त्या विप्रतिपत्तेरिति भावः ।

**कं०रा०— गहनं प्रविष्ट इति** । उक्तरीत्या साधनव्यापकत्वशङ्काग्रस्त इत्यर्थः ।

**श्रीनिधि०— गहनं प्रविष्ट इति** । गहनमरण्यं प्रविष्ट इव प्रविष्टः । यथा राजभयादिना अरण्यं प्रविष्टः न राजबाधनादिक्षमः । एवमयमप्युपाधिर्न बाधनादिक्षम इत्यर्थः । श्रुतेः स्वार्थपरत्वाधीनत्वादस्यान्यथा पूर्वोक्तरीत्या साधनव्यापकत्वप्रसङ्गात् स्वार्थपरत्वस्य चेदानीं चिन्त्यमानत्वाद् गहनं प्रविष्ट इत्युक्तम् ।

**शे०वा०— इदानीमिति** । श्रुतेः स्वार्थपरत्वव्युत्पादनावसर इत्यर्थः । ततश्च श्रुतेः स्वार्थपरत्वे सिद्धे तद्बलेनोपाधेः साधनाव्यापकत्वसिद्धिः तत्सिद्धौ च सोपाधिकत्वेनानुमानस्याभासतया श्रुत्यबाधकत्वात् श्रुतेः स्वार्थपरत्वसिद्धिरित्यन्योन्याश्रय इति भावः ।

**विठ्ठल०— गहनं प्रविष्ट इति** । ईश्वरस्य सुखवत्त्वे सिद्धे तत्रोक्तोपाधेरभावात्साधनाव्यापकतानिश्चयेनोपाधिर्युज्यते । ईश्वरस्य सुखयुक्ततर्कानुमानविरोधादद्याप्यसिद्धमिति सुखित्वेनेष्टत्वरूपोपाधिर्गहनं प्रविष्ट इत्यर्थः ।

* * *

॥ अथ च तत्रान्ते तथात्वेऽत्रापि दुःखित्वेनोक्तेरुपाधित्वाद्विशेषसद्भावः
(सुखित्वे दुःखित्वं स्यादिति तर्कनिरासः) ॥

३१५ **सु०—** 'केयं निषिद्धता नाम । अकर्तव्यतया श्रुत्युक्तत्वमिति चेत् । केयमकर्तव्यताऽपि । करणानर्हता वा कर्तुरनिष्टहेतुता वा । नाद्यः, ब्रह्महिंसाया अपि क्रियमाण-

त्वात् । द्वितीयेऽपि किं साक्षादनिष्टसाधनत्वं परम्परया वा । नाद्यः, हिंसानन्तरमेव दुःखोत्पादादर्शनात् । द्वितीये तु 'पापसाधनतयोक्तत्वमुपाधिरि'त्युक्तं स्यात्, एवञ्च 'अत्राप्युपाधिसद्भावादविशेष एवे'ति परिहरति **अदुःखित्वेनेति** ।

अनु०— अदुःखित्वेन चानुक्तिः कथं नोपाधितां व्रजेत् ।

**अदुःखित्वेनानुक्तिरिति** दुःखित्वेनोक्तिरित्यर्थः । काऽसौ देवदत्तादीनां श्रौती दुःखित्वोक्तिरित्यत आह **अदुःखमिति** ।

अनु०— अदुःखमितरत्सर्वं जीवा एव तु दुःखिनः ।
तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते ।
इति श्रुतिर्हि परमा

**प्रवर्तते** दुःखप्रहाणसाधनं परमात्मानं प्रतिपादयतीत्यर्थः ।

**परि०—** सिद्धान्ती(स्वोपा)योपाधिसाम्याय परेणाप्युक्तेरेवोपाधित्वं वाचयितुं पृच्छति **केयमिति** । वक्ष्यमाणश्रुत्यनुरोधादाह **दुःखित्वेनोक्तिरिति** ।। *सुखित्वे दुःखित्वं स्यादिति तर्कनिरासः ॥*

**यादु०— दुःखित्वेनोक्तिरित्यर्थ इति** । पापसाधनतयोक्तत्वरूपोपाधिसाम्याय 'जीवा एव तु दुःखिन' इति दुःखित्वोक्तेरेवोत्तरत्र प्रदर्शनिन चैवं व्याख्यातमिति ध्येयम् । नन्वत्र व्याप्याभिमताव्यापकता दुःखित्वेनोक्तत्वोपाधेः श्रुत्यवष्टम्भेनैव वाच्या, श्रुत्यर्थस्तु नाद्यापि व्यवस्थित इति पूर्वोपाधिवदयमपि गहनं प्रविष्ट इति चेन्न । नात्र श्रुत्यवष्टम्भेन व्याप्याभिमताव्यापकतोच्यते । किन्तु यः सुखी स दुःखित्वेनोक्त इत्ययं नियमो न सहदर्शनमात्रेण सिद्ध्यति, अतिप्रसङ्गात् । नियामकं तु प्रमाणं नास्तीति उक्तरीत्यैव । अतो न कोऽपि दोष इत्याशयात् । पापसाधनतयोक्तत्वरूपोपाधावस्याः शङ्कायाः साम्यादित्याशयात् ।

**वं०प०— परम्परया** पापद्वारेत्यर्थः ।

**कं०रा०— अकर्तव्यतयेति** । अकर्तव्यत्वाकारेण श्रुत्युक्तत्वमित्यर्थः । **क्रियमाणत्वादिति** । तथा च ब्रह्महिंसायाः करणानर्हत्वरूपाकर्तव्यत्वाभावेनाकर्तव्यतया श्रुत्युक्तत्वाभावान्निषिद्धता न स्यादिति भावः । अदुःखित्वेनानुक्तेरेवोपाधित्वे वक्रमार्गाश्रयणस्य जीवा एव तु दुःखिन इति जीवानां दुःखित्वोक्त्युदाहरणस्य च वैयर्थ्यं स्यादित्यत आह **दुःखित्वेनेति** । जीवानां दुःखप्रहाणायाचेतनभूतायाः श्रुतेः प्रवृत्त्ययोगात् श्रुतिरेषा प्रवर्तत इत्येतत्कथमित्यतो विवक्षितमर्थमाह **प्रवर्तत इति** ।

**श्रीनिधि०— पापसाधनतयोक्तत्वमुपाधिरित्युक्तं स्यादिति** । परम्परयानिष्टसाधनत्वं नामानिष्ट-साधनत्वमेव तच्च पापमेवेति भावः । दुःखित्वेनोक्तिरुपाधिरिति न वक्तुं शक्यम् । व्यापकवत्तयोक्तेरुपाधित्वे-ऽतिप्रसङ्गात् धूमानुमानादावपि वक्तुं शक्यत्वात् । मया तु निषिद्धमेवोपाधिरित्युक्तमिति नातिप्रसङ्गदोषः । तथा च अस्यानुपाधित्वात् कथमविशेषापादनमित्यतः परस्याप्ययं दोषः सम एवेति ज्ञापयितुं तदुक्तोपाधिरपि व्यापकवत्तयोक्तत्वमेवेति परिशेषमुखेन दर्शयति **केयं निषिद्धता नामेत्यादिना** । अतीन्द्रियार्थस्य वचनैक-गम्यत्वेन तत्र तथोक्तिरेव प्रयोजिका न हिंसात्वमिति नातिप्रसङ्ग इति चेदीश्वरस्य तद्धर्माणां चातीन्द्रियत्वेन दुःखित्वे तथोक्तिरेव प्रयोजिका न सुखमिति तुल्यमेवेति भावः । तदिदमुक्तं मूले **कथं नोपाधितां व्रजेदिति**। **देवदत्तादीनामिति** । व्यापकाभिमतानामित्यर्थः ।

**शे०वा०— दुःखित्वेनोक्तिरित्यर्थ इति** । एतच्च पापसाधनतयोक्तरूपोपाधिसाम्यसिद्ध्यर्थं व्याख्या-नम् । यद्वा 'जीवा एव तु दुःखिन' इति दुःखित्वोक्तेरेव तत्र प्रदर्शनादेवं व्याख्यानम् । नन्वत्रापि व्याप्याभिमता-व्यापकता दुःखित्वेनोक्तत्वोपाधेः श्रुत्यवष्टम्भेनैव वाच्या । श्रुत्यर्थस्तु नाद्यापि व्यवस्थित इति पूर्वोपाधिवदयमपि गहननिविष्ट एवेति कथमुपाधिरिति चेत् । भवेदेतदेवं यद्यत्र श्रुत्यवष्टम्भेन व्याप्याभिमताव्यापकतोच्येत । न च एतदस्ति । किन्तु यः सुखी स दुःखित्वेनोक्त इति नियमो न सहदर्शनमात्रेण अतिप्रसङ्गात् । नियामकं तु प्रमाणं नास्तीत्युक्तरीत्यैव, अतो न कोऽपि दोष इत्याशयात् ।

**वा०र०— इत्याशयादिति** । ननु ईश्वरस्य तथेष्टत्वरूपोपाधेरेवोक्तरीत्या गहननिविष्टत्वाभावोपपादनेन समर्थनसम्भवे तत्परित्यागेन किमिति उपाध्यन्तरमङ्गीकृत्य तत्राप्यन्तत उक्तरीत्यनुसारणेनेति चेन्न । तत्र श्रुत्य-र्थान्तरवारणाय श्रुत्यवष्टम्भेन व्याप्यभिमताव्यापकत्वस्योक्तत्वेन तत्र तथा परिहाराकारणेऽपि अत्र तथोक्ते-रनावश्यकत्वेन परिहारान्तरोपपत्तेः । एतावत्तु स्यात् । पूर्वोपाधेरेव गहननिविष्टत्वे परेण चोदिते उक्तप्रकारेण तस्यैव समर्थनं कुतो न कृतमिति । अहो भ्रान्तोऽसि यदेतदुपाध्यान्तरमभिहितमिति मन्यसे । पूर्वोपाधेरेवात्र विवक्षितत्वात् । तात्पर्यतस्तूभयवाचकशब्दयोरेकत्रैव पर्यवसितेः । अत एव मूले अत्राप्युपाधिसद्भावादित्येवोक्तं न तु मध्यन्तरेति । एवं च पूर्वोपाधेरेव श्रुत्यर्थान्तरपरिहाराय प्रागुक्तरीतेरनाश्रयणेऽप्यत्रोक्तरीतेराश्रयणम् । प्रागेव अर्थान्तराभावस्य सिद्धत्वेन पुनस्तदर्थश्रुत्यवष्टम्भस्यानावश्यकत्वात् । अत एव प्राङ्मूलकृतैवमेव विभावितं यद्यप्ययं नियम इत्यादिनेत्याशयः ।

विठ्ठल०— करणानर्हतेति । कर्तुमशक्यतेत्यर्थः ।

**॥ इति तथात्वेऽत्रापि दुःखित्वेनोक्तेरुपाधित्वाद्विशेषसद्भावः (सुखित्वे दुःखित्वं स्यादिति तर्कनिरासः) ॥**

**॥ इति निषिद्धताया उपाधित्वात् अविशेषाभावशङ्का ॥**

**॥ इति तथात्वे यज्ञादेरपि पापहेतुत्वे अविशेषः ॥**

**॥ इति सहदर्शनमात्रबलप्रवृत्तबाधकाभावः ॥**

**॥ इति श्रुतेः स्वार्थात्प्रच्यावनार्थं बाधकस्यैवाभावः ॥**

**॥ इति पक्षान्तरस्यैव (आनन्दश्रुतेः दुःखाभावपरत्वाङ्गीकरणपक्षस्यैव) असिद्धत्वशङ्का तन्निरासश्च ॥**

**॥ इति व्याप्त्यभावप्रतिपादकश्रुत्युदाहरणम् ॥**

**॥ इति व्याप्त्यभावस्य श्रुत्युक्तता ॥**

**॥ इति ईश्वरसुखानङ्गीकारे बाधकोपपन्नानुमानस्य साधकत्वे तत्रानुग्राहकतर्कस्य व्याप्त्यभावरूपदूषितता ॥**

* * *

**॥ अथ ईश्वरस्यानन्तगुणवत्त्वेऽनुपपत्तिशङ्कानिरासे ईश्वरे सुखाभावसाधकस्य निर्दुःखत्वानुमानस्य दूषणम् ॥**

**॥ अथ तत्रादौ आनन्दश्रुतेः प्रामाणिकत्वे विवक्षितार्थासाधकानुमानस्योपेक्षणीयत्वम् ॥**

३१६ सु०— एवमनुमानानुग्राहकं तर्कं निराकृत्येदानीम् 'ईश्वरो न सुखी निर्दुःखत्वात् घटवदि'त्यनुमानमपि दूषयति श्रुत्युक्तिरिति ।

अनु०— श्रुत्युक्तिर्यदि कारणम् ।
किं कार्यमनुमानेन गलस्तनसमेन हि ॥

**कारणं** प्रमायाः । 'आनन्दं ब्रह्मणो विद्वानि'त्यादिश्रुतिः प्रमाणं न वा । नेति पक्षे अपसिद्धान्तः । आद्ये तद्बाधितत्वेनाजागलस्तन इव विवक्षितार्थासाधकमनुमानमुपेक्षणीयमिति भावः ।

वं०प०— अनुमानानुग्राहकमिति । ईश्वरः सुखरहितो दुःखरहितत्वात् घटवदित्यनुमानस्यानुग्राहकं सुखवांश्चेत् दुःखवान् प्रसज्येत देवदत्तवदिति तर्कमित्यर्थः ।

**॥ इति आनन्दश्रुतेः प्रामाणिकत्वे विवक्षितार्थासाधकानमा[illegible]स्योपेक्षणीयत्वम् ॥**

* * *

॥ अथ तत्र तत उपजीव्यत्वादिरहितानुमानस्य श्रुतिबाधकत्वाभावेऽपि बाधकत्वाभ्युपगमे अतिप्रसङ्गः ॥

३१७ **सु०—** 'ननु श्रुतिः प्रमाणमेव, किन्त्वनुमानविरुद्धत्वात् प्रतीतार्थं परित्यज्य दुःखाभावपरतया व्याख्यातव्ये'त्याशङ्क्य; 'नैवम्, अनुमानस्य श्रुतिबाधकत्वादर्शनात् । क्वचिदुपजीव्यत्वादिनैव बाधकत्वात् । एवमेव बाधकत्वाभ्युपगमे त्वतिप्रसङ्गः स्यादि'त्याह **अनुमानेनेति** ।

अनु०— अनुमानेन यद्यर्थः श्रुतिदृष्टोऽप्यपोद्यते ।
पूर्वोक्तेन प्रकारेण नेश्वरो धर्म एव च ।
स्यात्तत्फलं च

**पूर्वोक्तेन** शास्त्रयोनिसूत्रोक्तेन । **नेश्वरः स्यात्** श्रुतिदृष्टोऽपीश्वरोऽनुमानविरोधात् त्याज्यः स्यादिति यावत् । **'धर्मश्च नैव स्यात्'**, **'तत्फलं च नैव स्यात्'** इत्यत्राप्येवमेव तात्पर्यम् । 'यज्ञक्रिया नादृष्टफलहेतुः क्रियात्वान्निष्ठीवनादिक्रियावत्', 'धर्मो वा न सुखसाधनमदृष्टत्वादधर्मवदि'त्याद्यनुमानसम्भवात् ।

अतिप्रसङ्गस्य विपर्यये पर्यवसानमाह **तेनेति** ।

तेनात्र श्रुतिरेव प्रमा भवेत् ।

यस्मादुपजीव्यत्वादिरहितेनानुमानेन आनन्दश्रुतेर्बाधाभ्युपगमेऽनिष्टप्रसङ्गः, तेन कारणेन एषा **श्रुतिरत्र** ईश्वरस्यानन्दवत्त्व **एव प्रमा** प्रमाणं **भवेत्** न पुनरन्यथा योज्येति ।

**परि०—** ननु कथं 'प्राणा वा अणव' इत्यादिश्रुतेः व्याप्तत्वसाधकदूरदर्शनश्रवणादियुक्तिबाध इत्यत आह **क्वचिदुपजीव्यत्वादिनैवेति** । दर्शनादिकार्यलिङ्गेनानुमितानां प्राणशब्दितेन्द्रियाणां श्रुत्याऽणुत्वोक्तेस्तत्रोपजीव्यत्वेन बाधकत्वं, तथैव मुक्तिपादे 'प्रायो युक्तिरपी'त्यत्र सुधायामुक्तेः । आदिपदेन निरवकाशत्वग्रहः । यथा मृदब्रवीदित्यादेर्मृन्न वक्त्री जडत्वादित्यादिबाधकेति ज्ञेयम् ।

**पूर्वोक्तेनेत्यनुवादः**, **शास्त्रेति** व्याख्या । 'वनकृत्त्वादिरूपेण पक्षभूतस्य चेशितुः । किञ्चिज्ज्ञत्वं हि पुंस्त्वेन शक्यं साधयितुं सुखम् । वृक्षकृन्नाखिलं वृक्षं वेत्ति पुंस्त्वाद्धि चैत्रवत् । इत्याद्यनुमया स्पर्धि नानुमानं परेशितुः । शक्तं विज्ञापने चातिप्रसङ्गोऽनुमयेदृशे'त्यादिनोक्तेनेत्यर्थः । नेश्वरः स्यादित्यादेर्व्याख्या **श्रुतीत्यादि** । एवमेवेत्युक्तं व्यनक्ति **यज्ञक्रियेति** । 'अत्रे'त्यनुवादः 'ईश्वरस्यानन्दवत्त्व' इति व्याख्या ।

**यादु०— शास्त्रयोनिसूत्रोक्तेनेति** । शास्त्रयोनिसूत्रव्याख्यावसरे 'पुंस्त्वहेतुबलादि'त्याचार्योक्तेनेश्वरो न जगत्कर्ता पुंस्त्वाद्देवदत्तवदित्यनुमानेनेत्यर्थः । अत्र पूर्वोक्तप्रकारासम्भवादाह **यज्ञक्रियेत्यादि** ।

**वं०प०—** तर्हि श्रुतेः क्वचिदनुमानबाधः कथमुच्यत इत्यत आह **क्वचिदिति** । **एवमेव तात्पर्यमिति** । श्रुतिदृष्टो धर्मः तद्दृष्टं तत्फलं वाऽनुमानविरोधात् त्याज्यं स्यादिति यावदिति पूर्वरीत्येत्यर्थः ।

**कं०रा०— एवमेवेति** । उपजीव्यत्वाद्यभावेऽप्यनुमानस्यागमबाधकत्वाभ्युपगम इत्यर्थः । ननु न धर्मतत्फलयोः श्रुतिदृष्टयोरप्यनुमानविरोधत्याज्यत्वप्रसक्तिः । धर्माद्यभावसाधकानुमानस्यैवाभावादित्यत आह **यज्ञक्रियेति** । अत्र यज्ञक्रियायां साध्यमानस्यादृष्टरूपफलहेतुत्वाभावस्य हेतुत्वाभावमादाय बाधेन पर्यवसानायोगात् दृष्टाभावमादायैव पर्यवसानमिति धर्माभावसिद्धिरिति भावः । एवमुत्तरानुमाने धर्मफलाभावसिद्धिर्द्रष्टव्या । **अत्रेति** । ईश्वरः सुखरहितो निर्दुःखत्वादित्यनुमान इत्यर्थः ।

**श्रीनिधि०—** अनुमानस्य श्रुतिबाधकत्वादर्शनादित्यसिद्धम् । 'प्राणा वा अणव' इति श्रुतेः रूपाद्युपलब्धयः करणसाध्या क्रियात्वादित्यनुमानेन प्राप्यप्रकाशकं चक्षुरादि अन्यथातिप्रसङ्गादिति बाधकसहितेन बाधदर्शनात् । तत्र हि प्रतीतस्य सर्वथाणुत्वस्य बाधः । किन्तु स्वरूपेणैवाणुत्वं प्रकाशरूपेण व्याप्तिरिति । तथा मृन्न वक्त्री अचेतनत्वादित्याद्यनुमानेन 'मृदब्रवीदि'त्यादि श्रुतिबाधदर्शनादित्यत आह **क्वचिदुपजीव्यत्वादिनैवेति** । आदिपदेन निरवकाशत्वं गृह्यते । क्रियात्वानुमानमुपजीव्यम् । अचेतनत्वानुमानं तु निरवकाशम् । पूर्वोक्तेन प्रकारेण ईश्वरो न स्यादिति कोऽर्थः । किं न ज्ञायेतेति । उत नश्येदिति । नाद्यः । श्रुत्यैव प्रतीतत्वात् । न द्वितीयः । प्रतिपक्षादेः साध्यप्रमितिविषयकत्वात् साध्यविनाशकत्वस्य कस्याप्यसम्मतेरित्यतस्तदभिप्रायमाह **श्रुतिदृष्टोऽपीश्वर इति** । **एवमेव तात्पर्यमिति** । श्रुतिदृष्टस्याप्यनुमानविरोधात् त्यागः स्यादित्यत्र तात्पर्यमित्यर्थः । किं तद्विरुद्धमनुमानमित्यत आह **यज्ञक्रिया नादृष्टहेतुरित्यादिना** । **नान्यथेति** । अन्यथा आश्रयासिद्ध्याद्यापत्तेरिति भावः ।

**शे०वा०—** ननु क्षित्यादिकं सकर्तृकं कार्यत्वादिति सर्वज्ञत्वादिविशिष्टतयेश्वरसाधकस्य कार्यत्वाद्यनुमानस्य जीवेश्वराभेदागमबाधकताया, मृन्न वक्त्री जडत्वादित्याद्यनुमानानां च 'मृदब्रवीदापोऽब्रुवन्नि'त्या-

द्यागमबाधकतायाश्च दर्शनात् कथमनुमानस्य श्रुतिबाधकत्वादर्शनमुच्यत इत्यतः कार्यत्वाद्यनुमानस्येश्वररूपधर्मिग्राहकतया तदभेदागमं प्रत्युपजीव्यत्वेन मृन्न वक्त्री जडत्वात् मृत्त्वादित्याद्यनुमानस्य प्रमाणावधृतव्याप्तिपक्षधर्मताकत्वेन निरवकाशतया तत्तदागमापेक्षया प्रबलत्वात् तद्बाधकत्वेऽपि प्रकृतानुमानस्यागमापेक्षया प्राबल्यासिद्धेर्नागमबाधकत्वं सम्भवतीत्यभिप्रेत्याह **क्वचिदिति** । **एवमेवेति** । उपजीव्यत्वादिना प्राबल्याभावेऽपीत्यर्थः । **शास्त्रयोनिसूत्रोक्तेनेति** । शास्त्रयोनिसूत्रव्याख्यानावसरे शिवो न जगत्कारणं पुंस्त्वाद्देवदत्तवदिति पुंस्त्वहेतुबलादिति भाष्योक्तेनेत्यर्थः । **अत्राप्येवमेव तात्पर्यमिति** । श्रुतिदृष्टोऽपि धर्मोऽनुमानविरोधात् त्याज्यः स्यात् । श्रुतिदृष्टमपि फलमनुमानविरोधात् त्याज्यं स्यादित्येवमेव तात्पर्यमित्यर्थः । अत्र पूर्वोक्तप्रकारासम्भवात् प्रकारान्तरमाह **यज्ञक्रियेत्यादिना** । **अन्यथेति** । दुःखाभावपरतयेत्यर्थः ।

**वा०र०**— **इत्यनुमानस्य चेति** । इत्याद्यनुमानस्य चेत्यर्थान्न दोषः । **अत्र पूर्वोक्तेति** । 'पुंस्त्वहेतुबलादि'ति भाष्योक्तेत्यर्थः । मूले **निष्ठीवनं** नाम पार्थिवेन्द्रियसाध्यं पुरीषविसर्जनरूपं कर्म । न 'प्रत्यग्निमाचामेन्न निष्ठीवेदेतद्व्रतं' इति छान्दोग्यपरभाष्ये श्लेष्मविसर्जनं निष्ठीवनपदार्थतयोक्तम् । तच्च मुखनासाभ्यामिति ज्ञेयम् । **आदिपदेन** दृष्टहेतुतत्तदिन्द्रियसाध्यव्यापारग्रहणम् ।

**विठ्ठल०**— ग्लावप्लवनादिश्रुतिबाधकत्वमनुमानस्य दृश्यते । अतस्तत्र प्रतीतप्रसिद्धपाषाणार्थत्वपरित्याग इत्यत आह **क्वचिदुपजीव्यादिनेति** । **शास्त्रयोनिसूत्रोक्तेनेति** । तद्व्याख्यानावसरे 'पुंस्त्वहेतुबलादि'त्याचार्योक्तेन ईश्वरो न जगत्कर्ता पुंस्त्वाद्देवदत्तवदित्यनुमानेनेत्यर्थः । फलं चेत्यत्रोक्तप्रकारकानुमानासम्भवादाह **यज्ञक्रियेत्यादि** ।

**चषक**— **क्वचित्** क्षित्यादौ सकर्तृकत्वसाधककार्यत्वाद्यनुमाने, मृदादौ वक्तृत्वाभावसाधकजडत्वादिहेतौ च जीवेश्वराभेदबोधकतत्त्वमस्याद्यागमस्य, मृदब्रवीदित्याद्यागमस्य च बाधकतायाश्च दर्शनादित्यर्थः । धर्मिग्राहकतया आद्यस्य, निरवकाशतया द्वितीयानुमानस्य च तदुपजीव्यत्वमिति भावः । **एवमेव** उपजीव्यत्वादिकमन्तरेणैव । **शास्त्रयोनिसूत्रोक्तेन** तत्सूत्रव्याख्यारूप 'वनकृत्त्वादी'त्याद्यानुपूर्वीकमौलप्रतीकाभिहितेन ।

**॥ इति उपजीव्यत्वादिरहितानुमानस्य श्रुतिबाधकत्वाभावेऽपि बाधकत्वाभ्युपगमे अतिप्रसङ्गः ॥**

* * *

**॥ अथ तत्रान्ते श्रुतेरनुमानबाधकत्वे धर्मिग्राहिविरोधः कारणम् ॥**

३१८ सु०— "मा भूत् श्रुतिरप्रमाणं, मा च भूदनुमानबाधयाऽर्थान्तरपरा, तथाऽप्यनुमानस्य बाधिका कुतः, प्रतिरोधिका तु भवेदि'त्यत आह **ईशस्येति** ।

अनु०— ईशस्यानुमयाऽसिद्धेः श्रुतिर्धर्मिप्रमा भवेत् ।
तया सर्वगुणैः पूर्ण ईश उक्तो यतस्ततः ।
अनानन्दानुमानस्य धर्मिग्राहिविरोधतः ।
न प्रमाणं भवेत्

**अनुमया** इति श्रुतिव्यतिरिक्तप्रमाणोपलक्षणम् । **धर्मिप्रमा** धर्मिग्राहकं प्रमाणम् । अनुमानं हि प्रमाणान्तरेण सिद्धे धर्मिणि प्रवर्तते नान्यथा । अत्र चेश्वरो धर्मी, 'न चासावनुमानेन सिद्ध्यती'ति समर्थितं प्राक्, प्रत्यक्षाद्यविषयत्वं तु परस्यापि सम्मतम्, ततः परिशेषात् श्रुतिरेव धर्मिणः परमेश्वरस्य ग्राहिकेत्येष्टव्यम् ।

तथा च अनेनानुमानेन श्रुतिप्रामाण्यमनुमतम्, अन्यथा स्वस्यानुत्थानप्रसङ्गात् । सा च उपजीव्या श्रुतिरीश्वरमानन्दवन्तमाचष्टे । ततः तद्विरोधादनुमानमप्रमाणमेव अग्निस्वरूपग्राहकप्रत्यक्षविरुद्धतच्छैत्यानुमानवदिति । न च वाच्यं 'यः सर्वज्ञः' इत्यादिवाक्यमनुमानस्योपजीव्यं न आनन्दवादीति सर्वस्यापि वेदस्यैकवाक्यत्वेनार्ध(ज)चरतीयायोगात् । अन्यथा 'अग्नि'ग्राहकमेवोपजीव्यम्, न तु तदौष्ण्यग्राहकम्'' इत्यपि स्यात् ।

**परि०— प्रागिति** । शास्त्रयोनिसूत्र इत्यर्थः । **अनेनानुमानेनेति** । निर्दुःखत्वादीश्वरो सुखीत्यनुमानेनेत्यर्थः । **अग्निस्वरूपग्राहकप्रत्यक्षेति** । त्वगिन्द्रियरूपप्रत्यक्षेत्यर्थः । उपजीव्यजातीयत्वेन बाधकत्वमुपपद्यत इति भावेनाह **सर्वस्यापि वेदस्येति** । नन्वीश्वरे सुखाभावानुमानं प्रति श्रुतिरीश्वररूपधर्म्यंश एवोपजीव्या, न त्वानन्दांश इत्यत आह **अन्यथेति** ।

**यादु०— अग्निस्वरूपग्राहकेति** । अग्निस्वरूपग्राहकस्पार्शनप्रत्यक्षेत्यर्थः । **अन्यथाऽग्निग्राहकमिति** । अग्निग्राहकस्पार्शनप्रत्यक्षेऽग्निविषयकत्वावच्छेदेनैवोपजीव्यत्वं न तदौष्ण्यविषयकत्वावच्छेदेनेत्यपि स्यात् । तथा च शैत्यानुमानमपि तद्विरुद्धं न स्यादित्यर्थः । तत्र यथाऽग्निग्राहकस्पार्शनप्रत्यक्षस्य एकत्वात् अर्धजरतीयानुपपत्तेरौष्ण्यांशेऽप्युपजीव्यत्वं एवमशेषस्याप्यागमस्यैकवाक्यत्वादर्धजरतीयानुपपत्तेः आनन्दाद्यागमस्याप्युपजीव्यत्वमेवेति भावः ।

**वं०प०— उपलक्षणमिति** । प्रत्यक्षेणाप्यसिद्धेरिति ज्ञेयम् । स्वस्य अनुमानस्य । **अग्नीति** । उष्णतयेति शेषः ।

**कं०रा०— न चासाविति** । ईश्वरश्च नानुमानेन सिद्ध्यतीति शास्त्रयोनिसूत्रे समर्थितमित्यर्थः । ननु शास्त्रयोनिसूत्रोक्तन्यायेनेश्वरस्यानुमानतः सिद्ध्यभावेऽपि प्रत्यक्षादिना सिद्धिरस्त्वित्यत आह **प्रत्यक्षाद्यविषयत्वमिति । अन्यथेति** ।

**श्रीनिधि०— प्राक्** शास्त्रयोनिसूत्रे । **सर्वस्यापि वेदवाक्यस्य एकवाक्यत्वेनेति** । तथा च आनन्दश्रुतेरपि धर्मिग्राहकत्वमस्त्येव । यः सर्वज्ञ इत्यादिवाक्याप्रवृत्तिदशायामपि आनन्दश्रुतिप्रवृत्तिदशायां धर्मिण ईश्वरस्य ग्रहणादित्युक्तं भवति । **न तु तदौष्ण्यग्राहकमित्यपि स्यादिति । अन्यथा** धर्मिमात्रग्राहकस्यैव उपजीव्यत्वे स्वीक्रियमाणे । तथा च अनुष्णतानुमानं न बाध्येतेति सदनुमानं स्यादिति भावः । उपजीव्यजातीयत्वेन बाधकत्वं भविष्यतीति चेदेतदपि तुल्यं प्रकृत इति सन्तोष्टव्यमायुष्मता ।

**शे०वा०— बाधिका कुत इति** । बाधकत्वप्रयोजकस्याधिकबलत्वस्यासिद्धेरिति भावः । नन्वीश्वरस्यानुमानासिद्धत्वोक्तिमात्रेण न श्रुतेर्धर्मिग्राहकता सिद्ध्यति । प्रत्यक्षादेरपि तत्साधकत्वसम्भवादित्यतोऽत्र अनुमानपदस्य श्रुतिव्यतिरिक्तप्रमाणोपलक्षणत्वेन श्रुतिव्यतिरिक्तप्रमाणेन असिद्धत्वोक्तिरेवेयमिति भवेदेवानया श्रुतेर्धर्मिग्राहकतासिद्धिरित्याह **अनुमयेतीति** । श्रुतेर्धर्मिप्रमात्वस्य बाधितत्वादाह **धर्मिग्राहकप्रमाणमिति । नान्यथेति** । तथा सत्याश्रयासिद्धिप्रसङ्गादिति भावः । **प्रागिति** । शास्त्रयोनिसूत्र इत्यर्थः । **सम्मतमिति** । महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वाभावान्न प्रत्यक्षविषयत्वम् । उपमानस्य सङ्गतिग्राहकतया विषयविशेषनिष्ठत्वान्न तद्विषयत्वमिति भावः । **अग्निस्वरूपग्राहकप्रत्यक्षेति** । अग्निस्वरूपग्राहकस्पार्शनप्रत्यक्षेत्यर्थः । **अग्निग्राहकमेवेति** । अग्निरूपधर्मिग्राहकं चक्षुरेवेत्यर्थः । **न त्विति** । वह्न्यौष्ण्यग्राहकं स्पार्शनप्रत्यक्षमित्यर्थः । ततश्च यदुपजीव्यं न तद्विरोधोऽनुष्णत्वानुमानस्य, येन चौष्ण्यग्राहकेण प्रत्यक्षेण विरोधः तच्च नोपजीव्यमित्यौष्ण्यग्राहकप्रत्यक्षस्य प्राबल्यासिद्ध्याऽनुमानबाधकत्वायोगादनौष्ण्यानुमितेरप्रामाण्यं न स्यादित्यर्थः । तस्मान्नरशिरःकपालाशुचित्वागमस्य तच्छुचित्वानुमानादुपजीव्यशुचित्वग्राहिशब्दसाजात्यमात्रेण प्राबल्यवत् वह्न्यौष्ण्यग्राहिस्पार्शनप्रत्यक्षस्यानौष्ण्यानुमानादुपजीव्यधर्मिस्वरूपग्राहिचक्षुरादिसाजात्यमात्रेण प्राबल्यमित्येव वक्तव्यम् । ततश्च अनेनैव न्यायेन आनन्दवाक्यस्य अनानन्दानुमानाद्धर्मिस्वरूपग्राहितयोपजीव्यत्वेन 'यः सर्वज्ञ' इत्याद्यागमेन साजात्यमात्रेण प्राबल्याद्युक्तमेवानन्दानुमानबाधकत्वमित्याशयः ।

**वा०र०— प्रत्यक्षादेरपीति** । आदिपदं श्रुत्यनुमानरूपप्रमाणातिरिक्ततत्सम्मतप्रमाणपरम् । चक्षुरेवेति पाठः । न्यायामृतानुसारेणाह **तस्मादिति । सृष्टिकालेति** । सृष्टिकालः संहारकालरूपश्चेत्यर्थः ।

**विट्ठल०— अन्यथाऽग्निग्राहकमिति** । अग्निग्राहकस्पार्शनप्रत्यक्षे अग्निधर्मग्राहकत्वावच्छेदेनैवोपजीव्यत्वं न तदौष्ण्यविषयकत्वावच्छेदेनेत्यपि स्यात् । तथा चाग्निभ्यामनुमानमपि न तद्बाधितं स्यादित्यर्थः । तथा च तत्र यथाग्निग्राहकस्पार्शनप्रत्यक्षस्यैकत्वादर्धजरतीयानुपपत्तेरौष्ण्यांशेऽप्युपजीव्यत्वमेवमशेषागमस्यैकवाक्यत्वेन अर्धजरतीयानुपपत्तेरानन्दवाद्यागमस्याप्युपजीव्यत्वमेवेति भावः ।

**चषक—** **प्राक्** शास्त्रयोनिसूत्रे । **अनेनानुमानेन** । सुखराहित्यसाधकनिर्दुःखत्वहेतुना । **अग्निग्राहकमिति** । वह्नावौष्ण्यग्राहकस्पार्शनप्रत्यक्षे वह्निविषयकत्वावच्छेदेनानुमानोपजीव्यत्वं न तूष्णत्वविषयकत्वावच्छेदेनेत्यपि स्यादिति भावः ॥ *ईश्वरे सुखराहित्यसाधकानुमानप्रत्याख्यानम् ॥*

**॥ इति श्रुतेरनुमानबाधकत्वे धर्मिग्राहिविरोधः कारणम् ॥**

**॥ इति ईश्वरे सुखाभावसाधकस्य निर्दुःखत्वानुमानस्य दूषणम् ॥**

* * *

**॥ अथ ईश्वरस्यानन्तगुणवत्त्वेऽनुपपत्तिशङ्कानिरासान्ते, एतन्न्यायेनैव ईश्वरस्य विग्रहराहित्याद्यनुमानानामपि श्रुतिविरोधादप्रामाण्यमित्युपसंहारः ॥**

३१९ **सु०—** अनेनैव न्यायेनेश्वरस्य विग्रहराहित्याद्यनुमानमपि सर्वं श्रुतिविरुद्धत्वादप्रमाणमेवेत्याशयवानुपसंहरति **तस्मादिति** ।

अनु०— तस्मान्नानुमाऽत्रोपयोगिनी ।

**अत्र** ईश्वरविषये । अत एव सर्वगुणैः पूर्ण इत्युक्तम् । अन्यथा आनन्दवान् इत्यवक्ष्यत् ।

**परि०—** **श्रुतिविरुद्धत्वादिति** । 'आनन्दरूपममृतम्, यदेकमव्यक्तम्' इत्यादिश्रुतीत्यर्थः । **अत एवेति** । ईश्वरस्य विग्रहराहित्याद्यनुमानमपि सर्वं श्रुतिविरुद्धमित्यस्याभिमतत्वादेवेत्यर्थः । आदिपदेनाल्पगुणत्वाद्यनुमानानामपि ग्राह्यत्वादिति भावः ॥ *सुखाभावाद्यनुमाननिरासः ॥*

**यादु०—** **अत एवेति** । ईश्वरे विग्रहराहित्याद्यनुमानानामपि सर्वश्रुतिविरोधेनाप्रामाण्यस्यात्राभिप्रेतत्वादेवेत्यर्थः ।

**वं०प०—** **अत एवेति** । ईश्वरविषयेऽनुमानमात्रस्यानुपयोगित्वादेवेत्यर्थः । **इत्युक्तमिति** । अष्टगुणत्वादिसाधनस्य वा तदुपयुक्तविग्रहराहित्यादिसाधनस्य वाऽनुमानेन कर्तुमशक्यत्वेन सर्वगुणपूर्णत्वे बाधकलेशाभावादित्यर्थः । **अन्यथेति** । अनुमानमात्रस्येश्वरेऽनुपयोगकथनेन सर्वगुणपूर्णत्वकथने यदि न तात्पर्यमित्यर्थः । यदीश्वरः सुखी तर्हि दुःखी स्यादिति तर्कबाधकत्वेनोक्तानन्दश्रुतावेवानुपपत्तेः परिहृतत्वादानन्दवानित्येवोच्येतेति भावः ।

**कं०रा०—** अत्रेत्यस्येश्वरीयानन्दाविषय इत्यर्थकत्वे ईश्वरस्यानन्दाभावविषयेनानुमोपयोगिनीति वचनेन अनुमाया ईश्वरीयानन्दाभावसाधकताया एवोक्ततया निर्बाधया 'आनन्दं ब्रह्मणो विद्वानि'त्यादिश्रुत्या ईश्वरस्य आनन्दवत्त्वसिद्धेरेवोपसंहृतत्वादानन्दवानित्येवावक्ष्यत् । न तु **सर्वगुणैः पूर्ण इति** । अत्रेत्यस्येश्वरविषय इत्यर्थकत्वे तु नानुमात्रोपयोगिनीत्यनेनेश्वरविषयेऽनुमामात्रस्यासाधकताया उक्ततया नेश्वरः समस्तगुणकश्चेतनत्वा-द्देवदत्तवदित्याद्यनुमानस्याप्यसाधकत्वलाभान्निर्बाधया 'अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णव' इत्यादिश्रुत्येश्वरस्य समस्तगुणवत्त्वसिद्धेरुक्तत्वात् **'सर्वगुणैः पूर्ण'** इत्युक्तिः सम्भवतीति भावः ।

**श्रीनिधि०— विग्रहराहित्याद्यनुमानमपीति** । ईश्वरो विग्रहरहितः विभुत्वात् इत्याद्यनुमानमित्यर्थः । अत एव सर्वैः गुणैः पूर्ण इत्युक्तमिति । ननु विग्रहवत्त्वं कथं गुण इति चेन्न । गुणशब्देन शुभधर्मस्य विव-क्षितत्वात् विग्रहवत्त्वरस्य च तथात्वाद् विग्रहवत्त्वम् हि विग्रहसम्बन्धः । स च शुभ इति सर्वप्रसिद्ध इति ।

**शे०वा०—** तस्मादित्युत्तरभाष्यमीश्वरस्यानानन्दानुमाया एव श्रुतिविरुद्धत्वादप्रामाण्योपसंहारपरमिति भ्रान्तिं परिहर्तुं तत्तात्पर्यमाह **अनेनैवेति** । ननु प्रतीतमाशयं परित्यज्य किमित्याशयान्तरपरिकल्पनमित्यतस्तत्र मूलकारीयं ज्ञापकमाह **अत एवेति** । ईश्वरे विग्रहराहित्याद्यनुमानानामपि सर्वश्रुतिविरोधेन अप्रामाण्यस्यात्राभि-प्रेतत्वादेवेत्यर्थः । **अन्यथेति** । अनानन्दानुमाया एव श्रुतिविरुद्धत्वादप्रामाण्याभिप्रायकत्व इत्यर्थः । अत्रेत्यस्य सुखपरत्वोपपत्तेः किमीश्वरविषयत्वाङ्गीकारेणेत्यतः तथा सति सर्वगुणैः पूर्ण इत्यस्यासामञ्जस्यप्रसङ्गादीश्वरपरतैव युक्तेत्यप्याहुः ।

**स०व्र०—** ननु अत्रेत्यस्य सुखपरत्वमेवास्तु किमीश्वरविषयत्वाङ्गीकारेण । न च पौनरुक्त्यम् । उपसंहाररूपत्वेन तदभावादित्यत आह **अत एवेति** ।

**विठ्ठल०— अत एवेति** । आनन्दातिरिक्तस्य विग्रहवत्त्वादेस्तद्विरोध्यनुमानानामपि सर्वश्रुतिविरुद्धत्वेन अप्रामाण्यस्य अत्राभिप्रेतत्वादेवेत्यर्थः ।

**॥ इति एतन्न्यायेनैव ईश्वरस्य विग्रहराहित्याद्यनुमानानामपि श्रुतिविरोधादप्रामाण्यमित्युपसंहारः ॥**

**॥ इति ईश्वरस्यानन्तगुणवत्त्वे अनुपपत्तिशङ्का तन्निरासश्च ॥**

**॥ इति ईश्वरगुणसङ्ख्यानां विप्रतिपत्तेर्निरासः ॥**

**॥ इति सम्बन्धप्रसङ्गेन सम्बन्धिनाम् ईश्वरगुणसङ्ख्यादीनामपि विप्रतिपत्तेर्निरासः ॥**

**॥ इति तृतीयसूत्रगतशब्दार्थनिरूपणम् ॥**

**॥ इति तत एतदधिकरणस्य तृतीयसूत्र(ॐ समवायाभ्युपगमाच्च साम्यानवस्थितेः ॐ)व्याख्यानम् ॥**

* * *

॥ अथ तत्र उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतयाऽपाकरणे एतदधिकरणस्य चतुर्थसूत्र(ॐ नित्यमेव च भावात् ॐ)व्याख्यानम् (वैशेषिकादिदर्शने अनुपपत्त्यन्तरदर्शनम्) ॥

॥ अथ तत्र कालविशेषे द्व्यणुकादिप्रक्रमेण महाभूतसृष्ट्यङ्गीकारे कार्यं सदा भवेत् ॥

३२० सु०— अनुपपत्त्यन्तरं वैशेषिकादिदर्शने दर्शयन् '**नित्यमेव च भावात्**' इति सूत्रं व्याख्याति **नित्येच्छत्वादिति** ।

अनु०— नित्येच्छत्वात्परेशस्य परमाणुसदात्वतः ।
अदृष्टकालयोश्चैव भावात्कार्यं सदा भवेत् ॥

वैशेषिकादयो हि कालविशेषे द्व्यणुकादिप्रक्रमेण महाभूतसृष्टिमभ्युपगच्छन्ति, तत् तदीयप्रक्रियापर्यालोचनायां नोपपद्यते; किन्तु तत्पक्षे **कार्यं सदा भवेत्**, यदाऽभिलष्यते ततः प्रागपि भवेत् ।

कुतः । कारणसामग्रीसम्पत्तिनिबन्धनो हि कार्योत्पत्तेः कालनियमः । तत्रादिसृष्टौ परमाणवः समवायिकारणभूतास्तावत् सदा विद्यन्ते । निमित्तकारणं चेश्वरेच्छा नित्यैव । तथा कालो दि(क्च)क् । यद्यप्यदृष्टं धर्माधर्मसमाख्यातं न नित्यं तथाऽपि प्रलयेऽस्तीत्यङ्गीक्रियत एव । वृत्तिलाभस्तदा नास्तीति चेन्न, तस्यापीश्वरेच्छादिकारणकस्य, तद्भावेऽभावानुपपत्तेः । अत एव परमाणुसंयोगस्यासमवायिकारणस्याभावान्न सदा सृ(सदादिसृ)(महदादिसृ)ष्टिरिति निरस्तम्, संयोगानुत्पादस्याप्यनुपपत्तेः । तत् असमवायिकारणकर्माभावादिति चेन्न, तदनुत्पादस्याप्ययोगात् । न चातोऽन्यद् द्व्यणुकादेः कारणमस्ति, यद्वैकल्यात् अभिलषितसमयात्प्राक् कार्याभावो भवेत् । सत्यां चाभिमतसामग्र्यां कार्यानुदये पश्चादपि नोत्पद्येत, नियामकाभावादिति ।

**सदात्वं** सदातनत्वम् । **भावात्** 'प्रलयेऽपी'ति शेषः । एवशब्दस्य '**सदैव**' इति सम्बन्धः । 'कार्यं भवेदि'ति चाभ्युपगम्योक्तम् । वस्तुतस्तु तत्पक्षे कदाऽपि द्व्यणुकाद्युत्पत्तिर्न सम्भवति, विनाशकारणस्येश्वरेच्छादेः सदातनत्वेन सत्प्रतिपक्षत्वात् । कार्योत्पत्तिसहकृतमेवेश्वरेच्छादिकं विनाशकारणमित्यङ्गीकारेऽप्युत्पत्त्यनन्तरमेव विनाशः प्रसज्येतेति । अत एव सृष्ट्यादीति वक्ष्यति ।

**परि०— वृत्तिलाभ इति** । कार्योन्मुखत्वमित्यर्थः । **तस्यापीति** । अभावानुपपत्तेरित्यन्वयः । **न महदादीति** । द्व्यणुकादीति वक्तव्ये महदादीत्युक्तिर्द्व्यणुकादिप्रक्रिया न प्रामाणिकी महदादिप्रक्रियैव प्रामाणिकीति सूचयितम् । **सत्यां चाभिमतसामग्र्यां कार्यानुत्पादे पश्चादपि नोत्पद्येतेति** । एतेन 'उभयथापि न कर्मातस्तदभाव' इति सूत्रमपि व्याख्यातं भवति । **सृष्ट्यादीति वक्ष्यतीति** । अत्रानभिप्रेतत्वे स्वमतदोषोद्धारग्रन्थे लयोपादानाय आदिपदं न प्रयुञ्जीतेति भावः ।

**यादु०— वृत्तिलाभ इति** । वृत्तिनिरोधापगम इत्यर्थः । प्रलयहेतुनाऽदृष्टेन प्रतिबन्धाभाव इति यावत् । प्रलयकाले सर्गहेत्वदृष्टानां प्रलयहेतुनाऽदृष्टेन प्रतिबद्धत्वरूपो वृत्तिनिरोध एवास्ति, न तदवगमरूपो वृत्तिलाभ इति भावः । **ईश्वरेच्छादेः सदातनत्वेनेति** । अनेन सूत्रस्यार्थान्तरमुक्तमिति ज्ञातव्यम् ।

**वं०प०— तस्यापि** वृत्तिलाभस्यापि । **अङ्गीकार इति** । तथा च आदौ द्व्यणुकाद्युत्पत्त्या भाव्यमेवेत्यर्थः । वस्तुतस्त्वित्युक्तमाचार्यानभिप्रेतं कुत उच्यत इत्यत आह **अत एवेति** ।

**कं०रा०— सृष्टाविति** । द्व्यणुकोत्पत्तावित्यर्थः । **तदसमवायिकारणेति** । परमाणुसंयोगासमवायिकारणकर्माभावादित्यर्थः । **तदनुत्पादस्येति** । ईश्वरेच्छादिरूपकारणकलापस्य सदा सत्त्वेन परमाणुकर्मानुत्पादस्याप्ययोगादित्यर्थः । **कार्योत्पत्तिसहकृतमिति** । कार्योत्पत्तिसहकृतमेवेश्वरेच्छादिकं कार्यविनाशकारणम्, अनुत्पन्नस्य ध्वंसायोगात् कार्योत्पत्तेः पूर्वं च तत्सहकृतेश्वरेच्छादिरूपविनाशकारणाभावेनोत्पत्तिकारणस्य सत्प्रतिपक्षत्वाभावान्न कार्योत्पत्त्यसम्भवरूपदोष इत्युत्पत्त्यसम्भवरूपसकलकारणसद्भावादिति भावः । **अत एवेति** । यतः परपक्षे सृष्टेरिव विनाशस्यापि कालनियमो न स्यादित्येतदत्राभिप्रेतम् अत एव स्वमते तन्नियमोपपादनावसरे सृष्ट्यादीति वक्ष्यत्याचार्यः । अन्यथा सृष्टीत्येवावक्ष्यदिति भावः ।

**श्रीनिधि०— कारणसामग्रीसम्पत्तिनिबन्धन इति** । कारणसामग्री कारणपौष्कलं तत्सम्पत्तिनिबन्धन इत्यर्थः । **वृत्तिलाभ इति** । वृत्तिः ऊर्ध्वोधः । ईश्वरेत्यादिकारणकस्येति भावः । आदिपदेन कालदिगादिकं गृह्यते । द्व्यणुकादेरित्यादिपदेन त्र्यणुकादिर्गृह्यते । सदाशब्दः सर्वकालपरः तत्सम्बन्धिलक्षणया प्रवृत्त इति भावेनाह **सदात्वं सदातनत्वमिति** । **अत एव** एतद्दूषणस्य अत्र अभिप्रेतत्वादेव । आदिपदेन संहारमुपादत्ते भगवान् मध्वदेव इत्यर्थः । अन्यथा स्वसमवेतसंहारसम्भवकथनं व्यर्थं स्यादिति भावः ।

**शे०वा०— अङ्गीक्रियत एवेति** । अदृष्टस्य प्रलयेऽसत्त्वेऽसतः कारणत्वायोगेनादिकालीनकार्यकारणत्वाभावापत्त्या सर्वोत्पत्तिमतां निमित्तमित्यभ्युपगमभङ्गप्रसङ्गादिति भावः । **वृत्तिलाभ इति** । वृत्तिनिरोधापगम इत्यर्थः । प्रलयहेतुनाऽदृष्टेन प्रतिबन्धाभाव इति यावत् । प्रलयकाले सर्गहेत्वदृष्टानां प्रलयहेत्वदृष्टेन प्रतिबद्धत्वरूपो वृत्तिनिरोध एवास्ति न तदपगमरूपो वृत्तिलाभ इति भावः । **अभ्युपगम्योक्तमिति** । विरोध-

सामग्रीविरहमभ्युपगम्य सर्वदा कार्यसत्त्वमापादितमित्यर्थः । अस्याभ्युपगमवादत्वे मूलकारीयं ज्ञापकमाह **अत एवेति** । अन्यथा सृष्टीच्छेत्येवावक्ष्यदिति भावः ।

**वा०र०— कारणसामग्रीसम्पत्तीति** मूलम् । कारणस्य सामग्र्यं कारणसामग्री । समग्रशब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे'ति सूत्रेण भावे ष्यञि 'यस्येति चे'त्यकारलोपे आदिवृद्धौ सामग्र्यशब्दनिष्पत्तौ 'षिद्गौरादिभ्यश्चे'ति ङिषि 'हलस्तद्धितस्ये'ति सूत्रेण हल उत्तरः स्यात् तद्धितयकारस्य लोपे सामग्रीति रूपम् । तथा चौचितीतिवत् सामग्र्यरूपधर्मवाचकतया सामग्रीपदेनैव कारणसमुदायलाभाभावान्न कारणपदवैयर्थ्यप्रसङ्गः । इदं च जिज्ञासाधिकरणे व्युत्पादितम् । युक्तिपादे च कारणपौष्कल्यमिति व्याकुर्वताऽभिप्रेतमिति नेह व्युत्पादितवांष्टीकाकार इति ज्ञेयम् । **तत्रेति** मूलम् । कारणसामग्रीपदोक्तकारणकलापमध्य इत्यर्थः । आदिसृष्टौ समवायिकारणभूता इति सम्बन्धः । एवमादिसृष्टौ निमित्तकारणं चेति योजनीयम् । तेनादिसृष्टौ क्लृप्तकारणानां ततः प्राक् प्रलये कालेऽपि सत्त्वप्रतिपादनालाभः । **दिक् चेति** । निमित्तकारणमित्यनुवर्तते । अदृष्टमित्यत्राप्यनुवृत्तिः ।

**विट्ठल०—** ननु प्रलयकाले सृष्टिकारणाददृष्टानां प्रतिबद्धत्वेन कार्योन्मुखत्वरूपवृत्तिलाभाभावान्न तदा सृष्टिरिति शङ्कते **वृत्तिलाभ इति** । **तदनुत्पादस्येति** । अदृष्टवदात्मसंयोगो हि परमाणुकर्मसमवायिकारणम् । तस्योक्तप्रलयेऽपि सत्त्वेन तदनुत्पादनस्यायोगादित्यर्थः । **ईश्वरेच्छादेः सदातनत्वेनेति** । एतेन नित्यमेव च भावादिति सूत्रस्यार्थान्तरमुक्तं वेदितव्यम् । **सत्प्रतिपक्षत्वादिति** । द्व्यणुकाद्युत्पत्तिसामग्र्यास्तद्विनाशसामग्रीप्रतिरुद्धत्वादित्यर्थः । न विनाशसामग्री सृष्टिसमये स्थितिनाशप्रतियोगिनोऽपि विनाशसामग्रीप्रविष्टत्वात् अतः कार्योत्पत्त्यनन्तरमेव विनाशसामग्रीलाभात् सत्प्रतिपक्षत्वमित्यत आह **कार्योत्पत्तीति** । मूलानुक्तं सृष्टिसामग्र्यां लयसामग्रीसद्भावोपपादनं किमर्थमुच्यत इत्यत आह **अत एवेति** । अत्र लयानुपपत्तेर्मूलकाराभीप्सितत्वादेव स्वमते दोषोद्धारग्रन्थे लयोपपादनं युज्यते । अन्यथा तत्रासङ्गतिप्रसङ्गः स्यादित्यर्थः ।

**चषक— वृत्तिलाभः** कार्योन्मुखत्वम् ।

* * *

**।। अथ तत्रापि कालेच्छादिविशेष एव सृष्ट्यादिहेतुः इति न तत्पक्षे कालेच्छादेर्विभागाभावः ।।**

**३२१ सु०— 'स्यादेवं यदि कालमात्रं सृष्टेर्वा संहारस्य वा कारणं स्यात् । न चैवम् । किन्तु कालविशेष एवातस्तद्भावाभावाभ्यां सृष्टिसंहारनियमो घटते । तथा नेश्वरेच्छामात्रं सृष्ट्यादिहेतुः किन्तु तद्विशेष एव ततस्तद्भावाभावप्रयुक्ता सृष्ट्यादिव्यवस्था स्यादिति चेन्न । किं कालदेशादेरौपाधिको भेदः, किंवा स्वाभाविकः । नाद्यः निरस्तत्वात् । द्वितीये त्वपसिद्धान्तः' इत्याह न हीति ।**

## अनु॰— न हि कालविभेदोऽस्ति तत्पक्षे

**'हि'**शब्देन 'आकाशकालदिशामेकैकत्वादि'त्यादि **तद्वाक्यं स्मारयति । कालेतीश्वरेच्छाया अप्युपलक्षणम् ।**

**परि॰— निरस्तत्वादिति** । 'उपाधिजन्यं तद्गम्यमिति चौपाधिकमि'त्यादिना निरस्तत्वादित्यर्थः ।

**वं॰प॰— तद्विशेष एव** सृष्टिविषयकेच्छासंहारविषयकेच्छारूपः । **औपाधिक इति** । सृष्ट्याद्युपाधिनिबन्धनो भेद इत्यर्थः ।

**कं॰रा॰—** नन्वीश्वरेच्छाविशेषस्यैव सृष्ट्यादिकारणत्वात् तद्भावाभावाभ्यां सृष्ट्यादिनियमो युज्यत इत्यत आह **कालेतीति** । 'न हि कालविभेदोऽस्ती'त्यत्र कालपदेनेश्वरेच्छाप्युपलक्ष्यते । तथा च तत्पक्षे कालविशेषाभावस्याप्यनेनोक्तत्वादीश्वरेच्छाविशेषभावाभावाभ्यां सृष्ट्यादिनियमो युज्यत इति शङ्कानवकाश इति भावः ।

**श्रीनिधि॰— एकैकत्वादिति** । अवान्तरभेदशून्यत्वादित्यर्थः । असङ्ख्यातविशेषत्वादिच्छाया इत्यनुसारेणाह **कालेश्वरेच्छाया अप्युपलक्षणमिति** ।

**शे॰वा॰— कालविशेष एवेति** । सृष्टिकालसंहारकालरूप इत्यर्थः । **नियम इति** । कालमात्रस्य सर्वदा सत्त्वेऽपि सृष्टिकारणसृष्टिकालस्य संहारकाले, संहारकारणस्य च संहारकालस्य सृष्टिकालेऽभावादिति भावः । **तद्विशेष एवेति** । सिसृक्षासञ्जिहीर्षारूप इत्यर्थः । **निरस्तत्वादिति** । कालविशेषस्य सृष्ट्याद्युपाधिनिबन्धनत्वे सृष्ट्यादिकमन्तरेण सृष्ट्यादिकालानुपपत्तिः । सृष्ट्यादिकालमन्तरेण च सृष्ट्याद्यनुपपत्तिरित्यन्योन्याश्रयत्वप्रसङ्गात् । तथेच्छाविशेषस्यापि सृष्ट्याद्युपाधिनिबन्धनत्वे सृष्ट्यादिकमन्तरेण सिसृक्षाद्यनुपपत्तिः सिसृक्षादिकमन्तरेण च सृष्ट्याद्यनुपपत्तिरित्यन्योन्याश्रयप्रसङ्गान्न कालविशेषादेरौपाधिकत्वमिति भावः । यद्यपीच्छाविशेषस्येव कालविशेषस्यौपाधिकता पूर्वं न निराकृता, तथाऽपीच्छाविशेषस्यौपाधिकत्वनिरासकन्यायस्यात्राप्यविशिष्टत्वेन तन्निरासेनैवैतन्निरासोऽपि सिद्ध एवेत्यभिप्रेत्य निरस्तत्वादित्युक्तमित्यवधेयम् ।

**वा॰र॰—** अत्रैव निराकरणस्य योजने निरस्तत्वादित्यस्यास्वरस्यामित्याशयेनाशङ्क्य निराकरोति **यद्यपीत्यादिना** । निरस्तत्वादित्युक्तमित्यवधेयमित्यनन्तरं **तद्वाक्यं स्मारयतीति** । आकाशकालदिशामेकैकत्वादपरजात्याभावे पारिभाषिक्यः तिस्रः संज्ञा भवन्तीति प्रशस्तदेवाचार्येण आकाशप्रकरणे उक्तत्वादिति भावः।

इति ग्रन्थो मूलकोशानुसारात् । मूलकोशे हि प्रतीकमात्रमुपादाय स्थलनिष्कासनावकाशाभावेन बिन्दवः पार्श्वतो निक्षिप्तः सन्ति तेन तत्स्थलं निष्कास्य लेखनीयमिति टीकाकृदाशयः । लेखकस्तु तदाशयमविज्ञाय वाक्यार्थ-लेखकाभावं मत्वा प्रतीकोपादानमपि त्यक्तवानिति ज्ञेयम् ।

**विट्ठल०— निरस्तत्वादिति** । 'उपाधिजन्यं तद्गम्यमिति चौपाधिकं भवेदि'त्यादिना निरस्तत्वा-दित्यर्थः ।

* * *

**॥ अथ च तत्रादौ अस्मन्मते कालेच्छादेः स्वभावत एव भेदाभ्युपगमात् नैतद्दोषावकाशः (स्वमते कालविशेषभावाभावप्रयुक्तः सृष्ट्यादेः समयनियमः) ॥**

३२२ **सु०—** 'नन्विदं दूषणं भवतामपि समानम् । तथा हि । महदाद्युपादानकारणं प्रकृतिर्नित्यैव । तथा निमित्तकारणमीश्वरेच्छाकालादिकमपि । तदेव च प्रलयकारणम् । अतः सृष्टिप्रलयसमयनियमो भवतामपि दुर्घटः' इत्यत आह **अस्मन्मत इति** ।

अनु०— अस्मन्मते हरेः ।
विशेषकाल एवैतत्सृष्ट्यादीच्छा सदातना ॥

यद्यपि **अस्मन्मते हरेरिच्छा सदातना** । प्रकृत्याद्युपलक्षणमेतत् । तथाऽपि **विशेष-काल एवैतस्य** महदादेः **सृष्ट्यादि** भवतीति योजना ।

अस्माभिः काले स्वभावत एव भेदोऽभ्युपगम्यते । तथा च कालविशेषस्यैव सृष्टिं संहारं च प्रति कारणत्वात् तद्भावाभावाभ्यां सत्स्वपीतरकारणेषु सृष्ट्यादिसमयनियमो युज्यत इति भावः ।

* * *

**॥ अथ तत्रादौ अनुव्याख्यानस्थ 'विशेषकाल', 'सदातना' इतिपदयोर्व्याकरणशुद्धता ॥**

३२३ **सु०—** ननु कालविशेष इति वाच्यम् । मैवम् । विशिष्यत इति विशेषः, स चासौ कालश्चेति विग्रहग्रहणात् ।

**ननु सदातनीति भवितव्यम् । मैवम् । नायं ट्युट्युलोरन्यतरः प्रत्ययः, किन्तु भ(ा)वार्थे तनप्रत्ययोऽयम् । अथवा तनेति तनोते रूपमेतत् ।**

**परि०—** ननु कालस्य विशेष इत्यर्थे राजपुरुष इत्यादाविव कालविशेष इति निर्देष्टव्यम्; 'उपसर्जनं पूर्वं' इति उपसर्जनस्य पूर्वनिपातोक्तेः । 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति समासविधायकसूत्रे प्रथमान्तनिर्दिष्टस्य उपसर्जनत्वोक्तेः । 'षष्ठीति' षष्ठीसमासविधायकसूत्रे षष्ठ्यन्तस्य प्रथमान्ततया निर्देशादिति भावेन शङ्कते **ननु कालविशेष इति वाच्यमिति** । नायं विशेषशब्दो भावसाधनः, अपि तु कर्मसाधनः । 'अकर्तरि च कारके संज्ञायामि'ति कर्मण्यपि घञः स्मरणात् । तथा च विशेषशब्दस्य विशिष्टकाल इत्यर्थस्य कालविशेषणत्वात् 'विशेषणं विशेष्येण बहुलमि'ति समासे पूर्वनिपातो युक्त इति भावेनोत्तरमाह **विशिष्यत इतीति** । इतरस्माद्व्यावर्त्यत इत्यर्थः । कालविशेष इत्यर्थः फलिष्यतीति भावः । **ननु सदातनीति भवितव्यमिति** । सदाशब्दस्याव्ययत्वात् 'सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यः ट्युट्युलौ तुट् चे'ति सूत्रेण सदाशब्दाट्ट्युप्रत्यये ट्युल्प्रत्यये वा कृते सति 'चुटू' इति टकारस्येत्संज्ञायां तस्य लोपे 'युवोरनाकावि'ति सूत्रेण 'यु' इत्यस्यानादेशे तुडागमे च सदातनशब्दात् स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनामि'ति सूत्रेण टित्वात् ङीप्प्रत्यये 'लशक्वतद्धिते' इति ङकारस्य, 'हलन्त्यमिति' पकारस्य चापगमे 'यस्येति चे'त्यकारलोपे सदातनीति सिद्धेरिति भावः । **तनप्रत्यय इति** । 'उणादयो बहुलमि'त्युक्तेरौणादिकोऽखण्डस्तनप्रत्यय इत्यर्थः । तथा च टित्वाभावेन ङीप्प्रत्ययस्याभावे 'अजाद्यतष्टाबि'ति सूत्रेणाकारान्तत्वाट्टाप्प्रत्यय इति भावः । **तनोते रूपमिति** । तनु विस्तार इत्यस्मादौणादिकोऽकारप्रत्ययः । **सदा** विस्तारोपेता, नित्येति यावदिति भावः ।

**यादु०—** **ननु कालविशेष इति** । 'समासविधायके षष्ठी'ति सूत्रे षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वेनोपसर्जनतया पूर्वप्रयोग आवश्यक इति भावः । **विशिष्यत इति** । तथा च नात्र षष्ठीसमासो येनोक्तदोषावकाशः, किन्तु 'विशेषणं विशेष्येण बहुलमि'त्यनेन कर्मधारय एवेत्याशयः । नन्वव्ययात्सदाशब्दात् 'सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् चे'त्यनेन विहितयोष्ट्युट्युलोरन्यतरस्मिन् प्रत्यये तुडागमे 'युवोरनाकावि'त्यनादेशे च सति, सदानतशब्दस्य निष्पन्नत्वात् तस्माट्टिड्ढाणेत्यादिना ङीपा भवितव्यमित्याशङ्कते **ननु सदातनीति** ।

**वं०प०—** **ग्रहणात्** तथा च विलक्षणे काले इत्यर्थः । ततश्चार्थात्कालविशेष एवेत्युक्तं भवति ।

**कं०रा०—** ननु कालस्य विशेष इति विगृह्य कालविशेष इति षष्ठीसमासे कृते षष्ठीति समासशास्त्रे षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वेन 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनसंज्ञायां 'उपसर्जनं पूर्वमि'ति

कालशब्दस्य प्राक्प्रयोगे कर्तव्ये 'विशेषकाल एवैतदि'त्यत्र परतः प्रयोगः कथमकारीति शङ्कते **नन्विति**। नायं षष्ठीतत्पुरुषः किन्तु विशेष्यत इति कर्मव्युत्पत्त्या निष्पन्नस्य विशेषशब्दस्य कालशब्देन 'विशेषणं विशेष्येण बहुलमि'ति कर्मधारयः तत्र च विशेषणमिति समासशास्त्रे विशेषणस्य प्रथमानिर्दिष्टत्वेनोपसर्जनसंज्ञायाः सत्त्वाद्विशेषशब्दस्य प्राक्प्रयोगो युक्त एवेत्याशयेन परिहरति **मैवमिति**। ननु 'सृष्ट्यादीच्छा सदातने'त्यत्र सदाशब्दात् 'सायं चिरं प्राण्हे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् चेति' ट्युट्युलोरन्यतरप्रत्यये तस्य तुडागमे 'टिड्ढाणञि'त्यादिना ङीपि च सदातनीति प्रयोक्तव्ये सदातनेति कथं प्रायोजीति शङ्कते **नन्विति**। **नायं ट्युट्युलोरन्यतरप्रत्ययः** येन तस्याः टित्वाट्टिड्ढाणञित्यादिना ङीपि सदातनीति प्रयोक्तव्यं स्यात् किं नाम तनप्रत्ययोऽयं स च तद्धिता इति बहुवचनसामर्थ्यात्सूचित इत्याशयेन परिहरति **मैवमिति**। **अत एवेति**। तनोतेः पचाद्यचि तनशब्दे निष्पन्ने तस्मात् अजाद्यतष्टाबिति टापि कृते तनेति रूपं जातमिति भावः।

**श्रीनिधि०**— ननु कालस्य विशेषः कालविशेष इति विग्रहे षष्ठीति सूत्रेण षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनसंज्ञायां 'उपसर्जनं पूर्वमि'ति सूत्रेण पूर्वनिपाते कालविशेषेति भाव्यम्। कथं विशेषकाल इतीत्यत आह **विशिष्यत इति विशेषः स चासौ कालश्चेतीति**। विशिष्यते = व्यावर्त्यते लयस्थितिकालाभ्यां व्यावृत्तः काल इत्यर्थः। भावसाधनत्वे तु कालस्य विशेष इत्येव विग्रहः स्यान्न तु विशेषश्चासौ कालश्चेति। धर्मोपसर्जनतयैव धर्मिणः प्रतीयमानत्वात्। तथा च सामानाधिकरण्यायोगात्। एवं चोक्तानुपपत्तितादवस्थ्यमिति एवं व्युत्पत्तिराश्रिता। एवं च सामानाधिकरण्यं युज्यते, धर्मिण एव प्राधान्येन प्रतीतेः। पूर्वनिपातोऽपि युज्यते। 'विशेषणं विशेष्येण बहुलमि'ति विशेषणवाचिनः प्रथमानिर्दिष्टत्वादिति। ननु सदाशब्दात् 'सायञ्चिरं प्राह्णे प्रगेऽव्ययेभ्यः ट्युट्युलौ तुट् चे'ति सूत्रेण अव्ययत्वेन अन्यतरस्मिन्प्रत्यये कृते तस्य 'युवोरि'ति सूत्रेणानादेशे कृते 'टिड्ढाणञि'त्यादिना ङीपि कृते सदातनीति स्यादिति शङ्कते **नन्विति**। **तनप्रत्ययोऽयमिति**। विचित्रा हि तद्धितगतिरिति वचनादिति भावः। **अथवा तनोतेरिति**। तनु विस्तार इति इत्यस्मात् तनोतीति कर्तरि पचाद्यचि कृते इदं रूपम्। पक्षद्वयेऽपि टित्वाभावेन न ङीप्प्रसक्तिरिति द्रष्टव्यम्।

**शे०वा०— ननु कालविशेष इति वाच्यमिति**। कालस्य विशेष इति षष्ठीसमासविधायके 'षष्ठी'ति सूत्रे षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वेन 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनत्वात् उपसर्जनस्य च 'उपसर्जनं पूर्वमि'ति पूर्वनिपातविधानादिति भावः। नात्र षष्ठीसमासोऽभिमतः, येनोक्तदोषः स्यात् किन्नाम 'विशेषणं विशेष्येण बहुलमि'ति समानाधिकरणसमास एवेत्यतो नानुपपत्तिरित्याशयेन विशेषशब्दस्य कालशब्देन सामानाधिकरण्यमुपपादयन्नेव परिहरति **मैवमित्यादिना**। ननु 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' इति सूत्रेणाव्ययात् सदाशब्दात् ट्युट्युलोरन्यतरस्मिन्प्रत्यये समागते, तस्य तुडागमे 'युवोरनाकावि'ति तस्यानादेशे च सति निष्पन्नसदातनशब्दस्य टित्वात् 'टिड्ढाणञि'त्यादिना ङीपि 'यस्येति चे'त्यकारलोपे सदातनीत्येव भाव्यम्। सदातनेति तु कथमित्याक्षिपति **नन्विति**। **भ(ा)वार्थेति**। यद्यपि भावार्थे तनप्रत्ययो न विहितः

तथाऽपि सर्वत्राधिकारसूत्रे 'प्रत्ययः समासान्त' इत्येकवचनान्तप्रयोगस्यैव दर्शनात् तद्वत्तद्धित इत्येकवचन-प्रयोगे कर्तव्ये यत्तद्धिता इति बहुवचनं, तेन संज्ञिनां बहुत्वसूचनादनुक्तोऽपि तद्धितः परिगृह्यत इति भावेन बहुवचनमनुक्ततद्धितपरिग्रहार्थम् । ततश्च 'पृथिव्या ञाञौ' 'अग्रादिपश्चात् डिमच्' इत्येवमादि लब्धं भवतीति वृत्तिकारेणोक्तत्वाद्भावेऽर्थेऽनुक्तस्यापि तनप्रत्ययस्य तद्धिता इति बहुवचनलब्धत्वमस्त्येवेत्यभिप्रेत्यैवमुक्तमिति ध्येयम् । यद्वैतदस्वरसादेवाह **अथवेति** । **तनोते रूपमिति** । तनु विस्तार इत्यस्मात् तनोतीति कर्तरि 'नन्दि-ग्रहिपचादिभ्यो ल्युणिन्यच' इति पचाद्यचि तनेति रूपनिष्पत्तिरिति भावः ।

**वा०र०— इति सूत्रेणेति** । सूत्रार्थो लेख्यः । **अन्यतरस्मिन्निति** । ट्युल्पक्षे लित्प्रयुक्तस्वर-विशेषसद्भावेऽपि प्रकृते तत्प्रसक्त्यभावाभिप्रायेणैतदुक्तमिति ज्ञेयम् । **टित्वादिति** । एतदनन्तरं स्त्रीत्वात् स्त्रियामिति शेषः । मूलकारीयसदातनशब्दोपपादने भट्टोजिना भ्रान्तत्वप्रतारकत्वे उक्ते । तद्वचनं परामर्शमूलकं न, किन्तु स्वकीयातिभ्रान्तिमूलमिति दर्शयितुं तदुक्तदोषमाशङ्क्य निराकरोति **यद्यपि भावार्थ इत्यादिना** । तथापि भावार्थे उक्तस्यापीत्यादिसम्बन्धः । 'तद्धिता' इति बहुवचनबलस्य वृत्तावुक्तत्वान्न कल्पनामात्रत्वं शङ्क्यमि-त्याशयेन वृत्तौ तदुक्तिप्रकारकीर्तने सर्वत्राधिकारसूत्र इत्याद्युक्तत्वादित्यन्तम् । **इत्येकवचनान्तेति** । इत्याद्येक-वचनान्तेत्यर्थः । आदिपदेन परश्चेत्यादिकं गृह्यते । अत एव निखिलपूर्णगुणार्णमित्याद्यृग्भाष्यटीकोपपादनावसरे तदप्युदाहृतम् । वृत्तिगतैतत्स्थलव्याख्यानं तूक्त ऋग्भाष्यीय तद्धिता इति ड इति टीकोपपादनरूपगुरुकृतोक्त-रूपटीकाया व्याख्यानेऽस्माभिः कृतं ज्ञेयम् । अत्रापि तत्स्थलीयव्याख्यानमुपयोगानुसारेण लेख्यं सावकाश-तया । 'तद्धिता' इति बहुवचनज्ञापित 'विचित्रा तद्धितगतिरि'ति वार्तिकेणेति वक्ष्यति । यद्यपि न विहित इत्यनेन मुखतो विधानाभावोऽस्मत्सम्मतो दोषतया न वाच्य इति सूचितं भवति । अनुक्तस्यापि तद्धिता इतीत्युक्त्या च सर्वथा विधानाभावस्यासिद्ध्या तदुद्भावनायोग इति सूचितं भवति । ततश्च भावार्थे तनप्रत्ययस्य तद्धितबललभ्यत्वात् तद्धितबलस्य च वृत्तावुक्तेर्नाविहितत्वमस्येति बाधकाभावात् तन्निबन्धनभ्रान्तत्वाद्युक्तिः स्वस्यैवातिभ्रान्तत्वाद्यापादिकेति उपेक्ष्य एवायमिति सूचितं भवति । तद्धितबलमनङ्गीकुर्वाणं प्रति अथवेत्यनेन समाध्यन्तराभिधानाच्च न दोष इत्याशयेनाह **यद्वेति** । ततश्च प्रकारान्तरेणापि तनशब्दोपपत्तेर्बाधकाभावादयुक्तं परस्य चोदनमित्युक्तं भवति ।

**स०व्र०—** ननु सदेत्यस्य अव्ययत्वेन 'सायं चिरमि'त्यनेन ट्युट्युलोर्मध्ये अन्यतरप्रत्यये टित्वात् 'टिड्ढाणञ्' इति ङीपि सदातनीति भवितव्यम् । सदातनेति कथमुक्तमिति शङ्कते **नन्विति** । उत्तरमाह **भ(ा)वार्थे तनप्रत्यय इति** । 'तद्धिता' इति बहुवचनज्ञापित 'विचित्रा तद्धितगतिः' इति वार्तिकेण भावार्थे तनप्रत्यय इत्यर्थः । यद्वा एतदस्वारस्यादाह **अथवेति** ।

**विठ्ठल०—** ननु प्रथमानिर्दिष्टं समास उपसर्जनमिति समासविधायकसूत्रे प्रथमानिर्दिष्टस्योपसर्जनतोक्तेः षष्ठीविधायके षष्ठीति सूत्रे षष्ठ्याः प्रथमान्तनिर्दिष्टात्कालस्य विशेष इति षष्ठीसमासे कालपदस्योपसर्जनत्वेन

उपसर्जनं पूर्वमित्युक्तेः पूर्वप्रयोग आवश्यक इति भावेन शङ्कते **ननु कालविशेष इतीति** । नात्र षष्ठीसमासः येनोक्तदोषः किन्तु विशेषणं विशेष्येण बहुलमिति कर्मधारय एवेत्याशयेन परिहरति **मैवमिति** । **विशिष्यत इति** । तस्माद्व्यावर्त्यत इत्यर्थः । तथा च कालविशेष इत्येवार्थः पर्यवस्यतीति ध्येयम् । ननु सदाशब्दस्य अव्ययत्वात् 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् चे'ति सूत्रेण सदाशब्दात् ट्युट्युलोरन्यतरस्मिन् प्रत्यये कृते चुट्विति टकारस्येत्संज्ञया लोपे यु इति स्थितेऽस्य च युवोरनाकावित्यनादेशे तुडागमे च सति सदातन-शब्दस्य निष्पन्नत्वात् तस्य स्त्रीत्वविवक्षया टिड्ढाणञित्यादिना टित्वात् ङीप्प्रत्यये 'लशक्वतद्धित' इति ङकारस्य, हलन्त्यमिति पकारस्य लोपे च सदातनीति भवितव्यमिति शङ्कते **नन्विति** । **तनप्रत्यय इति** । उणादयो बहुलमित्यौणादिकोऽखण्डस्तनप्रत्यय इत्यर्थः । तथा च टित्वाभावेन न ङीप् किन्तु अजाद्यतष्टा-बित्यकारान्ततया टप्प्रत्यये सदातनेति रूपमिति भावः । **तनोतेरिति** । सदापदे उपपदे तनु विस्तार इत्यस्मा-दौणादिककारप्रत्यय इति भावः ।

**चषक— विशिष्यत इति** । तथा च विशेषपदस्य भावसाधनघञन्ततावधीरणेन कर्मसाधनघञन्तता-श्रयणान्न षष्ठीसमासः, किन्तु 'विशेषणं विशेष्येण बहुलमि'ति समानाधिकरणतत्पुरुष इति भावः । ननु सदा-शब्दस्याव्ययत्वेन 'सायं चिरमि'ति ट्युट्युलोरन्यतरस्मिन् प्रत्यये, तुडागमे युवोरित्यनादेशे स्त्रीत्वविवक्षायां प्रत्ययटित्वनिबन्धनङीपि सदातनीति न्यासेन भवितव्यमित्याशङ्कते **नन्विति** ।

**॥ इति अनुव्याख्यानस्थ 'विशेषकाल','सदातना' इतिपदयोर्व्याकरणशुद्धता ॥**

* * *

**॥ अथ तत्रान्ते कालादिभेदानां निरन्तरप्रवाहतया अनित्यत्वम् ॥**

**३२४ सु०— 'ननु ते कालभेदा यदि नित्यास्तदा स प्रसङ्गस्तदवस्थः, व्यर्थश्च काल-भेदाभ्युपगमः । अनित्यत्वे तत्कारणं वाच्यमिति चेत्' सत्यम् । उपादानं तु प्रकृतिरेव । निमित्तमाह विशेषाश्चेति ।**

## अनु०— विशेषाश्चैव कालस्य हरेरिच्छावशाः सदा ।

**न केवलं महदादि किन्तु कालस्य विशेषाश्च क्षणलवादयः । एवशब्दस्य 'हरेरेवे'ति सम्बन्धः । सदेत्यनेन न युगपत्सर्वक्षणसृष्टिर्येन तेषामपि (अ)क्षणिकत्वं स्यात्, किन्तु निरन्तरप्रवाहतयेत्युक्तं भवति ।**

**परि०— प्रसङ्ग इति** । सृष्टिप्रलययोरव्यवस्थाप्रसङ्ग इति भावः । **व्यर्थश्चेति** । सृष्ट्यादेः व्यवस्थित्यनापादकत्वादिति भावः । **तेषामपि क्षणिकत्वमिति** । सर्वक्षणानामप्येकस्मिन्नेव क्षणे अवस्थितिः स्यादित्यर्थः । **निरन्तरेति** । अव्यवहितप्रवाहतयेत्यर्थः ।

**यादु०— अक्षणिकत्वमिति** । युगपत्सर्वक्षणसृष्ट्यङ्गीकारे क्षणानां प्रत्येकं सर्वाश्रयत्वेन सर्वक्षणावस्थायित्वप्राप्त्या तेषां क्षणमात्रावस्थायित्वरूपं क्षणिकत्वमनुपपन्नं स्यादित्यर्थः ।

**वं०प०— व्यर्थश्चेति** । कालभेदाभ्युपगमेऽपि तस्य नित्यत्वेन सदा सृष्ट्यादिप्रसङ्गस्यानिवारणादित्यर्थः । **तदिति** । कालभेदोत्पत्तावित्यर्थः ।

**श्रीनिधि०—येन तेषामपि क्षणिकत्वं स्यादिति** । सर्वेषामपि क्षणानां एकक्षणसम्बन्धित्वं स्यादित्यर्थः । सर्वेषामपि क्षणानां स्वकाल एव सत्त्वात् ।

**शे०वा०—** ननु विशेषाश्चेत्युत्तरभाष्यमनर्थकम् । न च कालविशेषाणां किमुत्पादकमिति जिज्ञासायामुत्पादकसङ्कीर्तनमेतदिति वाच्यम् । कालविशेषाणां नित्यत्वस्यापि सिद्धान्तिनाऽङ्गीकर्तुं शक्यत्वेन तदनित्यत्वासिद्धया तदुत्पादकजिज्ञासाया एव तं प्रत्यनुत्थानादित्यत उक्ताकाङ्क्षापूरकतयोत्तरवाक्यं योजयितुं नित्यत्वस्यानङ्गीकर्तव्यत्वोपपादनपुरःसरमनित्यतामङ्गीकार्यमिति तदुत्पादकजिज्ञासामुत्थापयति **नन्विति** । **स प्रसङ्ग इति** । सृष्टिप्रलयसमयनियमानुपपत्तिरूप इत्यर्थः । **व्यर्थश्चेति** । उक्तातिप्रसङ्गानिवारकत्वात् प्रयोजनान्तरस्य चाभावादिति भावः । ननु विशेषाश्चेत्युत्तरवाक्ये निमित्तकारणमुच्यते न तूपादानकारणं, तत्कथमिदमुपादानप्रश्नस्योत्तरं स्यात् । नेदमुपादानप्रश्नस्योत्तरम् । किन्त्वन्यदेव । इदं तु निमित्तप्रश्नस्यैवेत्यतो नानुपपत्तिरित्यभिप्रेत्य किमयमुपादानप्रश्नः किंवा निमित्तप्रश्नः इति विकल्पद्वयं मनसि निधाय तत्राद्यं बहिरेव प्रदूष्य द्वितीयपक्षनिरासपरतयोत्तरभाष्यं योजयति **सत्यमित्यादिना** । मूले चशब्दोऽनुक्तसमुच्चयार्थ इत्यभिप्रेत्य तं दर्शयति **न केवलमिति** । तर्हीतरव्यावर्तकैवकारविरोध इत्यतो भिन्नक्रमत्वात् तस्य विशेषा इत्यनेनानन्वयान्न दोष इत्यभिप्रेत्य तस्यान्वयमाह **एवशब्दस्येति** । **न युगपदिति** । युगपत्सर्वक्षणोत्पत्तौ उत्पन्नानां क्षणिकत्वे युगपदेव सर्वक्षणसमाप्त्यापत्त्योत्तरत्र क्षणाभावप्रसङ्गेन तत्कार्योपलम्भाभावप्रसङ्गादक्षणिकत्वमेव वाच्यमित्यक्षणिकत्वसिद्धिरिति भावः ।

**वा०र०—** युगपदेव सर्वलक्षणसृष्टावपि कुतस्तेषामक्षणिकत्वं तत्सृष्टिपक्षेऽपि क्षणिकत्वस्यैवोपपत्तेः । ततश्च क्षणिकत्वसिद्ध्यर्थं निरन्तरप्रकारतया सृष्टिज्ञापकपदेतिपदं व्यर्थमित्यतो युगपत्सृष्ट्यङ्गीकारे सिद्धान्त्यभिमतक्षणिकत्वपक्षेऽनुपपत्तिं दर्शयन्नेव युगपत्सर्वक्षणसृष्टौ क्षणानामक्षणिकत्वसिद्धिमुपपादयति **युगपदिति** । यदि

सर्वेऽपि क्षणा युगपदेवोत्पन्नाः क्षणमात्रावस्थायिनश्च तर्हि तेषां युगपदुत्पन्नसर्वक्षणानामेकक्षणावस्थानानन्तरमेव नाशो वाच्यः । तथा च तन्नाशानन्तरं क्षणाभावापत्त्या कालरूपकारणाभावेन तदानीं कार्योत्पादस्यायोगे तदुपलम्भायोगप्रसक्तिरिति न तेषां क्षणिकत्वं वक्तुं युक्तम् । ततश्चाक्षणिकत्वमेवाङ्गीकार्यम् । तदङ्गीकार एवोत्तरत्रापि कालसत्त्वप्रयुक्तकार्योपलम्भसम्भवात् । यदि क्षणिकत्वानुपपत्तिः तर्ह्यस्त्वक्षणिकत्वमिति तु न शङ्कार्हम् । सिद्धान्ते तदनङ्गीकारात् । सर्वलक्षणानामेककालत्वे उक्तव्यवस्थानिर्वाहानुपपत्तेश्च । अत एव यथा स्वमिति वक्ष्यति । तस्मात्क्रमेण सर्वलक्षणोत्पत्तिरेव वाच्या । तदा च क्षणिकत्वसिद्धान्तहानेरभावः । उत्तरत्रापि क्षणसद्भावेन कार्योपलम्भोपपत्तेरक्षणिकत्वस्यानङ्गीकर्तव्यत्वम् । तदेवं प्रकारेण सर्वलक्षणानां निरन्तरप्रवाहतया सृष्टिः न तु युगपत्सृष्टिरिति ज्ञापयितुं सदेश्वरेच्छानिमित्तका इत्युक्तमिति निष्कृष्टोऽर्थः । यत्त्वन्यथाख्यातौ युगपत्सर्वक्षणसृष्ट्यङ्गीकारे क्षणानां प्रत्येकं सर्वाश्रयत्वेन सर्वलक्षणावस्थापित्वप्राप्त्या तेषां लक्षणमात्रावस्थायित्वरूपं क्षणिकत्वमनुपपन्नं स्यादित्यर्थप्रतिपादनम् । तदप्युक्तव्याख्यानेनैव निराकृतप्रायम् । युगपत्सर्वलक्षणावस्थायित्वेऽपि युगपदित्युक्तैकक्षणावच्छेदेनेत्युक्त्यैव क्षणमात्रसम्बन्धित्वस्यापि प्राप्तेः । प्रत्यभिज्ञाविरोधिक्षणिकत्वस्य पूर्वोत्तरभावानापन्नक्षणसम्बन्धित्वरूपतया तदहानेश्च । तस्माट्टीकोक्तरीत्यैवैतद्व्याख्यानं युक्तम् । मूले **सर्वक्षणेति** क्षणपदमुपलक्षणम् । लवादिष्वपि क्षणवदेव लवादिकालमात्रावस्थायित्वसंरक्षणाय तेषामपि युगपदुत्पत्तेरनिष्टत्वात् । अत एव विशेषा इत्येतत् क्षणलवादय इति व्याख्यातमिति ज्ञेयम् ।

**स०व्र०— स प्रसङ्ग इति** । सृष्टिप्रलयसमयनियमानुपपत्तिरूपातिप्रसङ्गस्तदवस्थ एवेत्यर्थः । **व्यर्थश्चेति** । उक्तातिप्रसङ्गपरिहारत्वाभावात् प्रयोजनान्तरस्य चाभावादिति भावः ।

**विट्ठल०— उपादानं तु प्रकृतिरेवेति** । अत्र जगदुपादानमूलप्रकृतिरेव कालोपादानमित्येके । अपरे जगदुपादानप्रकृतेरन्यत्कालस्वरूपभूतमेव कालोपादानं तस्यापि प्रकर्षेण करोतीति व्युत्पत्त्या प्रकृतिरिति नामेत्याहुः । **सदेत्यनेनेति** निरन्तरं सर्वकालानुवृत्तताप्रतिपादकेन सदेतिपदेन नैकक्षणे सर्वक्षणानां सृष्टिः । तथात्वे खलु सर्वक्षणानामपि एकक्षणमात्रावस्थायित्वप्राप्त्या सर्वकालस्यापि क्षणिकत्वं स्यात् । किं त्ववच्छिन्नप्रवाहतयैव तत्क्षणे तत्क्षणसृष्टिः कालस्य कालगतत्वेन न दोषः । तथा च कालप्रवाहस्यानन्तत्वं प्रत्येवं सर्वक्षणानामपि क्षणिकत्वं च लभ्यत इत्युक्तं भवतीत्यर्थः । **तेषामक्षणिकत्वं स्यादिति** पाठे तु युगपत्सर्वलक्षणसृष्ट्यङ्गीकारे तदा सर्वक्षणानां भावात् तेषां च सर्वक्षणानां सर्वक्षणावस्थायित्वप्राप्त्या तेषां क्षणमात्रावस्थायित्वरूपं क्षणिकत्वमनुपपन्नं स्यादित्यर्थः ।

**चषक— स प्रसङ्गः** सा सृष्टिप्रलययोरव्यवस्थापत्तिः ।

* * *

।। अथ च तत्रादौ कालविशेषाणां परमेश्वराज्जन्मनि श्रुतिप्रामाण्यम् ।।

।। अथ च तत्राप्यादौ 'सर्वे निमेषा जज्ञिरे' इति श्रुतिप्रामाण्यम् ।।

३२५ **सु०—** ननु कालविशेषाणां परमेश्वराज्जन्म कुतः प्रमाणात्सिद्धमित्यत आह **सर्व इति** ।

## अनु०— सर्वे निमेषा इति हि श्रुतिरेवाह सादरम् ।

'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' इति **श्रुतिरेव** कालविशेषाणामीश्वराज्जनिम् **आह हि** इत्यर्थः ।

विशेषेण द्योतत इति विद्युत् तस्मात् परमपुरुषात् सर्वे निमेषाः = कालभेदा अधिजज्ञिरे = यथास्वं जायन्त इति ।

ननु 'एषा श्रुतिः कालोपाधीनामीश्वराज्जननमाह, न तु कालस्य; तथा सति काष्ठा-कलामुहूर्ताश्चेत्युत्तरवाक्यस्य पौनरुक्त्यप्रसङ्गात् । न हि सर्वनिमेषातिरिक्तं काष्ठाकलादिक-मस्ति, उपाधयस्तु निमेषादिरूपाः पृथगेव, इति न तत्र पुनरुक्तिदोष इति' अत उक्तं **सादरमिति** । यत्सर्वनिमेषजन्माभिधाय पुनः काष्ठादिजन्माभिधत्ते तदादरार्थमित्यतो न पुनरुक्तिदोषः । उपाधिभेदस्तु नोपपद्यत इत्युक्तमेवेति ।

**परि०—** यौगपद्यनिरासायोक्तं **यथास्वं जायन्त इति** । स्वस्वोचितकाल एवेत्यर्थः । **इत्युत्तरवाक्यस्येति** । 'कला मुहूर्ताः काष्ठाश्चे'त्येवमुत्तरवाक्यश्रवणेऽपि तत्र यथाश्रुतपाठक्रमो न विवक्षितः । किन्तु काष्ठादिक्रम एव । 'अष्टादशनिमेषास्तु काष्ठास्त्रिंशत्तु ताः कला' इत्यमराद्युक्त्या काष्ठाद्युत्पत्तिक्रमानुरोधेनास्मदुक्तक्रम एव श्रुतौ विवक्षित इति भावेन काष्ठाकलेत्यनुवादः कृत इति ध्येयम् । **इत्युक्तमेवेति** । 'उपाधिजन्यं तद्गम्यमि'त्यादिनेति भावः ।

**यादु०—** युगपदेव सर्वकालविशेषसृष्टिवारणायाह **यथास्वमिति** । **स्वं** स्वीयं कालमनतिक्रम्येति यथास्वम् । यस्य कालविशेषस्य यदा सृष्टिः प्रमिता तदा स कालविशेषः पुरुषाज्जात इत्यर्थः । **काष्ठाः कला मुहूर्ताश्चेति** । यद्यपि 'कलाः मुहूर्ताः काष्ठाश्चे'ति श्रुतिपाठस्तथाऽपि काष्ठानां कलामुहूर्तापेक्षया प्राथम्य-द्योतनायादौ ग्रहणमिति मन्तव्यम् । अत एवाहुः । 'क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम् । अष्टादश निमेषाः

स्युः काष्ठास्त्रिंशत्तु ताः कलाः । त्रिंशत्कलो मुहूर्तः स्यादि'ति । **न हि सर्वनिमेषातिरिक्तमिति** । निमेषशब्दस्य कालभेदपरतया व्याख्यातत्वात् सर्वकालभेदातिरिक्तं काष्ठादिकं न ह्यस्तीत्यर्थः । तथा च पुनस्तद्वचने पुनरुक्ति-रिति भावः । स्वमते तु न पौनरुक्त्यमित्याह **उपाधयस्त्विति** । अक्षिपक्ष्मसंयोगतरणिपरिस्पन्दविशेषादिरूपा इत्यर्थः । तथा च श्रौतनिमेषपदमन्योपाध्युपलक्षकमिति भावः । **पृथगेवेति** । तत्तदुपाध्यवच्छिन्नकाष्ठादि-कालापेक्षयेति शेषः । **उक्तमेवेति** । 'नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः । सत्यत्वात् को विशेष' इत्यत्रेति शेषः ।

**वं०प०**— विद्युतः पुरुषादिति सामानाधिकरण्यमित्यभिप्रेत्य तत्र विद्युच्छब्दं निर्वक्ति **विशेषेणेति** । **कालोपाधीनां** अक्षिपक्ष्मसंयोगादिरूपनिमेषाद्युपाधीनाम् । **पृथगेव** कालादित्यर्थः ।

**कं०रा०**— **विद्युदिति** । विपूर्वाद् द्युत दीप्तावित्यस्मात् क्विपि, क्विपः कित्वेनोपधागुणाभावे निष्पन्नस्य विद्युच्छब्दस्य विशेषेण द्योतमानत्वमर्थ इति भावः ।

**श्रीनिधि०**— **यथास्वं जायन्त इति** । स्वस्वकालानतिक्रमेण जायत इत्यर्थः । न सर्वनिमेषाः युगपद् उत्पद्यते । किन्तु क्रमेणैवेति यावत् । उपाधयस्तु निमेषादिरूपाः । **पृथगेवेति** । भिन्नभिन्न इत्यर्थः । **आदरार्थमिति** । आदरद्योतनार्थमित्यर्थः । नन्वेवमपि कालोपाधेरेवात्रोत्पत्तिरुच्यत इत्यङ्गीकर्तव्यम् । तथाहि । कालः तावदखण्डः । न चैवंविधस्योत्पत्तिर्युज्यते । न चैवं सृष्ट्यादिव्यवस्थानुपपत्तिः । स्वाभाविकभेदाभावेऽपि औपाधिकस्य सम्भवादित्यत आह **उपाधिभेदस्त्विति** । उपाधिकृत इत्यर्थः । एवञ्च सृष्ट्यादिव्यवस्थार्थं स्वाभाविकभेदे अङ्गीकार्ये तस्योत्पत्तिर्नानुपपन्नेति भावः ।

**शे०वा०**—नन्वत्र 'विद्युतो भारत्याः पुरुषाद्भर्तुर्वायोरि'ति वायोरेव कालविशेषकारणत्वमुच्यते, तत्कथं परमेश्वरस्य तत्कारणत्वे एतच्छ्रुत्युदाहरणमित्यतो नेमे व्यधिकरणे पञ्चम्यौ, किन्तु समानाधिकरणे इति भावेन भगवत्परतया श्रुतिं व्याचष्टे **विशेषेणेति** । युगपदेव सर्वकालविशेषाणां सृष्टिर्भवतीति भ्रान्तिवारणायाह **यथास्वमिति** । **स्वं** स्वीयं कालमनतिक्रम्य यथास्वम् । यस्य कालविशेषस्य यदा सृष्टिरुचिता तदा स कालविशेषः पुरुषाज्जायत इत्युक्तं भवति । **काष्ठाकलामुहूर्ताश्चेति** । यद्यपि 'कलामुहूर्ताः काष्ठाश्चे'ति श्रुतिपाठः तथाऽपि काष्ठानां कलामुहूर्तापेक्षया 'क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम् । अष्टादशनिमेषाः स्युः काष्ठा-स्त्रिंशत्तु ताः कलाः । त्रिंशत्कलो मुहूर्तः स्यादि'ति वचनसिद्धतत्प्राथम्यद्योतनाय प्रथमग्रहणं न तु तथैव श्रुतिपाठाभिप्रायेणेत्यदोषः । 'श्रीश्च ते लक्ष्मीश्च पत्न्यावि'तिवच्छाखान्तरपाठोऽयमिति वा । **न हि सर्वनिमेषा-तिरिक्तमिति** । सर्वकालभेदातिरिक्तमित्यर्थः । निमेषशब्दस्य कालभेदपरतया व्याख्यातत्वात् । तथा च पुन-स्तद्वचने पुनरुक्तिरिति भावः । स्वमते तु नायं दोष इत्याह **उपाधयस्त्विति** । श्रुतौ निमेषपदमुपाध्यन्तरोप-लक्षकमिति भावेन निमेषादीत्यादिपदप्रयोगः। अक्षिपक्ष्मसंयोगतरणिपरिस्पन्दविशेषादिरूपा इत्यर्थः । **पृथगेवेति**। तत्तदुपाध्यवच्छिन्नकाष्ठादिकालापेक्षयेति शेषः । **उक्तमेवेति** । 'नानिर्वाच्यं हि तेनेष्टमि'त्यादिनेति शेषः ।

**वा०र०— नेमे व्यधिकरणे पञ्चम्याविति** । अत्र व्यधिकरणत्वेन पञ्चमीनिषेधस्य विशिष्टविषयत्वाद्विशिष्टनिषेधस्य च लाघवेन विशेषणनिषेधे पर्यवसानादेतयोः पञ्चमीत्वरूपविशेष्याभ्युपगमपूर्वकत्वसिद्ध्या अन्यतरषष्ठीत्वानभ्युपगमस्याप्यर्थतो लाभेन पूर्वशङ्कानिरासससिद्धेः तन्निरासाय षष्ठीत्वमप्येकत्र निषिद्ध्योभयोरपि पञ्चम्यन्तत्वाभावसम्पादनानन्तरं व्यधिकरणत्वाभावो वाच्य इति शङ्कानवकाशः । योजना तु इमे पञ्चम्यौ । ते च न व्यधिकरणे । **किन्त्वित्यादि** । श्रुतिस्थं निमेषपदं सर्वकालविशेषोपलक्षणमित्याशयेन कालभेदा इति व्याख्यास्यत इति तदाशयं दर्शयितुं सर्वकालविशेषणमित्यनुवादः । **श्रुतिपाठ इति** । नारायणोपनिषदि पाठ इत्यर्थः । **कलामुहूर्तापेक्षयेति** । अनेन कलामुहूर्तयोर्यथाश्रुत एव क्रमोऽस्तीति सूचितम् । **तत्प्राथम्येति** । कलामुहूर्तापेक्षया प्राथम्येत्यर्थः । अत एवैतदुपनिषत्परभाष्ये कला इत्यादि श्रुतिपाठमुपादायापि निमेषेभ्योऽप्यधिकाः कालविशेषाः काष्ठाः । ताभ्योऽप्यधिकाः कलाः । ततोऽप्यधिका मुहूर्ता इति क्रमान्तरेणैव व्याख्यानपूर्वकमष्टादशनिमेषायास्त्वित्यादि पूर्वाचार्यवचनं साधकतयोक्तम् । अत एव च प्रशस्तदेवाचार्यैः क्षणलवनिमेषाकाष्टाकल्पमुहूर्तयामाहोरात्रार्धमासेत्यादिना कालस्वरूपनिरूपणावसरे काष्ठाकालेत्येवोक्तम् । सृष्टिसंहारप्रकरणस्थ वर्षशतान्त इति प्रशस्तदेवोक्तिव्याख्यावसरे किरणावल्यां 'क्षणद्वयं लवप्रोक्तो निमेषस्तु लवद्वयम् । अष्टादश निमेषा' इत्यादिना काष्टादिक्रम एव स्वीकृत इति भावः ।

**त्रिंशत्कला इतीति** । 'तास्तु त्रिंशत्क्षणः प्रोक्त' इत्युत्तराधिकरणटीकोदाहृतवाक्यं तु ज्योतिश्शास्त्रसम्मतक्षणादिस्वरूपकथनरूपं वाक्यान्तरम् । अत एवोक्तोपनिषद्भाष्ये तदुदाहरणमिति ज्ञेयम् । **शाखान्तरपाठोऽयमिति वेति** । अत एवोक्तं परकीयनारायणोपनिषद्भाष्ये । तदीयपाठसम्प्रदायस्तु देशविशेष बहुविध उपलभ्यते । तत्र यद्यपि शाखाभेदः कारणं, तथापि तैत्तरीयशाखाध्यायकैस्तत्तद्देशनिवासिभिः शिष्टैरादृतत्वात् सर्वोऽपि पाठ उपादेय एवेति । तथा 'मानोहिंसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातये'त्यन्तानन्तरं 'इत ऊर्ध्वं तेषु तेषु देशेषु श्रुतिपाठोऽत्यन्तविलक्षणः । तत्र विज्ञानात्मप्रभृतिभिः पूर्वनिबन्धकारैः द्राविडपाठस्यादृतत्वात् द्वयमपि तमेवादृत्य व्याख्यास्याम इति चोक्तमिति भावः किरणावल्यामिति निमेषा इत्यनन्तरं इत्यादिगणितशास्त्रानुसारेण ग्राह्यमिति तत्र चोक्तेरिति भावः ।

**स०व्र०— उक्तमेवेति** । 'नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः । सत्यत्वात् को विशेषः स्यात्' इत्यादिनोक्तमेवेत्यर्थः ।

**विठ्ठल०— युगपत्सर्वकालसृष्टिवारणायाह यथा स्वमिति** । स्वकीयं कालमनतिक्रम्य यथास्वं, तथा च युगपत्सर्वकालोत्पत्तिरिति भावः । काष्टाकलामुहूर्ताश्चेति श्रुतिपाठः, तथापि काष्टानां कलाद्यपेक्षया प्राथमिकताद्योतनायादौ ग्रहणमिति मन्तव्यम् । अत एवाहुः 'क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम् । अष्टादशनिमेषास्तु काष्टाः त्रिंशत्तु ताः कलाः । त्रिंशत् कलो मुहूर्तः स्यादि'त्यादि । **न हि सर्वनिमेषातिरिक्तमिति** । निमेषशब्दस्य कालभेदतया व्याख्यातत्वात् सर्वकालभेदातिरिक्तकाष्टादिकालाभावात् तथा च पुनस्तद्वत्पुन-

रुक्तिरिति भावः । स्वमते तु न पौनरुक्त्यमित्याह **उपाधयस्त्विति** । अक्षिपक्ष्मसंयोगतरणिपरिस्पन्दादिरूपा इत्यर्थः । तथा च श्रुतौ निमेषपदमन्योपलक्षणमिति तस्याशयः । **पृथगेवेति** । तत्तदुपाध्यवच्छिन्नकाष्ठादि-कालापेक्षयेति शेषः । वस्तुतः सर्वनिमेषातिरिक्तकाष्ठादिकालाभावादुपाधिनिबन्धनभेदमादायैव न पौनरुक्त्यमिति कुतो नोच्यत इत्यत आह **उपाधिभेदस्त्विति** । 'अत औपाधिकोऽन्ययोः सत्त्वात्को विशेषः स्यादि'त्यत्र उक्तमित्यर्थः ।

**॥ इति 'सर्वे निमेषा जज्ञिरे' इति श्रुतिप्रामाण्यम् ॥**

* * *

**॥ अथ च तत्रान्ते 'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः' इत्यादि श्रुतिप्रामाण्यम् ॥**

३२६ **सु०—** 'ननु **निमेषादिशब्दा** अक्षिपक्ष्मसंयोगादिवाचिनो न साक्षात् कालाभिधायिनः । अतो नेयं श्रुतिर्व्यक्तं कालस्यैवेश्वराज्जन्म प्रतिपादयितुमलमि'त्यतोऽत्र स्पष्टां श्रुतिं चाह **उदीरयतीति** ।

## अनु०— उदीरयति कालाख्यां शक्तिमित्यस्य वागपि ।

'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाण' **इति अस्य** ईश्वरस्य **वागपि** 'कालस्येश्वरादुत्पत्तिमाहे'त्यर्थः ।

**कालात्मिकां** = कालाख्यां सहकारिशक्तिम्, **उदीरयाणः** जनयन्नित्यर्थः । अत्र कालशब्दात्, ईश्वरस्य जगत्सृष्टौ शक्तित्वाभिधानाच्च, नार्थान्तरकल्पनावकाशः ।

**परि०—** 'अस्ये'त्यनुवादः । 'ईश्वरस्ये'ति व्याख्या । **शक्तित्वाभिधानादिति** । सहकारित्वाभिधानादित्यर्थः ।

**गु०दी०—** **ननु निमेषादिशब्दा** इत्यादिना उत्तरश्लोकसङ्गतिरभ्युपगमेनोक्ता । चक्षुर्निमेषस्य निद्रितजीवेषु प्रलयेऽपि सत्त्वेनादिसृष्टौ तस्यैव जन्मकथनायोगात् । निमिषत्यत्रेति व्युत्पत्त्या निमेषपरिमितः काल एव गृह्यते 'कला मुहूर्ताः काष्ठाश्चे'त्युत्तरत्र कालावयववाचकशब्दपंक्तौ प्रागपि कालस्यैव ग्राह्यत्वाच्च । अहोरात्रपदेन च तत्परिमितस्त्रिंशत्त्रिंशद्घटिकात्मकः काल एव गृह्यते । अत उक्तार्थे स्मृतिं चाहेत्येव सङ्गतिः । श्रुतिस्मृत्योरैकार्थ्यायोदीरणमपि जन्मैव । स्थितस्य **प्रेरणम्** ईरणम् । उत्पाद्य प्रेरणमुदीरणमित्यर्थभेदाच्च ।

**यादु०— ननु निमेषादिशब्दा इति** । निमेषशब्दोऽक्षिपक्ष्मसंयोगस्यैव वाचकः । काष्ठाकलादिशब्दा अपि तरणिपरिस्पन्दविशेषाणामेव वाचकाः । तद्द्वारैव तत्तदुपाध्यवच्छिन्नकालाभिधायिनो न साक्षादित्यर्थः । **अस्येश्वरस्येति** । भागवतवाक्यरूपा वेदव्यासस्य वागस्तीत्यर्थः । अनुव्याख्यानानुसारेणाह **कालाख्यामिति** । **सहकारिशक्तिमिति** । सहकारिरूपां शक्तिमित्यर्थः । तथा च अत्र शक्तिशब्दः सहकारिपर इति भावः । **शक्तित्वाभिधानादिति** । सहकारित्वाभिधानादित्यर्थः । उपाधीनां तु जगदन्तःपातिनां न जगत्सृष्टौ सहकारित्वमिति भावः । **नार्थान्तरेति** । पूर्ववदक्षिपक्ष्मसंयोगाद्युपाधिरूपार्थान्तरकल्पनावकाशो नेत्यर्थः ।

**श्रीनिधि०— अक्षिपक्ष्मसंयोगादीति** । अक्षिणः पक्ष्मणी अक्षपक्ष्मणी तयोः संयोगः इत्यर्थः । **न साक्षात्कालाभिधायिन इति** । अन्यप्रतीतिमजनयन्त एव कालाभिधायिनो नेत्यर्थः । शक्यतेऽनेनेति शक्तिः तत्त्वं चात्र साधनत्वेनैव विवक्षितं न सामर्थ्यत्वेनेत्याह **सहकारिशक्तिमिति** । सहकारिरूपां शक्तिमित्यर्थः । एवं च कालाख्यं साधनं जनयन्निति फलितार्थ उक्तो भवति । कालात्मिकामित्यनेन कालेन तादात्म्यापन्नं वा कालाधीनं वा किञ्चिदिति प्रतीयते। एवञ्च कालस्यैवोत्पत्तिरित्यत्रेदं प्रमाणं न स्यादित्यत आह **कालाख्यामिति**।

**शे०वा०— नन्विति** । निमेषशब्दोऽक्षिपक्ष्मसंयोगस्यैव वाचकः । काष्ठाकलादिशब्दा अपि तरणिपरिस्पन्दविशेषाणामेव वाचकाः । तद्द्वारैव तत्तदुपाध्यवच्छिन्नकालाभिधायिनो, न तु साक्षादित्यर्थः । अनुव्याख्यानानुसारेणोक्तं **कालाख्यामिति** । **सहकारिशक्तिमिति** । सहकारिरूपां शक्तिमित्यर्थः । तथा च अत्र शक्तिशब्दः सहकारिपर इत्युक्तं भवति । **कालशब्दादिति** । निमेषादिशब्दानामिव कालशब्दस्य तदवाचकत्वादिति भावः । **शक्तित्वाभिधानादिति** । सहकारित्वाभिधानादित्यर्थः । उपाधीनां तु जगदन्तःपातित्वान्नेश्वरकर्तृकजगत्सृष्टौ सहकारित्वमिति भावः । **नार्थान्तरेति** । पूर्ववदक्षिपक्ष्मसंयोगाद्युपाधिरूपार्थान्तरकल्पनावकाशो नेत्यर्थः ।

**वा०र०—** काष्ठादिस्वरूपवात्स्यायनभाष्याद्यनुसारेण ....... । **तदवाचकत्वादिति** । अर्थान्तरेत्युत्तरप्रतीकोपादनाद्यवसरे अक्षिपक्ष्मेत्यादिना अर्थान्तरस्य प्रदर्शनात् बुद्धिसन्निहितमर्थान्तरं तदिति परामृश्यत इति ज्ञेयम् ।

**स०व्र०— नार्थान्तरेति** । निमेषादिशब्दानामक्षिपक्ष्मसंयोगादिवाचित्ववत् कालशब्दस्य तदवाचकत्वादिति भावः ।

**विट्ठल०— ननु निमेषादिशब्दा इति** । आदिपदेन कलाकाष्टादिग्रहणम् । पक्ष्मसंयोगादीत्यादिशब्देन तरणिपरिस्पन्दविशेषाणां ग्रहणम् । **न साक्षादिति** । उक्तोपाध्यवच्छिन्नतयैव कालाभिधायिनो न साक्षा-

दित्यर्थः । **नार्थान्तरकल्पनावकाश इति** । पक्ष्मचलनाद्युपाधिरूपार्थान्तरे कालशब्दानुपपत्तेः शक्तिपदोक्त-सहकारित्वायोगाच्चेत्यर्थः ।

**॥ इति 'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः' इत्यादि श्रुतिप्रामाण्यम् ॥**
**॥ इति कालविशेषाणां परमेश्वराज्जन्मनि श्रुतिप्रामाण्यम् ॥**

* * *

**॥ अथ कालादिभेदानां निरन्तरप्रवाहतयाऽनित्यत्वे अन्ते कालस्योत्पत्तौ विरोधाभावोऽपि ॥**

३२७ **सु०**— "स्यादेतत् । कालस्तावत्सर्वोत्पत्तिमतां निमित्तम् । न च कालस्योत्पत्तौ कालान्तरमस्ति । तत्कथं तस्योत्पत्तिः ॥ पूर्वकालः परकालस्य निमित्तमिति चेन्न, 'इदानीं जातः', 'तदानीं जातः' इत्यधिकरणतया कालस्य कारणतावधारणात् । अधिकरणस्य कार्योत्पत्तिसमानकालीनताया 'गेहे जातः', 'गोष्ठे जातः' इत्यादौ निश्चितत्वात्" इत्यत आह **कालस्येति** ।

## अनु०— कालस्य कालगत्वेन न विरोधोऽपि कश्चन ।

**कालस्य** उत्पत्त्यङ्गीकारे न केवलं साधकसद्भावः, किन्तु **कश्चन विरोधोऽपि न** अस्तीति योजना । एतच्च प्रपञ्चयिष्यते ।

**परि०**— कथमनेन स्यादेतदित्यादिना कृतचोद्यस्य निरास इत्यत आह **एतच्च प्रपञ्च-यिष्यत इति** । 'कालस्य कालगत्वेने'त्युक्तं स्वगता इत्यादिनानुपदमेवेति भावः ।

**यादु०**— निश्चितत्वादित्यस्यानन्तरं पूर्वकालश्च न कार्योत्पत्तिसमानकालीन इति शेषः । ननु कालस्य कालगत्वोक्तिमात्रेण कथमुक्तशङ्कापरिहार आत्माश्रयप्रसङ्गश्चाधिक इत्यत आह **एतच्चेति** । 'ईशो देशश्च कालश्च स्वगता एव सर्वदे'त्यनुव्याख्याव्याख्यावसरे पूर्वकालीनस्याधिकरणत्वाभावेऽपि कारणत्वं, प्रामाणिकत्वान्नात्मा-श्रयत्वमित्यादि प्रपञ्चयिष्यत इत्यर्थः ।

**कं०रा०**— **अधिकरणस्य चेति** । पूर्वकालस्य चोत्तरकालोत्पत्तिसमकालीनत्वाभावान्नाधिकरणत्व-सम्भव इति भावः ।

**श्रीनिधि०— एतच्च प्रपञ्चयिष्यत इति** । 'ईशो देशश्च कालश्चे'त्यादौ उक्तशङ्कासमाधानं यथा भवति तथेत्यर्थः ।

**शे०वा०—** निश्चितत्वादित्यनन्तरं पूर्वकालश्च न परकालरूपकार्योत्पत्तिसमानकालीन इति शेषः । ननु कालः किं स्वगत इत्यभिमतं, किंवा कालान्तरगत इति । नाद्यः स्वस्कन्धारोहणवद्विरुद्धत्वात् । नान्त्यः तदभावात् । भावे वा कालान्तरसृष्टिवैयर्थ्यात् । तस्याप्युत्पत्तौ कालान्तराङ्गीकारप्रसङ्गादित्यत आह **एतच्चेति** । 'ईशो देशश्च कालश्चे'त्यादिनेति शेषः । ननु कालस्य कालगत्वोक्तिमात्रेण कथमुक्तशङ्कापरिहार आत्माश्रयत्व-प्रसङ्गश्चाधिक इत्यत आह **एतच्चेति** । 'ईशो देशश्च कालश्च स्वगता एव सर्वदे'त्यनुव्याख्याव्याख्यानावसरे पूर्वकालस्याधिकरणत्वाभावेऽपि कारणत्वम्, प्रामाणिकत्वान्नात्माश्रयत्वमित्यादि प्रपञ्चयिष्यत इत्यर्थ इति केचित् ।

**स०व्र०— एतच्च प्रपञ्चयिष्यत इति** । 'ईशो देशश्च कालश्च स्वगता एव सर्वदा' इत्यादिनेति शेषः ।

**विठ्ठल०— निश्चितत्वात्** इत्यनन्तरं पूर्वकालश्च नोत्तरकालरूपकार्योत्पत्तिसमानकालीन इति शेषो ज्ञातव्यः । ननु कालस्य कालगत्वे आत्माश्रयप्रसङ्गः तथापि कथमुक्तशङ्कापरिहार इत्यत आह **एतच्चेति** । 'ईशो देशश्च कालश्चे'त्यत्र अनुपदमेव तस्यैव कालस्य स्वं प्रत्यधिकरणतायाः प्रामाणिकत्वादात्माश्रयदोषाभावश्चेति वक्ष्यत इत्यर्थः ।

**॥ इति कालस्योत्पत्तौ विरोधाभावोऽपि ॥**
**॥ इति कालादिभेदानां निरन्तरप्रवाहतया अनित्यत्वम् ॥**
**॥ इति अस्मन्मते कालेच्छादेः स्वभावत एव भेदाभ्युपगमात् नैतद्दोषावकाशः (स्वमते कालविशेषभावाभावप्रयुक्तः सृष्ट्यादेः समयनियमः) ॥**

* * *

**॥ अथ कालेच्छादेर्विभागाभावनिरासे ततः प्रकारान्तरेण सृष्ट्यादेः समयनियमसमर्थनम् (सदातनीयेश्वरेच्छायाः असङ्ख्यातविशेषवत्त्वात् तत्तद्व्यक्त्यव्यक्तिप्रयुक्तः सृष्ट्यादेः समयनियमः) ॥**

३२८ **सु०—** एवं स्वमते कालविशेषभावाभावप्रयुक्तः सृष्ट्यादेः समयनियम इति समर्थितम् । प्रकारान्तरेण तं समर्थयते **असङ्ख्यातेति** ।

## अनु०— असङ्ख्यातविशेषत्वादिच्छाया अपि सर्वदा ।

**सर्वदा विद्यमानाया इति शेषः । सर्वदा विद्यमानाया अपि ईश्वरेच्छायाः शक्ति-व्यक्तिरूपावस्थितसिसृक्षात्वादि-असङ्ख्यातविशेष(वत्त्वा)त्वात् तद्व्यक्त्यव्यक्तिप्रयुक्तः सृष्ट्यादेः समनियमो युज्यत इत्यर्थः । यद्यपि कालभेदमात्रेण कृतसमाधानमेतत् । काल-विशेषे स्रक्ष्यामीत्येवंरूपत्वाद्भगवदिच्छाया न मोघत्वमापद्यते, तथाऽपि वस्तुस्थितिरियं दर्शिता वेदितव्या ।**

**परि०— शक्तिव्यक्तिरूपावस्थितेति** । शक्तिव्यक्तिस्वरूपं च 'अत्ता चराचरे'ति नये सम्यगुक्तमिति भावः ।

**वं०प०—** ननु नैवं समाधानं कर्तुं शक्यम् । ईश्वरेच्छाया नित्यत्वेन सद्भावेऽपि सृष्ट्यादिरूपकाल-विशेषभावेन सा मोघा स्यादित्यत आह **कालविशेषे इति** ।

**श्रीनिधि०— शक्तिव्यक्तिरूपावस्थितेति** । शक्तिव्यक्तिरूपेणावस्थितेत्यर्थः । अत्र सिसृक्षत्वादि-रूपेच्छाकाररूपैव शक्तिव्यक्ति न त्विच्छायाः । 'नित्यव्यक्ता हरेर्गुणा' इति प्रमाणविरोधापत्तेरिति द्रष्टव्यम् । ननु कालभेदमात्रेण सृष्ट्यादिव्यवस्थासमाधानेऽपि ईश्वरेच्छाया मोघत्वपरिहारार्थं उक्तविशेषोऽङ्गीकार्य एव । तस्याः काले भवत्वित्येवमाकारत्वात् । तथा च कथं वस्तुस्थितिरियमुक्तेत्युच्यत इत्यत आह **कालविशेषे स्रक्ष्यामी-त्येवंरूपत्वादिति** ।

**शे०वा०—** नन्विच्छाया असङ्ख्यातविशेषत्ववर्णनमनर्थकम् । न च सृष्टिप्रलयसमयनियमसमर्थनार्थं तदिति वाच्यम् । कालविशेषभावाभावाभ्यां तन्नियमस्य समर्थितत्वादित्यतः प्रकारान्तरेण समयनियमसमर्थनार्थ-त्वादस्य न वैयर्थ्यमिति भावेन तत्परतयोत्तरग्रन्थं योजयति **एवमिति** । नन्वनेन सर्वदेच्छाया असङ्ख्यात-विशेषत्वमुच्यते । ततश्चोक्तनियमानुपपत्तिरेव दृढीकृता स्यादित्यतो नात्र यथाश्रुतसम्बन्धः, किन्त्वन्यथैवेत्यतो नानुपपत्तिरिति भावेन साकाङ्क्षत्वप्रयुक्तवाक्याभासत्वमपेक्षितपूरणेन परिहरन्नेवोक्तनियमसमर्थनपरतया भाष्यं व्याचष्टे **सर्वदेत्यादिना** ।

**विठ्ठल०—** ननु विशेषकाल एवैतत्सृष्ट्यादीच्छा सदातनेत्यत्र कालविशेषभावाभावप्रयुक्तसमयनियम इत्यनेनैवास्मन्मते समाधानस्य लब्धत्वेनात्र पुनराक्षेपप्रसक्त्यभावात् किमर्थं प्रकारान्तरेण समर्थनम् । न च वाच्यं भगवदिच्छासद्भावेऽपि कालविशेषाभावेन कार्याभावे तस्य मोघत्वं स्यादित्याशङ्कावारणाय इदं समाधानमिति । भगवदिच्छायास्तदानीं स्रक्ष्य इत्यादि कालविशेषघटितप्रकारकत्वाभ्युपगमेन मोघत्वाप्रसक्तेः । न च काल-विशेषसापेक्षत्वे भगवदिच्छास्वातन्त्र्यहानिरिति वाच्यम् । ये तानपेक्ष्यैव फलदर्शनीत्यस्यैव सङ्कल्प इति स्वतन्त्रता नास्यापगच्छेदित्यन्यत्र समाहितत्वात् । अतः कृतसमाधानत्वादत्र न प्रकारान्तरं वक्तव्यमित्याशङ्क्य

कालाद्यविशेषितानन्तविशेषाः ईश्वरेच्छायां वर्तते किन्तु यदा न तदा नांस्रक्ष्या इत्याद्याकारविशेषा व्यक्ताः न तदा सृष्ट्यादिकार्यं भवति । यदा तु ते आकाराः व्यज्यन्ते तदा भवतीति समयनियमो युज्यत इति न तु अविशेषप्रदर्शनोक्तिरिति समाधत्ते **यद्यपीत्यादिना** ।

**।। इति कालेच्छादेर्विभागाभावनिरासे ततः प्रकारान्तरेण सृष्ट्यादेः समयनियमसमर्थनम्**
**(सदातनीयेश्वरेच्छायाः असङ्ख्यातविशेषवत्त्वात् तत्तद्व्यक्त्यन्यक्तिप्रयुक्तः सृष्ट्यादेः समयनियमः) ।।**

* * *

**।। अथ कालेच्छादेर्विभागाभावनिरासे अन्ते उक्तार्थस्य सप्रमाणं विवरणम् ।।**
**।। अथ तत्रादौ ईशः, अव्याकृताकाशः, कालश्च सर्वदा स्वगता एव ।।**

३२९ **सु०—** " 'कालस्य कालगत्वेने'त्युक्तं, तत्र किं कालः स्वगतः किं वा कालान्तरगतः । नाद्यः, स्वस्कन्धारोहणवद्विरुद्धत्वात् । न द्वितीयः, तदभावात्; भावे वा कालान्तरसृष्टिवैयर्थ्यात्, तस्याप्युत्पत्तौ कालान्तराङ्गीकारप्रसङ्गात्" इत्यतः सप्रमाणकमुक्तं विवृणोति **ईश इति** ।

## अनु०— ईशो देशश्च कालश्च स्वगता एव सर्वदा ।

**देश इति अव्याकृताकाशाभिधानम् ।**

**वं०प०— भावे वेति** । कालान्तरस्य सत्त्वे तेनैव सृष्ट्याद्युपपत्तौ तस्मिन्कालान्तरे एतत्कालसृष्टिव्यर्थेत्यर्थः । **तस्यापीति** । अधिकरणीभूतकालान्तरस्यापीत्यर्थः । **कालान्तरेति** । तथा चानवस्थेति भावः ।

**कं०रा०— भावे वेति** । कालान्तरस्य भावे वा कालान्तरसृष्ट्यङ्गीकारस्य वैयर्थ्यात् विरुद्धार्थत्वादनिष्टापादकत्वान्न तत्सृष्ट्यङ्गीकारो युक्तः । तथा च सर्वस्यापि कालस्य परमेश्वराज्जन्म इति यदुक्तं तदयुक्तमिति भावः । कथं कालान्तरसृष्ट्यङ्गीकारस्यानिष्टापादकत्वमित्यत आह **तस्येति** । कालान्तरस्याप्युत्पत्तावङ्गीक्रियमाणायां तदधिकरणत्वेन कालान्तरप्रसङ्गादित्यर्थः ।

**श्रीनिधि०—** कालान्तरं तर्हि मास्त्वित्यत आह **तस्यापीति** । कालः सर्वोऽप्युत्पत्तिमानिति सिद्धान्तः । उत्पत्तिश्च काल एव स्वस्य च स्वगतत्वं विरुद्धत्वमिति कालान्तरं अङ्गीकार्यमिति भावः । न च इष्टापत्तिः । तदभावादेवेति पूर्ववदेव ऊह्यमिति ।

शे०वा०— कालान्तराङ्गीकारप्रसङ्गादिति । ततश्चानवस्था स्यादिति भावः ।

विठ्ठल०— तस्यापीति । अधिकरणत्वेनोक्तकालेऽस्यापीत्यर्थः ।

**॥ इति ईशः, अव्याकृताकाशः, कालश्च सर्वदा स्वगता एव ॥**

* * *

**॥ अथ ततः 'स्वगताः' इत्युक्त्या देशकालयोः स्वातन्त्र्यशङ्कावारणम् ॥**

३३० सु०— 'स्वगताः' इत्युक्त्या प्राप्तां देशकालयोः स्वातन्त्र्यशङ्कां वारयति **ईशाधीनाविति** ।

अनु०— ईशाधीनौ च तौ नित्यं तदाधारौ च तद्गतौ ।
इति श्रुतिरपि प्राह काले स्वोद्दिष्ट एव तु ।
तत्कालसृष्टिमेवातो वाञ्छतीशः सदैव हि ।
स्यात्कालः स तदैवेति कालस्य स्वगतत्वतः ॥

विशेषणत्रयेण सत्ताप्रतीतिप्रवृत्तीनां परमेश्वरायत्तत्वमुच्यते । **श्रुतिरपीति** साक्षिणं समुच्चिनोति । यतः कालस्य स्वगतत्वं श्रुतिः प्राह साक्षिणा च सिद्धम्, **अतः कालस्य स्वगतत्वतः स कालस्तदैव स्यादितीशः सदैव स्वोद्दिष्ट एव काले तत्तत्कालसृष्टिमेव वाञ्छति** इत्यन्वयः ।

परि०— तत्तत्कालसृष्टिमिति । तत्तत्कालसृष्टिगोचरमित्यर्थः ।

यादु०— सत्ताप्रवृत्तीति । अनेनेशाधीनावीशाधीनसत्ताकौ, स आधारः प्रवर्तको ययोस्तौ तदाधारौ, तस्माद्गतं गतिर्ज्ञानं ययोस्तौ तद्गतावित्यनुव्याख्यानयोजनां सूचयति ।

वं०प०— स्वोद्दिष्टे स्वसङ्कल्पिते ।

कं०रा०— विशेषणत्रयेणेति । ईशाधीनौ तदाधारौ तद्गताविति विशेषणत्रयेण देशकालयोः सत्ताप्रतीतिप्रवृत्तीनां परमेश्वरायत्तत्वमुच्यत इत्यर्थः ।

**श्रीनिधि०— विशेषणत्रयेणेति** । ईशाधीनावित्यनेन सत्तायास्तदधीनत्व-तद्गतावित्यनेन तद्विषयक-प्रतीतेः । तेन गतावपगतौ । गत्यर्थानां अवगत्यर्थत्वात् । तदाधारावित्यनेन प्रवृत्तेरिति द्रष्टव्यम् । अनयोः प्रवृत्तिर्नाम तत्तत्कार्योन्मुखं द्रष्टव्यम् ।

**शे०वा०— स्वातन्त्र्यशङ्कामिति** । 'स्वगता' इति स्वाश्रयत्वोक्त्या आश्रयान्तरनैरपेक्ष्यसूचनात् स्वातन्त्र्यप्राप्तिरिति भावः । **विशेषणत्रयेणेति** । ईशाधीनाविति विशेषणेन सत्तायाः, तदाधारावित्यनेन प्रवृत्तेस्तद्गतावित्यनेन प्रतीतेः, परमेश्वरायत्तत्वमुच्यत इति विवेकोऽत्रानुसन्धेयः । अनेनेशाधीनौ ईशाधीन-सत्ताकौ । सः आधारः प्रवर्तको ययोस्तौ तदाधारौ । तस्माद्गतं गतिर्ज्ञानं ययोस्तौ तद्गतावित्यनुव्याख्यानयोजनां सूचयति ।

**वा०र०— तदाधारावित्यनेन प्रवृत्तेरिति** । तस्य परमात्मन आधारावित्युक्ते परमात्मा तत्स्थः सन् तत्प्रवर्तयतीति गम्यत इति भावः । **तद्गतावित्यनेनेति** । अनेन तयोराधेयत्वे उक्ते किञ्चिदाधारस्थितस्यैवाधेय-प्रतीतिरन्यथा नास्तीति प्रतीतिकारणत्वमाधारस्येति सूचितम् । मूले सत्ताप्रतीतिप्रवृत्तीनामित्युक्तिः 'अन्यत्रा-भावाच्च न तृणादिवदि'त्यधिकरणीय सत्ताप्रधानेत्यनुव्याख्यानमूलटीकाप्रपञ्चेऽस्माभिरुपपादिता । यत्त्वन्यथा-ख्यातौ स आधार इत्यादिनोपपादितम् । तत्तु आधारादिपदस्य प्रवर्तकत्वाद्यर्थत्वं बहुव्रीहिश्चाश्रयणीय इत्युपे-क्ष्यम् ।

**विठ्ठल०— सत्ताप्रतीतीति** । अनेनेशाधीनौ तदधीनसत्ताकौ स आधारः प्रवर्तको ययोस्तौ तदाधारौ तस्माद्गतिर्ज्ञानं ययोस्तौ तद्गताविति योजनोक्ता भवतीति ज्ञेयम् ।

**॥ इति 'स्वगताः' इत्युक्त्या देशकालयोः स्वातन्त्र्यशङ्कावारणम् ॥**

* * *

**॥ अथ च ततः उक्तार्थाभिप्रायः (कालस्योत्पत्तौ न काचिदनुपपत्तिः) ॥**

**३३१ सु०— एतदुक्तं भवति । कालातिरिक्तकार्याणामेव कालोऽधिकरणतया कारणं, न कालस्य । केवलं, 'श्वो घटं स्रष्टाऽस्मी'तिवत् कालसृष्टिं वाञ्छतः परमेश्वरस्याधि-करणतयोद्देश्यः कालः क इति प्रश्नोऽवशिष्यते । तत्र यः सृज्यः स एवेत्युत्तरम् । न हि सृज्यस्य प्राक् सत्त्वमस्ति, येनोद्देश्यत्वं सत्त्वमपेक्षेत । अधिकरणाधिकर्तव्यता चैकस्यैव श्रुत्यादिसिद्धा विशेषबलाच्चोपपद्यते । अतो न कालस्योत्पत्तौ काचिदनुपपत्तिरिति ।**

**परि०**— ननु स्यादेतदित्यादिना कृतचोद्यस्य प्रपञ्चयिष्यत इति समाधिरुक्तः । तत्कथमनेन प्रपञ्चनेन समाधिः प्राप्त इत्यत आह **एतदुक्तमिति** । **न तत्कालस्येति** । तथा च तस्य पूर्वकाल एव कारणं भविष्यतीति भावः । तर्हि स्वगतत्वोक्तेः क्वोपयोग इत्यत आह **केवलमिति** । **स्रष्टाऽस्मीति** । अनद्यतने लुडिति भविष्यदनद्यतने लुटोऽभिधानादिति योगात् स्रष्टाऽस्मीत्युक्तम् ।

**यादु०**— **कालातिरिक्तेति** । तथा च पूर्वकालस्योत्तरकालं प्रत्यधिकरणत्वाभावेऽपि कारणत्वमस्त्येवेति भावः । नन्वेवं मूले कालस्य स्वगतत्वं किमर्थमुक्तमित्यतः तत्सङ्गमयितुमाह **केवलं श्च इत्यादिना** । ननु दृष्टान्तदार्ष्टान्तिकयोर्भविष्यत्कालस्य कथमुद्देश्यत्वम् । तस्य प्रागसत्त्वादित्यत आह **न हि सृज्यस्येति** । विधेयसमकालत्वं ह्युद्देश्यस्य वक्तव्यम् । अत्र च विधेयस्य सृज्यस्य घटस्य कालस्य वा प्राक् सत्त्वं न ह्यस्ति । येनोद्देश्यस्यापि भविष्यत्कालस्य सत्त्वमपेक्षितं स्यादित्यर्थः ।

**कं०रा०**— **अधिकरणतयेति** । सृज्यकालाधिकरणतयेत्यर्थः । **श्रुत्यादिसिद्धेति** । 'ईशो देशश्च कालश्च स्वगता एव सर्वदे'ति श्रुत्या साक्षिणा च सिद्धेत्यर्थः । ननु श्रुत्यादिसिद्धाप्येकस्यैव कालस्याधिकरणाधिकर्तव्यता कथमुपपाद्यतां भेदनियम्यत्वात् तस्या इत्यत आह **विशेषबलादिति** । भेदप्रतिनिधिविशेषबलादुपपद्यते चेत्यर्थः ।

**श्रीनिधि०**— इदानीं जात इत्यधिकरणतया कारणत्वावधारणादेकस्य चाधिकरणाधिकर्तव्यता विरुद्धेत्युक्तम्, तस्यात्र समाधानं न दृश्यते । 'तत्कालसृष्टिमेवात' इत्यधिकं च किञ्चिद् दृश्यते इत्यतोऽभिप्रायमाह **एतदुक्तं भवतीति** । **न कालस्येति** । इदानीं कालो जात इति प्रतीत्यनुसिद्ध्यैव । सिद्धौ वा उत्पन्नस्य स्वाधारतामात्रगोचरैव न तु कारणत्वमपि विषयीकरोति । कारणस्य पूर्वभावित्वनियमात् । अन्यथा घटस्यापि स्वसामग्रीप्रवेशापत्तिः । नन्वसतस्तस्य कथमुद्देश्यत्वमित्यत आह **न हि सृज्यस्येति** । सृज्यस्यैवोद्देश्यत्वमिति प्रमितत्वेनासत्त्वमप्रयोजकमिति भावः । अन्यथा घटादिपदार्थानां उत्पत्तिर्न स्यात् । घटं करिष्यामीत्युद्दिश्य घटः कार्यः । असत उद्देश्यत्वं च त्वयैव त्याजितमिति । अत एव येन उद्देश्यत्वमिति सामान्येनोक्तम् । अधिकरणतयोद्देश्यत्वं सत्त्वमपेक्षत इति चेन्न । काले असत्यपि तथाभावस्य साक्ष्यागमसिद्धत्वात् । यो घटः करिष्यते तत्र जलं पूरयिष्यति इत्यन्यत्रापि दर्शनाच्चेति सन्तोष्टव्यमायुष्मतः । ननु यथा घटस्येव स्वकारणत्वं विरुद्धमिति भवद्भिः उच्यते । एवं मयाऽपि तद्वदेव स्वाधिकरणत्वं विरुद्धमित्युच्यते । तथा च कथं तदङ्गीकार इति चेत् किं प्रमाणाभावादङ्गीकारो अनुचित इत्युच्यते, उत कारकाभावात् । नोभयमपीत्याह **अधिकरणाधिकर्तव्यता चेति** ।

**शे०वा०**— ननु तथाऽपि स्यादेतदिति शङ्कायाः कथमनेन परिहार इत्यत आह **इदमुक्तं भवतीति**। तथा च स्वव्यतिरिक्तसर्वोत्पत्तिमन्निमित्तत्वात् कालस्य न तदुत्पत्तावपि कालापेक्षेति भावः । केचित्तु **काला-**

**तिरिक्तेति** । तथा च पूर्वकालस्योत्तरकालं प्रत्यधिकरणत्वाभावेऽपि कारणत्वमस्त्येवेति भावः' इत्यप्याहुः । किमर्थं तर्हि मूले कालस्य स्वगतत्ववर्णनमित्यतः शङ्कान्तरपरिहारार्थत्वात् तस्य नानर्थक्यमिति भावेन तन्निरसनीयां शङ्कामाह **केवलमित्यादिना** । ननु सृज्यस्य कालस्य प्रागसतः कथमधिकारतयोद्देश्यत्वमित्यतः किमत्र यदुद्देश्यं तत्प्राक् सदेवेति व्याप्तेः प्रागसत्त्वे कथमधिकरणतयोद्देश्यत्वमित्यभिमतं, किंवा सृज्यस्याधिकर्तव्यत्वादधिकरणाधिकर्तव्ययोश्च लोके भेदस्यैव दृष्टत्वात् कथमेकस्यैवाधिकरणाधिकर्तव्यत्वमिति विकल्पं मनसि निधाय आद्यं दूषयति **न हीति** । सृज्यस्य घटस्योद्देश्यत्वेऽपि प्राक् सत्त्वाभावेनोक्तव्याप्तेरभावात् प्रागसतोऽपि सृज्यकालस्योद्देश्यतोपपद्यत इति भावः । द्वितीयेऽपि कथमिति किं प्रमाणप्रश्न उतोपपादकप्रश्न इति विकल्पद्वयं मनसि निधायाद्यस्योत्तरमाह **श्रुत्यादिसिद्धेति** । आदिपदेन साक्षिपरिग्रहः। द्वितीयस्योत्तरमाह **विशेषबलाच्चेति**।

**वा०र०— कालातिरिक्तेति** मूलम् । ननु कालव्यतिरिक्तकार्यं प्रत्यपि कालस्य कारणत्वं न नियतपूर्ववृत्तित्वरूपम् । अधिकरणीभूतक्षणस्य कार्येण सहोत्पत्तिमत्त्वेन पूर्ववृत्तित्वासम्भवात् । किन्त्वधिकरणत्वमेव । तच्च कालव्यतिरिक्तं प्रतीव कालं प्रत्यप्यविशिष्टमेव तत्कथं कालव्यतिरिक्तानामेवेत्युच्यत इति चेदत्र वदन्ति । तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपकारणत्वस्यात्र विवक्षणेन कालातिरिक्तकार्यं प्रति भेदसापेक्षतद्व्यतिरेकेत्यादेः सत्त्वेऽपि कालस्य स्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वासम्भवेन काले तत्सम्भवो न तस्याभेदादिति । इदं पुनः संशोध्य टीकायामेव निक्षेप्यम् ।

**स०व्र०—** केवलमित्यस्य प्रश्नोऽवशिष्यत इत्यन्वयः । ननु सृज्यस्य कालस्य प्रागसतः कथमधिकरणतयोद्देश्यत्वमित्यतः किमत्र यदुद्देश्यं तत्प्राक्सदेवेति व्याप्तेः प्रागसत्त्वे कथमुद्देश्यत्वमित्यभिप्रायः, यद्वा सृज्यस्याधिकर्तव्यत्वात् अधिकरणाधिकर्तव्ययोश्च लोके भेदस्यैव दृष्टत्वात् कथमेकस्यैवाधिकरणत्वमधिकर्तव्यत्वं चेत्यभिप्राय इति विकल्पं मनसि निधायाद्यं दूषयति **न हि सृज्यस्य सत्त्वमस्ति, येनोद्देश्यत्वं सत्त्वमपेक्षेतेति** । सृज्यस्य घटस्योद्देश्यत्वे विद्यमानेऽपि प्राक् सत्त्वाभावेन यदुद्देश्यं तत्प्राक्सदिति व्याप्तेस्तत्र व्यभिचारेणासम्भवात् प्रागसतोऽप्युद्देश्यत्वोपपत्तिरिति भावः। द्वितीयं दूषयति **अधिकरणाधिकर्तव्यता चेति** ।

**विठ्ठल०—** ननु कालस्य कालं प्रति कारणत्वमङ्गीकृतं चेत्कालान्तरस्य कारणत्वे तदभावादित्युक्तदूषणाप्राप्तेः स्वस्यैव स्वकारणत्वं वक्तव्यमित्यात्माश्रयस्तदवस्थः । नाङ्गीकृतं चेत्स्वगतत्वोपपादनमसङ्गतमित्यत आह **एतदुक्तं भवतीति । कालोऽधिकरणतया कारणमिति** । तत्रापि न घटादिकार्यसृष्टेः सर्वकालस्य घटादिसृष्टिं प्रत्यधिकरणतया कारणत्वं, पूर्वकालस्य घटादिसृष्टिसमये अभावेनाधिकरणत्वानुपपत्तेः । किन्तु तदानीन्तनकालस्यैव तदासत्त्वेनाधिकरणतया कारणत्वं कालस्य सृष्टिसमये तु स्वसत्तालाभाभावेन स्वयमधिकरणतया कारणमित्यर्थः । स्वगतं किमर्थं मूलेऽभिधीयत इत्यत आह **केवलमिति** । ननु श्वः स्रष्टास्मीत्युद्देश्यस्य कालस्योद्देशसमये सत्ताभावात् कथमसतस्तस्योद्देशत्वमित्यत उद्देशत्वं सत्त्वसापेक्षं तर्हि घटं स्रक्ष्यामीति सृज्यतयोद्देश्यत्वं न स्यात् । तर्हि सृज्यस्य घटादेः प्राक् सत्त्वमस्ति । किन्तु सृज्यताप्रकारकबुद्धिं प्रति

निरूपकत्वमात्रं तत्प्रागसतोऽपि सम्भवतीति प्रागेवोपपादितम् । तथा श्वस्तनकाले स्रक्ष्यामीत्युद्देश्यत्वमसतोऽपि सम्भवतीत्याशयेनाह **न हि सृज्यस्येति** । तथाप्यनुपपत्तिरेव एकस्य कालस्याधिकरणाधिकर्तव्यभावस्य स्वस्कन्धारोहणतद्विरुद्धतया उदितत्वादधिकरणाधिकर्तव्यतायाः भेदसापेक्षत्वाच्चेत्यतः प्रमितेऽर्थे नात्माश्रयो दोषः । तस्य तर्करूपत्वेन विपर्ययपर्यवसानाभावादङ्गविकलत्वात् । भेदप्रतिनिधिविशेषसद्भावेनोपपन्नत्वाच्चेत्याशयेनाह **अधिकरणेति** । ननु घटादिकार्याणामपि कालस्याधिकरणतया कारणत्वं नोपपद्यते । तथाहि तत्किं घटोत्पत्तेः पूर्वतनकालस्य कारणत्वं किं वा घटोत्पत्तिसमयभाविकालस्य । नाद्यः, तस्योत्पत्तिसमये अभावेनाधिकरणत्वाद्यनुपपत्तेः । न द्वितीयः, घटोत्पत्तिसमये भाविकालस्य तदानीमेव जायमानत्वेन प्राप्तसत्ताकत्वाभावेनाधिकरणत्वाद्यनुपपत्तेः तथा चोक्तमनुपपन्नमिति । सत्यम् । जायमानत्वं नाम सम्पद्यमानसत्तावत्त्वं तद्धटजनिसमयभाविकालस्याप्यस्ति । अतः प्राक्सिद्धसत्त्वाभावेऽपि सम्पद्यमानसत्तावत्त्वेनाधिकरणत्वं निमित्तकरणत्वं चोपपद्यत एव । ननु तर्ह्युत्पद्यमानकालस्याप्युत्पद्यमानकाल एवाधिकरणतया कारणमिति किं नोच्यते । स्वगतत्वस्य श्रुतिसिद्धत्वात् सविशेषणत्वाच्च आत्माश्रयादिदोषाप्रसक्तेः । तथा च न कालस्येति कथमुक्तमिति चेत् । मैवम् । यथा घटादेः कार्यस्य स्वभिन्न एव कालेऽधिकरणतया निमित्तकारणं न तथा कालस्येत्यभिप्रायेणैवात्र कारणता निषिध्यते । तथात्वे इदानीं जात इत्यधिकरणतया कालस्य कारणतावधारणादित्यादिना कालस्य स्वाधिकरणतया स्वनिमित्तत्वानुपपत्तिमाशङ्क्य तत्परिहारकतया 'कालस्य कालगतत्वेन न विरोधोऽपि कश्चने'ति वाक्यमवतार्य व्याख्याय एतच्च प्रपञ्चयिष्यत इत्युक्तम् । तत्र यदि सर्वात्मना स्वकारणतानिषेधः तर्हि कालस्य स्वकारणत्वनिषेधो वेति तत्रैव वक्तव्यम् । तदेव तत्र प्रपञ्चयिष्यत इति प्रतिज्ञाय अत्रोच्यत इति चेत् तर्हि तत्र स्वगतत्वोक्तिर्व्यर्था स्यात् । कालस्य काल एवाधिकरणमिति व्युत्पादनार्थं तत्र स्वगतत्वमिति चेत्तर्हि अङ्गीकृतं कारणत्वं घटाद्युत्पत्तावप्यधिकरणत्वातिरिक्तस्य निमित्तकारणत्वस्य काले अभावात् । ननु सत्तासम्बन्धो जनिः सत्ता च कालापेक्षा देशकालानपेक्षा न सत्ता क्वापि विद्यत इत्युक्तेः । नित्ये तु नित्यसत्ताप्रयोजकत्वमनित्ये तु तत्सम्पादकत्वम् । अतो घटादिसत्तासम्पादकत्वमेव कालस्य निमित्ततेति । तर्हि कालसत्तापि कालसम्पादितेति प्राप्तमेव कारणत्वम् । नन्वत्र स्वगता एव सर्वदेति स्वाधिकरणत्वमेवोक्तम् । न स्वसत्तानिर्वाहकत्वमिति चेत् तर्हि कालस्य सत्तैव न सिद्ध्यति । कालानपेक्ष्यसत्ताभावस्योक्तत्वात् । स देशः सर्वत्र पुरुषः स्वतन्त्रः कालनित्यतेत्यादिषु सबन्ध इति सर्वकालसत्तावत्त्वरूपनित्यत्वस्य कालसापेक्षतायाः प्रमितत्वाच्च । तर्हि केवलं श्वो घटमित्यादिवाक्ये कालस्य कालं प्रत्यधिकरणतामात्रव्युत्पादनं कथमिति चेत् । घटादिकं प्रतीव निमित्तकारणताभावपरत्वेन सावकाशत्वात् तस्य कालस्य कालोत्पत्तिं प्रत्यधिकरणत्वस्य तत्रैव स्पष्टं प्रतीतेश्चेति । तत्र विशेषस्तु रहस्यत्वान्नोच्यत इति ।

**॥ इति उक्तार्थाभिप्रायः (कालस्योत्पत्तौ न काचिदनुपपत्तिः) ॥**

* * *

३३२ **सु०—** यदुक्तं 'यदेश्वरेच्छा सिसृक्षाकारा व्यज्यते तदा महदादिसृष्टिर्भवति । यदा तु सञ्जिहीर्षारूपा सम्पद्यते तदा संहारो भवती'ति, तत्रेदं वैचित्र्यं किन्निमित्तमिति वाच्यम्; न च कालविशेषो निमित्तमिति युक्तम्, तस्येश्वरेच्छायत्तत्वात्; नापि पुरुषार्थायत्तम्, पारतन्त्र्यापत्तेरि'त्यत आह **स्वभावादेवेति** ।

## अनु०— स्वभावादेव हीच्छैषा

**एषा** विचित्रा । तस्मात्कालविशेषाणामीश्वराधीनत्वे नेतरेतराश्रयदोषापत्तिरिति **हि**शब्दार्थः ।

कुत एतदित्यत आह **देवस्येति** ।

## देवस्यैष इति श्रुतेः ।

एतदवगम्यत इति शेषः ।

**परि०— पुरुषार्थेति** । सृष्टिसंहारादेः कालभेदेनाव्यवस्थितत्वे पुरुषाणाम(प्य)र्थ्यमान-प्रयोजनासिद्धेस्तदर्थमेवं वैचित्र्यमुपेयमिति च नेत्यर्थः । इति श्रुतेरिति पञ्चम्याः अन्वयमाह **एतदवगम्यत इति शेष इति** ।

**यादु०— तस्येश्वरेच्छेति** । तथा चेतरेतराश्रयत्वापत्तिरिति भावः । **पुरुषार्थेति** । पुरुषप्रयोजनाधीनमित्यर्थः ।

**वं०प०— तस्येश्वरेच्छायत्तत्वादिति** । तथा सृष्टिसंहाररूपकालविशेषे प्राप्ते तदुपाधिकसिसृक्षा-सञ्जिहीर्षारूपेच्छाप्राप्तिः, तत्प्राप्तौ च तदायत्तकालविशेषप्राप्तिरित्यन्योन्याश्रय इति भावः । **नेतरेतराश्रयत्वमिति** । कालविशेषाणामौपाधिकत्वाङ्गीकार एवेतरेतराश्रयो, न स्वाभाविकानामीश्वराधीनत्व इत्यर्थः ।

**श्रीनिधि०— तस्येश्वरेच्छायत्तत्वादिति** । पारतन्त्र्यस्यापत्तेरप्युपलक्षणमिदम् ।

**शे०वा०— तस्येश्वरेच्छायत्तत्वादिति** । तथा चान्योन्याश्रय इति भावः । **पुरुषार्थायत्तं** पुरुष-प्रयोजनाधीनम् । **ईश्वराधीनत्वे** ईश्वरेच्छाधीनत्वे । **नेति** । ईश्वरेच्छायाः कालविशेषाधीनत्वाभावादिति भावः । साकाङ्क्षत्वप्रयुक्तवाक्याभासतानिरासायापेक्षितं पूरयति **एतदिति** । 'ज्ञापकश्चायमर्थो न कारक' इति न्यायं मनसि निधायोक्तं **अवगम्यत इति** ।

**वा०र०— मूले देवस्येतीति** । अयमेष इयमिच्छेति योजना अत्राभिमता, गीताभाष्यटीकायां तथा योजनात् । तत्र प्रवृत्तेरेव प्रकृतत्वात् तत्पूर्विका प्रवृत्तिरिति यावदित्यधिकमुक्तम् ।

**विट्ठल०— तस्येश्वरेच्छायत्तत्वादिति** । ततश्चेश्वरेच्छानिमित्तकः कालविशेषः । कालविशेष-निमित्तका चेश्वरेच्छेत्यन्योन्याश्रय इति भावः । **पुरुषार्थायत्तमिति** । पुरुषप्रयोजनाधीनमित्यर्थः ।

**॥ इति महदादिसृष्टिसंहारकालवैचित्र्यनिमित्तमीशस्वभाव एव ॥**

* * *

**॥ अथ च ततः स्वभावोऽपि ईशेच्छावश एव ॥**

३३३ **सु०— अपर आह 'किमनया कालादिवैचित्र्यकल्पनया, यावता कारणानां कार्याणां च स्वभावादेव समयनियमोपपत्तेः । अन्ततोऽपि हि स्वभाववादोऽभ्युपगन्तव्यः, ततो वरमादावेव स्वभाववादाभ्युपगमः' इति । अत आह स्वभावोऽपीति ।**

## • अनु०— स्वभावोऽपि परेशेच्छावश इत्युदितः पुरा ।

**पुरा 'चेतनानां विशेषो य' इत्यादौ । स्वभाववादमभ्युपगच्छताऽपि तन्नियामकतया ईश्वरः अङ्गीकार्यः, ततस्तत्रैकत्रैव स्वभावानुसरणे प्रमाणायत्ते अङ्गीकार्ये किमनेकत्र तद-भ्युपगमेनेति भावः ।**

**परि०—** 'पुरे'ति मूलानुवादः । **इत्यादाविति** । लिङ्गपादे 'अन्तर उपपत्तेरि'त्येतदनु-व्याख्याने ।

**वं०प०— कालादिवैचित्र्येति** । कालविशेषभावाभावप्रयुक्तः सृष्ट्यादेः समयनियम इति काले वैचित्र्यकल्पनयेत्यर्थः । आदिपदेनेच्छायामप्यवान्तरवैचित्र्यमङ्गीकृत्य तद्व्यक्त्यव्यक्तिप्रयुक्तसृष्ट्यादिसमयनियम

इति इच्छायामपि वैचित्र्यकल्पनया किमित्यर्थः । नन्वेवमकल्पने सर्वदा सृष्ट्यादिः स्यादित्युक्तदोष इत्यत आह **यावतेति** । कालविशेष एव सृष्टिर्भवति । कुतः । कारणस्य तदानीमेव कार्यजनकत्वस्वाभाव्यात् । कार्यस्य च तदानीमेवोत्पद्यमानत्वस्वाभाव्यादित्यर्थः । **अन्तत इति** । काले इच्छायां च वैचित्र्यविशेषमङ्गीकृत्यापि तत्र प्राप्तेतरेतराश्रयदोषपरिहाराय विशेषाणां स्वाभाविकत्वमेष्टव्यमित्यर्थः । **आदावेव** कालेच्छाद्यनङ्गीकृत्येत्यर्थः । **एकत्र** ईश्वरे, स्वाभाविकविशेषवतोऽपि कालस्येश्वराधीनत्वादेकत्र इत्युक्तम् । **अनेकत्र** कार्ये कारणे च । **तदिति** । स्वभावेत्यर्थः ।

**कं०रा०— चेतनानामिति** । 'चेतनानां विशेषो यः स्वभावोऽपीश्वरार्पित' इत्यादावित्यर्थः ।

**श्रीनिधि०— यावता** यतः । **तन्नियामकतया ईश्वरोऽङ्गीकार्य इति** । 'द्रव्यं कर्म च कालश्चे'ति प्रमाणानुसारेणेति भावः ।

**विट्ठल०— किमनयेति** । सृष्ट्यादिसमयनियमस्य कालवैचित्र्येश्वरेच्छावैचित्र्यकल्पनया किं प्रयोजनमित्यर्थः । स्वभावस्तादृश इति वादो युक्तिरहित इति जघन्य इत्यत आह **अन्ततोऽपीति** ।

**॥ इति स्वभावोऽपि ईशेच्छावश एव ॥**

* * *

**॥ अथ च तत्रान्ते 'नित्या अनित्याश्च ततः' इति श्रुतिरपि सर्वस्येश्वराधीनतामाह ॥**

३३४ **सु०— न केवलं पूर्वोक्तमेव प्रमाणं स्मर्तव्यम्, किन्तु प्रमाणान्तरमप्यस्तीत्याह नित्या इति ।**

## अनु०— नित्या अनित्याश्च ततस्तदधीना इति श्रुतिः ॥

**तत** इत्यस्य श्रुतावेव परामर्शविषयो द्रष्टव्यः । **श्रुतिः** सर्वस्येश्वराधीनतामाहेति शेषः ।

**परि०— न केवलं पूर्वोक्तमेव प्रमाणमिति** । तत्र मूलाभिमतं सुधोक्तं प्रमाणमित्यर्थः ।

**शे०वा०— न केवलं पूर्वोक्तमिति** । एतच्च 'चेतनानां विशेषो यः स्वभावोऽपीश्वरार्पित' इत्यनुव्याख्याव्याख्यानावसरे 'न तदस्ति विना यत्स्यान्मया भूतं चराचरमि'त्युदाहृतप्रमाणसिद्धत्वाभिप्रायेण बोध्यम् ॥

तत इत्यस्येति । तत इत्यस्य परामर्शस्य विषयः, श्रुतावेव द्रष्टव्य इति सम्बन्धः । एतच्छ्रुतिवाक्यापेक्षया पूर्वश्रुतौ प्रकृतस्य हेतोरेव तत इति परामर्शः । न त्वेतद्ग्रन्थे पूर्वप्रकृतस्येत्याशयः ।

वा०र०— इत्यनुव्याख्यानेति । अन्तराधिकरणीयेति शेषः ।

**॥ इति 'नित्या अनित्याश्च ततः' इति श्रुतिरपि सर्वस्येश्वराधीनतामाह ॥**

**॥ इति उक्तार्थस्य सप्रमाणं विवरणम् ॥**

**॥ इति कालेच्छादिविशेष एव सृष्ट्यादिहेतुः इति न तत्पक्षे कालेच्छादेर्विभागाभावः ॥**

**॥ इति कालविशेषे द्व्यणुकादिप्रक्रमेण महाभूतसृष्ट्यङ्गीकारे कार्यं सदा भवेत् ॥**

**॥ इति एतदधिकरणस्य चतुर्थसूत्र(ॐ नित्यमेव च भावात् ॐ)व्याख्यानम्**
**(वैशेषिकादिदर्शने अनुपपत्त्यन्तरदर्शनम्) ॥**

* * *

**॥ अथ उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतयाऽपाकरणे ततः एतदधिकरणस्य पञ्चमषष्ठ(ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ, ॐ उभयथा च दोषात् ॐ)सूत्रयोर्व्याख्यानम्**
**(वैशेषिकादिमते अनुपपत्त्यन्तरदर्शनम्) ॥**

**॥ अथ तत्र पार्थिवादीनां चतुर्विधानां परमाणूनां नित्यतानुपपत्तिः ॥**

**॥ अथ तत्रादौ तेषां रूपस्पर्शादिहेतुभ्यः तेषां परमाणूनामनित्यता अनुमेया ॥**

३३५ सु०— अनुपपत्त्यन्तरं वैशेषिकादिमते दर्शयत् **'ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ', 'ॐ उभयथा च दोषात् ॐ'** इति सूत्रद्वयं व्याचष्टे **रूपेति** ।

## अनु०— रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यता । अनुमेया

**परमाणोः** इति जात्यपेक्षमेकवचनम् ।

पार्थिवादीनां चतुर्विधानां परमाणूनां नित्यतामुपयन्ति वैशेषिकादयः । तदनुपपन्नम्; 'पार्थिवाः पाथसीयास्तैजसाश्च परमाणवोऽनित्या रूपवत्त्वात् पटवत्', यद्वा 'चतुर्विधा अप्यनित्याः स्पर्शवत्त्वात्पटवत्', एवं 'पार्थिवा आप्याश्चानित्या रसवत्त्वात्पटवत्', 'पार्थिवा अनित्या गन्धवत्त्वात् तद्वदेवे'त्याद्यनुमानविरुद्धत्वात् ।

न च सावयवत्वमुपाधिः, गुणादौ साध्याव्याप्तेः । न च द्रव्यत्वावच्छिन्ने साध्येऽस्योपाधित्वम्, यद्रूपादिमत्तत्सावयवमिति साधनव्यापकत्वात् । न च धर्मिग्राहकविरोधः, साक्षिणैव परमाणुसिद्धेरुक्तत्वात् ।

अनित्यत्वे च परमाणूनां न मूलकारणत्वसिद्धिः ।

यदि च रूपादिमन्तोऽपि परमाणवो नानित्यास्तदा घटादयोऽप्यनित्या न स्युरविशेषात्, तथा(च)ऽपि न परमाणूनां मूलकारणत्वम् । न चेश्वरे हेतूनां व्यभिचारः, भौतिकत्वेन विशेषणात् । तथाच वक्ष्यति 'भौतिकं त्वेव रूपादि व्याप्तं नाशेन नो मत' इति ।

**परि०— रूपादिमत्त्वाच्चेति** । 'रूपस्पर्शादिहेतुभ्य' इत्युक्तहेतून् पक्षभेदेन व्यनक्ति **पार्थिवा** इत्यादिना **गन्धवत्त्वात्** इत्यन्तेन । **न च धर्मिग्राहकेति** । 'पक्षीकर्तुमशक्यत्वादि'त्येतदवतारिकायां पूर्वोक्तं द्व्यणुकं सावयवं महद्द्रव्यारम्भकत्वात् त्र्यणुकादिवदिति यदनुमानं द्व्यणुकावयवरूपपरमाणुरूपधर्मिग्राहकं सावयवत्वे अनवस्थादिरूपबाधकोपेततया तन्निरवयवत्वग्राहकमानं, तद्विरोध इत्यर्थः । **उक्तत्वादिति** । 'यदि साक्षिमितं नैतन्नानुमा तत्र वर्तत' इत्यत्रोक्तत्वादित्यर्थः । तेन च सावयवत्वेनैव सिद्धेः इति भावः । अस्त्वनित्यत्वं ततश्च किमित्यत आह **अनित्यत्वे चेति** । अस्तु घटादीनां नित्यत्वं ततः को दोष इत्यत आह **तथाऽपीति** । घटादिनित्यत्वपक्षेऽपीत्यर्थः । तथा चेति पाठे घटादीनां नित्यत्वे सतीत्यर्थः । कार्यद्रव्यस्यैवाभावादिति भावः । एतेन अनित्यत्वे चेत्यादिना परमाणूनामनित्यत्वे घटादीनां नित्यत्वे चोभयथाप्यणूनां मूलकारणत्वाभावरूपदोषादिति सूत्रार्थ उक्तो भवति । **वक्ष्यतीति** । जैनमतनिरासप्रस्ताव इति ज्ञेयम् ।

**गु०दी०— भौतिकत्वेन विशेषणात्** इत्यत्र 'अल्पशक्तिरसार्वज्ञं देहहानिरपूर्णता । नाशश्चतुर्विधः प्रोक्त' इति वचनादल्पशक्त्यादिचतुर्विधनाशस्योपचितांशनाशस्य च सत्त्वान्मूलप्रकृतौ च न व्यभिचार इत्यपि ग्राह्यम् ।

**यादु०— न च धर्मिग्राहकेति** । अवयवावयविप्रसङ्गास्तावदनुभूयन्ते । स यदि निरवधिकः स्यात् तदा मेरुसर्षपयोस्तुल्यपरिमाणत्वं स्यात् । अनन्तद्रव्यारब्धत्वाविशेषात् । तस्मान्निरवयवं द्रव्यमवधिः स एव परमाणुरिति परमाणोर्निरवयवतयैव सिद्धेः, सावयवत्वाङ्गीकारे तद्विरोध इति नेत्यर्थः । **उक्तत्वादिति** । 'यदि साक्षिमितं नैतन्नानुमा तत्र वर्तत इत्यत्रे'ति शेषः । **तथाऽपीति** । घटादीनां नित्यत्वेऽपि इत्यर्थः । अनेन

उभयथा परमाणूनामनित्यत्वे तद्वद्घटादीनां नित्यत्वे च परमाणूनां मूलकारणत्वानुपपत्तिरिति दोषात् परमत-समञ्जसमिति सूत्रार्थ उक्तो भवति । यद्यप्ययमर्थो न मूले प्रतीयते, तथाऽप्यनुकूलतर्कस्य मूलेऽभिप्रेतत्वेनोक्त-रीत्या सूत्रार्थोऽप्यभिप्रेत एवेति ज्ञातव्यम् ।

**वं०प०— रूपवत्त्वादिति** । चतुर्णां पक्षीकारे भागासिद्धिप्रसङ्गात् त्रयाणां पक्षीकरणमिति ज्ञात-व्यम् । साक्षिणैवेत्यनन्तरं सावयवतयैवेति शेषः । परमाणूनां रूपादिमत्त्वेनानित्यत्वानुमित्या किं प्राप्तमत आह **अनित्यत्वे चेति** । अनुमानेऽप्रयोजकतामाशङ्क्यानुकूलतर्कमाह **यदि चेति** । रूपवत्त्वाविशेषाद्घटादेरनित्यता स्यादिति यावदित्यत्रापीष्टापत्तौ चोदितायां बाधकमाह **तथाऽपीति** । तथा च घटादिकमारभ्य द्व्यणुकादिपर्यन्तं कार्यतया सम्प्रतिपन्नमपि यदि नित्यमङ्गीक्रियते तर्हि परमाणोः किं प्रति कारणत्वं स्यात् कार्यस्यैवाभावात् । कारणत्वाभावे च मूलकारणत्वं दूरोत्सारितमिति भावः ।

**कं०रा०— न चेति** । द्व्यणुकं सावयवं कार्यत्वादित्याद्यनुमानेन यदा परमाणुसिद्धिः तदैव परमाणूनां नित्यत्वेन सिद्धत्वादनित्यत्वसाधकानुमानजातस्य धर्मिग्राहकानुमानविरोध इति न च, साक्षिणैव परमाणु-सिद्धेरुक्तत्वेनानुमानस्य धर्मिग्राहकत्वाभावादिति भावः । ननु मास्तु घटादीनामनित्यत्वाभावेऽपि न परमाणूनां मूलकारणत्वं सम्भवति घटादीन्प्रत्येव तन्मूलकारणत्वस्य वक्तव्यत्वादनित्यत्वरहितघटादीन्प्रति च तस्य वक्तु-मशक्यत्वादिति भावः । **ईश्वर इति** । ईश्वरस्य रूपादिमत्तायाः सिद्धान्तिनाङ्गीकृतत्वेन तत्र रूपवत्त्वादिहेतूनां सत्त्वेऽप्यनित्यत्वाभावाद्व्यभिचार इति भावः । **भौतिकत्वेनेति** । अभौतिकरूपादिमतीश्वरे भौतिकरूपवत्त्वा-द्यभावान्न व्यभिचार इति भावः ।

**श्रीनिधि०— रूपस्पर्शादिहेतुभ्य** इत्यत्र रूपवत्त्वं स्पर्शवत्त्वं रसवत्त्वं गन्धवत्त्वं च हेतुः । तत्र चतुर्विधानां पक्षीकारे आद्यहेतोर्भागासिद्धिः स्यात् । वायवीये रूपाभावात् । अतः पार्थिवाः पाथसीया इत्यादिना त्रयाणामेव पक्षीकरणं कृतम् । **पाथसीया** जलसम्बन्धिनः । **यद्वेति** । मूले हेतुकथनक्रमेण पक्षीकरणक्रमः । आदिपदगृहीतौ तत्र रसवत्त्वमधिकवृत्तीति तदनुसारेणादौ पक्षं प्रदर्शयति **पार्थिवा आप्याश्चेति** । **यद्रूपादि-मत्तत्सावयवमितीति** । इति व्याप्तेरित्यर्थः । **न च धर्मिग्राहकविरोध इति** । अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यत्वात् महत्त्वपरिमाणतारतम्यवत् इति परमाणुग्राहकविरोधोक्तव्याप्तिग्राहकस्येत्यर्थः । तदवयवस्य तदपेक्षया अल्पपरिमाणावश्यंभावादिति भावः । **साक्षिणैव परमाणुसिद्धेरुक्तत्वादिति** । 'अतः सर्वपदार्थानां भागा सन्त्येव सर्वदे'त्यादिनेति भावः । **एवशब्देन** तस्यानुमानस्य दुष्टतामभिप्रैति । परमाणूनां अनित्यत्वं साधयत्सूत्रं व्याकुर्वता तत्राप्रयोजकतानिरासकसूत्रव्याख्यानमप्यभिमतमेव । अन्यथा तद्व्याख्यान-स्यापूर्तेरिति भावेन सूत्रद्वयं व्याख्यातीत्युक्तम् । तत्रोभयथा च दोषादिति सूत्रस्याभिमतमर्थं दर्शयति **अनित्यत्वे चेति** । **मूलकारणत्वसिद्धिरिति** । प्रथमकार्यस्यारम्भकं हि मूलकारणमित्युच्यते । परमाणूनां अनित्यत्वे च तदारम्भकस्यैवाद्यकार्यारम्भकत्वमिति न परमाणोस्तत्सिद्ध्यतीति भावः । ननु रूपादिमत्त्वहेतुरप्रयोजकः । तथा

च मूलकारणत्वं न विहन्यत इत्यत आह **यदि चेति** । **तथा च न परमाणूनामिति** अप्रयोजकतामाह परिहृतत्वादित्यर्थः ।

**शे०वा०**— व्यक्त्यैक्यापेक्षत्वस्य बाधितत्वादाह **जात्यपेक्षमिति** । समुदायापेक्षमित्यर्थः । **न च धर्मिग्राहकेति** । अवयवावयविप्रसङ्गस्तावदनुभूयते । स च न निरवधिकः । तथा सत्यनन्तद्रव्यारब्धत्वाविशेषात् सर्षपमहीधरयोस्तुल्यपरिमाणत्वप्रसङ्गात् । तस्मान्निरवयवं द्रव्यमवयविभूतं किञ्चिदेष्टव्यम् । स एव च परमाणुरिति धर्मिस्वरूपग्राहकप्रमाणेन निरवयवतयैव परमाणुसिद्धेः तत्सावयवत्वं धर्मिग्राहकमानविरुद्धमिति न वाच्यमित्यर्थः । **उक्तत्वादिति** । 'यदि साक्षिमितं नैतन्नानुमा तत्र वर्तत' इत्यादिनेति शेषः । व्याप्तिवैकल्यात् तर्काभासोऽयमित्याशङ्क्य विशेषव्याप्तेरभावेऽप्यविशेषलक्षणसामान्यव्याप्तेः सद्भावान्नानुपपत्तिरित्याशयेनाह **अविशेषादिति** । अस्त्येव घटादीनामपि नित्यत्वमितीष्टापादनमेतदित्याह **तथाऽपीति** । घटादीनां नित्यत्वेऽपीत्यर्थः । परमाणुवद्घटादेरपि नित्यत्वे कार्यस्यैवाभावप्राप्तेः किमपेक्षया मूलकारणत्वं परमाणूनां स्यादिति भावः । अनेन **उभयथा** परमाणूनामनित्यत्वे, तद्वद्घटादीनां नित्यत्वे च परमाणूनां मूलकारणत्वानुपपत्तिरिति दोषात्परमतमसमञ्जसमिति सूत्रार्थ उक्तो भवति । यद्यप्ययमर्थो न मूले प्रतीयते तथाऽप्यनुकूलतर्कस्य मूलाभिप्रेतत्वादुक्तरीत्या सूत्रार्थोऽप्यभिप्रेत एवेति ज्ञातव्यम् ।

**वा०र०**— जातिपदार्थमाह **समुदायेति** । एतच्च नविलक्षणत्वाधिकरणे व्युत्पादितम् । उपपादयिष्यते च वैराग्यपादे ।

**विठ्ठल०**— **साध्याव्याप्तेरिति** । गुणादेरपि सावयवत्वस्य साधितत्वादिति भावः । **यद्रूपादिमदिति** । तथास्य नियमस्य घटादौ सर्वत्र प्रमितत्वेन तद्दृष्टान्तेन परमाणुष्वपि सावयवत्वभावात् साधनाव्यापकत्वमित्यर्थः । **धर्मिग्राहकविरोध इति** । परमाणूनामसिद्धत्वे आश्रयासिद्धिः तत्सिद्धिश्च सर्वेषामपि सावयवत्वे अनन्तावयवारब्धत्वाविशेषान्मेरुसर्षपयोरनन्तद्रव्यारब्धत्वादिति शेषेण समानपरमाणुत्वप्राप्तेर्निरवयवद्रव्यं सावयवत्वं परम्परावधिभूतं किमप्यङ्गीकार्यम् । स एव परमाणुरिति परमाणुग्राहकप्रमाणेन निरवयवतयैव सिद्धेस्तद्विरोध इत्यर्थः । **उक्तत्वादिति** । 'यदि साक्षिमितं नैतन्नानुमा तत्र वर्तत' इत्यत्रेति शेषः । अस्तु परमाणूनामनित्यत्वं ततः किमित्यत आह **अनित्यत्वे चेति** । मास्तु घटादीनामनित्यत्वं ततः किमित्यत आह **तथा चेति** । एतेन परमाणूनामनित्यत्वे मूलकारणानामभावान्नित्यत्वे चाविशेषाद्घटादिसर्वनित्यतापत्त्या जन्याभावेनापि कारणत्वानुपपत्तेरुभयथा च दोषादसमञ्जसं वैशेषिकमतमित्युक्तं भवति ।

**॥ इति तेषां रूपस्पर्शादिहेतुभ्यः तेषां परमाणूनामनित्यता अनुमेया ॥**

* * *

॥ अथ तत्रान्ते तेषां अहंमात्रोपचितानां विकृताकाराणामनित्यत्वमेव ॥

**३३६ सु०— नन्वस्माभिर्भूतसूक्ष्माणां नित्यताऽङ्गीक्रियते, तत्कथमेवमनुमीयते। मैवम्। न हि परमाणवो भूतसूक्ष्माणि, किन्नामाहं(कारो)मात्रोपचितानि, विकृताकाराश्च अनित्या एवेति ॥**

**परि०— परमाणव इति**। पराभिमता इति योज्यम्। **अहंमात्रोपचितानीति**। अहङ्कार-तत्त्वमात्रोपचितानि यानि, तानि भूतसूक्ष्माणीत्यर्थः। उपचितरूपोऽनित्य इत्याह **विकृतेति**।

**गु०दी०—** अत एव **नन्वस्माभिरित्यादिकम**प्यभ्युपगमवादोऽयमिति द्रष्टव्यम्। अन्यथा पक्षविशेष-परिग्रहेऽपि भूतसूक्ष्माख्यपरमाणुषु व्यभिचारापरिहारात् ॥

**यादु०— न हि परमाणव इति**। जालसूर्यमरीचिस्थत्र्यणुकषष्ठकणपरिमिता ये परमाणवः परेण मूलकारणतया स्वीकृतास्ते भूतसूक्ष्माणि नेत्यर्थः। **अहङ्कारोपचितानीति**। अत्राहङ्कारपदं तत्कार्याणां भूताना-मप्युपलक्षकम्। तथा च तामसाहङ्कारतत्कार्यभूतोपचितानि भूतसूक्ष्माणि पराभिमतपरमाणव इत्यर्थः ॥

**श्रीनिधि०— किन्नामाहङ्कारोपचितानीति**। भूतसूक्ष्माणीति वर्तते। एवं तर्हि भौतिकत्वमसिद्धमिति चेन्न। भौतिकपदस्य प्राकृतपरत्वात्। तर्हि प्राकृतत्वादित्येवास्तु किं रूपादिमत्त्वेनेति चेन्न। प्राकृतत्वस्य रूपादिविशेषणत्वेन धर्मिविशेषणत्वाभावात्। येन वैयर्थ्यं शङ्क्येत। अखण्डोपाधौ च न वैयर्थ्यत्वमिति।

**शे०वा०—** शिष्यः शङ्कते **नन्विति**। भूतसूक्ष्माणां नित्यतायाः स्वेनाङ्गीकारात् तेषामेव च परमाणुत्वात् तदनित्यत्वसाधनं तन्नित्यत्वाभ्युपगमविरुद्धत्वान्न युक्तमित्यर्थः। नित्यत्वेनाङ्गीकृतभूतसूक्ष्माणामेव परमाणुत्वाभावान्न तदनित्यतासाधनस्य तन्नित्यत्वाभ्युपगमविरुद्धत्वमिति परिहरति **न हीति**। भूतसूक्ष्माण्येव परमाणवो न हीति सम्बन्धः। जालसूर्यमरीचिस्थत्र्यणुकषष्ठभागपरिमिताः ये परमाणवः परेण मूलकारणतया स्वीकृतास्ते भूतसूक्ष्माणि नेत्यर्थः। येन तदनित्यतासाधनमनुपपन्नं स्यादिति शेषः। किं तर्हि गोतोऽश्व इव परमाणवो भूतसूक्ष्मेभ्योऽर्थान्तरमेवेति पृच्छति **किन्नामेति**। उत्तरमाह **अहङ्कारेति**। अत्राहङ्कारपदं तत्कार्य-भूतानामप्युपलक्षकम्। ततश्च तामसाहङ्कारतत्कार्यभूतोपचितानि भूतसूक्ष्माण्येव पराभिमतपरमाणवो न त्वत्यन्त-भिन्नमर्थान्तरमिति भावः। **अनित्या वेति**। ततश्च पराभिमतपरमाणोरनित्यतासाधने काचिदस्माकं क्षतिरिति भावः।

**वा०र०—** स्युः स्थलान्यप्याहङ्कृतेः। तेषां भूतैरुपचय इति प्रमाणानुसारेणाह **अत्राहङ्कारेति**।

**विठ्ठल०— न हि परमाणव इति** । अस्मन्मते द्विविधाः परमाणवः । तत्र जालसूर्यमरीचिषु दृश्यमानत्र्यसरेणुषष्ठभागभूता परमाणवो अनित्याः । त एव परमाणुमूलकारणतया नित्याः स्वीकृताः इत्यस्तु विशेषः । परमते त्र्यणुकषष्ठभागपरिमिता एव परमाणव इति । अस्मन्मते तृतीयभागमिता इति । सर्वथा त एव भूतसूक्ष्माण्यनित्यानि । अविभागः परमाणुतेत्युक्ताः प्रकृतिपरमाणवो नित्याः । न तेषां रूपादिमत्त्वं रूपादिमूलकारणपरमाणूनामपि पृथग्भावादिति ।

**चषक— विनेयः** शङ्कते **नन्विति** । सिद्धान्ते भूतसूक्ष्माणां परमाणुपदवाच्यानां नित्यतोपगत्या तदनित्यतासाधनं तद्विरुद्धमित्यर्थः । प्रतिविधत्ते **न हीति** । भूतसूक्ष्माणि पराभिमतपरमाणुपदवाच्यानि न हीति योजना । **अहङ्कारोपचितानीति** । अत्राहङ्कारपदं तत्कार्यभूतानामप्युपलक्षकम् । ततश्च तामसाहङ्कारतत्कार्यभूतोपचितानि भूतसूक्ष्माण्येव पराभिमतपरमाणव इत्यर्थः । उपचितरूपस्त्वनित्य इत्याह **विकृतेति** ॥ ***वैशेषिकमतनिरासः*** ॥

**॥ इति तेषां अहंमात्रोपचितानां विकृताकाराणामनित्यत्वमेव ॥**
**॥ इति पार्थिवादीनां चतुर्विधानां परमाणूनां नित्यतानुपपत्तिः ॥**
**॥ इति उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतयाऽपाकरणे एतदधिकरणस्य पञ्चमषष्ठ(ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ, ॐ उभयथा च दोषात् ॐ)सूत्रयोर्व्याख्यानम् (वैशेषिकादिमते अनुपपत्त्यन्तरदर्शनम्) ॥**

* * *

**॥ अथ उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतयाऽपाकरणान्ते एतदधिकरणस्य सप्तमसूत्र(ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ)स्य व्याख्यानम् ॥**
**॥ अथ तत्र च श्रुतिविरुद्धत्वान्न तन्मतमुपादेयम् ॥**

३३७ **सु०— 'ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ'** इति सूत्रं व्याचष्टे **श्रुतीनां चेति** ।

अनु०— श्रुतीनां च विरुद्धत्वान्न तन्मतम् ।
उपादेयमतश्चायमविरुद्धः समन्वयः ॥

**सम्बन्धमात्रे षष्ठी, अन्यथा तृतीया स्यात् । श्रुतयश्च 'आत्मन आकाश' इत्याद्यास्तत्र तत्रोदाहृता ज्ञातव्याः ।**

**वं०प०— सम्बन्धमात्र इति** । तच्च बाध्यबाधकरूपमिति भावः । **अन्यथेति** । कारणत्वविवक्षायां श्रुतिभिरिति तृतीया स्यादित्यर्थः । **श्रुतयश्चेति** । तथा चाकाशस्य नित्यत्वाङ्गीकारे तद्विरोधः स्यादित्यर्थः ॥

**कं०रा०— अन्यथेति** । सम्बन्धमात्रविवक्षाया अभावे श्रुतिभिर्विरुद्धत्वादिति तृतीया स्यादित्यर्थः ।

**श्रीनिधि०—** विरोधो नाम तद्विरुद्धार्थविषयकं ज्ञानम् । तत्र श्रुतीनां हेतुत्वात् हेतौ तृतीयया भवितव्यम् । तत्कथं श्रुतीनामिति षष्ठीत्यत आह **सम्बन्धमात्र इति** । करणत्वादिविशेषमविवक्षित्वा तदनुगतसम्बन्धमात्रस्य विवक्षितत्वादिति भावः ।

**शे०वा०— सम्बन्धमात्र इति** । करणत्वादिरूपसम्बन्धविशेषाविवक्षया तत्सामान्यविवक्षया च श्रुतीनामिति षष्ठीत्यर्थः । कुतोऽत्र करणत्वाविवक्षा सम्बन्धसामान्यविवक्षा चाश्रयणीयेत्यत आह **अन्यथेति** । श्रुतीनां निरूपणक्रियाकरणत्वात् कर्तृकरणयोस्तृतीयेति तत्र तृतीयाविधानात् श्रुतिभिरिति तृतीया स्यादित्यर्थः । **श्रुतयश्चेति** । 'आत्मन आकाश' इत्यादिश्रुतिभिराकाशादिक्रमेण सृष्टेरुक्तत्वात् द्व्यणुकादिक्रमेण सृष्टिवादिनस्तच्छ्रुतिविरोध इत्याशयः ॥

**स०व्र०— श्रुतयश्चेति** । तथा च 'आत्मन आकाश' इत्यादिश्रुतिभिराकाशादिक्रमेण सृष्टेः प्रतिपादनात् द्व्यणुकादिक्रमेण सृष्ट्यङ्गीकारे तद्विरोधादिति भावः ॥

**॥ इति श्रुतिविरुद्धत्वान्न तन्मतमुपादेयम् ॥**

**॥ इति एतदधिकरणस्य सप्तमसूत्र(ॐ अपरिग्रहाच्चात्यन्तमनपेक्षा ॐ)व्याख्यानम् ॥**

**॥ इति उपन्यस्तमतस्योपपत्तिविरुद्धतया अपाकरणम् ॥**

**॥ अथ एतदधिकरणार्थोपसंहारः ॥**

**३३८ सु०— वैशेषिकादिमतस्यानुपादेयत्वे सिद्धे किं लब्धमित्यत आह अतश्चेति । अयं सकलगुणपरिपूर्णपरब्रह्मविषयः । अविरुद्ध इति न वैशेषिकादिमतविरोधेनासमञ्जसो मन्तव्य इति भावः ॥**

**परि०—** वस्तुतो विरोधस्य सत्त्वादविरुद्ध इति कथमुक्तिरित्यत आह **न वैशेषिकादिमतेति** ॥

**श्रीनिधि०—** नन्वविरोधः स्वभावकृतः न तु वैशेषिकादिमतस्यानुपादेयत्वज्ञानकृतः तत्कथमत इत्युच्यत इत्यत आह **न वैशेषिकादिमतविरोधेनेति** ॥ *श्रीनृसिंहार्पणमस्तु ॥*

दुर्वादिगन्धसर्वस्वहरणं विघ्नवारणम् ।
नरसिंहं सुकरणमरुणं करुणं भजे ॥

सार्वज्ञसर्वशक्तित्वप्रमुखैर्गुणमण्डनैः ।
मण्डितं मध्वदेवं तं वन्दे शर्वादिवन्दितम् ॥

**विठ्ठल०— न वैशेषिकादिमतविरोधेनेति** । आदिपदेन नैयायिकग्रहणं, समयान्तरनिरस्यापीदमेव प्रयोजनमिति सूचयितुमादिपदेन बौद्धादिग्रहणं वा । तथा च शेषशब्दसमन्वयेन निर्बाधं हरेर्निरवयवद्यागण्य-कल्याणगुणपूर्णत्वसिद्धिदुर्मतनिरासप्रयोजनमित्युक्तं भवति ॥ *इति वैशेषिकमतपरीक्षा समाप्ता ॥*

**॥ इति एतदधिकरणार्थोपसंहारः ॥**

**॥ इति परमाण्वारम्भवाद-वैशेषिकमत-निराकरणम् ॥**

## ॥ इति वैशेषिकाधिकरणम् ॥

## ॥ २-२-६ ॥

* * *

# ॥ अथ समुदायाधिकरणम् ॥
# ॥ २-२-७ ॥

॥ प्रस्तावना ॥

॥ अथ एतदाद्यधिकरणत्रये अपाक्रियमाणानां मतानां चातुर्विध्यं प्रदर्श्य अस्मिन्नधिकरणे तद्गतयोः वैभाषिकसौत्रान्तिकमतयोरेव निरसने प्राथम्यनिमित्तभूतं निरस्तवैशेषिकादिमतनिरसनप्रसङ्गातिसाम्यप्रदर्शनम् ॥

## ब्र०सू०—ॐ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॐ ॥

[२-२-७-१(८)]

१ सु०— **अथेदानीं सौगतमतमपाक्रियते । ते च चतुर्विधाः । वैभाषिकाः सौत्रान्तिका माध्यमिका योगाचाराश्चेति । तत्र जगत्सत्यमेव परमाणुमयमाचक्षाणानां वैशेषिकादीनां निरसनप्रसङ्गादनतिभेदं वैभाषिकसौत्रान्तिकमतमादौ तावन्निराक्रियते ॥**

**परि०**— हैतुकनिरासानन्तरं पाषण्डनिरासो भाष्यटीकोक्तरीत्या अवसरप्राप्त इति स्मर्तव्यमिति भावेनाह **अथेदानीमिति** । वैदिकपाषण्डापेक्षयाऽवैदिकपाषण्डस्यातिविरोधित्वेन तन्निरासस्याद्यत्वद्योतनायेदानीमित्युक्तम् । चतुर्णां मध्ये द्वयोरादौ निरासे बीजमाह **तत्र जगदिति** । सत्यत्वपरमाणुमयत्वाभ्यां वैशेषिकमतानतिभेदमित्यर्थः । यद्वा द्वयोः सहनिरासे हेतुमाह **अनतिभेदमिति** ॥

**यादु०**— **अथेदानीमिति** । समया द्विविधा हैतुकाः पा(त)ष(ख)ण्डाश्चेति । 'अक्षपादकणादौ च साङ्ख्ययोगौ च हैतुकाः । बौद्धपाशुपताद्यास्तु पाषण्डा इति कीर्तिताः' इति वचनात् । तत्र हैतुकाः प्रबलाः युक्तिमत्त्वात् । अतः पूर्वं ते निराकृताः । अथैवं हैतुकनिराकरणानन्तरं पाषण्डमतमपाक्रियते । तदपि वेदप्रामाण्यानङ्गीकाराङ्गीकाराभ्यां द्वेधा । तत्राद्यमतिविरोधित्वादादौ निराकार्यम् । तदपि बौद्धजैनभेदेन द्वेधा । तत्र बौद्धमतस्य प्रथमनिर्मितत्वात् प्रबलत्वाच्च तदेवादावपाक्रियत इत्यर्थः । तदिदमाह **इदानीमिति** । नन्वेवं सर्वज्ञत्वादिवैभाषिकसौत्रान्तिकमतापेक्षया माध्यमिकयोगाचारमतयोर्जगदसत्त्ववादिमतत्वेनातितरां विरोधित्वात् त एवादौ निराकार्ये इत्यत आह **तत्र जगत्सत्यमेवेति** । वैभाषिकसौत्रान्तिकमतेऽपि जगतः सत्यत्वपरमाणुमयत्वयोरभिधानादिति भावः । इयांस्तु विशेषः । वैशेषिकादिमते सत्यं जगत् स्थायि परमाणुकार्यं च ।

वैभाषिकसौत्रान्तिकमते तु क्षणिकं परमाणुपुञ्जरूपं चेति । तदिदमाह **अनतिभेदमिति** । तथा च जगत्सत्यत्व-परमाणुमयत्ववादिवैशेषिकमतनिरासेन तादृशवैभाषिकसौत्रान्तिकमतयोः स्मारितत्वात् प्रसङ्गसङ्गत्यैव तन्मतमादौ निराक्रियत इत्यर्थः ।

**श्रीनिधि०**— चतुर्विधेषु सौगतमतेषु सत्सु वैभाषिकादिमतमेव किमिति प्रथमतो निराक्रियते । तत्रापि सौत्रान्तवैभाषिकयोः पृथगेव निराकरणं कुतो न क्रियत इत्यतस्तत्र नियामकं भाष्याभिमतं दर्शयति **तत्र जगत्सत्यमेवेति** । वैभाषिकादिरपि जगत्सत्यं परमाणुमयमिति मन्यत इति भावः । वैशेषिकादेः परमाणुमयत्वं तद्विकारित्वेन तदारब्धत्वेनेति यावत् । वैभाषिकादेस्तु तदात्मनेति द्रष्टव्यम् । उक्तं च 'तादात्म्यार्थे विकारार्थे प्राचुर्यर्थे मयट् त्रिधा' इति । अनेनाद्यं चोद्यमुक्तोत्तरम्, द्वितीयस्योत्तरमाह **अनतिभेदं वैभाषिकसौत्रान्तिक-मतमिति** ।

**शे०चं०**— आनन्तर्ये हेतुं सूचयन्नेव तदधिकरणप्रघट्टकप्रतिपाद्यमाह **अथेदानीमिति** । हैतुकनिरा-करणानन्तरमिति भावः । अयं भावः । समयास्तावद् द्विविधाः । हेतुकाः पाषण्डाश्चेति । 'योगसाङ्ख्य-कणादाक्षपादा वै हेतुवादिनः । पश्चीशशाक्तबुद्धाद्याः पाषण्डा इति कीर्तिता' इति स्मरणात् । तत्र हैतुका हेतुभिः प्रबला इति त एवादौ निराकार्या अनन्तरमेव च पाषण्डनिरासावसर इत्यतोऽत्र हैतुकनिरासानन्तरं पाषण्डनिरासः कर्तव्यः । पाषण्डोऽपि वेदप्रामाण्यानङ्गीकाराङ्गीकाराभ्यां द्वेधा भवति । तत्र आद्यः अतिविरोधित्वात् आदौ निराकार्यः । स च बौद्धजैनभेदेन द्वेधा । तत्र बौद्धशास्त्रस्य प्रथमं निर्मितत्वात् प्राबल्याच्च आदौ बौद्धा निराकार्या इति तत्पक्ष एवादौ निराक्रियत इति । वैभाषिकादिमतनिरासपरस्यास्य ग्रन्थस्य कथं सौगतनिरासकत्वमित्यतः तदवान्तरभेदत्वात् वैभाषिकादीनां तदुपपत्तिरिति भावेन तद्भेदमाह **ते चेति** ॥ **चतुर्विधा इति** । यद्यपि भगवानेक एव गुरुः तथाऽपि प्रतिपत्तिभेदात् विनेयभेदाद्वा चातुर्विध्यमिति द्रष्टव्यम् । यद्यपि मन्दमध्यमोत्तम-बुद्धिभेदात् विनेयानां त्रैविध्यमेवेति तदेव च वक्तुं युक्तम् । अत एव साङ्करभाष्ये त एते त्रयो वादिनो भवन्ती-त्यादिना तदेव दर्शितम् । तथाऽपि मन्दबुद्धीनां वैभाषिकसौत्रान्तिकभेदेन द्वैविध्याश्रयणात् साक्षात्परम्परा-विभाजकोपाधीनेकीकृत्येयं चातुर्विध्योक्तिरिति द्रष्टव्यम् । ननु परमाणुपुञ्जरूपः क्षणिको बाह्योऽर्थो घटादिः सन्प्रत्यक्षश्चेति वदतो वैभाषिकात् सोऽनुमेय इति वदन् सौत्रान्तिकोऽत्यन्तविरोधी, ततोऽपि ज्ञानमेवास्ति न ततोऽतिरेकेण बाह्यार्थोऽस्तीति वदन् योगाचारोऽतितरां विरोधी, ततोऽपि सर्वशून्यवादी माध्यमिकोऽतितमां विरोधीति, माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाः क्रमेणैव निराकार्याः । तत्कथमतिविरोधिनौ माध्यमिक-योगाचारौ प्रथममनिराकृत्य किञ्चिद्विरोधिनोर्वैभाषिकसौत्रान्तिकयोरेव प्रथमं निराकरणमित्याशङ्कां परिहरन्नेवैत-दधिकरणप्रतिपाद्यमाह **तत्रेति** । **परमाणुमयं** परमाण्वारब्धम् । **निरसनप्रसङ्गादिति** । परमाण्वारम्भवादनिरासेन तत्पुञ्जवादोपस्थितेः प्रसङ्गसङ्गत्या तन्निरास इति भावः । उपलक्षणं चैतत् । वैभाषिका हि परमाण्वाकाश-दिक्कालात्ममनसां तथा सामान्यविशेषसमवायानां, तथा परमाणुपरिमाणादीनां गुणानां च केषाञ्चिन्नित्यतामभ्यु-

पेत्य शेषाणां निरन्वयं विनाशमुपयन्तीत्यतस्तेऽर्धवैनाशिकाः । तेन तदुपन्यासो वैनाशिकत्वसाम्येन सर्ववैनाशिकान् स्मारयतीति प्रसङ्गसङ्गत्या तदनन्तरं वैनाशिकमतनिराकरणमित्यपि द्रष्टव्यम् । ननु योगाचारमाध्यमिकयोरिव वैभाषिकसौत्रान्तिकयोरपि मतभेदसद्भावात् पृथगेव तन्मतं निरसनीयम् । तत्किमिति मतद्वयस्यैकीकृत्य निरास इत्यत उक्तम् **अनतिभेदमिति** । यद्यपि वैभाषिकाणां बाह्योऽर्थः प्रत्यक्षः, सौत्रान्तिकानां त्वनुमेय इत्यस्ति तन्मतयोरवान्तरभेदः, तथाऽपि परमाणुपुञ्जरूपस्य क्षणिकस्य, बाह्यार्थस्य घटादेः सत्यताया, उभयसम्मतत्वान्नात्यन्तं तन्मतयोर्भेद इति परमाणुपुञ्जसत्त्ववादिमतत्वेनैकीकृत्य मतद्वयं तन्निरासो युक्त इति द्रष्टव्यम्।

**वा०र०— हेतुं सूचयन्निति । अयं भाव** इत्यादिना **तत्पक्ष एव निराक्रियत** इत्यन्तेन तत्सूचनप्रकारोऽनुपदमेव व्यक्तो भविष्यति । प्रघट्टकेत्युक्त्यैतदधिकरण एवाशेषसौगतमतनिरासप्रतिज्ञेयं न भवति किन्तु स्याद्वादिजैनाधिकरणपर्यन्तमधिकरणत्रयान्तं सौगतमतनिराकरणप्रतिज्ञेयमिति ज्ञापितं भवति । अथेदानीमित्युक्त्या सूचितामानन्तर्यसङ्गतिं स्पष्टयितुमथेत्येतत् तावद्व्याचष्टे **हैतुकेति** । समया द्विविधा हैतुकपाषण्डभेदात्, । 'तत्र समया द्विविधाः हेतुकाः पाषण्डाश्चेति । उक्तं ही'त्याद्येतत्पादप्रथमाधिकरणीय-तत्त्वप्रकाशिकाचन्द्रिकानुसारेण तथैतदधिकरणीयतत्त्वप्रकाशिकानुसारेण च विवेकेनानन्तर्यं स्पष्टयन्नाह **अयं भाव** इत्यादिना **निराक्रियत** इत्यन्तेन । **तदवान्तरेति** । सौगतावान्तरेत्यर्थः । वैभाषिका सौत्रान्तिका इति बहुवचनानुसारेण वैभाषिकादीनामित्युक्तम् । **एक एव गुरुरिति** । आदिबुद्धशिष्याणामिति परिमळे उक्तेर्बुद्धलक्षण इत्यर्थः । शाङ्करभाष्यानुसारेण समाधत्ते **तथाऽपीति** । अतः प्रथमादिबुद्धेनोत्तममध्यमाधमा भाविविनेया इत्यादि परिमलानुसारेण एकीकृत्योपन्यासः ततस्त्रित्वमुपपन्नमिति । भामत्यनुसारेण चाक्षिप्य समाधत्ते **यद्यपि मन्देति** । चतुर्थस्य द्वितीयेऽधिको विचारः कृतोऽस्ति । सोऽप्यत्रानुसन्धेयः । तत्र यद्यपि परमाणुपुञ्जरूप इत्यादि चन्द्रिकानुसारेणाशङ्क्य समाधत्ते **ननु परमाणुपुञ्ज इत्यादिना** । वैशेषिकाः खलु अर्धवैनाशिका इत्यादि भामत्यनुसारेणाह **उपलक्षणं चैतदित्यादिना द्रष्टव्यमित्यन्तेन** । सर्वास्तित्वे सम्प्रतिपत्तिरिति भामत्यनुसारेण समाधत्ते **तथापि परमाण्विति** । उत्तरत्रावान्तरविशेषोऽपि निराकरिष्यते यद्वक्ष्यति मूलकारः । अवान्तरभेदं तु निराकरोतीत्यप्युपलक्षणया ज्ञेयम् ।

**विठ्ठ०— अथेदानीमिति** । युक्तिमत्त्वेन प्रबलहैतुकमतनिरासानन्तरं पाषण्डमतनिरासस्य प्राप्तत्वात् तत्रापि वेदाप्रामाण्यवादित्वेनातिविरोधित्वात् तत्रापि जैनमतापेक्षया बौद्धमतस्य प्राथम्यात् प्राबल्याच्चादौ बौद्धमतमपाक्रियत इत्यर्थः । **अनतिभेदमिति** । जगत्सत्यत्वपरमाणुमतत्वयोः साम्येऽपि क्षणिकत्वपरमाणुपुञ्जरूपत्वयोरभिधानादनतिभिन्नत्वमिति ज्ञेयम् ।

**चषकः—** 'अक्षपादकणादौ च साङ्ख्ययोगौ च हैतुकाः । बौद्धपाशुपताद्यास्तु पाषण्डा इति कीर्तिताः' इति वचनात् समयानां द्वैविध्यम् । तत्र हैतुका अहैतुकावधिकबलीयस्त्वेन पूर्वं निराकृताः । अथाहैतुकनिरासावसरः । पाषण्डोऽपि वेदप्रामाण्योपगमानुपगमाभ्यां द्वेधा । आद्यस्त्वतिप्रतीपत्वादादौ प्रत्या-

ख्येयः । सोऽपि बौद्धजैनभेदभिन्नः । तत्र बौद्धमतस्य प्रथमनिर्मितत्वात् बलवत्त्वाच्चादौ तदेव प्रतिविधीयत इत्याशयेनाह **अथेदानीमिति** । **अनतिभेदं** अतिशयितभेदविनिर्मुक्तम् ।

**॥ इति एतदाद्यधिकरणत्रये अपाक्रियमाणानां मतानां चातुर्विध्यं प्रदर्श्य अस्मिन्नधिकरणे तद्गतयोः वैभाषिकसौत्रान्तिकमतयोरेव निरसने प्राथम्यनिमित्तभूतं निरस्तवैशेषिकादिमतनिरसनप्रसङ्गातिसाम्यप्रदर्शनम् ॥**

* * *

**॥ अथ अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासः ॥**

**॥ अथ तत्रादौ सामान्यतो निरूपणम् ॥**

**॥ अथ तत्र जगतः स्वरससक्षणिकता ॥**

**॥ अथ च तत्राप्यादौ तस्याः जगतः स्वरससक्षणिकतायाः स्पष्टीकरणम् ॥**

२ **सु०—** विप्रतिपत्तिं दर्शयंस्तन्मतमुपन्यस्यति **वैभाषिकाश्चेति** ।

**अनु०—** वैभाषिकाश्च सौत्रान्ताः स्वरसक्षणिकं जगत् ।

'आहुः' इति वक्ष्यमाणेन सम्बन्धः । **क्षणिकं** क्षणमात्रावस्थायि । मुद्गराभिघातादीनां विनाशहेतूनां प्रतिक्षणमनुपलम्भात् कथं क्षणभङ्गित्वमित्यत उक्तं **स्वरसेति** । स्वभावेनैव क्षणिकम् । स्वभाव एवायं वस्तुनो यद्विनाशित्वं, तत्र का कारणापेक्षा; मुद्गरादयोऽपि न वस्तुविनाशहेतवः, किन्नाम घटादितः कपालादेर्विसदृशकार्यस्योत्पत्तौ निमित्तभूता एवेति ।

**परि०—** **विप्रतिपत्तिमिति** । निरासे बीजभूतामिति योज्यम् ।

**गु०दी०—** **घटादितः कपालादेर्विसदृशकार्यस्योत्पत्तौ निमित्तभूता एव** इत्यत्र परमते कपाला अपि घटात्सूक्ष्मतमा अविकृतपरमाणुपुञ्जा एव येन मुद्गरप्रहारात् स्थूलकार्यासमवायिकारणकपालसंयोगनाशे तन्मात्रा एवावशिष्येरन् । अविकृतपरमाणुपुञ्जवादे तु व्रणस्थमशकसमुदायस्येव वातोद्धूतरथ्यारेणुसमुदायस्येव च प्रत्येकं प्रत्येकमपसरणं स्यात् । न तु सूक्ष्मसमुदायरूपेण । न चैवमेवास्त्विति वाच्यम् । जर्झरीभूतकपालखण्डानां प्रत्यक्षत एवावगमेन तदपलापायोगात् । प्रागविरलानां घटाकारपरमाणूनां मुद्गरप्रहारे सति तेनैवाकारेण विरलावस्था जायत इत्यत्रापि न किञ्चिन्मानम् । भोजकादृष्टरूपं कर्मापि जलाहरणयोग्यप्राक्तनावस्थायामेव बीजं नोत्तरायां इत्यादिदूषणं द्रष्टव्यम् ।

**कं०रा०**— ननु विनाशहेतुत्वेन क्लृप्तानि मुद्गराभिघातादीनि विना घटादीनां स्वभावत एव प्रतिक्षणं विनाशः कथं स्यादित्यतो न ते वस्तुविनाशहेतवः किं नाम घटादितः कपालादिरूपविसदृशकार्योत्पत्तावेव निमित्तभूताः मुद्गराद्यभिघातानन्तरं घटविसदृशकपालरूपकार्योत्पत्तेरनुभवसिद्धत्वादित्यत आह **मुद्गरादयोऽपीति** ।

**श्रीनिधि०**— क्षणसम्बन्धस्यास्माभिरप्यङ्गीकृतत्वेन न तत्र विप्रतिपत्तिरित्यत आह **क्षणमात्रावस्थायीति** । **स्वभाव एवायं वस्तुनो यद्विनाशित्वमिति** । वस्तुनो विनाशित्वमिति यत् अयं वस्तुनः **स्वभावः** । स्वभावपदापेक्षया अयमिति पुल्लिङ्गप्रयोगः । 'शैत्यं हि यत्सा प्रकृतिर्जलस्ये'ति यथा । स्वभाव इत्यसत् मुद्गरप्रहारादिकारणान्वयव्यतिरेकानुविधानदर्शनादित्यत आह **मुद्गरादयोऽपीति** । **घटादितः कपालादेरिति** । स्वभावेन पूर्वक्षणवर्ति घटः उत्तरक्षणवर्तिनं घटं जनयति सोऽप्येवमिति मुद्गरादिके सति सदृशकार्यप्रतिबन्धेन ततो विसदृशः कपालादिरुत्पद्यत इत्यर्थः । एवं च अन्वयव्यतिरेकवत्त्या सिद्धाविति भावः ।

**शे०चं०**— ननु वैभाषिका इत्याद्युत्तरभाष्यमनर्थकम् । न चायं परमतोपन्यास इति वाच्यम् । तस्याप्यनर्थकत्वादित्याशङ्क्य विप्रतिपत्तिविषयप्रदर्शनेन वैभाषिकादयो जगत्सत्यत्वमभ्युपगच्छन्त्येव तत्कथं तन्निरासायाधिकरणारम्भ इत्याशङ्कापरिहारेणाधिकरणारम्भसमर्थनार्थत्वात् तन्मतोपन्यासस्य न वैयर्थ्यमित्यभिप्रेत्य विप्रतिपत्तिप्रदर्शनार्थतासूचनपूर्वकं तन्मतोपन्यासपरतया ग्रन्थतात्पर्यमाह **विप्रतिपत्तीति** । **वक्ष्यमाणेनेति** । 'दुःखाभावं सुखं चाहुरि'त्युत्तरवाक्ये वक्ष्यमाणेनेत्यर्थः । ननु क्षणावस्थायित्वरूपक्षणिकत्वं सिद्धान्तेऽप्यभिमतं, तेन विना स्थायित्वानिर्वाहात् । न ह्यल्पाल्पतरकालावस्थायित्वं विना स्थायित्वं सूपपादम् । तत्कथमेतत् विप्रतिपत्तिविषयप्रदर्शनमित्यतो यथेदं विप्रतिपत्तिविषयप्रदर्शकं स्यात् तथा व्याचष्टे **क्षणिकमिति** । नन्वेवं मुद्गराभिघातादेर्विनाशहेतुत्वं न स्यादित्याशङ्क्य इष्टापत्त्या परिहरति **मुद्गरादय इति** । तर्हि प्रयोजनान्तरस्याप्यभावादानर्थक्यमेव तेषामापन्नमिति पृच्छति **किन्नामेति** । प्रयोजनान्तरसद्भावान्नानर्थक्यमिति भावेन तदर्थत्वमाह **घटादित इति** ।

**वा०र०**— विप्रतिपत्तिविषयप्रदर्शनार्थत्वोक्तिपूर्वकमिति पाठः । क्वचिद्विप्रतिपत्तिविषयप्रदर्शनार्थतेत्यतःपरं सूचनापदं तस्योक्तिरेवार्थः । **तन्मतोपन्यासपरतयेति** । उपन्यासपरत्वरूपं तात्पर्यमिति फलितोऽर्थः । सार्थक्यमाहेति पाठस्तु स्वरस एव ।

**वि०**— ननु स्वभावेनैव विनाशित्वे घटादिविनाशार्थं मुद्गराद्यपेक्षा न स्यादित्यत आह **मुद्गरादयोऽपीति** । तर्हि मुद्गरादेर्वैयर्थ्यमेव किमिति पृच्छति **किमिति** । उत्तरमाह **घटादित इति** । तत्र स्वरससिद्धे घटादिधाराविच्छेदे सति चरमघटादेः सकाशाद्विसदृशकपालधारोत्पत्तौ निमित्ततया मुद्गराद्युपयोग इति भावः ।

**॥ इति जगतः स्वरसक्षणिकतायाः स्पष्टीकरणम् ॥१अ**

* * *

**॥ अथ तत्र अनात्मप्रपञ्चस्य स्वरसक्षणिकता ॥**

**॥ अथ च तत्रापि जगतः क्षणिकत्वे आपत्तिशङ्का तन्निरासश्च ॥**

**॥ अथ च तत्रादौ अणुसमुदायातिरिक्तावयव्यभावः ॥**

३ **सु०—** 'ननु च कारणानां क्रियया संयोगे सति तत्समवेततया तत्परिणामतया वा कार्येणोत्पत्तव्यम्, तत्कार्येणाप्येवम्; इति कथं क्षणिकत्वं जगतः' इत्यत आह **अणूनामिति ।**

## अनु०— अणूनां समुदायं च

जगदाहुः । अणुसमुदाया एव गोघटादिबोधबोध्याः, न तु तदतिरिक्तोऽवयवी नामास्ति, येन क्षणिकता विरुध्येत ।

अणुमात्रमिति वक्तव्ये समुदायग्रहणम् 'एको महानि'ति प्रत्यक्षप्रत्ययविरोधपरिहारार्थम् । प्रत्येकमणूनामप्रत्यक्षत्वेऽनेकत्वेऽमहत्त्वेऽपि तत्समुदायस्य प्रत्यक्षत्वादि युज्यत इति भावः ।

**गु०दी०— तत्समुदायस्य प्रत्यक्षत्वादि युज्यत** इत्यत्र दूरतोऽदृश्यानां समीपस्थेन दृश्यानां महतामेव तिलतण्डुलकेशादीनां पुञ्जीकरणे सति तत्तन्निष्ठमहत्त्वानामन्योन्यसहकारितया दूरतश्चक्षुषा दर्शनसम्भवेऽपि प्रागप्यतीन्द्रियाणां पिशाचानां शतशः पुञ्जीकरणेऽपि प्रत्यक्षयोग्यताया अदर्शनेनातीन्द्रियपरमाणूनाम् अत एव प्रत्यक्षयोग्यतावच्छेदकमहत्त्वरहितानां समवायेऽपि प्रत्यक्षयोग्यता कथं स्यादिति दूषणमवगन्तव्यम् ।

**कं०रा०— गोघटादीति** । गोघटादिबोधविषया इत्यर्थः ।

**श्रीनिधि०— तत्समवेततया तत्परिणामतया वेति** मतभेदेन **कथं क्षणिकत्वमिति** । कारणानां समवायिकारणानां उपादानानां वा असंयुक्तानां जनकत्वासम्भवात् अन्यतरक्रियया उभयक्रियया वा संयोग इति वक्तव्यम् । एवञ्च क्रियया क्षण एकः, संयोगक्षण एकः, इति क्षणद्वयावस्थानमङ्गीकार्यम् । न चैकस्मिन् क्षण एव क्रियासंयोग इति युक्तम् । क्रियायाः संयोगं प्रति हेतुत्वात् । तदेतदाह **क्रिययेति** तृतीयया । एवञ्च सर्वक्षणिकत्वासिद्धिः तद्दृष्टान्तेनान्त्यावयविनामपि तच्छत्त्यनिराकरणमिति भावः । **तदतिरिक्तो अवयवी नामेति** । **अवयविपदं** कार्यपरम् । तेन पक्षद्वयस्यापि सङ्ग्रहः । उपादानत्वपक्षेऽपि कार्यकारणयोर्भेदाङ्गीकारेणातिरिक्तत्वस्यापि सम्भवादिति । **येन क्षणिकता विरुद्ध्येतेति** । कारणसंयोगादेरनपेक्षणादिति भावः । **प्रत्यक्षत्वादि युज्यत इति** । प्रत्यक्षत्वं एकत्वं महत्वं च युज्यत इत्यर्थः ।

**शे०चं०**— न्यायमतमाश्रित्योक्तं **तत्समवेततयेति** । भेदाभेदपक्षमाश्रित्योक्तं **तत्परिणामतयेति** ॥ **कथं क्षणिकत्वमिति** । जगतः क्षणिकतायां तन्तूनां प्रथमं क्रिया, अनन्तरं संयोग इत्युक्तक्रमायोगादिति भावः ॥ **तदतिरिक्त इति** । परमाणुसमुदायातिरिक्तः परमाण्वारब्धः परमाणुपरिमाणो वाऽवयवी नास्तीत्यर्थः । प्रत्यक्षत्वादीत्यादिपदेनैकत्वादिपरिग्रहः ।

**विठ्ठ०**— ननु कारणानां परमाणूनां प्रथमक्षणे उत्पत्तिः । द्वितीयक्षणे परस्परं संयोगः । तृतीयक्षणे स्वसमवेतत्वेन वा स्वपरिणतत्वेन वा कार्यान्तरोत्पादकत्वमित्यनेकक्षणावस्थानस्य वक्तव्यत्वात्क्षणिकत्वानुपपत्तिरिति शङ्कते **ननु चेति** ।

**चषकः**— **बोधबोध्याः** बोधविषयाः ।

**॥ इति अणुसमुदायातिरिक्तावयव्यभावः ॥**

* * *

**॥ अथ च तत ईश्वरस्य अवयविनश्च समुदायेतरत्वशङ्का तन्निरासश्च ॥**

४ **सु०**— 'समुदायो हि मेलकेन (केनचित्) पुंसा भवति, न चास्मदादिस्तथेतीश्वरोऽभ्युपगन्तव्यः स्यात् । तथाऽवयव्यनभ्युपगमे गोघटादिविलक्षणाकारता न स्यादि'त्यत आह **कालेति** ।

**अनु०**— कालकर्मनिमित्ततः ।
उत्पत्तिकाले युक्तानां

**कालकर्मणी** च ते **निमित्ते** च, **ततः** । **उत्पत्तिकाले** आदिसृष्टौ । अन्यदा तु निमित्तान्तरमस्तीति भावः । **युक्तानां** सन्निकृष्टतयोत्पन्नानां 'अणूनां समुदायमि'ति सम्बन्धः । कर्मादिवशादेव तथा तथा सन्निकृष्टाः परमाणवो जायन्ते यथा यथा गोघटादिविचित्राकारावभासः स्यात्; तत्र किमीश्वरेण, किं वाऽवयविना । सिद्धान्तिनाऽपि हि कर्मादिकं निमित्तमङ्गीकर्तव्यम्, संयोगश्चावयव्युत्पादानुगुणः; तावतैव सर्वमुपपद्यत इति ।

**परि०**— **निमित्तान्तरमिति** । कुलालादिमेलकपुरुषान्तरादित्यर्थः ॥ **संयोगश्चेति** । सिद्धान्तिनाऽप्यङ्गीकर्तव्य इत्यनुषङ्गः । कुत इत्यत उक्तं **अवयवव्युत्पादानुगुण इति** । हेतुगर्भमिदम् । **तावतैवेति** । सिद्धान्तिनाऽप्यङ्गीकर्तव्येन कालकर्मादिनाऽणूनां संयोगेन चेत्यर्थः ॥ **सर्वमिति** । प्रत्यक्षत्वमेकत्वं विलक्षणत्वमित्येतत्सर्वमित्यर्थः ।

**गु०दी०— कर्मादिवशादेव तथा तथा सन्निकृष्टाः परमाणवो जायन्त** इत्यत्र कालकर्मादिवशात् परमाणव एव गोगवयाद्याकारेण पुञ्जीभवन्तीति वादे कुतो गोपरम्परायाः नियमेन मातृभूतगोयोन्यनुसरणम् । कुतो वा घटपरम्पराजननाय मृत्पिण्डपरम्परानुसरणम् । गवामुदरस्था एव परमाणव एव तदुदरे वत्सीभवन्तीति तु आदिसृष्टावभावात् वृषभसङ्गमस्याप्रयोजकत्वाच्चानुपपन्नम् । किं च करेणास्पृश्यानां नयनैरदृश्यानां च परमाणूनां कुलालतः प्रयोजनाभावात् स्वस्वभोजकादृष्टवशात् तत्तद्गृहस्थगृहाङ्गणेष्वेव पुञ्जीभावो युक्तः । न तु गमन-वेतनदानाद्यायासदायिन्यां कुलालशालायाम् । एवं व्रीहियवाद्याकारेण शाकाद्याकारेण च तत्र तत्रैव परमाणूनां समुदायो भवेत् । जलाकारपरमाणुसमुदायश्च दिने दिने गेहस्थघटानामन्तरेव स्यात् । न तु क्षेत्रतटाकादिषु । गवाकारसमुदायश्च प्रागेव स्थूलगवाद्याकारेण स्यात्, न तु वत्साद्याकारमन्तर्भाव्य । भोजकादृष्टं हि यथा यथा भोजनं सुकरं स्यात् तथैव कुर्यात् । यदि च दृष्टमृत्पिण्डादिकारणत्यागायोगात् कुलालशालादिष्वेव समुदाय इत्यङ्गीक्रियते । तर्हि दृष्टमृत्पिण्ड एव कुलालानुगृहीतो घटाकारेण परिणमताम् । कृषीवलानुगृहीताङ्कुरादिभ्य एव व्रीह्यादयः परिणमन्ताम् । किमदृष्टायुक्तयुक्तपरमाणुसमुदायकल्पनयेत्यादिदूषणं द्रष्टव्यम् ।

**यादु०— निमित्तान्तरमिति** । मेलकपुरुषादिरूपमित्यर्थः ।

**कं०रा०— गोघटादिविलक्षणाकारता न स्यादिति** । सर्वेष्वणुसमुदायेष्वणुसमुदायत्वस्य विशेषा-द्वैलक्षण्यप्रयोजकस्यान्यस्याभावाच्चेति भावः । **कर्मादिवशादिति** । यथा यथा सन्निकृष्टेषु परमाणुषु गोषु घटादिविचित्राकारावभासः स्यात् तथा तथा सन्निकृष्टाः परमाणवः कालकर्मवशादेव जायन्त इत्यर्थः । **संयोग-श्चेति** । अवयव्युत्पादनगुणः संयोगविशेषश्च सिद्धान्तिनाऽङ्गीकर्तव्य इत्यर्थः । **तावतेति** । कर्मादिना परमाणु-मेलनमुपपद्यत इति मेलकत्वेनेश्वरो नाङ्गीकार्य इति भावः ।

**श्रीनिधि०— अन्यदा तु निमित्तान्तरमिति** । मध्यसृष्टिकाले उत्पद्यमानां घटादीनां दण्डादिकं निमित्तान्तरमस्तीत्यर्थः । **किं वा अवयविनेति** । अवयविना च किमिति ।

**शे०चं०— तथेति** । मेलक इत्यर्थः । अस्मदादीनां परमाण्वदर्शित्वेन तन्मेलकत्वायोगादिति भावः । **विलक्षणाकारतेति** । परमाणूनामविलक्षणत्वादिति भावः । कालश्च कर्म च निमित्तं च कालकर्मनिमित्तानि तेभ्य इति कालकर्मनिमित्तत इति यथास्थितयोजनायामादिसृष्टिसङ्ग्रहो न स्यात् । तत्र कालकर्मणोरिव निमित्तान्तर-स्याजनकत्वात् अतस्तत्सङ्ग्रहाय तदनुगुणतया तद्व्याख्याति **कालकर्मणी चेति** । अत्रैवोपष्टम्भकतयोत्पत्ति-कालपदं आदिसृष्टिपरतयाऽनूद्य व्याचष्टे **उत्पत्तिकाल इति** ॥ **अन्यदा त्विति** । अर्वाचीनसृष्टावित्यर्थः ॥ **निमित्तान्तरमिति** । तत्र कालकर्मणोरिव तदतिरिक्तमेलकपुरुषादिरूपनिमित्तस्यापि सद्भावेन कालश्च कर्म च निमित्तं चेत्युक्तयोजनायामपि न क्षतिरिति भावः । तावताऽपि कथमुक्ताक्षेपपरिहार इत्यत आह **कर्मादिवशा-दिति** । मेलकपुरुषेण विनेत्येवकारार्थः । ननु कर्मादिवशादिव ईश्वरेणापि मेलनं सम्भवत्येव, तथा परमाणु-

संयोगेनेवावयव्यभ्युपगमेनापि गोघटादिविलक्षणाकारता सम्भवत्येव । ततश्चाविशेषात् कर्मादेरिवेश्वरस्य, परमाणुसंयोगस्येवावयविनोऽपि, मेलकत्वं, विलक्षणाकारताप्रयोजकत्वं चाभ्युपगन्तव्यमेव । तथा च कर्मादिकमेव मेलकं नेश्वरः, परमाणुसंयोग एव विलक्षणाकारतानियामको नावयवीति कुतोऽवधारणमित्यत आवश्यकत्वात् कर्मादेस्तत्सिद्धिरित्याशयेन ईश्वरस्य मेलकत्वपक्षे तावत्कर्मादेरावश्यकत्वमुपदर्शयति **सिद्धान्तिनाऽपीति** । कर्मादिनिरपेक्षस्य तस्य कारणताया वेदाप्रामाण्यापादकत्वादिति भावः । अवयव्यभ्युपगमेऽवयवसंयोगस्याप्यवश्यमङ्गीकर्तव्यतामाह **संयोगश्चेति** । ततश्च तदभावेऽवयव्यनुपपत्तिरेव स्यादिति भावः । ननु सिद्धान्तिना कर्मादेरिव पूर्ववादिना मेलकपुरुषादेरप्यवश्याभ्युपगन्तव्यत्वादविशेष एवेति नोक्तावधारणसिद्धिः इत्यतो भवेदेवं यदि कर्मादिनिरपेक्षस्येश्वरादेरिव ईश्वरादिनिरपेक्षस्य कर्मादेरपि मेलकत्वाद्यनुपपत्तिर्भवेत् । न चैतदस्ति । ततश्च सिद्धान्ते उभयोः प्रयोजकत्वाश्रयणाद्गौरवम् । पूर्ववादे त्वेकैकमात्रस्यैतदाश्रयणाल्लाघवमिति तत एवोक्तावधारणसिद्धिरित्याशयेनाह **तावतैवेति** ।

**वा०र०— तदतिरिक्तनिमित्तस्यापीति** । कुविन्दादिरूपस्येत्यर्थः । वैषम्यनैर्घृण्येत्येतत्सूत्रीयानुव्याख्यानानुसारेणाभिप्रायमाह **कर्मादिनिरपेक्षस्येति** । **पूर्ववादे त्वेकैकमात्रस्येति** । यद्यपि पूर्ववादे कर्मादिरूपस्यैकस्य प्रयोजकत्वाभ्युपगमेऽपि नेश्वरादिरूपस्यैकस्य प्रयोजकत्वं स्वीकृतमिति नान्यतरमात्रस्य प्रयोजकत्वमङ्गीकृतम् । तथाऽप्युभयोस्तदाश्रयणं सिद्धान्तिपक्ष इव पूर्वमते नास्तीत्यत्रैव तात्पर्यं न तु अव्यवस्थयोभयोरन्यतरमात्रस्य प्रयोजकत्वमित्यत्र येनोक्तदोषः स्यादिति द्रष्टव्यम् । क्वचिदेकस्यैवेत्यपि पाठः, तत्र कर्मादिकमेवार्थ इति न दोषः ।

**वि०ठ०— तथावयव्यनभ्युपगम इति** । सर्वकार्याणां परमाणुसमुदायमात्रत्वे अविशेषेणैकप्रकारत्वमेव स्यात् । न तु गोघटादिविचित्राकारता । तत्र नियामकाभावात् । अतस्तदारब्धावयविनो विलक्षणाकारोपेता अङ्गीकार्या इति भावः । **निमित्तान्तरमिति** । कुलालादिमेलकपुरुषान्तरादीत्यर्थः । मेलकपुरुषाभावादादिसृष्टौ मेलनानुपपत्तिरित्यादिशङ्कायाः परिहाराप्रतीतेराह **कर्मादिवशादेवेति** । ईश्वराद्यङ्गीकारे गौरवं चेत्याह **सिद्धान्तिनापीति** । **संयोगश्चेति** । अवयव्युत्पादानुगुण इति हेतुगर्भविशेषणम् । अवयव्युत्पादार्थं परमाणूनां संयोगश्च सिद्धान्तिनाऽङ्गीकर्तव्यः । परमाणुसंयोगाभावे तदारब्धतया अवयव्युत्पादायोगादिति भावः । **तावतैवेति** । कालकर्मादिना अणूनां संयोगेनैव प्रत्यक्षत्वादिकं विचित्राकारावभासादिकं सर्वमुपपद्यत इति नेश्वरेणावयविना च कृत्यमित्यर्थः ।

**॥ इति ईश्वरस्य अवयविनश्च समुदायेतरत्वशङ्का तन्निरासश्च ॥**

**॥ इति जगतः क्षणिकत्वे आपत्तिशङ्का तन्निरासश्च ॥**

**॥ इति अनात्मप्रपञ्चस्य स्वरसक्षणिकता ॥**

* * *

॥ अथ च तत्रान्ते आत्मप्रपञ्चस्यापि स्वरसक्षणिकता ॥

५ **सु०—** किमनात्मप्रपञ्च एव क्षणिकः ? नेत्याह **आत्मानमिति** ।

## अनु०— आत्मानं च क्षणस्थितम् ।

क्षणिकत्वहेतोः सत्त्वस्य सर्वत्र साम्यादिति भावः ।

क्षणिकत्वे प्रत्यभिज्ञाविरोध इत्यत आह **नित्यमिति** ।

## नित्यं सन्तानमेतेषां

**एतेषाम्** अणूनाम् । **सन्तान**विषया प्रत्यभिज्ञेति भावः । **न चैवं सत्त्वस्यानैकान्त्यम् । सन्तानस्य सत्त्वाभावात्** ।

**यादु०— सर्वत्रेति** । बाह्यान्तरवस्तुष्वित्यर्थः ॥ **सन्तानस्येति** । अर्थक्रियाकारित्वरूपं सत्त्वं सन्तानिनामेव न सन्तानस्येति भावः ।

**कं०रा०— न चैवमिति** । सन्तानस्य नित्यत्वे क्षणिकत्वसाधकसत्त्वहेतोस्तत्रानैकान्त्यमिति न च। सन्तानिनामेवार्थक्रियाकारित्वेन स्थायिनोऽर्थक्रियाकारित्वानुपपत्तेर्वक्ष्यमाणतया स्थायिनि सन्तानेऽर्थक्रियाकारित्वरूपसत्त्वस्यैवाभावादिति भावः ।

**श्रीनिधि०— न चैवमिति** । **एवं** सन्ताननित्यत्वाङ्गीकारे । **सन्तानस्य सत्त्वाभावादिति** । सत्त्वं नाम अर्थक्रियाकारित्वम् । न च सन्तानस्यार्थक्रियाकारित्वमस्ति अतीतानागतकालवर्तिसन्तानिसमाहारेण सन्तानेन एकस्यार्थस्याजननात् । तस्य सन्तान्यतिरिक्तत्वात् । अन्यथा साध्यस्यापि सत्त्वेन व्यभिचारस्य चोदयितुमशक्यत्वात् ।

**शे०चं०— सर्वत्रेति** । अनात्मनीवात्मन्यपीत्यर्थः । अन्यथाऽऽत्मन्येव व्यभिचरितत्वात् सत्त्वस्यानात्मन्यपि क्षणिकत्वसाधकत्वं न स्यादिति भावः ॥ **क्षणिकत्व इति** । आत्मानात्मप्रपञ्चस्येति शेषः । सोऽहमित्यादिप्रत्यभिज्ञया आत्मानात्मप्रपञ्चस्य स्थायित्वसिद्धेरिति भावः ॥ **एवमिति** । सन्तानस्य स्थायित्व इत्यर्थः । क्षणिकत्वाभाववति सन्तानेऽपि सत्त्वस्य वृत्तेरिति भावः ॥ **सत्त्वाभावादिति** । अर्थक्रियाकारित्वरूपसत्त्वस्य सन्तानिमात्रनिष्ठतायाः परेणाभ्युपगमादिति भावः ।

**वा०र०—** **इत्यादी**त्यादिना सोऽयमित्यस्य ग्रहः । प्रत्यभिज्ञायाः सन्तानविषयत्वे सन्तानस्य स्थायित्वं लब्धमिति व्याचष्टे **सन्तानस्येति** । **अर्थक्रियाकारित्वेति** । तथा च तादृशसत्त्वस्य सन्तानेऽभावान्न व्यभिचार इति भावः ।

**विठ्ठ०—** **क्षणिकत्व इति** । सर्वप्रपञ्चस्येति शेषः । ननु सन्तानस्याक्षणिकत्वे सत्त्वहेतोस्तत्र व्यभिचार इत्यत आह **न चैवमिति** ।

**॥ इति आत्मप्रपञ्चस्यापि स्वरसक्षणिकता ॥**

**॥ इति जगतः स्वरसक्षणिकता ॥**

**॥ इति अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासे सामान्यतो निरूपणम् ॥**

* * *

**॥ अथ अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासे विभागनिरूपणम् ॥**

**॥ अथ तत्र जगतः पञ्चस्कन्धात्मना स्थितिः ॥**

**॥ अथ तत्रादौ जगतः पञ्च स्कन्धाः ॥**

६ **सु०—** एवं सामान्यतो निरूप्य विभागमाह **पञ्चेति** ।

**अनु०—** पञ्चस्कन्धात्मना स्थितम् ।

जगद्वृक्षं **पञ्चस्कन्धात्मना स्थितम्** आहुः ।

पञ्चस्कन्धानाह **संस्कारेति** ।

संस्काररूपविज्ञानसंज्ञादुःखात्मना स्थितिः ।

**स्थितिः** स्कन्धानामिति शेषः ।

समनन्तरप्रत्ययः **संस्कारस्कन्धः** । रूपरसगन्धस्पर्शशब्दात्मकाः परमाणवो **रूपस्कन्धः** । निर्विकल्पकं ज्ञानं **विज्ञानस्कन्धः** । सविकल्पकं ज्ञानं **संज्ञास्कन्धः** । वेदनाऽपरपर्यायं **दुःखं** चैकस्कन्धः ॥ अत्र रूपस्कन्धो बाह्यः, अन्ये चत्वार आभ्यन्तराः । इत्याहुरिति सम्बन्धः ।

**परि०— इत्याहुरितीति** । स्थितिरित्याहुरित्यन्वय इत्यर्थः ।

**यादु०— समनन्तरप्रत्यय इति** । सजातीयपूर्वविज्ञानमित्यर्थः । न च पूर्वविज्ञानस्य संस्कारजनकस्य कथं संस्काररूपत्वमिति वाच्यम् । तन्मते वैशेषिकमत इव विज्ञानजन्यसंस्काराश्रयस्य स्थायिनोऽभावात्पूर्वविज्ञानमेव संस्कार इत्यभ्युपगमात् ॥ **रूपरसेति** । इदमुपलक्षणम् । इन्द्रियात्मका अपि परमाणवो रूपस्कन्धा इति ग्राह्यम् । रूपरसादीनां रूप्यत इति व्युत्पत्त्या रूपस्कन्धत्वम्, इन्द्रियाणां तु रूप्यतेऽनेनेति व्युत्पत्त्येति ज्ञातव्यम् ।

**वं०प०— ज्ञानम्** आलयज्ञानम् ।

**श्रीनिधि०— समनन्तरप्रत्यय इति** । समनन्तरं प्रत्ययः स्मृतिरूपो येन भवति सः समनन्तरप्रत्यय इत्यर्थः ।

**शे०चं०— समनन्तरप्रत्यय इति** । विज्ञानादिस्कन्धानां सम्बन्धिनी रागद्वेषमोहादिरूपा वासना समनन्तरप्रत्यय इत्यर्थः । एतदेवाभिप्रेत्योक्तं चन्द्रिकायां 'तेषां वासना संस्कारस्कन्ध' इति ॥ **रूपेति** । विषयेन्द्रियात्मना स्थिता इति शेषः । तत्र विषयात्मना स्थितानां रूपादीनां रूप्यन्त इति व्युत्पत्त्या रूपस्कन्धत्वमिन्द्रियात्मना स्थितानां तु तेषां रूप्यन्त एभिर्विषया इति व्युत्पत्त्या रूपस्कन्धत्वमिति विशेषोऽत्रानुसन्धेयः ॥ **सविकल्पकं ज्ञानमिति** । कुण्डली, गौर्गच्छतीत्यादिसविकल्पकज्ञानमित्यर्थः ॥ **रूपस्कन्धो बाह्य इति** । रूप्यमाणानां पृथिव्यादीनां बाह्यत्वेनान्तरत्वासम्भवादिति भावः । यद्यपीन्द्रियात्मनाऽवस्थितानां रूपरसगन्धस्पर्शशब्दात्मकानां परमाणूनामाभ्यन्तरत्वमस्त्येवेति न तद्बाह्यत्वोक्तिर्युक्ता, तथाऽपि विषयात्मना स्थितानां तेषामाभ्यन्तरत्वाभावाभिप्रायेणेयमुक्तिरिति द्रष्टव्यम् । यद्यपि रूप्यमाणपृथिव्यादीनामपि कायाकारेण संहततया कायस्थत्वमस्त्येवेति तेषामप्याध्यात्मिकत्वमेव तथाऽपि कायाकारेणासंहतानां पृथिव्यादीनामाध्यात्मिकत्वाभावाभिप्रायेणेयमुक्तिः । यद्यपि च कायाकारेणासंहतानामपीन्द्रियसम्बन्धात् आध्यात्मिकत्वमेव वक्तुं युक्तम्, तथाऽपि विज्ञानादीनामिव स्वरूपेण नाध्यात्मिकत्वमित्यभिप्रायेण बाह्यत्वोक्तिरिति ध्येयम् ।

**वा०र०— पञ्चस्कन्धानिति** मूलम् । पञ्चस्कन्धेभ्य इति तत्त्वनिर्णयप्रयोग इवात्र पञ्च च ते स्कन्धा इति विशेषणसमासो न तु समाहारद्विगुराश्रीयत इत्यतो न पञ्चमस्कन्धीमित्यापत्तिरिति ज्ञेयम् । व्याख्याति **विज्ञानादीति** । मोहादीत्यादिपदेन रागादिक्लेशातिरिक्तोपक्लेशभूतमदमानादीनां धर्माधर्मयोश्च ग्रहणम् । एवमेव भामत्यामुक्तेरिति ध्येयम् । नन्वेवं व्याख्याने चन्द्रिकाविरोध इत्यत आह **एतदेवेति** । तस्याप्युक्ताभिप्रायकत्वान्न विरोध इति भावः । रूप्यन्ते एभिरिति रूप्यन्ते इति वेति व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्ध इति भामत्यनुसारेण विवेकमाह **विषयेन्द्रियेत्यादिना** । विषया इति शेष इति कल्पतरुमनुसृत्याह **विषया इति** । भामत्यां डित्थः कुण्डली गौरो ब्राह्मणो गच्छतीत्युदाहरणेऽपि लघुभूतमुदाहरणान्तरमाह **कुण्डलीति** । यद्यपि

रूप्यमाणाः पृथिव्यादयो बाह्या इति भामत्यनुसारेण व्याचष्टे **रूप्यमाणानामिति** । भामत्यां पृथिव्यादयो बाह्या इति विशेषशङ्कनेनेन्द्रियात्मनाऽस्थितानामान्तरत्वं अङ्गीकृतम्, तदाशङ्क्य निराचष्टे **यद्यपीति** । कायस्थत्वा-दान्तरत्वं भामत्युक्तमाशङ्क्य निराकरोति **यद्यपि रूप्यमाणेति** । कायस्थत्वं कायाकारेण संहतत्वमिदति कल्प-तर्वनुसारेण व्याख्याति **कायाकारेण संहततयेति** । इन्द्रियसम्बन्धाद्वेत्येतत् संहतानामिन्द्रियसम्बन्धाद्वेति कल्पतरौ व्याख्यातं तदनुसारेणाशङ्क्यान्तरत्वं निराकरोति **यद्यपि च कायेति** ।

**विठ्ठ०— समनन्तरप्रत्ययः** स्मृतिः । परमाणुसमुदायव्यतिरिक्तरूपादिपदार्थाभावात् **परमाणवः** इत्युक्तम् ।

**चषकः— जगद्वृक्षं** जगद्रूपं वृक्षम् ।

**॥ इति जगतः पञ्च स्कन्धाः ॥**

* * *

**॥ अथ अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासे विभागनिरूपणे जगतः पञ्चस्कन्धात्मना स्थितौ सुखमोक्षयोरपि पञ्चस्कन्धान्तर्गतता ॥**

७ **सु०—** सुखादीनां पदार्थान्तराणां विद्यमानत्वात् कथं पञ्चैव स्कन्धाः, इत्यत आह **दुःखाभावमिति** ।

## **अनु०—** दुःखाभावं सुखं चाहुः

**'च'**शब्देन केचित्सुखं वेदनास्कन्धेऽन्तर्भावयन्तीति सूचितं भवति । यद्वाऽनुक्त-समुच्चयार्थश्चशब्दः, यथा 'मूर्ताभाव एवाकाशं, रूपादय एव पृथिव्याद्याः, सङ्ख्यादयस्तु गुणाः पृथगनुपलम्भान्न सन्त्येव, देशान्तरोत्पाद एव कर्मप्रत्ययालम्बनं क्षणिकस्य वास्तव-कर्मायोगात्, सन्निकृष्टविप्रकृष्टतया उत्पाद एव संयोगादिव्यवहारगोचरः, अतद्व्यावृत्तिरेव गोत्वादिसामान्यबुद्धिबोध्ये'त्यादि ।

अरूपज्ञानसन्ततिम् ।

मोक्षं

**अरूपेति** । सन्तन्यमानं ज्ञानमेवात्मा, तस्य विषयोपप्लवः संसारः । **अरूपा** निर्विषया या ज्ञानसन्ततिस्तामेव **मोक्षम्** आहुर्नान्यमित्यतो न पञ्चस्कन्धप्रक्रियाभङ्ग इति ।

**परि०— विषयोपप्लवो** विषयसम्बन्ध इत्यर्थः ।

**यादु०—** नन्वात्मनस्तदीययोर्बन्धमोक्षयोश्च पञ्चस्कन्धातिरिक्तत्वात् कथं पञ्चस्कन्धप्रक्रियेत्यत आह **सन्तन्यमानमिति** । आत्मनः क्षणिकत्वसाधकार्थक्रियाकारित्वरूपसत्त्वोपपादनाय सन्तन्यमानमित्युक्तम् । सन्तानस्तु नार्थक्रियाकारीति भावः । **विषयोपप्लवो** विषयनिमित्तं दुःखम् ।

**कं०रा०—** अनुक्तं किं प्रमेयं चशब्देन समुच्चीयत इत्याकाङ्क्षायां तदुदाहरति **यथेत्यादिना** । आकाशस्य पृथिव्यादीनां तद्गुणानां सङ्ख्यादीनां कर्मणः संयोगविभागयोर्गोत्वादिसामान्यस्य च पदार्थान्तरत्वेन सत्त्वात् कथं पञ्चैव स्कन्धा इत्याशङ्कानिरासाय मूर्ताभाव एवावकाशमित्यादिकं परेण स्वग्रन्थेऽभिहितम् । तदत्र विशिष्यानुक्तं 'दुःखाभावं सुखं चाहुरि'ति चशब्देन समुच्चीयत इति भावः ।

**श्रीनिधि०— केचित्सुखमपीति** । दुःखानुषङ्गात् सुखमपि दुःखमेवेति तेषां आशय इति भावः । अनुक्तसमुच्चयार्थ इत्युक्तम् अनुक्तमेव दर्शयति **यथा मूर्तभाव एवाकाश**मित्यादिना **सामान्यबुद्धिबोध्ये-**त्यन्तेन । **पृथिव्याद्या इति** । पृथिव्यप्तेजोवायव इत्यर्थः । **सङ्ख्यादयस्त्विति** । सङ्ख्यापरिमाणादयो गुणास्तु न सन्त्येव । कुतः ? पृथगनुपलम्भादिति योजनीयम् । अत्र पृथगित्युक्त्या सङ्ख्यादिव्यवहारस्य निरालम्बनता परिहृता । पृथिव्यादय एव तदालम्बनमिति भावः । ननु तर्हि सङ्ख्यादित्रयस्य पृथगुपलम्भाभावेऽपि क्रिया-संयोगादिकं अङ्गीकार्यमेव । तेषां पृथगुपलम्भादित्यतः प्रतीतेरन्यथासिद्धिमाह **देशान्तरोत्पाद एवेत्यादिना** । **क्षणिकस्य वास्तवकर्मायोगादिति** । कर्मणो वास्तवत्वं नाम स्वाधारस्य क्रमेणानेकदेशसंयोगप्रयोजकत्वम् । न च क्षणिकस्यानेकदेशसम्बन्धो युज्यते । तस्यानेकक्षणावस्थानसापेक्षत्वादित्यर्थः । **सन्निकृष्टविप्रकृष्टतयो-त्पाद एवेति** । न तु उत्पत्त्यन्तरं सन्निकर्षो वा विप्रकर्षो वा । तथा सति क्षणान्तरसम्बन्धस्यावश्यकत्वेन क्षणिकत्वभङ्गप्रसङ्ग इति द्रष्टव्यम् । **संयोगादीति** । **आदि**पदेन विभाग उच्यते । विप्रकृष्टतयोत्पादे विभाग-व्यवहारः हेतुरित्यर्थः । **विषयोपप्लवः** विषयोपरागः । विषयसम्बन्ध इति यावत् ।

**शे०चं०—** मूले 'सुखं दुःखाभावं चाहुरि'ति चशब्दस्य भिन्नक्रमतामभिप्रेत्य तदर्थमाह **चशब्दे-नेति** । अस्मिन्पक्षे चशब्दस्य भिन्नक्रमताश्रयणं भवतीत्यपरितोषाद्यथास्थितान्वयमभिप्रेत्य तदर्थमाह **यद्वेति** । तमेव दर्शयति **यथेत्यादिना** । इत्यादीत्यादिपदेनोपाधित्वेनावश्याभ्युपेया क्रियैव काल इत्यस्य परिग्रहः । नन्वात्मनस्तद्बन्धस्य पदार्थान्तरस्य सत्त्वात् कथं पञ्चस्कन्धप्रक्रियासिद्धिरित्याशङ्क्य अरूपज्ञानसन्ततिमित्यनेन मोक्षस्येवात्मनो बन्धस्य च स्वरूपकथनान्न तावादायोक्तप्रक्रियाभङ्गः शङ्कनीय इति भावेन तद्वाक्यमात्मादि-

त्रितयपरतया योजयति **सन्तन्यमानमित्यादिना** । आत्मनः क्षणिकत्वसाधकार्थक्रियाकारित्वरूपसत्त्वोपपादनाय सन्तन्यमानमित्युक्तम् ॥ **विषयोपप्लव इति** । विषयसम्बन्ध इत्यर्थः । 'तस्यानादिवासनावशात् यो विषयो-परक्तस्योत्पादः संसारः' इति चतुर्थे वक्ष्यमाणत्वादित्यवधेयम् ।

**वा०र०**— सुखं दुःखाभावं चाहुरिति सम्बन्धे सुखस्य दुःखाभावत्वं चाहुरित्यर्थप्राप्तावपि अन्यद-प्याहुरित्यर्थाप्राप्तिरित्याशयेनाह **अस्मिन्पक्ष इति** । **चतुर्थ इति** । वैभाषिकसौत्रान्तिकाभिमतमोक्षस्वरूप-निरूपणावसरे इत्यर्थः ।

**स०व्र०**— इत्यादि इत्यादिशब्देन अवश्याभ्युपेयक्रियाया एव कालत्वमित्यभिप्रैति ।

**वि०ठ०**— **केचिदिति** । सुखभावरूपत्वमेवाङ्गीकृत्येति भावः । अनुक्तसमुच्चयार्थ इत्युक्तमनुक्तार्थं दर्शयति **यथेत्यादिना** । **सन्निकृष्टेति** । सन्निकृष्टदेशे द्वयोः पदार्थयोरुत्पादः संयोगः विप्रकृष्टदेशे तयोरुत्पादो विभाग इत्यर्थः । **अतद्व्यावृत्तीति** । गोत्वाद्यनुगतसामान्यबुद्धिविषया अतद्व्यावृत्तिरेव न तु जातिरस्तीत्यर्थः । **तस्य विषयोपप्लव इति** । ज्ञानस्य विषयसम्बन्धरूपोपद्रवः संसारः, तस्य निर्विषयत्वावस्था मोक्ष इत्यर्थः ।

**चषकः**— **कर्मप्रत्ययालम्बनं** कर्मप्रत्ययविषयः । **सन्तन्यमानं** सन्तानविशिष्टम् । **विषयोपप्लवः** विषयसम्बन्धः ।

**॥ इति सुखमोक्षयोरपि पञ्चस्कन्धान्तर्गतता ॥**
**॥ इति जगतः पञ्चस्कन्धात्मना स्थितिः ॥**
**॥ इति विभागनिरूपणम् ॥**
**॥ इति अपाक्रियमाणयोर्वैभाषिकसौत्रान्तिकमतयोर्मध्ये साधारणमतस्योपन्यासः ॥**

* * *

**॥ अथ उपन्यस्तस्य मतस्य निराकरणम् ॥**
**॥ अथ तत्रादौ उपन्यस्तमतनिराकरणपरतया एतदधिकरणगतानाम् अष्टानां सूत्राणां योजना ॥**
**॥ अथ तत्राप्यादौ प्रथमसूत्रार्थप्रदर्शनम् ॥**
**॥ अथ च तत्र समुदायनिराकरणम् ॥**
**॥ अथ तत्राप्यादौ समुदाये एकपरमाणुहेतुकत्वस्यायोगः सहेतुकः ॥**

८ **सु०**— एवं वैभाषिकसौत्रान्तिकयोः साधारणं मतमुपन्यस्य अवान्तरभेदं तु निरा-करणप्रस्ताव एव विवक्षुः, यत्तावदुक्तं 'परमाणुसमुदाय एव गोघटादिप्रपञ्चो न त्ववयवी कश्चिदस्ती'ति तन्निराकर्तुं **'समुदाय उभयहेतुकेऽपि तदप्राप्तिः'** इति सूत्रं व्याचष्टे **स इति** ।

**अनु०—   स समुदायो हि नैकस्मादेव युज्यते ।**

**योऽयं गोघटादिबुद्धिविषयत्वेनाभ्युपगतः समुदायः, स किमेकपरमाणुहेतुकः, किंवा अनेकपरमाणुहेतुकः ।**

**नाद्यः । एकस्मात्परमाणोः समुदायोत्पादानुपपत्तेः, न ह्येकैकस्मिंस्तरौ तरुसमुदायबुद्धिः कस्यापि विद्यते; समुदायकल्पनं वानर्थकमापद्येत, महत्त्वैन्द्रियकत्वयोरसमर्थितत्वात् । अनेन अपिशब्दलब्धोऽर्थो दर्शितः ।**

**परि०— अनेनेति** । युज्यत इत्यन्तेन ग्रन्थेन । उभयहेतुकेऽपीति सौत्रापिशब्दलब्धार्थ इत्यर्थः ।

**गु०दी०— एकस्मात् परमाणोः** इत्यत्र यद्यपि विरलादेकैकस्मात्तण्डुलात् तण्डुलसमुदायो भवतीति सर्वजनसम्प्रतिपन्नम् । इदं तु न परेण वक्तुं शक्यम् । अविरलपरमाणूनां सर्वत्र सत्त्वेन तत्समुदायस्यापि सर्वत्र सम्भवेन घटादिकार्यव्यवहारस्यापि स्थाननियमायोगात् । अतस्तदाकारेण समुदितपरमाणुभ्य एवोत्तरोत्तरक्षणिकाकारपरम्परा जायत इति वक्तव्यम् । कथमन्यथा घटे यावदवस्थानं क्षणिकत्वम् । अतः एकस्मादेवेत्यन्यसम्भावितपक्षस्य सम्भावितस्यापि तदनङ्गीकृतपक्षस्य दूषणमपिपदेन सूचयित्वा तृतीयपक्षमेव स्वपदेन दूषयति सूत्रकार इति टीकाकृतोऽभिप्रायः ।

० **यादु०**— नन्वेकस्मात्परमाणोः पारमार्थिकस्योत्पत्तेरनुपपन्नत्वेऽपि (समुदायस्य) सांवृतस्य तस्योत्पत्तिर्नानुपपन्नेत्यत आह **न ह्येकैकस्मिन्निति** । सांवृतोऽपि प्रतीत्यैव कल्प्यो नान्यथेति भावः ॥ **असमर्थितत्वादिति** । भ्रान्तिकल्पितसमुदायेन तयोरुपपादयितुमशक्यत्वादित्यर्थः ॥

**कं०रा०— महत्त्वेति** । महान् घट इत्यादिना प्रतीयमानमहत्त्वस्य तत्प्रत्यक्षत्वस्य च समर्थनार्थं खलु परमाणुसमुदायात्मकं घटादिकमिति परेण कल्पितम् । एकहेतुकः समुदाय इति पक्षे महत्त्वप्रत्यक्षत्वयोरसमर्थितत्वात् समुदायात्मकं जगदिति कल्पनं व्यर्थं, किन्त्वेकैकपरमाणुमात्रं जगदित्येव वक्तव्यमिति भावः । **अनेनेति** । 'स समुदायो हि नैकस्मादेव युज्यत' इत्यनेन समुदाय उभयहेतुकेऽपीति सूत्रस्थापिशब्दलब्धः एकहेतुकेऽपीति समुदायेऽङ्गीक्रियमाणे समुदायाप्राप्तिरेकस्मात्समुदायायोगादित्यर्थो दर्शित इत्यर्थः ।

**श्रीनिधि०**— वैभाषिकसौत्रान्तिकयोर्मतमस्मिन् अधिकरणे निरस्यते । एवञ्च दूष्यस्य तन्मतावान्तरभेदस्याननुवादान्न्यूनतेत्यत आह **एवं वैभाषिकेत्यादिना** । 'अनर्थकमापद्येते'त्युक्तं वैयर्थ्यमेव दर्शयति **मह-**

**त्वैन्द्रियकत्वयोरिति** । **अनेनापिशब्दलब्धोऽर्थो दर्शित इति** । **अनेन** 'नैकस्मादेव युज्यते' इत्यनेन । **अपिशब्दलब्धः** उभयहेतुकेऽपीत्यत्र विद्यमानअपिशब्दलब्धः ।

**शे०चं०— निराकरणप्रस्ताव एवेति** । 'विश्वं प्रत्यक्षगं त्यक्त्वा तयोर्योऽनुमितं वदेदि'त्यादिनेति शेषः । नन्वेकस्मादपि परमाणोः समुदायोत्पादः किन्न स्यादित्यतः तर्ह्यविशेषादेकस्मात्तरोरपि तत्समुदायोत्पादः स्यात् । न चेष्टापत्तिः । तथा सति यो यत्समुदायः स तत्समुदायत्वप्रतीतिविषय इति व्याप्तेः तरुसमुदाय-प्रतीतिप्रसङ्गादित्यतिप्रसङ्गमभिप्रेत्य तत्रेष्टापत्तिं परिहरति **न हीति** ॥ **महत्त्वेति** । कारणमहत्त्वतद्बहुत्वाभ्यां कार्ये महत्त्वदर्शनात् समुदायस्यैकपरमाणुहेतुकत्वे तन्निष्ठमहत्त्वप्रयोजकस्य कारणमहत्त्वस्य तद्बहुत्वस्य च अभावेन तत्प्रयुक्तस्य समुदाये महत्त्वस्याप्यसम्भवात् तदभावे च ऐन्द्रियकत्वप्रयोजकधर्मशून्यत्वेन ऐन्द्रियकत्वस्या-प्यभावप्रसङ्गादिति भावः ।

**स०व्र०— निराकरणेति** । 'विश्वं प्रत्यक्षगं त्यक्त्वा' इत्यादिना अवान्तरभेदं विवक्षुरित्यर्थः । **महत्त्वेति** । कार्यमहत्त्वस्य कारणबहुत्त्वाधीनत्वस्य अन्यत्र दर्शनात् समुदायस्य एकहेतुकत्वे उक्तप्रकारद्वयेनापि महत्त्वासम्भवात् ऐन्द्रियकत्वस्याप्यसम्भवादिति भावः ।

**विठ्ठ०— समुदायकल्पनमिति** । एकस्मिन्परमाणौ महत्त्वादिप्रतीत्यनुपपत्तेस्तदर्थं हि समुदाय-कल्पनाय एकस्मात्परमाणोः समुदायोत्पत्तिः तर्हि तादृशसमुदायेन महत्त्वप्रत्यक्षत्वयोरसमर्थनात् वैय्यर्थ्यं स्यादिति भावः । **अनेनेति** । 'नैकस्मादेव युज्यत' इत्यनेन सौत्रोऽपिशब्दो अनेकहेतुकेऽपीत्यर्थक इति दर्शित इत्यर्थः ।

**॥ इति समुदाये एकपरमाणुहेतुकत्वस्यायोगः सहेतुकः ॥**

* * *

**॥ अथ तत्र समुदायनिराकरणे समुदाये अनेकपरमाणुहेतुकत्वस्याप्ययोगः सहेतुकः ॥**
**॥ अथ तत्रादौ अनेकहेतुकत्वस्यायोगः ॥**

९ **सु०— द्वितीयं निराकरोति नेति** ।

## अनु०— नोभयोश्च

**उभयग्रहणमनेकमात्रोपलक्षणम्** । 'सकाशादि'ति शेषः । **चशब्देन 'समुदायो युज्यत'** **इत्यनुकृष्यते** ।

**श्रीनिधि०—** **नोभयोः** इत्युक्त्या बहुभ्यः समुदायोत्पत्तिपक्षे किमपि दूषणं नोक्तमिति प्रतीयते। तथाच न्यूनतेत्यत आह **उभयग्रहणमिति**।

**॥ इति तत्र अनेकहेतुकत्वस्यायोगः ॥**

* * *

**॥ अथ समुदायनिराकरणे अनेकहेतुकत्वस्यायोगे कारणद्वयं विकल्प्य तदयोगस्य समर्थनम् ॥**

**॥ अथ तत्रादौ असमुदितानेकहेतुकत्वे सर्वत्र गोघटादिबुद्धिप्रसङ्गः, समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्च ॥**

१० **सु०—** कुतो न युज्यत इति चेत्। अनेकहेतुकत्वेऽपि किमसमुदितानेकहेतुकोऽथ समुदितानेकहेतुक इति वक्तव्यम्।

आद्ये सर्वत्र(ापि) गोघटादिबुद्धिप्रसक्तिः; असमुदितपरमाणूनां सर्वत्र भावात्, समुदायस्य च तन्मात्रहेतुकत्वात्, समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्च।

७आ **वं०प०—** नन्वसमुदितपरमाणूनां सर्वत्र सत्त्वेऽपि समुदायाभावान्न सर्वत्र गोघटादिबुद्धिप्रसङ्ग इत्यत आह **समुदायस्य चेति**। तथा च समुदायाभावोऽसिद्ध इति भावः॥ **समुदायाङ्गीकारेति**। विरलानेकपरमाणूनां सदा सत्त्वेन तज्जन्यसमुदायस्यापि सदा सत्त्वात् प्रलयो न स्यादित्यतिप्रसङ्गस्यापरिहारेण समुदायाङ्गीकारो व्यर्थ इत्यर्थः। यद्वा एको महानित्यादिविरोधपरिहाराय महत्त्वैन्द्रियकत्वसमर्थनाय हि समुदायोऽङ्गीक्रियते। न चैवं सति तौ समर्थितौ भवतः। कारणस्य स्वसदृशकार्यजननस्वभावत्वेन विरलानेकपरमाणुभ्यः सम्मेलनरूपसमुदायोत्पत्त्ययोगेन समुदायस्यानेकत्वरूपतैव वाच्या। अनेकपरमाणव एव समुदायः। तदनेकत्वमेव समुदायत्वमिति वाच्यमिति यावत्। तथाच विरलपरमाणुभिरनेकपरमाणुरूपसमुदायाङ्गीकारेऽपि, महत्त्वैन्द्रियकत्वयोरसमर्थितत्वादन्योन्यसंयोगरूपसमुदायस्यैव महत्त्वाद्युपपादकत्वात्। तथा च एको महानित्यादिप्रत्यक्षप्रत्ययविरोध इति पूर्वोक्तातिप्रसङ्गानिवारणात् समुदायाङ्गीकारो व्यर्थ एवापन्न इत्यर्थः।

**कं०रा०—** **तन्मात्रेति**। असमुदितपरमाणुमात्रहेतुकत्वादित्यर्थः।

**श्रीनिधि०—** असमुदितानां गुणानां सर्वत्र भावेऽपि न तत्र गोघटादिबुद्धिप्रसक्तिः। समुदायविशेषविषयकत्वात् तस्य, तस्य चाभावादित्यत आह **समुदायस्य चेति**। सत्यां सामग्र्यां कार्योत्पादावश्यम्भावादिति भावः। **समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्चेति**। महत्त्वैन्द्रियकत्वयोरसमर्थितत्वादिति भावः।

**शे०चं०—** नन्वसमुदितानेकहेतुकत्वाभ्युपगमात् 'उभयत्वं यत्समुदायव्यपेक्षये'त्यन्योन्याश्रयत्वकथनानुपपत्तिरित्यतः समुदितानेकहेतुकत्व एव तदभिधानान्न तदनुपपत्तिरित्यभिप्रेत्य तत्पक्षनिराकरणपरतयोत्तरभाष्यं योजयितुमनेकहेतुकत्वं विकल्प्य प्रथमपक्षं तावद्बहिरेव दूषयति **अनेकहेतुकत्वेऽपीति**। यद्यप्यत्र 'अन्यथा सर्वदा समुदायत्वं स्यादि'ति भाष्यानुसारेण अमिलितपरमाणूनां सदा सद्भावेन समुदायस्यापि सदातन-

त्वापत्त्या प्रलयाभ्युपगमविरोधापत्तिरिति बाधकं वक्तुं शक्यते । तथाऽपि स्पष्टत्वात् तच्छिष्यैरेवोह्यतामिति भावेन अतिप्रसङ्गान्तरमेवाह **आद्ये सर्वत्रेति** । न च कालकर्मादिनिमित्तस्य क्काचित्कत्वान्न सर्वत्र समुदायोत्पत्तिरिति सर्वत्र गोघटादिबुद्ध्यभावो युक्त इति वाच्यम् । 'अदृष्टमपि तस्यैव विशेषापादकं कुत' इत्यादिना तस्य दूषयिष्यमाणत्वेन तद्बलेनोक्तातिप्रसङ्गपरिहारानुपपत्तौ तात्पर्यात् ॥ **समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्चेति** । महत्त्वैन्द्रियकत्वयोरसमर्थनादिति भावः । यद्यप्यस्मिन्पक्षेऽसमुदितपरमाणूनामनेकत्वात् तद्धेतुके समुदाये तत्प्रयुक्तं महत्त्वं तत्प्रयुक्तं चैन्द्रियकत्वं वक्तुं युक्तं, तथाऽपि सन्निकृष्टकारणगतानेकत्वस्यैव कार्ये महत्त्वारम्भकत्वदर्शनात् प्रकृते च तद्विरहान्न महत्त्वारम्भ इत्याशयात् ।

**स०व्र०— आद्ये सर्वत्रापीति** । यद्यप्यत्र 'अन्यथा सर्वदा समुदायसत्त्वं स्यादि'ति भाष्य उक्तत्वात् समुदायस्य सदा सत्त्वं स्यात् ततश्च प्रलयाद्यनुपपत्तिरित्येव वक्तव्यम् । तथाऽपि तद्भाष्यमुपलक्षणाभिप्रायमित्याशयेनात्र अतिप्रसङ्गान्तरमेतदुक्तमिति ज्ञातव्यम् । न च कालकर्मादिनिमित्तस्य क्काचित्कत्वान्न सर्वत्रापि गोघटादिबुद्धिप्रसङ्ग इति वाच्यम् । 'अदृष्टमपि तस्यैव विशेषापादकं कुत' इत्यग्रे तस्य दूष्यत्वादित्याशयात् ॥ **समुदायाङ्गीकारेति** । असमुदितानेकेष्वङ्गीक्रियमाणः समुदायो ह्यनेकत्वरूपो वा सांवृतो वा वक्तव्यः । न च ताभ्यां महत्त्वेन्द्रियकत्वादेः समर्थनं सम्भवति । यस्तु महत्त्वाद्युपपादकोऽन्योन्यसंयोगरूपः समुदायः स नासमुदितानेकेष्वङ्गीकर्तुं शक्यः । संयोगस्य विरलानेकधर्मत्वासम्भवात् । अतोऽसमुदितानेकेष्वङ्गीक्रियमाणस्यानेकत्वरूपस्य सांवृतस्य वा समुदायस्य महत्त्वाद्यनुपपादकत्वादन्यस्य च तदङ्गीकारप्रयोजनस्य त्वन्मतेऽभावात् समुदायाङ्गीकारो व्यर्थः स्यादित्यर्थः । **वैयर्थ्यप्रसङ्गश्चेति** । महत्त्वैन्द्रियकत्वयोरसमर्थनादिति भावः । न च अस्मिन् पक्षे असमुदितपरमाणूनामनेकत्वात् कार्ये समुदाये महत्त्वस्य तत्प्रयुक्तैन्द्रियकत्वस्य च उपपत्तिरिति वाच्यम् । 'सन्निकृष्टानेकत्वस्यैव कार्ये महत्त्वसम्पादकतया अन्यत्र दृष्टत्वात्' प्रकृते तदभावात् तयोरनिर्वाहादित्याहुः ।

**विठ्ठ०—** परमाणूनां सर्वत्र सत्त्वेऽपि तत्र समुदायाभावान्न सर्वत्र गोघटादिबुद्धिप्रसङ्ग इत्यत आह **समुदायस्य चेति** । विरलानेकपरमाणुमात्रहेतुकत्वं समुदायस्योक्तम्, विरलाश्रयपरमाणवः सन्ति सर्वत्र, अतः सर्वत्र गोघटादिबुद्धिप्रसङ्गो युक्त इति भावः । किञ्च समुदायोत्पत्त्यभ्युपगमोऽपि व्यर्थः । त्वया परमाणूनां मेलनस्यानभ्युपगमात् । विरलानां सदा सत्त्वेन तेभ्य एव गोघटादिप्रत्ययोत्पत्तिसम्भवादित्याशयेनाह **समुदायाङ्गीकारेति** ।

**चषकः— तन्मात्रहेतुकत्वात्** असमुदितपरमाणुमात्रहेतुकत्वात् ।

**॥ इति तत्र असमुदितानेकहेतुकत्वे सर्वत्र गोघटादिबुद्धिप्रसङ्गः, समुदायाङ्गीकारवैयर्थ्यप्रसङ्गश्च ॥**

* * *

॥ अथ तत्र समुदितानेकहेतुकत्वे अन्योन्याश्रयदोषप्रदर्शनपूर्वकः एतत्सूत्रार्थोपसंहारः ॥

११ सु०— द्वितीयानुपपत्तौ हेतुमाह **उभयत्वमिति** ।

**अनु०— उभयत्वं यत्समुदायव्यपेक्षया ।**

**यत्** यस्मात् **उभयत्वं** समुदितानेकत्वं, समुदायसापेक्षम् । जाते हि समुदायेऽनेकेषां समुदितत्वं (सं)भवति । तस्मान्नेति सम्बन्धः ।

'समुदितानेकत्वस्य समुदायसापेक्षत्वेऽपि कुतस्ततः समुदायोत्पादो न युज्यते' इत्याशङ्कां परिहरत्सूत्रार्थमुपसंहरति **अत इति** ।

**अनु०— अतोऽन्योन्याश्रयत्वेन समुदायो न युज्यते ।**

समुदायस्य समुदितानेकेषां चेतरेतरापेक्षोत्पत्तिकत्वेनेत्यर्थः । समुदायानु(त्पत्तौ)पपत्तौ चाणूनां महानेक इति प्रत्यक्षबुद्धिगोचरताऽयोगादवश्यमङ्गीकरणीयोऽवयवीति ।

वं०प०— इतरेतरेति । समुदितानेकतः समुदायः समुदाये सत्यनेकेषां समुदितत्वमित्येवमितरेतरापेक्षोत्पत्तिकत्वेनेत्यर्थः ।

कं०रा०— इतरेतरापेक्षेति । समुदायोत्पत्तौ समुदितानेकोत्पत्तिः समुदितानेकोत्पत्तौ च तद्धेतुकसमुदायोत्पत्तिरित्यन्योन्यापेक्षोत्पत्तिकत्वेनेत्यर्थः ।

* * *

८अ ॥ अथ समुदितानेकहेतुत्वे अन्योन्याश्रयप्रदर्शने अस्य अन्योन्याश्रयदोषस्य उपलक्षणपरतया व्याख्यानम् ॥

॥ अथ च तत्र समुदाये अवयवीत्वप्रसङ्गापादनम् ॥

॥ अथ च तत्राप्यादौ समुदाये विकल्पत्रयकल्पनपूर्वकं तृतीयविकल्पे अवयवीत्वप्रसङ्गापादनम् ॥

१२ सु०— किञ्चायं समुदायः किं परमाणूनां संयोगः, किंवाऽनेकत्वसङ्ख्या, उत द्रव्यान्तरम् । नाद्यद्वितीयौ; (त्वया) अनङ्गीकारात्; अङ्गीकारेऽप्यतीन्द्रियाश्रितयोस्तयोरैन्द्रियकत्वानुपपत्तिः । तृतीये स एवावयवी ।

**यादु०**— अन्योन्याश्रयत्वेनेति मूलमुपलक्षणपरमित्याशयेनाह **किञ्चायमित्यादि** ॥ **अनङ्गीकारादिति** । द्रव्यातिरिक्तसङ्ख्यादेरनङ्गीकारादित्यर्थः ॥

**कं०रा०**— **त्वयेति** । सन्निकृष्टविप्रकृष्टतयोत्पाद एव संयोगविभागव्यवहारविषयो न तु संयोगादिर्नाम कश्चिदस्तीति सङ्ख्यादयस्तु गुणाः पृथगनुपलम्भान्न सन्त्येवेति च वदता त्वया संयोगसङ्ख्ययोरनङ्गीकृतत्वादित्यर्थः । **तयोरिति** । संयोगसङ्ख्ययोरित्यर्थः ।

**श्रीनिधि०**— **अनङ्गीकारादिति** । सङ्ख्यासंयोगयोरनङ्गीकारादित्यर्थः । **ऐन्द्रियकत्वानुपपत्तिरिति** । तथा च समुदायाङ्गीकारो व्यर्थ एवेति भावः ।

**शे०चं०**— अन्योन्याश्रयत्वेनेति मूलमुपलक्षणपरमित्याशयवानाह **किञ्चेति** ॥ **ऐन्द्रियकत्वानुपपत्तिरिति** । द्रव्यग्रहणयोग्यताव्यापकयोग्यताकत्वात् संयोगानेकत्वसङ्ख्ययोरिति भावः ॥ **स एवावयवीति** । तथा च परमाणुसमुदायं गोघटादिबुद्धिबोध्यमङ्गीकुर्वाणेन परमाणुभिन्नद्रव्यान्तररूपस्य अवयविनोऽङ्गीकृतत्वेन परमाणुव्यतिरिक्तोऽवयवी नाम नास्तीति प्रतिज्ञाव्याघात इति भावः ॥

**वा०र०**— आश्रयातीन्द्रियत्वेऽपि कुतः संयोगादेरतीन्द्रियत्वमित्यत आह **द्रव्यग्रहणेति** । यत्र गुणानां ग्रहणयोग्यता तत्र द्रव्यग्रहणयोग्यतेति व्याप्तेः प्रकृते द्रव्यस्य ग्रहणे योग्यताया अभावेन व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात् तद्व्याप्यगुणस्यापि ग्रहणयोग्यता नास्तीति ऐन्द्रियकत्वानुपपत्तिरित्यर्थः । क्वचिदपि यन्महत्त्वादेर्वास्तवत्वं तद्भिनेत्यर्थः ।

**विठ्ठ०**— **अनङ्गीकारादिति** । सङ्ख्यादयस्तु गुणाः पृथगनुपलम्भान्न सन्त्येवेति सन्निकृष्टोत्पाद एव संयोग इति च तैरङ्गीकारादिति भावः । **स एवावयवीति** । तथा चावयविनः परमाणुभ्योऽन्यत्वप्राप्त्या परमाणूनामेव गोघटादिबुद्धिरहितत्वमिति गतः पक्ष इति भावः ।

**चषकः**— **अतीन्द्रियाश्रितयोस्तयोः** संयोगानेकत्वसङ्ख्ययोः । **ऐन्द्रियकत्वानुपपत्तिः** । इन्द्रियजन्यसाक्षात्कारनिरूपितलौकिकविषयताश्रयत्वानुपपत्तिः । द्रव्यग्रहणयोग्यताव्यापकयोग्यताकत्वात् संयोगविभागयोरिति भावः ।

**॥ इति समुदाये विकल्पत्रयकल्पनपूर्वकं तृतीयविकल्पे अवयवीत्वप्रसङ्गापादनम् ॥**

* * *

**।। अथ च तत्र समुदाये अवयवीत्वप्रसङ्गापादने समुदाये तृतीयविकल्पे अवयवीत्वप्रसङ्गस्य प्रसङ्गाभावशङ्का तन्निरासश्च ।।**

१३ **सु०—** सांवृतोऽसाविति चेत्, तर्हि पुनर्महानित्यादिप्रमानुपपत्तिस्तदवस्थैव । भ्रान्तिरियमिति चेत् (न), भ्रान्तेरभ्रान्तिपूर्वकत्वेन क्वचिन्महत्त्वादेः वास्तवत्वप्रसङ्गात् । अनादिवासनावशादनादिरेवेयं भ्रान्तिरिति चेन्न, नीलादिज्ञानस्यापि तथात्वप्रसङ्गात् ।

**परि०— नीलादिज्ञानस्यापि तथात्वप्रसङ्गादिति** । तथाच रूपादिस्कन्धानामपि सत्त्वाभावेन क्षणिकत्वं न स्यादिति भावः ।

**यादु०— नीलादिज्ञानस्येति** । तथा च रूपादिस्कन्धानां सत्त्वाभावेन क्षणिकत्वं न स्यादिति भावः ।

**कं०रा०— सांवृत इति** । असौ महत्त्वविशिष्टोऽवयवी सांवृतः आविद्यक इत्यर्थः । **अनादीति** । पूर्वपूर्वमहत्त्वादिभ्रमजनिता प्रवाहतोऽनादिर्या वासना तद्वशात् प्रवाहतो अनादिरेवेयं महत्त्वादिभ्रान्तिरतो न कश्चिन्महत्त्वादेर्वास्तवत्वं प्रसज्यत इति भावः ।

**श्रीनिधि०— सांवृत इति** । संवृतिरविद्या तत्कार्यं कल्पित इति यावत् । **भ्रान्तेरभ्रान्तिपूर्वकत्वेनेति** । **क्वचित्** प्रमितस्य **क्वचित्** आरोपः । अन्यथा भ्रमहेतुसंस्कारोदयायोगादिति भावः । **तथात्वप्रसङ्गादिति** । नीलादिज्ञानं च प्रमैवेति तेनाङ्गीकारादनिष्टमिति द्रष्टव्यम् ।

**शे०चं०— सांवृत इति** । पारमार्थिक एवावयवी पूर्वं निषिद्धो, न कल्पितोऽपीति कल्पितावयव्यभ्युपगमे न व्याघात इति भावः । समुदायस्य कल्पितत्वे तद्विषयस्यैको महानित्यादिप्रत्ययस्य प्रमात्वाभावापत्त्या तत्प्रमात्वसिद्धयर्थं समुदायस्य पारमार्थिकत्वस्यावश्याभ्युपगम्यत्वात् प्रतिज्ञाव्याघातोऽवर्जनीय एवेत्याशयेन परिहरति **तर्हीति** । एको महानित्यादिप्रत्ययस्य भ्रमत्वात् प्रमात्वाभाव इष्ट एवेति तदापादनमिष्टापादनमेवेत्याशङ्कते **भ्रान्तिरेवेति** । तथा च तद्विषयस्य कल्पितत्वान्न व्याघात इति भावः । भ्रान्तेः सत्यप्रधानसापेक्षत्वेन क्वचिदपि महत्त्वादेर्वास्तवत्वं विनाऽयोगात् क्वचिद्वास्तवत्वं वाच्यम् । तथा च यत्रैव महत्त्वादिकं वास्तवं, तस्यैवावयविनः पारमार्थिकत्वादुक्तप्रतिज्ञाविरोधतादवस्थ्यमित्याशयेन समाधत्ते **भ्रान्तेरिति** । ननु प्रधानं न स्वरूपेण भ्रान्तिहेतुः तथा सति अज्ञातरजतस्यापि तत्समारोपप्रसङ्गात् । नापि ज्ञानेन तस्य चिरविनष्टस्य भ्रमकारणताया बाधितत्वात् । किन्तु तत्संस्कारः स च तत्प्रमयेव तद्भ्रमेणापि सम्भवति । न च प्रमाजन्य एव संस्कारो भ्रमहेतुः । सत्यपि संस्कारे प्रमाजन्यत्वाभावेन भ्रमाभावादर्शनात् । न च अध्यस्तमेव देशान्तरादौ सदिति त्वया वक्तुं युक्तम् । तथा सति तार्किकचरणानुसरणप्रसङ्गात् । न च प्रथमारोपानुपपत्तिः अनादित्वात्

आरोपपरम्परायाः । न हीदं पूर्वोऽयं महत्त्वादेरारोपः । न च कल्पाद्यभ्रमानुपपत्तिः । पूर्वकल्पानुभवजन्यसंस्कारस्य तत्रापि सद्भावात् । ततश्चावयविनो वास्तवत्वाप्राप्तेर्न प्रतिज्ञाव्याघात इत्याशयेन शङ्कते **अनादीति** । अनादिभ्रमप्रवाहोत्पन्नसंस्कारवशादित्यर्थः ॥ **नीलादिज्ञानस्यापीति** । महत्त्वादिज्ञानस्यानादिवासनावशादनादिभ्रान्तित्वात् क्वचिदपि महत्त्वादेर्वास्तवत्वाभाववत् नीलादिज्ञानस्याप्यनादिवासनावशादनादिभ्रान्तिताया वक्तुं शक्यत्वेन तद्विषयस्य नीलादेरपि वास्तवत्वाभावापत्त्या रूपादिस्कन्धानां सत्त्वाभावात् क्षणिकत्वाभावप्रसङ्गादिति भावः ।

**वा०र०**— न चात्मन्यनात्मभ्रमः कुत्रापि दृष्ट इत्येतत् तत्त्वनिर्णयवाक्यावताररूपटीकायां 'प्रधानं किंस्वरूपेणे'त्याद्युक्तं मिथ्यात्वहेतूनां प्रतिकूलतर्ककथनावसरे किन्तु तत्संस्कार इत्यादि च न्यायामृते उक्तम् । समानन्यायेनात्र तदुभयानुसारेणावतारयति **ननु प्रधानमित्यादिना** । यद्युक्तरीत्या प्रकारद्वयेनापि प्रधानस्य हेतुत्वाभावः कस्तर्हि हेतुरित्याशयेन पृच्छति **किन्त्विति** । उत्तरमाह **तत्संस्कार इति** ।

**स०व्र०**— **नीलादिज्ञानस्यापि इति** । क्वचिदपि महत्त्वादेः वास्तवत्वाभावेऽपि अनादिवासनावशान्महत्त्वज्ञानस्येव अनादिभ्रान्तित्वोपपत्त्या क्वचिदपि नीलादेः वास्तवत्वं न स्यादित्यर्थः ।

**विट्ठ०**— **सांवृत इति** । व्यावहारिक इत्यर्थः । **महानित्यादीति** । गोघटादिरूपावयविनः पारमार्थिकत्वाभावे महानेक इत्यादि प्रमारूपज्ञानोत्पत्तिर्न स्यात् । निर्विषयाया प्रमाया अनुपपन्नत्वादिति भावः । **भ्रान्तिपूर्वकत्वेनेति** । अधिष्ठानसदृशतथ्यवस्तुद्वयप्रमापूर्वकत्वेनेत्यर्थः । **नीलादिज्ञानस्यापीति** । तथा च नीलादिपदोक्तरूपादिस्कन्धज्ञानस्यापि भ्रान्तित्वप्रसङ्गेन रूपादीनां सत्त्वानुपपत्तेः तेषां क्षणिकत्वं च न स्यादिति भावः ।

**चषकः**— **सांवृतः** संवृतिपदाभिधेयाविद्याहेतुकोऽपारमार्थिकः ।

* * *

**॥ अथ समुदायस्यावयवीत्वे बाधकशङ्का ॥**

**१४ सु०— ननु विषममिदमुच्यते, अवयविनि बाधकसद्भावात् । तथा हि । अवयवी किमवयवेषु प्रत्येकं कार्त्स्न्येन वर्तते, किं वैकदेशेन ? आद्येऽनेकत्वप्रसङ्गः । न द्वितीयः, तस्यावयवान्विहायैकदेशाभावात्; भावे वा (त) अत्रापि वृत्तिविकल्पप्रसङ्गात् ।**

**किञ्च केषुचित्तन्तुषु चलत्सु तद्गतोऽवयवी चलति न वा । नेति पक्षे युतसिद्धिप्रसङ्गः । आद्ये तु 'निश्चलावयवाश्रितो न चलती'ति चलाचलत्वलक्षणो विरुद्धधर्माध्यासः ।**

**एवमावृतानावृतत्वरक्तारक्तत्वलक्षणावपि विरुद्धधर्माध्यासौ द्रष्टव्याविति ।**

**परि०— विषममिति** । अतिरिक्तावयविज्ञानस्य भ्रान्तित्वे नीलादिज्ञानस्यापि तथात्वमित्येतद्विषममित्यर्थः । अवयविनीव नीलादौ बाधकाभावादिति भावेनाह **अवयविनीति** ॥ **अत्रापि वृत्तिविकल्पेति** । एकदेशेष्वपि किं प्रत्येकं कात्स्न्र्येन वर्ततेऽथैकदेशेन । आद्येऽनेकत्वप्रसङ्गः, अन्त्ये ततोऽप्येकदेशाभावात् । भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गेनानवस्था स्यादिति भावः ॥ **एवमावृतेति** । केषुचित्तन्तुष्वावृतेषु रक्तेषु वा पटस्यावृतत्वे रक्तत्वे वाऽनावृतारक्तावयवान्तरगतस्यानावृतत्वादिविरुद्धधर्माध्यासौ ज्ञेयावित्यर्थः ॥

**गु०दी०— एवमावृतानावृतत्वरक्तारक्तत्वे** इत्यत्र आवृतत्वमेकभागस्य हस्तेन आवृतत्वम् । एकभागस्य अनावृतत्वम् । चित्रपटे एकत्र रक्तत्वमन्यत्र अरक्तत्वमित्यर्थः ।

**कं०रा०— प्रत्येकमिति** । एकैकावयव इत्यर्थः । **अनेकत्वप्रसङ्ग इति** । अवयविन इति शेषः । भूतलादिषु प्रत्येकं कात्स्न्र्येन वर्तमानेष्वनेकेषु घटादिष्वापाद्यापादकव्याप्तेर्दृष्टत्वादिति भावः । **तस्येति** । अवयविनोऽवयवान्विहायैकदेशाभावादवयवे चावयविनो वृत्त्ययोगादिति भावः । **भावे वेति** । अवयविनोऽवयवातिरिक्तैकदेशभावे वा सोऽप्येकदेशः स्वावयवेषु किं प्रत्येकं कात्स्न्र्येन वर्तते उतैकदेशेन ? आद्येऽनेकत्वप्रसङ्गः । न द्वितीयः तस्यावयवान्विहायैकदेशाभावादिति विकल्पदूषणप्रसङ्गादित्यर्थः ।

**श्रीनिधि०— अवयविनि बाधकसद्भावादिति** । नीलादौ तु बाधकं नास्तीति भावः । **अनेकत्वप्रसङ्ग इति** । अवयवानामनेकत्वात् तत्र च कात्स्न्र्येन वृत्तौ स्वानेकत्वस्य दुष्परिहरत्वादित्यर्थः । **तत्रापि वृत्तिविकल्पप्रसरादिति (प्रसङ्गादिति)** । येनैकदेशेन तिष्ठति स चैकदेशः किं तन्त्ववयवेषु प्रत्येकं कात्स्न्र्येन वर्तते उत एकदेशेन । आद्ये एकदेशस्यानेकत्वप्रसङ्गः । न द्वितीयः, तन्त्ववयवातिरिक्तस्य तदेकदेशस्याभावात् । भावे वा तत्राप्येवमिति विकल्पप्रसरादित्यर्थः । **विरुद्धधर्माध्यास इति** । तथा च पटभेदः स्यादिति भावः । **एवमावृतानावृतरक्तारक्तत्वेति** । द्वन्द्वान्ते श्रूयमाणस्त्वप्रत्ययः सर्वत्रान्वेति । हस्ताद्यवच्छिन्नप्रदेशे **आवृतः** अन्यत्र **अनावृतः** । चित्रपटे क्वचित् **रक्तत्वं** क्वचित् तदभाव इत्यर्थः ।

**शे०चं०—** ननु महत्त्वादिज्ञानस्यानादिवासनावशादनादिभ्रान्तित्वेन नीलादिज्ञानस्यापि तथात्वप्रसङ्ग इति तर्के मूलभूता व्याप्तिर्न विशेषतो वक्तुं शक्या दृष्टान्ताभावात् । नापि यदविशिष्टस्य यस्य यद्भवति तदविशिष्टस्यापरस्यापि तद्भवतीत्यविशेषलक्षणा सामान्यव्याप्तिस्तन्मूलतया वक्तुं शक्या । बाधकभावाभावाभ्यां महत्वादिज्ञानस्य नीलादिज्ञानस्य च वैषम्येण तदसिद्धेरित्याशङ्कते **ननु विषममिति** । **कात्स्न्र्येन** स्वरूपेणेत्यर्थः । **एकदेशेन** अवयवशः ॥ **अनेकत्वप्रसङ्ग इति** । अवयवानामनेकत्वादिति भावः ॥ **एकदेशाभावादिति** । तत्र मानाभावादिति भावः । ननु पटाद्यवयवतन्त्वाद्यतिरिक्ता हस्तवितस्त्याद्यवच्छेद्यास्तदेकदेशाः प्रत्यक्षत एवानुभूयन्ते । न हि पटो हस्तवितस्त्याद्यवच्छिन्नः तस्य ततोऽधिकपरिमाणत्वात् । नापि तन्तवः ।

तेषां ततो न्यूनपरिमाणत्वात् । तत्कथमवयवातिरिक्तैकदेशाभाव इत्यत आह **भावे वेति** ॥ **अ(त)त्रापीति** । अवयवातिरिक्तखण्डपटादिरूपैकदेशेष्वपीत्यर्थः । तेषामपि तन्त्वाद्यारब्धतया तत्कार्यत्वात् तन्तुष्वेव वृतिर्वाच्या । तत्राप्येकदेशाः किमवयवेषु प्रत्येकं कात्स्न्र्येन वर्तन्त उतैकदेशतः । आद्येऽनेकत्वप्रसङ्गः । नान्त्यः । तेषामवयवातिरिक्तैकदेशाभावात् । भावे वा तेषामपि तन्त्वाद्यारब्धतया तत्कार्यत्वात् तेषु वृत्तिर्वाच्या । साऽपि किं प्रत्येकं कात्स्न्र्येन, किं वा एकदेशत इति । एकदेशेन वृत्तौ तत्र तत्राप्येकदेशान्तरापेक्षायामनवस्थाप्रसङ्गादिति भावः । **विकल्पप्रसरादित्युपलक्षणम्** । तद्दूषणप्रसरादित्यपि द्रष्टव्यम् ॥ **युतसिद्धिप्रसङ्ग इति** । असम्बद्धयोर्विद्यमानत्वप्रसङ्ग इत्यर्थः । **आद्य इति** । निश्चलावयवस्यावयविनोऽपि चलने युतसिद्धिप्रसक्तेरिति भावः ॥ **एवमावृतत्वानावृतत्वेति** । केषुचित्तन्तुष्वावृतेषु तद्वतोऽवयव्यावृतो न वा । नेति पक्षे युतसिद्धिप्रसङ्गः । आद्येऽनावृताश्रितस्य पटस्यावृतत्वे युतसिद्धिप्रसक्तेरनावृतत्वावश्यम्भावादावृतत्वानावृतत्वलक्षणविरुद्धधर्माध्यासः । एवं रागिद्रव्यार्धलिप्ते पटादौ रक्तत्वारक्तत्वलक्षणविरुद्धधर्माध्यास इत्यर्थः । यद्यप्येकावयवसहितस्योपलम्भेऽपि अन्यावयवसहितस्यानुपलम्भाद् ग्रहणाग्रहणलक्षणविरुद्धधर्माध्यासोऽपि परेण वर्णितः । तथाऽप्यावृतत्वानावृतत्वलक्षणविरुद्धधर्माध्यासोक्त्यैव तत्सिद्धेस्तस्यानुपन्यासो युक्तः । यद्वा, ग्रहणाग्रहणलक्षणविरुद्धधर्माध्यासस्याप्युपलक्षणमेतदिति द्रष्टव्यम् ।

**वा०र०—** एवकारः कारणातिरिक्तांशाभावादित्यादि तत्त्वविवेकटीका-तद्व्याख्यान-व्यासतीर्थ्यनुसारेण आशङ्कते **ननु पटाद्यवयवेति** । हस्तवितस्त्याद्येकदेशाङ्गीकारेऽपि पटस्येव तदेकदेशानामपि अवयवभूततन्तुषु अवस्थानानुपपत्तेरेकदेशाङ्गीकारो व्यर्थ इति चेत् । अत्र ब्रूमः ...... । **परेण वर्णित इति** । अत एवोक्तं ........ इति भावः ।

**स०व्र०—** **कात्स्न्र्येन** स्वरूपेणेत्यर्थः । **एकदेशेन** अवयवशः । अवयवी तन्तुषु एकदेशेन वर्तते इति द्वितीयेऽपि किं आरम्भकावयवैरेव तेषु अवयवी वर्तते किंवा तदतिरिक्तावयवैरिति विकल्पं मनसि निधाय आद्यं दूषयति **तस्य अवयवान्विहाय एकदेशाभावादिति** । अवयविनो अवयवेषु अवयवैरेव वृत्त्यभ्युपगमे आरम्भकावयवव्यतिरिक्ता अवयवाः अवश्यं कल्पनीयाः स्युः । यैः आरम्भकेषु अवयवेषु अवयवी वर्तेत । न च अप्रयोजकत्वम् । यत्र यद्वर्तते तत् तदतिरिक्तावयवैरेव वर्तते इति व्याप्तेरेव नियामकत्वात् । कोशावयवव्यतिरिक्तैरवयवैरेव कोशव्यापित्वदर्शनादिति भावः । द्वितीयं दूषयति **भावे वा इति** । आरम्भकावयवव्यतिरिक्तावयवानां तन्तुषु वृत्तिर्वाच्या । तथा च तत्रापि एकदेशानां अवयवेषु कात्स्न्र्येन वृत्तौ अनेकत्वापत्त्या यत् यत्र वर्तते तत् तदतिरिक्तावयवैरेव वर्तत इत्युक्तव्याप्त्यनुरोधेन आरम्भकव्यतिरिक्तावयवानामपि अतिरिक्तावयवैरेव तन्तुषु वृत्तिरङ्गीकरणीया । एवं तेषामपि अवयवानामिति कल्पितानन्तावयवव्यवहिततया प्रकृततन्त्ववयविनोर्विप्रकर्षात् तन्तुनिष्ठत्वं पटस्य न स्यादिति भावः । **तत्रापीत्यस्य** आरम्भकावयवातिरिक्तावयवेषु इत्यर्थः । **वृत्तिविकल्पेति** । पटस्येति शेषः । अवयवातिरिक्तानामेकदेशानामभावे तस्याप्येकदेशस्यावयवित्वेन

अवयवेषु तन्तुषु प्रत्येकं कात्स्न्र्येन वृत्तौ अनेकत्वप्रसङ्गः । एकदेशानां अभावात् न एकदेशेन । भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गादित्यर्थः ।

**विठ्ठ०**— ननु नीलादिव्यतिरिक्तावयविज्ञानस्य भ्रान्तित्वे नीलादिज्ञानस्यापि भ्रान्तित्वं स्यादित्येतद्विषमम् । अवयविनीव नीलादौ बाधकाभावादिति शङ्कते **ननु विषममिति** । **अवयवेषु प्रत्येकमिति** । एकैकावयवेष्वपीत्यर्थः । **अवयवान्विहायेति** । तदवयवास्तदेकदेशा इत्यनयोरेकार्थत्वादिति भावः । **भाव इति** । अवयवातिरिक्तैकदेशेष्वपि सदैकदेशः किमवयवेषु प्रत्येकं कात्स्न्र्येन वर्तते उतैकदेशेन । आद्ये अनेकत्वप्रसङ्गः । द्वितीये ततोऽन्यैकदेशाभावात् । भावे वा तत्रापि वृत्तिविकल्पप्रसङ्गेनानवस्था स्यादिति भावः । **युतसिद्धत्वप्रसङ्ग इति** । एकपटावयवभूततन्तूनां मध्ये केषाञ्चिच्चलनेऽपि यदि पटो चलति तर्हि चलत्तन्तुपरिहारेण पटावस्थानप्रसत्त्या युतसिद्धत्वं स्यादित्यर्थः । **निश्चलावयवाश्रित इति** । एकपटावयवभूततन्तूनां मध्ये केषुचित्तन्तुषु चलत्सु तदाश्रितावयवी चलति तदन्यनिश्चलतन्त्वाश्रितः स एवावयवी न चलतीत्येवमेकस्यैवावयविनश्चलत्वाचलत्वलक्षणविरुद्धधर्मादिकरणत्वं स्यादित्यर्थः । **एवमावृतेति** । अनेकतन्त्वाश्रित एकोऽवयवीऽस्तीत्यङ्गीकारे तत्र तदवयवेषु केषुचित्तन्तुषु चर्मादिभिरावृत्तेषु महारजनादिना रक्तेषु वा तदाश्रितोऽवयवी आवृतो रक्तश्च अनावृतारक्ततन्त्वाश्रितोऽवयवी तु अनावृतो न रक्तश्चेत्येकस्यैवावयविनः आवृतत्वानावृतत्वरक्तत्वारक्तत्वरूपावपि विरुद्धधर्माध्यासौ स्यातामित्यर्थः । न चांशभेदेनाविरोध इति वाच्यम् । अवयविखण्डत्वेनांशाभावात् । अवयवानां च अवयव्याश्रयतया तदत्यन्तभिन्नत्वे विरुद्धधर्मानिर्वाहकत्वानुपपत्तेरिति ज्ञेयम् ।

**चषकः**— **वृत्तिविकल्पेति** । कात्स्न्र्यैकदेशाभ्यामवस्थितिविकल्पेत्यर्थः ।

**।। इति समुदायस्यावयवीत्वे बाधकशङ्का ।।**

* * *

**।। अथ समुदायस्यावयवीत्वे बाधकशङ्काया निरासः ।।**

१५ **सु०— उच्यते । नास्माभिरवयवेभ्योऽत्यन्तभिन्नोऽवयवी गृह्यते, किन्तु तत्परिणामविशेष एव; तत्र कुतो वृत्तिविकल्पावकाशः । चलाचलत्वादिविरोधस्तु भेदाभेद(ादि)विरोधवदपाक्रियत इति नावयविनि बाधकसद्भावः ।**

**परि०**— **कुतो वृत्तिविकल्पेति** । आधाराधेयभावस्यैवाभावादिति भावः । **अपाक्रियत इति** । विशेषबलेनेति भावः ।।

**यादु०— तत्र कुत इति** । परिणामवादेऽवयविनोऽवयवाभिन्नत्वेनावयवेषु वृतिरेव नास्तीति भावः ॥ **भेदाभेदेति** । विशेषबलेनेति शेषः ॥

**कं०रा०— भेदाभेदविरोधवदिति** । एकस्यावयविनोऽवयवैः साकं भेदाभेदौ विरुद्धावित्याशङ्कायां वस्तुस्वभावविशेषमाश्रित्य स्वविरोधो यथा अपाक्रियते तथैकस्मिन्नवयविनि चलत्वाचलत्वादिधर्मा विरुद्धा इत्याशङ्कायां सोऽपि विरोधः स्वभावविशेषमाश्रित्य निराक्रियत इति भावः ।

**श्रीनिधि०— तत्र कुतो वृत्तिविकल्पावसर इति** । वृत्तौ सत्यां वृत्तिविकल्पस्यावसरः । न च परिणामवादे वृत्तिरस्ति । कार्यकारणयोरभेदात् स्ववृत्तित्वस्य च विरुद्धत्वादित्यर्थः । **भेदाभेदविरोधवदपाक्रियत इति** । किं प्रमाणाभावाद्विरुद्धत्वं उत कारकाभावात् । नाद्यः, प्रत्यक्षेणैवोपलम्भात् । तथा च क्व तयोः विरोधः । तदुक्तम्— 'विरोधो ह्यविरोधश्च यतो दर्शनमानकौ । ततो दृष्टे विरोधस्तु सद्भिरापाद्यते कथम्' इति । न द्वितीयः । विशेषस्य सत्त्वादिति भावः ।

**शे०चं०— तत्र कुत इति** । परिणामवादेऽवयविनोऽवयवाभिन्नत्वेनावयवेषु वृत्तेरेवाभावादिति भावः ॥ **भेदाभेदविरोधवदिति** । भेदाभेदविरोध इवेति भेदाभेदविरोधवदिति प्रथमान्ताद्वतिः । 'तत्र तस्येवे'ति सूत्रस्य प्रायिकत्वेनाभियुक्तैर्व्याख्यातत्वादिति द्रष्टव्यम् । विशेषबलेन भेदाभेदविरोधपरिहारवत् तद्बलेनैवैतद्विरोधपरिहारोऽपीति भावः ॥ **नावयविनि बाधसद्भाव इति** । ततश्च बाधकभावाभावाभ्यां वैषम्यानुपपत्तेरविशेषसिद्ध्या तन्मूलकस्तर्को युक्त इति भावः ।

**विट्ठ०— कुतो वृत्तिविकल्पेति** । अभिन्नत्वेनावयविनो अवयवेषु वृत्तेरेवासम्भवादिति भावः । **चलाचलत्वादिविरोधस्त्विति** । यथा एकस्मिन्नेव घटे स्वावयवेभ्यो भेदो अभेदश्च विशेषबलात् न विरुद्ध्यते तथा विशेषबलापादितहस्तवितस्त्याद्यभेदेन चलाचलत्वादिर्न विरुध्यते । अखण्डत्वस्याप्रामाणिकत्वाद्विशेषस्य च समर्थितत्वादिति भावः ।

**॥ इति समुदायस्यावयवीत्वे बाधकशङ्काया निरासः ॥**

**॥ इति समुदाये तृतीयविकल्पे अवयवीत्वप्रसङ्गस्य प्रसङ्गाभावशङ्का तन्निरासश्च ॥**

**॥ इति समुदाये अवयवीत्वप्रसङ्गापादनम् ॥**

**॥ इति अस्य अन्योन्याश्रयदोषस्य उपलक्षणपरतया व्याख्यानम् ॥**

**॥ इति समुदितानेकहेतुकत्वे अन्योन्याश्रयदोषप्रदर्शनपूर्वकः एतत्सूत्रार्थोपसंहारः ॥**

**॥ इति अनेकहेतुकत्वस्यायोगे कारणद्वयं विकल्प्य तदयोगस्य समर्थनम् ॥**

**॥ इति समुदायनिराकरणे समुदाये अनेकपरमाणुहेतुकत्वस्याप्ययोगः सहेतुकः ॥**

* * *

**॥ अथ समुदायनिराकरणे सूत्रकारीयस्य समुदायनिराकरणस्य जात्युत्तरताशङ्का तत्परिहारश्च ॥**

१६ **सु०— न च वाच्यं समुदायो भवद्भिरङ्गी(क्रिय)कृत एव, त(तश्च)त्राक्षेपसमाधानसाम्यमिति; यतोऽनेकेषामेककालदेशकार्याद्यवच्छेदेन मेलनं समुदायोऽभ्युपगम्यते, स च अमिलितेभ्य एव भव(ती)ति । स्थायितायां च तत्सम्भवो न क्षणभङ्गवाद इति वक्ष्यति ।**

**परि०— एककालदेशेति** । युगपदुत्पन्नशब्दानामनेककालावच्छेदेन समुदायः । अनेकेषां वृक्षादीनामेकदेशावच्छेदेन वनसेनादिसमुदायः । दण्डचक्रादिकारणानां मेलनं घटादिरूपैककार्यावच्छेदेन, वर्णानां पदवाक्यमहावाक्यात्मनामेकज्ञानविषयतावच्छेदेन प्रकरणादेरेकार्थतात्पर्यकत्वादिना मेलनमित्यादिः आदिपदार्थः ॥ **वक्ष्यतीति** । 'कार्यं च कारणं चैव यत्किञ्चिद् यस्य कस्यचित् । भवेन्नियामकाभावादिदमस्यैव कारणमि'त्यत्रेति भावः ।

**यादु०— एककालदेशेत्यादि** । चन्द्रादे राह्वादिमेलनं कालावच्छेदेन, वृक्षादीनां मेलनं देशावच्छेदेन । दण्डादिकारणानां मेलनं घटादिकार्यावच्छेदेन । आदिपदाद्वर्णानां पदानां च मेलनं बुद्ध्यवच्छेदेनेति ज्ञातव्यम् ॥ **वक्ष्यतीति** । 'कार्यं च कारणं चैव यत्किञ्चिद्यस्य कस्यचित् । भवेन्नियामकाभावादिदमस्यैव कारणम् । इति नित्यविनाशित्व' इत्यत्रेति शेषः ॥

**वं०प०— स्थायितायां चेति** । अनेकेषामेककालाद्यवच्छेदेन मेलनरूपः समुदायिनां स्थायित्व एव सम्भवति न क्षणिकत्व इत्यर्थः ॥

**श्रीनिधि०— देशकालकार्याद्यवच्छेदेनेति** । एककालावच्छेदेन यथा, उपरागकाले भिन्नदेशानामपि बहूनां दानानाम् । एकदेशावच्छेदेन यथा, अनेकेषां वृक्षाणां शाखायां अनेकेषां ब्राह्मणानाम् । अत्र कालसम्बन्धः आर्थिकः । असङ्कीर्णमुदाहरणं तु अस्मिन्नगरे अनेकेषां राज्ञां भूतभविष्यताम् । एककार्यावच्छेदेन यथा । सच्छास्त्रव्याख्यानरूपैककार्यावच्छेदभूतभविष्यतां बहूनां विदुषामिति द्रष्टव्यम् । **स चेति** । एककालदेशाद्यवच्छेदेन मेलनरूपः समुदाय इत्यर्थः । परं प्रति तत्रोक्तातिप्रसङ्गस्तु कालादिग्रहणेन परिहृत इति भावः । **भवतीति** । उत्पद्यत इत्यर्थः । न हि मयाप्युक्तरूप एव समुदाय अमिलितेभ्य उत्पद्यत इत्युच्यत इत्यत आह **स्थायितायां च तत्सम्भवतीति** । **वक्ष्यतीति** । 'कार्यं च कारणं चैवं यत्किञ्चित् यस्य कस्यचित् । भवेन्नियामकाभावात् इदमस्यैव कारणमि'त्यादिना अमिलितेभ्यः मिलितानां उत्पत्तिर्न युज्यत इति वक्ष्यतीत्यर्थः ।

**शे०चं०**— सूत्रकारीयस्य समुदायनिराकरणस्य जात्युत्तरतामाशङ्क्य परिहरति **न च वाच्यमित्यादिना** ॥ **एककालेति** । चन्द्रादेः राह्वादिमेलनमेककालावच्छेदेन; वृक्षाणां मेलनमेकदेशावच्छेदेन, दण्डादिकारणानां मेलनं घटादिरूपैककार्यावच्छेदेन, आदिपदेन वर्णानां पदानां च मेलनमेकबुद्ध्यवच्छेदेनेति विवेको द्रष्टव्यः ॥ **वक्ष्यतीति** । 'कार्यं च कारणं चैव यत्किञ्चिद् यस्य कस्यचित् । भवेन्नियामकाभावादिदमस्यैव कारणम् । इति नित्यविनाशित्व' इत्यादिनेति शेषः ।

**वा०र०**— **जात्युत्तरतामिति** । ........त्युत्तरतामित्यर्थः ।

**स०व्र०**— **वक्ष्यतीति** । 'कार्यं च कारणं चैव यत्किञ्चिद् यस्य कस्यचित् । भवेन्नियामकाभावादिदमस्यैव कारणम्' इत्यादिना वक्ष्यतीत्यर्थः ।

**वि०ठ०**— **यतोऽनेकेषामिति** । अनेकेषां मेलनं समुदायः तच्च मेलनमेककालावच्छेदेन भवति । पण्यवीथ्यादौ युगपदुत्पन्नशब्देष्वयं शब्दसमुदाय इति व्यवहारदर्शनात् । यथा वा अस्मिन् काले बहवो राजानः समुदिता इति स्वस्वदेशावस्थितेष्वपि व्यवहारप्रतीतेः । एकदेशावच्छेदेन यथा, राज्ञां समुदायेनेदं पुरं पालितमिति भिन्नभिन्नकालगतराजस्वपि समुदायव्यवहारः । यथा वा सेनावनादिरूपः समुदायः एककार्यावच्छेदेन यथा, भिन्नदेशकालगतानामपि राज्ञां सत्रयागे मुनिमण्डलपरिपालने राजसमुदायेन सहस्राब्दसत्रं परिपालितमिति । यथा चैकार्थबोधनरूपकार्यावच्छेदेन वर्णपादादीनां पदवाक्याद्यात्मकसमुदायः एकज्ञानविषयत्वावच्छेदेनानेकेष्वेकार्थव्यवहार आदिपदार्थ इति ज्ञेयम् । **स चामिलितेभ्य इति** । अन्योन्यसंयोगरूपमेलनरहितेभ्यः एवेत्यर्थः । सममेतत्परमतेऽपीत्यत आह **स्थायितायां चेति वक्ष्यतीति** । 'इदमस्यैव कारणम् । इति नित्यविनाशित्व' इत्यत्रेत्यर्थः ।

**चषकः**— **एककालदेशेत्यादि** । एकक्षणोत्पन्नानेकशब्दानां चन्द्रादेः राह्वादेश्च मेलनमेककालावच्छेदेन, वृक्षकरितुरगादीनामेकदेशावच्छेदेन । दण्डचक्रादिहेतूनामेककार्यावच्छेदेन । वर्णानां पदानां च मेलनमेकबुद्ध्यवच्छेदेनेति विवेकोऽवसेयः । **वक्ष्यति** । 'कार्यं च कारणं चैव यत्किञ्चिद्यस्य कस्यचित् । भवेन्नियामकाभावादिदमस्यैव कारणम् । इति नित्यविनाशित्व' इत्यादिनाऽभिधास्यति ।

**॥ इति सूत्रकारीयस्य समुदायनिराकरणस्य जात्युत्तरताशङ्का तत्परिहारश्च ॥**

**॥ इति समुदायनिराकरणम् ॥**

**॥ इति प्रथमसूत्रार्थप्रदर्शनम् ॥**

* * *

**॥ अथ द्वितीयसूत्रार्थप्रदर्शनम् ॥**

**(समुदायस्य समुदितानेकहेतुकत्वे उक्तस्यान्योन्याश्रयदोषस्य आक्षेपपूर्वकं समाधानम्)**

**॥ अथ तत्रादौ उक्ते अन्योन्याश्रयदोषे आक्षेपः ॥**

**॥ अथ उक्ते अन्योन्याश्रयदोषे आक्षेपस्य त्रेधा व्याख्यानम् ॥**

**॥ अथ च तत्रादौ उक्ते अन्योन्याश्रयदोषे आक्षेपस्य प्रथमं व्याख्यानम् ॥**

१७ **सु०—** उक्तमर्थमाक्षिप्य समादधत्सूत्रम् ॐ **इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्** ॐ इति [२-२-७-२(८)] । तत्राक्षेपांशं तावद्व्याचष्टे **अन्योन्येति** ।

**अनु०—** अन्योन्यापेक्षया पुंसः समुदायत्ववेदनम् ।
स्यात्तत्सदातनत्वेऽपि तच्च सामीप्यहेतुकम् ।
इति चेत्

भवेदिदमन्योन्याश्रयत्वं यद्ययं समुदायः कादाचित्कः स्यात्, न चैवम्, सदातनं त्विमम्भ्युपगच्छामः । एवं तर्हि सृष्टिप्रलयव्यवस्था न स्यादिति चेन्न, यतस्तस्य समुदायस्य **सदातनत्वेऽपि पुंसः समुदायत्ववेदनं स्यात्**, कदाचिदिति शेषः । ततस्तदपेक्षया सृष्ट्यादिव्यवस्थोपपद्यत इति भावः ॥ समुदायस्य सदातनत्वे तद्वेदनमपि कुतः कादाचित्कमित्यत उक्तं **तच्चेति** । **तत्** समुदायत्ववेदनं परमाणु**सामीप्यहेतुकम्** । न च सामीप्यं सदाऽस्तीति वेदनस्य कादाचित्कत्वमिति ॥ समुदायत्ववेदनस्य सामीप्यहेतुकता कुत इत्यत (उक्तं) आह **अन्योन्येति** । **अन्योन्यपरमाणुज्ञानापेक्षया** हि तद्भवति, न चान्योन्यज्ञानं सामीप्येन विना भवतीति ।

ननु वेदनमेव पुमानिति सौगता मन्यन्ते, तत्कथं पुंसो वेदनमिति । उच्यते । ज्ञानं हि द्विविधं भवति, प्रवृत्तिज्ञानमालयज्ञानं चेति । तत्रालयज्ञानं प्रवृत्तिज्ञानदुःखसंस्कारास्पदं पुमानित्युच्यते । प्रवृत्तिज्ञानं तु समुदायत्ववेदनमिति न विरोधः ।

एतदुक्तं भवति । अनेके परमाणव एव समुदायः । तदनेकत्वं च समुदायत्वम् । तत् मिलितेष्विव विरलेष्वपि विद्यते । किन्तु न सदा समुदायत्ववेदनं भवति, इतरपर-

माणुसहितेतरपरमाणुज्ञाने सति हि समुदायत्वज्ञानं भवति, अपेक्षाबुद्धेरनेकत्वव्यञ्जकत्वात्। न चेतरेतरप्रत्ययो विरलेषु परमाणुषु सम्भवति । न हि म(थु)धुरापाटलिपुत्रस्थितयोर्वृक्ष-योरितरेतरप्रत्ययो दृष्टः ।

**परि०**— इतरेतरप्रत्ययत्वादिति उक्तोऽर्थः कथं तस्याक्षेप इत्यतो व्यनक्ति **भवेदिदमिति** । मूलं योजयति **यत इति** ॥ **तदपेक्षयेति** । वेदनापेक्षया सृष्टिः । तदभावापेक्षया लय इति व्यवस्थेत्यर्थः ॥ **तद्भवतीति** । समुदायत्ववेद(नेत्य)नमित्यर्थः ।

**गु०दी०**— **सदातनं त्विममभ्युपगच्छाम** इत्यत्र यद्यपि समुदितपरमाणुसत्त्वे तेषां समुदाय इति समुदायसिद्धिः, समुदायसिद्धौ च समुदितपरमाणुसिद्धिरिति स्यादेव स्वप्रतीतावन्योन्याश्रयः । तथाप्युत्पत्तिप्रतिबन्धकत्वाशया पक्षान्तरपरिग्रह इति ज्ञेयम् । **न चेतरेतरप्रत्ययोऽविरलेषु परमाणुषु सम्भवति** इत्यत्र अविरलेषु घटाकारपरमाणुषु घटबुद्धिं विना परमाणुबुद्धेः क्वाप्यदर्शनात् । अयमेकः परमाणुरयमेक इति त्वदभिलषितापेक्षाबुद्धिर्दूरापास्ता । अतो न कुत्रापि परमाणुबुद्धिः परस्येति दूषणं द्रष्टव्यम् ।

**यादु०**— पूर्वविज्ञानसन्तान एव संस्कार इति मतमाश्रित्य संस्कारास्पदमित्युक्तम् । तेन संस्कारस्य पूर्वविज्ञानरूपत्वात् तस्य च प्रवृत्तिज्ञानपदेन गृहीतत्वात् पुनर्ग्रहणं कथमिति शङ्कानवकाश इति ध्येयम् । **तत्** समुदायत्ववेदनम् । **न विरोध इति** । आलयज्ञानरूपस्यात्मनः प्रवृत्तिज्ञानरूपसमुदायज्ञानवत्त्वसम्भवात् पुंसो वेदनमिति न विरुद्धमित्यर्थः ॥ **पाटलिपुत्र**नामकं किञ्चिन्नगरम् ।

**कं०रा०**— **अन्योन्यापेक्षयेत्यत्र** अन्योन्यशब्दो अन्योन्यविषयकज्ञानपर इत्यभिप्रेत्य व्याचष्टे **अन्योन्यपरमाणुज्ञानेति** । इदं चेदं चेत्यनेकपरमाणुगोचरापेक्षाबुद्धौ सत्यामेव हि समुदायत्ववेदनं भवति, न च अपेक्षाबुद्धिः सामीप्येन विना भवतीत्यपेक्ष्य बुद्धिद्वारा समुदायत्ववेदनस्य सामीप्यहेतुकतेति भावः ।

**श्रीनिधि०**— **यद्ययं समुदायः कादाचित्कः स्यादिति** । उत्पतौ कलु अन्योन्याश्रत्वं अभिहितमिति भावः । **आलयज्ञानमिति** । आश्रयभूतं ज्ञानमित्यर्थः । **प्रवृत्तिज्ञानमिति** । आश्रयभूतं ज्ञानमित्यर्थः । **सुखदुःखसंस्कारास्पदमिति** । अनेन उक्त आलयशब्दार्थः सूचितः । नन्वनेन समुदायशब्दार्थः को वाऽभिमतः अन्योन्यपरमाणुज्ञानं च सामीप्यं विना न स्यात् इत्यतोऽभिमतं समुदायशब्दार्थं वदन् तत्र निमित्तमाह **एतदुक्तं भवतीति** ।

**शे०चं०**— **एवं तर्हीति** । समुदायस्य सदातनत्वेन तद्भावाभावरूपतत्प्रयोजकाभावादिति भावः ॥ **कुत इति** । ततश्च समुदायत्ववेदनस्यापि सदातनत्वान्न तदपेक्षयाऽपि सृष्ट्यादिव्यवस्थोपपत्तिरिति भावः ।

सामीप्यहेतुकत्वेऽपि कुतः कादाचित्कत्वमित्यतस्तद्धेतोः सामीप्यस्य कादाचित्कत्वात् तस्यापि कादाचित्कत्वमित्याह **न चेति** । **मन्यन्त इति** । सन्तन्यमानं ज्ञानमेवात्मेति तदुक्तेरिति भावः । **तत्कथमिति** । ज्ञानस्यैकविधत्वेन स्वस्य स्ववत्त्वस्य विरुद्धत्वादिति भावः । 'तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलत्वादिकमुल्लिखेदि'ति परोक्तं मनसि निधाय ज्ञानद्वैविध्यमाह **ज्ञानं हीति** । संस्कारास्पदमित्यत्र संस्कारपदं रागादिदोषपरम् । ननु भवेदेवमन्योन्याश्रयपरिहारो यदि समुदायस्य सदातनत्वं भवेत् । तदेव कथम् । कुतश्च समुदायत्ववेदनस्यान्योन्यपरमाणुज्ञानापेक्षत्वं, कुतश्चान्योन्यपरमाणुज्ञानस्य सामीप्यापेक्षत्वमित्यत आह **एतदुक्तं भवतीति** ॥ **विद्यत इति** । अतः समुदायः सदातन एवेति भावः । तर्हि सृष्ट्यादिव्यवस्थाऽनुपपत्तिः स्यादिति पृच्छति **किन्त्विति** । परिहरति **नेति** । अतस्तदपेक्षया सृष्ट्यादिव्यवस्थेति भावः । पाटलीपुत्रशब्दो नगरविशेषपरः ।

**वा०र०— तदुक्तेरिति** भाव इति । ....... इति शेषः । **परोक्तिमिति** । ..... अहमास्पदं तत्प्रत्ययविषयः । अहमित्याकारमिति वक्ष्यति । प्रवृत्तिज्ञानाद्यास्पदत्वं नाम तदाश्रयत्वम् । शोध्यम् । पाटलिपुत्रशब्दस्य पुत्रविशेषपरतायां तद्गतवृक्षानुपपत्तिरित्यतः तस्य रूढस्य नगरविशेषपरत्वान्नानुपपत्तिरित्याह **पाटलीति** ।

**विठ्ठ०—** उक्तोऽर्थः कथं तस्याक्षेप इत्यत आह **भवेदिदमिति** । मिलितानेकहेतुकः समुदायः मेलने च समुदायसापेक्षमित्यन्योन्याश्रयत्वमिति भावः । **तदपेक्षयेति** । समुदायत्ववेदनापेक्षया सृष्टिः । तदभावापेक्षया लय इति व्यवस्थेति भावः । **तद्भवति** । समुदायत्ववेदनं भवति । **आलयज्ञानमिति** । आश्रयरूपज्ञानमित्यर्थः । आश्रयत्वमुपपादयति **तत्रेति** ।

**॥ इति उक्ते अन्योन्याश्रयदोषे आक्षेपस्य प्रथमं व्याख्यानम् ॥**

* * *

**॥ अथ च उक्ते अन्योन्याश्रयदोषे आक्षेपस्य द्वितीयं व्याख्यानम् ॥**

**१८ सु०— किञ्चाधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो हि ज्ञानहेतवः । अधिपतिः इन्द्रियम् । न च विरलानां परमाणूनामिन्द्रियालम्बनताऽस्ति । नापि तेष्विन्द्रियाणामाधिपत्यम् ॥ अतोऽदृष्टादिसहकारिवशादिन्द्रियानालम्बनविरलपरमाणुभ्यस्तदालम्बनतया तथातथा सन्निकृष्टाः परमाणवो जायन्ते । अनधिपतीन्द्रियेभ्यश्चाधिपतीन्द्रियाणि । अथेदानीं समनन्तरप्रत्ययबलादेको महानिति ज्ञानमुत्पद्यते । तेन नान्योन्याश्रयत्वम्, नापि सृष्ट्याद्यनुपपत्तिरिति ।**

**परि०**— सन्निकृ(ष्टगुणलभ्यत्वाव)ष्टाणुज्ञानमावश्यकमित्यत्र युक्त्यन्तरमाह **किं चेति** ॥ **ज्ञानहेतव इति** । प्रवृत्तिज्ञान(दाने हे)जननहेतव इत्यर्थः ॥ **समनन्तरप्रत्ययबलादिति** । संस्कार-बलादित्यर्थः ॥

**गु०दी०**— 'अतोऽर्थेन्द्रियसंयोगिरूपकारणतात्मनः । संयोगिरूपराहित्यान्नैव तज्ज्ञानताऽपि हि' इति मूलश्लोकस्येयं योजना । अर्थाः विरलपरमाणवः इन्द्रियाणि अनधिपतीन्द्रियाणि तयोरुभयोरपि संयोगिरूपे कार्यकारणाख्यसम्बन्धयुक्ते रूपेऽर्थे ज्ञानद्वारा कार्यत्वरूपवत् यदविरलपरमाणुसमुदायात्मकघटाद्यर्थस्वरूपं कारणत्वसम्बन्धयुक्ताधिपतीन्द्रियात्मकेन्द्रियस्वरूपं चैतदुभयं प्रति प्रागुक्तविरलपरमाण्वाख्यार्थस्यानधिपतीन्द्रियाख्येन्द्रियस्य च या कारणता सा न स्यात् । समुदायज्ञानवतः आत्मनश्च विषये समुदायज्ञानरहितात्मनश्च या कारणता साऽपि न स्यात् । कारणेऽनधिपतीन्द्रिये कार्येऽविरलपरमाणुसमुदाये **संयोगिरूपराहित्यात्** कार्यकारणभावत्वाख्यसंयोगिरूपराहित्यादर्थे कार्यत्वराहित्यादिन्द्रिये कारणत्वराहित्यादिति यावत् । आत्मकारणीभूतपूर्वात्मनि च तज्ज्ञानराहित्यात् समुदायज्ञानवत्वराहित्यात् समुदायज्ञानवदुत्तरात्मकारणता नैव । कार्यत्रयस्य कारणत्रयस्य च विसदृशत्वान्न कार्यकारणतेति भाव इति ।

**यादु०**— 'अतोऽर्थेन्द्रियसंयोगी'त्यादिसौत्रसमाधानांशव्याख्याननिवर्त्यं पूर्वपक्षं दर्शयति **किञ्चाधिपतीति** । अनेनेतरेतरैः परस्परं ग्राह्यग्राहकभावेन सम्बद्धैरालम्बनपरमाण्वादिभिः प्रत्ययो यस्येति सौत्रपूर्वपक्षांशो व्याख्यात इति द्रष्टव्यम् ॥ **अधिपतिरिन्द्रियमिति** । अर्थग्राहकमिन्द्रियमधिपतिशब्देन विवक्षितमित्यर्थः ॥ **सहकार्यदृष्टादि** । **आलम्बनम्** इन्द्रियविषयत्वयोग्यम् । समनन्तरप्रत्ययः पूर्वविज्ञानमिति स्पष्टत्वान्नोक्तम् । नन्वनेकेष्वणुष्वेकत्वमहत्त्वयोरभावात् कथं प्रतीतिरित्यत आह **समनन्तरेति** । संस्काररूपपूर्वविज्ञानबलादित्यर्थः । पूर्वं हि कदाचिदेकत्वमहत्त्वयोर्विज्ञानं समुत्पन्नम् । तदेव तन्मते संस्कार उच्यत इत्युक्तम् । स च अनेकज्ञानव्यवहितोऽपि कदाचित्सजातीयज्ञानान्तरमुत्पादयति । शालिबीजमिवाङ्कुरपत्रकाण्डपत्रपुष्पफलाद्यनेकव्यवधानेन पुनः सजातीयबीजान्तरमिति तैरङ्गीकारात् । तथा चाविद्यमानमप्येकत्वादिकं संस्कारोपनीतं भासत इति भावः । एवं सर्वत्रापि सविकल्पकज्ञाने स्वलक्षणेऽविद्यमान एव विशेषणांशः पूर्वविज्ञानरूपसंस्कारबलाद्भासत इति उक्तं समनन्तरप्रत्ययस्य सार्वत्रिकसविकल्पकज्ञानहेतुत्वं, युक्तमित्यवगन्तव्यम् ॥

**वं०प०**— **तथातथेति** । गोघटाद्याकारेणेत्यर्थः ।

**कं०रा०**— **तदालम्बनतयेति** । इन्द्रियालम्बनतयेत्यर्थः । **समनन्तरप्रत्ययबलादिति** । वासनाबलादित्यर्थः ।

**श्रीनिधि०**— नन्वनेकत्वसङ्ख्यारूपसमुदायस्य वेदनमेव न युज्यते । अविरलेष्वपेक्षाबुद्धेरसम्भवात् । मिलितेषु सम्भवतीति चेन्न । मेलनस्यास्माभिरशक्यत्वात् । ईश्वरस्यानभ्युपगमादित्यतः तदभिमतं ज्ञानकारण-

प्रक्रियामनुवदति **किञ्चेति** । **इन्द्रियालम्भनता** इन्द्रियविषयता । **आधिपत्यं** विषयत्वम् । तथा **तथा सन्निकृष्टाः** गोघटाद्याकारेण सन्निकृष्टाः । **अनधिपतीन्द्रियेभ्यश्चाधिपतीन्द्रियाणीति** । आधिपत्यविशिष्टं सजातीयं इन्द्रियान्तरमुत्पद्यत इत्यर्थः । **समनन्तरप्रत्ययबलादिति** । अत्र समनन्तरप्रत्ययस्य न ज्ञानमात्रं प्रति हेतुत्वम् । किन्त्वेको महानित्यादिज्ञान एव । न नीलाद्यनुभवे, तस्य वास्तवत्वादेकत्वादेश्चावास्तवत्वादारोपस्य संस्कारसाध्यत्वात् प्रमायाश्च तदभावादिति । अत एवोक्तम् **अथेदानीमित्यादि** ।

**शे०चं०**— अतोऽर्थेन्द्रियसंयोगीत्यादिसौत्रसमाधानांशव्याख्यानपरोत्तरग्रन्थानुरोधेनेतरेतरैः परस्परं ग्राह्यग्राहकभावेन सम्बद्धैरालम्बनपरमाण्वादिभिः प्रत्ययो यस्य स तथोक्तस्य भावस्तत्त्वं तस्मादित्यपि सौत्रपूर्वपक्षांशयोजनामभिप्रेत्य उत्तरग्रन्थनिर्वर्त्यपूर्वपक्षमप्येतद्भाष्यसूचिततया दर्शयति **किञ्चेति** । अधिपत्यालम्बनसहकारिस्वरूपनिरूपणमाकर एव स्पष्टम् । समनन्तरप्रत्ययस्तु पूर्वज्ञानमेवात्राभिमतः । न तु समनन्तरप्रत्ययः संस्कारस्कन्ध इत्यत्रेव विज्ञानादिस्कन्धसम्बन्धी रागादिः । समनन्तरप्रत्ययात्पूर्वज्ञानाद्बोधरूपतेति ज्ञानहेतुतयोक्तसमनन्तरप्रत्ययस्य ज्ञानरूपतायाः स्पष्टमभिधानादिति द्रष्टव्यम् । एतेषां च चतुर्णामेकस्मिन्ज्ञाने समुच्चयेन हेतुत्वमत्राभिमतम् । 'तत्र तावच्चतुर्णां कारणानामेकस्मिन्नीलप्रत्यये समुच्चयेन कारणत्वसिद्ध्यर्थं द्वारभेदप्रदर्शनम्' इति कल्पतरूक्तेरिति द्रष्टव्यम् ॥ **अधिपतिरिन्द्रियमिति** । चक्षुरादितत्तदिन्द्रियोत्पन्नरूपरसादिज्ञानस्य रसरूपादिसाधारण्ये प्राप्ते रूपरसादिनियामकं चक्षुरादीन्द्रियमधिपतिरित्युच्यते । लोके नियामकस्याधिपतित्वदर्शनादित्याशयः ॥ **न चेति** । अतो न सर्वत्र गोघटादिबुद्धिप्रसङ्ग इति भावः ॥ **समनन्तरप्रत्ययबलादिति** । पूर्वज्ञानादित्यर्थः । तन्मते नीलादिज्ञानस्य नीलाद्यालम्बनजन्यत्वेन विना नीलाद्याकारताविरहवत् पूर्वज्ञानजन्यत्वाभावे बोधरूपताविरहस्य सिद्धत्वेन बोधरूपतानिर्वाहाय एको महानित्यादिज्ञानस्य पूर्वज्ञानजन्यत्वमावश्यकमिति ध्येयम् ॥ **तेनेति** । परमाणुसमुदायस्य विरलपरमाणुहेतुकत्वेन तत्समुदायस्य समुदितानेकेषां च परस्परापेक्षाविरहादित्यर्थः ॥ **नापीति** । समुदायस्य तद्वेदनस्य च कादाचित्कत्वेन तदुभयापेक्षयैव सृष्ट्यादिव्यवस्थोपपत्तेरिति ॥

**वा०र०**— कुतो न रागादिरित्यतः तत्र भामतीवाक्यं बाधकत्वेनाह **समनन्तरप्रत्ययादिति** । असति प्रतिज्ञेति सूत्रव्याख्यावसरे इति शेषः । तत्रत्यकल्पतरुवाक्यमेव प्रमाणयति **तत्र तावदिति** । उदितस्य ज्ञानस्येत्यादिना कल्पतरूक्तरीत्याह **चक्षुरादीति** । .......सारेणाह **तन्मत इति** ।

**विठ्ठ०**— नन्वेवमपि समुदायस्य सामीप्यरूपमेलनसापेक्षत्वात् । उभयपरमाणुमेलनस्य च उभयत्वं यत्समुदायव्यपेक्षयेत्युक्तन्यायेन समुदायसापेक्षत्वादन्योन्याश्रयत्वानिवृत्तिः, विरलपरमाणुभ्य एव समुदाय इत्यङ्गीकारे च सामीप्यहेतुकत्वमुपपन्नम् । नित्यत्वे च समुदायस्य सृष्ट्याद्युपपत्तिश्च कथमित्यत आह **किं चेति** । **ज्ञानहेतव इति** प्रवृत्तिरूपज्ञानोत्पत्तिहेतव इत्यर्थः । अधिपतिपदार्थमाह **अधिपतिरिन्द्रियमिति** । सहकार्य-

दृष्टादिकं आलम्बनं इन्द्रियाणां विषयाः समनन्तरप्रत्ययः संस्कार इति स्फुटत्वान्नोक्तम् । अत्रेन्द्रियाणामाधिपत्यं तद्विषयभूते परमाणूनामालम्बनत्वं अदृष्टादेर्ज्ञानोत्पत्तौ सहकारित्वं एको महानित्यादिज्ञानविशेषं प्रति संस्कारस्य हेतुत्वं च परमाणूनां सामीप्ये सत्येव भवति । नान्यथा अतस्तत्सन्निकर्ष आवश्यक इत्युपपादयति **न च विरलानां परमाणूनामिति । तेन नान्याश्रयत्वमिति** । अनेकपरमाणव एव समुदायः स च नित्य इति स्वीकृतत्वेन नोक्तान्योन्याश्रयत्वम् । सन्निकृष्टपरमाणुष्वेव समुदायबुद्ध्युत्पादात् परमाणुसामीप्यभावाभावापेक्षयैव सृष्टिप्रलयव्यवस्थेति भावः ।

**चषकः— ज्ञानहेतवः** प्रवृत्तिज्ञानजननहेतवः ॥ **अधिपतिरिन्द्रियमिति** । अर्थग्राहकमिन्द्रियमधिपतिशब्देनाभिप्रेतमित्यर्थः । **समनन्तरप्रत्ययबलात्** संस्काररूपपूर्वविज्ञानबलात् ।

**॥ इति उक्ते अन्योन्याश्रयदोषे आक्षेपस्य द्वितीयं व्याख्यानम् ॥**

* * *

**॥ अथ तत्र उक्ते अन्योन्याश्रयदोषे आक्षेपस्य तृतीयं व्याख्यानम् ॥**

**१९ सु०— एतेन पक्षान्तरमपि सूचितम् । विरलपरमाणुभ्यः सन्निकृष्टाः परमाणवो जायन्ते, तदेव तेषां समुदायत्वम्, अतो न कश्चिद्दोष इति ।**

**परि०— एतेनेति** । 'तच्च सामीप्यहेतुकमि'ति कथनेनेत्यर्थः ।

**यादु०— एतेनेति** । सामीप्यहेतुकमित्यंशेनेत्यर्थः ॥ **तदेवेति** । सन्निकृष्टत्वमेवेत्यर्थः ॥ **न कश्चिद्दोष इति** । अन्योन्याश्रयत्वरूपो वा सृष्ट्याद्यव्यवस्थारूपो वा दोषो नास्तीत्यर्थः ।

**श्रीनिधि०— एतेनेति** । चशब्दसूचितसामीप्यकारणकथनेनेत्यर्थः । पक्षान्तरमेव दर्शयति **विरलपरमाणुभ्य इति । तदेवेति** । सन्निकृष्टत्वमेवेत्यर्थः । सन्निकृष्टाः परमाणव एव समुदायः । सन्निकृष्टत्वं समुदायत्वमिति यावत् । **कश्चित्** अन्योन्याश्रयत्वादिलक्षणः । यद्यपि परेण सङ्ख्यासंयोगौ नाङ्गीकृताविति शक्यं वक्तुम् । तथाऽपि किञ्चेत्याद्युक्ततत्प्रक्रियाभङ्गेनापि समुदायं दूषयितुमयमारम्भः ।

**शे०चं०— एतेनेति** । समुदायत्ववेदनस्य सामीप्यहेतुकत्वकथनपरेण 'तच्च सामीप्यहेतुकमि'ति भाष्यखण्डेनेत्यर्थः ॥ **पक्षान्तरमिति** । परमाणूनामनेकत्वमेव समुदाय इति प्राचीनपक्षापेक्षया परमाणूनां परस्परसंयोग एव समुदाय इति पक्षान्तरमपि सूचितं भवतीत्यर्थः ॥ **तदेवेति** । सन्निकृष्टत्वमेवेत्यर्थः ॥ **कश्चिदिति** । अन्योन्याश्रयो वा सृष्ट्यादिव्यवस्थाऽनुपपत्तिर्वेत्येवं कश्चिदित्यर्थः ।

**स०व्र०— एतेनेति** । समुदायत्ववेदनस्य सामीप्यहेतुकत्वकथनेन समुदायस्य सामीप्यहेतुकत्वरूपं पक्षान्तरमप्युक्तमित्यर्थः ।

**विठ्ठ०— पक्षान्तरमिति** । परमाणुष्वितरेतरापेक्षाबुद्ध्या यद्व्यक्तमनेकत्वं समुदाय इति पक्षः प्रागुक्तः । इदानीं परमाणूनां सन्निकृष्टतयोत्पाद एव समुदाय इति पक्षान्तरं तच्च सामीप्यहेतुकमित्यनेन सूचित-मित्यर्थः । **न कश्चिदिति** । अन्योन्याश्रयत्वरूपो वा सृष्ट्याद्यव्यवस्थारूपो दोषो नेत्यर्थः ।

**॥ इति उक्ते अन्योन्याश्रयदोषे आक्षेपस्य तृतीयं व्याख्यानम् ॥**

**॥ इति उक्ते अन्योन्याश्रयदोषे आक्षेपस्य त्रेधा व्याख्यानम् ॥**

**॥ इति उक्ते अन्योन्याश्रयदोषे आक्षेपः ॥**

* * *

**॥ अथ तत्र उक्तस्य अन्योन्याश्रयदोषे आक्षेपस्य समाधानम् ॥**

२० **सु०—** समाधानांशं व्याचष्टे **कार्येति** ।

**अनु०—** कार्यसम्भूतिमात्रव्यापृति कारणम् ।
न तु कार्यविशेषेषु व्यापृतं कारणं भवेत् ॥

कार्यसम्भूतिमात्रे व्यापृतिर्यस्य तत्तथोक्तम् । कारणं कार्यसम्भूतिमात्रव्यापृति यतः, ततो नेति शेषः ।

यथाश्रुतमेतन्न परिहारक्षमम् अतोऽभिप्रायमाह **न त्विति** ।

विशिष्यन्त इति विशेषाः । कार्याण्येव विशेषाः **कार्यविशेषाः** । **कारणमिति** जातावेकवचनम् ॥ कारणानि खलु स्वसदृशकार्यजननव्यापाराणि, न तु विसदृशकार्यजनने व्यापृतानीत्यर्थः ।

**परि०— विशिष्यन्त इति** । व्यावर्त्यन्ते विलक्ष्यन्त इत्यर्थः । विसदृशा इति लभ्यते । विशेषकाल एवेत्यादाविव कर्मसाधनो विशेषशब्द इति भावः ।

**यादु०**— भावव्युत्पत्त्या करणव्युत्पत्त्या वा लब्धार्थस्य प्रकृतानुपयोगादाह **विशिष्यन्त इतीति** । तथा च विशेषपदाद्विशिष्टवाचकाद्विसदृशरूपोऽर्थो लभ्यत इति ज्ञातव्यम् ।

**श्रीनिधि०**— **कार्यसम्भूतिमात्रे व्यापृतिरिति** । **व्यापृतिः** व्यापारः । **यथाश्रुतमेतदिति** । **एतत्** उत्पत्तिमात्रनिमित्तत्वादिति लिङ्गम् । **विशिष्यन्त इति** । व्यावर्त्यन्त इत्यर्थः ।

**शे०चं०**— **न तत्परिहारक्षममिति** । कारणस्य विसदृशकार्यजनकत्वाभावस्यात्रानुक्त्या अनालम्बन-परमाणूनां सन्निकृष्टपरमाणुजनकत्वाभावस्यालाभादिति भावः । नन्वत्र कार्यविशेषेषु कारणत्वाभावमात्रमुच्यते न तु विसदृशकार्यजनकत्वाभावः अतो नानेनाप्युक्ताक्षेपपरिहार इत्यतो नात्र कार्यनिष्ठविशेषेष्वित्यर्थोऽभिमतः, किन्तु विशिष्टकार्येष्वित्येव, तथा चोक्तार्थलाभ इति भावेन विशिष्टवाचकतया विशेषपदं व्याचष्टे **विशिष्यन्त इति विशेषा इति** । तथाऽपि कार्यनिष्ठविशेषेष्वित्येवार्थप्राप्त्या विसदृशकार्यजनकत्वाभावालाभः इत्यतो व्याख्याति **कार्याण्येवेति** ॥ **जातावेकवचनमिति** । समुदाये एकवचनमित्यर्थः । अत एवाह **कारणानीति** ।

**वि०ठ०**— मूले कार्यसम्भूतीत्यंशेनोत्पत्तिमात्रनिमित्तत्वादित्यंशो व्याख्यातः । **यथाश्रुतमिति** । सूत्रे यथाश्रुतं तथा अक्षरार्थकथनरूपमेतद्व्याख्यानमित्यर्थः । **अभिप्रायमाह** सूत्रस्येति शेषः । यद्वा यथाश्रुतमेत-न्मूलवाक्यमित्यर्थः । अभिप्रायं स्ववचनस्येति शेषः । भावकरणव्युत्पत्तिलब्धार्थस्य प्रकृतानुपयोगादाह **विशिष्यन्त इति** । तथा च कर्तृव्युत्पत्त्या विशेषपदेन विसदृशरूपोऽर्थो लभ्यत इति ज्ञेयम् । बहुवचनेन विसदृशकार्याणामनेकेषां प्रसक्तत्वात् तदनुसारेण कारणानीति वक्तव्यमित्यत आह **कारणमितीति** । तथा च कारणं कारणानि कार्यविशेषेषु विसदृशकार्येषु तज्जनन इति यावत् । **न तु व्यापृतानीति** मूलयोजनालब्ध इत्याशयेनार्थमाह **कारणानि खल्विति** ।

**चषकः**— **विशिष्यन्त इति** । कर्मसाधनघञन्तो न भावकरणसाधनतदन्त इति भावः ।

२१ **सु०— किमतो यद्येवमित्यत आह अत इति ।**

## अनु०— अतोऽर्थेन्द्रियसंयोगिरूपकारणतात्मनः ।
## संयोगिरूपराहित्यान्नैव तज्ज्ञानताऽपि हि ॥

**सदृशकार्यजनकत्वनियमादित्यर्थः । संयोगिरूपे = ग्राह्यग्राहकरूपे ये अर्थेन्द्रिये तयोः कार्ययोः कारणता संयोगिरूपकारणता । अर्थेन्द्रिययोः संयोगिरूपकारणता (अर्थे-न्द्रियसंयोगिरूपकारणता ।) सा नैवोपपद्यते । कुतः । संयोगिरूपराहित्यात् । कारणयो-**

**रर्थेन्द्रिययोर्ग्राह्यग्राहकरूपराहित्यात् । आत्मनोऽपि, कार्यस्य तत्समुदायविषयं ज्ञानं यस्यासौ तज्ज्ञानः, त(ज्ज्ञा)स्य भावस्तज्ज्ञानता, नैवोपपद्यते । कुतः । हि यस्मात्, कारणस्यात्मनो नैव तज्ज्ञानताऽस्तीति योजना ।**

**परि०—** अर्थेन्द्रियसंयोगिरूपेत्यत्र संयोगिपदं ग्राह्यग्राहकभावापन्नकार्यभूतार्थेन्द्रियपरम् । कण्ठोपात्तमर्थेन्द्रियपदं च अतादृशकारणभूतार्थेन्द्रियपरमित्युपेत्य विग्रहमाह **संयोगिरूप इति** । संयोगिरूपे प्रति कारणतेति मूलार्थमुपेत्याह **तयोः कार्ययोः कारणतेति** । तन्निरूपितकारणतेत्यर्थः । आत्मपदं च कार्यरूपात्मपरम् । तज्ज्ञानेति बहुव्रीहिः । तज्ज्ञानपदं च प्रकृतसमुदायज्ञानपरमित्युपेत्यार्थमाह **आत्मन इति** । आवर्तमानं चात्मपदं कारणीभूतात्मपरमित्युपेत्यार्थान्तरमाह **हि यस्मादित्यादिना** ।

**यादु०— ये अर्थेन्द्रिये इति** । कार्यभूते इत्यर्थः । तयोः कार्ययोः कारणतेत्यत्र तत्कार्यनिरूपिता कारणतेत्यर्थः ॥ **अर्थेन्द्रिययोरिति** । कारणतयाऽभिमतयोरित्यर्थः ।

**वं०प०— अर्थेन्द्रिययोः** अग्राह्याग्राहकयोः । अनालम्बनानधिपतिरूपयोरिति यावत् ।

**श्रीनिधि०— ग्राह्यग्राहकरूपे इति** । आलम्बनाधिपतिरूपे इत्यर्थः । **तयोः कार्ययोः कारणतेति** । कर्मणि षष्ठीयम् । **अर्थेन्द्रिययोः संयोगिरूपकारणतेति** । **अर्थेन्द्रिययो**रनालम्बनानधिपतिभूतयोः । कर्तरि षष्ठीयम् । **संयोगिरूपकारणता** । संयोगिरूपे प्रति कारणतेत्यर्थः ।

**शे०चं०— ये अर्थेन्द्रिये इति** । कार्यभूते इत्यर्थः ॥ **कार्ययोः कारणतेति** । तत्कार्यनिरूपितकारणतेत्यर्थः ॥ **अर्थेन्द्रिययोरिति** । कारणतयाऽभिमतयोरित्यर्थः ।

**वा०र०—** अर्थेन्द्रियसंयोगिरूपकारणतेत्यत्रार्थेन्द्रिययोः कारणत्वमिव कार्यत्वं चास्तीति संयोगिरूपेत्यत्रापि अर्थेन्द्रिययोर्ग्रहणं कार्यमिति भावेन व्याचष्टे मूले **संयोगिरूपे इति** ।

**विट्ठ०— किमतो यद्येवमिति** । यद्येवं विसदृशकार्यजननस्वभावत्वाभावः कारणानामिति अतोऽपि किं कथं पूर्वपक्षपरिहार इत्यर्थः । अत्र पदार्थानां क्षणिकत्वाद्द्विविधे ह्यर्थेन्द्रिये कार्यरूपे कारणरूपे च । एवं सति मूले संयोगिरूपकारणतेत्यस्य संयोगिरूपयोः प्रति कारणता संयोगिरूपकारणता संयोगिरूपे ग्राह्यग्राहकरूपे एकार्थभूते अर्थेन्द्रिये तयोः प्रति कारणतेति यावदित्यर्थमित्यभिप्रेत्याह **संयोगिरूप इति** । इदानीमर्थेन्द्रियेतिसहितविशिष्टपदार्थमाह **अर्थेन्द्रिययोरिति** । कारणतयाऽभिमतयोरित्यर्थः । तथा चाकारणभूतयोरर्थेन्द्रिययोर्ग्राह्यग्राहकभावापन्नकार्यभूतार्थेन्द्रिये प्रतिकारणता नैव युज्यत इत्यर्थ उक्तो भवति । कुतो न युज्यत इत्यतः

कारणभूतार्थेन्द्रिययोः कार्यविसदृशस्वभावत्वादिति हेतुकथनपरत्वेन संयोगिरूपराहित्यादित्यंशं व्याचष्टे **कुत इति**। आत्मन तज्ज्ञानतेत्यनयोरावृत्तिं नैवेत्यस्यानुवृत्तिं हिशब्दस्य हेत्वर्थकथकत्वं च मत्त्वा अवशिष्टं मूलांशं व्याचष्टे **आत्मनोऽपि कार्यस्येति**।

**चषकः**— मौलतज्ज्ञानतेति बहुव्रीहिप्रकृतिकतलन्तमित्यभिप्रेत्य व्याकुरुते **आत्मन इत्यादि**।

**॥ इति उक्तस्य अन्योन्याश्रयदोषे आक्षेपस्य समाधानम् ॥**

* * *

**॥ अथ अन्योन्याश्रयदोषे उक्ताक्षेपसमाधानस्य विवरणम् ॥**
**॥ अथ तत्रादौ कारणविकल्पचतुष्टयेन सह बुद्धिस्थकल्पान्तरस्याप्यनुपपत्तिः ॥**
**॥ अथ तत्र कारणं चतुर्धा विकल्प्य प्रथमविकल्पानुपपत्तिः ॥**

२२ **सु०**— इदमुक्तं भवति। कारणं हि सदृशकार्यजननस्वभावं (वा) स्यात्, विसदृशकार्यजननस्वभावं वा, उभयस्वभावं वा, अनुभय(जनन)स्वभावं वा।

तत्र यद्याद्यः कल्पोऽङ्गीक्रियते तदेन्द्रियानालम्बनेभ्यो विरलपरमाणुभ्यस्तथाभूता एव परमाणवो जायेरन्, न पुनः कदाचिदिन्द्रियालम्बनभूता मिलिताः। इन्द्रियेभ्यश्चार्थानधिपतिभ्यस्तथाविधान्येवेन्द्रियाण्युत्पद्येरन्, न जात्वर्थाधिपतीन्द्रियाणि। आत्मनश्चासमुदायज्ञानात् तादृश एवात्मा जायेत, न कदाचित् तज्ज्ञानवान्। अन्यथा कारणपरमाण्वादीनामपीन्द्रियालम्बनत्वादिकमभ्युपगन्तव्यं स्यात्, इतरथा सदृशकार्यजननस्वभावभङ्गापत्तेः। उभयथा समुदायवेदनस्य कादाचित्कत्वं नोपपद्यत इति।

**परि०**— अस्फुटत्वादाह **इदमुक्तमिति**॥ **असमुदायज्ञानादिति**। समुदायज्ञानहीनादित्यर्थः॥ **उभयथेति**। विरलाणुभ्यो जातसन्निकृष्टाणुविषयकापेक्षाबुद्धिव्यङ्ग्यानेकत्वसङ्ख्यायाः समुदायत्वं विरलाणुभ्यः सन्निकृष्टतयाऽणूनां जननस्य वा समुदायत्वमिति कण्ठोक्तं सूचितं च यत्तत्प्रकारद्वयेऽपि न समुदायज्ञानस्य कादाचित्कत्वम्। येन सृष्टिप्रलययोर्व्यवस्था स्यात्। विरलेभ्यो विसदृशसन्निकृष्टाणुजन्मोत्पत्तेरेवायोगेन समुदायज्ञानासम्भवाद्दूरे कादाचित्कत्वमिति भावः। इन्द्रियानालम्बनविरलपरमाण्वादिभ्य इति वाक्यस्थादिपदद्वयेनानधिपतीन्द्रियविरलपरमाणुभ्योऽधिपतीन्द्रियमिलितपरमाणुजनिरिति ग्राह्यम्।

**यादु०— उभयथेति** । कारणसादृश्यं कार्य इति पक्षे, कार्यसादृश्यं कारण इति पक्षे चेत्यर्थः ॥ **समुदायवेदनस्येत्यादि** । तत्र हि कादाचित्कः समुदायवेदनरूपविशिष्टनिषेधो विवक्षितः । स चाद्ये समुदाय-वेदनरूपविशेष्याभावेन, तत्र कदापि तत्सामग्र्यसम्भवात् । द्वितीये तु कादाचित्कत्वरूपविशेषणाभावेन, तत्र सर्वदा तत्सामग्रीसत्त्वसम्भवादिति ज्ञातव्यम् । केचित्तूभयथेत्यस्यानेके परमाणव एव समुदायस्तदनेकत्वं च समुदायत्वमित्युक्तपक्षे, विरलपरमाणुभ्यः सन्निकृष्टाः परमाणवो जायन्ते तदेव तेषां समुदायत्वमिति सूचितपक्षे चेत्यर्थः इत्याहुः ॥

**वं०प०— उभयथेति** । कारणसादृश्यं कार्ये, कार्यसादृश्यं कारण इति च पक्ष इत्यर्थः ॥ **समुदाय-वेदनस्येति** । कारणसादृश्यं कार्य इति पक्षे, कार्यभूतयोः संयोगिरूपयोः ग्राह्यग्राहकयोरालम्बनाधिपतीन्द्रिय-योरिति यावत् । कारणीभूते ये अर्थेन्द्रिये अग्राह्याग्राहकरूपे अनालम्बनानधिपतिरूपे तयोः सादृश्यं वाच्यम् । तथा च आलम्बनार्थाधिपतीन्द्रिययोरपि अनालम्बनानधिपतित्वप्राप्त्या वेदनसामग्र्या अभावेन समुदायवेदनमेव न स्यात् । तथा कार्यसादृश्यं कारण इति पक्षे आलम्बनाधिपतीन्द्रियसादृश्यस्यैव कारणयोः सत्त्वे तयोरप्या-लम्बनाधिपतित्वप्राप्त्या समुदायवेदनसामग्रीसद्भावात् तस्य कादाचित्कत्वं न स्यादित्यर्थः ।

**कं०रा०— असमुदायज्ञानादिति** । समुदायज्ञानरहितादित्यर्थः । **अन्यथेति** । कारणपरमाण्वादीना-मित्यादिशब्देन इन्द्रियात्मनोर्ग्रहणम् । इन्द्रियालम्बनत्वादिकमित्यादिशब्देन अर्थाधिपतित्वसमुदायज्ञानवत्त्वयोः कारणत्वं च परमाण्वादिषु सर्वत्र सम्बध्यते । तथा च इन्द्रियानालम्बनपरमाण्वादिभ्यस्तदनालम्बनपरमाण्वादीना-मेवोत्पत्तिरित्यनङ्गीकृत्य तदालम्बनपरमाण्वादीनामुत्पत्त्यभ्युपगमे कारणभूतानां परमाणूनां इन्द्रियाणामात्मनश्च यथाक्रममिन्द्रियालम्बनत्वादिकमभ्युपगन्तव्यं स्यादित्यर्थः । **इतरथेति** । कारणपरमाण्वादीनामिन्द्रियालम्बन-त्वानभ्युपगमे इत्यर्थः । **उभयथेति** । इन्द्रियालम्बनपरमाण्वादिभ्यस्तदनालम्बनपरमाण्वादीनामुत्पत्त्यभ्युपगमपक्षे समुदायवेदनस्यैवाभावात् तत्कादाचित्कत्वं नोपपद्यते । कारणपरमाण्वादीनामपि इन्द्रियालम्बनत्वाद्यभ्युपगमपक्षे तु समुदायवेदनसम्भवेऽपि तस्य कादाचित्कत्वं नोपपद्यते । अस्मिन्पक्षे समुदायज्ञानवदात्मन एव समुदायज्ञान-वदात्मन उत्पत्तेरभ्युपगततया समुदायवेदनस्य सदातनत्वाप्राप्तेरिति भावः ।

**श्रीनिधि०—** तज्ज्ञानताऽपि हीत्यतो विकल्पस्याभिप्रेतत्वान्नेत्याह **इदमुक्तं भवतीति** । **उभयथा इति** । कारणपरमाण्वादीनां इन्द्रियालम्बनत्वादिके सति वा सदृशकार्यजननभङ्गाभ्युपगमे वेत्यर्थः । **समुदायत्व-वेदनस्य कादाचित्कत्वमिति** । आद्ये सामग्र्याः सर्वदा सत्त्वात् । द्वितीये सामग्र्याः कदाप्यसम्भवेन वेदन-सामान्यस्यैवासम्भवात् । न हि कदाप्यभवतः कादाचित्कत्वं युज्यतेऽपि सार्वकालिकस्येति ।

**शे०चं०—** ननु कारणस्य विसदृशकार्यजनकत्वाङ्गीकारात् अनालम्बनपरमाणुभ्योऽप्यालम्बनपरमा-णूनामनधिपतीन्द्रियेभ्योऽप्यधिपतीन्द्रियाणां समुदायज्ञानादप्यात्मनस्तज्ज्ञस्यात्मनश्चोत्पत्तिसम्भवात् कारणस्य

संयोगिरूपराहित्यादिना कथं कारणत्वाभावसमर्थनमित्यतः सदृशकार्यजनकतापक्षस्यैवेदं दूषणमिति नानुपपत्तिरिति भावेन सम्भावितकल्पप्रदर्शनपूर्वकमाद्यपक्षनिरासकतया मूलं योजयितुमाह **इदमुक्तं भवतीति** । आद्येऽपि कारणपरमाण्वादीनामनालम्बनत्वमेवेति नियमोऽभिमतः । अथवा कार्यपरमाण्वादीनामालम्बनत्वादिकमेवेति नियम इति विकल्पद्वयं मनसि निधायाद्यं दूषयति **तदेति** । **तथाभूता एव** इन्द्रियानालम्बनविरलपरमाणव एव । **तथाविधान्येव** अर्थानधिपतिभूतान्येव । **तादृश एव** असमुदायज्ञान एव । अस्तु तर्हि कार्यपरमाण्वादीनामालम्बनत्वादिकमेवेति द्वितीय इत्यत आह **अन्यथेति** । ननु कारणपरमाण्वादीनामनालम्बनत्वादिकमेवेति नियमेऽपि कार्यपरमाण्वादीनामनालम्बनत्वादिकमेवेति, तथा कार्यपरमाण्वादीनामालम्बनत्वादिकमेवेति नियमेऽपि कारणपरमाण्वादीनामालम्बनत्वादिकमेवेति च कुतो नियम्यत इत्यत उक्तप्रकारद्वयेनैव कारणस्य सदृशकार्यजनकतास्वभावनियमोपपत्तेरेव तन्नियमसिद्धिरित्यभिप्रेत्योक्तद्विविधनियमानभ्युपगमे बाधकमाह **इतरथेति** । अस्तु तर्हि कारणीभूतानालम्बनपरमाण्वादिवत्कार्यपरमाण्वादीनामप्यनालम्बनत्वादिकं, तथा कार्यभूतालम्बनपरमाण्वादीनामिव कारणपरमाण्वादीनामप्यालम्बनत्वादिकमिति पक्षद्वयमपि किन्नश्छिन्नमित्यत आह **उभयथेति** । आद्ये सामग्र्यभावेन समुदायवेदनस्यैवाभावान्न तस्य कादाचित्कत्वं, द्वितीये तु सर्वदा सामग्रीसद्भावेन समुदायवेदनस्यैव सत्त्वान्न तस्य कादाचित्कत्वमिति न कादाचित्कसमुदायवेदनापेक्षया सृष्ट्यादिव्यवस्थेति भावः ।

**वा०र०— आद्येऽपीति** । अत्रानालम्बनत्वादिकमेवेति पाठः । उत्तरत्रालम्बनादिकमित्याद्युक्तेः । अत्र सादृश्यं कारणकार्ययोर्वक्तुं कारणानालम्बनत्वादिकमङ्गीकृत्य कार्यस्यापि तथाविधत्वमुच्यते वा कार्यस्यालम्बनत्वादिकमङ्गीकृत्य कारणस्य तथात्वमुच्यते वेति विकल्पार्थः ।

**स०व्र०— उभयथेति** । 'अन्योन्यापेक्षया पुंसः' इत्यादिनोक्ते अनेकपरमाणव एव समुदायः तदनेकत्वं समुदायत्वं इत्युक्तपक्षे, विरलपरमाणुभ्यः सन्निकृष्टाः परमाणवो जायन्ते तदेव समुदायत्वमिति सूचितपक्षे च इत्युभयथेत्यर्थः । कारणस्य सदृशकार्यजनकत्वमङ्गीकुर्वता विरलपरमाणुभ्यो विरलानामेव उत्पत्तिर्वाच्या । अन्यथा सदृशकार्यजनकत्वाभ्युपगमविरोधात् । तथा च कार्यस्यापि विरलत्वे समुदायत्ववेदनमेव न स्यादिति न तस्य कादाचित्कत्वमपि । अथ जनकीभूतानामपि अविरलत्वमङ्गीकृत्य सदृशकार्यनिर्वाहः तर्हि अविरलपरमाणूनां पूर्वमपि सत्त्वेन सर्वदा समुदायत्ववेदनापत्त्या कादाचित्कत्वमेवेत्यस्य अनुपपत्तिरित्युभयथा समुदायत्ववेदनस्य कादाचित्कत्वं नोपपद्यते इत्यर्थः ।

**विट्ठ०— पूर्वपक्षपरिहारप्रकारं व्यञ्जयितुमाह **इदमुक्तं भवतीति** । **अन्यथेति** । कार्यपरमाणूनामिन्द्रियालम्बनत्वं कार्येन्द्रियाणामर्थाधिपतित्वं कार्यात्मनश्च समुदायज्ञानत्वमित्यङ्गीकार इत्यर्थः । कुतः कारणपरमाण्वादीनां इन्द्रियालम्बनत्वाद्यभ्युपगन्तव्यत्वमित्यत आह **इतरथेति** । **उभयथेति** । कारणपरमाणूनामिन्द्रियानालम्बनत्वं कार्यपरमाणूनामपि इन्द्रियानालम्बनत्वं कारणेन्द्रियाणामर्थानधिपतित्वं कार्येन्द्रियाणामप्यनधि-

पतित्वं कारणात्मनोऽप्यसमुदायज्ञानरूपत्वं कार्यात्मनश्चासमुदायज्ञानरूपत्वमित्येवं कारणानां सदृशकार्यजननस्वभावत्वमित्येकः पक्षः कारणपरमाण्वादीनामपीन्द्रियालम्बनत्वादिकं कार्यपरमाण्वादीनामपीन्द्रियालम्बनत्वमित्येवं कारणानां सदृशकार्यजननस्वभावमित्यपरः पक्षः प्रसक्तः तदुभयथाऽपीत्यर्थः । आद्ये कार्याणां कारणानां सर्वदा इन्द्रियानालम्बनत्वादिसद्भावात् समुदायत्ववेदनस्यैवाप्रसक्तिः । द्वितीये सर्वदा इन्द्रियालम्बनत्वादिसद्भावात् सर्वदा समुदायत्ववेदनं स्यादित्युभयथा समुदायत्ववेदकः स्यादित्युभयथा समुदायत्ववेदनस्य कादाचित्कत्वं नोपपद्यत इत्यर्थः ।

**॥ इति कारणं चतुर्धा विकल्प्य प्रथमविकल्पानुपपत्तिः ॥**

* * *

**॥ अथ तत्र चतुर्विधकारणविकल्पगतद्वितीयविकल्पानुपपत्तिः ॥**

२३ **सु०—** द्वितीयमाशङ्कते **विशेषेति** ।

## अनु०— विशेषकार्यजनकं यदि कारणमिष्यते ।

तथा च इन्द्रियानालम्बनविरलपरमाण्वादिभ्यः तदालम्बनमिलितपरमाण्वादिजनिः उपपद्यत इति भावः ।

निराकरोति **कुत इति** ।

## कुतः समानरूपत्वं कार्याणामपि सर्वशः ।

तर्हीति शेषः । सर्वशोऽपि कार्याणामिति सम्बन्धः । अत्र कार्यग्रहणं परमतानुसारेण । कारणस्य विसदृशकार्यजननस्वभावतायामाकपालभावात् सर्वेष्वपि घटक्षणेषु घटाकारता न स्यात्, किन्तु घटक्षणाद्गजक्षणस्ततो गर्दभक्षण उत्पद्येत । तथा नीलक्षणात्पीतक्षणस्ततः कपोतक्षणो जायेत । नीलानुवृत्तिस्तु न स्यादिति ।

**परि०—** प्रतिक्षणं सिद्धान्ते कार्यजन्माभावादाह **अत्र कार्यग्रहणमिति** । अध्याहृततर्हीतिपदस्यार्थः **कारणस्येत्यादि** । शेषोक्तिः **आकपालभावादिति** । घटस्यात्यन्तिकविनाशे-

ऽवशिष्टो यः कपालभावस्तत्पर्यन्तमित्यर्थः । तन्मते कपालतापत्तिरेव विनाश इत्यभ्युपगमादाकपालभावादित्युक्तम् । कपोतेति वर्णविशेषः । उत्तरोत्तरं प्रति पूर्वपूर्वकारणानां च विसदृशकार्यजननस्वभावत्वादिति भावः ।

**गु०दी०— अत्र कार्यग्रहणं परमतानुसारेण** इत्यत्र पूर्वात्मानं प्रत्युत्तरात्मनः अनधिपतीन्द्रियाणि प्रत्यधिपतीन्द्रियाणां विरलपरमाणून् प्रत्यविरलपरमाणूनां कार्यताया अस्माभिरनङ्गीकारादित्यर्थः । **आकपालभावात्** इत्यस्य मुद्गरप्रहारानन्तरं घटस्य यः कपालीभावः तत्पर्यन्तमित्यर्थः ।

**यादु०— अत्र कार्यग्रहणमिति** । कार्याणामिति कार्यग्रहणमित्यर्थः । अस्मन्मते प्रतिक्षणं कार्याणामभावादिति भावः । यदि कारणं विसदृशकार्यजनकं तर्हि कार्याणां समानरूपत्वं न स्यादिति यथाश्रुतमूले वैयधिकरण्यशङ्कापरिहाराय तात्पर्यमाह **कारणस्येत्यादिना** ॥ **सर्वेष्वपीति** । तेषामपि कारणत्वादिति भावः । **घटाकारता** घटानुवृत्तिमत्ता । ततश्चायमर्थः । यदि कारणं विसदृशकार्यजननस्वभावमिति पक्षोऽङ्गीक्रियते तर्ह्याकपालभावात् सर्वे क्षणा विसदृशकार्यजनकाः स्युः । तेषामपि कारणत्वात् । ततश्च घटानुवृत्तिमन्तो न स्युरिति । न च प्रतिक्षणं जायमानकार्याणामप्युत्तरोत्तरकार्यकारणत्वात् तेषां विसदृशकार्यजनकत्वमापाद्य समानरूपत्वं न स्यादित्येव कुतो नोक्तम् । वैयधिकरण्यशङ्कापरिहारस्यैवमपि सम्भवात् । तत्किं क्षणेष्वापादनेनेति वाच्यम् । अर्थक्रियाहेतुत्वं हि सत्त्वं सजातीयक्षणान्तरोत्पाद एवार्थक्रिया, तद्धेतुत्वं च पूर्वक्षणस्यैव मुख्यं, ततश्च पूर्वोक्तक्षणयोरेव मुख्यः कार्यकारणभावः, तत्रत्यार्थयोस्तु तद्विशेषणतयैव, न प्राधान्येनेति तन्मतसूचनायैवमुक्तत्वात् । कपोतेति रूपविशेषस्य संज्ञा ।

**वं०प०— कपोतेति** । रूपविशेषस्य संज्ञेति द्रष्टव्यम् ।

**कं०रा०—** ननु सिद्धान्ते उत्तरक्षणवर्तिघटादिना पूर्वक्षणवर्तिघटादिकार्यत्वाभावात् कथं कार्यग्रहणमित्यत आह **अत्र कार्यग्रहणमिति** । 'कुतः समानरूपत्वं कार्याणामपी'त्यत्र कार्यग्रहणं परमतानुसारेणेत्यर्थः ।

**श्रीनिधि०— परमतानुसारेणेति** । अस्माभिरर्थेन्द्रिययोरर्थेन्द्रियकार्यत्वानभ्युपगमादेवं उक्तम् । **आ कपालभावादिति** । मुद्गरादिनेति शेषः । कपालभावपर्यन्तं इष्टापादनपरिहारार्थमिदमुदितम् । **घटक्षणाद् गजक्षण इत्यादि** । प्रतिक्षणं विसदृशमेव कार्यं उत्पद्येतेत्यर्थः । **कपोतक्षण इति** । 'कपोत'पदेन रूपविशेष उच्यते । पक्षिविशेष इति केचित् ।

**शे०चं०— कार्यग्रहणमिति** । कार्याणामिति कार्यग्रहणमित्यर्थः । स्वमते प्रतिक्षणं जायमानानां कार्याणामेवाभावादिति भावः । यदि कारणं विसदृशकार्यजनकं तर्हि कार्याणां समानरूपत्वं न स्यादिति यथाश्रुते

मूले वैयधिकरण्यशङ्कापरिहाराय तात्पर्यमाह **कारणस्येति** ।। **आकपालभावादिति** । न चात्राकपालभावादिति कथं पञ्चमी, तद्विधायकाभावादिति वाच्यम् । 'आङ् मर्यादावचन' इति स्मृत्याऽत्राङो मर्यादायां कर्मप्रवचनीयत्वेन 'पञ्चम्यपाङ्परिभिरि'ति कर्मप्रवचनीयाङ्योगात् पञ्चम्युपपत्तेः । न चैवं कर्मप्रवचनीयस्याङः पञ्चम्यन्तेन कपालभावशब्देनाङ् मर्यादाभिविध्योरिति समासे 'सुपो धातुप्रातिपदिकयोरि'ति सुब्लोपेऽपविष्णु संसार इत्यादाविवाकपालभावमित्येव भवितव्यं, तत्कथमाकपालभावादिति पञ्चमीति वाच्यम् । विभाषेति महाविभाषाधिकारेणाङ् मर्यादाभिविध्योरिति मर्यादार्थकस्याङो विकल्पेन पञ्चम्या समासविधानेन समासपक्षे आकपालभावमिति रूपप्राप्तावपि तदभावपक्षे आकपालभावादिति वाक्यस्यापि सम्भवेन पञ्चमीश्रवणोपपत्तेरिति ध्येयम् ।। **सर्वेष्वपीति** । तेषामपि कारणत्वादिति भावः ।। **घटाकारतेति** । घटक्षणतेत्यर्थः । सर्वेष्वपि क्षणेषु घटक्षणतोपपादिकाया घटानुवृत्तेरभावादिति भावः । तत्कथमित्यतः कारणस्य सदृशकार्यजनकत्वाभ्युपगमपक्षे प्रतिक्षणमाकपालभावाद्घटाद्घटस्यैवोत्पत्त्या घटानुवृत्तिसद्भावलाभात् सर्वेष्वपि क्षणेषु घटक्षणतानिर्वाहसम्भवेऽपि कारणस्य विसदृशकार्यजनकत्वाभ्युपगमपक्षे घटाद्गजस्य गजाद्गर्दभस्योत्पत्त्यापत्त्या प्रतिक्षणमाकपालभावाद्घटाद्घटस्योत्पत्त्यभावेन सर्वेष्वपि क्षणेषु घटानुवृत्तेर्घटक्षणतोपपादिकाया अलाभान्न घटक्षणतानिर्वाह इत्याशयेनाह **किन्त्विति** । अत्र घटो न सर्वेष्वपि क्षणेषु घटः, किन्त्वेकस्मिन् क्षणे घट इति ज्ञापनाय क्षणपदप्रयोगः । 'क्षणं हस्ती भवति क्षणं तुरगो भवती'ति शाङ्करभाष्योक्तेरिति ज्ञेयम् ।। **तथेति** । अत्रापि सर्वेषु क्षणेष्वित्यनुवर्तते । कपोतेति रूपविशेषस्य संज्ञा ।। **नीलानुवृत्तिस्त्विति** । ततश्च सर्वेष्वपि क्षणेषु नीलान्नीलस्यैवोत्पत्त्यभावेन नीलानुवृत्तेरभावान्नीलक्षणता न स्यादिति भावः ।

**वा०र०**— घटक्षणतोपपादिकाया इति पाठः । शाङ्करभाष्योक्तेरितीति ............. शेषः ।

**स०व्र०**— **परमतानुसारेणेति** । स्वमते प्रतिक्षणं तादृशकार्यत्वानभ्युपगमादिति भावः ।

**विठ्ठ०**— अस्माभिः प्रतिक्षणमुत्पत्तेरनङ्गीकारात् कारणमिति कथं मूलोक्तिरित्यत आह **अत्र कार्यग्रहणमिति** । यदि कारणं विसदृशकार्यजनकं तर्हि कार्याणां समानरूपत्वं न स्यादित्यापाद्यापादकयोः सामानाधिकरण्याभाव इत्यतः तात्पर्यमाह **कारणस्येत्यादिना** । परमते कपालभावातिरिक्तविनाशानभ्युपगमादाविनाशादित्यनुक्त्वा आकपालभावादित्युक्तम् । कपोतेति वर्णविशेषः । अत्र क्षणशब्दः क्षणिककारणकार्यपरः । अर्थक्रियाकारित्वं सत्त्वम् । यत्सत् तत्क्षणिकम् । अत्र सत्त्वस्य क्षणाद्धीनत्वादेवमुक्तिरितिं ध्येयम् ।

**चषकः**— कपोतेति रूपविशेषस्य संज्ञेति स्थितम् ।

**।। इति चतुर्विधकारणविकल्पगतद्वितीयविकल्पानुपपत्तिः ।।**

* * *

## ॥ अथ तत्र चतुर्विधकारणविकल्पगततृतीयविकल्पानुपपत्तिः ॥

२४ **सु०—** अस्तु तर्ह्युभयस्वभावं कारणमिति तृतीयः पक्ष इति चेन्न, विरोधेनैकस्याप्यजननप्रसङ्गात् । अविरोधे त्वाह **अत इति** ।

### अनु०— अतोऽनियत्या यत्किञ्चिद्यस्य कस्यापि कारणम् ।

प्रकृतपक्षद्वयं समाहृत्य **अत** इति परामृशति । **अनियत्या** 'घटो घटस्यैव', 'नीलो नीलस्यैवे'ति नियतिं विना । **यत्किञ्चित्** घटादिकं नीलादिकं वा । **यस्य कस्यापि** घटादेरघटादेः, नीलादेरनीलादेश्च । **कारणं स्यात्** ॥ घटक्षणस्योभयविधकार्यजननस्वभावत्वेऽसौ तदुभयं जनयेत्, तथा चोपलभ्येतेति यावत् ।

केचिदिदं वाक्यं पूर्ववाक्यशेषतया व्याचक्षते । सर्वशोऽपि कार्याणां समानरूपत्वं न स्यात् । किन्तु विसदृशकार्यजननस्वभावत्वाद्घटादिकं गजादेः कारणं स्यादिति ।

**परि०—** **पक्षद्वयमिति** । सदृशजननस्वभावत्वं विसदृशजननस्वभावत्वं चेति यत्पक्षद्वयं अतोऽर्थेन्द्रियेत्यनेन प्रकृतं तत्परामृशतीत्यर्थः । परमते कालकर्मादिरेव कार्योत्पत्तौ सामग्रीत्वात् कालस्य च प्राधान्यात् घटक्षणस्योभयविधकार्यजननस्वभावत्वं इत्यादिव्यवहारः कृत इति ज्ञेयम् ॥ **केचिदिति** । अविरोधपक्षनिरासकतया (भिन्नवाक्यतया) स्वयं व्याख्यातमिदं वाक्यमतो नियत्येत्य(र्धैक)र्धं केचिदेकवाक्यतया व्याचक्षत इत्यर्थः । तं प्रकारं व्यनक्ति **सर्वशोऽपीति** ॥

**यादु०—** **अविरोधे त्विति** । साङ्ख्यमते इन्द्रियाणां प्रमाऽप्रमाजननस्वभाववदिति भावः । उक्तरीत्या क्षणस्यैव मुख्यकारणत्वात् स एवोपादानविषय इत्यभिप्रेत्याह **घटक्षणस्येति** । एवमग्रेऽपि क्षणानामेव मुख्यकारणत्वाभिप्रायेण पूर्वपूर्वतराद्यदृष्टक्षणा इत्याद्युक्तिरित्यवधेयम् ॥

**वं०प०—** **पक्षद्वयम्** उभयसमाहाररूपम् ।

**कं०रा०—** **प्रकृतमिति** । कारणस्य सदृशकार्यजननस्वभावत्वं वा विसदृशकार्यजननस्वभावत्वं वेति यत्प्रकृतं पक्षद्वयं तदेकीकृत्य अत इत्यनेन परामृशति । तथा च अत इत्यस्य सदृशविसदृशकार्यजननस्वभावत्वादित्यर्थ इति भावः । **उभयविधेति** । सदृशविसदृशकार्यजननस्वभावत्व इत्यर्थः ।

**श्रीनिधि०**— सन्निधानाद् द्वितीयपक्षस्यैव परामर्श इति प्रतीयेते । अत आह **प्रकृतं पक्षद्वयमिति** । प्रकृतत्वस्योभयत्राविशेषादिति भावः । किमावृत्त्या नेत्याह **समाहृत्येति** । तदुभयं जनयेदित्युक्तम् । तदिष्टमेवेत्यत आह **तथा चोपलभ्येतेति यावदिति** । **केचित्** पद्मनाभतीर्थभट्टारकाः । तद्व्याख्यानमनुवदति **सर्वशोऽपीति** ।

**शे०चं०**— अतो नियत्येत्युत्तरग्रन्थस्य तृतीयपक्षनिरासकत्वं न सम्भवति । विरुद्धोभयस्वाभावत्वाभ्युपगमेन तत्रोक्तातिप्रसङ्गाप्रसरादित्यतोऽविरुद्धोभयस्वभावत्वपक्ष एवायमतिप्रसङ्ग इति नानुपपत्तिरिति भावेन तृतीयपक्षमुत्थाप्य तत्र सम्भावितं विकल्पद्वयं च कृत्वा आद्यपक्षं बहिरेव प्रदूष्य द्वितीयपक्षनिरासकतयोत्तरग्रन्थं योजयति **अस्तु तर्हीति** ॥ **प्रसङ्गादिति** । ततश्चार्थक्रियाकारित्वरूपसत्त्वाभावप्राप्त्या क्षणिकत्वाभावप्रसङ्ग इति भावः ॥ **प्रकृतं पक्षद्वयमिति** । कारणं सदृशकार्यजननस्वभावं विसदृशकार्यजननस्वभावमिति पक्षद्वयमित्यर्थः । **परामृशतीति** । तेन कुतोऽयमतिप्रसङ्ग इत्यत उक्तम् **अत इति** । कारणस्य सदृशविसदृशकार्यजननस्वभावत्वादिति योजना सूचिता भवति । एतदेव सूचयन्नुक्तप्रसङ्गस्येष्टापादनतां परिहरति **घटक्षणस्येति** । तदुभयमपीत्यतःपूर्वमाकपालभावात् सर्वेष्वपि क्षणेष्विति शेषः । चिरन्तनटीकाकारमतमनुवदति **केचिदिति** । अत्र 'यत्किञ्चिद्यस्य कस्यचिदि'त्यादेरस्वारस्यमिति भावेन केचिदित्युक्तम् ।

**विठ्ठ०**— **प्रकृतं पक्षद्वयमिति** । सदृशकार्यजननस्वभावत्वं चेति यत्प्रकृतं पक्षद्वयं तत्समाहृत्येत्यर्थः । प्रागुक्तरीत्या क्षणस्यैव प्रधानत्वात् परेण कालस्यैव प्रधानसामग्रीत्वाभ्युपगमाच्च घटक्षणस्येति क्षणप्राधान्येनोक्तिरिति ज्ञेयम् । एवमग्रेऽपि । **केचित्** सन्न्यायरत्नावलीकाराः । तथा ह्युक्तं सन्न्यायरत्नावल्याम् ।

**चषकः**— **पक्षद्वयम्** । सदृशजननस्वभावत्वविसदृशजननस्वभावत्वरूपकल्पद्वयम् ।

**॥ इति चतुर्विधकारणविकल्पगततृतीयविकल्पानुपपत्तिः ॥**

* * *

**॥ अथ च चतुर्विधकारणविकल्पगतचतुर्थविकल्पानुपपत्तिः ॥**

२५ **सु०— न चतुर्थः । अर्थक्रियारहितस्यासत्त्वप्राप्तेः, अर्थक्रियाकारित्वं सत्त्वमिति (हि) सौगताः ।**

**कं०रा०**— **अर्थक्रियारहितस्येति** । कार्यजनकत्वं हि सदृशकार्यजननस्वभावत्वविसदृशकार्यजननस्वभावत्वान्यतरव्याप्तमनुभयस्वभावत्वपक्षे च वस्तुनो व्यापकीभूततदन्यतराभावेन व्याप्यकार्यजनकत्वस्याप्यभावादसत्त्वप्राप्तिरिति भावः । अर्थक्रियाजनकत्वाभावेऽपि सत्त्वं किं न स्यादित्यत आह **अर्थक्रियाकारित्वमिति** ।

**शे०चं०**— स्पष्टत्वाच्चतुर्थपक्षदूषणस्य मूले तदनुक्तिरिति भावेन तं पक्षं दूषयति **नेति** । अर्थक्रिया-रहितत्वमात्रेण कुतोऽसत्त्वप्राप्तिरित्यत आह **अर्थेति** ।

**॥ इति चतुर्विधकारणविकल्पगतचतुर्थविकल्पानुपपत्तिः ॥**

* * *

**॥ अथ बुद्धिस्थकल्पान्तरस्याप्यनुपपत्तिः ॥**

२६ **सु०— ननु च कार्यजननमात्रं वस्तुनः स्वभाव इत्यङ्गीकुर्मो न तूक्तेषु कमपि पक्षमित्यत आह अत इति । बुद्धिस्थमिमं कल्पं अत इति परामृशति । अतिप्रसङ्गस्तु न तिरोहितः ।**

**परि०— अतिप्रसङ्गस्त्विति** । सदृशस्य विसदृशस्य वा जननप्रसङ्गरूपातिप्रसङ्ग इत्यर्थः।

**कं०रा०— बुद्धिस्थमिति** । बुद्धिस्थं वस्तुनः कार्यं जननमात्रस्वभावत्वमिति पक्षं अत इत्यनेन परामृशतीत्यर्थः । **अतिप्रसङ्ग इति** । वस्तुनः कार्यजननमात्रस्वभावत्वे घटादिकं घटादेरघटादेश्च नीलादिकं नीलादेरनीलादेश्च कारणं स्यादित्यतिप्रसङ्गस्तु स्पष्ट इति भावः ।

**श्रीनिधि०**— ननु उपकार्यजननमात्रं वस्तुनः स्वभाव इत्यङ्गीकुर्म इत्यतोऽनियत्या यत्किञ्चिदित्य-स्यावतारिकान्तरं पूर्वमप्रकृतत्वात् कथं अस्यार्त इति परामर्श इत्यत आह **बुद्धिस्थमिममिति** । **अतिप्रसङ्ग-स्त्विति** । अतिप्रसङ्गव्युत्पादनप्रकार इत्यर्थः । घटो घटस्यैव नीलो नीलस्यैवेति नियतिं विनेत्यादिनोक्त इत्यर्थः । सदृशस्य विसदृशस्य च कार्यत्वादिति भावः ।

**शे०चं०**— नन्वतःशब्दः प्रकृतस्य हेतुत्वमाह । न चात्र कार्यजननमात्रस्य वस्तुस्वभावतायाः प्रकृतत्वमस्ति । तत्कथमस्यार्थस्य अत इति परामर्श इत्यतो वक्तृबुद्धौ परिवर्तमानमेव साक्षात्प्रकृतमित्युच्यते, ग्रन्थोक्तत्वं तु तल्लिङ्गतयैव तथा, एतच्च वक्तृबुद्धिस्थितमिति युक्तस्तस्य परामर्श इति भावेनोक्तं **बुद्धिस्थ-मिति** । अनेन **अतः** कारणस्य कार्यजननमात्रस्वभावत्वाभ्युपगमादिति व्याख्यातं भवति । अनियत्येत्यादेरति-प्रसङ्गस्याविवरणे निमित्तमाह **अतिप्रसङ्गश्चेति** । पूर्वव्याख्यानेनैव तद्विवरणसिद्धेः पृथगविवरणमिति भावः ।

**वा०र०**— 'यतोऽनुभवतः सर्वं सिद्धमेवेति तत्' इति जिज्ञासाधिकरणमूलानुसारेणाह **वक्तृबुद्धौ परिवर्तमानमिति** ।

विट्ठ०— अतिप्रसङ्गस्त्विति । अनुभयस्वभावत्वे यत्किञ्चिद्घटादिकं नीलादिकं यस्य कस्यचिद्घटादेरघटादेर्नीलादेरनीलादेर्वा कारणं स्यादित्युक्तातिप्रसङ्गस्यात्रापि साम्यादिति भावः ।

॥ इति बुद्धिस्थकल्पान्तरस्याप्यनुपपत्तिः ॥
॥ इति कारणविकल्पचतुष्टयेन सह बुद्धिस्थकल्पान्तरस्याप्यनुपपत्तिः ॥

* * *

॥ अथ च तत्र उक्तविकल्पितकारणानुपपत्तिसमर्थनम् ॥
॥ अथ तत्र उक्तविकल्पितकारणानुपपत्तेः अदृष्टसहकारिवशात् परिहारशङ्का तत्समाधानश्च ॥
॥ अथ तत्रादौ उक्तविकल्पितकारणानुपपत्तेः अदृष्टसहकारिवशात् परिहारशङ्का तत्समाधायकलाक्षणिकमनुव्याख्यानश्च ॥

२७ सु०— 'स्यादेतत् । यथा भवन्मते प्रमाजननस्वभावत्वेऽपीन्द्रियादेर्दोषसहकारिवशादप्रमाजननम्, तथा कारणस्य सदृशकार्यजनकत्वेऽप्यदृष्टादिसहकारिसामर्थ्यात् कदाचिद्विसदृशकार्यजननं भविष्यति । यद्वा यथा साङ्ख्यानामिन्द्रियादीनि प्रमाऽप्रमाजननस्वभावानि । तत्राप्रमाप्रतिपक्षाणां गुणानामुपनिपाते प्रमामेवोपजनयन्ति, प्रमाप्रतिपक्षाणां दोषाणामुपनिपाते त्वप्रमाम्, तथा कारणस्योभयस्वभावत्वेऽप्यदृष्टादिवशात् तदन्यतरजन्मोपपत्स्यते । अथवा यथा नैयायिकादीनां इन्द्रियादीनि ज्ञानमात्रजननस्वभावानि, गुणादिसहकार्युपनिपातेन प्रमाद्यु(त्प)पपत्तिः; तथा कारणं कार्यजननस्वभावमेव, अदृष्टादिसहकारिसमवधानात् (तु) तत्सदृशं विसदृशं वा जनयिष्यती'त्यत आह **अदृष्टमपीति** ।

## अनु०— अदृष्टमपि तस्यैव विशेषापादकं कुतः ।

अत्रादृष्टग्रहणमुपलक्षणं (सहकारिमात्रस्य) ।

परि०— उपलक्षणमिति । अदृष्टं क्षणस्योपलक्षणमिति, परेण सहकारित्वेन यदभ्युपगम्यतेऽदृष्टमन्यद्वा तत्सर्वस्योपलक्षणमिति वार्थः ॥

वं०प०— उपलक्षणमिति । क्षणस्येति शेषः ।

**श्रीनिधि०— सहकारिमात्रस्येति** । पुरुषप्रयत्नादिरूपस्येत्यर्थः ।

**शे०चं०—** नन्वदृष्टमपि तस्यैवेत्यदृष्टस्य विशेषापादकत्वं निराक्रियते, तदनर्थकम् । न च कारणस्य सदृशकार्यजननादिस्वभावत्वेऽप्यदृष्टादिसहकारिवशाद्विसदृशकार्यजनकत्वं भविष्यतीति शङ्कानिरासार्थत्वान्न तदानर्थक्यमिति वाच्यम् । अतत्स्वभावस्यापि सहकारिवशात् तत्कार्यकारितायाः क्वाप्यदर्शनेनासम्भावनाग्रस्तत्वेनोक्तविधशङ्काया अप्यनुत्थानादित्यतोऽतत्स्वभावस्यापि सहकारिवशेन तत्कार्यकारिताया बहुवादिसम्मतत्वेन तद्वदेव सदृशकार्यजननादिस्वभावस्यापि कारणस्य सहकारिवशेन विसदृशकार्यजनकत्वादिति शङ्कोत्थानसम्भवान्नानुपपत्तिरिति भावेनोक्तशङ्कानिवर्तकतयोत्तरवाक्यं योजयितुमतत्स्वभावस्यापि सहकारिवशेन तत्कार्यकारिताया बहुवादिसम्मततामुपदर्शयन्नेव तच्छङ्कामुत्थापयति **स्यादेतदिति** ॥ **प्रमाजननस्वभावत्वेऽपीति** । यथेन्द्रियादीनां ज्ञानजननशक्तिः सहजा तथैव प्रमाजननशक्तिरपि सहजैव । अन्यथा प्रामाण्यस्य स्वतस्त्वभङ्गः स्यात् । सत्यप्येवं दोषसद्भावे न प्रमाजनकत्वं तेषां किन्त्वप्रमाजनकत्वमेव । दोषाणां सहजशक्तिप्रतिबन्धेन विपरीतशक्त्याधायकताया बहुलमुपलम्भादिति भावः ॥ **साङ्ख्यानामिति** । प्रामाण्याप्रामाण्ययोरपि स्वतस्त्वात् प्रमाजननशक्तिरप्रमाजननशक्तिश्च सहजैवेत्यर्थः ॥ **तत्रेति** । अन्यथा प्रामाण्याप्रामाण्ययोर्ज्ञानकारणमात्रजन्यत्वेन इन्द्रियादिजन्यज्ञानस्य प्रमात्वाप्रमात्वयोरभ्युपगमे वस्तुनो विरुद्धद्वयाकारालिङ्गितत्वस्य परस्परविरोधेन प्रमाणत्वाप्रमाणत्वोभयविकलत्वाभ्युपगमे च तदुभयविकलस्य ज्ञानस्यायःशलाकावत् अविषयतायां निःस्वभावस्य ज्ञानस्यानुपपत्त्या इन्द्रियादीनां ज्ञानजनकत्वमेव नास्तीत्यभ्युपगमे च जगदान्ध्यस्य प्रसङ्गादुक्तव्यवस्थासिद्धिरिति भावः ॥ **ज्ञानमात्रजननस्वभावानीति** । अनित्यज्ञानत्वावच्छिन्नकार्यताप्रतियोगिककारणताश्रयाणीत्यर्थः । गुणादीत्यादिपदेन दोषपरिग्रहः । प्रमादीत्यादिपदेन चाप्रमायाः परिग्रहः । नन्वदृष्टादिसहकारिवशादिति पूर्वग्रन्थानुरोधेनादृष्टादिकमिति वक्तव्यम् । अदृष्टमपि तस्यैवेत्यदृष्टमात्रोक्तिस्तु कथमित्यत आह **अत्रेति** ।

**वा०र०— विरुद्धाकारद्वयालिङ्गितत्वस्य** इत्यादेः प्रसङ्गादिति वक्ष्यमाणेनान्वयः ।

**विट्ठ०—** प्रथमतृतीयचतुर्थपक्षानभ्युपेत्य शङ्कते **स्यादेतदिति** । गुणादीत्यादिपदेन दोषग्रहणं अनुभयस्वभावस्यापि सहकारिवशादुभयविधकार्यजनकत्वं स्यादिति भावः । **सहकारिमात्रस्येति** । गुणदोषादिरूपसहकार्येतरस्य सर्वस्यापीत्यर्थः ।

**॥ इति उक्तविकल्पितकारणानुपपत्तेः अदृष्टसहकारिवशात् परिहारशङ्का तत्समाधायकलाक्षणिकमनुव्याख्यानञ्च ॥**

* * *

**॥ अथ च अस्यानुव्याख्यानस्य वाक्यद्वयात्मकतां प्रदर्श्य उभयत्र कल्पद्वयमाशङ्क्य तयोराद्यकल्पयोर्दूषणम् ॥**

२८ **सु०— 'अदृष्टमपि विशेषस्य**; आद्ये विसदृशकार्यजनकत्वस्य, द्वितीयेऽन्यतर-प्रतिबन्धस्य, तृतीये तूभयजनकत्वस्य, **आपादकं कुतः**' इत्येकं वाक्यम् । तथाहि । पूर्व-पूर्वतराद्यदृष्टक्षणा विशेषानापादकास्तदापादका वा । आद्ये त्वस्यादृष्टक्षणस्य विशेषापाद-कत्वं न सिद्ध्यति, कारणाभावात् । विशेषानापादकादृष्टक्षणजन्योऽप्य(यम)दृष्टक्षणः सह-कारिवशात् विशेषमापादयिष्यतीति चेन्न, तत्सहकारिण्यप्यस्य साम्यात् । (अ)तत्रापि सह-कार्यन्तरानुसरणे गौरवमिति ।

'**तस्यैव** कारणस्य, विशेषापादकं कुतः' इत्यपरं वाक्यम् । तथाहि । विशेषा-पादकमप्यदृष्टं किं विवक्षितस्यैव कारणस्य विशेषमापादयति, कारणमात्रस्य वा । नाद्यः नियामकयोः कारणज्ञापकयोरभावादिति । येभ्य इन्द्रियानालम्बनविरलपरमाणुभ्यस्तदा-लम्बनमिलितपरमाणूत्पत्तिराशास्यते, यतश्चार्थानधिपतेरिन्द्रियादर्थाधिपतीन्द्रियस्य, यस्माच्च समुदायज्ञानरहितादात्मनस्तद्वदात्मोत्पादः, तदिदं तस्यैवेत्युच्यते ।

**परि०— अस्य साम्यादिति** । विकल्पादेः समत्वादित्यर्थः । द्वितीयवाक्यं द्वितीयपक्षी-याद्यपक्षनिरासकतया व्याचष्टे **तथाहीत्यदिना** ॥ **विवक्षितस्येति** । इन्द्रियानालम्बनविरलपरमा-ण्वादिरूपस्येत्यर्थः । तस्यैव विशेषापादकं कुत इत्यस्य तात्पर्यमाह **नियामकयोरिति** । तस्यैवे-त्येतत्पदपरामृश्यं व्यनक्ति **येभ्य इत्यादिना** ।

**वं०प०— विशेषानापादका इति** । परमाण्वादिरूपे कारणे क्षणे चेत्यर्थः ॥ **आद्ये त्वस्यादृष्ट-क्षणस्येति** । अस्य इन्द्रियानालम्बनपरमाणूनामिन्द्रियालम्बनपरमाणुजनकत्वरूपविशेषसम्पादकत्वस्येत्यर्थः । **कारणाभावादिति** । इन्द्रियालम्बनपरमाणुषूक्तरूपविशेषं तदाऽऽपादयेद्यदि स्वयं विशेषापादकपूर्वपूर्वादृष्टजन्यं स्यात् । न चैतदस्ति । कारणाभावात् इन्द्रियानालम्बनपरमाणुषु अस्यादृष्टस्योक्तरूपविशेषापादकत्वं न सिद्ध्य-तीत्यर्थः । **सहकारिण्यप्यस्येति** । पूर्वपूर्वसहकारिक्षणाः यदि विशेषानापादकास्तर्ह्यस्यादृष्टस्य विशेषापादकत्वं न सिद्ध्यति कारणाभावात् । विशेषानापादकसहकारिजन्यमप्यदृष्टं सहकार्यन्तरवशाद्विशेषान् आपादयिष्यतीति यदि तदा सहकार्यन्तरेऽप्यस्य साम्यमित्यादि ज्ञेयम् । विशेषानापादयिष्यति चेदित्येतदुपरि विकल्पं करोति **विशेषेत्यादिना** ।

**कं०रा०— तत्सहकारिणीति** । यत्सहकारिवशाद्विशेषानापादकादृष्टक्षणजन्यस्याप्यदृष्टक्षणजन्यस्य विशेषापादकत्वमुक्तं तस्मिन् सहकारिण्यप्यदृष्टगतविशेषापादकत्वसम्पादकत्वरहितस्वकारणजन्ये कारणाभावेन अदृष्टगतविशेषापादकत्वसम्पादकत्वं न सम्भवतीति दोषस्य साम्यादित्यर्थः । **अर्थाधिपतीन्द्रियस्येति** । उत्पत्तिराशास्यत इत्यन्वयः । **तद्वदिति** । समुदायज्ञानोपेतात्मोत्पादः आशास्यत इत्यन्वयः । **तदिदमिति** । इन्द्रियानालम्बनविरलपरमाण्वर्थानधिपतीन्द्रियसमुदायज्ञानरहितात्मरूपं त्रयम् । **तस्यैवेति** । तच्छब्देनोच्यत इत्यर्थः ।

**श्रीनिधि०— आद्ये** पक्ष । एवं द्वितीय इत्याह **पूर्वपूर्वतराद्यदृष्टक्षणा इति** । पूर्वपूर्वतत्पूर्वाद्यदृष्ट-क्षणा इत्यर्थः । **अस्य साम्यादिति** । **अस्य** विकल्पस्य साम्यादित्यर्थः । **गौरवमिति** । अप्रामाणिकानेक-कल्पनादित्यर्थः ।

**शे०चं०—** 'अदृष्टमपि तस्यैव विशेषापादकं कुत' इत्येकवाक्यतया योजनायामदृष्टस्य विशेषा-पादकत्वमेव नास्तीत्यस्यार्थस्यालाभात् तल्लाभाय वाक्यभेदमाश्रित्य मूलं योजयति **अदृष्टमपीति** । आद्ये कारणस्य सदृशकार्यजननस्वभावत्वे । **द्वितीये** कारणस्योभयस्वभावत्वे ॥ **अन्यतरेति** । सदृशविसदृशकार्ययो-रन्यतरेत्यर्थः । **तृतीये** कारणानां कार्यजननस्वभावमिति पक्षे ॥ **कारणाभावादिति** । विशेषानापादकपूर्वपूर्वतरा-द्यदृष्टस्य सदृशकार्यमात्रजनकतया विशेषानापादकादृष्टमात्रजनकत्वेन विशेषापादकादृष्टजनने कारणाभावा-दित्यर्थः ॥ **साम्यादिति** । अयमर्थः । पूर्वपूर्वतरसहकारिणः किं विशेषानापादकास्तदापादका वा । द्वितीये वक्ष्यामः । आद्ये त्वस्य सहकारिणो विशेषापादकत्वं न सिद्ध्यति । तत्कारणतयाऽभिमतस्य पूर्वपूर्वतरसह-कारिणो विशेषानापादकतया तस्य स्वसदृशसहकारिमात्रजनकतया विशेषानापादकसहकारिणस्तदुत्पत्तिसम्भवेऽपि विशेषापादकसहकारिणो विसदृशतया ततः उत्पत्तेः असम्भवादिति । ननु विशेषानापादकपूर्वपूर्वसहकारि-जन्योऽप्ययं सहकारी सहकारिसामर्थ्याद्विशेषमापादयिष्यतीत्यत आह **तत्रापीति** । गौरवमित्यनवस्थोपलक्षणम् । ततः पूर्वपूर्वतरसहकार्यन्तरस्य वक्ष्यमाणरीत्या विशेषापादकताया अयोगात् तदनापादकत्वमेव वाच्यम् । ततश्च विशेषानापादकसहकार्यन्तरजन्यस्यास्य सहकार्यन्तरस्य कारणाभावाद्विशेषानापादकत्वप्रसङ्गपरिहाराय, विशेषा-नापादकपूर्वपूर्वसहकार्यन्तरजन्यस्य सहकार्यन्तरस्यापि सहकार्यन्तरसामर्थ्यादेव विशेषापादकत्वाश्रयणावश्य-म्भावादिति भावः ।

तर्हि मूले तस्यैवेत्यंशवैयर्थ्यमित्यत एकवाक्यतापक्षमाश्रित्यापि योजयितुमाह **तस्यैवेत्यादि** ॥ **कारणमात्रस्यापीति** । यस्य कस्यापि कारणस्येत्यर्थः ॥ **नियामकयोरिति** । अयं भावः । पूर्वपूर्वतरादृष्टं किं विवक्षितस्यैव कारणस्य विशेषापादकं किं वा कारणमात्रस्यैव तदापादकम् । द्वितीये वक्ष्यामः । आद्ये त्वस्या-दृष्टस्य न विवक्षितस्य कारणस्यैव विशेषापादकत्वं सिद्ध्यति । तत्तत्कारणस्यादृष्टस्य विवक्षितकारण एव विशेषानापादकतया तज्जन्यस्याप्यस्य विवक्षितकारण एव विशेषानापादकताया एव न्याय्यत्वेन विवक्षितकारण

एव विशेषानापादकाददृष्टात् तादृशकारणे विशेषापादकादृष्टजननासम्भवात् । विवक्षितकारण एव विशेषानापादकादृष्टाज्जन्यमपीदमदृष्टं सहकारिविशेषाद्विवक्षितस्यैव कारणस्य विशेषमापादयिष्यतीति चेन्न । तत्सहकारिण्यप्यस्य प्रत्यवस्थानस्य समानत्वात्, तत्रापि सहकार्यन्तरानुसरणे त्वनवस्था स्यादिति । तस्यैवेति विवक्षितकारणस्यैवेति व्याख्यातम् । तत्र किं तद्विवक्षितं कारणमिति जिज्ञासायामाह **येभ्य** इत्यादिना **इत्युच्यत** इत्यन्तेन । अनेनेन्द्रियालम्बनपरमाणवोऽनधिपतीन्द्रियाणि असमुदायज्ञान आत्मा चेत्येतद्विवक्षितं कारणमित्युक्तं भवति ।

**वा०र०**— सिद्धान्तिसाङ्ख्यनैयायकमतानुसारेणाशङ्कितप्रकारत्रयसङ्ग्रहाय विशेषपदं तत्तत्परतया व्याचष्टे मूले **विशेषस्याद्य इत्यादिना** । तत्तन्मतानुसारेण तत्तत्सङ्ग्राह्यविशेषमुपदर्शयति टीकायां **आद्य इत्यादिना** । **एकवाक्यतापक्षमाश्रित्यापि योजयितुमिति** । अनेन पूर्वयोजनायां विशेषापादकत्वमेव नास्तीति प्रतिपादितम् । अत्र तु अस्तु वा विशेषापादकता तथापि तस्यैव विशेषापादकं कुत इति योजनान्तरमेतदित्युक्तं भवति । कारणमात्रस्य वेतीति प्रतीकोपादानाम् । स्यापीतीति तु लेखकप्रमादात् क्वचित्कस्यापीत्येवंरूपमूलपुस्तकपाठाद्वेति ध्येयम् । **पूर्वपूर्वतरादृष्टमिति** । यददृष्टमिदानीं कारणविशेषस्य विशेषापादकत्वेन प्रकृतम् । तत्कारणपरम्परागतं अदृष्टमित्यर्थः । तस्यैवेत्यनेनोक्तं तु मूल एव स्पष्टम् । **वक्ष्याम इति** । अदृष्टक्षणानां विशेषापादकत्वपक्षदूषणेन अस्यापि परिहरिष्यमाणत्वादिति भावः । **अस्येति** । इदानीं सहकारितया अभ्युपगतस्येत्यर्थः । **अनवस्था स्यादिति** । अनेन कारणविशेष एवादृष्टस्य विशेषापादकत्वोपयोगि यत्तददृष्टकारणस्य तथात्वं तच्च नास्तीति योजना सूचिता भवति । उपलक्षणं चैतत् । अस्यादृष्टविशेषस्यैव कारणविशेष एव विशेषार्थकत्वमित्यत्र ज्ञापकस्यापि कस्याप्यभाव इत्यपि बोध्यम् । एवं च कारकज्ञापकाभावयोर्लभः । मूलेऽभावादितीत्यत्रत्येतिशब्द अदृष्टमपीति पूर्वानुव्याख्यानोक्तदूषणाभिधानपरिसमाप्तौ बोध्यः ।

**वि०ठ०**— मूलगतविशेषपदं विशेषस्येति षष्ठ्यन्ततयाऽनूद्य सारेण व्याख्याति **अदृष्टमपि विशेषस्याद्य इत्यादिना** । **एकं वाक्यमिति** । तस्यैवेत्यंशपरित्यागेनेति भावः । **कारणाभावादिति** । कार्यरूपोत्तरादृष्टस्य विशेषापादकत्वे पूर्वदृष्टक्षणस्यैव करणत्वं वक्तव्यम् । तस्य च विशेषानापादकत्वाङ्गीकारे कारणत्वायोगादिति भावः । **अस्य साम्यादिति** । सहकारिणोऽपि विशेषानापादक आपादको वेति विकल्पलक्षणदूषणसाम्यादित्यर्थः । अस्तु वा कार्यादृष्टस्य विशेषापादकत्वं तथाऽप्यनुपपत्तिरेवेत्याशयेन विशिष्टं मूलं योजयितुमाह **तस्यैव कारणस्येति** । **विवक्षितस्येति** । इन्द्रियानालम्बनपरमाण्वादिरूपस्येत्यर्थः । नाद्य इत्युक्तं तत्र हेतुतया तस्यैव विशेषापादकं कुत इत्याक्षेपाभिप्रायमाह **नियामकयोरिति** । मूलगतस्य तस्येतिपदस्य कारणस्येति सामान्यतोऽर्थः सूचितः । तमेव विवक्षितमर्थं व्यनक्ति **येभ्य इत्यादिना** ।

**॥ इति अस्यानुव्याख्यानस्य वाक्यद्वयात्मकतां प्रदर्श्य उभयत्र कल्पद्वयमाशङ्क्य तयोराद्यकल्पयोर्दूषणम् ॥**

* * *

### ॥ अथ च तत्र उभयत्र द्वितीयकल्पयोर्दूषणम् ॥

२९ सु०— उभय(त्रापि द्वि)त्र द्वितीयौ कल्पौ दूषयति **यस्येति** ।

## अनु०— यस्य कस्यापि यत्किञ्चिद्विशेषमुपपादयेत् ।

अत्रापि '**यत्किञ्चिद् अदृष्टं विशेषमुपपादयेदि**'त्येकं वाक्यम् । यदि पूर्वपूर्वतराद्यदृष्टस्याप्यस्ति विशेषापादकत्वं तर्हि तदपि पूर्वपूर्वतरादिपरमाण्वादौ विशेषमापादयेदेव, समर्थस्य क्षेपानभ्युपगमात् । तथा च समुदायप्रतीतेः समयनियमो न स्यादिति ।

'**यस्य कस्यापि विशेषमुपपादयेदि**'ति द्वितीयम् । यदि कारणमात्रस्य विशेषापादकमदृष्टमङ्गीक्रियते तदा सर्वेषामपि कारणानां विशेषमुपपादयेत् । तथा च घटपरमाणुमेलने सर्वेषामपि मेलनं स्यात्, न तु कुत्राप्यभिलषितपरमाण्ववस्थानं भवेत्, न च युगपत्सर्वसमुदायो दृश्यत इति ।

**परि०— उभयत्रापि द्वितीयौ कल्पाविति** । तदापादका वेति कल्पं, कारणमात्रस्य वेति कल्पं चेत्यर्थः । अस्तु को दोष इत्यत आह **तथा चेति** । प्रलयकालीनविरलपरमाणूनामपि सन्निकृष्टपरमाणुजनकत्वे लयगताणूनामपि पूर्वपूर्वेत्युक्तदिशा सर्वेषामपि सन्निकृष्टतापत्त्या तन्निमित्तापेक्षाबुद्धिव्यङ्ग्यानेकत्वसङ्ख्यारूपसमुदायवृत्तिसम्भवेन संसारसमय एव समुदायज्ञानं न तु लय इति समयनियमो न स्यादित्यर्थः ॥ **द्वितीयमिति** । वाक्यमिति वर्तते ।

**वं०प०— उभयत्रेति** । पूर्वपूर्वादृष्टक्षणा विशेषानापादकास्तदापादका वेति पक्षे, विशेषानापादकादृष्टजन्योऽप्ययमदृष्टक्षणः सहकारिवशाद्विशेषान् आपादयिष्यतीत्यत्र विकल्पिते विशेषापादकमप्यदृष्टं किं विवक्षितस्यैव कारणस्य विशेषमापादयति कारणमात्रस्यैव वेति पक्षे चेत्युभयत्रेत्यर्थः । **द्वितीयौ** पूर्वोत्तरादृष्टक्षणा विशेषापादकास्तथा विशेषापादकमप्यदृष्टं कारणमात्रस्य विशेषमापादयतीति द्वितीयत्वेनोक्तपक्षावित्यर्थः । **क्षेपो** विक्षेपो, विलम्बः ।

**कं०रा०— उभयत्रेति** । पूर्वपूर्वतराद्यदृष्टक्षणाः विशेषानापादकास्तदापादका वेत्यत्र यो द्वितीयो कल्पः यश्च विशेषापादकमप्यदृष्टं किं विवक्षितकारणस्यैव विशेषमापादयति कारणमात्रस्य वेत्यत्र द्वितीयः तौ कल्पौ दूषयतीत्यर्थः ।

**श्रीनिधि०— उभयत्र द्वितीयौ कल्पौ दूषयतीति** । उभयत्राद्यद्वितीययोः कल्पयोः आद्यविकल्पस्य द्वितीयः विशेषापादका इति विकल्पः । द्वितीयस्याद्यविकल्पेऽनुपपन्नतयाऽभिहितस्यार्थस्याभ्युपगमेन प्रवृत्तस्य विशेषापादकमप्यदृष्टमित्यादेः द्वितीयः कारणमात्रस्य विशेषापादकमिति विकल्पः, तौ दूषयतीत्यर्थः । **आक्षेप इति** । निर्व्यापारतेत्यर्थः । **समयनियमो न स्यादिति** । यदा समुदायप्रतीतिरभिलप्यते ततः पूर्वपूर्वतरादि-कालेऽपि स्यादित्यर्थः । **न कुत्राप्यमिलितपरमाण्ववस्थानं भवेत्** इतीष्टमेवेत्यत आह **न च युगपदिति** ।

**शे०चं०— उभयत्र द्वितीयाविति** । अदृष्टमपीत्यादिमूलग्रन्थे तस्यैवेत्येतत्पदप्रक्षेपाप्रक्षेपाभ्यां विभिन्नवाक्यार्थद्वये विकल्पितपक्षेषु पूर्वपूर्वतरादृष्टक्षणा विशेषानापादका इति अदृष्टमपि विवक्षितकारणविशेषस्यैव विशेषापादकमिति चाद्यपक्षद्वयं पूर्वत्र निराकृतम् । इदानीं त्वदृष्टक्षणा विशेषापादका इति, अदृष्टमपि कारण-मात्रस्य विशेषापादकमिति चोभयत्र द्वितीयौ कल्पौ निराकरोतीत्यर्थः । अस्त्येव पूर्वपूर्वतरादृष्टस्यापि परमाण्वादौ विशेषापादकत्वमितीष्टापादनमेतदित्यत आह **तथा चेति** ॥ **समयनियमो न स्यादितीति** । तथा च न समु-दायत्ववेदनापेक्षयाऽपि सृष्ट्यादिव्यवस्थोपपद्यत इति भावः ॥ **सर्वेषामपीति** । इन्द्रियानालम्बनपरमाण्वादीना-मिवान्येषामपि कारणानामित्यर्थः ॥ **कारणमात्रस्येति** । विवक्षितकारणस्येव यस्य कस्यापि कारणस्येत्यर्थः । इष्टापत्तिं परिहरति **तथा चेति** । अस्तु घटपरमाणुमेलनसमये सर्वपरमाणुमेलनमपीतीष्टापत्तिः इत्यतः तर्ह्येक-समुदायप्रतीतिदशायां सर्वसमुदायप्रतीतिः स्यादविशेषान्न च साऽस्तीत्याह **न चेति** ।

**स०व्र०— उभयत्र द्वितीयाविति** । तस्येत्येतत्पदप्रक्षेपाप्रक्षेपाभ्यां विभिन्नवाक्यार्थद्वये पूर्वपूर्व-तरादृष्टक्षणा विशेषापादका इति; अदृष्टमपि कारणमात्रस्य विशेषापादकमिति पक्षद्वयं निराकरोतीत्यर्थः । **अत्रापीति** । तन्तुसहकारित्वेनाभिप्रेतादृष्टविशेषस्य पटलक्षणतन्तुकार्यकारित्वाभावे विसदृशकार्यजनकत्वा-भावापत्त्या, तथा तत्रापि सहकारित्वेन कल्पितादृष्टविशेषस्यापि अदृष्टेन सह एककार्यकारयितृत्वाभावे तस्मि-न्नदृष्टे विसदृशकार्यजनकत्वापादकत्वाभावापत्त्या तदुपपत्त्यर्थं कल्प्यमानादृष्टस्य पटरूपैककार्यजनकत्वावश्य-म्भावात् तन्त्वादिसहकार्यदृष्टादेरपि पटरूपैककार्यजननार्थं अपेक्षायामपि दण्डचक्रादिन्यायेन अनवस्थापादक-त्वेनाप्रामाणिकानेककल्पनात्मकत्वात् कल्पनागौरवमेव युक्तमित्यभिप्रायेण एतदभिधानमिति ध्येयम् ।

**विठ्ठ०—** अदृष्टा क्षणा विशेषानापादका आपादका वेत्यत्र द्वितीयः कल्पो न दूषितः । विशेषा-पादकमप्यदृष्टं किं विवक्षितकारणस्यैव विशेषमापादयति कारणमात्रस्य वेत्यत्रापि द्वितीयः कल्पोऽवशिष्टः । तदुभयदूषणपरतयोत्तरमूलमवतारयति **उभयत्रेति** । विशेषापादकमप्यदृष्टमित्यादिग्रन्थस्य आद्यस्य द्वितीयकल्प-मवलम्ब्य प्रवृत्तत्वेऽपि तस्य दूषणानुक्तेरुभयत्र द्वितीयकल्पावित्युक्तिरुपपद्यत इति द्रष्टव्यम् । **समयनियमो न स्यादिति** । तथा च सृष्टिलयादिव्यवस्था न सिद्ध्येदिति भावः । विशेषापादकमप्युत्तरादृष्टं कारणमात्रस्य विशेषमापादयतीत्येतत्पक्षदूषणपरतया मूलांशं व्याचष्टे **यस्य कस्यापीति** । द्वितीयमित्यतःपरं वाक्यमित्यनु-वर्तनीयम् । **सर्वेषामपि मेलनं स्यादिति** । तथा च एककार्योत्पत्तौ युगपत् सर्वकार्योत्पादः स्यादिति भावः ।

॥ इति तत्रोभयत्र द्वितीयकल्पयोर्दूषणम् ॥

॥ इति उक्तविकल्पितकारणानुपपत्तेः अदृष्टसहकारिवशात् परिहारशङ्का तत्समाधानश्च ॥

* * *

॥ अथ उक्तविकल्पितकारणानुपपत्तेः व्याहतत्वमाशङ्क्य कार्यकारणभावाङ्गीकारेण उक्तान्योन्याश्रयपरिहारशङ्का, कार्यकारणभावाङ्गीकारे नियामकाभावात् तन्निरासश्च ॥

॥ अथ तत्रादौ उक्तप्रकारेण उक्तान्योन्याश्रयपरिहारशङ्का तन्निरासश्च ॥

३० **सु०**— अथ मतम् 'सर्वमिदं स्वव्याहतम् । तथा हि । तन्तवो यदि सदृशकार्यजननस्वभावास्तदा तन्त्वन्तरमेव जनयेयुर्न तु पटम् । यदि च विसदृशकार्यजननस्वभावास्तदा न तेभ्यः पार्थिवपटस्योत्पत्तिः स्यात् किन्तु पाथसीयं किमपि जायेत । उभयस्वभावत्वं तु विरुद्धम् । अनुभयस्वभावत्वे पटस्याप्यनुत्पत्तिः । सहकारिवशाद्व्यवस्थाङ्गीकारे सहकारिष्वपीदं समानम् । अथोच्येत । अस्ति(स्तु) तावत्तन्तुपटयोः कार्यकारणभावः, प्रमितस्यापह्नवानर्हत्वात्; स च यथा यथोपपद्यते तथा तथा कल्पयिष्यत' इति । सममेतन्ममापीत्यत आह **कार्यं चेति** ।

**अनु०**— कार्यं च कारणं चैवं यत्किञ्चिद्यस्य कस्यचित् ।
भवेन्नियामकाभावात्

'नित्यविनाशित्वे' इत्येतद्वक्ष्यमाणमत्रापि सम्बध्यते । यत्किञ्चिन्नीलादिकं यस्य कस्यचिदेव पीतादेः **कार्यं** स्यात्, यत्किञ्चित्पीतादिकं यस्य कस्यचिदेव नीलादेः **कारणं** स्यात् । कुतः । 'नीलं नीलस्यैव कार्यं स्यात् न पीतस्य, नीलमेव नीलस्य कारणं न पीतमि(त्यत्र)'ति **नियामकाभावात्** इति योजना । **चशब्दौ** मिथः समुच्चये ।

**परि०**— इतिशब्दानन्तरमत्रेति शेषं मत्वाह **इत्यत्रेति** ।

**गु०दी०**— **सर्वमिदं स्वव्याहतम्** इत्यादिना यत्परेणोक्तं तदपि न रमणीयम् । परेण हि पदार्थानां क्षणिकत्वरक्षणाय पूर्वघटात्सामस्त्येन तत्सदृशघटान्तरस्यैकांशेनापि प्रागविद्यमानस्यैव क्षणे क्षणे उत्पत्तिरङ्गीक्रियते । न तु प्राचीनघटस्यैव उपचयाद्यवस्थाविशेषेणोपचरितोत्पत्तिविनाशावङ्गीक्रियेते । इदं तु न केषामपि वादिनामभिमतम् । नापि युक्तम् । क्षणिकवह्निना क्षणिकतण्डुलानां स्थिरसंयोगाभावेन क्षणिकसंयोगस्य च अपाचकत्वेनौदनस्यैवासिद्ध्या स्वस्यैव मरणप्राप्तेः । क्षणे क्षणे घटनाशे तदन्तस्थजलानां क्षणे प्रस्रवणेन जल

सङ्ग्रहोऽपि न स्यात् । तस्यापि क्षणिकत्वे पर्युषितजले दुर्गन्धादिकं न स्यात् । मातुरुदरे रेतोबिन्दोश्च क्षणिकत्वे घटवत्सामस्त्येन स्वसदृशकार्यमात्रजनकत्वे च दशमे मास्यपि रेतस एव प्रस्रवः स्यात् । न विग्रहवतश्शिशोः। औत्तरघटे दण्डचक्रादेर्नियमभङ्गेन प्राचीनघटेऽपि कारणता न स्यात् । व्यभिचरितं कारणं चेत्यस्य व्याहतत्वात् । क्षीरलेहादिना भर्तृदेहस्योपचये क्षयादिनाऽपचये च तद्भार्यायाः पत्यन्तरपरिग्रहदोषः पतिनाशेन रोदनं च स्यात् । अतो यथादृष्टं यथाश्रुतं जननमरणादिकं कल्पनीयम् । मृत्त्वादिना सदृशं घटत्वकार्यत्वजलाहरणयोग्यत्वादिना विसदृशं च कार्यं मृदादिकं च जनयेत् । अन्वयव्यतिरेकाभ्यां चातिप्रसङ्गः परिहरणीयः । परेण तु नेदमङ्गीकर्तुमुचितम् । पुनःपुनर्घटव्यवहारेण सर्वसादृश्यस्यैव वक्तव्यत्वात् । ईषद्विसदृशकार्यजननाङ्गीकारेऽपि घटात्तादृशघटस्यैव पुनःपुनरुत्पत्त्यसिद्धिप्रसङ्गात् । प्रत्यभिज्ञा च घटपटादिव्यवहारयोग्यबहुतरावयवस्थैर्ये सति स एवायं घटः स एवायं पट इति सावधारण एव जायते । अन्यथा चोरेणापहृतघटपटादौ स्वकीयत्वेन विवाद एव न स्यात् । पितृमरणे सति मुण्डितशिरस्के स्वपतौ स एवायं मम पतिरिति विश्वासस्यासम्भवप्रसङ्गाच्च । पीलुपाकप्रक्रियायामापरमाणुकार्यनाशक्षणानां पुनराघटमुत्पत्तिक्षणानां च बहूनामङ्गीकारात् । पूर्वापरकलाविकलक्षण एवोत्पन्नविनष्टत्वाख्यक्षणिकत्वं न कोऽप्यङ्गीकुरुते । पिठरपाकप्रक्रियायां तु क्षणिकत्वशङ्कैव न । अतस्त्वनुपपन्नभाषणे निरुपम एवायमित्यादिदूषणदूषितत्वात् ।

**श्रीनिधि०— नित्यविनाशित्व इत्येतद् वक्ष्यमाणमिति । अत्र** नित्यविनाशित्वे क्षणभङ्गवादपक्ष इत्यर्थः । **मिथः समुच्चय इति** । कार्यकारणयोः परस्परसमुच्चय इत्यर्थः ।

**शे०चं०—** ननु तन्तूनां सदृशकार्यजनकत्वनियमेऽपि सहकारिसामर्थ्याद्विसदृशपटरूपकार्यजनकत्वं भविष्यतीत्यत आह **सहकारीति ॥ सहकारिष्वपीति** । सहकारिणां तन्तुषु विशेषापादकत्वं वदन् प्रष्टव्यः । किं पूर्वपूर्वसहकारिणो विशेषानापादकास्तदापादका वेति । तथेदमपरमपि विचारणीयम् । किं सहकारिणस्तन्तूनामेव विशेषमापादयन्ति उत अन्येषां कारणानामपीति । तत्र न तावत् पूर्वपूर्वसहकारिणो विशेषानापादका इत्याद्यः पक्षः सम्भवति । तथा सति विशेषानापादकपूर्वपूर्वसहकारिणामपि स्वसदृशकार्यजनकत्वात् तज्जन्यानामेतेषां सहकारिणां विशेषानापादकत्वप्रसङ्गेन सहकारिसामर्थ्यात् तन्तूनां विसदृशकार्यजनकत्वानुपपत्तिप्रसक्तेः । न च विशेषानापादकपूर्वपूर्वसहकारिजन्यानामप्येतेषां सहकारिणां सहकार्यन्तरवशाद्विशेषापादकत्वं भविष्यतीति वाच्यम् । तत्सहकारिष्वप्यस्य प्रसङ्गस्य साम्यात् । तत्रापि सहकार्यन्तरानुसरणे तत्राप्यस्य प्रसङ्गस्य समानत्वेनानवस्थाप्रसक्तेः । नापि तेऽपि विशेषापादका इति द्वितीयः । तथा सति पूर्वपूर्वसहकारिणामपि तन्त्वादिकारणेषु विशेषापादकत्वप्रसङ्गेन तेभ्योऽपि पटोत्पत्त्यापत्त्या पटोपत्तेः समयनियमाभावप्रसङ्गात् । नापि सहकारिणस्तन्तूनामेव विशेषापादका इति तृतीयः । नियामकयोः कारणज्ञापकयोरभावेनोक्तनियमानुपपत्तेः । नाप्यन्येषामपि कारणानां विशेषापादक इत्यन्त्यः । तथा सति तन्तुषु विशेषापादकसहकारिभिरेव तन्तूनामिवान्येषामपि कारणानां विशेषापादनेन पटोत्पत्तिसमय एव घटाद्यवयविनामप्युत्पत्त्यापत्त्या युगपत्सर्वावयविदर्शनप्रसङ्गादिति सहकारिष्वपीदं दूषणजातं समानमित्यर्थः ।

**विठ्ठ०— स च यथा यथेति** । यथा यथा कार्यं दृष्टं तदनुसारेण कारणस्वभावपरिकल्पना मन्मते तथेति ।

**॥ इति उक्तप्रकारेण उक्तान्योन्याश्रयपरिहारशङ्का तन्निरासश्च ॥**

* * *

**॥ अथ च तत्र क्षणभङ्गनये कार्यकारणभावाङ्गीकारायोगः ॥**

३१ **सु०— एतदुक्तं भवति । सम्भवति स्थिरवादे परिहारोऽयम्, 'यद्यत्र समवेतं यद्येनाकारेण परिणतं वा, तत्तस्य कारणं कार्यं चे'ति नियामकसद्भावेन कार्यकारणभावावधारणे सति तदुपपादककल्पनोपपत्तेः । क्षणभङ्गनये तु पूर्वोत्तरक्षणयोर्निरन्वयविनाशोत्पादयोः कार्यकारणभावावधारणोपाय एव नास्ति, समवायपरिणामयोरभावात् । तथा च कस्य बलादुपपादकं कल्पयिष्यत इति ।**

**परि०**— कथमनेन प्रतिबन्दीपरिहार इत्यत आह **एतदुक्तं भवतीति** । मतभेदेनाह **यद्यत्र समवेतं येनाकारेण परिणतं वेति** ॥ **निरन्वयविनाशोत्पादयोरिति** । पूर्वक्षणस्य निरन्वयविनाशो नाम निःशेषविनाशः, उत्तरक्षणस्य निरन्वयोत्पादस्तु कारणानुस्यूतिराहित्येनोत्पादः ॥ **कस्य बलादिति** । कार्यकारणभावावधृतौ हि तदुपपादककल्पना युक्ता । तच्चाशक्यमित्युक्तमिति भावः ।

**कं०रा०— निरन्वयेति** । निरन्वयौ विनाशोत्पादौ ययोस्तयोरित्यर्थः ।

**यादु०— निरन्वयविनाशोत्पादयोरिति** । निरन्वयौ विनाशोत्पादौ ययोस्तौ तथा तयोरित्यर्थः । एतच्च समवायपरिणामाभावोपपादनाय । अत्र पूर्वक्षणस्य निरन्वयो विनाशः, उत्तरक्षणस्य निरन्वय उत्पाद इति विवेकः । तथाहि । समवायपरिणामपक्षयोर्यथा कारणस्य केनचिद्रूपेण विनाशेऽपि केनचिद्रूपेणोत्तरत्र कार्येऽन्वयः, न तथैतन्मतेऽपि तु सर्वात्मना विनाशः । अत एवोत्तरस्योत्पादोऽप्येतन्मते निरन्वय उत्तरोत्पत्तिसमये पूर्वस्य सर्वथाऽन्वयाभावादिति ॥

**श्रीनिधि०— तत्तस्य कारणमित्यादि** । अत्र यदित्यस्यावृत्तिः । **क्षणभङ्गनये** क्षणभङ्गदर्शने । क्षणभङ्गवाद इति यावत् । **निरन्वयविनाशोत्पादयोरिति** । विनाशश्च उत्पादश्च विनाशोत्पादौ । निर्गतः अन्वयः सम्बन्धो ययोः तौ तथोक्तौ निरन्वयौ विनाशोत्पादौ ययोः तौ तथोक्तौ । **पूर्वोत्तरक्षणयोरिति** । षष्ठ्यन्तं घटादिक्षणयोरित्यर्थः । पूर्वक्षणविनाशस्य उत्तरक्षणोत्पादेनान्वयः । उत्तरक्षणोत्पादस्य च पूर्वक्षण-

विनाशेनान्वय इत्यर्थः । कार्यकारणत्वेनाभिमतयोः परस्परं सम्बन्धाभावात् इति यावत् । सम्बन्धो हि तदा सम्भाव्यते । कालान्तरे असत्त्वेऽपि पूर्वस्य विनाशकाले उत्तरोत्पादस्य । न च तदङ्गीकृतमिति ।

**शे०चं०**— नन्वेवं पटोऽपि तन्तूनामेव कार्यं नान्येषाम् । तन्तव एव पटस्य कारणं नान्ये इत्यत्र नियामकाभावात् पटोऽपि यस्य कस्यचिदेव कार्यं स्यात् । तथा यत्किञ्चिदेव पटं प्रति कारणं, न तन्तव इत्यपि स्यात् । ततश्च तन्तुपटयोरपि कार्यकारणभावानवधारणप्रसक्त्या तदुपपादकविशेषकल्पनाऽप्यनुपपन्ना प्रसज्येतेत्यतो नित्यविनाशित्वे तदवधारणानुपपत्त्युक्त्या सूचितं स्वपक्षे तदवधारणोपायं दर्शयन्नेवोक्तप्रतिबन्दीं मोचयितुमाह **एतदुक्तं भवतीति** । **स्थिरवादे** एकस्य वस्तुनोऽनेकक्षणसम्बन्धित्ववादे । न्यायमतमाश्रित्याह **यत्र समवेतमिति** । स्वमतेनाह **येनाकारेणेति** । **नियामकेति** । समवायपरिणामरूपेत्यर्थः । पूर्वोत्तरक्षणयोरिति सप्तमी । निरन्वयौ अन्वयरहितौ उत्पादविनाशौ ययोः पूर्वोत्तरनीलयोस्ते तथा तयोरित्यर्थः । यद्वा निरन्वयावुत्पादविनाशौ ययोरिति पूर्वोत्तरक्षणयोर्विशेषणम् । अत्र च पक्षे पूर्वोत्तरक्षणयोरित्यस्य पूर्वोत्तरक्षणावुत्पादकतया विद्येते ययोस्ते तथा तयोः पूर्वोत्तरक्षणोत्पन्नयोर्नीलयोरित्यर्थः । फलतस्त्वेक एवार्थः । निरन्वयेत्यादिविशेषणं तु समवायपरिणामाभावोपपादनाय । अत्र पूर्वनीलस्य निरन्वयो विनाश उत्तरनीलस्य तु निरन्वय उत्पाद इति विवेकः । कथं तदवधारणोपायाभाव इत्यतः किमत्र समवायपरिणामावेव तदवधारकतयाऽभिमतौ किंवा ततोऽन्यदेव किञ्चिदिति विकल्पद्वयं मनसि निधायाद्यं निराचष्टे **समवायपरिणामयोरिति** । स्थिरवादे एकस्य वस्तुनोऽनेकक्षणसम्बन्धत्वेन तत्सापेक्षयोः समवायपरिणामयोः सत्त्वात् । ताभ्यां कार्यकारणभावावधारणोपपत्तावपि क्षणभङ्गवादे एकैकस्य वस्तुन एकैकक्षणमात्रसम्बन्धित्वेनानेकक्षणसम्बन्धविरहात् तत्सापेक्षसमवायपरिणामयोरसत्त्वान्न तयोस्तदवधारकत्वमिति भावः ।

**विठ्ठ०**— कथमनेन प्रतिबन्दीपरिहार इत्यत आह **एतदुक्तं भवतीति** । आरम्भवादपरिमाणापवादानुसारेणोक्तं **समवेतमिति परिणतं वेति** । **निरन्वयविनाशोत्पादयोरिति** । निरन्वयौ विनाशोत्पादौ ययोः पूर्वोत्तरक्षणयोस्तौ तथोक्तौ । समवायपरिणामपक्षयोः कारणस्य केनचिद्रूपेण विनाशेऽपि केनचिद्रूपेणोत्तरकार्ये अन्वयः सम्बन्धो वर्तते । नैयायिकमते तन्तूनां कारणतावस्थानतो पटाश्रयतया स्थायित्वात् । अस्मन्मतेऽपि पूर्वकारणतया अवस्थानमुत्तरत्र कार्यात्मना अवस्थानं, न तथा बौद्धमते । किन्तु पूर्वघटक्षणस्योत्तरत्रान्वयरहित-आत्यन्तिको विनाशः उत्तरक्षणघटस्य पूर्वमन्वयाभावेनैवोत्पादः । अतोऽन्योन्यान्वयशून्ययोः पूर्वोत्तरक्षणयोर्न कार्यकारणं युज्यत इति भावः ।

**चषकः**— **निरन्वयविनाशोत्पादयोरिति** । कृतद्वन्द्वविनाशोत्पादांशस्य निरन्वयपदेन बहुव्रीहिः ।

* * *

॥ अथ तत्रादौ कार्यनियमनिराकरणम् ॥

३२ **सु०**— समवायपरिणामयोरभावेऽपि 'यत् यदपेक्षया पूर्वभावि तदेव तस्य कारणम्, यच्च यदपेक्षया पश्चाद्भावि तदेव तस्य कार्यमित्यवधारणोपपत्तेर्नियामकाभावोऽसिद्ध इत्यतः कार्यनियमं तावन्निराकरोति **इदमस्यैवेति** ।

**अनु०**— इदमस्यैव कारणम् ।
इति नित्यविनाशित्वे केन मानेन गम्यते ॥

इदं नीलम् **अ**(स्य नील)**स्यैव कारणम्**, न तु पीतस्य; इत्येवं नीलस्य नील-कार्यत्वं, **नित्यविनाशित्वे** निरन्वयविनाशोत्पादपक्षे, **केन मानेन गम्यते** न केनापि । पश्चाद्भावमात्रस्य नी(लस्येव पीतस्यापि)लापेक्षयेव पीतापेक्षयाऽपि सत्त्वादिति भावः ।

सादेश्यं सारूप्यं वा नियामकमिति चेन्न; विरलपरमाणुभ्यो मिलितानाम्, मिलिते-भ्यश्च विरलानाम्, उत्पत्त्यङ्गीकारात् ।

**परि०**— इदमस्यैवेति वाक्यमुत्तरान्विततयाऽवतार्य योजयति **समवायपरिणामयोरभावे-ऽपीत्यादिना** । नित्यविनाशित्व इत्युपलक्षणं मत्त्वाह **निरन्वयविनाशोत्पादपक्ष इति** ॥ **सादेश्य-मिति** । समानदेशत्वमित्यर्थः । सादेश्यसारूप्ये द्वे अपि न स्त इत्याह **विरलेति** । विरलसन्निकृष्ट-वस्तूनां बहुलाल्पदेशत्वस्य वैरूप्यस्य चानुभाविकत्वादिति भावः ॥ **विरलानामिति** । लयकाल इति योज्यम् ।

**श्रीनिधि०**— **निरन्वयविनाशोत्पादपक्षे केन मानेन गम्यते न केनापीति** । अस्माकं तु इदमस्यैव कार्यम् । अत्र समवेतत्वादेः तत्परिणामवत्त्वादित्यादि मानं युज्यत इति भावः । **विरलपरमाणुभ्यो मिलितानां मिलितेभ्यश्च विरलानामित्यादि** । अनेन सादृश्यमपि निराकृतं वेदितव्यम् । न हि विरलानां मिलितानां च एकदेशस्थत्वं युज्यत इति । तथाऽपि घटादौ द्वयमपि घटत इति चेन्न । तदुत्पत्तेरेव चिन्त्य-मानत्वात् ।

**शे०चं०**— द्वितीयमाशङ्कते **समवायपरिणामयोरभावेऽपीति** । किमनेन दूषणमुक्तं भवतीत्यतोऽति-प्रसञ्जकत्वान्न तस्य नियामकतेत्यभिप्रेत्य अतिप्रसङ्गमाह **पश्चाद्भावमात्रस्येति** ॥ **सादेश्यमिति** । ततश्चोक्त-

निमित्तवशान्नीलस्य नीलकार्यत्वेऽपि तद्विरहान्न तस्य पीतकार्यत्वमिति भावः ॥ **अङ्गीकारादिति** । तथा च व्यभिचारान्नैतदपि प्रयोजकमिति भावः ।

**विठ०— सादेश्यं** एकदेशस्थत्वम् । **विरलपरमाणुभ्य इति** । तथा च समानदेशस्थत्वाद्यभावेऽपि कार्यकारणभावदर्शनान्न सादेश्यादिकं नियामकमिति भावः ।

**॥ इति कार्यनियमनिराकरणम् ॥**

* * *

**॥ अथ च तत्र कारणनियमनिराकरणम् ॥**

३३ **सु०—** कारणनियममप्यपाकरोति **इदं नेति** ।

## अनु०— इदं न जायतेऽमुष्मादित्यत्रापि न कारणम् ।

**इदं** नीलम् **उष्मात्** पीतात् **न जायते,** किन्तु नीलादेव **इत्यत्र** नीलस्य कारणत्वावधारणे **अपि, कारणं** प्रमाणं, **न** अस्ति । नीलस्येव पीतस्यापि नीलापेक्षया पूर्वभावितायाः सत्त्वादिति भावः ।

शे०चं०— 'केन मानेन गम्यत' इति प्रमाणप्रस्तावात् कारणशब्दः प्रमाणपर इति भावेनाह **कारणं प्रमाणमिति** । ननु पूर्वभावित्वस्यैव तत्र प्रमाणत्वात् कथं प्रमाणाभाव इत्यतोऽतिप्रसञ्जकत्वान्न तस्य प्रमाणत्वमित्यभिप्रेत्य अतिप्रसङ्गमुपदर्शयति **नीलस्येवेति** ।

**॥ इति कारणनियमनिराकरणम् ॥**

* * *

**॥ अथ च तत्र कार्यकारणभावावधारणसम्भावनाप्रश्नः तन्निराकरणञ्च ॥**

३४ **सु०—** ननु यथा भवतां समवायपरिणामयोरभावेऽपि कुविन्दपटयोः कार्यकारणभावावधारणं तथा ममापि भविष्यतीत्यत आह **इदमस्येति** । **नित्यविनाशित्वे** आत्मन इति शेषः ।

युज्यतेऽस्माकं निमित्तकारणकार्ययोस्तद्भावावधारणम् अन्यत्रानुपक्षीणान्वयव्यतिरेकाभ्याम्, न तु परस्य; अस्माभिरन्वयव्यतिरेकानुसन्धातुरात्मनः स्थायित्वाभ्युपगमात्, परेण(च) क्षणिकतास्वीकारात् । न हि तथाविधः अन्वयव्यतिरेकयोरन्यत्रानुपक्षयस्य चावधृतेरीष्ट इति भावः । योजना तु पूर्ववदेव ॥

**परि०**— इदमस्यैव कारणमित्यादिकं प्रकारान्तरेण योजयति **ननु यथा भवतामित्यादिना** ॥ **पूर्ववदेवेति** । इदमस्येति वाक्यं कार्यनियमनिरासकत्वेन, इदं न जायत इत्यादिकं तु कर्तृनियमनिरासकतया योजना कार्येत्यर्थः ॥ ***परमते समुदायनिरासः ॥***

**कं०रा०**— **न हीति** । क्षणिक आत्माऽन्वयव्यतिरेकावन्यत्र अनुपक्षयं वावधारयितुं न हीष्ट इत्यर्थः।

**श्रीनिधि०**— **न हि तथाविध इति** । क्षणिक इत्यर्थः । **अन्वयव्यतिरेकयोः अन्यत्रानुपक्षयस्य चावधृतेरिति** । तयोरवधारणस्य चिरकालविमर्शसाध्यत्वादिति भावः ।

**शे०चं०**— **तथाविध इति** । क्षणिक इत्यर्थः । येन ह्यात्मनाऽन्वयव्यतिरेकाववधारितौ नष्ट एवासौ । कस्य पुनरन्यत्रानुपक्षयावधारणमिति भावः ॥

**विठ्ठ०**— **न हि तथाविध इति** । क्षणिकतयाभ्युपगत आत्मेत्यर्थः ।

**॥ इति कार्यकारणभावावधारणसम्भावनाप्रश्नः तन्निराकरणश्च ॥**

**॥ इति क्षणभङ्गनये कार्यकारणभावाङ्गीकारायोगः ॥**

**॥ इति उक्तविकल्पितकारणानुपपत्तेः व्याहतत्वमाशङ्क्य कार्यकारणभावाङ्गीकारेण उक्तान्योन्याश्रयपरिहारशङ्का,**
**कार्यकारणभावाङ्गीकारे नियामकाभावात् तन्निरासश्च ॥**

**॥ इति उक्तविकल्पितकारणानुपपत्तिसमर्थनम् ॥**

**॥ इति अन्योन्याश्रयदोषे उक्ताक्षेपसमाधानस्य विवरणम् ॥**

**॥ इति द्वितीयसूत्रार्थप्रदर्शनम् ॥**

**(समुदायस्य समुदितानेकहेतुकत्वे उक्तस्यान्योन्याश्रयदोषस्य आक्षेपपूर्वकं समाधानम्) ॥**

* * *

॥ अथ अष्टमसप्तमसूत्रयोरर्थप्रदर्शनम् ॥

॥ अथ तत्रादौ अष्टमसूत्रार्थप्रदर्शनम् ॥

॥ अथ तत्राप्यादौ क्षणिकतायाः प्रमाणाभावेन प्रमाणविरोधेन चापाकरणम् ॥

॥ अथ तत्राप्यादौ क्षणिकतायाः प्रमाणाभावेन नापाकरणम् ॥

॥ अथ तत्र क्षणिकतायाः प्रमाणाभावप्रदर्शनम् ॥

३५ **सु०**— एवं समुदायं निराकृत्य सर्वस्य क्षणिकतामधुना प्रमाणाभावेन तद्विरोधेन चापाकर्तुमुत्तरो ग्रन्थः ।

तथाहि । न केवलं समुदायो नोपपद्यते किन्नाम सर्वस्य क्षणिकता च; तत्र प्रमाणाभावात् ।

ननु प्रत्यक्षं क्षणिकतामर्थानामवगमयति; तद्धि वर्तमानमात्रगोचरमर्थस्य वर्तमानक्षणमात्रसम्बन्धिनीं सत्तामवगाहते, न पूर्वोत्तरक्षणसम्बन्धिनीमपि; तत्कथं क्षणिकत्वमर्थानामप्रामाणिकमिति । उच्यते । किमिदं क्षणिकत्वं नाम । किं क्षणसम्बन्धिसत्त्वम्, किंवा क्षणमात्र एवोत्पत्तिनाशवत्त्वम्, यद्वा क्षणान्तरासम्बन्धित्वे सत्येकक्षणसम्बन्धित्वम् । आद्यस्त्विष्ट एव, स्थायिनोऽप्यर्थस्यैकक्षणसत्तास्वीकारात् । द्वितीयतृतीयौ दूषयति **विनाशेति** ।

## अनु०— विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातनाः ।

अनेकपदार्थसम्बन्धित्वेन बहुवचनम् । चशब्दस्तृतीयपक्षसमुच्चयार्थः । एवशब्दस्य नैवेति सम्बन्धः । **सदातनाः** प्रतिक्षणभाविन्यः ।

प्रत्यक्षं खल्वर्थानां वर्तमानकालसत्तामवगाहते; न पुनः क्षणमात्रभाविनावुत्पत्तिविनाशावपि, नापि क्षणान्तरासम्बन्धित्वम्; तथा च कथं तेन क्षणिकता सिद्ध्येदिति ।

**परि०**— सदातना इत्यस्य प्रकृतोपयोगायार्थमाह **प्रतिक्षणभाविन्य इति** । सदान्त इति वाच्ये सदातना इत्युक्तेः साधुत्वं 'सृष्ट्यादीच्छा सदातने'त्यत्रोक्तमिति भावः ।

**वं०प०**— ननूत्पत्तिविनाशयोर्द्वित्वाद्विनाशोत्पत्ती इति वाच्यम्, बहुवचनं कथमित्यत आह **अनेकपदार्थेति** । तथा च व्यक्तिबाहुल्याद्बहुवचनमिति भावः ।

**कं०रा०**— ननु विनाशोत्पत्ती इति वक्तव्ये विनाशोत्पत्तय इति बहुवचनं कथं प्रायोजीत्यत आह **अनेकेति** । बहुपदार्थसम्बन्धित्वेन विनाशानामुत्पत्तीनां च बहुत्वात् विनाशोत्पत्तय इति बहुवचनं प्रयुक्तमिति भावः । ननु क्षणमात्रोत्पत्तिविनाशवत्त्वरूपक्षणिकत्वं प्रत्यक्षसिद्धमिति द्वितीयपक्षे 'विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातना' इति दूषणमयुक्तम्, सदातनशब्दस्य नित्यार्थकत्वेन नित्या विनाशोत्पत्तयो न दृश्यन्त इत्यस्य प्रकृतासङ्गतत्वादित्यतः सदातनशब्दस्य विवक्षितमर्थमाह **सदातना इति** । अस्य च साधुत्वं 'सृष्ट्यादीच्छा सदातने'त्यत्रोक्तप्रकारेण द्रष्टव्यम् ।

**श्रीनिधि०**— **प्रमाणाभावेन तद्विरोधेन चेति** । 'विनाशोत्पत्तयश्चैव' इत्यनेन प्रमाणाभाव उच्यते । 'दृश्यते प्रत्यभिज्ञात' इत्यनेन तद्विरोध इति ज्ञेयम् ।

**शे०चं०**— ननु विनाशोत्पत्तयश्चैवेत्यादेरुत्तरग्रन्थस्य समुदायनिराकरणपरपूर्वग्रन्थेन सङ्गत्यभावादानर्थक्यमित्याशङ्क्य वृत्तानुवादपूर्वकं तत्प्रयोजनं दर्शयन्नानर्थक्यं परिहरति **एवमिति** । ननु तथाऽपि सदातनोत्पतिविनाशानामदृश्यत्ववर्णनमनर्थकमेव । न च क्षणिकतायाः प्रत्यक्षासिद्धत्वसमर्थनार्थत्वान्न तदिति वाच्यम् । तदसिद्धत्ववर्णनस्याप्यनर्थकत्वादित्याशङ्क्य क्षणिकत्वानुपपत्तिप्रतिज्ञायां हेतूकृतप्रमाणाभावस्य प्रत्यक्षसिद्धत्वात् क्षणिकत्वस्येत्यसिद्धिशङ्कायां तत्परिहारे क्षणिकत्वानुपपत्तिप्रतिज्ञासिद्ध्यर्थत्वेन सार्थकत्वान्नानुपपत्तिरित्यभिप्रेत्य क्षणिकत्वानुपपत्तिप्रतिज्ञां तत्र प्रमाणाभावादिति हेतुं च बहिरेव पूरयित्वा प्रत्यक्षसिद्धत्वेन प्रमाणाभावासिद्धिशङ्कामुत्थाप्य तत्परिहारकतयोत्तरवाक्यं योजयति **तथा हीति** । विनाशोत्पत्तयश्चेत्यत्र चशब्दस्यार्थान्तरमाह **न केवलमिति** ।

**प्रत्यक्षमिति** । सन् घट इत्यादिप्रत्यक्षमित्यर्थः । प्रत्यक्षस्य पूर्वोत्तरक्षणसम्बन्धिसत्तानवगाहित्वे हेतुगर्भं विशेषणमाह **वर्तमानमात्रगोचरमिति** । ननु मूले क्षणिकतायाः प्रत्यक्षासिद्धत्वं नोच्यते किन्तु सदातनोत्पत्तिविनाशवत्त्वस्यैव, तत्कथमनेनोक्तशङ्कापरिहारः । न च सदातनोत्पत्तिविनाशवत्त्वमेव क्षणिकत्वं तथा च तस्य प्रत्यक्षासिद्धत्वोक्तेरेव क्षणिकतायाः प्रत्यक्षासिद्धत्वोक्तिरिति कथं न शङ्कापरिहार इति वाच्यम् । क्षणसम्बन्धित्वं क्षणिकत्वमित्यपि वक्तुं शक्यत्वेन क्षणिकत्वस्य सदातनोत्पत्तिविनाशरूपत्वासिद्धेरित्यतोऽत्र सम्भावितान्विकल्पान्मनसि निधाय पक्षान्तरं बहिरेव प्रदूष्य अवशिष्टपक्षनिरासकतया ग्रन्थं सङ्गमयति **उच्यत इत्यादिना** । स्वीकारे हेतुमाह **स्थायिन इति** । अन्यथा अनेकक्षणसम्बन्धित्वरूपस्थायित्वानुपपत्तेरिति भावः । ननु सदातने विनाशोत्पत्ती न दृश्येते इति वक्तव्यम् । विनाशोत्पत्तेर्द्वित्वात् । विनाशोत्पत्तय इति बहुवचनं कथमित्यत आह **अनेकेति** । बहुपदार्थसम्बन्धित्वेनेत्यर्थः । **तृतीयपक्षेति** । क्षणान्तरासम्बन्धित्वे सत्येकक्षणसम्बन्धित्वरूपतृतीयपक्षेत्यर्थः । तर्हीतरव्यावृत्त्यर्थकैवकारविरोध इत्यतस्तस्य भिन्नक्रमत्वेनानेन असम्बन्धान्न तद्विरोध इत्यभिप्रेत्य तत्सम्बन्धमाह **एवेति** । ननु शङ्कितायाः सन् घट इत्यादि प्रत्यक्षस्य विवक्षितक्षणिकत्वग्राहकतायाः कथमनेन वाक्येन परिहारः, इत्यतस्तदभिप्रायमाह **प्रत्यक्षं खल्वित्यादिना** ॥

**उत्पत्तिविनाशावपीति** । अवगाहत इति सम्बन्धः । **नापीति** । अत्राप्यवगाहत इति सम्बन्धः ॥ **तथा च इति** । क्षणमात्र एवोत्पत्तिविनाशवत्त्वरूपक्षणिकतायाः क्षणान्तरासम्बन्धित्वे सत्येकक्षणसम्बन्धित्वरूपक्षणिकताया वा प्रत्यक्षेणागृहीतत्वान्न तेन तत्सिद्धिरिति भावः ।

**वा०र०— इति तृतीय इति** । द्वितीयविचारे अस्य प्रथमत्वेऽपि पूर्वविचारीयकल्पद्वयापेक्षयाऽस्य तृतीयत्वाभिप्रायेण तृतीयत्वोक्तिरिति ज्ञेयम् । एवं अन्यत्वोक्तिरपि । **प्रत्यक्षसिद्धत्वादिति** । क्षणिकत्वस्य प्रत्यक्षसिद्धत्वात्प्राप्ता या प्रमाणभावासिद्धिः तच्छङ्कायामित्यर्थः । उत्तरत्र तृतीयपक्षसमुच्चयार्थत्वेन व्याख्यास्यमानस्यापि चशब्दस्य अर्थान्तरपरत्वाश्रयणान्न विरोध इत्याशयेनाह **विनाशोत्पत्तयश्चेत्यत्र चेति** । **विनाशवत्त्वस्यैवेति** । प्रत्यक्षासिद्धत्वमुच्यत इति वर्तते, सदातना इत्येतदुपपादनं पूर्ववदिति भावेन मूलटीकयोः पुनरप्रवृत्तिः ।

**वि०— न केवलमिति** । व्याचिख्यासितमूलगत'च'शब्दस्य तृतीयपक्षसमुच्चयार्थ इति वक्ष्यमाणार्थापेक्षयाऽभिप्रायान्तरकथनपरमिति ध्येयम् ।

**॥ इति क्षणिकतायाः प्रमाणाभावप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र क्षणिकतायाः प्रमाणाभावस्य समर्थनम् ॥**

३६ **सु०— ननु च 'प्रत्यक्षं पूर्वोत्तरक्षणवर्तित्वमप्यर्थस्य गृह्णाति न वा । नाद्यः, वर्तमानमात्रग्राहित्वात् । द्वितीये तु प्रत्यक्षानुपलम्भेन पूर्वोत्तरक्षणयोरसत्त्वसिद्धेः क्षणिकतैव सि(द्ध्येदिति)द्धे'ति चेत् ।**

**द्वितीयं तावदुररीकुर्मः; न चैवं क्षणिकतासिद्धिः, योग्यानुपलम्भस्यैवासत्त्वगमकत्वात् । न च पूर्वोत्तरकालवर्तिता प्रत्यक्षयोग्या, वर्तमानमात्रग्राहितायाः परेणैवोक्तत्वात् ।**

**'अस्तु वाऽऽद्यः पक्षः । कस्यचित्प्रत्यक्षस्य वर्तमानमात्रग्राहित्वेऽपि तदेवेदमिति प्रत्यभिज्ञानलक्षणस्य तदभावादि'त्याशयेनाह दृश्यत इति ।**

## अनु०— दृश्यते प्रत्यभिज्ञातः स्थिरत्वं सर्ववस्तुषु ।

**विषयीक्रियत इत्यर्थः । तृतीयार्थे तसिः। एकस्यैवानेकक्षणसम्बन्धित्वं स्थिरत्वम् ।**

**परि०— तृतीयार्थे तसिरिति** । 'आद्यादिभ्य उपसङ्ख्यानमि'ति सार्वविभक्तिकतसि-प्रत्ययस्योक्ते प्रत्यभिज्ञयेत्यर्थे तसिरयमिति भावः ।

**यादु०— प्रत्यक्षानुपलम्भेनेति** । पूर्वोत्तरक्षणयोरर्थस्य प्रत्यक्षानुपलम्भेनासत्त्वसिद्धेरित्यर्थः ।

**वं०प०— प्रत्यक्षयोग्येति** । येन पूर्वोत्तरक्षणयोरर्थस्य प्रत्यक्षानुपलम्भेनासत्त्वं सिद्ध्येदित्यर्थः ।

**कं०रा०—** प्रत्यभिज्ञाया दृग्रूपत्वात् प्रत्यभिज्ञातो दृश्यत इत्येतदयुक्तमित्यतो व्याचष्टे **दृश्यत इतीति** । प्रत्यभिज्ञात इति तसिप्रत्ययस्य पञ्चम्यर्थत्वे दृश्यत इत्यनेनान्वयानुपपत्तिरित्यत आह **तृतीयार्थ इति** । स्थिरत्वं नित्यत्वमिति प्रतीतिनिरासायाह **एकस्यैवेति** ।

**श्रीनिधि०— परेणैवोक्तत्वादिति** । अनेन नास्माकं तत्साधनक्लेश इत्याह **दृश्यत इति** । दर्शन-करणं प्रतीयते । न च प्रत्यभिज्ञाया ज्ञप्तिरूपायाः प्रत्यक्षं प्रति करणत्वं युज्यते इत्यत आह **विषयीक्रियत इत्यर्थ इति** । अत्र प्रकृत्यर्थो न विवक्षित इति भावः । विद्यन्ते चैवं प्रयोगाः । दीक्षया दीक्षितः । यत्नेन करोति ज्ञानेन पश्यतीत्याद्या बहव इति । प्रत्यभिज्ञातः इति पञ्चम्यन्तम् । पञ्चम्यास्तसिल् इत्युक्तेः । न च तद्यु-ज्यते । ज्ञानस्य विषयीकरणक्रियायां कर्तृत्वादित्यत आह **तृतीयार्थे तसिरिति** । 'आद्यादिभ्यः उपसङ्ख्यानम्' इत्युक्तेरिति भावः ।

**शे०चं०— प्रत्यक्षानुपलम्भेनेति** । घटादेः प्रत्यक्षेण पूर्वोत्तरक्षणवर्तित्वेनानुपलब्धेत्यर्थः । अनुप-लब्धेरसत्त्वावगमकत्वादिति भावः ॥ **क्षणिकतासिद्धिरिति** । प्रत्यक्षानुपलम्भेन पूर्वोत्तरक्षणयोरसत्त्वसिद्धेरिति भावः । किमनुपलम्भमात्रमसत्त्वावगमकं किंवा योग्यानुपलम्भ इति विकल्पद्वयं मनसि निधाय आद्यं प्रत्याह **योग्येति** । नानुपलब्धिमात्रमसत्त्वावगमकमतिप्रसङ्गात् किन्तु योग्यानुपलम्भ एव तथेति नानुपलम्भमात्रेण तत्सिद्धिरित्यर्थः । अस्तु तर्हि योग्यानुपलम्भेनैव तत्सिद्धिरिति द्वितीय इत्यतस्तस्यासिद्धत्वान्नैवमित्याह **न च इति** । **कस्यचिदिति** । अभिज्ञारूपस्येत्यर्थः । प्रत्यभिज्ञात इति प्रकृत्यर्थस्य पृथगभिधानात् दृश्यत इत्यत्र प्रकृत्यर्थविवक्षा न सम्भवतीत्यभिप्रेत्य व्याचष्टे **विषयीक्रियत इत्यर्थ इति** । प्रत्यभिज्ञानाद्विषयीक्रियत इत्यन-न्वयप्रसङ्गेन प्रत्यभिज्ञात इति पञ्चम्यन्तात्तसेरयोगादाह **तृतीयार्थ इति** । 'आद्यादिभ्य उपसङ्ख्यानादि'ति भावः।

**चषकः— तृतीयार्थे तसिरिति** । 'आद्यादिभ्य उपसङ्ख्यानमि'ति कात्यायनवचनादिति भावः ।

**॥ इति क्षणिकतायाः प्रमाणाभावस्य समर्थनम् ॥**

**॥ इति क्षणिकतायाः प्रमाणाभावेन अपाकरणम् ॥**

* * *

॥ अथ क्षणिकतायाः प्रमाणविरोधेनापाकरणम् ॥

३७ **सु०— एतेन 'न केवलं प्रत्यक्षं क्षणिकतां न गोचरयति । किन्तु स्थायि(तां)त्वमपि गोचरयती'त्यपीति वदता, परपक्षे प्रमाणविरोधः स्वपक्षे प्रमाणसद्भावश्चोदितो भवति ।**

**श्रीनिधि०**— प्रमाणाभावेन तद्विरोधेन च अपाकर्तुं उत्तरो ग्रन्थ इत्युक्तम् । तत्र केन भागेन किमुक्तमिति चिन्तायां मन्दानुग्रहार्थमाह **एतेनेति** ।

**शे०चं०**— **एतेनेति** । 'विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातनाः । दृश्यते प्रत्यभिज्ञातः स्थिरत्वं सर्ववस्तुष्वि'त्यनेन ग्रन्थेनेत्यर्थः । इति वदता एतेनेति सम्बन्धः । परपक्षे प्रमाणविरोध इत्युपलक्षणम् । तत्पक्षे साधकप्रमाणाभावश्चेत्यपि द्रष्टव्यम् । स्वपक्षे प्रमाणसद्भावश्चेत्युपलक्षणम् । स्वपक्षे प्रमाणविरोधाभावश्चेत्यपि द्रष्टव्यम् ।

**विठ्ठ०**— **एतेनेति** । एतेन परपक्षे प्रमाणविरोधः स्वपक्षे प्रमाणसद्भावश्चोदितेति सम्बन्धः । एतेने-त्युक्तस्यैव विवरणं **न केवलमित्यादीति** ज्ञातव्यम् ।

॥ इति क्षणिकतायाः प्रमाणविरोधेनापाकरणम् ॥

* * *

॥ अथ अस्यापाकरणस्योत्सूत्रितत्वशङ्कानिराकरणम् ॥

३८ **सु०— अनेन 'अनुस्मृतेश्चे'ति सूत्रं [२-२-७-८(८)] कृतव्याख्यानं वेदितव्यम् ।**

**शे०चं०**— क्षणिकत्वनिरासपरस्य 'विनाशोत्पत्तयश्चे'त्यादेर्भाष्यस्य उत्सूत्रार्थप्रतिपादकतया प्रसक्ताम-भाष्यतां निराकरोति **अनेनेति** ।

॥ इति अस्यापाकरणस्योत्सूत्रितत्वशङ्कानिराकरणम् ॥
॥ इति क्षणिकतायाः प्रमाणाभावेन प्रमाणविरोधेन चापाकरणम् ॥

* * *

॥ अथ अष्टमसूत्रार्थप्रदर्शने सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति न त्वस्मन्मतम् इति प्रदर्शनम् ॥

अथ तत्र सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति इत्यंशप्रदर्शनम् ॥

३९ सु०— **सर्ववस्तुषु** इत्यनेन सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति न त्वस्मन्मतमिति सूचयति ।

तथाहि । किमनया प्रत्यभिज्ञया नित्यत्वेनाभ्युपगतेषु परमाण्वादिषु स्थिरत्वं साध्यते किं वा घटादिषु । नाद्यः, तेषामतीन्द्रियत्वेन प्रत्यभिज्ञाप्रत्यक्षगोचरत्वस्याभ्युपगन्तुमशक्यत्वात् । न द्वितीयः, घटादिषु परेणापि प्रत्यभिज्ञाया भ्रान्तित्वस्य स्वीकार्यत्वात् । यदा हि घटादौ सूच्यग्रादिनैकोऽपि परमाणुरपैति तदा नष्टव्यमेव तदारब्धेन द्व्यणुकेन, विभागेन असमवायिकारणस्य संयोगस्य नष्टत्वात् । द्व्यणुकनाशे समवायिकारणनाशात् त्र्यणुकनाशः इत्यनेन क्रमेण घटनाशोऽप्यवश्यम्भावी ।

न च परमाणुः प्रत्यक्षः, येन तदपगमानपगमौ प्रत्यक्षेण शक्यनिश्चयौ । न च वाच्यं निबिडावयवेषु स्फटिकादिषु प्रत्यभिज्ञया स्थिरत्वं सेत्स्यतीति, तत्रापि परमाण्वपगमाभावस्य प्रत्यक्षेण निश्चेतुमशक्यत्वात् । निबिडावयवत्वं च न विभागायोग्यावयवत्वम्, विभागस्य प्रत्यक्षसिद्धत्वात्; किन्तु घटादितोऽप्युत्कृष्टकारणापेक्षत्वम् । न च तद्विशेषाभावः शक्योऽस्माभिरवगन्तुम् । दृश्यते हि कालतः स्फटिकादावपि गुरुत्वापकर्षः । न च अवयवानपगमे स सम्भवतीति ।

नापि गुणादौ स्थायित्वं प्रत्यभिज्ञया सिद्ध्यति, तस्यापि कस्यचिदतीन्द्रियत्वात् । कस्यचिद्घटादितुल्यत्वात् । सामान्यादिकं तु स्वरूपतो नास्त्येव, सत्त्वेऽपि रूपादिसमानमेवेति शङ्कितप्रामाण्यं प्रत्यभिज्ञानं न कुत्रापि स्थैर्यसिद्धौ प्रमाणयितुं युक्तमिति ।

परि०— ननु यत्र घटादौ परमाण्वनपगमो निश्चितस्तत्र प्रत्यभिज्ञायाः प्रमात्वं भविष्यतीत्यत आह **न च परमाणुरिति** ॥ **विभागस्येति** । पाषाणादिना द्वैधीभावस्योपलम्भादिति भावः ॥ **तस्यापि कस्यचिदिति** । परमाणुगतरूपादेरित्यर्थः । **कस्यचिद्घटादितुल्यत्वादिति** । घटस्यावयवापगमादिना प्रतिक्षणनाशोत्पादाभ्युपगमे तद्गतरूपादिगुणस्यापि तदापत्तेरिति भावः । युक्तमितीतिशब्दस्येति यत्प्रत्यभिज्ञानिराकरणमिति पूर्वेणान्वयः ।

**यादु०— प्रत्यक्षेण शक्यनिश्चयाविति** । तथाच प्रत्यभिज्ञाप्रामाण्यनिश्चयो न सम्भवतीति भावः । एवं निश्चेतुमशक्यत्वादित्यादावपि भावो वर्णनीयः ॥ **प्रत्यक्षसिद्धत्वादिति** । स्फटिकादेर्विनाशसमये तदवयवविभागस्य प्रत्यक्षसिद्धत्वादित्यर्थः ॥ **उत्कृष्टकारणेति** । घटादिकारणपरमाण्वपेक्षया परस्परसंश्लेषविशेषादिरूपो य उत्कर्षः तद्वत्परमाणुकारणकत्वमित्यर्थः ॥ **न च तद्विशेषेति** । स चासौ विशेषश्च तद्विशेषः । संयोगविशेषादिरूपोत्कर्ष इति यावत् । **तदभावः** तदपगमः । तथा च स्फटिकादाववयवानपगमप्रयोजको यः कारणसंश्लेषविशेषादिरूप उत्कर्षः तदपगमस्य निश्चेतुमशक्यत्वे तत्प्रयोज्यावयवानपगमोऽपि तत्र निश्चेतुं न शक्यते, ततश्च स्फटिकादावपि प्रत्यभिज्ञानं शङ्कितप्रामाण्यमेवेति भावः । **दृश्यत इति** । अनुमानेन ज्ञायत इत्यर्थः ॥ **रूपादिसमानमेवेति** । रूपादिवदेव आश्रयनाशेन नश्यतीत्यर्थः ।

**वं०प०— परेणापि** स्थायित्ववादिनापि । ननु सूच्यग्रेण परमाण्वपगमस्य प्रत्यक्षेण दृष्टत्वात् तत्र प्रत्यभिज्ञैव नोदेतीति चेत् तत्राह **न च परमाणुरिति** । सूच्यग्रेणापगतः परमाणुः ॥ **शक्यनिश्चयाविति** । यदि शक्यनिश्चयौ स्यातां तर्हि प्रत्यक्षेण घटे भेदस्य दृष्टत्वात् प्रत्यभिज्ञोदय एव न स्यात् । उदेति च प्रत्यभिज्ञा। तथा च वस्तुगत्या सूच्यग्रादिनाऽपगतपरमाणौ घटे जायमाना प्रत्यभिज्ञा भ्रान्तिरेवेति भावः ॥ **अशक्यत्वादिति** । तथा च तत्रापि परमाण्वपगमस्य वस्तुतो विद्यमानत्वात् तत्र जायमानप्रत्यभिज्ञा भ्रान्तिरित्यर्थः ॥ **तद्विशेषाभाव इति** । अवयवसंश्लेषाख्योत्कर्षरूपविशेषाभावः प्रत्यक्षेण स्फटिकेऽवगन्तुं न शक्यः येन प्रत्यभिज्ञा नोत्पद्येतेत्यर्थः । तथा च तद्विशेषस्यावगन्तुमशक्यत्वाद्दैवात्तत्रावयवसंश्लेषो यदि नष्टोऽस्ति तत्र च प्रत्यभिज्ञा यदा जाता तदा सा भ्रम एवेत्याशयः । **स** गुरुत्वापकर्षः । तथा च तत्रापि प्रत्यभिज्ञा भ्रान्तिरिति भावः । नन्वस्तु तर्हि सामान्ये प्रत्यभिज्ञया स्थिरत्वसिद्धिरित्यत आह **सामान्यादिकमिति** ।

**कं०रा०— विभागेनेति** । परमाणुविभागेनेत्यर्थः । ननु यत्र घटादौ परमाण्वपगमाभावो निश्चितः तत्र प्रत्यभिज्ञाया अभ्रान्तत्वं निश्चेतुं शक्यमित्यत आह **न च परमाणुरिति** । तथा च परमाण्वपगमानपगमसन्देहेन प्रत्यभिज्ञायामप्रामाण्यसन्देहाकृतयास्थिरत्वसिद्धिरिति भावः । ननु निबिडावयवेषु स्फटिकादिष्ववयवविभागाभावेन तन्नाशाभावस्य निश्चिततया तत्र स एवायं स्फटिक इत्यादिप्रत्यभिज्ञायाः प्रामाण्यनिश्चयसत्त्वात्तया स्फटिकादीनां स्थिरत्वं सेत्स्यतीत्याशङ्क्य निराकरोति **न च वाच्यमिति** । ननु परमाणोरप्रत्यक्षत्वेन स्फटिकादिषु परमाणुविभागाभावस्य प्रत्यक्षेण निश्चेतुमशक्यत्वेऽपि विभागायोग्यावयवत्वरूपनिबिडावयवत्वहेतुना तत्र तन्निश्चयो भविष्यतीत्यत आह **निबिडावयवत्वं चेति** । स्फटिकादिषु मुसलाद्यभिघातप्रयुक्तावयवविभागस्य प्रत्यक्षसिद्धत्वात् न विभागायोग्यावयवत्वं निबिडावयवत्वमित्यर्थः । ननूत्कृष्टकारणापेक्षत्वमपि निबिडावयवत्वं न भवति, तदभावस्य स्फटिकादौ प्रत्यक्षेणावगतत्वादित्यत आह **न चेति** । घटादितोऽप्युत्कृष्टकारणापेक्षत्वलक्षणो यो विशेषः तदभावो न ह्यस्माभिः स्फटिकादौ प्रत्यक्षेणावगन्तुं शक्यते । स्फटिकादिगतघटादिवैलक्षण्यानुमेयस्य उत्कृष्टकारणापेक्षत्वस्य अतीन्द्रियत्वेन प्रतियोगियोग्यत्वाभावादिति भावः । स्फटिकादावयवापगमाभावो निश्चेतु-

मशक्यः तथा च तत्सन्देहेन प्रत्यभिज्ञाप्रामाण्यसन्देहान्न प्रत्यभिज्ञाया स्थिरत्वसिद्धिरित्युक्ता । इदानीं कालतो गुरुत्वापकर्षेणावयवापगमस्यैव निश्चिततया स एवायं स्फटिक इत्यादिप्रत्यभिज्ञायाः प्रामाण्याभावनिश्चयात् न तया स्फटिकादेः स्थिरत्वसिद्धिरित्यभिप्रेत्याह **दृश्यते हीति** । स्फटिकादावयवानपगमेऽपि गुरुत्वापकर्षसम्भवान्न तेन तदपगमनिश्चय इत्यत आह **न चेति** । **स** गुरुत्वापकर्षः कारणान्तराभावादवयवापगमं विना न सम्भवतीति गुरुत्वापकर्षेण अवयवापगमनिश्चय इति भावः । **कस्यचिदिति** । अवयवापगमेन घटादेर्नाशे तद्गतरूपादेरपि नाशावश्यंभावेन अवयवापगमानपगमसन्देहे तदेवेदं रूपमित्यादिप्रत्यभिज्ञायाः प्रामाण्यसन्देहाद् घटादेरिव न प्रत्यभिज्ञया तद्गतरूपादेः स्थिरत्वसिद्धिरिति घटादितुल्यत्वमिति भावः ।

**श्रीनिधि०—— सूच्यग्रादिना** सूच्यग्रवेधादिना । ननु यतो घटादेः परमाणुर्नापैति तत्रैव प्रत्यभिज्ञायाः प्रामाण्यं भविष्यतीत्यत आह **न च परमाणुरिति** । **प्रत्यक्षेण शक्यनिश्चयाविति** । सूच्यग्रसंयोगाभावेन शक्यनिश्चयोऽसाविति चेन्न । अन्ततो मशकवातादिसंयोगस्यावर्जनीयत्वात् । ननु प्रत्यक्षेण निश्चेतुमशक्यत्वेऽपि निबिडावयवत्वाद्यनुमानेन अवगम्यते । न चाप्रयोजकत्वम् । तत्स्थिरत्वपर्यालोचनहेतूच्छित्तेरेव बाधकत्वादित्यत आह **निबिडावयवत्वं चेति** । **प्रत्यक्षसिद्धत्वादिति** । स्फटिकोपरि पाषाणप्रक्षेपे तद्दर्शनात् । तथा च अप्रयोजकता तदवस्थेति । किं तर्हि निबिडावयवत्वमित्यत आह **किन्त्विति** । **उत्कृष्टकारणापेक्षत्वमिति** । प्रचुरकारणापेक्षत्वमित्यर्थः । **तद्विशेषाभाव इति** । तत्रोत्कृष्टकारणजन्ये निबिडावयव इति यावत् । **विशेषस्य** परमाण्वपगमलक्षणस्य विशेषस्याभावः । परमाण्वपगम इति यावत् इत्यर्थः । यद्वा **तस्य** परमाण्वपगमलक्षणस्य विशेषस्याभावः । शेषं पूर्ववत् । अत्र उत्कृष्टकारणापेक्षत्वनिबिडावयवत्वमात्रेणेति शेषः । **कस्यचिदतीन्द्रिय-त्वादिति** । परमाण्वादिवृत्तेरित्यर्थः । **घटादितुल्यत्वादिति** । परमाण्वपगमादिप्रक्रियया गुणिनिष्ठे गुणानामपि नाशनियमादिति भावः । **रूपादिसमानमेवेतीति** । तच्च 'नरत्वादिकमप्येव'मित्यादिना वैशेषिकपरीक्षायां व्युत्पादितमिति भावः ।

**शे०चं०——** भाष्ये सर्ववस्तुष्वित्यस्याधिक्यमाशङ्क्यार्थविशेषसूचनार्थत्वान्न तदित्यभिप्रेत्य तमाह **सर्वेति** । **अपैति** विभज्यते । अस्त्ववयवविभागस्तथाऽपि न द्रव्यनाशः सम्भावितः । आरम्भकपरमाणूनां नाशाभावादित्यतो न समवायिकारणनाश एव द्रव्यनाशकारणं, किन्तु असमवायिकारणनाशोऽपि । न चानुगमः शङ्क्यः । निमित्तेतरकारणनाशत्वेन द्रव्यनाशं प्रति नाशद्वयस्य कारणत्वाभ्युपगमात् । ततश्च युक्त एवासमवायि-कारणनाशाद्द्रव्यनाश इत्यभिप्रेत्य सनिमित्तकं तन्नाशमाह **विभागेनेति** । ननु घटादौ सूच्यग्रादिनाऽपि न पर-माणोरपगमो भवति । तथा चावयवविभागाभावान्न तत्संयोगनाश इति कारणाभावान्न द्व्यणुकनाश इति नोक्त-क्रमेण घटनाश इति न तत्र प्रत्यभिज्ञाया भ्रान्तित्वमित्यत आह **न चेति** ॥ अत्र परमाणोरप्रत्यक्षत्वाद्यथा तदपगमो न प्रत्यक्षेण निश्चेतुं शक्यः तथा तस्याप्रत्यक्षत्वादेव तदनपगमोऽपि न तत्र प्रत्यक्षेण निश्चेतुं शक्यत इति दृष्टान्ततयैव तदपगमग्रहणं कृतम् । अत एवोत्तरत्र परमाण्वपगमाभावस्य प्रत्यक्षेण निश्चेतुमशक्यत्वादि-

त्यनपगममात्रस्य ग्रहणम् । ततश्च शङ्कितप्रामाण्यं प्रत्यभिज्ञानं न तत्र स्थैर्यस्य साधकमिति भावः । ननु च निबिडावयवत्वादेव स्फटिकादिष्वपि परमाण्वनपगमनिश्चयो भविष्यतीत्यतः साधकतया पराभिमतम् अवयवानां निबिडत्वं न तेषां विभागायोग्यत्वं वक्तुं युक्तम् । तथा सति स्फटिकादिकमवयवापगमकं न भवति विभागायोग्यावयवत्वादिति प्रयोक्तव्यम् । तच्च न सम्भवति । स्फटिकादेरवयविनो विनाशानन्तरं तदवयवविभागस्य प्रत्यक्षत्वेन हेत्वसिद्धिप्रसङ्गादित्याह **निबिडावयवत्वं चेति** । यच्चवयवानां निबिडत्वं न विभागायोग्यत्वं तर्हि किं तदिति पृच्छति **किन्त्विति** । परिहरति **घटादित इति** । घटावयवपरमाण्वपगमहेतुतोऽपीत्यर्थः । अस्तु तर्हि घटाद्यवयवापगमहेत्वपेक्षयोत्कृष्टकारणशून्यत्वादेव स्फटिकादिष्ववयवानपगमनिश्चय इत्यत आह **न चेति** ॥ **तद्विशेषेति** । घटाद्यवयवापगमहेत्वपेक्षयोत्कृष्टकारणाभाव इत्यर्थः । तथा च स्फटिकादिष्ववयवानपगमनिश्चयासम्भवाच्छङ्कितप्रामाण्यं प्रत्यभिज्ञानं न स्थैर्यसाधकमिति भावः । अङ्गीकृत्य चावयवापगमनिश्चयाभावमेतदुक्तम् । वस्तुतस्तु अवयवापगमस्यैव तत्र, स्फटिकादिकं पूर्वापेक्षयाऽवयवापगमवत् तदपेक्षया गुरुत्वापकर्षवत्त्वादित्यनुमानेन, निश्चतत्वान्निश्चिताप्रामाण्यं प्रत्यभिज्ञानं न तत्स्थैर्यसाधकमिति भावेनावयवापगमनिश्चायकलिङ्गस्य सिद्धिमुपपादयति **दृश्यते हीति** ॥ **कस्यचिदिति** । गुरुत्वादेरतीन्द्रियत्वान्न तस्य प्रत्यभिज्ञाप्रत्यक्षगोचरत्वमभ्युपगन्तुं शक्यत इति भावः ॥ **कस्यचिदिति** । रूपादेरित्यर्थः ॥ **घटादीति** । तथाच उक्तरीत्या घटनाशसन्देहेन तदाश्रितरूपादिनाशसन्देहावश्यम्भावाच्छङ्कितप्रामाण्यं प्रत्यभिज्ञानं तत्रापि न स्थैर्यसाधकमिति भावः ॥ **नास्त्येवेति** । अनुगतप्रत्ययादेरपोहेन अन्यथासिद्धत्वेन मानाभावादिति भावः ॥ ननु विधिरूपप्रत्ययेनैव तत्सिद्धिरित्यत आह **सत्त्वेऽपीति** ॥ **रूपादीति** । रूपादिवदेवाश्रयनाशेन नश्यतीत्यर्थः ।

**वा०र०**— घटादित इत्यस्य वाक्यस्य हि घटादेः सकाशादुत्कृष्टकारणापेक्षत्वमर्थः प्रतीयते । तत्रोत्कृष्टं कारणं नोत्पत्तौ किन्तु विभागस्य प्रत्यक्षसिद्धत्वेन विभागायोग्यावयवत्त्वानुपपत्तेरिति प्रकृतानुसारात् प्राकृते विभाग एव । एवं च घटादित इत्यस्यापि घटावयवापगमहेतोरित्येव सिद्ध्यति । उत्कृष्टकारणं च विभागोत्कृष्टकारणमेवेति भावेन व्याचष्टे **घटाद्यवयवपरमाण्विति** । उत्तरस्योक्तार्थत्वादेवावतारस्तदनुसारेणैव कृतः । एतदनुसारेणैव तद्विशेषाभाव इत्यादेरपि व्याख्यानं ध्येयम् । यत्त्वन्यथाख्यातौ घटाद्युत्पत्तिकारणापेक्षया संयोगविशेषरूपोत्कृष्टकारणापेक्षत्वमित्यादिरूपः एतद्ग्रन्थस्यार्थो वर्णितः । स तु विभागायोग्यावयवत्वमित्यादिपूर्वग्रन्थेन दृश्यते हि कालत इत्युत्तरग्रन्थेन च विरोधादुत्पत्तिकारणपरत्वानुपपत्तेरुत्पत्तिकारणत्वाभिप्रायकत्वभ्रान्तिमूलक इत्युपेक्ष्यः । प्रागपि परमाण्वपगमाभावस्येति प्रकृतत्वेनात्रापगमाभावहेतोरेव वक्तव्यतया प्रकृतत्वेनोत्पत्तिकारणे उत्कृष्टत्वं वदताऽपि तत्तद्वाक्यार्थत्वेनागमाभावस्य वर्णनीयत्वेन तदवर्णनस्याज्ञानमूलकत्वाच्चेत्यास्तामिति दूषणे प्रक्षेप्यम् । तदपेक्षया विशेषस्तद्विशेष इत्यर्थमभिप्रेत्य व्याचष्टे **घटाद्यवयवापगमहेत्वपेक्षयेति** । **उत्कृष्टकारणाभाव इत्यर्थ इति** । एतच्च तद्विशेषेति पाठाभिप्रायेण । तस्यैव सार्वत्रिकपाठत्वात् । क्वचित् तद्विश्लेषेति पाठः, तत्र तु कारणाभावासिद्ध्यभिधानेन कारणं वक्तुं कार्याभावासिद्ध्यभिधानेन कार्यसद्भावः प्रतिपाद्यते । तत्र तादृशकारणकृतविश्लेषाभाव इत्यर्थान्न दोष इति ध्येयम् । मूले अवयवापगमस्यैवेत्यस्य

निश्चितत्वादित्युत्तरेणान्वयः । **ननु विधिरूपेति** । विधिमुखप्रत्ययवेद्यत्वात् सामान्यस्यापोहातिरेकेण सिद्धिर्भविष्यतीत्यर्थः ।

**स०व्र०—** ननु निबिडावयवत्वादेव परमाण्वनपगमः स्फटिकादिष्वस्तु इत्यत आह **निबिडावयवत्वं चेति** । किमत्र अवयवानां निबिडत्वं इति विभागायोग्यावयवत्वं परमाण्वनपगमसाधकमभिप्रेतं किं वा अवयविविभागे घटाद्यवयवापगमहेत्वपेक्षया उत्कृष्टकारणापेक्षत्वम् । तथा च तादृशोत्कृष्टकारणाभावात् अवयवानपगम इति । आद्यं दूषयति **न विभागेति** । द्वितीयं शङ्कते **किन्त्विति** । दूषयति **न चेति** । स्फटिकादौ घटाद्यवयवापगमहेत्वपेक्षयोत्कृष्टकारणाभावस्य निश्चेतुमशक्यत्वादसिद्ध्यापत्तिरिति भावः ।

**वि०ठ०—** तत्र तावत् सौगतोक्तं प्रत्यभिज्ञानिराकरणप्रकारं तावद्दर्शयति **तथाहीत्यादिना** । **परेणापि** वैशेषिकेनापि । तदेव दर्शयति **यदा हीति** । ननु यत्र परमाण्वपगमाभावो निश्चितः तत्र प्रत्यभिज्ञाया स्थिरत्वसिद्धिरित्यत आह **न च परमाणुरिति** । **प्रत्यक्षेण शक्यनिश्चयाविति** । तथा च प्रत्यभिज्ञायाः प्रामाण्यनिश्चयो न सम्भवतीति भावः । **निबिडावयवेष्विति** । अतिदृढतरत्वान्न तेषु परमाण्वपगमः सम्भवतीति भावः । निबिडावयत्वेन हेतुना तत्र परमाण्वपगमभावो निश्चीयत इत्यतो हेतुरेवात्र अवधारण इत्याह **निबिडावयत्वं चेति** । **प्रत्यक्षसिद्धत्वादिति** । स्फटिकादेर्विनाशसमये तदवयविभागस्य प्रत्यक्षसिद्धत्वादित्यर्थः । **उत्कृष्टकारणापेक्षत्वमिति** । घटादिकारणपरमाण्वादीनां किञ्चिद्विरलतयावस्थानादुपादानद्रव्यस्याल्पत्वं स्फटिकादौ त्वतिदृढतरसंश्लेषे बहुद्रव्यस्य कारणतयाऽवस्थानादुत्कृष्टत्वमेतदेव निबिडावयवत्वमित्यर्थः । तर्हि तदेव हेतुरस्त्वित्यत आह **न चेति** । **तद्विशेषाभावः** दृढतरसंश्लेषलक्षणनिबिडावयवत्वरूपविशेषाभावः । उपलक्षणमेतत् । तादृशविशेषश्च नास्माभिरसूक्ष्मदृष्टिभिर्ज्ञातुं शक्यः । तथा च निबिडावयवत्वहेतुः सन्दिग्धासिद्ध इति भावः । यश्च निबिडावयवत्वेऽपि न तेन स्फटिकादौ तद्विशेषाभावः । स चासौ विशेषश्च तद्विशेषः । परमाण्वनपगमरूपविशेषभावो न निश्चेतुं शक्य इत्यर्थः । कुतो न निश्चेतुं शक्य इत्यत आह **दृश्यते हीति** । हि यस्मात्कालतः स्फटिकादौ गुरुत्वापकर्षो दृश्यते तस्मादवयवानपगमो न निश्चेतुं शक्यते प्रत्युत तदपगम एव निश्चेतुं शक्यते । गुरुत्वापकर्षेणावयवापगमस्यानुमातुं शक्यत्वात् । गुरुत्वापकर्षस्यावयवापगमेन व्याप्तिसद्भावात् । तथा च न स्फटिकादिषु प्रत्यभिज्ञया स्थिरत्वसिद्धिरिति भावः । **घटादितुल्यत्वादिति** । घटलक्षणाश्रयविनाशे रूपादिगुणविनाशस्य नियतत्वादिति भावः । **शङ्कितप्रामाण्यमिति** । घटादौ परमाण्वाद्यवयवापगमस्य सन्दिग्धत्वेन प्रत्यभिज्ञाप्रामाण्यं च शङ्कितमेवेति भावः ।

**।। इति सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति इत्यंशप्रदर्शनम् ।।**

* * *

॥ अथ च तत्र सौगतानां प्रत्यभिज्ञानिराकरणं नास्मन्मतं स्पृशति इत्यंशप्रदर्शनम् ॥

४० **सु०— अत्रोच्यते । स्यादयं दोषः परमाण्वारम्भवादिनाम् । न परिणामवादिनामस्माकम् । 'तदेव (हि) वस्त्ववयवोपचयापचयाभ्यामन्यथा विक्रियते, न पुनरन्यदेव भवती'ति हि परिणामवादिनो मन्यन्ते । अतः प्रत्यक्षयोग्येषु सर्ववस्तुषु प्रत्यभिज्ञया स्थिरत्वग्रहणं युक्तमेवेति ।**

**ननु भवन्मतेऽपि प्रत्यभिज्ञा भ्रान्तिरेव (भ्रम एव), परिणामवादे पूर्वोत्तरवस्तुनोर्भेदाभेदाङ्गीकारात्, तदेवेदमिति च प्रत्यभिज्ञयाऽत्यन्ताभेदस्यावगाहनात् । उच्यते । यदा तु (यदि हि) पूर्वोत्तरकालभाविनोरभेदः प्रत्यभिज्ञाविषयोऽङ्गीक्रियते तदा सावधारणस्य प्रत्यभिज्ञानस्य भ्रमत्वेऽपि 'तदिदमि'ति तु न भ्रमः, तेनैव च स्थायित्वसिद्धे(द्धि)ः । यदा तु कालादिद्वयसम्बन्धो विषयस्तदा सावधारणमपि न भ्रम इति ।**

**परि०— भ्रमत्वेऽपीति** । 'स चायमिति तु ज्ञानं न मृषायं स एव तु । इति ज्ञानं मृषैव स्याद्भेदाभेदौ यतस्तनोः । अभेद एव जीवस्य नित्यं प्रत्येकशः पृथक् । देहदीपनदीवारिफलादीनां पृथक्त्वतः । भेदाभेदौ परिज्ञेयावि'त्येकादशस्कन्धद्वाविंशाध्यायतात्पर्योक्तेरिति भावः ॥

**यादु०— भ्रमत्वेऽपीति** । तदा तत्र भेदनिषेधस्यापि प्रतीतेरिति भावः ॥ **तदिदमिति त्विति** । अन्यतरविशिष्टस्यान्यतरविशिष्टोपादानकत्वादुपादानोपादेययोश्चाभेदस्यापि सत्त्वादिति भावः । ननु सावधारणस्य प्रत्यभिज्ञानस्य भ्रमत्वे कथं तेन स्थायित्वसिद्धिरित्यत आह **तेनैव चेति** । अवधारणशून्येनैव प्रत्यभिज्ञातेनेत्यर्थः ॥ **न भ्रम इति** । तदाऽवधारणस्य कालादिसम्बन्धरूपविशेषणायोगव्यवच्छेदकत्वमेव न धर्मिभेदनिषेधकत्वमतो न भ्रम इत्यर्थः ॥

**वं०प०— अत इति** । अवयवावयविनोर्भेदाभेदाङ्गीकारेणाभेदस्यापि सत्त्वादित्यर्थः । **यदि हीत्यादि** । अभेदः प्रत्यभिज्ञाविषयोऽङ्गीक्रियत इत्यत्र, यदा तु कालादिसम्बन्धो विषय इत्यत्र च अभेदशब्दसम्बन्धशब्दोपरि भारः । तथाच पूर्वमते तदेवेदमित्यत्र पूर्वकालविशिष्टं एतत्कालविशिष्टं च वस्त्वेकमित्यर्थः । द्वितीयमते तु तदेवेदमित्यस्य पूर्वकालसम्बन्ध्येतत्कालसम्बन्धीति कालद्वयसम्बन्धमात्रविषयकत्वमेवार्थो नाभेद इत्यर्थः ।

**कं०रा०— सावधारणस्येति** । तदेवेदमित्यवधारणसहितस्येत्यर्थः ।

**श्रीनिधि०— उपचयापचयाभ्यामिति** । संश्लेषविश्लेषाभ्यां इत्यर्थः । **न पुनरन्यदेव भवतीति** । अवयवोपगमापगमाभ्यामारभ्येति शेषः । **यदा हि पूर्वोत्तरकालभाविनोरभेदः प्रत्यभिज्ञाविषयोऽङ्गीक्रियते इति** । स एवायमिति हि सामानाधिकरण्यव्यवहारः । तत्र च द्वयं विषयीक्रियते । अभेदो विशेषणयोः, सामानाधिकरण्यं चेति । तत्राभेदविषयकत्वे भ्रमत्वं स्यादित्युच्यते । उत विशेषणसम्बन्धविषयकत्वे । आद्ये तूत्तरम्— **तदा सावधारणस्येति** । एवशब्दः बोध्यविरुद्धं व्यावर्तयति । अभेदे बोध्ये भेदो व्यावर्त्यत इति भ्रमत्वमिति भावः । द्वितीये तूत्तरम्— **यदा तु कालादीति** । **आदि**पदेन देश उच्यते । अत्रापि विशेषण-सम्बन्धो बोध्य इति एवशब्देन तद्विरुद्धासम्बन्धो व्यावर्त्यते । स च प्रामाणिक एवेति न भ्रमत्वमिति भावः ।

**शे०चं०—** एवं सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशतीत्युक्तमुपपाद्य न त्वस्म-न्मतमित्युक्तमुपपादयति **अत्रोच्यत इति** । ननु सर्वस्यापि प्रपञ्चस्यैन्द्रियकत्वाभावेन प्रत्यभिज्ञाप्रत्यक्षगोचरत्वस्य अभ्युपगन्तुमशक्यत्वान्न प्रत्यभिज्ञानस्य सर्ववस्तुस्थैर्यसाधकत्वं सम्भवतीत्यतः सर्वशब्दस्य सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यादाविव सङ्कुचितार्थत्वान्नानुपपत्तिरिति भावेनोक्तं **प्रत्यक्षयोग्येषु सर्ववस्तुष्विति भ्रमत्वेऽपीति** । तदा तत्र भेदनिषेधस्यापि प्रतीतिरिति भावः ॥ **तदिदमिति त्विति** । तद्देशकालविशिष्टविशेष्याभिन्न-मिदं विशिष्टमिति विशिष्टद्वयस्यैकविशेष्याभिन्नत्वेन विशेष्याभेदसद्भावात् तन्निमित्तकविशिष्टद्वयाभेद एवात्राभिमतो न तु विशिष्टद्वयस्य साक्षादभेदः । विशिष्टद्वयस्य विशेष्येण सहायावद्द्रव्यभावितया भेदाभेदवत्त्वेन विशिष्टद्वय-स्याभेदायोगात् । तथा च विशेष्येण सहाभेदस्यापि सत्त्वात् तन्मात्रांशे प्रमात्वं, भेदव्यावर्तकावधारणांशे तु भ्रमत्वम् । धूमवदग्निमतोरैक्येऽपीत्यादिटीकाग्रन्थस्यापि विशिष्टद्वयस्य पर्वतरूपैकविशेष्याभेदाभिप्रायकत्वान्न तद्विरोध इत्यवधेयम् । ननु सावधारणस्य प्रत्यभिज्ञानस्य भ्रमत्वे कथं तेन स्थायित्वसिद्धिरित्यत आह **तेनैव चेति** । अवधारणशून्येनैव प्रत्यभिज्ञानेनेत्यर्थः ॥ **न भ्रम इति** । तदवधारणस्य कालादिसम्बन्धरूपविशेषणा-योगव्यवच्छेदकत्वेन धर्मिभेदनिषेधकत्वाभावादिति भावः ॥

**वा०र०— पूर्वोत्तरवस्तुनोर्भेदाभेदाङ्गीकारादित्यादि** मूले । नन्वत्र वस्तुपदेन किं पूर्वोत्तरविशिष्टद्वयं विवक्षितं उतोभयानुगतं विशेष्यमात्रम् । नाद्यः तयोरभेदस्यैवायोगात् । तथाहि यावद्द्रव्यभाविविशिष्टद्वयस्थले तस्य विशेष्येणात्यन्ताभिन्नत्वेन यद्येनात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नेनात्यन्ताभिन्नमिति व्याप्त्या आकाशावयवानां परस्परमभेदाद्विशिष्टद्वयस्याभेदसम्भवेऽप्ययावद्द्रव्यभाविष्वपि विशिष्टाकारद्वयसद्भाववेलायामभेदस्य शङ्कामात्र-सम्भवेऽप्यत्र यदा पूर्वं विशिष्टं न तदोत्तरं यदा चोत्तरं न तदा पूर्वमिति पूर्वोत्तरयोः परस्परपरिहारेणैव वर्तमानयो-रभेदसम्भावनस्यैवानुपपत्तेः । यत्र हि तन्तुपटादावभेदकल्पनं तत्राभेदप्रतीतावेव ततो व्यतिरेकेणानुपलम्भे च । न चैवं प्रकृतेऽस्ति । अत एव तदिदमित्यस्य भ्रमत्वाभावोपपादनावसरे विशिष्टद्वयस्यैकविशेष्याभिन्नत्वेन विशेष्या-भेदेन विशिष्टद्वयाभेद इति टीकोक्तमपि अनुपपन्नम् । तावताऽपि विशिष्टद्वयाभेदस्यौपचारिकत्वमेवोक्तं स्यात् । न तु मुख्यत्वम् । एवं यदा पूर्वोत्तरकालभाविनोरिति समाधानग्रन्थेऽपि पूर्वोत्तरकालभाविनोरित्यनेन यदि विशिष्ट-द्वयं न तदाऽभेदसम्भावनापि । अन्यतरस्य नष्टत्वेन तदतिरेकेणानुपलभ्यमानत्वस्य हेतोरभेदसाधकस्याप्रसङ्गात् ।

नाप्युभयत्रापि विशेष्यमात्रं विवक्षितमिति द्वितीयः । तस्यात्यन्ताभिन्नत्वेन भेदाभेदाभावेन तत्त्वोक्तेर्मन्दत्वप्रसङ्गात् । सावधारणप्रत्यभिज्ञानस्य प्रमात्वस्यैवोपपत्त्या भ्रमत्वाङ्गीकारेण समाधानानुपपत्तेश्च । अविशेषाभावेन यदा त्वित्यस्य अनवतारापत्तेश्च ।

एतेनैव सोऽयमित्यादिनिरवधारणप्रत्यभिज्ञादिवचनं तत्त्वनिर्णयटीकोक्तमयुक्तम् । तत्रापि विकल्प्य दूषणप्राप्तेः । अत्यन्ताभेदस्यैवावगाहनादित्यप्यसत् । परिणामविशेषादिनाऽन्यथात्वशङ्काया अन्यथात्वं निषिध्यते तदेवेदमिति । न तदतिरिक्तमित्यर्थः । एवं चानया प्रत्यभिज्ञाया अभेदविरोधिभेदनिषेधेऽपि तत्सहिष्णुभेदस्य तस्मिन्सत्यप्यसत्त्वादित्युक्तिसिद्धतया सिद्धान्त्यभिहितस्य निषेधाभावात् । अत एव समाधाने भ्रमत्वोक्तिरपि चिन्त्यैव । विशिष्टाकारद्वयस्यात्यन्ताभेदस्यानेनाप्राप्तेर्भ्रमत्वकल्पनायोगात् । प्रागुक्तरीत्या तदिदमित्यस्यापि भ्रमत्वापत्तेश्च । यदा त्वित्यादिकल्पनान्तरस्यापि विशेष्यमात्राभेद एव तात्पर्येण विशेषाभावाच्च । कालादिसम्बन्धस्येव परिमाणसम्बन्धस्यापि विषयत्वे पूर्वोत्तरध्वंसप्रागभावावष्टम्भेन समाधेः कर्तुं शक्यतया भ्रमत्वाभावोपपादनसम्भवे तत्परित्यागेनोदाहरणान्तरस्वीकारवैयर्थ्यापाताच्च । तस्मात् कथमेतदिति चेदत्र ब्रूमः । यत्तावद्विशिष्टयोरभेदकारणं तदिष्टमेवास्माकम् । अत एव टीकाकृता विशेष्याभेदेन विशिष्टाभेद औपचारिक एव व्याख्यातः । एवं च भेदाभेदाङ्गीकारोक्तिस्तादृशाभेदाभिप्रायेणैव । अत एव तदेव वस्तु अन्यथाऽन्यथा विक्रीयते न पुनरन्यदेव भवतीति पूर्वग्रन्थेन विशेष्याभेदमात्रमुक्तम् । अत्यन्ताभेदस्य प्रत्यभिज्ञाविषयत्वोक्तिस्तु विशिष्टयोरभेदस्यापि विषयत्वाभिप्रायेणैव । समाधानेऽपि विशेष्याभेदप्रतीतेः प्रमात्वेऽपि विशिष्टाभेदप्रतीतेर्भ्रमत्वाभिप्रायेणैव भ्रमत्वाद्युक्तिः । एतावत्परमवशिष्यते । यदा त्वित्यनेनोदाहरणान्तरं किमिति आश्रितमिति । सत्यम् । अन्यत्राप्येवंप्रकारस्य द्रष्टव्यत्वसूचनार्थं कालादिसम्बन्धग्रहणम् । वस्तुतस्तु पूर्वपरिमाणादिध्वंसवतः एतद्विशिष्टेनाभेद इति पक्षान्तरमेतन्मूले । सम्मतं च टीकाकारस्येति सूरयो विदांकुर्वन्तु ।

**विशिष्टद्वयस्याभेदायोगादिति** । यद्येनेति व्याप्तिविषयत्वाभावादिति भावः । एतच्च अयावद्द्रव्यभाविष्वपि समकालयोर्विशिष्टयोरिव प्रकृततदिदमित्युक्ततद्देशकालविशिष्टैतद्देशकालविशिष्टयोरभेदाभाववचनमङ्गीकृत्य । वस्तुतस्तु पूर्वविनाश एवोत्तरस्योत्पन्नत्वेन तेनाभेदस्यासम्भावितत्वं च । अन्यथा नीलरूपनाशानन्तरं पीतरूपवत्यपि विशिष्टभेदापत्त्या नेदानीं पीत इति नीलव्यावर्तनायोगः । तथा आरब्धपटनाशानन्तरं पुनः पटान्तर आरब्धे तत्र विशिष्टाकारयोरभेदप्रसङ्गश्चेत्याद्यपि ध्येयम् । तत्त्वोद्योतटीकावाक्यविरोधं परिहरति **धूमवदिति** । तद्देशादिविशिष्टस्यैतद्देशादिवैशिष्ट्यं बोध्यमित्यादिपक्षोपपादनावसरे अनुभवकालसम्बन्धस्तत्तेत्यङ्गीकृत्य बाल्ययौवनयोः श्यामरक्तयोरिव तत्तेदन्तयोः परस्परमन्वयेऽपि एकविशेषणविशिष्टे इतरस्यावृत्तावपि एकविशेष्यवृत्तित्वं तावदस्ति । विशिष्टस्य कालद्वयसम्बन्धाभावेऽपि विशेष्य एव तत्सम्बन्धात् । तस्मादेकविशेषणविशिष्टे विशेषणान्तरान्वयाबोधकमपीदं वाक्यं विशेष्यस्य क्रमिकधर्मद्वयान्वयपरत्वात् सखण्डनार्थमेवेत्युक्तम् । यदन्वितत‌या ज्ञात एव तात्पर्यविषयीभूतेतरान्वयस्तत्त्वरूपं विशेषणत्वं लक्षणमतीतेऽपि चेत्तदपि विशेषणम् । वर्तमानमपि तल्लक्षणं युक्तं न चेन्न विशेषणम् । आद्यपक्षद्वये साक्षादभेदाप्राप्तावपि अभेदकोक्त्याभेदभ्रमनिरासेनाभेदप्रती-

त्युपपत्तेश्च । तृतीये विशिष्टैक्ये विशेषणैक्यं स्याद् धूमवदग्निमतोरपि विशेष्यैक्यमात्रम् । अग्निमतोऽग्निमतैक्येन अग्नेरग्निनैक्येन च दृष्टान्तलाभादित्याशङ्कापरिहाराय विशिष्टमपदार्थान्तरमिति मते विशेष्यस्यैवैक्याधिकरणत्वं धर्मयोरुद्देश्यतावच्छेदकत्वेन विशेषणत्वमित्येतावत एव विशिष्टैक्यपदार्थत्वम् । पदार्थान्तरमितीत्यावयोर्मते तु धूमवानग्निमानित्यबाधितसामानाधिकरण्यधीबलेन विशिष्टद्वयाभेदलाभः । अत एवेदं रूप्यमिति पुरोवर्तिनि रूप्याभेदप्रतीतेस्तत्र प्रवृत्तिः । तत्तेदन्तोपलक्षितैक्यमिति परमतम् । तत्तेदन्तयोर्मध्ये एकस्य विशेषणत्वमपरस्योपलक्षणत्वमिति पक्षाश्रयणेन तत्ताविशिष्टस्योपलक्षणीभूतेदन्तासम्बन्धो वा इदन्तोपलक्षिताभेदो वेत्यादिकं न्यायामृते । एकदण्डकुण्डलरूपविशेषणद्वयसम्बन्धेन देवदत्ते विशिष्टद्वयस्यैवोत्पत्तेरित्युपाधिखण्डनटीकाव्याख्यानमन्दारमञ्जर्यां समूहालम्बनादिव्यावृत्त्यर्थं विशिष्टव्यवहारानुसारेण दण्डीत्यादिविशिष्टप्रत्ययाद्विशिष्टसिद्धिरिति प्रतिपाद्य विशिष्टं यत्र विशेषणविशेष्यौ नित्यौ तत्र नित्यमन्यत्र अनित्यमित्युक्त्वा अनित्यविशिष्टस्थले उपपादननिरूपणं द्वेधा कृतम् । विशेषणमेवोपपादनं न विशेष्यमिति । उभयमप्युपादानमिति च । अनेकविशेषणसम्बन्धेन अनेकविशिष्टानां विशेष्यसत्त्वे मूर्तानां सामानाधिकरण्यमायातीत्याशङ्कापरिहाराय विशिष्टस्य द्रव्यत्वानङ्गीकाराच्चेत्युक्तम् । तथा द्रव्यगुणोभयोपादानकत्वेऽपि गुणद्रव्याभ्यामुपादानाभ्यां कार्ये द्रव्यत्वगुणत्वयोः प्रतिबन्ध इति द्रव्यगुणानन्तर्भूते द्रव्यान्तरमिति चोक्तम् । विशिष्टविशेष्ययोरभेदेऽपि सत्येव विशेष्ये विशिष्टोत्पत्तिर्भेदस्यापि सत्त्वादिति च । उपाध्यन्तरकल्पनेऽनवस्थेत्येतत् तत्त्वनिर्णयटीकायां तु दण्डकुण्डलाद्युपाधिकृतो भेदो देवदत्ते दृश्यत इत्याशङ्कापरिहाराय न दण्डादिना देवदत्तस्य भेदः क्रियते किन्तु दण्डादिविशेषणसम्बन्धेन देवदत्तो विशिष्टरूपं द्रव्यान्तरमुत्पादयतीत्युक्तम् ।

'दण्डी देवदत्तः, पर्वतोऽग्निमान्, यः सर्वज्ञः सर्ववित्' इत्यादिप्रमाणसिद्धं तावद्विशिष्टादीत्यादिकं तत्त्वोद्योतटीकायामुक्तम् । 'औपाधिकविशिष्टाद्यमि'ति वैशेषिकाधिकरणे तु अग्निमदादिविशिष्टस्य विशेष्यादित्रितयान्यत्वायोगात् त्रितयानन्यत्वपक्षं परिशेष्य तत्रापि विशेषणविशेष्ययोस्तत्त्वानुपपत्त्या पर्वतस्याग्निसम्बन्ध इति पर्यवसानं कृत्वा सिद्धसाधनतोक्ता । एकादशगीतातात्पर्यस्थ 'विशिष्टस्य स्वतोऽन्यत्वे स्वस्यामेयत्वहेतुतः' इत्यादिवाक्यव्याख्यावसरे वस्तुनि यावान्विशिष्टाकारस्तस्य विशेष्यस्वरूपादन्यत्वेन निर्विशेषे वस्तुनि विशेषो माऽस्त्विति चेन्न । तस्य तदन्यत्वे विशेषवत्येव प्रमाणप्रवृत्तेर्विशेष्यस्याज्ञेयत्वापत्त्या व्यावर्तकाज्ञाने व्यावर्त्यविशिष्टस्यापि ज्ञेयत्वानुपपत्तेस्तदन्यत्वमेवाङ्गीकार्यम् । न च तथाङ्गीकारेऽपि विशेष्यस्वरूपज्ञाने विशिष्टाकारज्ञानलाभात् विशेष्यस्वरूपानुवादेन विशिष्टाकारप्रश्नानुपपत्तिरित्याशङ्कायामेकमेव वस्त्वनूद्याकारेण ज्ञातं पृच्छमानाकारेण चाज्ञातमिति सर्वत्राङ्गीकारान्न प्रश्नानुपपत्तिः । तयोरभेदेऽपि विशेषबलात् ज्ञातत्वाज्ञातत्वे युज्येते । न च भेदमङ्गीकृत्य प्रश्नोपपत्तेर्वक्तुं शक्यत्वाद्विशेष्यविशिष्टयोर्भेदाभेदौ स्यातामिति वाच्यम् । अयावद्द्रव्यभाविविशेषणविशिष्टस्य विशेष्येण भेदाभेदयोरङ्गीकार एव आविर्भावतिरोभाववत् कर्तृत्वभोक्तृत्वादियावद्द्रव्यभाविविशेषणविशिष्टविषये कर्ता भोक्ता मदन्योऽहं वेत्येवं भेदाभेदाननुभवेन तयोरभावः । नित्याभिव्यक्तस्य देहोपाधिकत्वं विना चेतनगतस्य शुद्धस्वरूपो मुक्त इत्यादौ प्रतीयमानस्य गुणत्वस्वरूपत्ववस्तुत्वादेः सामानाधि-

करण्येन विशेष्यमुक्ताभेदस्य प्राप्त्योक्ताभेदरूपनिमित्तेन च विशेषणस्यापि विशेष्याभेदः । न च कर्ता भोक्ता बलवान् विद्वानितिवत् कृष्णः स्थूल इत्यादिप्रयोगात् काष्ण्र्यादीनामपि चेतनैक्यं स्यादिति वाच्यम् । भेदादर्शने सति सामानाधिकरण्येन चेतनैक्याङ्गीकारेण वैषम्योपपत्तेः । शुद्धत्वादिवत् कर्तृत्वादीनामपि यथास्थितमेव चेतनैक्यम् । एवं यावद्द्रव्यभाविविशेषणादेर्विशेषिणाऽत्यन्ताभेदः । तन्तुपटाद्यवयवावयविस्थले चावयवावयविनोर्भेदाभेदौ । यथैवमेव पटत्वादीनामयावद्द्रव्यभाविशेषाणां तन्त्वादिविशेषिणा भेदाभेदौ । जडे वस्तुनि गुणक्रियाद्ययावद्द्रव्यभाविविशेषाणां स्वसद्भावदशायां भेदाभेदौ । नीलं फलमिति सामानाधिकरण्येनाभेदस्य नीलं फलमित्यपि व्यवहारेणात्यन्ताभेदे विनाशासम्भवेन च भेदस्यापि प्राप्तेः । स्वयमसतो भेदायोगेन नाशानन्तरं तु भेद एव । एवं सुप्त्यादावपि सुप्तोऽयं बलवान्विद्वानित्यादि व्यवहारेण बलादीनां शक्तिरूपेणावस्थानकल्पनोपपत्त्या बलादेरत्यन्ताभेदप्राप्तावपि नीले चूते पीत इति शक्त्यभिप्रायेण व्यवहारादर्शनेन नीलादीनां शक्तिरूपेणावस्थानकल्पनायोगेनात्यन्तं विनाशस्यैव प्राप्त्या नात्यन्ताभेद इत्यादि प्रमेयम् ।

वियदधिकरणस्थपराधीनविशेषाप्तिरित्येतदनुव्याख्यानमूले अपूर्वविशेषोपजने हि विशिष्टाकारोपजनोऽवश्यम्भावी । विशिष्टाकारवस्तुस्वरूपाभिन्न इति तस्यैवासावुपजनो भवति । देवदत्तः शरीरी जातो विद्वान् जात इति चावस्थितस्वरूप एव वस्तुनि विशेषावाप्तिमात्रेण जननव्यवहारो दृश्यत एवेत्युक्तम् । 'अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदे'ति वैशेषिकनयानुव्याख्यानमूले तन्तूनां विशिष्टाकारो ह्यसावित्याद्युक्तम् । विशिष्टं च विशेष्याश्रितं द्रव्यान्तरमिति जिज्ञासाधिकरणमूले उक्तम् । 'स्वरूपं वस्तुनो भेदो यन्न तस्य ग्रहे गृह' इत्युत्तरानुव्याख्यानमूले विशिष्टं न विशेषणसम्बन्धनिमित्तो विशेष्याकार इति पक्षे न विशिष्टप्रत्यय इत्याद्युक्तम् । एतेषां ग्रन्थानामविरोधेन आशयो वर्णनीयोऽस्ति । मन्दारमजर्यां द्रव्यत्वानङ्गीकारोक्तिरपि व्याख्येयमस्ति । अस्मदुक्तप्रकारेण तत्र तत्र व्यवस्थापि दर्शनीयाऽस्ति । 'भेदो नाशे भवे तथे'त्येतत्सुधायां स्वसद्भाववेलायामेव भेदाभेदौ । नष्टस्य भेदचिन्तानवकाशादिति प्रतिपादितम् । गीतातात्पर्यटीकायां तु 'नाशानन्तरं भेद एवे'त्युक्तमपि नष्टानामपि वस्तूनामित्यादि वैशेषिकाधिकरणीयप्राक्तनटीकास्थविचारानुसारेण पक्षद्वयानुसारेण योजनया विरोधः परिहार्यः । आयुरनुसारेण गुरुदयया सर्वं योजनीयमस्ति । उक्ताशय एवैवंजातीयके ज्ञेयः ।

**स०व्र०— पूर्वोत्तरकालभाविनोरिति** ।

**विठ्ठ०—** एवं सौगतकृतं प्रत्यभिज्ञानिराकरणं वैशेषिकमते युज्यते । नास्मन्मतस्यैतद्दूषणमित्युपपादयितुमाह **अत्रोच्यत इति** । **भेदाभेदाङ्गीकारादिति** । घटावयवोपचयापचयाभ्यां विद्यमान एव वस्तुनि विकारविशेषसद्भावात् विकारविकारिणोर्भेदाभेदवत्त्वस्याभ्युपगतत्वात् पूर्वोत्तरवस्तुनोर्भेदाभेदाङ्गीकार इति ज्ञेयम् । **भ्रमत्वेऽपीति** । पूर्वोत्तरकालवर्तिनोरुक्तरीत्या विकारत्वेन भेदाभेदसद्भावात् स एवायमिति भेदनिषेधस्य प्रतीतेर्भेदस्यापि प्रमितत्वेन भ्रमत्वमिति द्रष्टव्यम् । उक्तं चैकादशद्वाविंशत्तात्पर्ये । 'स एवायमिति ज्ञानं मृषाभेदो यतस्तयोः । देहदीपनदीवारिफलादीनां पृथक्त्वतः । भेदाभेदाविति ज्ञेयावि'ति । **तदिदमिति** । **न भ्रम इति** ।

यत्प्राबल्योपेतं शरीरं तदिदं यौवनोपेतमित्यभेदमात्रप्रत्यभिज्ञानं चेन्न भ्रमः । बाल्यविशिष्टशरीरस्यैव यौवनविशिष्टशरीरं प्रत्युपादानत्वादुपादानोपादेययोरभेदस्यापि सत्त्वादिति भावः । तदेवेदमित्यस्य भ्रमत्वे स्थायित्वसिद्धिः कथमित्यतोऽवधारणं विना तदिदमिति प्रत्यभिज्ञामात्रेण स्थायित्वसिद्धिरित्याह **तेनैवेति** । **कालादिद्वयेति** । यत्पूर्वं बाल्योपेतं विशेष्यं तदेवेदानीं यौवनोपेतमिति कालद्वयसम्बन्धे विशेष्यं यदि प्रत्यभिज्ञानविषयस्तदाऽवधारणस्य विशेष्यमात्रपर्यवसायित्वेन कालादिसम्बन्धरूपायोगव्यवच्छेदकत्वेन वा सावधारणमपि प्रत्यभिज्ञाज्ञानं भ्रम इत्यर्थः ।

**।। इति सौगतानां प्रत्यभिज्ञानिराकरणं नास्मन्मतं स्पृशति इत्यंशप्रदर्शनम् ।।**

**।। इति सौगतानां प्रत्यभिज्ञानिराकरणं वैशेषिकादिमतमेव स्पृशति न त्वस्मन्मतम् ।।**

**।। इति अष्टमसूत्रार्थप्रदर्शनम् ।।**

* * *

**।। अथ सप्तमसूत्रार्थप्रदर्शनम् ।।**

**।। अथ तत्र प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का तन्निरासश्च द्वेधा ।।**

**।। अथ तत्रादौ प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का प्रत्यक्षबाधकाभावात्तन्निरासश्च ।।**

**४१ सु०— नन्विदं प्रत्यभिज्ञानं परिलूनपुनर्जातकुन्तलकलापादाविव भ्रान्तं किन्न स्यादिति चेत् (न), बाधकाभावात् । एवमेव भ्रान्ति(न्त)त्वाभ्युपगमे नीलादिप्रत्ययानामपि तथात्वापत्ते(त्वप्राप्ते)ः । न च प्रत्यक्षं बाधकमित्युक्तम् ।**

**परि०— न च प्रत्यक्षं बाधकमित्युक्तमिति** । 'विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातना' इत्येतद्व्याख्यायां प्रत्यक्षं बाधकं नेत्युक्तप्रायम् । तद्विषयस्य विवेचनादिति भावः ।। **क्षणिकत्वे प्रत्यक्ष(क्षे )प्रमाणाभावतद्विरोधयोरुक्तिः ।**

**यादु०— बाधकाभावादिति** । परिलूनानां भूमौ पतितानां प्रत्यक्षेण दर्शनादिति भावः ।

**कं०रा०**— ननु वर्तमानमात्रगोचरं प्रत्यक्षमर्थानां वर्तमानक्षणमात्रसम्बन्धिनीं सत्तामवगाहते । न पूर्वोत्तरक्षणसम्बन्धिनीमपि अतस्तेन क्षणिकत्वसिद्धेस्तदेव प्रत्यक्षं प्रत्यभिज्ञाया बाधकमित्यत आह **न चेति** । प्रत्यक्षेण वर्तमानक्षणसम्बन्धिसत्त्वावगाहनेऽपि क्षणमात्रोत्पत्तिविनाशवत्त्वस्य क्षणान्तरासम्बन्धित्वस्य वा अनवगाहनेन तस्य क्षणिकत्वसाधकत्वाभावान्न प्रत्यक्षं स्थिरत्वग्राहिप्रत्यभिज्ञाया बाधकमित्युक्तप्रायमित्यर्थः ।

**श्रीनिधि०**— ननु बाधकाभावादित्यसिद्धम् । प्रत्यक्षस्यैव बाधकत्वात् । तद्धि वर्तमानमात्रग्राहि । पूर्वोत्तरकालं चानुपलम्भादसत्त्वं च गृह्णात्येवेत्यत आह **न च प्रत्यक्षं बाधकमित्युक्तमिति** । योग्यानुप-

लम्भसनाथेन प्रत्यक्षेणाभावो गृह्यते । न च पूर्वोत्तरकालवर्तिता प्रत्यक्षयोग्या तस्य वर्तमानमात्रग्राहितायाः परेणैवोक्तत्वादिति प्रत्यक्षस्याबाधकत्वमुक्तमित्यर्थः ।

**शे०चं०— भ्रान्तमिति** । भ्रान्तिर्भ्रान्तमिति भावे क्तः ॥ **एवमेवेति** । बाधकाभावेऽपीत्यर्थः ॥ **तथात्वापत्तेरिति** । अविशेषाभावादिति भावः । ननु बाधकाभावोऽसिद्ध इत्यतः तत्किं प्रत्यक्षमभिमतं उत अनुमानमिति विकल्पद्वयं मनसि निधाय आद्यं दूषयति **न चेति** ॥ **उक्तमिति** । 'विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातना' इत्यादिनेति शेषः ।

**विठ्ठ०— न च प्रत्यक्षमिति** । 'विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातना' इत्यत्र प्रत्यक्षस्य क्षण-मात्रताग्राहकत्वाभावस्योक्तत्वादिति भावः ।

**चषकः— भ्रान्तं किं न स्यादिति** । नपुंसके भावे क्तः, भ्रमरूपं किन्न स्यादित्यर्थः । **एवमेव** बाधकमन्तरेणापि ।

**॥ इति प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का प्रत्यक्षबाधकाभावात्तन्निरासश्च ॥**

* * *

**॥ अथ तत्र अनुमानबाधकाभावात् प्रत्यभिज्ञायाः भ्रान्तित्वशङ्कानिरासः ॥**

**॥ अथ तत्रादौ प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्का ॥**

४२ **सु०—** प्रत्यक्षस्याबाधकत्वेऽप्यनुमानं बाधकं भविष्यतीति शङ्कते **फलादीनामिति** ।

## अनु०— फलादीनां विशेषेण सर्वत्राप्यनुमीयते ।
## सत्त्वेन क्षणिकत्वं चेत्

**आदिपदेन** देहदीपादिग्रहणम् । **विशेषेण** परिमाणभेदेन । क्षणिकत्वं (तावत्) अनुमीयत इति सम्बन्धः । ततस्तद्दृष्टान्तेन **सर्वत्र** फलादिव्यतिरिक्तेऽपि वस्तुनि, सत्त्वेन हेतुना, क्षणिकत्वमनुमीयते ॥ एतदुक्तं भवति । 'यत् सत् तत् क्षणिकम् यथा फलादि, सन्तश्च पञ्चस्कन्धाः' इत्यनुमानं स्थिरत्वविषयप्रत्यभिज्ञाया बाधकं भविष्यति । न च फलादिदृष्टान्तः साध्यविकलः, 'यद्विरुद्धपरिमाणं तन्नाना दृष्टं यथा घटपटौ, विरुद्धपरिमाणं च फलादिकं पूर्वोत्तरक्षणयोः' इत्यनुमानेन फलादीनां क्षणिकतासिद्धेरिति ॥

**श्रीनिधि०**— **विशेषेण परिमाणभेदेनेति** । चूतादिफलमादौ स्वल्पपरिमाणं उत्पद्यते । अनन्तरं दिने दिने तत्र परिमाणाधिक्यमुत्पद्यते । एवं दीपे क्षणे क्षणे देहेऽपि उत्पत्तिमारभ्य दिने दिने परिमाणाधिक्यमिति परिमाणभेद इत्यर्थः । **पूर्वोत्तरक्षणयोरित्यनुमानेनेति** । **इति** हेतोः । अनुमानेनेत्यस्य उत्तरत्र सम्बन्धः ।

**शे०चं०**— द्वितीयमाशङ्कते **प्रत्यक्षस्येति** । देहदीपफलादिष्वित्युत्तरग्रन्थानुरोधेनाह **आदिपदेनेति** । देहदीपादीत्यादिपदेनाङ्कुरपरिग्रहः । रूपरसादेर्घटादिभेदसाधकत्वप्रसङ्गेन विशेषमात्रस्य फलादिभेदसाधकत्वासम्भवाद्विशेषपदार्थमाह **विशेषेणेति** । सर्वत्र सत्त्वेन क्षणिकत्वमनुमीयत इत्येतावतैव विवक्षितसिद्धे फलादीनां विशेषेणेत्यस्य तदेकवाक्यतया योजयितुमशक्यत्वात् वाक्यभेदमाश्रित्य योजयितुमपेक्षितं पूरयति **क्षणिकत्वमित्यादिना** । सर्वत्र सत्त्वेन क्षणिकत्वसाधने फलादिष्वेतदनुमानतः प्रागपि साध्यसिद्धेरंशतः सिद्धसाधनता स्यादित्यभिप्रेत्य तद्व्यावर्तकमाह **फलादिव्यतिरिक्तेऽपीति** । किमर्थमत्रानुमानद्वयस्योपन्यास इत्याशङ्कां परिहरन्ननुमितिकारणव्याप्तिपक्षधर्मताज्ञानजनकोदाहरणोपनयात्मकद्व्यवयवन्यायवादिसौगतमतानुसारेण अनुमानद्वयप्रकारमाकाङ्क्षाक्रमेण दर्शयति **एतदुक्तं भवतीति** । इतीत्यस्येत्येतदिति पूर्वेण सम्बन्धः ।

**वा०र०**— **द्वितीयमाशङ्कत इति** । अत्र द्वितीयाशङ्कापरत्वेनानुव्याख्यानमवतारयतीति पाठः स्वरसः । पाठान्तरेऽप्ययमेवार्थो ज्ञेयः । **द्व्यवयवन्यायेति** । द्वाववयवौ यस्य द्व्यवयवः । स चासौ न्यायः परार्थानुमानमिति द्व्यवयवन्यायस्तमङ्गीकरोतीति तद्वादीत्यर्थः ।

**विठ्ठ०**— नन्वेतेन किमनुमानमुक्तं अनुमानोक्तौ च दृष्टान्ते साध्यवैकल्यमित्यत आह **एतदुक्तं भवतीति** ।

**॥ इति प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्का ॥**

* * *

**॥ अथ च तत्र प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्कानिरासः ॥**

**॥ अथ तत्र एतच्छङ्कानिरासकानुव्याख्यानस्य टीका ॥**

**॥ अथ तत्रादौ एतच्छङ्कानिरासकानुव्याख्यानस्य द्वेधा विवरणम् ॥**

**॥ अथ तत्राप्यादौ एतच्छङ्कानिरासकानुव्याख्यानस्य प्रथमं विवरणम् ॥**

४३ **सु०**— परिहरति **आकाशस्येति** ।

**अनु०**— आकाशस्याविशेषतः ।
अविशेषोऽखिलस्यापि सत्त्वात्किन्नानुमीयते ।

**अविशेषतः** पूर्वोत्तर(क्षण)योर्भेदरहितत्वतः । **अविशेषः** पूर्वोत्तरक्षणयोर्भेदराहित्यम् । **अखिलस्यापि** विप्रतिपन्नस्य ।

इदमुक्तं भवति । 'यत् सत् तदक्षणिकम् यथाऽऽकाशम्, सच्च नीलादी'ति प्रत्यनुमानप्रतिरुद्धत्वेनानुमानस्याभासत्वान्न प्रत्यभिज्ञाबाधकत्वं सम्भवतीति । न चाकाशदृष्टान्तः साध्यविकलः, 'आकाशो द्वौ निरोधौ च नित्यं त्रयमसंस्कृतमि'ति परेणैवाङ्गीकृतत्वात्, क्षणिकतासाधकस्य परिमाणभेदादेराकाशेऽभावाच्च ॥ तदिदमु(मप्यु)क्तम् **अविशेषतः** परिमाणभेदादिरहितत्वत इति ।

**परि०**— अंशतो बाधादिनिरासाय अखिलशब्दविवक्षितमाह **विप्रतिपन्नस्येति** । तन्मतरीत्या द्व्यवयवप्रयोगमाह **यत्सत्तदक्षणिकमिति** ॥ **द्वौ निरोधाविति** । बुद्धिपूर्वकाबुद्धिपूर्वकविनाशावित्यर्थः ॥ **असंस्कृतमिति** । क्षणिकं घटादिकं यथा पूर्वक्षण(वासना)विनाशिना वासितं न तथा आकाशादित्रयमतो नित्यमित्यर्थः ।

**यादु०**— **द्वौ निरोधाविति** । प्रतिसङ्ख्याप्रतिसङ्ख्यौ विनाशावित्यर्थः ॥ **असंस्कृतमिति** । तथा क्षणिकं नीलादिकमुत्तरं पूर्वेण संस्कृतं परेण पूर्वस्योत्तरस्मिन्वासनाकारित्वाङ्गीकारात् । न तथेदं त्रयं संस्कृतम् । यतो नित्यमित्यर्थः । अनेनाप्रतिसङ्ख्यानाशोऽपि नास्तीत्युक्तं भवति ।

**कं०रा०**— **तदिदमपीति** । अपिशब्देन पूर्वोत्तरक्षणयोर्भेदराहित्यं समुच्चीयते ।

**श्रीनिधि०**— **आकाशो द्वौ निरोधौ चेति** । **द्वौ निरोधौ** बुद्धिपूर्वविनाशोऽबुद्धिपूर्वविनाशश्चेति द्विविधौ विनाशौ आकाशश्चेति त्रयं नित्यम् । यथा क्षणिकस्याप्यात्मनः सन्तानरूपेण नित्यत्वं न तथेत्याह **असंस्कृतमिति** । अवापितमित्यर्थः । यथा पूर्वपूर्वात्मसंस्कार उत्तरोत्तरात्मन्याधीयते, न तथा आकाशादित्रयेण पूर्वपूर्वेण उत्तरोत्तरस्मिन् संस्कार आधीयत इति नित्यम् । किन्तु स्वभावत एव नित्यमित्यर्थः ।

**शे०चं०**— आकाशाद्यंशे सिद्धसाधनत्वप्रसङ्गभयादाह **विप्रतिपन्नस्यापीति** । किं तावताऽपीत्यतस्तत्फलोपदर्शनपूर्वकमनुमानप्रयोगप्रकारमाह **एतदुक्तं भवतीति** ॥ **द्वौ निरोधाविति** । प्रतिसङ्ख्याप्रतिसङ्ख्यौ विनाशावित्यर्थः ॥ **असंस्कृतमिति** । यथा क्षणिकं नीलादिकमुत्तरं पूर्वेण संस्कृतमेव कारणस्य कार्ये वासनाकारितायाः परेणाङ्गीकृतत्वात् । न तथेदं त्रयं संस्कृतं इत्यसंस्कृतत्वकथनद्वाराऽविकृतत्वसूचकमिदं नित्यत्वे हेतुगर्भं विशेषणम् । नन्वविशेष इति पूर्वोत्तरक्षणयोर्भेदरहितत्वत इति व्याख्यातं तत्कथमेतदुक्तार्थसमर्पकतयोपन्यस्यत इत्यतो विवक्षितार्थसमर्पकतया तद्व्याचष्टे **परिमाणेति** ।

**वा०र०—** **विप्रतिपन्नस्यापीतीति** प्रतीकोपादानं तु अखिलस्य विप्रतिपन्नस्यापीति सम्बन्धप्रदर्शनार्थमित्याशयेनार्थः । .........सारेणाह **यथा क्षणिकमित्यादि** ।

**वि०—** एतेन पूर्वपक्ष्यनुमानस्य दूषणं किमायातमित्यत आह **एतदुक्तं भवतीति** । **आकाशो द्वौ निरोधाविति** । आकाशः प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधौ चेति त्रयं नित्यम् । न च नीलादिवत् सन्तानरूपेण किं त्वसंस्कृतं यथा क्षणिकं नीलादिकमुत्तरोत्तरं पूर्वपूर्वेण संस्कृतं पूर्वस्योत्तरस्मिन् वासनासम्पादकत्वाङ्गीकारात् । न तथेदं क्षणिकतया संस्कारापादकम् । अतः स्वभावत एव नित्यमित्यर्थः ।

**॥ इति एतच्छङ्कानिरासकानुव्याख्यानस्य प्रथमं विवरणम् ॥**

* * *

**॥ अथ तत्र एतच्छङ्कानिरासकानुव्याख्यानस्य द्वितीयं विवरणम् ॥**

४४ **सु०— यद्वा आकाशस्याविशेषतः परिमाणभेदरहितत्वतः । तद्दृष्टान्तेन अखिलस्यापि फलादेः अविशेषः पूर्वोत्तरकालयोः परिमाणभेदाभावः, सत्त्वात् किं नानुमीयत इति योजना ॥ एतदुक्तं भवति । नानुमानं प्रत्यभिज्ञाया बाधकं भवितुमर्हति, अनुमानस्य प्रत्यक्षतो दुर्बलत्वेन तद्बाध्यत्वात् । अन्यथा फलादिकं परिमाणभेदरहितं सत्त्वादाकाशवदित्यप्यनुमानप्रसङ्गात् । न ह्यत्र प्रत्यक्षादिबाधं विना कश्चिद्दोषोऽस्ति । तथा च तद्दृष्टान्ते क्षणिकत्वसाधकस्यासिद्धत्वात् साध्यविकलता स्यात् । ततः प्रत्यक्षविरोधेनैवास्यानुमानस्याप्रामाण्यम् । अन्यथाऽन्योन्याश्रय(ता)प्रसङ्ग इत्येव वक्तव्यम् । तच्च समं प्रकृतेऽपीति ।**

**परि०—** प्रतिप(क्षोक्तिप)क्षपरतया व्याख्याय बाधकोक्तिपरतयाऽपि व्याचष्टे **यद्वा आकाशस्येति** । किमनेनोक्तमित्यत आह **एतदुक्तमिति** ॥ **दृष्टान्त इति** । फलदेहदीपादौ परिणामरूपभेदस्य क्षणिकत्वसाधकस्यासिद्धत्वेन क्षणिकत्वसिद्ध्यभावेन क्षणिकत्वरूपसाध्यविकलत्वात् तद्दृष्टान्तेन नीलादेरपि तत्साधनमयुक्तमापद्येतेत्यर्थः ॥ **अस्येति** । फलादिकं परिमाणभेदरहितमित्यस्येत्यर्थः ॥ **अन्यथेति** । अनुमानविरोधेन प्रत्यक्षस्यैवाप्रामाण्योक्तौ सत्यनुमानप्रामाण्ये तस्य च प्रत्यक्षबाधकत्वम् । सति च प्रत्यक्षाप्रामाण्ये तद्विरोधाभावेनानुमानस्य प्रामाण्यमित्यन्योन्याश्रयतेत्यर्थः ॥ **समं प्रकृतेऽपीति** । यत्सत्तत्क्षणिकं यथा फलादि । सन्तश्चामी पञ्चस्कन्धा इत्यनुमानेऽपि प्रत्यक्षविरोधेनाप्रामाण्यं सममित्यर्थः ॥

**यादु०— अन्यथाऽन्योन्याश्रयेति । अन्यथा** अनुमानेनैव प्रत्यक्षबाधेऽनुमानप्रामाण्ये तद्विरोधेन प्रत्यक्षाप्रामाण्यं, सति च तस्मिंस्तद्विरोधाभावेनानुमानप्रामाण्यमित्यन्योन्याश्रयताप्रसङ्ग इत्यर्थः ।

**वं०प०— क्षणिकत्वसाधकस्येति** । परिमाणभेदस्येत्यर्थः । **अनुमानस्य** सत्त्वरूपहेतोः ॥

**कं०रा०— अन्यथेति** । अनुमानस्य प्रत्यक्षबाध्यत्वाभावे फलादिकं परिमाणभेदरहितं सत्त्वादाकाशवदित्यनेन फलादेः परिमाणभेदराहित्यस्यापि सिद्धिप्रसङ्गादित्यर्थः । अनुमानस्य प्रत्यक्षबाध्यत्वाभावेऽप्युक्तानुमानेन फलादेः परिमाणभेदराहित्यासिद्धिर्दोषान्तरं किं न स्यादित्यत आह **न हीति** । प्रत्यक्षबाधादन्यस्य दोषस्यादर्शनादिति भावः । अस्तूक्तानुमानेन फलादेः परिमाणभेदराहित्यसिद्धिः ततः किमित्यत आह **तथा चेति** । उक्तानुमानेन फलादेः परिमाणभेदराहित्यसिद्धौ फलादिरूपदृष्टान्ते क्षणिकत्वसाधकत्वस्य परिमाणभेदस्यासिद्धत्वाद् दृष्टान्तस्य साध्यविकलता स्यादित्यर्थः । **तत इति** । दोषान्तराभावात् प्रत्यक्षविरोधेनैव फलादिकं परिमाणभेदरहितं सत्त्वादित्यनुमानस्याप्रामाण्यम् । अन्यथा अनुमानविरोधेन प्रत्यक्षस्यैवाप्रामाण्ये अनुमानप्रामाण्यसिद्धौ तद्विरोधेन प्रत्यक्षाप्रामाण्यसिद्धिः । तत्सिद्धौ च प्रत्यक्षविरोधाभावादनुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयताप्रसङ्ग इत्येव वक्तव्यमित्यर्थः । **तच्चेति** । स्थिरत्वग्राहिप्रत्यभिज्ञाप्रत्यक्षविरोधेन क्षणिकत्वानुमानस्याप्रामाण्यम्, अन्यथाऽनुमानविरोधेन प्रत्यक्षाप्रामाण्येऽनुमानप्रामाण्यसिद्धौ तद्विरोधेन प्रत्यक्षाप्रामाण्यसिद्धिः । तत्सिद्धौ च प्रत्यक्षविरोधाभावादनुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयत्वप्रसङ्ग इति दूषणं प्रकृतेऽपि सममित्यर्थः ।

**श्रीनिधि०— तथा च दृष्टान्ते क्षणिकत्वसाधकस्यासिद्धत्वादिति । तथा च** फलाधिकं परिमाणभेदरहितं सत्त्वादाकाशवत् इत्यनुमाने सति, अनेनानुमानेन क्षणिकत्वसाधकस्य भिन्नपरिमाणत्वस्यासिद्धत्वात् साध्यविकलता । क्षणिकत्वरूपसाध्यान्ये सिद्धे अनुमानस्य विरोधराहित्येन तत्साधकत्वसिद्धिरित्यन्योन्याश्रयत्वमित्यर्थः ।

**शे०चं०—** अत्र पक्षेऽविशेषत इत्यस्याऽवृत्तिरनेकार्थत्वं चाश्रयणीयं भवतीत्यतः प्रकारान्तरेण योजयति **यद्वेति** । अखिलपदस्य विप्रतिपन्नपरत्वे दृष्टान्ते क्षणिकत्वसाधकस्यासिद्ध्या साध्यवैकल्यपर्यवसानालाभात् तल्लाभायाखिलपदं दृष्टान्तभूतफलादिपरतया व्याचष्टे **अखिलस्यापि फलादेरिति** । अस्मिन्पक्षे साक्षादुक्ताक्षेपपरिहारकत्वं ग्रन्थस्य न सम्भवतीत्यतोऽपेक्षितमाकाङ्क्षाक्रमेण दर्शयन् वाक्यतात्पर्यमाह **एतदुक्तं भवतीति** ॥ **अन्यथेति** । प्रत्यक्षतो दुर्बलस्याप्यनुमानस्य तद्बाधकत्व इत्यर्थः । तर्कमूलभूतव्याप्तिवैकल्यादाभासत्वमाशङ्क्य अविशेषव्याप्तिसद्भावान्न तदित्याशयेनाह **न हीति** । अस्त्वेतदप्यनुमानमितीष्टापत्तिमाशङ्क्याह **तथा चेति** । **अन्यथाऽन्योन्याश्रयेति** । **अन्यथा** अनुमानेनैव प्रत्यक्षबाधे सिद्धे अनुमानप्रामाण्ये तद्विरोधेन प्रत्यक्षस्याप्रामाण्यसिद्धिः । सति च तस्मिंस्तद्विरोधाभावेनानुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयप्रसङ्ग इत्यर्थः । न चैवं सिद्धे प्रत्यक्षप्रामाण्ये तद्विरोधेनानुमानस्याप्रामाण्यं, सति च तस्मिंस्तद्विरोधाभावेन प्रत्यक्षस्य प्रामाण्य-

मित्यन्योन्याश्रयप्रसङ्गात् प्रत्यक्षस्याप्यनुमानबाधकत्वं न स्यादिति वाच्यम् । प्रत्यक्षस्यानुमानापेक्षया प्रबलत्वेन तत्प्रामाण्यस्यानुमानविरोधपरिहारमनपेक्ष्यैव स्थितत्वेन तदनवकाशात् । न हि सिंहः शशशावकाभावमपेक्ष्य वनमवगाहत इति भावः । इतीत्यस्येत्येतदिति पूर्वेण सम्बन्धः ।

**वा०र०—** **दृष्टान्ते क्षणिकत्वेति** । उत्तरत्र तथाच दृष्टान्त इत्यनेन तथैव प्रतिपादनादिति भावः । अन्यथेत्यनूद्य व्याचष्टे **अन्यथेति** । अन्योन्याश्रयमुपपादयति **सिद्ध इति** ।

**वि०ठ०—** एवं परकीयानुमानस्य प्रतिपक्षोक्तिपरतया व्याख्याय बाधोक्तिपरतयाऽपि व्याख्याति **यद्वेति** । ननु न फलादेरखिलस्य परिमाणभेदाभावोऽनुमातुं शक्यः । फलादेः पूर्वोत्तरकालं परिमाणभेदस्य प्रत्यक्षसिद्धत्वेन बाधितविषयत्वादित्याशङ्कां परकीयानुमानस्य बाधितत्वं व्यञ्जयन् परिहरति **एतदुक्तं भवतीति**। **प्रत्यक्षादिबाधं विनेति** । प्रत्यक्षस्यानुमानाबाधकतायास्त्वयोक्तत्वाद्दोषान्तरस्य चाभावात् फलादेः परिमाणभेदा भावसाधकमनुमानं सदनुमानं स्यादिति भावः । **अन्यथा अन्योन्याश्रयतेति** । अन्यथा अनुमानेनैव प्रत्यक्षबाध इत्यङ्गीकारे अनुमानप्रामाण्ये तद्विरोधेन प्रत्यक्षाप्रामाण्यं सति च तस्मिन् तद्विरोधाभावेनानुमानप्रामाण्यमित्यन्यो-न्याश्रयताप्रसङ्ग इति भावः । **समं प्रकृतेऽपीति** । यत्सत् तत्क्षणिकमिति परकीयानुमानेऽपि प्रत्यक्षविरोधेन अप्रामाण्यं सममिति नैतदनुमानं प्रत्यभिज्ञायाः बाधकमिति भावः ।

**॥ इति तत्र एतच्छङ्कानिरासकानुव्याख्यानस्य द्वितीयं विवरणम् ॥**

**॥ इति तत्र एतच्छङ्कानिरासकानुव्याख्यानस्य द्वेधा विवरणम् ॥**

* * *

**॥ अथ च तत्र अनेनानुव्याख्यानेन सप्तमसूत्रस्य व्याख्याततता ॥**

४५ **सु०— एतेन 'आकाशे चाविशेषादि'ति सूत्रं [२-२-७-७(८)] व्याख्यातं भवति।**

**शे०चं०—** उत्सूत्रार्थप्रतिपादकत्वादभाष्यत्वमाशङ्क्य परिहरति **एतेनेति** ।

**॥ इति अनेनानुव्याख्यानेन सप्तमसूत्रस्य व्याख्याततता ॥**

**॥ इति एतच्छङ्कानिरासकानुव्याख्यानस्य टीका ॥**

**॥ इति प्रत्यभिज्ञायाः भ्रान्तित्वे अनुमानबाधकशङ्कानिरासः ॥**

**॥ इति अनुमानबाधकाभावात् प्रत्यभिज्ञायाः भ्रान्तित्वशङ्कानिरासः ॥**

**॥ इति प्रत्यभिज्ञायाः भ्रान्तित्वशङ्का तन्निरासश्च द्वेधा ॥**

**॥ इति सप्तमसूत्रार्थप्रदर्शनम् ॥**

* * *

**।। अथ एतदनुव्याख्यानद्वारकाष्टमसप्तमोभयसूत्रव्याख्याततताप्रदर्शनेन दूषणान्तरस्यापि सूचितता ।।**
**।। अथ तत्र क्षणिकत्वसाधकानुमानस्य सत्प्रतिपक्षत्वं बाधितविषयत्वञ्चेति कथनेन आकाशेऽनैकान्त्यताया अपि सूचना ।।**

४६ **सु०— तदनेन क्षणिकत्व(ता)साधकानुमानस्य सत्प्रतिपक्षत्वं बाधितविषयत्वं च वदताऽऽकाशेऽ(ना)नैकान्त्यमपि सूचितम् ।**

**वं०प०— बाधितेति** । प्रत्यभिज्ञयेत्यर्थः ।।

**श्रीनिधि०— बाधितविषयत्वं च वदतेति** । यद्वेति द्वितीयव्याख्यानानुसारेणेदं द्रष्टव्यम् । **अनैकान्त्यमपि सूचितमिति** । क्षणिकत्वरहितस्यापि सत्त्वहेतुकानुमाने दृष्टान्तत्वकथनेनेत्यर्थः ।

**शे०चं०— तदनेन** इति वदता तेनानेन ग्रन्थेनेति सम्बन्धः ।।

**वा०र०— वदताऽनेनेति** । अत्र सर्वस्य स्वव्यापारे कर्तृत्वविवक्षया वदतेति कर्तृत्वव्यपदेशो युक्त इत्यादिकं मिथ्याशब्दोऽनिर्वचनीयं वदतीत्येतद्व्याख्यानन्यायेनावधेयम् ।

* * *

**।। अथ तत्रादौ अस्या अनैकान्त्यताया उभयपक्षसमानताशङ्का तन्निरासश्च ।।**

४७ **सु०— भवदनुमानस्यापि फलादिनाऽनैकान्त्यमिति चेन्न । तत्रापि क्षणिकताभावस्य वक्ष्यमाणत्वात् (इति) ।**

**परि०— भवदनुमानस्यापि** यत्सत् तदक्षणिकमित्युक्तानुमानस्यापीत्यर्थः ।। **वक्ष्यमाणत्वादिति** । 'अभेदेऽपि विशेषेण देहदीपफलादिषु । विशेषदर्शनं युक्तमि'त्यत्रेति भावः ।

**यादु०— वक्ष्यमाणत्वादिति** । 'अभेदेऽपि विशेषेण देहदीपफलादिषु । विशेषदर्शनं युक्तमि'त्यत्रेति शेषः ।

**वं०प०— भवदनुमानस्यापीति** । अक्षणिकत्वसाधकस्य सत्त्वहेतोरित्यर्थः ।। **क्षणिकताभावस्येति** । क्षणमात्रावस्थायित्वरूपक्षणिकत्वाभावस्येत्यर्थः ।

**श्रीनिधि०— भवदनुमानस्यापीति** । सप्रतिपक्षानुमानस्येत्यर्थः । न तु यद्वेत्याद्युक्तातिप्रसङ्गानुमानस्य । पक्षे व्यभिचारचोदनायोगात् । **वक्ष्यमाणत्वादिति** । 'अभेदेऽपि विशेषेण देहदीपफलादिषु । विशेषदर्शनं युक्तमि'त्यत्रेति भावः ।

**शे०चं०— भवदिति** । अक्षणिकत्वसाधकसत्त्वहेतोरपीत्यर्थः ॥ **वक्ष्यमाणत्वादिति** । 'अभेदेऽपि विशेषेण देहदीपफलादिषु । विशेषदर्शनं युक्तमि'त्यादिनेति शेषः ।

**वि०— भवदनुमानस्यापीति** । यत्सत्तदक्षणिकमित्युक्तानुमानस्य **वक्ष्यमाणत्वादिति** । 'अभेदेऽपि विशेषेण देहदीपफलादिषु । विशेषदर्शनं युक्त'मित्यत्रेत्यर्थः ।

**॥ इति अस्या अनैकान्त्यताया उभयपक्षसमानताशङ्का तन्निरासश्च ॥**

* * *

**॥ अथ क्षणिकत्वसाधकानुमाने सत्प्रतिपक्षत्वादेः परिहारप्रयत्नस्तन्निरासश्च ॥**
**॥ अथ तत्राप्यादौ आकाशस्य मूर्ताभावत्वप्रयुक्ता सत्त्वाभावशङ्का तन्निरासश्च ॥**

४८ **सु०— 'भवेदिदं यद्याकाशस्य सत्त्वं स्यात्, न चैतदस्ति, मूर्ताभावत्वादाकाशस्य । भावत्वं हि सत्त्वमत्र विवक्षितम् । सस्वरूपत्वेऽपि वा सत्त्वे, अभावो निःस्वरूप इत्यङ्गीकृतमि'त्याशङ्क्याह यदीति ।**

## अनु०— यद्याकाशस्य सत्त्वं न कुत एव नरादिषु ।

**यद्याकाशस्य सत्त्वं न** अस्तीत्यङ्गीकृत्य प्रत्यनुमानेऽतिप्रसङ्गानुमाने च दृष्टान्तस्य साधनवैकल्यं, स्वानुमानस्यानैकान्तिकत्वाभावश्चोच्यते; तदा देहादिषु **सत्त्वं कुत एव** सिद्धमिति ब्रूमः । तथा च परकीयस्यापि दृष्टान्तस्य साधनवैकल्यं स्यात् ।

यदि च विधिमुखप्रत्ययवेद्यत्वात् देहादीनां भावत्वं, प्रमाविषयत्वात् सत्त्वं चोच्यते; तदा आकाशेऽपि समानमिति ।

**परि०— प्रत्यनुमान इति** । यत्सत्तदक्षणिकमिति प्रत्यनुमाने फलादिकं परिमाणभेदरहितमित्युक्तातिप्रसङ्गानुमाने चेत्यर्थः ॥ **स्वानुमानस्येति** । यत्सत्तत्क्षणिकमिति सौगतानुमानस्येत्यर्थः ॥ **परकीयस्यापीति** । सौगतोक्तस्यापि देहदीपफलादेरित्यर्थः । **सत्त्वं चोच्यत** इत्यत्र सत्त्वं नाम सस्वरूपत्वं ज्ञेयम् ।

**यादु०— प्रमाविषयत्वात्सत्त्वमिति** । सस्वरूपत्वरूपं सत्त्वमित्यर्थः ।

**वं०प०— अभावो निस्स्वरूप इतीति** । प्रमित्यविषय इत्यर्थः । तथा च अभावरूपे अत एव निस्स्वरूपे आकाशे सस्वरूपत्वरूपं सत्त्वं नास्तीति भावः ।

**कं०रा०— प्रत्यनुमान इति** । यत् सत् तदक्षणिकं यथाकाशं सच्च नीलादीत्यनुमान इत्यर्थः । **स्वानुमानस्येति** । क्षणिकत्वसाधकसत्त्वानुमानस्येत्यर्थः । **देहादिष्विति** । आदिपदेन दीपादेर्ग्रहणम् । देहादिषु सत्त्वासिद्धौ किमित्यत आह **तथा चेति** । देहादिषु सत्त्वासिद्धौ क्षणिकत्वानुमाने परोक्तस्य देहदीपादिरूप-दृष्टान्तस्य साधनवैकल्यं स्यादित्यर्थः । **सत्त्वं चेति** । सस्वरूपत्वं चेत्यर्थः ।

**श्रीनिधि०— स्वस्वरूपत्वेऽपि वा सत्त्वे इति** । सस्वरूपत्वमिति विवक्षायामपीत्यर्थः ।

**शे०चं०— इदमिति** । सत्प्रतिपक्षत्वादिकमित्यर्थः । अस्तु मूर्ताभावत्वमाकाशस्य, तथापि सस्वरू-पत्वरूपसत्त्वस्य तत्र सत्त्वात् कथं तन्निषेध इत्यतो भवेदेवं यदि सस्वरूपत्वं सत्त्वं स्यान्न चैवं किन्तु भावत्व-मेव । न चैतत्तस्य सम्भवतीति युक्तस्तन्निषेध इत्याह **भावत्वमिति** । अत्र क्षणिकत्वसाधन इत्यर्थः । अङ्गीकृत्य च सस्वरूपत्वमभावस्येदमुक्तम् । वस्तुतस्तु तस्य निःस्वरूपत्वेनाङ्गीकृतत्वान्न सस्वरूपत्वमपीति युक्तस्तन्निषेधोऽपीत्याह **सस्वरूपत्वेऽपि वेति** ॥ **प्रमाविषयत्वादिति** । निःस्वरूपे प्रमाणप्रवृत्त्यनुपपत्तेः तद्विषयत्वेन सस्वरूपत्वसिद्धिरिति भावः ।

**वा०र०— सत्प्रतिपक्षत्वादिकमित्यर्थ इति** । आदिनाऽतिप्रसङ्गानुमानस्य परानुमाने आकाशे अनैकान्त्यस्य च सङ्ग्रहः । **सस्वरूपत्वेऽपि वेतीति** । सत्त्वे सस्वरूपत्वरूपे वाङ्गीकृतेऽपीत्यर्थः । सामा-नाधिकरण्येनाभेदप्राप्तेः ।

**विठ्ठ०— प्रत्यनुमानेऽतिप्रसङ्गानुमाने चेति** । यत्सत्तदक्षणिकं यथाकाशमिति प्रत्यनुमाने फलादिकं परिमाणभेदरहितं सत्त्वादाकाशवदित्यतिप्रसङ्गानुमाने चेत्यर्थः । **स्वानुमानस्येति** । यत्सत्तत्क्षणिकं यथा देहा-दीति क्षणिकतासाधकस्वानुमानस्याकाशेऽनैकान्तिकत्वाभाव इत्यर्थः । **प्रमाविषयत्वात्सत्त्वमिति** । सस्वरूप-त्वरूपं सत्त्वमित्यर्थः ।

**॥ इति आकाशस्य मूर्ताभावत्वप्रयुक्ता सत्त्वाभावशङ्का तन्निरासश्च ॥**

* * *

॥ अथ तत्र प्रकारान्तरेण आकाशस्य अभावत्वनिवारणम् ॥

॥ अथ तत्रादौ अभावस्य सधर्मिप्रतियोगित्वमेव नियामकम् इति प्रदर्शनम् ॥

४९ **सु०**— प्रमाणान्तरेणाकाशस्याभावत्वं वारयितुमुपोद्घातमाह **सधर्मीति** ।

## अनु०— सधर्मिप्रतियोगित्वमभावस्य नियामकम् ।

यत्राभावः स धर्मी, यस्याभावः स प्रतियोगी, तदुभयवत्त्वम् **अभावस्य नियामकं** व्यापकम् । योऽभावः स सर्वोऽपि धर्मिप्रतियोगिसहित एव; यथा घटाद्यभावः, स हि भूतलादिधर्मिणा घटादिप्रतियोगिना चोपेत एवेति ।

**श्रीनिधि०**— **प्रमाणान्तरेणेत्यादि** । आकाशस्याभावत्त्वं प्रमाणान्तरेण वारयितुमिति सम्बन्धः । **उपोद्घातमाहेति** । अभावत्वस्य व्यापकराहित्येन व्याप्यस्य तस्यापि राहित्यमित्यनुमानं वक्तुं उपयुक्तं तद्व्यापकं निर्धारयतीत्यर्थः ।

**शे०चं०**— **प्रमाणान्तरेणेति** । आकाशो नाभावः, धर्मिप्रतियोगिनौ विना प्रतीयमानत्वाद्रूपादिवदित्यनुमानेनेत्यर्थः ॥ **वारयितुमिति** । 'अधर्मिप्रतियोगित्वमाकाशस्यावगम्यत' इत्यादिनेति शेषः । तर्ह्यस्य ग्रन्थस्य तद्ग्रन्थानन्तर्येणैव भाव्यं, तत्कथं पूर्वत्वमित्यत उपोद्घातसङ्गत्या तदुपपत्तिरिति भावेनोक्तम् **उपोद्घातमिति** । ननु धर्मिप्रतियोगिनोः को भेदो येन पृथगुपादानम् । किञ्चेदं धर्मिप्रतियोगिनोरभावनियामकत्वमित्यतो धर्मिप्रतियोगिनोर्भेदं दर्शयन्नेव नियामकत्वं व्याख्याति **यत्रेत्यादिना** । मूले अभावपदं भावप्रधानमित्यभिप्रेत्योक्तं व्याप्यव्यापकभावमेव स्फोरयति **योऽभाव इति** ।

**वा०र०**— **प्रमाणान्तरेणेतीति** प्रतिकोपादानं मूलानुसारि । मूलकोशे चास्ति । धर्मिप्रतियोगिमत्त्वस्याभावत्वव्यापकत्वं विना योऽभाव इत्यादि व्याप्तेरलाभाभिप्रायेण भावप्रधानमित्यभिप्रेत्येत्युक्तम् ।

॥ इति अभावस्य सधर्मिप्रतियोगित्वमेव नियामकम् इति प्रदर्शनम् ॥

* * *

॥ अथ च तत्र अभावस्य धर्मिप्रतियोगिसाहित्यव्याप्तत्वोपपादनम् ॥

५० **सु०**— 'नन्विदमनुपपन्नम् । अभावस्य हि धर्मिप्रतियोगिसाहित्यनियमः किं देशतः स्यात्, किंवा कालतः । आद्ये धर्मिणा सादेश्यं तावन्नास्ति; भूतलस्य स्वाश्रये, अभावस्य

तु भूतले वृत्तेः । प्रतियोगिना तु विरुद्धमेव । द्वितीयस्तु यद्यपि धर्मिणा कथञ्चित्स्यात्, तथाऽपि प्रतियोगिना नास्त्येव; प्रागभावप्रध्वंसाभावयोः प्रतियोगिभिन्नकालत्वनियमात्' इत्याशङ्कां परिहरन्नभावस्य धर्मिप्रतियोगिसाहित्यव्याप्तत्वमुपपादयति **तौ विनेति** ।

## अनु०— तौ विना न ह्यभावश्च क्वचिद्दृष्टः कदाचन ।

**अत्र दृष्ट इति प्रकरणात्, तौ विनेति** तज्ज्ञानं विनेत्यर्थः । **चशब्दोऽभावो दृश्यमानो धर्मिप्रतियोगिप्रतीतावेव दृश्यत इत्यन्वयसमुच्चयार्थः । हिशब्देनान्वयव्यतिरेकयोः प्रसिद्धत्वं सूचयति । तदनेनान्वयव्यतिरेकाभ्यामभावप्रतीतेः धर्मिप्रतियोगिप्रतीतिपूर्वकतया व्याप्तिरुपपादिता भवति ।**

**यद्वा तौ इत्यनेन न ज्ञानमुपलक्षणीयम् । "अभावः प्रतीयमानो धर्मिप्रतियोगिघटित एव 'अत्रेदं नास्ती'त्यादिरूपेण प्रतीयते, न तु 'तौ विना केवलः' " इत्यन्वयव्यतिरेकाभ्यामेकज्ञानसम्बन्धेन व्याप्यव्यापकभावोपपादनमेतदित्यवगन्तव्यम् ॥ प्रातर्गजाद्यभावज्ञानं तु अन्यथोपपादयिष्यामः ।**

**परि०— धर्मिणा कथञ्चिदिति** । अनित्यधर्मिकाभावे (प्रलये घटाद्यभावे सत्यपि भूतलादिरूपानित्यधर्म्यभावात् कथं) कालतोऽपि न सम्भवतीत्यतः कथञ्चिदित्युक्तमित्येके । प्रतियोगिसत्त्वकाले यदा धर्मी तदानीमभाव इति व्याप्त्यसम्भ(वात्कथं)व इति कथञ्चिदित्युक्तमित्यन्ये ॥ **एकेति** । एकज्ञानविषयत्वसम्बन्धेनेत्यर्थः । ननु प्रातर्गजाद्यभावज्ञानस्थले धर्मिणोऽसन्निकृष्टत्वेन अत्रेदं नासीदित्येवं ज्ञानायोगेन न तत्रैकज्ञानसम्बन्ध इत्यत आह **प्रातरिति** । 'अर्थापत्त्युपमाऽभावा अनुमान्तर्गता' इति भक्तिपादीयानुव्याख्यानव्याख्यावसरे स्मरणाभावलिङ्गरूपानुमानेनेत्युपपादयिष्याम इत्यर्थः ।

**गु०दी०— प्रातर्गजाद्यभावज्ञानं तु** इत्यत्र प्रत्येतव्यस्य प्रातःकालीनगजाद्यभावस्येदानीमभावान्न प्रतियोगिघटिताभावप्रत्यक्षमिदानीं शक्यम् । तदा अभावसद्भावेऽपि प्रतियोगिज्ञानाभावान्न प्रतियोगिघटिताभावप्रत्यक्षत्वमित्युभयथापि प्रतियोगिघटिताभावप्रत्यक्षत्वासम्भव इति चोद्यस्यानुमानिकत्वेन परिहारोऽभिधीयत इति भावः ।

**यादु०— धर्मिणा कथञ्चिदिति** । अत्र नित्यधर्मिकेष्वभावेषु कालतो धर्मिसाहित्यनियमसत्त्वेऽपि कादाचित्कवस्तुधर्मिकेषु तेषु स न सम्भवतीत्यभिप्रेत्य कथञ्चिदित्युक्तमिति ज्ञातव्यम् ॥ **एकज्ञानसम्बन्धेन इति** । वैज्ञानिकसम्बन्धेनेत्यर्थः । तथा च अत्र व्याप्तिशरीरप्रविष्टः सम्बन्धो न देशिको नापि कालिकः, किन्तु वैज्ञानिक इति भावः । नन्विदमनुपपन्नम्, प्रातश्चत्वरादौ प्रतियोगिस्मरणाभावेन गजाद्यभावमनुभूय देशान्तरं गतो गजस्मृतिमान् प्रातश्चत्वरे गजो नासीदिति यदाऽभावं प्रतिपद्यते तदा तत्र व्यवहितस्य चत्वरादेर्धर्मिण इन्द्रिया-सन्निकृष्टतया भानासम्भवात् । न च तदा धर्मिणि ज्ञानमेव सन्निकर्षः । अभावलौकिकप्रत्यक्षेऽभाव इव धर्मि-ण्यपि लौकिकसन्निकर्षस्यैवावश्यकत्वात् । अन्यथाऽभावे अपीन्द्रियसम्बद्धविशेषणताया वक्तुमशक्यत्वेन तत्र अभावप्रत्यक्षस्यैव असम्भवादित्यत आह **प्रातर्गजाद्यभावज्ञानमिति** । **अन्यथा** अनुभवाभावलिङ्गकानुमानेन । तथा च तत्राभावानुमितौ प्रतियोगिवद्धर्मिणोऽप्युपनीतस्य भाने न काप्यनुपपत्तिरिति भावः । अनुभवाभावोऽपि स्मरणाभावेनानुमेयः । स्मरणाभावश्च साक्षिवेद्योऽतो स्मरणाभावश्च नानवस्थेत्युपपादनमभिप्रेत्योक्तम् **उपपाद-यिष्याम इति** । भक्तिपाद इति शेषः ।

**वं०प०—** यत्राभावस्तत्र धर्मीति देशतो व्याप्तिर्नेत्याह **भूतलस्येति** । यत्राभावस्तत्र प्रतियोगीत्यपि न व्याप्तिरित्याह **प्रतियोगिनेति** । यद्यपि ध्वंसप्रागभावयोः प्रतियोगिसमवायदेशे सत्त्वेन प्रतियोगिना देशतः सादेश्यमस्ति, तथाऽप्यत्यन्ताभावविवक्षयेदमिति द्रष्टव्यम् । तथा यदाऽभावस्तदा धर्मीति कालतो व्याप्तिरपि अतीतधर्मिकतया यदाऽभावो ज्ञायते तदा नास्ति । अथापि कथञ्चिद्वर्तमानधर्मिस्थले अस्त्येवायं नियमोऽथापि यदाऽभावस्तदा प्रतियोगीति नियमः कालिको न सम्भवत्येवेत्याह **द्वितीया त्वित्यादिना** ॥ **एकज्ञानेति** । अत्रेदं नास्तीति धर्मिप्रतियोग्यभावानां युगपज्ज्ञानविषयत्वेन प्रतीयमानत्वात् स एव सम्बन्ध इत्यर्थः ।

**कं०रा०—** नन्वभावज्ञाने धर्मिप्रतियोगिज्ञानस्यैव कारणत्वात् तज्ज्ञानं विना न ह्यभावः क्वचिद्दृष्ट इति वक्तव्ये 'तौ विना नह्यभावश्च क्वचिद्दृष्ट' इति व्यतिरेककथनमयुक्तमित्यतो व्याचष्टे **अत्रेति** । 'तौ विना न हि अभावश्च क्वचिद्दृष्ट' इत्यत्र दृष्ट इति दर्शनस्य प्रकृतत्वात् तौ विनेत्यस्य धर्मिप्रतियोगिज्ञानं विनेत्यर्थो लभ्यते। तथाच धर्मिप्रतियोगिज्ञानं विना न ह्यभावः क्वचिद्दृष्ट इति व्यतिरेककथनं युक्तमेवेति भावः । तौ विना न ह्यभावः क्वचिद्दृष्ट इत्येतावन्मात्रेणैव धर्मिप्रतियोगिज्ञानाभावे अभावज्ञानाभाव इति व्यतिरेकस्योक्तत्वान्न ह्यभावश्च क्वचिद्दृष्ट इति चशब्दो व्यर्थ इत्यत आह **चशब्द इति** । अभावो दृश्यमानो धर्मिप्रतियोगिप्रतीतावेव दृश्यत इत्यन्वयस्य समुच्चयार्थः चशब्द इत्यर्थः । नन्वभावस्य धर्मिघटितत्वेन प्रतीतिनियमाङ्गीकारे यत्र प्रातश्चत्वरादौ प्रतियोगि-स्मरणाभावेन गजाद्यभावमननुभूय देशान्तरं गतो गजस्मृतिमान् गजाभावं प्रतिपद्यते तत्र गजाभावज्ञानं न स्यात् धर्मिणश्चत्वरादेरसन्निकृष्टत्वेन तद्घटितत्वेनाभावप्रत्ययायोगादित्यत आह **प्रातरिति** । प्रातर्गजाद्यभावज्ञानं न प्रत्यक्षरूपं किन्तु साक्षिग्राह्यगजस्मरणाभावानुमेयगजानुपलब्धिलिङ्गकमेवेति तृतीयाध्यायस्य द्वितीयपादे उपपाद-यिष्यामः । तथा च स्मृते चत्वरादौ तच्चत्वरादिकं प्रातर्गजाभाववत् तत्र गजवत्तयानुपलब्धत्वादित्यानुमानिक-ज्ञानस्य धर्मीन्द्रियसन्निकर्षापेक्षां विनैव धर्मिघटितत्वेनाभावावगाहित्वोपपत्तेर्न कश्चिद्दोष इति भावः ।

**श्रीनिधि०— धर्मिणा कथञ्चिदिति** । नियमाभावात् कथञ्चिदित्युक्तम् । तथा हि कपालनाशेऽपि प्रध्वंसोऽनुवर्तते । तस्य नित्यत्वात् । कपालात् पूर्वमपि प्रागभावः । तस्य अनादित्वात् । कपालस्य सादित्वात् । तथा अत्यन्ताभावेऽपि । तन्तुनिष्ठस्य घटात्यन्तभावस्य तन्तुनाशेऽप्यनुवृत्तेरिति । **प्रागभावप्रध्वंसभावयोः प्रतियोगिभिन्नकालत्वनियमादिति** । अत्र **प्रतियोगिभिन्नकालत्वं** नाम प्रतियोगिकालभिन्नकालत्वम् । न चात्यन्ताभावे प्रतियोगिनः कालसम्बन्धोऽस्तीति स न गृहीतः । **दृष्ट इति प्रकरणादिति** । प्रकृतत्वादित्यर्थः । **तौ विनेति** । व्यतिरेकोपपादनेन कारणत्वमुच्यते । न हि स्वरूपसतोस्तयोरभावप्रतीतौ हेतुता अस्तीति भावः । **यद्वेति** । **तौ विना** इत्यनेन न व्यतिरेक उपपाद्यते । किन्नाम भावप्रतीतौ तयोरयोगो व्यवच्छिद्यत इत्याशयानुसारेणायं पक्षः प्रवृत्त इति ज्ञेयम् । ननु पक्षद्वयमप्यनुपपन्नम् । प्रातर्गजाद्यभावानुभवे धर्मिप्रतियोगिज्ञानपूर्वकत्वस्य तद्घटितत्वस्य चाभावेन व्यभिचारात् । तथाहि कश्चिद्राजमन्दिरं प्रति प्रातर्गतः । तत्र गजोल्लेखरहित एव स्वगृहमागतः । तं प्रति कश्चित्पृच्छति । किमासीत् राजमन्दिरे । गज इति । इदं ज्ञानं न तावत् प्रत्यक्षम् । व्यवहितत्वेनायोग्यत्वादन्यथा काशीस्थं पदार्थविशेषाभावोऽस्माकं माधुराणां प्रत्यक्षः स्यात् । तस्मात् स्मृतिरित्येव वक्तव्यम् । स्मृतिश्चानुभवसाध्या । तथा च प्रातःकालीनगजाभावानुभवसिद्धा । नच तदा गजोल्लेखोऽस्तीति । तत्राह **प्रातर्गजाद्यभावज्ञानं त्विति । अन्यथोपपादयिष्याम इति** । नेदं ज्ञानं स्मृतिरूपं येन पूर्वानुभवाक्षेपेण उक्तिनियमस्य तत्र व्यभिचारः स्यात् । किन्नामानुमितिरूपमेवेदं ज्ञानम् । तथाहि । प्रातःकालीनं राजमन्दिरं गजाभाववत् । योग्यत्वे सति तदानीं मया तद्वत्त्वेनानुपलभ्यमानत्वात् । न च अनुपलब्धिरसिद्धा । स्मरणाभावेन तत्सिद्धेरिति । 'अर्थापत्त्युपमा भावा अनुमान्तर्गता क्वचित् । प्रत्यक्षान्तर्गतो भाव' इत्यस्य व्याख्यानावसरे **अन्यथा** स्मृतिरूपत्वाभावेऽप्यनुमानेनोपपादयिष्याम इत्यर्थः ।

**शे०चं०— देशत इति** । यत्राभावस्तत्र धर्मिप्रतियोगिनाविति देशत इत्यर्थः ॥ **कालत इति** । यदाऽभावस्तदा धर्मिप्रतियोगिनाविति कालत इत्यर्थः ॥ **प्रतियोगिना तु विरोधमेवेति** । न च प्रागभावप्रध्वंसयोः प्रतियोगिसमवायदेशवृत्तित्वात् कथं सादेश्याभाव इति वाच्यम् । तयोरपि प्रतियोगिसमानदेशत्वस्याविरुद्धत्वेनासत्त्वात् । न च कालभेदेनाविरोधः । तथा सति तत्कालावच्छिन्नस्यैवाधिकरणत्वप्राप्त्या भिन्नाधिकरणत्व एव पर्यवसानात् । यद्वाऽत्यन्ताभावस्य प्रतियोगिसमानदेशतायाः स्वरीत्याऽभावाभिप्रायेणैतदुक्तमिति ध्येयम् ॥ **धर्मिणा कथञ्चिदिति** । नित्यधर्मिकेष्वभावेषु कालतो धर्मिसाहित्यनियमसत्त्वेऽपि कादाचित्कवस्तुधर्मिकेषु तेषु तस्यासत्त्वाभिप्रायेण कथञ्चिदित्युक्तमिति ज्ञातव्यम् ॥ **एकज्ञानसम्बन्धेनेति** । वैज्ञानिकसम्बन्धेनेत्यर्थः । अत्र व्याप्तिशरीरे प्रविष्टः सम्बन्धो न दैशिको नापि कालिकः किन्तु वैज्ञानिक एवेति भावः । ननु च प्रातश्चत्वरादौ प्रतियोगिस्मरणाभावेन गजाद्यभावमनुभूयैव देशान्तरं गतो गजस्मृतिमान् प्रातश्चत्वरे गजो नासीदिति गजाभावं प्रतिपद्यत इति तावदविवादम् । तादृशाभावप्रतीतिश्च तदनुभवस्तत्स्मरणं वा स्यात् तृतीयप्रकाराभावात् । तत्राप्यनुभवत्वपक्षे लिङ्गशब्दयोरनवकाशात् । प्रत्यक्षेणैवायमभावानुभवो वाच्यः । ततश्च तादृशाभावप्रत्यक्षे अभावप्रतीतिः धर्मिप्रतीतिपूर्विकेति धर्मिप्रतियोगिघटिताऽभावप्रतीतिरिति च व्याप्तिद्वयस्य

व्यभिचारः । तत्र धर्मिणो विप्रकर्षात् तत्प्रत्यक्षस्यासम्भवेन तत्पूर्वकत्वस्य वा तद्घटिताभावविषयकत्वस्य वाऽभावात् । न च तदा धर्मिणो ज्ञानमेव सन्निकर्ष इति नानुपपत्तिरिति वाच्यम् । अभावलौकिकप्रत्यक्षेऽभावांश इव धर्मिण्यंशेऽपि लौकिकस्यैव सन्निकर्षस्यापेक्षितत्वात् । अन्यथाऽभावेऽपीन्द्रियसम्बन्धविशेषणताया वक्तुमशक्यत्वेन तत्राभावप्रत्यक्षस्यैवासम्भवात् । तथा प्रातश्चत्वरे गजो नासीदित्यस्य स्मरणरूपत्वेऽपि स्मरणस्यानुभवपूर्वकत्वेन स्मरणहेत्वनुभवेऽपि प्रतियोगिस्मरणस्य पूर्वमभावेन तत्पूर्वकत्वस्योपनायकाभावेन तद्घटिताभावविषयकत्वस्यासम्भवेन प्रतियोगिप्रतीतावेव प्रतीयत इति प्रतियोगिघटितं एव प्रतीयत इति च व्याप्तेस्तत्र व्यभिचार एवेति तत्कथमेतद्व्याप्तिद्वयं सङ्गच्छत इत्यतोऽभावविषयकप्रत्यक्षज्ञान एवायं नियमो न तु तज्ज्ञानमात्रे । प्रातश्चत्वरे गजो नासीदिति ज्ञानं च न प्रत्यक्षं किन्त्वानुमानिकमेवेति न तत्र व्यभिचारो दोषायेत्याशयेनाह **प्रातर्गजाद्यभावज्ञानं त्विति** ॥ **अन्यथेति** । अनुपलब्धिलिङ्गकानुमानेनैवेदमभावज्ञानम् । न च लिङ्गासिद्धिर्दोषः । स्मरणाभावे लिङ्गेनैव तत्सिद्ध्युपपत्तेः । अत एव तत्र क्षणं ध्यात्वा नासीच्चत्वरे गज इति प्रतिपद्यते । न चैवं स्मरणाभावोऽप्यनुपलब्ध्यन्तरानुमेय इत्यनवस्थाप्रसङ्ग इति वाच्यम् । साक्षिग्राह्याणां बुद्धिसुखादीनामभावस्य नियमेन साक्षिप्रत्यक्षवेद्यत्वेनानुपलब्ध्यन्तरानुमेयत्वाभावेन तदनवकाशात् । अभावानुमितौ च प्रतियोगिवद्धर्मिणोऽप्युपनीतस्य भानमुपपद्यत एवेत्येवं भक्तिपादे 'अन्यत्र झडिति प्राप्त' इत्येतद्वाक्यव्याख्यानावसरे उपपादयिष्याम इत्यर्थः ।

**वा०र०**— धर्मिप्रतियोगिप्रतीतिपूर्विकेति पाठः । एतद्घटिताभावविषयकत्वस्य चासम्भवेनेति पाठः । **वैज्ञानिकेति** । ननु च प्रातश्चत्वरादावित्यादिग्रन्थः तृतीयस्य भक्तिपादे ध्येय इति स्पष्टम् ।

**स०व्र०**— **प्रतियोगिना तु विरुद्धमेवेति** । न च प्रागभावध्वंसयोः प्रतियोगिसमवायिदेश एव वर्तमानत्वस्य परैरङ्गीकारात् । तन्मते समानदेशत्वस्य सत्त्वात् मतान्तरेऽपि प्रतियोग्यधिकरणे तद्वृत्त्यभ्युपगमात् प्रागभावप्रध्वंसयोः प्रतियोगिसमानदेशत्वात् कथं तत्सादेश्यस्य विरुद्धत्वोक्तिरिति वाच्यम् । विरुद्धयोः समानदेशत्वानुपपत्त्या पराङ्गीकारस्याप्रामाणिकत्वात् । न च प्रागभावादेः कालभेदेन समानदेशत्वसम्भवान्न विरोध इति वाच्यम् । कालभेदेन विरोधपरिहाराभ्युपगमे तत्तत्कालावच्छिन्नस्यैव प्रागभावादेर्भिन्नभिन्नाधिकरणत्व एव पर्यवसानेन अस्मदभिमतसिद्धेरिति भावः । केचित्तु प्रागभावादेः समानदेशत्वेऽपि नात्यन्ताभावस्य स्वमते तदिति तन्मात्राभिप्रायकमेवाभावपदमत्रेत्यदोष इत्याहुः । ननु च राजमन्दिरं प्रति गतः प्रतियोगिस्मरणाभावात् तत्रत्यगजाभावमननुभूयैव देशान्तरं प्रति गतो गजरूपप्रतियोगिस्मृतिमान् प्रातश्चत्वरे गजो नासीदिति यदा प्रतिपद्यते, तदा तादृशगजाभावप्रतिपत्तेश्च प्रतिपत्तित्वादेवानुभवत्वं वा स्मृतित्वं वाच्यम्, तद्व्यतिरेकेणान्यप्रतीतेरभावात् । तथा च गजाभावप्रतिपत्तिर्यद्यनुभवस्तर्हि आनुभाविकानुमानादेरभावात् प्रात्यक्षिक एवायं गजाभावानुभव इति वाच्यम् । तथा च तादृशाभावप्रत्यक्षानुभवे अभावः प्रतीयमानो धर्म्यप्रतीतावेव प्रतीयत इति, अभावः प्रतीयमानः धर्मिघटित एव अत्रेदं नास्तीत्यादिरूपेण प्रतीयत इति च भवदभिमतव्याप्तेर्व्यभिचारः । अभावप्रत्यक्षे धर्मिप्रत्यक्षस्यैव कारणत्वेन वाच्यत्वात् । तत्र धर्मिणो विप्रकर्षेण तत्प्रत्यक्षासम्भवात् तत्पूर्वकत्वस्य तद्घटित-

त्वस्य वा अभावप्रत्यक्षे अभावात् । यदि स्मरणत्वं मन्यसे, तदाऽपि दृश्यमानोऽभावः प्रतियोगिप्रतीतावेव प्रतीयते, तद्घटिततया वा प्रतीयत इति भवदभिमतोक्तव्याप्तिद्वयस्य उक्तस्मरणहेतुगजाभावज्ञाने व्यभिचारः । स्मरणहेतुगजानुभवाभावात् पूर्वं गजस्मरणाभावात् तादृशप्रतियोगिप्रतीतिपूर्वकत्वस्य वक्तुमशक्यत्वादुपनायकाभावादेव तद्घटिततया वा प्रतीतेरसम्भवात् । तथा चोक्तव्याप्तेर्व्यभिचार इत्यतः अभावप्रत्यक्ष एवायं नियमो न तु तज्ज्ञानमात्रे । गजाभावज्ञानं तु स्मरणयोग्यस्य स्मरणलिङ्गजन्यमेवेति न तत्रोक्तदोष इत्याह **प्रातरिति** । ननु चाभावज्ञानस्य धर्मिप्रतियोगिप्रतीतिसापेक्षत्वकथनमनुपपन्नम् । प्रातरत्र गजो नाभूदिति गजाभावज्ञानकाले, प्रतियोगिज्ञाने विद्यमानेऽपि, अधिकरणीभूतस्य चत्वरादेः प्रतियोग्यधिकरणत्वेन, तदभावानधिकरणत्वेन अभावधर्मिज्ञानस्य तत्राभावेन, तत्पूर्वकत्वासम्भवादित्यतोऽभावप्रत्यक्ष एवायं नियमः । गजाद्यभावज्ञानं तु स्मरणयोग्यस्य स्मरणादिलिङ्गजन्यमेवेति न तत्रोक्तदोष इत्याह **प्रातर्गजाद्यभावज्ञानमिति** ।

**स०ना०**— 'सधर्मिप्रतियोगित्वमिति' मूलसुधायां **यद्यपि धर्मिणा कथञ्चित्स्यादिति** । प्रागभावप्रध्वंसाभावात्यन्ताभावानां धर्मिणा समानकालीनत्वं न विरुद्धमित्यविनाभावः सम्भावितः । न तु अविनाभावोऽस्ति । प्रागभावप्रध्वंसाभावयोर्व्यभिचारात् । समवायिकारणनाशात् कार्यनाशस्थले धर्मिसहभावाभावादिति भावः । तदिदमुक्तं **कथञ्चिदिति** । 'तौ विना न ह्यभावश्चेति' मूलसुधायां प्रातरत्र गजो नाभूदिति ज्ञानं न तावत् प्रत्यक्षजन्यम् । ज्ञानकाले तत्राभावाभावेन सन्निकर्षायोगात् । नाप्यनुमानजं लिङ्गाभावात् । नापि शब्दजम् । तदभावात् । नापि स्मृतिरूपं प्रागननुभूतविषयत्वात् । अतः परिशेषात् अकामेनापि अभावप्रमाणजं तद्विज्ञानमङ्गीकार्यम् । न च अभावः प्रमाणस्य भावो विषयः । तथा चाभावः प्रतीयमानः धर्मिप्रतियोगिघटित एव प्रतीयत इत्ययुक्तमित्यत आह **प्रातर्गजाद्यभावज्ञानमिति** । अनुमानजन्यं तज्ज्ञानं नाभावप्रमाणजमिति व्युत्पादयिष्याम इत्यर्थः ।

**वि०ठ०— प्रतियोगिना तु विरुद्धमेवेति** । अत्यन्ताभावे स्पष्टमिदमिति तद्विवक्षयैवेदं न तु प्रागभावापेक्षतया तत्र सादेश्यसद्भावेन विरोधाभावात् । एके तु प्रागभावादावपि स्वसद्भावदशायां प्रतियोगिनो अभावात् प्रतियोगिसद्भावे अभावायोगात् । कालभेदेन सादेश्यस्य प्रकृतानुपयोगादिति भाव इत्याहुः । **धर्मिणा कथञ्चिदिति** । अत्राकाशादिनित्यधर्मिकेषु रूपाद्यभावेषु कालतो धर्मिसाहित्यनियमस्य सत्त्वेऽप्यनित्यधर्मिकाभावेषु न कालतो नियमः सम्भवीत्यभिप्रेत्य कथञ्चिदित्युक्तमिति ज्ञेयम् । **प्रागभावप्रध्वंसाभावयोरिति** । अत्यन्ताभावे प्रतियोगिनो असत्त्वेन कालसम्बन्धस्यैवाभावान्न भिन्नकालीनत्वं निरूपयितुं शक्यमिति प्रागभावप्रध्वंसयोरेव ग्रहणमित्यभिधेयम् । न हि वयमभावस्य धर्मिप्रतियोगिसाहित्यनियमं ब्रूमः येन देशादितस्तदभावोपपादनं सङ्गच्छेत । किं नामाभावप्रतीतौ धर्मिप्रतियोगिप्रतीतिपूर्वकतानियममेव । स च सदा सर्वत्रास्तीति नोक्तदोष इत्याह **तदनेनेति** । **एकज्ञानसम्बन्धेनेति** । अभावः प्रतीयमानो धर्मिप्रतियोगिभ्यां सहैवैकस्मिन् ज्ञाने प्रतीयत इत्यस्यान्वयव्यतिरेकाभ्यामवगतत्वात् वैज्ञानिकसम्बन्धेनाभावस्य धर्मिप्रतियोगिप्रतीत्यै व्याप्यव्यापकभावोपपादनं मूले क्रियत इत्यवगन्तव्यमित्यर्थः । तथाच अत्र व्याप्तिशरीरप्रविष्टः सम्बन्धो न

दैशिकः नापि कालिकः येनोक्तदोषः किं नाम वैज्ञानिक एवेति भावः । नन्वभावः प्रतीयमानो धर्मप्रतियोगिसाहित्येनैव प्रतीयत इत्यनुपपन्नम् । राजमन्दिरादौ प्रातः प्रतियोगिस्मरणाभावेन गजाद्यभावमननभूतोऽन्यत्र गतो गजस्मृतिमान् प्रातः तत्र गजो नासीदिति प्रत्येति । न च तदा राजमन्दिररूपो अभावधर्मी प्रतीतः । इन्द्रियसन्निकर्षाद्यभावात् । गजस्य वा गजाभावस्य वा प्रातरननुभूतत्वेन अभावधर्मितया तत्स्मरणस्य वाऽसम्भवात् । अतोऽभावप्रतीतेर्धर्म्यादिप्रतीतिसाहित्येन प्रतीत्यभावात् व्याप्तेर्व्यभिचार इत्यत आह **प्रातर्गजादीति** । **अन्यथोपपादयिष्याम इति** । स्मरणयोग्यत्वे सत्यस्मर्यमाणरूपलिङ्गेन धर्म्यादिसाहित्येनाभावप्रतीतिरिति भक्तिपादे उपपादयिष्याम इत्यर्थः ।

**॥ इति अभावस्य धर्मिप्रतियोगिसाहित्यव्याप्तत्वोपपादनम् ॥**

* * *

**॥ अथ च तत्रान्ते आकाशस्य अधर्मिप्रतियोगित्वात् अभावत्वाभावः ॥**

५१ **सु०—** किमतो यद्येवमभावस्य धर्मिप्रतियोगिसाहित्यं प्रतीतौ व्यापकमित्यत आह **अधर्मीति** ।

## अनु०— अधर्मिप्रतियोगित्वमाकाशस्यावगम्यते ।

प्रतीतावभावस्य व्यापकं सधर्मिप्रतियोगित्वमाकाशात्तावद्व्यावर्त(र्त्य)ते । यस्मात् 'आकाशः' इत्येवावगम्यते न तु 'अत्रेदं नास्ती'ति ।

इयमपि (च) वस्तुतो मूर्ताभावगोचरैव प्रतीतिः, प्रलयादिवन्नञ्वर्जिताभिलापसम्बन्धात् 'अतादृशी'व प्रकाशत इति चेन्न; नीलादिप्रतीतेरपि तथात्वप्रसङ्गात्, अनानुभाविकत्वस्योभयत्रापि साम्यात्; तथा च परस्याप्यसिद्ध्याद्यापातः, व्यापकनिवृत्त्या (च) व्याप्यनिवृत्तिरवश्यम्भाविनीत्याकाशस्य नाभावत्वमिति ।

तदयं प्रयोगः । आकाशो नाभावः धर्मिप्रतियोगिनौ विनैव प्रतीयमानत्वाद्रूपवदिति ।

किञ्च मूर्ताभावमाकाशं वदता यो धर्मी तस्योच्यते स एवास्माकमाकाश इति नाम्न्येव विवादोऽवशिष्यते ।

वक्ष्यते चैतद्वियदधिकरण इति ।

**परि०— तथात्वप्रसङ्गादिति** । अभावगोचरत्वप्रसङ्गादित्यर्थः । अस्तु को दोष इत्यत आह **तथा चेति** । नीलादेरप्यभावत्वे सति पक्षे नीलादौ दृष्टान्ते फलादौ च सत्त्वाभावेनासिद्धि-साधनवैकल्यापात इत्यर्थः ॥ **वक्ष्यते चैतदिति** । किञ्चेत्यादिनोक्तं प्रमेयं 'न वियदश्रुतेरि'त्युत्तर-पादीयाद्याधिकरणे युक्तिभिरुपपादयिष्यत इत्यर्थः ।

**गु०दी०— प्रलयादिवन्नञ्वर्जिताभिलापसम्बन्धात्** इत्यत्र यद्यपि नञ्वर्जितप्रलयशब्दाज्जायमाना शाब्दी प्रतीतिर्भवति तादृशी । शब्दशक्त्यनुसारित्वात् शाब्द्याः । तत्रापि नेदानीं जगदित्येव प्रतीतिः । एव-मिहाप्याकाशशब्दादस्तु तादृशी प्रतीतिः । अभावस्वरूपेणैव प्रतीतौ तु मूर्ताभाव इत्येव प्रतीतिः स्यात् । न च सा कदापीति वदन्तं प्रति दृष्टान्तस्यानानुगुण्यं च द्रष्टव्यम् ।

**यादु०— असिद्ध्याद्यापात इति** । नीलादेरपि वस्तुतोऽभावरूपत्वे सत्त्वरूपहेतोस्तत्रासम्भवादिति भावः । **आदि**पदेन साधनवैकल्यग्रहणम् । फलादेरपि वस्तुतोऽभावत्वे तत्र सत्त्वस्य वक्तुमशक्यत्वादिति भावः ॥ **वक्ष्यते चैतदिति** । एकस्मिन्पतत्रिणि पतति द्वितीयेन पतत्रिणा कुत्र पतितव्यम् । यत्रासौ नास्ति तत्रेति चेत् । तर्हि येनाधिकरणेनैकस्य पतत्रिणोऽभावः परस्य च भावो विशिष्यते तदर्थान्तरमङ्गीकरणीयम् । स एव प्रदेशरूप आकाश इति कथं तदनभ्युपगम इत्यादियुक्त्यन्तरमप्यग्रे वक्ष्यत इत्यर्थः ।

**वं०प०— इयमपि** आकाश इति प्रतीतिरपि ॥ **नञ्वर्जितेति** । नञर्थानुल्लिखितव्यवहारविषयत्वा-दित्यर्थः ॥ **अतादृशी वेति** । अभावाविषयकतैवेत्यर्थः ॥ **तथात्वेति** । नीलादिप्रतीतिरपि वस्तुतोऽभावभूत-नीलादिगोचरैव, तथाऽपि प्रलयादिवदतादृशीव प्रकाशत इति स्यादित्यर्थः । अनुभवविरुद्धत्वान्न नीलादिप्रतीते-रभावविषयकत्वं यदि तर्ह्याकाशादिप्रतीतावपि सममेतदित्याह **साम्यादिति** । ननु नीलादिप्रतीतेरभावगोचरत्वे को दोष इति चेत् तर्हि नीलादेरभावत्वापत्त्या भावत्वाख्यसत्त्वेन हेतुना नीलादिप्रपञ्चस्य क्षणिकता साधयितुं न शक्यते स्वरूपासिद्धेरित्याह **तथा चेति** । यद्यधर्मिप्रतियोगित्वमाकाशस्यावगम्यते तर्हि किमायातं प्रकृत इत्यत आह **व्यापकेति** । **धर्मीति** । मूर्ताभावाधिकरणभूत इत्यर्थः । **तस्य** मूर्ताभावस्य । **नाम्न्येवेति** । मूर्ताभावं प्रति धर्मी यः स आकाशभिन्न इति त्वयोच्यते, मया तु स एवाकाश इत्युच्यत इत्येवं नाम्न्येव विवाद इत्यर्थः ।

**कं०रा०— नीलादिप्रतीतेरिति** । नीलादिप्रतीतिरपि वस्तुतः अभावगोचरैव प्रलयादिप्रतीतिवन्नञ्-वर्जिताभिलापसम्बन्धादभावगोचरेव प्रकाशत इति नीलादेरप्यभावत्वप्रसङ्गादित्यर्थः । ननु नीलादिप्रतीतेरभाव-गोचरत्वस्यानानुभाविकत्वान्नाभावगोचरत्वमित्यत आह **अनानुभाविकत्वस्येति** । अभावगोचरताया अनानु-भाविकत्वस्य नीलादिप्रतीताविवाकाशप्रतीतावपि साम्यादित्यर्थः । अस्तु नीलादिप्रतीतेरप्यभावगोचरत्वेन नीलादेरभावत्वं ततः किमित्यत आह **तथा चेति** । नीलादिप्रतीतेरप्यभावगोचरत्वेन पक्षीकृतनीलादेर्दृष्टान्ती-कृतफलादेश्च भावत्वे सति पक्षदृष्टान्तयोर्भावत्वरूपसत्त्वाभावादसिद्धिसाधनवैकल्ययोरापात इत्यर्थः । अस्त्व-भावत्वव्यापकस्य सधर्मिप्रतियोगित्वस्याकाशाद्व्यावृत्तिः ततः किमित्यत आह **व्यापकनिवृत्त्येति** ।

**श्रीनिधि०— इयमपीति** । आकाश इत्येवंरूपेत्यर्थः । तर्हि तस्यां कुतो धर्मिप्रतियोग्युल्लेखो न प्रतीयत इत्यत आह **नञ्वर्जिताभिलापसम्बन्धादिति** । अत्रानुगुणं दृष्टान्तमाह **प्रलयादिवदिति** । यथा **प्रलयादि**पदस्य कार्यप्रध्वंसरूपाभाववाचित्वेऽपि न तेन धर्मिप्रतियोग्युल्लेखः । कुतः ? तद्बोधकप्रलयादिरूपाभिलापस्य व्यवहारस्य प्रलयादिपदस्येति यावत् । नञ्वर्जितत्वात्, एवमाकाशपदस्य नञ्वर्जितत्वात् तज्जन्येयं प्रतीतिः । एतादृशधर्मिप्रतियोग्यघटितैव प्रतीयत इत्यर्थः । **प्रलयादीत्यादि**पदेन अन्त इत्यादेर्ग्रहणम् । **अभिलापेति** । नञर्थानुल्लिखितधीमात्रस्योपलक्षणम् । **तथात्वप्रसङ्गादिति** । मूर्ताभावविषयत्वप्रसङ्गादित्यर्थः । नीलादेर्विधिरूपतया वेद्यत्वेन तस्य मूर्ताभावत्वेऽङ्गीक्रियमाणेऽनुभवविरोध इत्यत आह **अनानुभाविकत्वस्येति** । अस्तु मूर्ताभावविषयकत्वं ततश्च किमिति चेदपसिद्धान्तस्तावत् इदं चेत्याह **तथा चेति** । **परस्यापीति** । न केवलं अस्माकं व्याप्त्यसिद्धिः किन्तु परस्याप्यसिद्ध्यादि स्यादित्यर्थः । तथाहि । फलादिव्यतिरिक्तं सर्वं क्षणिकं सत्त्वादिति हेतोरसिद्धिः । सर्वस्याप्यभावत्वमसत्त्वमित्यङ्गीकारात् । **आदि**पदेन दृष्टान्ते साधनवैकल्यम् । **नाम्न्येव विवादः** इत्ययुक्तम् । मूर्ताभावस्य प्रदेशरूपधर्म्यनङ्गीकारादित्यत आह **वक्ष्यते चैतद् वियदधिकरण इति** । 'मूर्तद्रव्याणि चाकाशे स्थितान्येव हि सर्वदा' इत्यनेनेति भावः । तच्च तद्व्याख्यानसुधापर्यालोचनायां स्पष्टमिति न लिख्यते ।

**शे०चं०—** तर्कमूलभूतव्याप्त्यभावात् तद्विकलोऽयं तर्काभास इत्यतोऽविशेषव्याप्तिसद्भावान्नानुपपत्तिरित्यभिप्रेत्य अविशेषमुपपादयति **अनानुभाविकत्वस्येति** । इष्टापत्तिं परिहरति **तथा चेति** ॥ **असिद्ध्यापात इति** । तथा सति पक्षीकृतस्य नीलादेर्दृष्टान्तीकृतस्य फलादेर्वा वस्तुतोऽभावत्वप्रसक्त्या पक्षे दृष्टान्ते च सत्त्वहेतोरभावादसिद्धिसाधनवैकल्ये स्यातामित्यर्थः । अस्तु सधर्मिप्रतियोगित्वस्याकाशाद्व्यावृत्तिः । किं तावता अपीत्यत आह **व्यापकेति** ॥ **अवश्यम्भाविनीति** । अन्यथा व्याप्यवति तत्रैव व्यापकाभावेन व्यभिचरिततया व्याप्यव्यापकभावाभावप्रसङ्गादिति भावः ॥ **नाम्न्येवेति** । निरधिकरणस्याभावान्मूर्ताभावस्याकाशत्वं वदताऽपि तस्याधिकरणमवश्यं वाच्यम् । तत्राधिकरणस्याकाश इति नाम स्थापितमस्माभिः, परेण त्वाधेयस्य मूर्ताभावस्यैव तथा नाम स्थापितमिति नाम्न्येव विप्रतिपत्तिः । मूर्ताभावाधिकरणवस्तुनस्तूभयसम्मतत्वान्न वस्तुनि विप्रतिपत्तिरित्याशयः । किञ्चास्मिन्पक्षे एकस्मिन्पतत्रिणि पतति द्वितीयेन पतत्रिणा कुत्र पतितव्यम् । यत्रासौ नास्ति तत्रेति चेत् । तर्हि येनाधिकरणेन एकस्य पतत्रिणोऽभावः परस्य च भावो विशेष्यते तदर्थान्तरमङ्गीकरणीयम् । स एव च प्रदेशरूप आकाश इति कथं तदनभ्युपगम इत्याशयवानाह **वक्ष्यते चैतदिति** । 'मूर्तद्रव्याणि चाकाशे स्थितान्येव हि सर्वदे'त्यादिनेति शेषः ।

**स०व्र०— नाम्न्येवेति** । मूर्ताभावस्याकाशत्वं वदताऽपि आकाशस्य निरधिकरणस्यासम्भवात् तदधिकरणस्यावश्यमङ्गीकार्यत्वात् तस्यैवास्माभिराकाशशब्देन सङ्केतितत्वात् तदाधेयस्य परेणाकाशशब्दार्थत्वाभ्युपगमात् नाम्न्येव विप्रतिपत्तिः । तदधिकरणीभूतवस्तुनस्तु उभाभ्यामभ्युपगमात् न वस्तुनि विप्रतिपत्तिरिति भावः ।

**विठ्ठ०— इयमपीति** । आकाश इत्येवंप्रकारप्रतीतिः **नञ्वर्जिताभिलापसम्बन्धादिति** । नञ्रहित-शब्दवाच्यत्वादित्यर्थः । **तथात्त्वप्रसङ्गादिति** । अभावगोचरत्वप्रसङ्गादित्यर्थः । **असिद्ध्याद्यापात इति** । नीलादेरपि वस्तुनो अभावत्वरूपत्वे सत्त्वाभावात् सत्त्वरूपहेतोः असिद्ध्यापातः दृष्टान्तीकृतदेहादावपि सत्त्वा-भावेन साधनवैकल्यापातश्चेत्यर्थः । **व्यापकनिवृत्त्येति** । धर्मिप्रतियोगिसाहित्यनिवृत्त्यर्थः । **नाम्न्येव विवाद इति** । मूर्ताभावात् तद्धर्मिणं च परोऽप्यङ्गीकरोति वयमपि । किन्तु मूर्ताभावस्याकाश इति नाम परो मन्यते । वयं तु तद्धर्मिण इत्येव विवाद इत्यर्थः । **वक्ष्यत इति** । एकस्मिन् पतत्रिणि पततीत्यादिना पतत्रिसद्भाव-तदभावादधिकरणत्वेनावश्यमङ्गीकार्य एव प्रदेश इति 'न दृश्यन्ते सनातन' इति वक्ष्यत इत्यर्थः ।

**॥ इति तत्र आकाशस्य अधर्मिप्रतियोगित्वात् अभावत्वाभावः ॥**

**॥ इति प्रकारान्तरेण आकाशस्य अभावत्वनिवारणम् ॥**

**॥ इति क्षणिकत्वसाधकानुमाने सत्प्रतिपक्षत्वादेः परिहारप्रयत्नस्तन्निरासश्च ॥**

**॥ इति क्षणिकत्वसाधकानुमानस्य सत्प्रतिपक्षत्वं बाधितविषयत्वञ्चेति कथनेन आकाशेऽनैकान्त्यताया अपि सूचना ॥**

**॥ इति एतदनुव्याख्यानद्वारकाष्टमसप्तमोभयसूत्रव्याख्याततप्रदर्शनेन दूषणान्तरस्यापि सूचितता ॥**

* * *

**॥ अथ अष्टमसप्तमोभयसूत्रार्थोपसंहारः ॥**

५२ **सु०**— सूत्रद्वयार्थमुपसंहरति **स्वीकारेति** ।

**अनु०— स्वीकारत्यागतोऽदृष्टदृष्टयोः सर्ववस्तुषु ।**
**गुणानुन्मत्त एवासौ विदधात्यधिकं पुनः ॥**

**अदृष्टस्य** क्षणिकत्वादेः **स्वीकृति(कार)तः** । **दृष्टस्य** स्थिरत्वादेः **त्यागतः** । **असौ** सौगतः । **अधिकं** स्वत इति शेषः । उन्मत्तमपि स्वस्मादधिकविवेकवन्तं ख्या(स्था)पयति इत्यर्थः । न ह्युन्मत्तः सर्वत्राप्रमितं स्वीकरोति नापि प्रमितं त्यजतीति ।

**परि०— सूत्रद्वयार्थमिति** । 'समुदाय उभयहेतुकेऽपी'ति 'इतरेतरप्रत्ययत्वादि'ति च सूत्रद्वयार्थमित्यर्थः । यद्वा 'आकाशे चाविशेषात्', 'अनुस्मृतेश्चे'ति सूत्रद्वयार्थमित्यर्थः । 'दृश्यते प्रत्यभिज्ञात' इत्यनेनानुस्मृतेरित्यस्य, 'आकाशस्याविशेषत' इत्यनेनाकाशे चेत्यस्य च व्याख्योप-

क्रमा ।। **क्षणिकत्वादेरिति** । न दृश्यते दृश्यते चेति क्षणिकत्वस्थायित्वादेरदृष्टत्वदृष्टत्वयोरुक्तेरिति भावः ।

**कं०रा०— सूत्रद्वयार्थमिति** । आकाशे चाविशेषात् अनुस्मृतेश्चेति सूत्रद्वयार्थमित्यर्थः ।

**श्रीनिधि०— नापि प्रमितं त्यजतीति** । सर्वत्रेत्यनुवर्तते ।

**विठ्ठ०— सूत्रद्वयार्थमिति** । 'समुदाय उभयहेतुक' इति 'इतरेतरप्रत्ययत्वादि'ति सूत्रद्वयार्थमित्येके । अपरे तु **आकाशे चाविशेषात्, अनुस्मृतेश्च** इति सूत्रद्वयार्थमित्यर्थः । दृश्यते प्रत्यभिज्ञात इति च । क्षणिकत्वादेरदृष्टत्वस्य स्थिरत्वादेर्दृष्टत्वस्य चोक्तत्वादिति वर्णयन्ति ।

**।। इति अष्टमसप्तमोभयसूत्रार्थोपसंहारः ।।**

* * *

**।। अथ उक्तार्थगतक्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वान्निरासश्च ।।**

**।। अथ तत्रादौ क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का ।।**

५३ **सु०— ननु (च) यदि नीलादिकं क्षणिकं न स्यात् तदा सन्न स्यात् । अर्थक्रियाकारित्वं हि सत्त्वम् । व्याप्तं च क्रमयौगपद्याभ्याम्, तृतीयप्रकाराभावात् । न च स्थिरे तत्सम्भवः प्रसङ्गतद्विपर्ययाभ्याम् ।। तथा हि । स्थायीभावः किं स्वकी(स्वी)यामर्थक्रियां क्रमेण कुर्याद्युगपद्वा । आद्ये कालान्तरभाविनीमर्थक्रियां प्रति इदानीं समर्थो न वा । प्रथमे तामपीदानीं(नीमेव) कुर्यात् । समर्थस्य क्षेपायोगात् । द्वितीये तदाऽपि न कुर्यात्, इदानीमसमर्थोऽपि तदानीं समर्थत्वात्करिष्यतीति चेत्, तदा सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासो भावं भिन्द्यात् । द्वितीये तु आद्यक्षण एव कर्तव्यस्य सर्वस्य कृतत्वात् द्वितीयादिक्षणेऽसत्त्वमवर्जनीयमेव ।। तदेवमनुकूलतर्कबललब्धप्रतिबन्धस्य क्षणिकत्वानुमानस्य बलवत्त्वात् प्रत्यभिज्ञाप्रत्यनुमाने तद्बाधिते न स्थैर्यसाधनायालमिति ।**

**परि०—** क्षणिकत्वानुमानस्य प्राबल्यमाशङ्कते **ननु च यदीति** ।। **क्रमयौगपद्याभ्यामिति** । क्रमेण यौगपद्येन वा व्याप्तमित्यर्थः ।। **तत्सम्भव इति** । क्रमयौगपद्ययोः सम्भवो न च इत्यर्थः । तत्र हेतुः **प्रसङ्गतद्विपर्ययाभ्यामिति** । प्रसङ्गोऽनिष्टापादनं, तद्विपर्ययस्तद्विपर्यये पर्यव-

सानम् । विकल्पमुखेन प्रसङ्गमात्रं तावद्व्यनक्ति **स्थायीभावः किमिति । भावं भिन्द्यादित्यनन्तरं** अतो न क्रमेणेति । अवर्जनीयमेवेत्यन्तरं न युगपदर्थक्रियाकारित्वमिति च व्यापकीभूतक्रमयौगपद्य-योरयोगे तद्व्याप्यार्थक्रियाकारित्वं सत्त्वं स्थायित्वे वस्तुनो न युक्तमिति तस्य विपर्यये पर्यसानं स्फुटत्वान्नोक्तम् । **लब्धप्रतिबन्धस्य** लब्धव्याप्तिकस्येत्यर्थः । न स्थैर्यसाधनायेति विभागः । तर्क-पराहतत्वादिनेत्यादिपदेन 'अनुमानेन तर्कोऽपि व्याख्यात' इति वक्ष्यमाणव्याप्तिरहितत्वादिग्रहः । यद्वा पूर्वभावभवमित्यादौ वक्ष्यमाणाननुकूलत्वाभावग्रहः ।

**गु०दी०— तामपीदानीमेव कुर्यात्** इत्यत्र यथा द्वादश्यां करिष्यमाणभोजनक्रियां प्रत्येकादश्यां क्षुत्पीडितत्वात् समर्थोऽपि निषिद्धत्वान्न करोति । यथा वा रात्रौ क्रियमाणस्त्रीसङ्गं प्रत्यह्नि समर्थोऽपि लज्जया न कुरुते । तथा कालान्तरभाविजलाहरणक्रियां प्रतीदानीं समर्थोऽपि घटः आहर्तुरभावान्न करोतीति काऽनुप-पत्तिरिति द्रष्टव्यम् । यादृशतादृशविरुद्धधर्माध्यासोऽपि न भावभेदकः । किन्तु घटपटत्वादिरूप एवेति ज्ञात-व्यम् । **द्वितीयादिक्षणेऽसत्त्वमवर्जनीयम्** इत्यत्र यथा गृहस्थयोग्यगृहपुत्रदारधनादिकं सम्पाद्यापि वृद्धो गृही सन्नेव तिष्ठति । न त्वसन्नेव भवति । तथा सम्पादितसर्वक्रियोऽपि घटः पश्चादपि तिष्ठतु । असत्ता तु किंनिब-न्धना । सकलक्रियोदासीनानां कृतकृत्यानां योगिनामवस्थानदर्शनादिति दूषणं द्रष्टव्यम् ।

**यादु०— क्रमयौगपद्याभ्यामिति** । क्रमयौगपद्यान्यतरेण व्याप्तमित्यर्थः ॥ **तत्सम्भव इति** । क्रमयौगपद्ययोः सम्भव इत्यर्थः ॥ **प्रसङ्गेति** । अत्र क्रमे प्रसङ्गो यौगपद्ये तद्विपर्ययो हेतुरिति विवेकः । प्रसङ्ग-शब्देन चानिष्टप्रसङ्गो वा ग्राह्यः । तद्विपर्ययशब्दस्य च तस्यार्थक्रियाकारित्वरूपसत्त्वस्य विपर्ययोऽभाव इत्यर्थो विवक्षितः । क्रमे प्रसङ्गमुपपादयितुमाह **आद्ये कालान्तरेति । क्षेपेति । क्षेपो** विक्षेपो, विलम्ब इति यावत् । कारणे सति कार्यं भवत्येवेति तन्मते नियमादिति भावः ॥ **विरुद्धधर्मेति** । न च कालभेदेनाविरोधान्न भेद इति वाच्यम् । सामर्थ्यस्य धर्मिस्वरूपत्वेन तदभावे धर्मिभेदस्यावश्यकत्वादित्याशयात् । भावं भिन्द्यादित्यत्र भाव-शब्दः पदार्थशब्दपर्यायः । तेन विरुद्धधर्माधिकरणत्वस्याभावेऽपि भेदहेतुत्वाद्भावपदमनर्थकमिति शङ्काऽनव-काशः । केचित्त्वभावस्य तन्मते निर्धर्मकत्वात् तत्र विरुद्धधर्माध्यासो न भेदहेतुरित्यभिप्रेत्य भावपदं प्रसिद्ध-भावपरमेवेत्याहुः । यौगपद्ये तद्विपर्ययमुपपादयति **द्वितीये त्विति** । यद्वा प्रसङ्गतद्विपर्ययमुपपादयति **द्वितीये त्विति** । यद्वा प्रसङ्गतद्विपर्ययाभ्यामित्यस्य विपर्ययपर्यवसानसहितानिष्टप्रसङ्गसद्भावादित्येवार्थः । अत्र च विपर्ययपर्यवसानमध्याहार्यमतो न न्यूनतेति ध्येयम् ।

**श्रीनिधि०— तत्सम्भवः** अर्थक्रियाकारित्वसम्भवः । **प्रसङ्गतद्विपर्ययाभ्यामिति । प्रसङ्गः** तर्कः । **तद्विपर्ययः** स्थिरत्वविपर्ययः । **स्वीयामर्थक्रियां क्रमेण कुर्यात् युगपद्वेति** विकल्पानुसारेणेदम् । आद्यकोटौ तर्कबाधेनार्थक्रियाकारित्वासम्भवः । द्वितीयकोटौ तु स्थिरत्वविपर्ययेण क्षणिकत्वेन प्राप्तेन स्थिरस्यार्थक्रिया-

कारित्वासम्भव इति द्रष्टव्यम् । **भावं** पदार्थम् । **द्वितीये त्वाद्यक्षण एवेति** । स्वीयामर्थक्रियां युगपत्कुर्यादिति पक्षे । **लब्धप्रतिबन्धस्येति** । लब्धव्याप्तेरित्यर्थः ।

**शे०चं०**— नन्वक्षणिकत्वेऽपि सत्त्वं भविष्यतीत्यप्रयोजकमेतदित्यतोऽक्षणिकत्वे सत्त्वानुपपत्तिं दर्शयितुं हेतूकृतं सत्त्वं तावन्निर्वक्ति । **अर्थेति** । अर्थक्रियाकारित्वमेव सत्त्वमित्यर्थः । निष्प्रमाणकत्वात् सामान्यविशेषसमवायानां सत्तासामान्याधारत्वानभ्युपगमेन तेषामसत्त्वप्रसङ्गाच्च सत्तासामान्यस्य, प्रमां प्रत्यालम्बनत्वस्यार्थक्रियाकारित्वप्रभेदरूपतया प्रमाणविषयतारूपप्रमाणग्राह्यताया अपि तत्त्वायोगादिति भावः । नन्वक्षणिकस्य भावस्याप्यर्थक्रियाकारित्वरूपं सत्त्वं नानुपपन्नमित्यप्रयोजकत्वतादवस्थ्यमित्यतोऽक्षणिके भावेऽर्थक्रियाकारित्वरूपसत्त्वव्यापकस्य निवृत्त्या तद्व्याप्यसत्त्वस्यापि निवृत्त्युपपत्तेर्नानुपपत्तिरित्यभिप्रेत्य किं तत्सत्त्वव्यापकं, यन्निवृत्त्याऽर्थक्रियाकारित्वरूपसत्त्वनिवृत्तिः स्यादित्यतस्तद्व्यापकं तावदुपदर्शयति **व्याप्तं चेति** । क्रमयौगपद्यान्यतरेण व्याप्तमित्यर्थः । ननु क्रमयौगपद्याभ्यामिव विधान्तरेणाप्यर्थक्रियाकारित्वसम्भवान्न तस्य तद्व्याप्यत्वमित्यतः क्रमाक्रमयोः परस्पराभावरूपतयाऽन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वेन प्रकारान्तराभावात् तत्सिद्धिरित्यभिप्रेत्य तदभावमाह **तृतीयेति** । अस्त्वर्थक्रियाकारित्वस्य क्रमाक्रमान्यतरव्याप्तत्वं, किं तावताऽपीत्यतोऽक्षणिकेऽर्थक्रियाकारित्वरूपसत्त्वव्यापकयोः क्रमाक्रमयोगसम्भवेन व्यापकव्यावृत्त्या तद्व्याप्यस्यार्थक्रियाकारित्वरूपसत्त्वस्यापि व्यावृत्तिसिद्धेर्नाप्रयोजकत्वमित्यभिप्रेत्याक्षणिके व्यापकयोः क्रमाक्रमयोरसम्भवमाह **न चेति** । **तत्सम्भवः** क्रमयौगपद्ययोः सम्भव इत्यर्थः । तत्र हेतुमाह **प्रसङ्गेति** । अक्षणिकस्य भावस्य क्रमेणार्थक्रियाकारितायामक्रमेणार्थक्रियाकारितायां च प्रसङ्गस्य प्रसङ्गविपर्ययस्य च प्राप्त्या न क्रमाक्रमौ सम्भवत इति भावः । कथं पक्षद्वयेऽपि प्रसङ्गतद्विपर्ययप्राप्तिरित्यत एकैकपक्षेऽपि तदुभयमुपदर्शयितुं प्रतिजानीते **तथा हीति** ॥ पक्षद्वये प्रसङ्गतद्विपर्ययावुपदर्शयितुं विकल्पयति **स्थायीभाव इत्यादिना** । तत्र क्रमपक्षे कथं प्रसङ्गतद्विपर्ययावित्यत एकत्रैव पक्षे तयोरप्रवृत्तेः पक्षभेदेन तावुपस्थापयितुं विकल्पयति **आद्य इति** । क्रमे प्रसङ्गमुपदर्शयति **प्रथम इति** । यद्यदा यत्कार्यं प्रति समर्थं तत्तदा तत्करोत्येव, यथा सहकारिमध्यमध्यासीनं बीजमङ्कुरसमर्थमङ्कुरकारीति नियमात् स्थायीभावस्य प्रथमक्षणे कालान्तरभाव्यर्थक्रियाकारित्वसमर्थत्वे तत्कारित्वमवर्जनीयमेवेत्याह **समर्थस्येति** । **क्षेपो** विक्षेपो विलम्ब इति यावत् । क्रमे तद्विपर्ययमप्युपपादयति **द्वितीय इति** । यद्यदसमर्थं तन्न तत्कारि, यथा शिलाशकलमङ्कुरासमर्थं न तत्कारीति नियमादसमर्थत्वे कालान्तरभाव्यर्थक्रियाकारितायां स्थायीभावस्य कालान्तरेऽपि तदकारित्वमावश्यकमिति भावः । तन्मतेऽभावस्य तुच्छत्वेन विरुद्धधर्माध्यासस्य तत्र भेदकत्वासम्भवाद्भावं भिन्द्यादित्यत्र भावपदमिति बोध्यम् । यौगपद्यपक्षेऽपि यावद्धि कार्यं तेनाक्षणिकेन प्रथमे सम्पादितं तावत्सर्वमपि सम्पादयितुं द्वितीयादिक्षणेषु समर्थो न वेति वाच्यम् । आद्ये तावत्सर्वमपि द्वितीयादिक्षणेष्वपि सम्पादयेत् । तावत्कार्यसम्पादनस्वरूपस्य द्वितीयादिक्षणेष्वपि भावात् । न च सम्पादितं पुनः शक्यसम्पादनमित्यतो यद् द्वितीयादिक्षणेषु सम्पादयति तत्प्रथमक्षणे सम्पादितादन्यदित्येव वाच्यम् । तथाच क्रमपक्ष एव पर्यवसन्नः। तत्र च द्वितीयक्षणे सम्पादनीयामर्थक्रियां प्रतीदानीं समर्थो न वा।

प्रथमे तामपीदानीमेव कुर्यात् । द्वितीये तदाऽपि न कुर्यात् । इदानीमसमर्थोऽपि तदानीं समर्थत्वात् करिष्यतीति चेत् । तदा सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासो भावं भिन्द्यात् । प्रथमक्षणे यावत्सम्पादितं तावत्सर्वमपि द्वितीयादिक्षणे सम्पादयितुमसमर्थ इति द्वितीये प्रथमक्षणेऽपि कुर्यात् । तदानी समर्थोऽपीदानीमसमर्थत्वान्न करिष्यतीति च न वाच्यम् । तथा सति सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासप्राप्त्या भावभेदप्रसङ्गादिति पूर्वोक्तप्रकारेणैव प्रसङ्गतद्विपर्यययोः स्पष्टप्रतिभासत्वेन शिष्यैरेव ज्ञातुं शक्यत्वात् किं तद्वचनेनेत्यभिप्रेत्य तावनुपपाद्य दूषणान्तरमेवाह **द्वितीये त्विति** ।

**वा०र०**— ...................... अनुसारेणाह **निष्प्रमाणकत्वादित्यादिना** । ...................... अनुसारेणाह **यद्यदा यत्कार्यं प्रतीत्यादिना** । ........... अनुसारेण स्वयं दूषणान्तरमभिधाय मूले तदनुक्तौ निमित्तमाह **यौगपद्यपक्षेऽपी**त्यादिना **दूषणान्तरमेवाहे**त्यन्तेन । यथास्थितपूर्वप्रकारायोगात् तत्र तत्र प्रकारान्तराश्रयणमिति ज्ञेयम् ।

**स०व्र०**— **न चेति** । स्थिरत्वे क्रमयौगपद्ये न सम्भवतः । तत्कुत इत्यत उभयत्र हेतुमाह **प्रसङ्ग-तद्विपर्ययाभ्यामिति** । स्थिरत्वेऽपि क्रमेणार्थक्रियाकारित्वाङ्गीकारे वक्ष्यमाणरीत्या प्रसङ्गः । स्थिरत्वेऽपि यौग-पद्याङ्गीकारे प्रथमक्षण एव सर्वस्यापि कर्तव्यस्य कृतत्वेन कृत्यानवशेषेणार्थक्रियाकारित्वाभावप्राप्त्या, तद्विपर्ययः स्थिरत्वविपर्ययः असत्त्वं स्यादित्यर्थः । तत्र क्रमे प्रसङ्गमुपपादयति **प्रथम इति** । **विरुद्धधर्माध्यास इति** । न च कालभेदेनाविरोधान्न भेद इति वाच्यम् । सामर्थ्यस्य स्वरूपत्वेन कालभेदेन विरोधपरिहारानुपपत्तेः । वस्तुतः कालभेदेनाविरोधं वदता तत्कालावच्छिन्नस्यैव भावाभावाधिकरणत्वाङ्गीकारात् तस्य च अभिन्नत्वात् विरुद्धधर्माध्यासः भावं भिन्द्यादेवेत्यक्षतमिति भावः । न चाभावस्यापि विरुद्धधर्माधिकरणस्य भेदावश्यम्भावाद् भावपदं व्यर्थमिति वाच्यम् । अभावस्य निर्धर्मकत्वाभ्युपगमेनाभावभेदस्यानेन प्रकारेणानुपपत्तेः । यौगपद्ये विपर्ययमुपपादयति **द्वितीये त्विति** ।

**स०ना०**— 'स्वीकारत्यागतो दृष्टे'ति मूलसुधायां **प्रसङ्गतद्विपर्ययाभ्यामिति** । आद्ये प्रसङ्गोऽति-प्रसङ्गः । द्वितीये विपर्ययः स्थायित्वविपर्ययः क्षणिकत्वमिति यावत् ।

**विट्ठ०**— क्षणिकत्वानुमानस्य तर्कसहितत्वेन बलवत्त्वात् तत्सिद्धस्य क्षणिकत्वादेः कथमप्रामा-णिकत्वमित्याशयेन शङ्कते **ननु चेति** । क्षणिकत्वाभावे सत्त्वाभावः कुत इत्यत आह **अर्थक्रियाकारित्वं हीत्यादिना** । **व्याप्तं चेति** । तच्च सत्त्वं क्रमयौगपद्यान्यतरेण व्याप्तमित्यर्थः । अस्त्वर्थक्रियाकारित्वरूपं सत्त्वं क्रमयौगपद्यान्यतरव्याप्तम् । तथापि स्थायित्वे सत्त्वाभावः कुत इत्यत आह **न चेति** । स्थिरे प्रसङ्गेनानिष्ट-प्रसङ्गेनातिप्रसङ्गेन च क्रमो न सम्भवति । तद्विपर्ययेणार्थक्रियाकारित्वरूपसत्त्वविपर्ययेण यौगपद्यं न सम्भवति । यत एवं प्रसङ्गतद्विपर्ययाभ्यां स्थिरक्रमयौगपद्ययोरसम्भवः अतस्तद्व्याप्तं सत्त्वं च नोपपद्यत इति भावः ।

तावद्विकल्पमुखेन क्रमयौगपद्ययोः प्रसक्तिं दर्शयति **स्थायीभाव इति** । क्रमे प्रसङ्गमुपपादयितुमाह **आद्ये कालान्तरेति** । विक्षेपायोगादिति भावः । विक्षेपायोगात् विलम्बायोगादित्यर्थः । कारणे सति कार्यं भवत्येवेत्येतन्मते नियमादिति भावः । **तदेति** । तर्हीत्यर्थः । **विरुद्धधर्माध्यास इति** । एकस्मिन् पदार्थे विरुद्धोभयविधधर्मानुपपत्तेरुक्तत्वरूपविरुद्धधर्माधिकरणत्वं पदार्थभेदसम्पादकमेवेत्येकस्यैवेदानीं समर्थस्य तदानीं सामर्थ्यमित्यनुपपन्नमेवेति भावः । न च कालभेदेनाविरोध इति वाच्यम् । सामर्थ्यासामर्थ्ययोः पदार्थस्वरूपत्वेन तद्भेदात् कालभेदेनापि पदार्थभेदस्यैवावश्यकत्वादिति । यौगपद्ये स्थायितयाभ्युपगतस्य सत्त्वविपर्ययमुपपादयति **द्वितीये त्विति** । **असत्त्वमवर्जनीयमिति** । द्वितीयादिक्षणेऽर्थक्रियाकारित्वस्याभावादिति भावः ।

**।। इति क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का ।।**

* * *

**।। अथ च तत्र क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कायाः निरासे तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वम् ।।**

५४ **सु०—** मैवम् । एषां तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वात् ।

तथा हि । यद्यात्मानात्मप्रपञ्चः सर्वोऽपि क्षणिकः स्यात् तदा प्रमाऽप्रमारूपः सर्वो(कलो)ऽप्यनुमानागमप्रत्यभिज्ञालक्षणो व्यवहारो लुप्येत । तर्कस्याप्यस्य नोत्थानं स्यात् ।

**।। इति क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कायाः निरासे तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वम् ।।**

* * *

**।। अथ तत्र क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कानिरासविवरणम् ।।**
**।। अथ तत्राप्यादौ अनुमानप्रक्रियाप्रदर्शनपूर्वकं तस्याः क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ।।**

५५ **सु०—** तस्य तज्जातीयस्य वा तेन तज्जातीयेन वा सह भूयःसम्बन्धावगमे (न) तादात्म्यतदुत्पत्त्यवधारणेन (वा) चोपाध्यभावा(द्य)वधारणेन वा व्यभिचाराभावनिश्चये सति व्याप्त्यवधारणम्, अवधृतव्याप्तेश्च पक्षदर्शनं लिङ्गदर्शनं च, ततोऽनुभूतव्याप्तिस्मरणम्, अथ यन्मया व्याप्तत्वेन ज्ञातं लिङ्गं तदत्र पक्षेऽस्तीत्यनुसन्धानम्, अथेदानीमनुमितिरित्यनु-

**मानप्रक्रिया । न ह्येतत्सर्वं क्षणिकस्यात्मनः सम्भवति; येन हि सकृत् धूमो दृष्टः, नष्ट एवासौ; कस्य भूयोदर्शनं, कस्य च व्याप्त्यवधारणादि; यस्मिंश्च पर्वते धूमो दृष्टः, नष्ट एवासौ; कुत्र पुनर्व्याप्तिलिङ्गानुसन्धानम्, कुत्र च साध्याध्यवसायः ।**

**परि०**— एकानेकव्यक्तिहेतुसाध्याभिप्रायेणाह **तस्य तज्जातीयस्य वेत्यादि** । तादात्म्य-तदुत्पत्ती एव व्याप्तिनियामिके इति पराङ्गीकारादाह **तादात्म्येति** । अयं वृक्षश्चूतत्वादित्यादौ तादात्म्यम् । धूमाग्न्यादौ तदुत्पत्त्यादि ज्ञेयम् । मतान्तराभिप्रायेणाह **उपाध्यभावादीति** । **अवधृतव्याप्तेरिति** । पुंस इति योज्यम् ।

**यादु०**— **तस्येति** । इदं च जात्यादिरूपैकव्यक्तिकहेत्वभिप्रायेण । धूमादिरूपानेकव्यक्तिकहेत्वभिप्रायेण **तज्जातीयस्येत्यादि** ।

**वं०प०**— **तस्य तेनेति** । शिंशुपात्ववृक्षत्वयोस्तादात्म्येन व्याप्त्यवधारणप्रकारः ॥ **तज्जातीयस्येति** । धूमजातीयस्य वह्निजातीयेनेति तदुत्पत्त्या भिन्नस्थले तदवधारणप्रकारः ।

**श्रीनिधि०**— **तादात्म्यतदुत्पत्त्यवधारणेन वेति** । इदं बौद्धमतानुसारेण । सौत्रान्तः नीलादिपदार्थेभ्यः तद् ज्ञानं नीलाद्याकारमुत्पद्यते, तेन बाह्याकारोऽनुमीयत इति मन्यते । **उपाध्यभावावधारणेन वा** इति नैयायिकमतानुसारेण ।

**शे०चं०**— अनुकूलतर्कबललब्धप्रतिबन्धस्येत्यत्र प्रतिबन्धो व्याप्तिर्जात्यादिरूपैकव्यक्तिहेत्वाद्यभिप्रायेणाह **तस्य तेनेति** । धूमवह्न्यादिरूपानेकव्यक्तिकहेत्वाद्यभिप्रायेणाह **तज्जातीयस्य तज्जातीयेनेति** । शिंशुपात्वस्य वृक्षत्वेन तादात्म्यावधारणेन, धूमस्य वह्निना तदुत्पत्त्यवधारणेन तत्र व्यभिचाराभावनिश्चयसम्भवेऽपि रसेन रूपानुमानस्थले उक्तेन प्रकारद्वयेन न व्यभिचाराभावनिश्चयः सम्भवति । तत्र तादात्म्यतदुत्पत्त्योरसत्त्वात् कथं तत्र व्यभिचाराभावनिश्चय इत्यत उक्तम् **उपाध्यभावाद्यवधारणेन वेति** ॥ **व्याप्तत्वेन ज्ञातमिति** । अत्र व्याप्तिज्ञानस्य पूर्वमसत्त्वे व्याप्तिलिङ्गमत्रास्तीति परामर्शो न सम्भवतीत्यभिप्रेत्यैवैतन्मया व्याप्तत्वेन ज्ञातमित्याद्युक्तं, न तु स्वातन्त्र्येण तदपेक्षितमित्यभिप्रायेण । व्याप्तं लिङ्गमत्रास्तीति ज्ञानसद्भावे तज्ज्ञानविलम्बेन कार्यविलम्बाभावेन तन्मात्रेणैव चारितार्थ्यादित्यवधेयम् ।

**वा०र०**— **जात्यादिरूपैकव्यक्तिकेति** । जातिः आदिपदेनाकाशादि । तद्रूपा एकैव व्यक्तिः साध्यसाधनभूता वा यस्य हेतोः साध्यस्य वा तद्धेत्वादि तदभिप्रायेणाहेत्यर्थः । यत्र जातिः साध्यभूता वा साधनभूता वा तत्र तज्जातीयत्वानुपपत्त्या तस्य तेन व्याप्तिरित्यर्थः । एवमनेकव्यक्तिकेत्यत्रापि अनेका वह्निधूमादिरूपा

व्यक्तिः साध्यभूता साधनभूता वा यस्य साधनस्य साध्यस्य वा तादृशसाधनसाध्याभिप्रायेणेत्यर्थो ज्ञेयः । ......... अनुसारेणाह **अत्र व्याप्तिज्ञानस्येत्यादिना** ।

**स०व्र०— तस्य** इत्येतत् द्रव्यत्वादिजातिरूपैकहेतुव्यक्त्यभिप्रायेण । धूमादिरूपानेकहेतुव्यक्त्यभिप्रायेण **तज्जातीयस्य** इत्युक्तम् ।

**विठ्ठ०—** तत्र तावदनुमानलोपोपपादनायानुमानप्रक्रियामुपपादयति **तस्य तज्जातीयस्य वेत्यादिना** । तत्र सत्त्वादिजात्यादिरूपैकव्यक्तिकहेत्वभिप्रायेण **तस्येत्युक्तिः** । धूमादिरूपानेकव्यक्तिकहेत्वभिप्रायेण **तज्जातीयस्येति** । तादात्म्यत उत्पत्ती एव व्याप्तिनियामके । यथा प्रमेयत्वाभिधेयत्वादौ यथा धूमाग्न्यादाविति पराङ्गीकाराभिप्रायेणोक्तं **तादात्म्येति**। निरुपाधिकसम्बन्धा व्याप्तिरिति सर्वसम्प्रतिपत्तेरुपाध्यभावावधारणेन वेत्युक्तम्।

**॥ इति अनुमानप्रक्रियाप्रदर्शनपूर्वकं तस्याः क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र आगमप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ॥**

५६ **सु०— एवमागमेऽप्येकैकवर्णश्रवणानि, पदानुसन्धानम्, समयग्रहः, पुनः पदश्रवणम्, समयस्मरणम्, समयग्रहः, वाक्यार्थज्ञानमित्यनेकसंवि(कानुसन)धानम्, नात्मनः क्षणिकतायामुपपद्यते ।**

**श्रीनिधि०— समयग्रहः** सङ्केतग्रहः । **संविधानं** व्यवधानम् । वाक्यार्थज्ञानस्येत्यर्थः ।

**॥ इति आगमप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र प्रत्यभिज्ञाप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ॥**

५७ **सु०— प्रत्यभिज्ञानमपि येन पूर्वावस्थोऽर्थो ज्ञातस्तेनैव तस्य वा तत्सदृशस्य वा दर्शने भवति, तत्कथं क्षणिकस्यात्मनः स्यात् ।**

**कं०रा०— प्रत्यभिज्ञानमिति** । येन पुंसा पूर्वावस्थाविशिष्टोऽर्थो ज्ञातस्तेनैव पुंसा तस्यार्थस्य वा तत्सदृशस्य वा दर्शनं प्रत्यभिज्ञानं तस्य पुंसो भवतीत्यर्थः । उभयप्राप्तौ कर्मणीत्युभयप्राप्तिस्थले कर्मण्येव षष्ठ्या विहितत्वात् कृदन्तदर्शनशब्दयोगे कर्तृकर्मणोः कृतीति षष्ठ्या भवितव्यत्वात् तेनेति तृतीयानुपपत्तिरिति चोद्यमलग्नकं बोध्यम् ।

**श्रीनिधि०— तस्य वा तत्सदृशस्य वेति** । तस्येत्यस्मदादिमतानुसारेण । तत्सदृशस्येति वैभाषिकादिमतानुसारेण । भ्रमप्रमासाधारण्येन उभयमप्यागमादिरीत्या वा द्रष्टव्यम् ।

**विठ्ठ०—** तमेवेत्यत्र भ्रान्तिरूपप्रत्यभिज्ञासङ्ग्रहात् तत्सदृश्यस्येत्युक्तमिति ज्ञेयम् ।

**॥ इति प्रत्यभिज्ञाप्रक्रियाप्रदर्शनपूर्वकं तस्या अपि क्षणिकत्ववादेऽसम्भावितत्वप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र अनुमानेन तर्कस्यापि व्याख्यातता ॥**

५८ **सु०— अनुमानेन तर्कोऽपि व्याख्यातः ।**

**परि०— अनुमानेन तर्कोऽपि व्याख्यात इति** । यथाऽनुमाने पक्षलिङ्गव्याप्त्यादिज्ञानानां भिन्नभिन्नात्मनिष्ठतयाऽनुमानव्यवहारोऽयुक्तः तथा तर्कव्यवहारपरिलोपोऽप्यापादनं प्रति यद्धर्मि तज्ज्ञानस्यापादकज्ञानस्यापाद्यापादकव्याप्तिज्ञानादेश्च, भिन्नभिन्नात्मनिष्ठत्वेन व्याख्यात इत्यर्थः ।

**कं०रा०— अनुमानेनेति** । सर्वस्यापि क्षणिकत्वे व्याप्तिज्ञानादिपूर्वकत्वादिति भावः ।

**श्रीनिधि०— तर्कोऽपि व्याख्यात इति** । तस्यापि व्याप्त्यादिज्ञानसापेक्षत्वादिति भावः ।

**शे०चं०— व्याख्यात इति** । तर्कस्यानुमानत्वात् तत्प्रक्रियैव तर्कप्रक्रिया, तदनुपपत्त्युपवर्णनमेव तर्कप्रक्रियानुपपत्तिवर्णनमिति न तस्य पृथगुपन्यासापेक्षेति भावः ।

**॥ इति अनुमानेन तर्कस्यापि व्याख्यातता ॥**
**इति क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कानिरासविवरणम् ॥**

* * *

**॥ अथ तत्र प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनं तत्समर्थनञ्च ॥**
**॥ अथ तत्रादौ प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनम् ॥**

५९ **सु०— प्रतिक्षणमात्मनोऽनात्मनश्च भेदेऽप्यनुमा(ना)द्यङ्गीकारेऽतिप्रसङ्गः स्यात्; यस्य कस्यचिद्व्याप्तिज्ञाने नारिकेलद्वीपवासिनोऽप्यग्निप्रमा स्यात् (भवेत्), पर्वते लिङ्गदर्शनेन ह्रदेऽप्यग्निरनुमीयेतेत्यादि ।**

**कं०रा०**— प्रतिक्षणमात्मनो भेदेऽप्यनुमानाङ्गीकारे उक्तमतिप्रसङ्गं दर्शयति **यस्येति** । यद्यपि यस्य कस्यचिद्व्याप्तिज्ञानेन यस्य कस्यचिदग्निप्रमा भवेदित्यापादयितुं शक्यं, तथापि नारिकेलद्वीपे धूमाग्न्योरेवाभावात् तद्वासिनस्तद्व्याप्तिज्ञानमसम्भावितं द्वीपान्तरवासिनस्तु तत्सम्भावितमित्याशयेन यस्य कस्यचिद्व्याप्तिज्ञानेन नारिकेलद्वीपवासिनोऽग्निप्रमा भवेदित्यापादितम् । अनात्मनः प्रतिक्षणं भेदेऽप्यनुमानाङ्गीकारेऽपि उक्तमतिप्रसङ्ग-मुपपादयति **पर्वत इति** । क्षणिकत्वपक्षे पूर्वक्षणवर्तिपर्वते लिङ्गदर्शनेनोत्तरक्षणवर्तिपर्वते यथाग्निरनुमीयते तथा पर्वतलिङ्गदर्शनेन ह्रदेऽग्निरनुमीयेत धर्मिभेदस्याविशेषादित्यादिरतिप्रसङ्गः स्यादिति पूर्वेणान्वयः । 'इत्यादीति पाठे क्रियाविशेषणम्' इत्यादि यथा भवति तथा अतिप्रसङ्गः स्यादिति ।

**शे०चं०**— अत्रात्मनो भेदेऽप्यनुमानाङ्गीकारे अतिप्रसङ्गमेव स्फोरयति **यस्येति** । अनात्मनो भेदे-ऽप्यनुमानाद्यङ्गीकारे तं स्फोरयति **पर्वत इति** । आदिपदेन यस्य कस्यचित्पदानुसन्धाने सत्यन्यस्य संसर्गप्रमा भवेदित्यादेरतिप्रसङ्गस्य परिग्रहः ।

**॥ इति प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनम् ॥**

* * *

**॥ अथ च तत्रान्ते पूर्वोत्तरक्षणवर्तिनामात्मादीनां कार्यकारणभावाङ्गीकारेऽपि प्रसङ्गतादवस्थ्यम् ॥**

६० **सु०— पूर्वोत्तरक्षणवर्तिनामात्मनां पर्वतादीनां च कार्यकारणभावादुपपन्नोऽनुमा-नादिव्यवहार इति चेत् (न), अन्यत्वस्यानपायात् । अन्यथोपाध्यायशिष्यबुद्ध्यादावपि प्रसङ्गात् ।**

**परि०— उपाध्यायशिष्यबुद्ध्यादावपि प्रसङ्गादिति** । तयोरपि हेतुहेतुमद्भावापन्नतया गुरुगतपक्षव्याप्त्यादिज्ञानेन शिष्यानुमित्यादिप्रसङ्गादित्यर्थः ।

**यादु०— अन्यथेति** । पूर्वोत्तरक्षणवर्तिनामात्मनां पर्वतादीनां चान्यत्वेऽपि कार्यकारणभावादुपपन्नो-ऽनुमानादिव्यवहार इत्यङ्गीकार इत्यर्थः ॥ **उपाध्यायशिष्यबुद्ध्यादाविति** । अत्र बुद्धिशब्दः करणव्युत्पत्त्या अन्तःकरणविशेषपरः । उपाध्यायबुद्ध्या शिष्यबुद्धिः सुशिक्षिता उपाध्यायबुद्धिवदेव जायते इत्यनुभवेन तयोः कार्यकारणभावसत्त्वेन उपाध्यायबुद्धौ व्याप्त्यादिज्ञाने शिष्यबुद्धावपि अनुमित्यादिकं स्यादित्यतिप्रसङ्गादित्यर्थः । आदिपदेन पितुर्व्याप्त्यादिज्ञाने पुत्रस्यानुमित्यादिकं स्यादित्यस्य सङ्ग्रहः । परमते बुद्धिरेवात्मा चोपाध्यायशिष्य-बुद्ध्योः कार्यकारणभावसत्त्वादुपाध्यायस्य व्याप्त्यादिज्ञाने शिष्यस्यानुमित्यादिकं स्यादित्यतिप्रसङ्गादित्यर्थः । आदिपदेन तुरीवेमादिगतरूपादिना पटादौ स्पर्शाद्यनुमितिः स्यादित्यस्य सङ्ग्रहः ।

**कं०रा०—** शङ्कते **पूर्वोत्तरक्षणवर्तिनामिति** । पूर्वक्षणवर्त्यात्मनिष्ठव्याप्तिज्ञानेनोत्तरक्षणवर्त्यात्मनोऽनुमितिर्भवति, तस्य तत्कार्यत्वात् । यस्य कस्यचिद्व्याप्तिज्ञानेन नारिकेलद्वीपवासिनोऽनुमितिस्तु न भवति तस्य तत्कार्यत्वाभावात् एवं पूर्वक्षणवर्तिपर्वते लिङ्गदर्शनेनोत्तरक्षणवर्तिपर्वते अग्न्यनुमितिर्भवति, तस्य तत्कार्यत्वात् । पर्वते लिङ्गदर्शनेन ह्रदेऽनुमितिस्तु न भवति, तस्य तत्कार्यत्वाभावात् । तथा च कार्यकारणभावमादाय अतिप्रसङ्गस्य सुपरिहरत्वात् क्षणिकत्वपक्षे सर्वोऽप्यनुमानादिव्यवहार उपपन्न एवेति भावः । **अन्यथेति** । उत्तरक्षणवर्त्यात्मादीनां पूर्वक्षणवर्त्यात्मादिजन्यत्वमात्रेण तद्धर्मभाक्त्वे उपदेशद्वारोपाध्यायबुद्धिजन्यत्वात् शिष्यबुद्धेस्तद्धर्मभाक्त्वं स्यादित्यतिप्रसङ्ग इति भावः ।

**श्रीनिधि०— अन्यथा उपाध्यायशिष्यबुद्ध्यादावपीति** । भेदेऽपि कार्यकारणभावमात्रेण पूर्वक्षणवर्तिपदार्थनिर्वर्त्यार्थस्य उत्तरक्षणवर्तिना तत्कार्येण निर्वाहे उपाध्यायबुद्धेः शिष्यबुद्धिं प्रति कारणत्वादुपाध्यायबुद्धिनिर्वर्त्यं कार्यं शिष्यबुद्ध्यापि निर्वर्त्येतेत्यर्थः ।

**शे०चं०—** अन्यत्वेऽपि कार्यकारणभावमात्रेणानुमानादिव्यवहाराभ्युपगमे बाधकमाह **अन्यथेति** । पूर्वोत्तरवर्तिनामात्मनां पर्वतादीनां च कार्यकारणभावादुपपन्नोऽनुमानादिव्यवहार इति वदतः किमभिमतम् । किं पूर्वोत्तरवर्तिनामात्मनां पर्वतादीनां च कार्यकारणभावादन्यत्वमेव नास्तीति तत्प्रयोजकभेदाभावसत्त्वादुपपन्नोऽनुमानादिव्यवहार इति, किंवा भेदाभावस्य तदप्रयोजकत्वात् कार्यकारणभावस्यैव च तत्प्रयोजकत्वात् पूर्वोत्तरवर्तिनामात्मनां पर्वतादीनां च सत्यप्यन्यत्वे कार्यकारणभावमात्रेणानुमानादिव्यवहारप्रयोजकत्वमिति विकल्पद्वयं मनसि निधाय आद्यं दूषयति **अन्यत्वस्यानपायादिति** । अन्यथा क्षणिकत्वभङ्गप्रसङ्गादिति भावः । द्वितीयं दूषयति **अन्यथेति** । सत्यपि भेदे कार्यकारणभावमात्रेणात्मादीनामनुमानादिव्यवहारप्रयोजकत्वं न युक्तं, तथा सत्याचार्यबुद्धिजनितशब्दजनितत्वात् शिष्यबुद्धेरप्याचार्यबुद्ध्या कार्यकारणभावसद्भावात् अनुमानादिव्यवहारप्रयोजकत्वप्राप्त्या आचार्यस्य व्याप्तिज्ञाने सति शिष्यस्याप्यग्न्यनुमितिः स्यात् । तथा यया कयाचित्प्रणाड्या आचार्येच्छाजन्यत्वाच्छिष्येच्छायास्तया कार्यकारणभावसद्भावादाचार्यस्यानुमित्सया शिष्यस्याप्यग्न्यनुमितिः स्यादविशेषादित्यर्थः । न च साक्षात्कार्यकारणभाव एवानुमानादिव्यवहारप्रयोजको न तु यथाकथञ्चित्कार्यकारणभावः । तथा चात्मनां पर्वतादीनां च तद्भावादनुमानादिव्यवहारप्रयोजकत्वेऽपि न शिष्याचार्यबुद्ध्यादेस्तत्प्रयोजकत्वं प्रसज्यते । प्रसञ्जकस्य साक्षात्कार्यकारणभावस्य तत्राभावादिति वाच्यम् । तथा सति व्यवहितसान्तानिकज्ञानानामपि साक्षात्कार्यकारणभावविरहादनुमानादिव्यवहारप्रयोजकत्वाभावप्रसक्त्या यथाकथञ्चित्कार्यकारणभावस्यैव तत्प्रयोजकत्वध्रौव्येणोक्तातिप्रसङ्गानिस्तारादिति भावः ।

**वा०र०—** अन्यत्वेऽपि कार्यकारणभावमात्रेणानुमानादिव्यवहाराभ्युपगमे बाधकमाह **अन्यथेती**त्येतावदधिकं लेखकप्रमादादागतम् । पूर्वोत्तरवर्तिनामित्याद्येव वाक्यद्वयव्याख्यानं मूलकोशेऽत्र च स्वरसम् । पूर्वमन्यत्वानपायादित्युक्तार्थानङ्गीकारे बाधककथनत्वेनान्यथेति वाक्यमात्रस्यान्यत्वेऽपि कार्येत्यारभ्यान्यथेती-

त्यन्तेन योजनाऽभूत् । तदुपर्यन्यस्येति पूर्ववाक्यसहितैतद्वाक्यस्य पूर्वोक्तान्यथेतीत्यन्तप्रमेयान्तर्भावेन योजनान्तरमारब्धं, तदनन्तरं प्रागुक्तोऽन्यथेत्यन्तोऽवतारादिपाठो विनाशिता । शिष्येण तु पुनस्तद्वचनाभावात् तथैव पुस्तके पतितमधिकमिति ज्ञेयम् । **बुद्धिजनितशब्देति** । बुद्धिपूर्वकशब्देत्यर्थः । उक्तातिप्रसङ्गानिस्तारादित्यन्तं सर्वम् ......... अनुसारेणाह ।

**स०व्र०**— ननु पूर्वोत्तरक्षणवृत्तीनामात्मनां पर्वतादीनां चान्यत्वेऽपि सम्बन्धविशेषसत्त्वात् अनुमानादिव्यवहारोपपत्तावपि यस्य कस्यचित् व्याप्तिज्ञाने नारिकेलद्वीपवासिनः अग्निप्रमानुत्पत्तिः । तयोरसम्बन्धादित्यत आह **अन्यथेति** । अन्यत्वेऽपि सम्बन्धमात्रेणानुमानादिव्यवहाराभ्युपगमे उपाध्यायस्य लिङ्गदर्शने शिष्यस्य लिङ्गिज्ञानं स्यात् । न च तयोरन्यत्वात् कथं तदापादनमिति वाच्यम् । भेदेऽपि गुरुशिष्यभावलक्षणसम्बन्धस्य तत्रापि वक्तुं शक्यत्वेनासम्बन्धाभावादिति भावः । **अन्यथेति** । अन्यत्वे अपि कार्यकारणभावमात्रेणानुमानादिव्यवहाराभ्युपगमे उपाध्यायबुद्धेरर्थविशेषेण व्याप्यव्यापकभावावधारणदशायां, शिष्यबुद्धेस्तदर्थेन व्याप्त्यनवधारणदशायामपि शिष्यबुद्ध्या तदर्थानुमानापातात् । न च तदस्ति । तस्मात् कार्यकारणभावमात्रस्याप्रयोजकत्वात् अन्यत्वे अनुमानादिव्यवहारानुपपत्तिस्तदवस्थैवेति भावः ।

**विठ०— अन्यथेति** । पूर्वोत्तरक्षणवर्तिनामात्मनां पर्वतादीनां चात्यन्तभिन्नत्वेऽपि कार्यकारणभावमात्रेणानुमित्यादिव्यवहारजनकत्वे उपाध्यायबुद्ध्या शिष्यबुद्धेर्जातत्वेन उपाध्यायस्य हेतुव्याप्त्यादिज्ञाने शिष्यस्यानुमित्यादिबुद्धिप्रसङ्गादित्यर्थः । पितुर्व्याप्त्यादिज्ञाने पुत्रस्यानुमित्यादिकं स्यादित्यादिपदार्थो बोध्यः ।

**चषकः— उपाध्यायशिष्यबुद्ध्यादाविति** । तयोरपि हेतुहेतुमद्भावोपपन्नतया गुरुगतपक्षव्याप्त्यादिज्ञानेन शिष्यस्यानुमित्यादिप्रसङ्गादित्यर्थः ।

**॥ इति पूर्वोत्तरक्षणवर्तिनामात्मादीनां कार्यकारणभावाङ्गीकारेऽपि प्रसङ्गतादवस्थ्यम् ॥**

**॥ इति प्रतिक्षणमात्मादीनां भेदेऽप्यनुमाद्यङ्गीकारे अतिप्रसङ्गदर्शनं तत्समर्थनञ्च ॥**

**॥ इति क्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्कायाः निरासे**
**तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वम् ॥**

**॥ इति उक्तार्थगतक्षणिकत्वानुमानस्य अनुकूलतर्कबललाभशङ्का**
**तत्तर्काणां प्रतितर्कपराहतत्वादिनाऽऽभासत्वान्निरासश्च ॥**

**॥ इति अष्टमसप्तमसूत्रयोरर्थप्रदर्शनम् ॥**

* * *

**॥ अथ तृतीयसूत्रार्थप्रदर्शनम् ॥**

**॥ अथ तत्र द्वितीयसूत्रोक्तस्य 'क्षणभङ्गनये कार्यकारणभावायोग'स्य समर्थनम् ॥**

**॥ अथ च तत्र क्षणभङ्गनये 'पूर्ववस्तुन उत्तरोत्पत्तिमात्रेण विनाशात् संस्कारार्पकत्व'ायोगः, तस्माच्च पक्षधर्मताज्ञानाद्ययोगात् अनुमानादिलौकिकव्यवहारस्याप्ययोगः ॥**

६१ **सु०—** अथ मतम्, 'कारणक्षणाः कार्यक्षणेषु संस्कारानर्पयन्ति, अतः पूर्वपूर्वात्मसंस्कारयोगिनामुत्तरोत्तरेषामात्मनामनुमानादिव्यवहारो युज्यते, पर्वतादयोऽपि (पूर्व)पूर्वसंस्कारभाजः पक्षादित्वमश्नुवते इति । एतन्निराकरणाय सूत्रम् ॐ **उत्तरोत्पादे च पूर्वनिरोधात्** ॐ [२-२-७-३(८)] इति । तद्व्याचष्टे **उत्तरेति** ।

**अनु०—** उत्तरोत्पत्तिमात्रेण विनाशात्पूर्ववस्तुनः ।
न संस्कारार्पकत्वं च युज्यते कस्यचित् क्वचित् ॥

**कस्यचित्** कारणस्य, **क्वचित्** कार्ये ।

ततः किमित्यत आह **अत इति** ।

अतो ज्ञातं मयेत्यादि न ज्ञेयमनुमा कुतः ।

आत्मनः क्षणिकत्वात्, संस्कारार्पणस्य च(व)ासम्भवादित्यर्थः । यत् **मया** व्याप्तत्वेन **ज्ञातं**, तदत्र विद्यत, **इत्यादि** यथा भवति तथा, **न ज्ञेयं** ज्ञातुमशक्यम् । ततश्च **अनुमा कुतः** । आगमादेरप्युपलक्षणमेतत् ।

**परि०—** **पूर्वपूर्वसंस्कारभाज इति** । पूर्वपूर्वतत्क्षणजन्यसंस्कारभाज इत्यर्थः ॥ **उत्तरोत्पादे च पूर्वनिरोधात्** । सम्बन्धसुधयैव श्लोकं व्याख्यातं मत्त्वा कस्यचिदिति क्वचिदिति पदयोरर्थमाह **कस्यचिदिति** ।

**वं०प०—** आगमादेरपीति ॥ यादृशशक्त्युपेततया पदानि जातानि तादृशान्येवेमानि पदानीत्यादि यथा स्यात् तथा न ज्ञेयम् । ततश्च वाक्यार्थज्ञानं कुत इत्यागमस्थलेऽपि द्रष्टव्यमित्यर्थः ।

**कं०रा०— पूर्वपूर्वात्मसंस्कारयोगिनामिति** शिष्यबुद्धेस्तूपाध्यायबुद्धिसंस्कारयोगित्वाभावान्न तद्धर्मभात्त्वमिति भावः ।

**श्रीनिधि०— अथ मतमिति** । उपाध्यायबुद्धिस्तु शिष्यबुद्धौ स्वजन्यमपि न स्वधर्ममात्रं जनयतीति वैषम्यमित्यर्थः । **संस्कारानिति** । स्वनिष्ठसामर्थ्यमित्यर्थः । **ज्ञेयं** इत्यस्य ज्ञानविषयत्वं तद्योग्यत्वं वार्थश्चेदनन्वयः स्यात् अतः **अशक्यं** इत्युक्तम् ।

**शे०चं०— कारणक्षणा इति** । क्षणावच्छिन्नान्यात्मादिरूपकारणानीत्यर्थः ॥ **कार्यक्षणेष्विति** । क्षणावच्छिन्नेष्वात्मादिकार्येष्वित्यर्थः ॥ **पूर्वपूर्वात्मसंस्कारयोगिनामिति** । पूर्वपूर्वात्मसमर्पितसंस्कारयोगिनामित्यर्थः । **पूर्वसंस्कारभाज इति** । पूर्वपूर्वपर्वतादिसमर्पितसंस्कारभाज इत्यर्थः । ननु कारणं कार्ये संस्कारमर्पयतीति शङ्कायां तदेव निषेध्यं, तत्कथं कस्यचिदपि क्वचिदपि संस्कारार्पकत्वनिषेध इत्यतः प्रकृतोपयोगितया तदर्थमाह **कस्यचिदित्यादिना** । अत इति किमात्मनः क्षणिकतायाः परामर्शः, किंवा संस्कारार्पकत्वासम्भवस्य । नाद्यः । आत्मनः क्षणिकत्वेऽपि पूर्वपूर्वात्मसमर्पितसंस्कारभात्त्वादुत्तरस्यात्मन उक्तविधप्रतिसन्धानोपपत्त्या तदनुपपत्तिकथनस्यासाङ्गत्यप्रसङ्गात् । नान्त्यः । संस्कारार्पकत्वाभावे ह्यात्मनः स्थायित्वादेवोक्तविधप्रतिसन्धानोपपत्त्या तदनुपपत्तिकथनानुपपत्तिप्रसङ्गादित्याशङ्क्य नात्रात इत्येकैकमात्रपरामर्शोऽभिमतो येनोक्तदोषः स्यात् किन्तूभयपरामर्शः । ततश्च नोक्तप्रकारद्वयेन तदुपपत्तिसम्भावनावकाश इति तदनुपपत्तिकथनमुचितमेवेत्यभिप्रेत्य उभयपरामर्शकतया तद्व्याचष्टे **आत्मन इति** । प्रक्रमविरोधापत्त्या अनुमानपदस्य आगमादिव्यावर्तकत्वानुपपत्तेः तदुपलक्षणतया तद्योजयति **आगमादेरिति** ।

**वा०र०—** इत्यादीत्येतत्क्रियाविशेषणमित्याह **इत्यादि यथेति** मूलम् ।

**स०व्र०— यन्मया व्याप्तत्वेन ज्ञातं विद्यत इत्यादीति** । अत्र व्याप्तिज्ञानस्य पूर्वमसत्त्वे व्याप्तं लिङ्गमत्रास्तीति ज्ञानं न सम्भवतीत्यभिप्रायेण 'यन्मया व्याप्तत्वेन ज्ञातम्' इत्याद्युक्तम् । न तु स्वातन्त्र्येण तदपेक्षितम् । व्याप्तं लिङ्गमत्र अस्तीति ज्ञानमात्रेण चारितार्थ्यादित्याहुः । अत्र व्याप्तलिङ्गं पक्षेऽस्तीत्येवावगमस्यावश्यकत्वात् यत् व्याप्तत्वेन ज्ञातं तदत्र विद्यत इति ज्ञानमनावश्यकमिति भाति । तथाऽपि व्याप्तं लिङ्गमत्रास्तीति ज्ञानाभावेऽसम्भवेन पूर्वं व्याप्तिज्ञानस्यावश्यकत्वात् क्षणिकत्वादेतदसम्बन्धं द्योतयितुमिदमुक्तमिति ध्येयम् ।

**विठ्ठ०— पूर्वसंस्कारभाज इति** । पूर्वक्षणवर्तिपर्वतादेरुत्तरक्षणपूर्वतादौ संस्कारार्पकत्वाङ्गीकारादिति भावः ।

**।। अथ तत्रादौ सर्वलोकसिद्धानुमानादिव्यवहारबलेन अलौकिकस्य 'सहभाविनः संस्कारार्पकत्व'स्य कल्पनमपि, प्रत्यभिज्ञासिद्धम् 'आत्मादिकेषु एकत्वादिकं' विहाय निर्मानकं भेदादिकमङ्गीकर्तुमशक्यत्वात् अयोग्यम् ।।**

६२ **सु०**— नन्वस्ति तावदनुमानादिव्यवहारः, सर्वलोकसिद्धस्यापह्नवायोगात् । तद्बलेनालौकिकमपि 'असहभाविनः संस्कारार्पकत्वं' कल्पयिष्यत इत्यत आह **एकत्वमिति** ।

**अनु०— एकत्वमनुभूतिस्थं त्यक्त्वा निर्मानिका भिदा ।**
**कुत आत्मादिकेषु स्यात्**

किमनुमानादिव्यवहारान्यथाऽनुपपत्तिमात्रेणालौकिकं कल्पनीयम्, किंवाऽऽत्मादेः क्षणिकत्वेऽपि सति । नाद्यः, आत्मादेः स्थायित्वेनैव तदुपपत्तेः । द्वितीयस्तु स्यात् । यद्यात्मादेः क्षणिकत्वं सिद्धं स्यात्; न च तदस्ति, प्रमाणबाधितत्वान्निष्प्रमाणकत्वाच्चेति भावः ।

'एकत्वं, भिदे'त्यत्र पूर्वोत्तरकालयोरिति शेषः । **अनुभूतिस्थं** प्रत्यभिज्ञासिद्धम् । **कुतः** 'अङ्गीकार्ये'त्यध्याहारात् समानकर्तृतासिद्धिः ।

**परि०**— त्यक्त्वा स्यादिति कथं क्त्वाप्रत्ययोपपत्तिः । त्यागस्य पुरुषकर्तृकत्वात् । स्यादित्युक्त्या प्राप्तभवनक्रियायाश्च भिदेत्युक्तभेदकर्तृकत्वात् । त्यागभवनयोर्भिन्नकर्तृकत्वे तु 'समानकर्तृकयोः पूर्वकाले क्त्वे'ति क्त्वाप्रत्ययस्यैककर्तृकयोः क्रिययोः पूर्वकालीनायां क्त्वाप्रत्ययविधानात् । इह च समानकर्तृकत्वाभावादित्यतः स्यादित्यतः पूर्वं शेषमाह **कुतोऽङ्गीकार्येतीति** ।

**वं०प०**— ननु त्यागे पुरुषस्य कर्तृत्वात् स्यादिति क्रियायां च भिदायाः कर्तृत्वेन समानकर्तृकताया अभावात् कथं क्त्वाप्रत्यय इत्यत आह **अङ्गीकार्येति** । तथा च त्यागाङ्गीकाररूपयोरुभयोः क्रिययोरेकपुरुषकर्तृकत्वान्न दोष इत्यर्थः ।

**कं०रा०**— ननु क्षणिकत्ववादिनाऽप्येकस्मिन्क्षणे वस्तुन एकत्वस्यात्यक्तत्वाद्भिदायाश्च अनङ्गीकृतत्वात् कथमुच्यते 'एकत्वमनुभूतिस्थं त्यक्त्वे'त्यादिकमित्यत आह **एकत्वं भिदेत्यत्रेति** । ननु 'एकत्वमनुभूतिस्थं त्यक्त्वा निर्मानिका भिदा । कुत आत्मादिकेषु स्यात्' इत्यत्र त्यक्त्वेति क्त्वाप्रत्ययो न घटते । 'अनुभूतिस्थमेकत्वं त्यक्त्वे'त्युक्तत्यागे बौद्धस्य कर्तृत्वेन 'निर्मानिका भिदात्मादिकेषु कुतः स्यादि'त्युक्तभवन-

क्रियायां तु भिदायाः कर्तृतया क्रिययोः समानकर्तृकत्वाभावादित्यत आह **कुतोऽङ्गीकार्येत्यध्याहारादिति** । अङ्गीकार्येति पदाध्याहारेणानुभूतिस्थमेकत्वं त्यक्त्वा निर्मानिका भिदा आत्मादिकेषु कुतोऽङ्गीकार्या स्यादिति योजनाया अत्राभिप्रेतत्वात् आत्माङ्गीकारयोश्च समानकर्तृकत्वात् क्त्वाप्रत्ययोपपत्तिरिति भावः ।

**श्रीनिधि०— क्षणिकत्वेऽपि सतीति** । अत्र अपीत्यनन्तरं सिद्धमिति शेषः । **समानकर्तृकता-सिद्धिरिति** । अन्यथा 'समानकर्तृकयोः पूर्वकाले क्त्वा' इति सूत्रविरोधः स्यादिति भावः ।

**शे०चं०— नन्वेकत्वादेरात्मादिनिष्ठत्वेनानुभूतिस्थत्वाभावात्** कथं तत्स्थत्वकथनमित्यतो विषयता-सम्बन्धेन तत्स्थत्वोपपत्तेर्नानुपपत्तिरित्याशयवान् 'दृश्यते प्रत्यभिज्ञात' इति पूर्वग्रन्थानुरोधेन तत्तात्पर्यमाह **अनुभूतिस्थमित्यादिना** । ननु 'समानकर्तृकयोः पूर्वकाल' इति समानकर्तृकत्व एव क्त्वाश्रवणादिह च त्यागं प्रति पुरुषस्य, स्यादिति क्रियां प्रति च भेदस्य, कर्तृत्वेनासमानकर्तृकत्वात् त्यक्त्वेति क्त्वाप्रत्ययानुपपत्तिरित्यत आह **कुतोऽङ्गीकार्येत्यध्याहारादिति** । ततश्च त्यागं प्रतीवाङ्गीकारक्रियां प्रत्यपि पुरुषस्यैव कर्तृत्वेन समान-कर्तृकत्वलाभान्न क्त्वाप्रत्ययानुपपत्तिरिति भावः । यद्यपि 'यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत' इत्यादौ क्रिययोरसमानकर्तृकत्वेऽपि क्त्वाप्रत्ययवत् 'इत्युक्त्या प्रतीयत' इति भाष्येऽपि क्रिययोरसमानकर्तृकत्वेऽपि क्त्वा-प्रत्ययवच्चेहाप्यसमानकर्तृकत्वेऽपि त्यक्त्वेति क्त्वाप्रत्ययो युक्त एवेति अङ्गीकार्येति क्रियान्तराध्याहारवर्णन-मनर्थकम् । तथाऽप्यङ्गीकृत्य क्रिययोः समानकर्तृकत्वे क्त्वाप्रत्ययविधानमेतदध्याहारवर्णनमित्यदोष इत्यवधेयम् ।

**वा०र०— यदोर्वंशं नरः श्रुत्वेति** । यत्रावतीर्णो भगवान् परमात्मा नराकृतिरित्युत्तरार्धो नवमस्कन्धे । एतच्च तृतीयाध्यायतृतीयपादस्थ'यथाशक्त्यखिलान्वेदान् विज्ञाये'त्यनुभाष्यमूलटीकाव्याख्याने उपपादयिष्यते । **असमानकर्तृत्वेऽपीति** । नरसर्वपापरूपोभयकर्तृकत्वेऽपीत्यर्थः । **भाष्येऽपीति** । अदृश्यत्वसूत्रीयेति शेषः ।

**स०व्र०— त्यक्त्वा इति** (अनुव्याख्याने) त्यागं प्रति पुरुषस्य कर्तृत्वात् स्यादिति क्रियां प्रति भेदस्य तत्त्वेन समानकर्तृकत्वाभावात् क्त्वाप्रत्ययानुपपत्तिः, तत्राह **कुत इति** । तथा च अङ्गीकारक्रियां प्रत्यपि पुरुषस्य कर्तृत्वात् तदुपपत्तिरिति भावः ।

**विठ्ठ०— द्वितीयस्तु स्यादिति** । अत्र यदीत्युत्तरवाक्यान्विततया तर्हीत्यध्याहार्यम् । ननु त्यक्त्वे-त्युक्तत्यागक्रियायाः पुरुषः कर्ता स्यादित्युक्तभवनस्य तु भेदकर्तृकत्वम् । तथा च 'समानकर्तृकयोः पूर्वकाल' इत्येककर्तृकक्रिययोः पूर्वकालीनक्रियायां क्त्वाप्रत्ययविधानादिह चैककर्तृकत्वाभावादित्यतः पुरुषकर्तृकक्रिया-न्तराध्याहारेण समाधत्ते **कुतोऽङ्गीकार्येति** । तथा च अनुभूतिस्थं प्रत्यभिज्ञासिद्धमात्मादिकेषु पूर्वोत्तरकालयो-रेकत्वं त्यक्त्वा निर्मानिका पूर्वोत्तरकालयोर्भिदा कुतोऽङ्गीकार्या स्यादिति मूलयोजना ।

* * *

।। अथ च तत्र क्षणिकत्वानुमानस्योक्तविधयाऽऽभासत्वेन दुर्बलत्वात् तेन बाधाभावात् प्रत्यभिज्ञायाः प्राबल्यमेव ।।

६३ **सु०—** ननु च प्रत्यभिज्ञानं भ्रान्तमित्युक्तम्, तत्कथमात्मादेरैक्यं ततः सिद्ध्ये-दित्यत आह **बल्येवेति** ।

**अनु०—** बल्येवानुभवो यतः ।

तर्कबलेनानुमाने निरवकाशतया प्रबले सति हि तद्विरोधात् प्रत्यभिज्ञानं भ्रान्तं स्यात् । यदा तु तर्कस्योक्तविधयाऽऽभासत्वं; तदा कुतः क्षणिकत्वानुमानप्राबल्यम्, कुतश्च प्रत्यभिज्ञायास्तद्बाधः । अबाधितश्च **प्रत्यभिज्ञानुभवः, यतः बल्येव**; अत आत्मादेरेकत्वं तेन सिद्धमिति सम्बन्धः ।

एतेनानुमानसिद्धस्य भेदस्य कथं निर्मानकत्वमित्यपि परास्तम्, तदुपजीव्यस्य तर्कस्याद्याप्यनवस्थानात् ।

**परि०—** **उक्तविधयेति** । एषां तर्काणां प्रतितर्कपराहतत्वादिनेत्याद्युक्तविधयेत्यर्थः ।। **भेदस्येति** । प्रतिक्षणं घटादिभेदस्येत्यर्थः ।

**वं०प०—** **तर्कस्येति** । क्षणिकत्वसाधकानुमानानुग्राहकस्य । न तु यदि नीलादिकमित्यादिनोक्ता-नुकूलतर्कस्येत्यर्थः । **भेदस्येति** । पूर्वोत्तरक्षणयोरात्मादिभेदस्य क्षणिकत्वस्येति यावदित्यर्थः ।। एतेनेत्युक्तं विवृणोति **तदिति** ।

**कं०रा०—** **तर्कबलेनेति** । वस्तुनः स्थिरत्वेऽर्थक्रियाकारित्वरूपसत्त्वानुपपत्तिरिति परोक्ततर्कबलेने-त्यर्थः । **उक्तविधयेति** । यद्यात्मानात्मप्रपञ्चः सर्वोऽपि क्षणिकः स्यात् तदा सकलोऽप्यनुमानागमप्रत्य-भिज्ञालक्षणो व्यवहारो लुप्येतेत्यादिनोपपादितप्रतितर्कपराहतत्वेनेत्यर्थः । **एतेनेति** । अनुमानोपजीव्यतर्कस्य प्रतिकूलतर्कपराहतत्वेनाप्रतिष्ठितत्वे तदुपजीवकानुमानस्य सुतरामप्रतिष्ठितत्वादनुमानसिद्धस्य वस्तुनः पूर्वोत्तर-कालयोर्भेदस्य निर्मानकत्वं कथमिति चोद्यं निरस्तमित्यर्थः ।

**श्रीनिधि०—** **तर्कबलेनेति** । स्थायीभावः स्वीयां अर्थक्रियां क्रमेण कुर्याद् युगपद् वेत्यादिना उक्ततर्कबलेनेत्यर्थः । **अनुमाने** क्षणिकत्वानुमाने । **उक्तविधया आभासत्वमिति** । प्रतितर्कपराहतेत्यर्थः ।

**अनुमानसिद्धस्य भेदस्येति** । पूर्वोत्तरकालयोः पदार्थभेदस्य । अनुमानं च क्षणिकत्वानुमानम् । एतेनेत्युक्तमेव दर्शयति **तदुपजीव्यस्येति** ।

**शे०चं०— भ्रान्तमिति** । भ्रान्तिर्भ्रान्तमिति 'नपुंसके भावे क्तः' इति भावे क्तः ॥ **उक्तविधयेति** । प्रतितर्कपराहतत्वेनेत्यर्थः । साकाङ्क्षत्वप्रयुक्तवाक्याभासताशङ्कापरिहारायाह **अत इति** । एतेनेत्युक्तमेव विशदयति **तदुपजीव्यस्येति** । क्षणिकत्वानुमानापेक्षितप्रतिबन्धाग्राहकत्वात् तर्कस्यानुमानं प्रत्युपजीव्यत्वमिति भावः । **अद्याप्यनवस्थानादिति** । ततश्च तर्कस्यानाभासत्वस्थितौ तत्सचिवतया अनुमानस्य प्रामाण्यप्राप्तेर्भेदस्य निर्मानकत्वाभावसिद्धिः तत्सिद्धौ च प्रतितर्काप्रतिघातरूपाङ्गसम्पत्त्या तर्कस्यानाभासत्वसिद्धिरित्यन्योन्याश्रय इति भावः ।

**॥ इति क्षणिकत्वानुमानस्योक्तविधयाऽऽभासत्वेन दुर्बलत्वात् तेन बाधाभावात् प्रत्यभिज्ञायाः प्राबल्यमेव ॥**

**॥ इति सर्वलोकसिद्धानुमानादिव्यवहारबलेन अलौकिकस्य 'सहभाविनः संस्कारार्पकत्व'स्य कल्पनमपि, प्रत्यभिज्ञासिद्धम् 'आत्मादिकेषु एकत्वादिकं' विहाय निर्मानकं भेदादिकमङ्गीकर्तुमशक्यत्वात् अयोग्यम् ॥**

* * *

**॥ अथ च तत्र कार्यकारणयोरेककालीनत्वं विना उत्तरस्य पूर्वसंस्कारयोगित्वाभावात् पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वम् ॥**

६४ **सु०—** नन्वस्तूत्तरोत्पाद एव पूर्वस्य निरोधस्तथाऽपि कुतः पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वमित्यत आह **कार्यकारणयोश्चेति** ।

**अनु०— कार्यकारणयोश्चैककालीनत्वं विना कथम् ।**
**पूर्वसंस्कारयोगि स्यादुत्तरो नियमेन च ॥**

उत्तरोत्पाद एव पूर्वस्य निरोधात् **कार्यकारणयोः एककालीनत्वं** तावन्नास्तीति लभ्यते । **एककालीनत्वं च विना** पूर्वाहितसंस्कारयोगित्वमुत्तरस्य न युज्यते । **नियमेन च** इत्यनेन 'क्वचिदपि न युज्यते कुतः सर्वत्रे'ति सूचयति । यद्वा 'एककालीनत्व एव संस्कारार्पकत्वं दृष्टं, न भिन्नकालत्व' इति व्याप्तेरित्यर्थः ।

**परि०— इति लभ्यत इति** । 'उत्तरोत्पत्तिमात्रेण विनाशादि'त्यर्धोक्तेनोत्तरोत्पादे च पूर्व-निरोधादिति सौत्रहेतुनैककालीनत्वं नास्तीति साध्यं लभ्यत इत्यर्थः । नियमेन चेत्यस्यार्थान्तरमाह **यद्वेति** ।

**श्रीनिधि०—** एककालीनत्वं च विनेति सिद्धवन्निर्देशोऽनुपपन्नः । तस्य पूर्वमनुक्तत्वादित्यत आह **उत्तरोत्पाद एव पूर्वनिरोधादिति** । तत्सिद्धान्तपर्यालोचने उक्तप्रायमिति भावः । नियमेनेत्येतत् प्रकारान्तरेण व्याख्याति **यद्वेति** । **न भिन्नकालीनत्व इति व्याप्तेरिति** । इतिशब्दो हेत्वर्थः । एवं च एककालीनत्वं विना पूर्वाहितसंस्कारयोगित्वमुत्तरस्य न युज्यते । कुतः ? एककालीनत्वे एव संस्कारार्पकत्वं न भिन्नकालीनत्व इति नियमात् । अयमपि कुतः ? तथा दर्शनादित्युक्तं भवति ।

**शे०चं०—** मूले 'कार्यकारणयोरेककालीनत्वं विने'ति हेतूकृतस्य कार्यकारणयोरेककालीनत्वाभावस्या-सिद्धत्वात् हेतूकरणानुपपत्तिमाशङ्क्य 'उत्तरोत्पादमात्रेण निरोधात् पूर्ववस्तुन' इति पूर्वभाष्यादेव तत्सिद्धि-सम्भवान्नानुपपत्तिरित्यभिप्रेत्य तद्भाष्यं मनसि निधाय असिद्धिं परिहरति **उत्तरोत्पाद एवेति** । एककालीनत्वं विनोत्तरस्य पूर्वाहितसंस्कारयोगित्वं नियमेन न युज्यत इति योजनायां नियमनिराकरणप्राप्त्या क्वचिदेककालीनत्वं विनाऽप्युत्तरस्य पूर्वाहितसंस्कारयोगित्वसद्भावः प्राप्यते । स चानुपपन्नः । उत्तरेणासम्बद्धस्य पूर्वस्योत्तरे वासना-समर्पकत्वायोगात् । योगे वा तत्रेव सर्वत्रापि तत्सम्भवेन नियमनिराकरणानुपपत्तिप्रसङ्गादित्यभिप्रेत्य नियमेने-त्येतत्परित्यागेनैव वाक्यं योजयति **एककालीनत्वं चेति** । तर्हि नियमेनेत्यस्य भाष्यखण्डस्य वैयर्थ्य-मित्यतोऽर्थविशेषसूचकत्वान्न तद्वैयर्थ्यमित्यभिप्रेत्य तत्सूचितमर्थमभिनयेन दर्शयति **नियमेन चेत्यनेनेति** । एवमर्थसूचकत्वे नियमेनेत्यस्य मुख्यार्थपरित्यागादस्वारस्यं भवतीत्यपरितोषात् प्रकारान्तरेण तदर्थमाह **यद्वेति** ।

* * *

**॥ अथ च तत्र सम्बद्धानामेवान्यत्र संस्काराधायकत्वनियमात्,**
**भिन्नकालीनयोश्च सम्बन्धायोगात् क्षणिकत्वानुमानेऽपि**
**संस्काराधानार्थं कार्यकारणयोरेककालीनत्वनियमोऽबाधितः ॥**

६५ **सु०—** नन्वेककालीनत्वाभावेऽपि कुतः संस्कारार्पकत्वं न स्यादित्यत आह **सम्बद्धा एवेति** ।

**अनु०— सम्बद्धा एव संस्कारमन्यत्रादधतेऽखिलाः ।**
**असम्बद्धः कथं पूर्व उत्तरे वासनाकरः ॥**

यस्मात् **अखिलाः** संस्काराधायकाश्चम्पककुसुमादयः पदार्थास्तैलादिभिः **सम्बद्धा एव अन्यत्र** तैलादौ **संस्कारमादधते**, नासम्बद्धा इत्यस्ति नियमः । न च भिन्नकालीन(ल)योः सम्बन्धो युज्यते । तस्मादुत्तरेण **असम्बद्धः पूर्वः** तस्मिन् **उत्तरे** वासनां न कुर्यादिति ।

उक्तमर्थं बुद्ध्यारोहार्थं सङ्कलय्याह **एककालतयेति** ।

## अनु०— एककालतया योगं विना संस्कारतः कथम् ।

अत्र '**एककालतया विना** कार्यकारणयोर्योगो न युज्यते' '**योगं विना** कारणस्य कार्ये संस्कारार्पकत्वं च न घटते', '**संस्कारतो विना** कथमनुमानादिव्यवहारः' इत्यध्याहारेण योजना । यदीदं सङ्कलनं न क्रियेत तदा पूर्वो(क्तहेतूनां)क्तानां प्रत्येकं संस्कारानाधायकत्वे हेतुत्वं ज्ञायेत ॥ सर्वत्र साध्यनिर्देशात् तत्र को दोषः । उक्ताकाङ्क्षाकुण्ठितत्वमेवेति ।

अत्रैते प्रयोगाः । पूर्वक्षण उत्तरक्षणे संस्काराधायको न भवति, तेनासम्बद्धत्वात्, यो येनासम्बद्धो नासौ तत्र संस्काराधायकः, यथा सम्प्रतिपन्नः ॥ यद्वा यो यत्र संस्काराधायकः स तत्सम्बद्ध एव दृष्टो यथा सम्मतः ॥ असम्बद्धस्यापि संस्काराधायकत्वे मृगमदो वसनमिव सर्वं वासयेदविशेषात् । असम्बद्धश्च पूर्व उत्तरेण, ततो भिन्नकालीनत्वात्, सम्प्रतिपन्नवत् ॥ भिन्नकालीनयोरपि सम्बन्धेऽतिप्रसङ्गः । भिन्नकालीनश्च पूर्व उत्तरेण, तदुत्पाद एव विनष्टत्वात्, सम्मतवत् । प्रागेव नष्टस्य तेनैककालीनत्वशङ्का एव व्याहतेति ।

ननु लाक्षारसाहितबीजपूरकुसुमलौहित्यवत् किन्न स्यादिति चेत् (न) । तत्रापि निरन्वयविनाशोत्पादानभ्युपगमात् । अत्र च परसिद्धन्यायेन परस्य बोधनान्नाश्रयासिद्ध्यादि शङ्कनीयमिति ।

परि०— **सङ्कलय्येति** । सङ्कलयित्वेत्यर्थः । **पूर्वो(क्तानां)क्तहेतूनामिति** । उत्तरोत्पाद एव पूर्वस्य नष्टत्वात् भिन्नकालीनत्वात्, असम्बद्धत्वादिति हेतूनामुत्तरोत्पत्तीत्यर्धेन कार्यकारणयोश्चैककालीनत्वमित्यर्धेनासम्बद्धः कथमित्यर्धेन चोक्तानां हेतूनां भिन्नकालीनत्वासम्बद्धत्वसंस्काराधायक-

त्वरूपसाध्यत्रयेण क्रमादन्वयं विना (तदीय)तृतीयसाध्य एव हेतुत्वं ज्ञायेतेत्यर्थः ॥ **सर्वत्र साध्येति** । 'न संस्कारार्पकत्वमि'ति 'कथं पूर्वसंस्कारयोगी'ति 'कथं पूर्व उत्तरे वासनाकर' इति संस्कारानाधायकत्वरूपसाध्यस्य सर्वत्र हेतुत्रये निर्देशादित्यर्थः । शङ्कते **तत्र को दोष इति** । हेतुत्रयस्यापि संस्कारानाधायकत्वरूपसाध्यान्वये दोषः क इति शङ्कार्थः । उत्तरमाह **उक्ताकाङ्क्षेति** । 'कार्यकारणयोश्चे'ति 'सम्बद्धा एवे'ति श्लोकद्वयावतारिकायामुक्ते ये आकाङ्क्षे ताभ्यां कुण्ठितत्वमेव दोष इत्यर्थः । असम्बद्ध इत्यत्र अभिप्रेतप्रयोगमाह **पूर्वक्षण इति** । सम्बद्धा एवेति पूर्वार्धाभिप्रेतव्याप्तिमाह **यद्वा यो यत्रेति** । तर्कमाह **असम्बद्धस्येति** । **मृगमदः** कस्तूरी । **वसनं** वस्त्रम् । स्वसम्बद्धपटमिवासम्बद्धमपि वासयेदिति भावः । 'कार्यकारणयोश्चैककालीनत्वमि'त्याद्यभिमतमाह **असम्बद्धश्चेति** । **पूर्वक्षण** उत्तरक्षणेनेत्यन्वेति । तर्कमाह **भिन्नकालीनयोरपीति** । अ(त्रा)सिद्धिपरिहारकतया उत्तरोत्पत्तीत्येतदभिमतमाह **भिन्नकालीनश्चेति** । तर्कमाह **प्रागेवेति** । ननूत्तरोत्पाद एव पूर्वस्यापि नष्टस्यापि लाक्षारसस्य बीजपूरकुसुमे लौहित्यलक्षणातिशयाधायकत्वमस्तीति तद्वदस्त्वित्यप्रयोजकत्वं वाऽनैकान्त्यं वा हेतोः स्यादिति शङ्कते **ननु लाक्षारसेति** । बीजपूरो दाडिमतरुः । तस्य लाक्षारससेके सति तत्कुसुमे शुक्ले लौहित्यं जायत इत्याहुः ॥ **नाशोत्पादेति** । पूर्वनाशोत्तररूपोत्पादेत्यर्थः । ननु परेण क्षणस्याखण्डस्यैवाङ्गीकारादनुमानप्रयोक्तृमते च सखण्डत्वाद्यभ्युपगमादखण्डक्षणपक्षीकारे चाश्रयासिद्धिः, स्वरूपासिद्धिश्च स्यात् । असम्बद्धत्वादेरनभ्युपगमादित्यत आह **अत्र च परसिद्धेति** ।

**यादु०— तदा पूर्वोक्तानामिति** । 'उत्तरोत्पत्तिमात्रेणे'त्यादिना 'उत्तरे वासनाकर' इत्यन्तेन श्लोकत्रयेणोक्तानामुत्तरोत्पाद एव नष्टत्वकार्याभिन्नकालत्वकार्यासम्बद्धत्वानां हेतूनामित्यर्थः ॥ **सर्वत्र साध्यनिर्देशादिति** । उक्तहेतुत्रयप्रतिपादकश्लोकेषु संस्कारानाधायकत्वरूपसाध्यस्य तत्तद्द्वितीयार्धेन निर्देशादित्यर्थः ॥ **उक्ताकाङ्क्षेति** । नन्वस्तूत्तरोत्पाद एव पूर्वस्य निरोधः तथाऽपि कुतः पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वमिति । नन्वेककालीनत्वाभावेऽपि कुतः संस्कारार्पकत्वं न स्यादिति चोक्ताप्रयोजकत्वशङ्काकुलि(ण्ठि)तत्वमेवेत्यर्थः । यदि पूर्वहेतुद्वयमपि साक्षात्संस्कारानाधायकत्वस्यैव साधकमङ्गीक्रियते तदोक्ताप्रयोजकत्वशङ्काद्वयेन प्रतिबन्धः स्यात् । अत एव परम्परा सङ्कलनेन ज्ञापितेति भावः । अनुव्याख्याने सर्वत्र परमसाध्यनिर्देशस्तु सर्वथा पूर्वस्योत्तरे वासनाकरत्वं नास्तीति सूचयितुमिति ज्ञातव्यम् । **मृगमदः** कस्तूरी । **ननु लाक्षारसेति** । बीजपूराङ्कुरे यदि लाक्षारससेकः क्रियते तर्हि तदीयकुसुमेष्वत्यन्तं लौहित्यमुत्पद्यते । न हि तत्र लौहित्योत्पत्तिकाले लाक्षारसोऽस्ति । तस्य पूर्वमेव नष्टत्वात् । तद्वत्प्रकृतोदाहरणमपि किं न स्यादित्यर्थः । तथा च तत्रोक्तहेतूनां व्यभिचार इति भावः ॥ **निरन्वयेति** । निरन्वयौ कारणान्वयशून्यौ विनाशोत्पादौ तयोरनभ्युपगमादित्यर्थः ।

लाक्षाररसरूपकारणस्य यथोत्तरत्रान्वयो न स्यान्न तथाऽत्यन्तं विनाशः । लौहित्योत्पादोऽपि न कारणान्वयशून्यः, किन्तु लौहित्योत्पत्तिकाले लाक्षारसः कारणात्मना बीजपूरसम्बद्ध एवास्त्यतो न व्यभिचार इति भावः । ननु पूर्वक्षण उत्तरक्षणे संस्काराधायको न भवतीत्यादिप्रतिज्ञावाक्येषु पूर्वोत्तरक्षणमात्रावस्थायि वस्त्वपि प्रतिपाद्यतया विवक्षितमिति वाच्यम् । अन्यथा असङ्गतिप्रसङ्गात् । परेण हि पूर्वपूर्वपर्वताद्याहितसंस्कारभाजामुत्तरोत्तरेषां पर्वतादीनां पक्षत्वादिकमुपपद्यत इत्युक्तत्वेन तदभावस्यैवास्माभिः साधनीयत्वात् । तथा चास्मन्मते क्षणिकस्य वस्तुन एवाभावादाश्रयासिद्धिः तदुत्पाद एव विनष्टत्वादित्यस्त्यस्य हेतोः स्वरूपासिद्धिश्च स्यादित्यत आह **अत्र च परसिद्धेति** ।

**कं०रा०— पूर्वोक्तानामिति** । 'उत्तरोत्पत्तिमात्रेण विनाशादि'त्युक्तस्योत्तरोत्पत्तौ विनष्टत्वस्य 'कार्यकारणयोश्चैककालीनत्वं विने'त्युक्तस्यैककालीनत्वाभावस्य 'असम्बद्धः कथं पूर्व' इत्युक्तस्यासम्बद्धत्वस्य चेत्यर्थः । ननु पूर्वोक्तानां विनष्टत्वैककालीनत्वाभावासम्बद्धत्वानां संस्कारानाधायकत्वहेतुत्वप्रतीतिः कस्माद्भवतीत्यत आह **सर्वत्रेति** । 'उत्तरोत्पत्तिमात्रेण विनाशात् पूर्ववस्तुनः । न संस्कारार्पकत्वं च युज्यत' इत्यत्र 'कार्यकारणयोश्चैककालीनत्वं विना कथम् । पूर्वसंस्कारयोगी स्यादुत्तर' इत्यत्र 'असम्बद्धः कथं पूर्व उत्तरे वासनाकर' इत्यत्र च संस्कारानाधायकत्वस्यैव साध्यत्वेन निर्देशादित्यर्थः । ननु यथाप्रतीति संस्कारानाधायकत्व एव पूर्वोक्तानां हेतुत्वस्वीकारे न दोष इति शङ्कते **तत्रेति** । उत्तरमाह **सर्वत्रेति** । अस्तूत्तरोत्पत्तौ पूर्वस्य विनाशः तथापि कुतः पूर्वस्योत्तरस्मिन् संस्कारानाधायकत्वमित्याकाङ्क्षाकुण्ठितत्वमुत्तरोत्पत्तिमात्रेण पूर्वस्य विनाशादित्यस्य संस्कारानाधायकतायां साक्षाद्धेतुत्वे दोषः । एककालीनत्वाभावेऽपि संस्कारानर्पकत्वं कुत इत्याकाङ्क्षाकुण्ठितत्वमेककालीनत्वाभावस्य साक्षात्संस्कारानाधायकत्वहेतुत्वे दोषः । न हि वह्निमत्त्वं प्रति साक्षाद्धेतौ धूमवत्त्वे प्रयुक्ते तस्य गमकताप्रयोजकव्याप्त्याद्याकाङ्क्षां विना धूमवत्त्वेऽपि वह्निमत्त्वं कुत इति हेत्वन्तराकाङ्क्षा भवति । प्रकृते च तथाकाङ्क्षाया जायमानत्वेनोक्ताकाङ्क्षाया कुण्ठितस्योत्तरोत्पत्तौ विनष्टत्वस्यैककालीनत्वाभावस्य च संस्कारानाधायकत्वे साक्षाद्धेतुत्वासम्भवादसम्बद्धत्वस्य तूक्ताकाङ्क्षाकुण्ठितत्वाभावेन साक्षात्तत्र हेतुत्वसम्भवात् पूर्वोक्तानां सर्वेषां संस्कारानाधायकत्वे साक्षाद्धेतुत्वप्रतीतिं त्याजयित्वा परस्परहेतुहेतुमद्भावज्ञापनायोत्तरोत्पादे पूर्वस्य विनाशात् कार्यकारणयोरेककालीनत्वं न, अस्यैककालीनत्वाभावाच्च तयोः सम्बन्धो न युज्यते । सम्बन्धाभावाच्च कारणस्य कार्ये संस्कारार्पकत्वं न घटत इति सङ्कलनं कार्यमेवेति भावः । **नन्विति** । लाक्षारससंयुक्ते बीजपूरबीजे उप्ते लाक्षारसनाशेऽपि तत्संस्काराद्बीजपूरकुसुमे लौहित्यं जायते । तत्र यथा नष्टस्यापि लाक्षारसस्य संस्काराधायकत्वं तथा अत्रापि किं न स्यादिति शङ्काभिप्रायः । ननु पूर्व-उत्तरस्मिन्संस्कारानाधायको न भवति । तेनासम्बद्धत्वादित्याद्यनुमानेषु किं पराभिमतं क्षणिकं वस्तु पक्षं क्रियते उत स्वाभिमतं स्थायि । आद्ये पराभिमतक्षणिकवस्तुनः स्वमते असत्त्वादाश्रयासिद्धप्रसङ्गः । द्वितीये तु स्थायिवस्तुनः उत्तरेण असम्बद्धत्वादेरभावात् पक्षे हेत्वसिद्धिप्रसङ्ग इत्यत आह **अत्र चेति** ।

४० **श्रीनिधि०— बुद्ध्यारोहार्थमिति** । ननु सङ्कलनाभावे कुतो वा आकाङ्क्षानुसारेण बुध्यारोहो न भवेदित्यत आह **यदीदमिति । प्रत्येकमिति** । उत्तरोत्पत्तिमात्रेण पूर्ववस्तुविनाशस्य कार्यकारणयोरेककालीनत्वाभावस्य कार्यकारणयोरसम्बद्धस्य चेत्यर्थः । **सर्वत्रेति** । "न संस्कारार्पकत्वं च युज्यते कस्यचित् क्वचित्" 'पूर्वसंस्कारयोगी स्यादुत्तरो नियमेन च । असम्बद्धः कथं पूर्वं उत्तरे वासनाकरः' इत्यत्र सर्वत्रेत्यर्थः । **उक्ताकाङ्क्षाकुण्ठितत्वमेवेति** । नन्वस्तूत्तरोत्पाद एव पूर्वस्य निरोधः । तथाऽपि कुतः पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वम् । नन्वेककालीनत्वाभावेऽपि कुतः संस्कारार्पकत्वं न स्यादित्युक्ताकाङ्क्षाकुण्ठितत्वमित्यर्थः । **यथा सम्मत इति** । पञ्चककुसुमादिरित्यर्थः । **मृगमद इति** । कस्तूरिकेत्यर्थः । **वसनमिवेति** । सम्बन्धमिति शेषः । **ततो भिन्नकालीनत्वादिति** । तत्कालभिन्नकालवृत्तित्वादित्यर्थः । यो यत्र संस्काराधायकः सः तत्सम्बद्ध एव दृष्ट इत्यस्य व्यभिचारं शङ्कते **नन्विति । लाक्षारसाहितबीजपूरकुसुमलौहित्यवदिति** । बीजपूरस्य बीजानां लाक्षारसाधिवासने तन्मूले लाक्षारससेचने च बीजपूरकुसुमे लौहित्यमाधिक्येन उत्पद्यते । तत्र तदा कुसुमोत्पत्तिः न तदा लाक्षारस इति कुसुमासम्बद्धस्यैव यथा संस्काराधायकत्वं तथैवेत्यर्थः । **निरन्वयविनाशोत्पादानभ्युपगमादिति** । निरन्वययोः सम्बन्धशून्ययोः लाक्षारसबीजपूरकुसुमयोर्विनाशोत्पादानभ्युपगमादित्यर्थः । न सर्वात्मना लाक्षारसस्य पूर्वं नाशः । किन्त्वेकदेशेनैव । तदंशास्तु बीजे वृक्षात्मना परिणमते । तत्सम्बद्धाः तत्परिमाणे कुसुमे लोहित्यमादधति । एवञ्च लाक्षारसः कुसुमेनासम्बद्ध एव न नश्यति । नापि कुसुमं तदनन्वितमुत्पद्यत इत्यर्थः । तर्हि तत्पत्रेष्वेव रक्तिमा कुतो नाधीयत इति चेत् । त्वयापि समाधेयत्वात् । सौहार्दे तु अत एव जगत्पितरमीश्वरं अङ्गीकुरु मूढमते इत्युत्तरम् । ननु पूर्वक्षणवर्त्यात्मादिः उत्तरक्षणवर्तिनि तस्मिन् न संस्कारमादधति तेनासम्बद्धत्वात् । इत्याद्यनुमाने आश्रयासिद्धिः, कालभेदेन भावभेदस्यास्माकमसिद्धत्वात् । द्वितीयानुमानेऽप्याश्रयासिद्धिः स्वरूपासिद्धिश्च भिन्नकालीनत्वानभ्युपगमात् । तृतीयानुमानेऽप्याश्रयासिद्धिस्वरूपासिद्धी स्फुटे इत्यत आह **अत्र परसिद्धन्यायेनेति** । एवमनुमानं परस्यापाद्यत इति भावः ।

**शे०चं०—** 'कार्यकारणयोरेककालीनत्वं विने'त्यादिनोक्तस्यैव 'एककालतये'त्यादिनोत्तरत्राभिधानात् पौनरुक्त्यमाशङ्क्य परिहरति **उक्तमर्थमिति** । उक्तस्य सर्वस्यार्थस्यात्रानभिधानात् कथमस्य तत्सङ्कलनत्वमित्यतोऽपेक्षिताध्याहारेणोक्तसर्वार्थाभिधायकतया वाक्यं योजयति **अत्रेत्यादिना योजनेत्यन्तेन** । ननु किं सङ्कलनेनेत्यतो बुद्ध्यारोहार्थमित्येकं प्रयोजनं तावदुक्तमेव । प्रयोजनानन्तरमप्याह **यदीदमित्यादिना ॥ पूर्वोक्तानामिति** । 'उत्तरोत्पादमात्रेणे'त्यादिना 'उत्तरे वासनाकर' इत्यन्तेन श्लोकत्रयेणोक्तानामुत्तरोत्पाद एव विनष्टत्वकार्याभिन्नकालत्वकार्यासम्बद्धत्वानामित्यर्थः ॥ **सर्वत्र साध्यनिर्देशादिति** । उक्तहेतुत्रयप्रतिपादकश्लोकेषु 'न संस्कारार्पकत्वं च युज्यत' इत्यनेन, 'पूर्वसंस्कारयोगी स्यादि'त्यनेन, 'असम्बद्धः कथं पूर्वं उत्तरे वासनाकर' इत्यनेन पूर्वार्धोक्ततत्तद्धेतुसाध्यस्य निर्देशादित्यर्थः ॥ **उक्ताकाङ्क्षेति** । अस्तूत्तरोत्पाद एव पूर्वस्य निरोधस्तथाऽपि कुतः पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वमित्येककालीनत्वाभावेऽपि कुतः संस्कारार्पकत्वं न

स्यादिति चोत्थापिताप्रयोजकत्वशङ्काकुलितत्वमेवेत्यर्थः । यदि पूर्वहेतुद्वयमपि साक्षात्संस्कारानाधायकरूप-साध्यस्यैव साधकमित्यङ्गीक्रियते तत्रोक्ताप्रयोजकत्वशङ्काद्वयेन प्रतिबन्धः स्यात् । अत एव परम्परा सङ्कलनेन ज्ञापितेति भावः । अनुव्याख्याने सर्वत्र परमसाध्यनिर्देशस्तु सर्वथा पूर्वस्योत्तरे वासनाकरत्वं नास्तीति सूच-यितुम् । श्लोकत्रयोक्तानुमानेषु दृष्टान्ताभावेन यथाश्रुतहेतूनां यथाश्रुतसाध्यैर्व्याप्त्यसिद्धिं विपक्षे बाधकानुक्त्या अप्रयोजकतां चाशङ्क्य आकाङ्क्षानुसारेण अनुमानप्रयोगप्रक्रियां प्रदर्शयन् व्याप्त्यसिद्ध्यादिकं परिहरति **अत्रैत इति** ।। **पूर्वक्षण इति** । पूर्वक्षणमात्रावस्थायि कारणमित्यर्थः ।। **उत्तरेति** । उत्तरक्षणमात्रावस्थायिनि कार्य इत्यर्थः । अन्वयव्याप्तिमुक्त्वा व्यतिरेकव्याप्तिमप्याह **यद्वेति** । तथा च विशेषव्याप्त्यभावेऽपि सामान्यव्याप्ति-सद्भावान्न तदसिद्धिरिति भावः । अप्रयोजकत्वं परिहरति **असम्बद्धस्यापीति** । **मृगमदः** कस्तूरीरूपः । उक्तप्रसङ्गस्य व्याप्तिविकलत्वात् तर्काभासतामाशङ्क्य दृष्टान्ताभावेन विशेषव्याप्त्यभावेऽपि यदविशिष्टस्य यस्य यद्वत्ति तदविशिष्टस्यापरस्यापि तद्वतीत्यविशेषलक्षणव्याप्तिसद्भावान्न तस्याभासत्वमित्याशयवानविशेष-व्याप्तिमाह **अविशेषादिति** । अप्रयोजकत्वं परिहरति **भिन्नकालयोरिति** । अविशेषादिति भावः । ननु तदुत्पाद एव विनष्टस्यापि तेनैककालीनत्वमस्तु किं बाधकमित्यतो व्याहतत्वादुक्तशङ्कैव न भवितुमर्हति किं बाधक-कथनेनेत्याशयवानाह **प्रागेवेति** ।

ननु बीजपूरे लाक्षारससिक्ते सति तदीयकुसुमेषु लौहित्यमुत्पद्यत इति तावदविवादम् । नहि तत्र लाक्षारसस्य कुसुमेन सम्बन्धोऽस्ति । तदुत्पत्तेः प्रागेव तस्य नष्टत्वात् । तथा च कुसुमेनासम्बद्धस्यापि लाक्षारसस्य कुसुमेषु लौहित्याधायकत्ववत् उत्तरक्षणावच्छिन्नकार्येणासम्बद्धस्यापि पूर्वक्षणमात्रावस्थायिकारणस्य तत्र संस्काराधायकत्वं भविष्यत्येव, अन्यथा तेनासम्बद्धत्वहेतोर्लाक्षारसे व्यभिचारः स्यादित्याशङ्कते **नन्विति** । 'फलपूरो बीजपूरो रुचिको मातुलङ्गिके'त्यभिधानात् बीजपूरशब्दो मातुलङ्गपरः । लाक्षारसेनाहितं यद् बीज-पूरकुसुमलौहित्यमिति सम्बन्धः । कुसुमस्य कार्यात्मना स्वोत्पत्तेः प्रागसत्त्वेऽपि कारणात्मना सत्त्वमस्त्येव । तथा लाक्षारसस्य स्वनाशानन्तरं कार्यात्मनाऽसत्त्वेऽपि कारणात्मना सत्त्वमस्त्येव । 'असद्यत्कार्यरूपेण कारणा-त्मतयाऽस्ति ही'त्यादिना तथैव व्यवस्थापनात् । तथा च कार्यात्मनाऽसतो लाक्षारसस्य कार्यात्मना सता बीज-पूरकुसुमेन सह तेनाकारेण सम्बन्धविरहेऽपि कारणात्मना सतो लाक्षारसस्य तदात्मना सता कुसुमेन तेनाकारेण सम्बन्धसद्भावेनासम्बद्धस्य संस्काराधायकतायास्तत्रासम्मतेनर्नैकान्त्यं, नापि तद्दृष्टान्तेन प्रकृतेऽसम्बद्धस्यापि संस्काराधायकत्वसिद्धिरित्याशयवान् परिहरति **तत्रापीति** । ननु पूर्वक्षण उत्तरक्षणे संस्काराधायको न भवती-त्यादिप्रतिज्ञासु पूर्वक्षणपदार्थतयाऽभिमतस्य तन्मात्रावस्थायिनः पर्वतादेरनभ्युपगमेन तद्रूपस्य आश्रयस्यासिद्धे-राश्रयासिद्धिः, तथोत्तरपदार्थतयाऽभिमतोत्तरक्षणमात्रावस्थायिकार्यस्याप्रसिद्धेरप्रसिद्धविशेषणत्वं च स्यात् । तथा तेनासम्बद्धत्वादिहेतुत्रयस्य स्वरूपासिद्धिश्चेत्यत आह **अत्र च परसिद्धन्यायेनेति** ।

**वा०र०**— उत्तरे वासनाकरे इत्यादावुत्तर इति सप्तम्येकवचने स्मिन्नादेशाभावस्य उपपादनं 'ईळतेत्वा-मवस्यवः' इत्येतद् ऋग्भाष्यस्थोत्तराणां इत्येतट्टीकाव्याख्यावसरे गुरुपादकृतोपपादनानुसारेण द्रष्टव्यमित्याशयः ।

अत एव उत्तरस्मिन्नित्यपि टीकाव्यवहारः उत्तरभाष्यमूलव्याख्यानकाले भविष्यति । एवं 'परिहारेऽपि सिद्धत्वं दूषणम्' इत्येतद्भाष्यमूले 'परिहारेऽपि उत्तरेऽपी'त्यादिव्यवहारोऽपि तद्वदेव उपपाद्यः । **कस्तूरीति** । तत्रैव तच्छब्दस्य प्रयोगप्राचुर्यात् गुणशब्दाभिहितादेरपि प्राप्तिर्नेति भावः । **व्याप्तिविकलत्वादिति** । व्याप्तिविकलत्वात् प्राप्ता या तर्काभासता तामाशङ्क्येति योज्यम् । एवं तत्र तत्र योजनीयम् । **बीजपूर इति** । बीजपूरं यदोप्यते तदा लाक्षारसेन सेके कृते सतीत्यर्थः । बीजपूरांकुरे सिक्ते इति टीकान्तरे । **नष्टत्वादिति** । ततश्च भिन्नकालीनत्वात् असम्बन्धत्वमिति भावः । लौहित्याधायकत्वमित्यनेन संस्कारार्पणं विवृतं भवति । मूले निरन्वयविनाशोत्पादानभ्युपगमात् इत्यत्र विनाशोत्पादौ कस्येति न ज्ञायते । कारणीभूतलाक्षारसस्य इत्यङ्गीकारे लाक्षारसस्य निरन्वयविनाशाभावप्रतिपादनमात्रेण चारितार्थ्ये निरन्वयोत्पादाभावप्रतिपादनानर्थक्यमित्यतः तदुभयं विवेकेनाह **कुसुमस्येत्यादिना** । अनेन कुसुमस्य निरन्वयोत्पादानभ्युपगमात् लाक्षारसस्य च निरन्वयविनाशानभ्युपगमात् इति योजना सूचिता भवति । लाक्षारसस्य निरन्वयविनाशे कुसुमस्य च निरन्वयोत्पादे सम्बन्धासम्भवं दर्शयंस्तदभावपक्षे सम्बन्धोपपत्तिं दर्शयति **तथा च कार्येति** । लाक्षारसविनाशानन्तरं कार्यात्मना लाक्षारसरूपेणासतो लाक्षारसस्य तदानीमेव कार्यात्मना च बीजपूरकुसुमरूपेणासता बीजपूरकुसुमेन सह तेनाकारेण लाक्षारसत्वबीजपूरकुसुमत्वाकारेण सम्बन्धविरहेऽपि लाक्षारसनाशानन्तरं कारणात्मना रसोपादानरूपेण सतो विद्यमानस्य लाक्षारसस्य तदात्मना कारणात्मना बीजपूररूपेण सता विद्यमानेन तत्कुसुमेन सह तेनाकारेण लाक्षारूपोपादानत्वबीजपूरत्वाकारेण सम्बन्धसद्भावेन लाक्षारसस्य स्वनाशानन्तरमपि बीजपूरकुसुमसम्बन्धस्यैव तत्र संस्काराधायकत्वस्वीकारेणासम्बद्धस्य तस्य तत्र तदाधायकतायाः असम्मतेः सम्बद्धस्यैव संस्काराधायकत्वमिति व्याप्तेः न लाक्षारसे व्यभिचारः इत्यर्थः ।

ननु निरन्वयविनाशाभावमात्रेण एव सम्बन्धः सिद्ध्यति । लाक्षारसस्य कारणात्मनाऽवस्थितस्य कुसुमकालीनतया तत्सम्बन्धोपपत्तेः । कुसुमस्य बीजपूररूपकारणात्मतया प्रागपि सत्त्वेन लाक्षारससम्बन्धसम्भवात् । तथा च उत्पादविनाशयोरन्यतरस्य निरन्वयत्वानभ्युपगममात्रेण सम्बन्धोपपादनसिद्धेः उभयोः तदभावाश्रयणेन कारणात्मना सतः इत्याद्युक्तरीत्या सम्बन्धोपपादनस्यानावश्यकतया तदर्थं उभयोः निरन्वयत्वानभ्युपगमाभिधानं अनर्थकम् ।

यदि च कारणविनाशानन्तरं संस्काराधायकत्वाभावः इत्यस्य लाक्षारसविनाशानन्तरमपि लौहित्याधानदर्शनात् व्यभिचार इत्येवं कारणविनाशानन्तरकाल एव सम्बन्धसदसद्भावविचारप्रक्रमानुसारेण लाक्षारससद्भावदशायामेव कुसुमस्य निरन्वयोत्पादाभावमात्रेण सम्बन्धोपपादनमशक्यमित्युच्यते । तर्हि कारणात्मना लाक्षारससद्भावमात्रेणोक्तरीत्या सम्बन्धोपपत्त्या निरन्वयोत्पादाभाववचनमनर्थकमेव । लाक्षारसनाशानन्तरमेव सम्बन्धानुपपत्तिप्रक्रमेऽपि लाक्षारसाहितसंस्कारस्थले तत्सत्तायामेव तेन कुसुमसम्बन्धेन संस्काराधानोपपत्तेः विनाशानन्तरं तेन संस्काराधानप्रसक्तेरेवाभावात् यदसत् न तत् उत्तरस्मिन् संस्काराधायकमिति व्याप्तेस्तत्र

व्यभिचार इति परोक्तव्यभिचारपरिहारोपपत्त्या लाक्षारसविनाशानन्तरं तस्य कारणात्मनाऽवस्थानार्थं निरन्वय-विनाशाभावावचनेऽपि निरन्वयोत्पादाभावोक्तिमात्रेण सम्बन्धोपपादनस्य शक्यत्वाच्च । तस्मादुभयाभाव-प्रतिपादनप्रयोजनाभावात् मूलं तदनुसारिटीका च दुर्घटेति चेत् ।

अत्र ब्रूमः । यत्तावदुक्तं विनाशोत्पादयोरन्यतरस्य निरन्वयाभावप्रतिपादनमात्रेण पूर्वस्योत्तरसम्बन्धः सम्भवतीति । तत्तथैव । किन्तु लाक्षारसविनाशानन्तरं सम्बन्धाभावे शङ्किते कार्यस्य कार्यात्मना सत्त्वाभावकाले सम्बन्धानुपपत्तिप्रसक्तावपि तयोः कारणात्मना सत्त्वदशायां सम्बन्धोपपत्तिं प्रतिपादयितुं तावदुभयोः निरन्वय-त्वाभावप्रतिपादनमावश्यकमेव । लाक्षारसविनाशानन्तरसम्बन्धोपपत्तौ निरन्वयोत्पादाभावस्येव निरन्वयविनाशा-भावस्यापि उपयोगात् । तेन एतत्प्रकारस्यापि युक्तत्वात् मूलात् मुखतः प्रतीतेश्च तदुपपादनटीकोपपत्तिः । यदि च उक्तविधयाऽन्यतरनिरन्वयत्वाभावाश्रयणेन सम्बन्धोपपादनसम्भवः तर्हि तत्प्रकारद्वयमप्यस्तु । मूले निरन्वयो-त्पादविनाशाभाववचनस्य प्रकारान्तरसूचकत्वसम्भवेन प्रकारत्रयेण सम्बन्धोपपादनपरतया मूलव्याख्यानसम्भ-वात् । टीकायामपि लाक्षारसविनाशानन्तरं सम्बन्धोपपादनायोक्तविनाशोत्पादाभावानुसारेण द्वयोरपि कारणात्मतया सम्बन्धोपपादनेऽपि प्रकारान्तरनिषेधाभावात् कुसुमस्य कार्यात्मनेत्यादिना तत्सूचनाच्च पक्षत्रयपरतयैव टीका-व्याख्यानसम्भवात् । अत एव असद्यत्कार्यरूपेणेति वचनोदाहरणम् । तद्वचनबलेन कार्यात्मना स्थितस्य कारणस्य कारणात्मना स्थितेन कार्येण सम्बन्धस्य कारणात्मनैव स्थितयोः सम्बन्धस्य कारणात्मना स्थितस्य कारणस्य कार्यात्मना स्थितेन कार्येण सम्बन्धस्य च लाभोपपत्तेः । अथवा उक्तान्यतरनिरन्वयत्वाभावप्रतिपादनेन सम्बन्धोपपादनपक्षद्वयस्य उपलक्षणा टीकायामभिप्रेतेति सर्वमनवद्यम् ।

**स०व्र०— पूर्वोक्तानामिति** । कार्योत्पाद एव विनष्टत्वकार्यभिन्नकालीनत्व-कार्यासम्बद्धत्वाना-मित्यर्थः । **सर्वत्रेति** । उत्तरोत्पादमात्रेण विनाशात्पूर्ववस्तुनः' इत्यत्र, 'न संस्कारार्पकत्वमि'त्यत्र 'कार्य-कारणयोश्चैककालीनत्वं विना कथमि'त्यत्र 'पूर्वसंस्कारयोगी स्यादुत्तर' इत्यनेन 'सम्बद्धा एवे'त्यत्रापि 'असम्बद्धः कथं पूर्व उत्तरे वासनाकर' इत्यनेन साध्यनिर्देशादित्यर्थः । **उक्ताकाङ्क्षेति** । न तेषां प्रत्येकं संस्कारानाधायकत्वे लिङ्गत्वम् । पूर्वक्षणः उत्तरक्षणे संस्कारानाधायकः, तदुत्पाद एव विनष्टत्वादित्यनुमानस्य, अस्तूत्तरोत्पाद एव पूर्वस्य निरोधः तथापि पूर्वस्योत्तरस्मिन् संस्काराधायकत्वं किं न स्यादित्युक्ताप्रयोजकत्वाकाङ्क्षाकलुषितत्वेन तदसाधकत्वात् । एवं भिन्नकालत्वान्न पूर्वस्योत्तरस्मिन् संस्काराधायकत्वम्, इत्यत्रापि एककालीनत्वाभावेऽपि कुतः संस्कारार्पकत्वं न स्यादित्यप्रयोजकत्वशङ्कायां तस्यापि तत्र साक्षात्साधकत्वानुपपत्तेरिति भावः । अन्वय-व्याप्तिमुक्त्वा व्यतिरेकव्याप्तिमाह **यद्वेति** । ननु तदुत्पाद एव विनष्टत्वेऽपि तेनैककालीनत्वमस्त्वित्यप्रयोजकत्वं स्यादेव इत्यतो व्याहतत्वान्नेयं शङ्का युक्ता इत्याह **प्रागेवेति** ॥ **नन्विति** । लाक्षारसेनाहितं यद् बीजपूर-कुसुमलौहित्यमिति सम्बन्धः । तथा च कुसुमेनासम्बद्धस्यापि लाक्षारसस्य कुसुमलौहित्याधायकत्ववत् प्रकृते-ऽप्यसम्बद्धस्यापि संस्काराधायकत्वमिति भावः । कुसुमस्य कार्यात्मनाऽसत्त्वेऽपि कारणात्मना सत्त्वेन

तत्सम्बद्धलाक्षारसस्यैव तत्र लोहित्याधायकत्वं न असम्बद्धस्येति न दोष इति परिहरति **तत्रापीति** । तथा च तत्र कारणविशेषेण तदुपपत्तावपि प्रकृते तदभावात् संस्कारानुपपत्तिरेवेत्यर्थः । ननु च तदुत्पाद एव विनष्ट-त्वादित्ययुक्तम् । तस्य स्वयमनभ्युपगमादित्यत आह **अत्र चेति** ।

**विठ०**— ननु 'उत्तरोत्पत्तिमात्रेणे'ति 'कार्यकारणयोश्चे'ति 'सम्बन्ध एव संस्कार' इति श्लोक-त्रयोक्तार्थस्य कुतः सङ्कलनं कार्यम् । न हि बुद्ध्यारोहाय तत्र सङ्कलनं क्रियत इति वाच्यम् । प्रज्ञावतां स्वत एवैकबुद्ध्यारोहसम्भवात् । अन्यथा सर्वत्राप्येवं तत्र तत्र सङ्कलनं कर्तुं स्यादित्यत आह **यदीदमिति** । **तदा पूर्वोक्तानामिति** । पूर्वश्लोकत्रयोक्तानामुत्तरोत्पाद एव नष्टत्वकार्याभिन्नकालीनत्वकार्यासम्बद्धत्वरूपाणां हेतूनां प्रत्येकं स्वातन्त्र्येण संस्कारानाधायकत्वे हेतुत्वं ज्ञायेत । कुतः उक्तहेतुत्रयप्रतिपादकश्लोकेषु 'न संस्कारा-पकत्वमि'ति, 'पूर्वसंस्कारयोगी स्यादि'ति, 'उत्तरे वासनाकर' इति च सर्वत्र संस्कारानाधायकत्वरूपसाध्य-निर्देशादित्यर्थः । अस्त्वेवं संस्कारानाधायकत्वं प्रति त्रयाणामपि प्रत्येकं हेतुत्वं ततश्च को दोष इति शङ्कते **तत्र को दोष इति** । परिहरति **उक्ताकाङ्क्षेति** । नन्वस्तूत्तरोत्पाद एव पूर्वनिरोधः । तथाप्युत्तरस्मिन् पूर्वस्य कुतः संस्कारानाधायकत्वमिति । अस्त्वेककालीनत्वाभावः । तत्कुतः संस्कारानर्पकत्वमिति चोक्ताप्रयोजकत्वशङ्का-कुण्ठितत्वमेवेत्यर्थः । तथाच यदि पूर्वहेतुद्वयमपि साक्षात्संस्कारानाधायकस्यैव साधकमित्यङ्गीक्रियते । तदोक्ता-प्रयोजकत्वशङ्काद्वयेन प्रतिबन्धः स्यान्न चैवं किन्तु परम्परयोपपद्योपपादकभावेन अतो न दोष इति ज्ञापनाय सङ्कलनमिति भावः । मूलश्लोकत्रये संस्कारानाधायकत्वरूपपरमसाध्यनिर्देशस्तु सर्वथा पूर्वस्योत्तरे वासनाकरत्वं नास्तीति सूचयितुमिति ज्ञातव्यम् । **मृगमदः** कस्तूरी । **वसनं** वस्त्रम् । ननु बीजपूरशब्दवाच्यदाडिमाङ्कुरे लाक्षारससेके कृते कालान्तरभाविन्यपि तदीयकुसुमे लौहित्यातिशय उत्पद्यते । अतो भिन्नकालीनत्वहेतोस्तत्र विद्यमानत्वेऽप्यसम्बद्धत्वरूपसाध्याभावाद्व्यभिचार इत्याशयेन शङ्कते **ननु लाक्षारसेति** । बीजपूरो नाम बहि-र्बीजोपेतचूतवृक्षः तत्कुसुमे स्वभावतः शुक्लेऽपि तदङ्कुरे लाक्षारससेकेऽतिरक्तकुसुमोत्पत्तिरित्यप्याहुः । तत्रापि न लाक्षारसस्यान्तत विनाशः । किं नाम लाक्षारसो बीजपूराङ्कुरतः प्रनिःसृतसम्बन्ध एव कुसुमलौहित्ये हेतुरुपपद्यत इति नानैकान्त्यमित्याशयेन परिहरति **नेति** । **निरन्वयमिति** । लाक्षारसस्याङ्कुरे निरन्वयं सूक्ष्मरूपेण सम्बन्धं विना विनाशस्य रसान्वयं विना कुसुमोत्पादस्यानभ्युपगमादित्यर्थः । ननु पूर्वक्षण उत्तरक्षणे संस्काराधायको न भवतीत्यनुमाने तत्तत्क्षणमात्रावस्थायिपर्वतादिपदार्थानामेव विवक्षितत्वात् क्षणिकवस्तूनामस्माभिरनङ्गीकारा-दाश्रयासिद्धिः द्वितीयतृतीयानुमानयोर्हेतोः स्वरूपसिद्धिः अस्माभिः पूर्वोत्तरक्षणावस्थायिपदार्थस्योत्तरक्षणे विन-ष्टत्वस्यानङ्गीकारादित्यत आह **अत्र परसिद्धन्यायेनेति** ।

**चषकः**— **लाक्षारसाहितेति** । लौहित्यविशेषणम् ।

* * *

॥ अथ च तत्र क्षणभङ्गनये सर्ववस्तूनां क्षणमात्रावस्थायित्वस्य स्वीकृतत्वम् ॥

६६ **सु०**— 'भवेदेतद्यदि कारणस्य कार्योत्पाद एव विनाशः स्यात्, स एव कुतः सिद्धः' इत्यत आह **क्षणमात्रमिति** ।

## अनु०— क्षणमात्रमवस्थानं स्वीकृतं सर्ववस्तुषु ।

कार्यकारणयोस्तावदुत्तरपूर्वत्वमावश्यकम्, यौगपद्ये कार्यकारणभावव्याघातात् । ततः पूर्वक्षणवर्ति कारणं यदि कार्यक्षणेऽपि स्यात् तदा सर्ववस्तूनामङ्गीकृतं क्षणमात्रमवस्थानं भज्येत । अतः क्षणिकत्वाभ्युपगम एवोत्तरोत्पादे च पूर्वनिरोधं गमयतीति ।

**यादु०**— तदा सर्ववस्तूनामिति । द्विक्षणावस्थायित्वप्राप्त्येत्यर्थः ।

**शे०चं०**— **भवेदेतदिति** । कारणस्य कार्येणासम्बद्धत्वमित्यर्थः । ननु च कार्यकारणयोर्यौगपद्याश्रयणेनापि क्षणमात्रावस्थायित्वनिर्वाहान्न तेन तदुत्पाद एव पूर्वस्य विनाशसिद्धिरित्यत आह **कार्यकारणयोरिति** ॥ **यौगपद्य इति** । तथा सति कारणत्वव्यापकस्यानन्यथासिद्धनियतपूर्ववृत्तित्वस्य कार्यत्वव्यापकस्य चानन्यथासिद्धनियतपश्चाद्भावित्वस्य च प्रकृते व्यावृत्त्या तद्व्याप्यकारणत्वकार्यत्वयोरपि व्यावृत्तिध्रौव्यादिति भावः ।

**विठ्ठ०**— ननूत्तरोत्पादे पूर्वस्य विनष्टत्वं न परस्यापि सम्मतं तत्कथं परसिद्धन्यायेन तस्य हेतूकरणमित्याशङ्क्य तदुत्तरतयोत्तरमूलमवतारयति **भवेदेतदित्यादिना** ।

* * *

॥ अथ च तत्रान्ते तन्मते क्षणस्य पूर्वमध्यापरविभागरहितत्वोक्तत्वात्
तद्विभागबलादपि संस्काराधायकत्वायोगः ॥

६७ **सु०**— 'स्यादेतत्, कारणं क्षणस्य पूर्वविभागे लब्धसत्ताकं मध्यविभागे कार्यमुत्पाद्य अपरविभागे तत्र संस्कारमाधाय नश्यतीत्यङ्गीकारे न कोऽपि दोषः' इत्यत आह **पूर्वेति** ।

## अनु०— पूर्वमध्यापरकलाविकलः क्षण इष्यते ।

**अत्र विभागमात्रं कलोच्यते । पूर्वापरयोरभावे तन्निरूप्यमध्याभावः सिद्धः । इष्यते सौगतैः ।**

**परि०**— षोडशो भागः कलेति भ्रान्तिं निराह **अत्रेति** । अत्र भागमात्रं कलोच्यते । अन्ये तु 'अष्टादशनिमेषास्तु काष्ठास्त्रिंशत्तु ताः कलाः । तास्तु त्रिंशत्क्षण' इत्युक्तेः कथं क्षणे कलादिराहित्योक्तिरित्यत आह **अत्रेति** व्याचक्षते । पूर्वोत्तरकलावैकल्यस्यैव परेणोक्तेः कथं मध्यवैकल्यानुवाद इत्यत आह **पूर्वापरयोरिति** ॥ ***परोक्ततर्कस्य प्रतितर्कपराहत्युक्तिः*** ॥

**यादु०**— ननु 'अष्टादशनिमेषास्तु काष्ठास्त्रिंशत्तु ताः कलाः । तास्तु त्रिंशत्क्षण' इति वचनात् कथं क्षणं पूर्वमध्यापरकलाराहित्यमुच्यत इत्यत आह **अत्र विभागमात्रमिति** । न तूदाहृतवचनोक्तकालविशेष इत्यर्थः । ननु पूर्वापरविभागयोरिव मध्यविभागस्याप्यभावे क्षणस्य शून्यतापत्तिरत आह **पूर्वापरयोरिति** । न स्वरूपेण मध्यमविभागाभावोऽभिधीयते येन क्षणस्य शून्यतापत्तिः, अपि तु तस्मिन्मध्यमत्वाभाव एव । तस्य पूर्वापरविभागनिरूप्यत्वेन तदभावेऽभावादित्यर्थः । ननु क्षणे पूर्वमध्यापरविभागानां प्रामाणिकैरङ्गीकृतत्वात् कथमतादित्यत आह **सौगतैरिति** ।

**श्रीनिधि०**— ननु 'कला तु षोडशो भाग' इति प्रसिद्धं, तथा च तृतीयभागे कथं कलात्वव्यवहार इत्यत आह **अत्र विभागमात्रमिति** । न तु विभक्तैकदेशोऽपीति मात्रार्थः । लक्षणयेयं अनुपपत्तिः उक्तैव । सम्बन्धः स्फुटः । एवं च मूलस्य पूर्वमध्यापरभागरहित इत्यर्थः ।

**शे०चं०**— **न कोऽपि दोष इति** । कार्यकारणभावव्याघातलक्षणो वाऽसम्बन्धप्रयुक्तः संस्कारानाधानलक्षणो वेत्येवं न कोऽपि दोष इत्यर्थः । ननु 'अष्टादशनिमेषास्तु काष्ठास्त्रिंशत्तु ताः कलाः । तास्तु त्रिंशत्क्षणा' इति स्मरणात् क्षणस्य पूर्वमध्यापरकलाराहित्याभ्युपगमेऽपि सभागत्वमात्राभ्युपगमान्न दोष इत्यत आह **अत्रेति** । न तूदाहृतवचनेनोक्तः कालविशेष इत्यर्थः । ननु पूर्वोत्तरविभागयोरिव न मध्यविभागस्याप्यभावोऽभ्युपगन्तुं शक्यते । तथा सति क्षणस्य निःस्वरूपत्वेन शून्यत्वापातादित्यतो नात्र स्वरूपेण मध्यविभागभावोऽभिधीयते, येन क्षणस्य शून्यतापत्तिरपि तु तस्मिन्मध्यत्वाभाव एव । तस्य पूर्वापरविभागनिरूप्यत्वेन तदभावेऽभावनियमादित्याह **पूर्वापरयोरिति** । ननु च क्षणे पूर्वमध्यापरविभागानां प्रामाणिकैरङ्गीकारात् कथं तदनङ्गीकारोक्तिरित्यत आह **सौगतैरिति** ।

**वा०र०**— अष्टादशनिमेषास्तु इत्येतद्विषये पूर्वाधिकरण एवोक्तम् ।

**स०व्र०**— ननु क्षणस्यानेकभागात्मककलाराहित्याभ्युपगमेऽपि सभागत्वमात्राभ्युपगमान्न दोष इत्यत आह **अत्रेति** ॥ ननु पूर्वोत्तरभागयोरनभ्युपगमेऽपि मध्यत्वमङ्गीकार्यम् । अन्यथा निरस्वरूपत्वेनासत्त्वापातात् ।

तथा च कथं मध्याभावाभिधानमित्यतो नात्र स्वरूपेण तदभावोऽभिधीयते, येनासत्त्वापत्तिः । अपि तु मध्यत्वाभाव एव । तस्य पूर्वापरनिरूप्यस्य तदभावेऽभावनियमादित्याह **पूर्वापरयोरिति** । क्षणेऽप्यनेकविशेषाणां प्रामाणिकैरभ्युपगमात् कथं विकल इष्यत इत्युक्तिः इत्यत आह **सौगतैरिति** ।

**वि॰**— ननु 'अष्टादशनिमेषास्तु काष्ठांस्त्रिंशत्तु ताः कलाः । तांस्तु त्रिंशत्क्षण' इति वचनात् कथं पूर्वमध्यापरकलाराहित्यं क्षणस्योच्यत इत्यत आह **अत्र विभागमात्रमिति** । षोडशो भागः कलेति भ्रान्तिं वारयति **अत्रेति** । ननु पूर्वापरभागयोरिव मध्यभागस्याप्यभावे क्षणस्य शून्यतापत्तिरित्यत आह **पूर्वापरयोरिति** । नात्र शून्यतापादकमध्याभावोऽभिधीयते । किन्तु पूर्वापरभागाभावात् तन्निरूपितमध्यभागाभाव एव । अतोऽस्तित्वं तद्रीत्योपपद्यत इति भावः ।

**।। इति तन्मते क्षणस्य पूर्वमध्यापरविभागरहितत्वोक्तत्वात्**
**तद्विभागबलादपि संस्काराधायकत्वायोगः ।।**
**।। इति क्षणभङ्गनये सर्ववस्तूनां क्षणमात्रावस्थायित्वस्य स्वीकृतत्वम् ।।**
**।। इति सम्बद्धानामेवान्यत्र संस्काराधायकत्वनियमात्, भिन्नकालीनयोश्च सम्बन्धायोगात्**
**क्षणिकत्वानुमानेऽपि संस्काराधानार्थं कार्यकारणयोरेककालीनत्वनियमोऽबाधितः ।।**
**।। इति कार्यकारणयोरेककालीनत्वं विना उत्तरस्य पूर्वसंस्कारयोगित्वाभावात्**
**पूर्वस्योत्तरस्मिन्संस्कारानाधायकत्वम् ।।**
**।। इति क्षणभङ्गनये 'पूर्ववस्तुन उत्तरोत्पत्तिमात्रेण विनाशात् संस्कारार्पकत्व'ायोगः, तस्माच्च**
**पक्षधर्मताज्ञानाद्ययोगात् अनुमानादिलौकिकव्यवहारस्याप्ययोगः ।।**
**।। इति द्वितीयसूत्रोक्तस्य 'क्षणभङ्गनये कार्यकारणभावायोग'स्य समर्थनम् ।।**
**।। इति तृतीयसूत्रार्थप्रदर्शनम् ।।**

* * *

**।। अथ चतुर्थसूत्रार्थप्रदर्शनम् ।।**
**।। अथ तत्र स्थायिन इव क्षणिकस्यापि सत्त्वानुपपत्तेः अननुकूलता नाम तर्कदोषः ।।**

६८ **सु॰**— एवं तर्कस्य प्रतितर्कपराहतिमभिधाय इदानीं यथा 'स्थायिनः सत्त्वानुपपत्तिः' एवं 'क्षणिकस्यापि तदनुपपत्तेरननुकूलता नाम तर्कदोषः' इति प्रतिपादयितुं सूत्रम् **'ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॐ'** [२-२-७-४(८)] इति । तद्व्याचक्षाणस्तावद्विकल्पेन तत्पृच्छति **पूर्वेति** ।

**अनु॰— पूर्वभावभवं कार्यमुत तन्नाशसम्भवम् ।**

अर्थक्रियाकारित्वं हि सत्त्वं परस्याभिमतम्, तच्च वक्ष्यमाण(वि)कल्पद्वय(येन )-व्याप्तं तृतीयप्रकारानिरूपणात्; न च तत्क्षणिके सम्भवति । तथा हि क्षणिकाद्भावाद्भवत्कार्यं किं पूर्वस्य कारणस्य भावे भवति, कारणसत्तासमानकालीनसत्तमिति यावत्; उत तस्य कारणस्य नाशे सति सम्भवतीति ।

आद्ये दोषमाह **यौगपद्यमिति** ।

## यौगपद्यं सति भवेदुत्पाद्यानामशेषतः ।

**सति** कारणे । '**कार्यं भवति चेत्**, तर्ही'ति शेषः । क्षणिकं हि कारणम् । कार्यं च तत्सत्तासमानकालीनसत्तं चेत् कार्यकारणयोः सहोत्पाद इत्युक्तं स्यात् । क्षणे विभागाभावस्योक्तत्वात् तत्तत्कार्याणामप्ययमेव न्याय इति तत्सन्तानभाविना(प्य)**मशेषकार्याणां यौगपद्यं** स्यात्, तच्च प्रत्यक्षादिविरुद्धमिति ।

अत्र यद्यपि युगपद्भवतोः कार्यकारणभावानुपपत्तिरपि दूषणं तथाऽपि तच्छिष्यैरेव ज्ञातुं शक्यत इति, '**उभयथा च दोषादि**'ति [२-२-७-६(८)] सूत्रे कथितमिति वा(चा)त्र नोक्तम् ।

द्वितीयं निराकरोति **विनाशे चेदिति** ।

## अनु०— विनाशे चेन्न तत्कार्यम्

कारणस्य, '**कार्यं भवेत्** तर्ही'ति शेषः । **तत्** तस्य, **कार्यं, न,** भवतीत्यापन्नम् । अन्यथा सर्वस्य सर्वं कार्यं स्यात् । न ह्यानन्तर्यमात्रेण कार्यकारणभावः, तथात्वे विनाशकार्यत्वप्रसङ्गात्, आनन्तर्यस्यान्यापेक्षयाऽपि सत्त्वात्, सादेश्यादेरपाकृतत्वात् ।

एवमन्यस्यापि कार्यं न भवतीति न कार्यं स्यादकारणं वा । उभयथाऽपि पूर्वस्यार्थक्रियाविरहादसत्त्वप्राप्तिरिति ।

**परि०— इति सूत्रे कथितमिति** । सूत्रार्थस्तन्त्रदीपिकायां व्यक्तः ॥ **इति शेष इति** । तत्र कारणस्येत्यस्य विनाशे चेदित्यनेनान्वयः ॥ **अन्यथेति** । नष्टतया कारणस्याविद्यमानत्वे-

ऽप्युत्पद्यमानस्य तत्कार्यत्व इत्यर्थः । नियतानन्तर्यं वा यथाकथञ्चिदानन्तर्यं वा कार्यकारणभावे नियामकम् ।। आद्ये दोषः **तथात्व इति** । अन्त्ये दोषः **आनन्तर्यस्येति** । यद्वा कारणविनाशकाल एव कार्यस्योत्पत्तेः पौर्वापर्यभावाभावात् कथं विनाशकार्यत्वापादनमित्यत आह **आनन्तर्येति** । ननु समानदेशत्वं सादृश्यं वा नियामकं कार्यकारणभावे, अतो न 'सर्वं सर्वस्य कारणं स्यादि'त्युक्तदोष इत्यत आह **सादेश्यादेरिति** । 'विरलपरमाणुभ्यो मिलितानां, मिलितेभ्यश्च विरलानामुत्पत्त्यङ्गीकारादि'त्यादिनाऽपाकृतत्वादित्यर्थः ।

**यादु०— सूत्रे कथितमिति** । कारणे सति कार्यं भवत्येवेति नियमाङ्गीकारे दोषतया कथितमित्यर्थः । तथाहि भाष्यम् । 'कारणे सति कार्यं भवत्येवेति नियमे सर्वदा कार्यभावान्न कार्यकारणभावविशेष' इति ।। **अन्यथेति** । पूर्वमसतोऽपि कारणत्व इत्यर्थः । किं नियतमानन्तर्यं कार्यकारणभावे नियामकमुत यथा कथञ्चिदानन्तर्यमिति विकल्पं मनसि निधायाद्यं दूषयति **तथात्व इति** । द्वितीयं दूषयति **आनन्तर्यस्येति** । यथाकथञ्चिदानन्तर्यस्येत्यर्थः ।। **अन्यापेक्षयेति** । भिन्नदेशीयापेक्षया विसदृशापेक्षया चेत्यर्थः । सादेश्यादेरित्यत्रादिपदेन सादृश्यसङ्ग्रहः ।। **अपाकृतत्वादिति** । 'विरलपरमाणुभ्यो मिलितानां, मिलितेभ्यश्च विरलानामुत्पत्त्यङ्गीकारादि'त्यादिना अपाकृतत्वादित्यर्थः ।

**वं०प०— अन्यथा** पूर्वमसतोऽपि कारणत्वे । **सर्वं** पूर्वं विद्यमानम् । **सर्वस्य** पश्चाद्भाविनोऽपि पदार्थस्य, कार्यं स्यादित्यर्थः । **एवमन्यस्यापीति** । उक्तविकल्पाभ्यां कारणत्वेनाभिमतस्य कार्यं यथा न भवत्येवमन्यस्यापि कार्यं न भवतीत्यर्थः ।

**कं०रा०— अननुकूलतेति** । परानुकूलतेत्यर्थः । **तथात्व इति** । तदानन्तर्यमात्रेण तत्कार्यत्वे कारणनाशे सति भवतः कार्यस्य कारणानन्तर्यवद्विनाशानन्तर्यस्यापि सत्त्वेन विनाशकार्यत्वप्रसङ्गादित्यर्थः । तदानन्तर्यमात्रेण तत्कार्यत्वे स्थलान्तरेऽप्यतिप्रसङ्गमाह **आनन्तर्यस्येति** । नीलाद्यनन्तरभाविनि पीतादौ तदानन्तर्यस्य सत्त्वेन तस्य तत्कार्यत्वप्रसङ्गान्नानन्तर्यमात्रं कार्यकारणभावे नियामकमिति भावः । ननु नानन्तर्यमात्रं कार्यकारणभावनियामकं किन्तु सादेश्ये सारूप्ये वा सत्यानन्तर्यं एवं च नोक्तातिप्रसङ्ग इत्यत आह **सादेश्यादेरिति** । विरलपरमाणुभ्यो मिलितानां मिलितेभ्यश्च विरलानामुत्पत्तेः परेणाङ्गीकृततया सादेश्यादेः न कार्यकारणभावनियामकत्वमित्युक्तत्वात् तदादाय अतिप्रसङ्गनिरासं कर्तुमशक्य इति भावः । **एवमिति** । पूर्वनाशे भवदुत्तरं यथा पूर्वस्य कार्यं न भवति तथा अन्यस्यापि कार्यं न भवतीति न कार्यं स्यात् कार्यत्वेऽपि चोक्तन्यायेन पूर्वस्यान्यस्य वा कारणत्वायोगादकारणकं स्यात् । पक्षद्वयेऽपि पूर्वस्यार्थक्रियाकारित्वविरहादसत्त्वप्राप्तिरित्यर्थः ।

**श्रीनिधि०— अननुकूलता नामेति** । यद् विरुद्धपक्षाभ्युपगमे यस्यानुपपत्तिरापाद्यते । तदभ्युपगमेऽपि तन्न्यायेनैव तस्यानुपपत्तेरापादयितुं शक्यत्वे तस्यापादनस्याननुकूलतेत्यर्थः । **उभयथा च दोषादिति सूत्रे कथितमिति चेति** । तस्यायमर्थः । अर्थक्रियाकारित्वं सत्त्वं तदन्यथानुपपत्त्या क्षणिकत्वं भावानां इति वदन् प्रष्टव्यः । कारणे सति कार्यं भवत्येवेति नियमोऽस्ति न वेति । यद्यस्ति तदा कार्यस्यापि यावत्कारणभावित्वात् सव्येतरगोविषाणवन्न कार्यकारणभावः । नियमाभावे तत्काले अर्थक्रियाकारित्वाभावेन नासत्त्वापत्त्या न कदाऽपि कारणतः कार्योत्पत्तिः स्यात् । तथा च क्षणिकता व्याहन्यत इति । अन्यथा कारणविनाशकालीनस्यापि तस्य तत्कार्यत्वे सर्वं सर्वकार्यं स्यादित्युक्तम् । तदानन्तर्यस्य नियामकत्वादित्यत आह **न ह्यानन्तर्यमात्रेणेति** । मात्रपदेन तत्समवेतत्वं वा तत्परिमाणत्वं वा विनेत्याह **तथात्व इति** । आनन्तर्यमात्रस्य प्रयोजकत्व इत्यर्थः । **विनाशकार्यत्वप्रसङ्गादिति** । विनाशस्यापि स्वोत्पत्तिकाले सम्बन्धाभावादिति भावः । विनाशजन्यत्वं च परेणाङ्गीकृतमिति अनिष्टमिति भावः । अस्तु वाऽनन्तर्यं नियामकम् । तथापि सर्वं सर्वकार्यं स्यादित्युक्तातिप्रसङ्गस्तदवस्थ एवेति भावेनाह **आनन्तर्यस्येति** । **सादेश्यादे**रित्यादिपदेन सादृश्यमुच्यते । अस्तु तर्हि अन्यस्य कार्यमित्यत आह **एवमन्यस्यापीत्यादिना** । यथा कारणत्वाभिमतस्य कार्यं न भवतीत्युक्तम् । एवं तेनैव न्यायेन यस्य यस्य कार्यं भवत्वित्युच्यते तस्य सर्वस्यापि कार्यं न भवतीति हेतोः इदं न कार्यं स्यात् । कादाचित्कं न स्यात् । कादाचित्कत्वे वा अकारणकमेव स्यादित्यर्थः ।

**शे०चं०— वक्ष्यमाणकल्पद्वयव्याप्तमिति** । तदन्यतरव्याप्तमित्यर्थः । ननु वक्ष्यमाणप्रकारद्वयेनेव विधान्तरेणाप्यर्थक्रियाकारित्वसम्भवान्न तस्य तद्व्याप्यत्वमित्यतो वक्ष्यमाणप्रकारद्वयस्य परस्पराभावरूपतया अन्यतरनिषेधस्य अन्यतरविधिना नान्तरीयकत्वेन प्रकारान्तराभावात् तत्सिद्धिरित्यभिप्रेत्य विधान्तराभावमाह **तृतीयेति** । अस्त्वर्थक्रियाकारित्वस्य वक्ष्यमाणकल्पद्वयव्याप्यत्वं किं तावताऽपीत्यतः क्षणिकेऽर्थक्रियाकारित्वरूपसत्त्वव्यापकस्य वक्ष्यमाणकल्पद्वयस्यासम्भवेन व्यापकव्यावृत्त्या तद्व्याप्यस्यार्थक्रियाकारित्वरूपसत्त्वस्यापि व्यावृत्तिसिद्धेर्नाप्रयोजकत्वमित्यभिप्रेत्य क्षणिके सत्त्वव्यापकस्य पक्षद्वयस्यासम्भवमाह **न चेति** । किं तत्सत्त्वव्यापकं पक्षद्वयं कथं च तस्य क्षणिके असम्भवो येन सत्त्वानुपपत्तिः स्यादित्यतो व्यापकीभूतपक्षद्वयप्रदर्शनपूर्वकं तदसम्भवमुपपादयितुमाह **तथा हीति** । यौगपद्यमित्यादेराद्यपक्षानुवादतासिद्ध्यर्थमपेक्षितं पूरयति **सतीति** ॥ **उक्तत्वादिति** । 'पूर्वमध्यापरकलाविकलः क्षण इष्यत' इत्यादिनेति शेषः । ज्ञातुं शक्यत इतीत्यत्र नोक्तमित्यनेन सम्बन्धः । नन्वेवमतिप्रसङ्ग इत्यतोऽत्रानुक्तौ विशेषनियामकं चाह **उभयथा चेति** ॥ **कथ(थित)नमिति** । कारणे सति कार्यं भवत्येवेति नियमे सर्वदा कार्यभावात् न कार्यकारणभावविशेष इति भाष्यानुसारादित्यर्थः । **अन्यथेति** । पूर्वमसतोऽपि कारणत्वे कार्यत्वाभिमतस्यापि कारणत्वाभिमतमपि कार्यं स्यादित्यर्थः । ननु विनाशेऽपि पौर्वापर्यमात्रेण कार्यकारणभावव्यवस्था भविष्यतीत्यतः किमत्र तन्मात्रं नियामकं किं वा सादेश्यसारूप्यविशिष्टपौर्वापर्यमिति विकल्पद्वयं मनसि निधाय आद्यपक्षे दूषणमाह **नहीति** । **अन्यापेक्षयाऽपीति** । विनाशापेक्षयाऽपीत्यर्थः । द्वितीयं दूषयति **सादेश्यादेरिति** ॥ **अपाकृतत्वादिति** । 'विरलपरमाणुभ्यो

मिलितपरमाणूनां, मिलितपरमाणुभ्यश्च विरलानामनधिपतीन्द्रियेभ्योऽधिपतीन्द्रियाणामधिपतीन्द्रियेभ्यश्चानधिपतीन्द्रियाणामुत्पत्त्यङ्गीकारादि'त्यादिना पूर्वत्रेति शेषः । अङ्गीकृत्य पूर्वस्य कारणत्वमुत्तरस्य कार्यत्वं च तस्य तत्कार्यत्वं न स्यादित्यापादितम् । वस्तुतस्तु उत्तरस्य कार्यत्वमेव न स्यात् । पूर्वस्य च कारणत्वमेव न स्यात् । उत्तरस्य तत्कार्यत्वाभावस्योपपादितत्वात् तेनैव न्यायेन अन्यकार्यत्वाभावस्यापि वक्तुं शक्यत्वेन तस्य कार्यताया एवायोगात् पूर्वस्य चोत्तरकारणत्वाभावस्योपपादितत्वात् तन्न्यायेनान्यकारणत्वाभावस्यापि सिद्धत्वेन कारणत्वायोगादित्याशयवानाह **एवमिति** । अस्तूत्तरस्य तत्कार्यत्वाभावः पूर्वस्याकारणत्वं चेत्यत आह **उभयत्रापीति** । उत्तरस्य तत्कार्यत्वाभावे पूर्वस्य अकारणत्वे चेत्युभयत्रेत्यर्थः । तस्य तत्कार्यत्वाभावे तद्रूपार्थक्रियाविरहादकारणत्वे च सर्वथैवार्थक्रियाविरहादिति भावः ।

**वा०र०**— तर्कस्याननुकूलता नाम दोषः इत्यत्र अननुकूलता नाम प्रतिपक्षासाधकत्वं, प्रतिपक्षासाधकत्वस्य अननुकूलताशब्दार्थतया लक्षणटीकायामभिधानात् । दृश्यत्वहेतोरिवात्र तर्काङ्गभूतमननुकूलत्वं आपादकादिषु क्व वर्तमानमिति विचार्यम् । मम तु स्फुरति । आपादकाभिमतेनापाद्याभिमतस्यापादनानन्तरं विपर्ययपर्यवसानमावश्यकं अन्यथा प्रमित्यजनकत्वापत्तेः । विपर्ययपर्यवसानं चापाद्याभावेनापादकाभावसाधनरूपम् । तथा च विपर्यये पर्यवसन्नेनापाद्याभावेनापादकाभावस्येव परानिष्ठभूतापादकस्यापि साधनसम्भवो यत्र तत्र प्रतिपक्षसाधकत्वं तर्कस्य भवति । यत्र च तस्याभावः तत्राननुकूलत्वं भवतीति । इह त्वक्षणिकत्वेन सत्त्वाभावे आपादिते विपर्ययपर्यवसन्नेनापाद्येन क्षणिकत्वस्येव तेनैव क्षणिकत्वेन सत्त्वाभावे आपादिते सत्त्वाभावरूपापाद्यभावेनाक्षणिकत्वमपि साधयितुं शक्यमिति प्रतिपक्षसाधकत्वरूपमनुकूलत्वम् । न चैवमेवापादकं प्रत्यापादयितुं शक्यत इति आत्माश्रयत्वोपपादनपद्धतिवाक्यात् मदुक्तरीत्या व्याख्यानात् आपादक एवाननुकूलत्वमित्यपि यद्येवमपि नानिर्वचनीयत्वं ब्रह्मणः इत्येतत् तत्त्वोद्योतव्याख्यानप्रपञ्चेऽस्माभिः निरूपितम् । सार्वत्रिकप्रकारस्तु अत्रोक्त एव । तत्रापि अस्य प्रकारस्य वक्तुं शक्यत्वात् । तट्टीकायां इष्टाविघातित्वमनुकूलत्वं व्याख्यातम् । अखण्डब्रह्मतत्त्वमित्यस्य भङ्गे आगते इष्टविघातेन तर्कस्य प्रतिपक्षासाधकत्वात् । तत्रापि अयमेवार्थ इति द्रष्टव्यम् । विनाशे चेदिति भाष्यस्यापूर्णत्वात् शेषं पूरयति **कारणस्य कार्यं भवेत् तर्हीति शेष इति** मूलम् । कारणस्येत्यादिपदचतुष्टयं शेष इत्यर्थः । कारणस्य विनाशश्चेत् कार्यं भवेत् तर्हीति योजनेति भावः । **उभयथापीती**ति प्रतीकोपादानपाठः । एवं उभयथेत्यर्थ इत्यपि । क्वचित् उभयत्रेति मूलपाठात् तदनुसार्यपीति वा । उत्तरस्य तत्कार्यत्वाभावे पूर्वस्य तत्कारणत्वाभावे चेति उभयत्रेत्यर्थ इति पाठः । उत्तरवाक्ये एव तत्कार्यत्वाभावे अकारणत्वे चेति व्यवहारात् । युक्तत्वाच्च ।

**स०व्र०**— **उक्तत्वात्** 'पूर्वमध्यापरकलाविकल' इत्यादिना । नन्वानन्तर्यस्य अन्यविवक्षयाऽपि सत्त्वात् कारणविनाशेऽपि जायमानकार्यं तत्कार्यं न स्यात् । किं तु विनाशकार्यं स्यादित्यापादनमयुक्तम् । पश्चाद्भावमात्रस्यातिप्रसक्तत्वेऽपि कारणत्वे सादेश्यसारूप्ययोर्नियामकत्वाभ्युपगमेन सादेश्यादेर्विनाशादिनाऽभावेन

तदकार्यत्वसम्भवादित्यत आह **सादेश्यादेरिति** । 'विरलपरमाणुभ्यो मिलितानां मिलितेभ्यश्च विरलानां तथा अनधिपतीन्द्रियेभ्योऽधिपतीन्द्रियाणां तेभ्यश्च अनधिपतीन्द्रियाणामुत्पत्त्यङ्गीकारादि'त्यादिना सादेश्यादेरपाकृतत्वादित्यर्थः । **एवमिति** । विपर्ययपर्यवसाने बाधात् विपर्ययापर्यवसायित्वमित्येवमित्यर्थः । स्थायित्वप्रमाणस्य निर्बाधत्वस्य व्युत्पादितत्वात् । तावतैव विपर्ययापर्यवसानादेः सिद्धत्वेन पृथग्व्युत्पादनस्याकर्तव्यत्वादेवमित्यतिदेशमात्रं कृतमिति भावः ।

**वि़ठ०— न च तदिति** । तद्विकल्पद्वयं पदार्थानां क्षणिकत्वपक्षे न सम्भवतीत्यर्थः । **सूत्रे कथितमिति** । कारणे सति कार्यं भवत्येवेति सर्वदा कार्याभावान्न कार्यकारणभावविशेष इति भाष्ये युगपद्भवतोः कार्यकारणभावानुपपत्तिरिति दूषणं सूत्रार्थतयोक्तमित्यर्थः । **अन्यथेति** । कारणस्य नाशात् तदविद्यमानतादशायामुत्पद्यमानस्य तत्कार्यत्व इत्यर्थः । ननु नायं दोषः यद्यनन्तरभावि तत्तस्य कार्यमित्यङ्गीकारादिति चेदत्र वक्तव्यं किं नियतानन्तर्यं कार्यकारणभावे नियामकं उत यथाकथञ्चिदानन्तर्यमिति विकल्पं मनसि निधायाद्ये दूषणमाह **तथात्व इति** । विनशनक्रियाकार्यत्वप्रसङ्गात् । क्षणिकत्वपक्षे विनाशानन्तर्यस्य नियतत्वादिति भावः । द्वितीये दूषणमाह **आनन्तर्यस्येति** । यथाकथञ्चिदानन्तर्यस्य यत्किञ्चिद्वस्त्वपेक्षयापि सत्त्वाद्यत्किञ्चिदपि यस्य कस्यचित्कार्यं स्यादिति भावः । ननु समानदेशत्वं सादृश्यं वा कार्यकारणभावे नियामकं अतो नोक्तातिप्रसङ्ग इत्यत आह **सादेश्यादेरिति** । विरलपरमाणुभ्यो मिलितानां मिलितेभ्यो विरलानामुत्पत्त्यङ्गीकारादित्यादिना निराकृतत्वादिति भावः । आनन्तर्यस्यान्यापेक्षयापि सत्त्वेऽन्यकार्यत्वं च भवतु को दोष इत्यत आह **एवमन्यस्यापीति** । वक्तृविकल्पदोषादित्येवं शब्दार्थः । **न कार्यं स्यादिति** । एवं च पूर्वभाविनः कारणत्वासम्भवे उत्तरे कार्यत्वमेव न स्यात् । अकार्यत्वे च कारणरहितमेव स्यात् । एवं पक्षद्वयेऽपि पूर्वभाविनोऽर्थकारित्वाभावात् सत्त्वमेव न स्यात् । अर्थक्रियाकारित्वमेव हि सत्त्वं तथा च असत्त्वमेव स्यादित्यर्थः ।

* * *

**॥ अथ तत्रादौ सूत्रकृद्भाष्यकृतोरत्र दूषणकथने क्रमव्यत्यासनिमित्ता अर्थविरोधशङ्का, विवक्षाभेदेन तच्छङ्कापरिहारश्च ॥**

६९ **सु०— सूत्रकृता सौगताभ्युपगतं पक्षं प्रधानीकृत्य दूषणमुक्तम्, भाष्यकृता त्वभावस्य भावसापेक्षत्वात् तेन क्रमेण, अतोऽर्थविरोधाभावः ।**

**परि०—** 'असति प्रतिज्ञे'ति सूत्रानुरोधाद्विनाशे चेदिति कल्पस्य पूर्वमुक्तिः स्यादित्यत आह **सूत्रकृतेति** ।

**कं०रा०— सूत्रकृतेति** । कारणे विनष्टे कार्यं भवतीति सौगताभ्युपगतं पक्षं प्रधानीकृत्य तस्य दूषणमसति प्रतिज्ञोपरोध इति सूत्रकृता प्रथममुक्तं, तदनभ्युपगतस्य कारणे सति कार्यं भवतीति पक्षस्य तु अप्रधानत्वात् यौगपद्यमन्यथेति पश्चाद्दूषणमुक्तम् । भाष्यकृता तु भावाभावयोर्भावस्याभावनिरूपकत्वेन प्रधानत्वात् कारणे सति कार्यं भवतीति भावघटितपक्षस्य 'यौगपद्यं सति भवेदुत्पाद्यानामशेषत' इति प्रथमं दूषणमुक्त्वा कारणविनाशे कार्यं भवतीत्यभावघटितपक्षस्य 'विनाशे चेन्न तत्कार्यमि'ति पश्चाद्दूषणमुक्तम् अतो न कश्चिद्दोष इति भावः ।

**श्रीनिधि०—** ननु 'असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा' इति सूत्रेण असति कारणे कार्यमुत्पद्यत इति पक्षः प्रथमं दूषितः । अनन्तरं कारणे सतीति पक्षः । अत्र तु वैपरीत्येनेति सूत्रविरुद्धं भाष्यमिति चेत् किमर्थतो विरोधः किं वा क्रममात्रस्य । द्वितीयस्त्विष्यत एव । अप्रामाण्यहेतुत्वादुभयोरप्याशयभेदेनाप्रेक्षा-वत्त्वाभावाच्चेत्याह **सूत्रकृतेति** । **अभावस्येति** । असत्त्वस्य सत्त्वाभावरूपत्वादिति भावः । नाद्य इत्याह **अत इति** । येनाप्रामाण्यं स्यादिति भावः ।

**शे०चं०—** ननु विकल्पितपक्षद्वयदूषणपरत्वात् 'असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा', 'यौगपद्यं सति भवेदि'त्यादि सूत्रभाष्ययोः, सूत्रे पक्षद्वयदूषणे यः क्रमस्तेनैव भाष्ये भवितव्यम् । भाष्ये वा यस्तत्र क्रमस्तेनैव सूत्रेऽपि भवितव्यम् । तत्कथं पक्षद्वयनिरासपरसूत्रभाष्ययोर्भिन्नभिन्नक्रमवत्ता इत्यतः सूत्रे पक्षद्वयदूषणक्रमनियमे हेतुरन्यो विवक्षितो भाष्ये च तन्नियमे हेतुरन्यो विवक्षित इति भिन्नभिन्नक्रमहेतुविवक्षया भिन्नभिन्नक्रमवत्त्वोप-पत्तिरित्यभिप्रेत्य तयोः क्रमनियमे विशेषहेतुं दर्शयति **सूत्रकृतेति** ।

**वा०र०— भिन्नक्रमवत्तेत्यत इति** । उपलक्षणं चैतत् । सूत्रोक्तदूषणानुसारेणैव विकल्पस्य कर्तव्य-तया अन्यथा विकल्पक्रमः कथमित्यपि द्रष्टव्यम् । **भिन्नभिन्नक्रमवत्त्वोपपत्तिरितीति** । अत्रापि तदनुसारेण विकल्पक्रमस्य च भाष्ये उपपत्तिरिति द्रष्टव्यम् ।

**विठ्ठ०—** ननु सूत्रभाष्ययोरत्र विरोधः । सूत्रे असति प्रतिज्ञोपरोधो इति कारणे असति कारणविनाशे कार्यमुत्पद्यते च कार्यमिति प्रतिज्ञोपरोधः । अन्यथा कार्यसद्भावकाले कारणमस्ति चेद्विनाशकारणाभावात् तत्कार्याणामशेषतो यौगपद्यं स्यादिति सूत्रे उच्यते । अनुभाष्ये तु यौगपद्यं सति भवेदिति व्यत्यासेनोच्यते । अतो विरोध इत्यत आह **सूत्रकृतेति** ।

**॥ इति सूत्रकृद्भाष्यकृतोरत्र दूषणकथने क्रमव्यत्यासनिमित्ता अर्थविरोधशङ्का, विवक्षाभेदेन तच्छङ्कापरिहारश्च ॥**

* * *

**॥ अथ च तत्र प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, तन्निरासः, तन्निरासस्य समर्थनञ्च ॥**

**॥ अथ तत्रादौ प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावेन तच्छङ्कानिरासश्च ॥**

७० **सु०—** 'नन्वस्ति तावत्प्रतिक्षणं कार्योत्पत्तिः । न च कार्यं कारणेन विनोत्पत्तुमलम्, तथा सति नित्यं सत्त्वमसत्त्वं वे(चे)त्यापत्तेः, अतः कार्योत्पत्तिरेवान्यतरपक्षदोषमाभासयिष्यति, पक्षान्तरं वा ग्राहयिष्यती'त्यत आह **कार्योत्पत्तौ चेति** ।

**अनु०—** **कार्योत्पत्तौ च का प्रमा ।**

**स्यादेतद्यदि प्रतिक्षणं कार्योत्पत्तिः प्रमाणवती स्यात्, न चैतदस्ति; न च स्वाङ्गीकारमात्रेणार्थान्तराक्षेपसामर्थ्यम् अतिप्रसङ्गादिति ।**

**श्रीनिधि०— नित्यं सत्त्वमसत्त्वं वेत्यापत्तेरिति** । यदि कारणेन विनापि विवादास्पदस्य स्वरूपलाभस्तर्हि नित्यं सदेव स्यात् । अथवा सर्वदा असदेव स्यात् । कारणनिरपेक्षत्वमनयोरेव युज्यते न तु कादाचित्कस्येति भावः । **स्यादेतदिति** । एतदन्यतरपक्षदोषाभासकरणं प्रमिते हि बाधकसहस्रमप्यसत् स्यादिति भावः । अर्थापत्तिसामग्र्यपि नास्तीत्याह **न च स्वाङ्गीकारमात्रेणेति** । **मात्रपदेन** निष्प्रमाणत्वमाह । अर्थापत्तिसामग्र्यां हि अनुपपद्यमानार्थस्य प्रमितत्वं उपपादकस्य प्रामाणिकत्वं च प्रविष्टम् । न हि कृष्यङ्गं रात्रिभोजनमाक्षिपति । नापि नृशृङ्गं पीनत्वोपपादकम् । न चैतदुभयमपि प्रकृते सम्भवतीति ।

**विठ्ठ०— तथा सतीति** । कारणेन विना कार्योत्पत्तौ सत्तासम्पादनापेक्षत्वान्नित्यसत्त्वं स्यात् । न चेन्न कदापि सत्त्वं स्यादित्यर्थः । मया प्रतिक्षणं कार्योत्पत्तिरङ्गीक्रियत इत्यत आह **न च स्वाङ्गीकारेणेति** ।

**॥ इति प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावेन तच्छङ्कानिरासश्च ॥**

* * *

**॥ अथ च तत्र प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे 'यत्सत्तत्क्षणिकं यथा देहादि' इत्यनुमानेन असिद्धिशङ्का तन्निरासश्च ॥**

७१ **सु०—** नन्वस्ति, 'यत् सत् तत् क्षणिकं यथा देहादि, सच्च विवादपदमि'ति प्रतिक्षणं कार्योत्पत्तौ प्रमाणमिति चेन्न, अस्यैव निराक्रियमाणत्वात्, देहादीनाम(देर)पि क्षणिकत्वाभावेन दृष्टान्तस्य साध्यविकलत्वाच्च ।

**शे०चं०— अस्यैव निराक्रियमाणत्वादिति** । ततश्च प्रतिक्षणं विश्वोत्पत्तेः प्रामाणिकत्वसिद्धौ तद्बलादुक्तप्रकारद्वयातिरिक्तप्रकारसिद्धिः तत्सिद्धौ च तमादाय क्षणिकस्यार्थक्रियाकारित्वनिर्वहिनाननुकूलत्वप्राप्त्या तर्कस्यानाभासत्वसिद्धेः तत्साचिव्यादनुमानप्रामाण्यसिद्धेस्तेन विश्वस्य क्षणिकत्वसिद्धिरित्यन्योन्याश्रयः स्यादिति भावः । देहादिनामित्यादिपदेन दीपादेः परिग्रहः ।

**वा०र०— अतिरिक्तप्रकारसिद्धिरिति** । उपलक्षणं चैतत् । अन्यतरपक्षीयदोषाभासीकरणसिद्धि-रित्यपि द्रष्टव्यम् । तत्सिद्धौ च तमादायेत्यत्र तु तच्छब्दद्वयेन तदुभयपरामर्शान्न दोषः । **क्षणिकस्यार्थ-क्रियाकारित्वनिर्वहिनानुकूलत्वाप्रास्येति** । अननुकूलत्वप्रास्येति वा पाठः । अननुकूलत्वाप्रास्येति तु लेखक-प्रमादात् ।

* * *

**।। अथ तत्र प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्य समर्थनम् ।।**

**।। अथ च तत्र प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्याप्यसिद्धिशङ्का तन्निरासश्च द्वेधा ।।**

**।। अथ तत्रादौ प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च प्रथमः ।।**

७२ **सु०—** 'ननु देहादेः पूर्वोत्तरक्षणयोः परिमाणभेदेन भेदसिद्धौ क्षणिकत्वसिद्धिः' इत्युक्तम्, इत्यत आह **अभेदेऽपीति** ।

**अनु०— अभेदेऽपि विशेषेण देहदीपफलादिषु ।**
**विशेषदर्शनं युक्तमस्माकम्**

'पूर्वोत्तरक्षणयोरि'ति शेषः । **विशेषेण** आरम्भवादाद्वैलक्षण्येन । 'आदि'पदेनाङ्कु-रादि । **विशेषदर्शनं** परिमाणभेददर्शनम् । **अस्माकं** परिणामवादिनां मते ।

अयमर्थः । आरम्भवादिनो हि परिमाणं यावद्द्रव्यभाव्यभ्युपयन्ति, अवयवसङ्ख्याति-शयानतिशयायत्तत्वात् परिमाणभेदस्य, अवयवापचये द्रव्यविनाशस्यावयवोपचये च तदु-त्पादस्यावर्जनीयत्वात्; अतस्तेषां परिमाणभेदो द्रव्यं भिन्द्यादेव । अस्माकं तु अवस्थित-मेव द्रव्यमवयवोपचयापचयाभ्यां त(त्त)त्परिमाणकतया विक्रियत इति दर्शनम्, तत्र परि-माणभेदो न भेदमाक्षिपतीति ।

**कं०रा०— आदिपदेनेति** । देहदीपफलादिष्वित्यादिपदेनाङ्कुरादि गृह्यत इत्यर्थः ।

**श्रीनिधि०—— आदिपदेनाङ्कुरादि** गृह्यत इति शेषः । **विशेषदर्शनमिति** । तस्यार्थः **परिमाणभेद-दर्शनमिति** । परिमाणस्य यावद्द्रव्यभावितायां नियामकमाह **अवयवसङ्ख्येति** । अस्तु परिमाणभेदस्तदायत्त-स्तथापि यावद्द्रव्यभावित्वं कुत इत्यत आह **अवयवोपचय इति** । **दर्शनं** सिद्धान्तः । **न भेदमाक्षिपतीति** । न धर्मिभेदमाक्षिपतीत्यर्थः ।

**शे०चं०—— परिमाणभेदेन भेदसिद्धाविति** । परिमाणस्य यावद्द्रव्यभावित्वेन तद्भेदे वक्ष्यमाणरीत्या द्रव्यभेदस्यावश्यकत्वादिति भावः ॥ **आरम्भवादाद्वैलक्षण्येनेति** । विशेषपदस्य परिमाणभेदपरतायाः पूर्वोत्तर-क्षणयोर्द्रव्यभेदप्रसञ्जकतयाऽयोगादिति भावः । ननु भवतामन्यापेक्षया को विशेषो येनैवमुच्यत इत्यतोऽन्या-पेक्षया विशेषसमर्पकतया अस्माकमित्येतत्तात्पर्यमाह **अस्माकमित्यादिना** । किं परिणामवादिनामारम्भवादा-द्वैलक्षण्यमित्यतस्तद्दर्शयितुमाह **अयमर्थ इति** । इतीत्यस्येत्ययमर्थ इति पूर्वेण सम्बन्धः ।

**वा०र०—— वक्ष्यमाणरीत्येति** । अवयवसङ्ख्यातिशयेत्यादिवक्ष्यमाणरीत्येत्यर्थः । विशेषपदेन फला-दीनां विशेषेण इत्यादाविव परिमाणभेदस्याव्याख्याने निमित्तमाह **विशेषपदस्येति** ।

**विठ्ठ०——** विशिष्यत इति विशेषो वैलक्षण्यमित्यभिप्रेत्याह **आरम्भवादादिति** । पूर्वोत्तरकालयोः परिमाणभेदेन भेदसिद्ध्या क्षणिकत्वसिद्धिरित्यस्योत्तराप्रतीतेरित्याशङ्क्य अयं दोषः परिमाणभेदेन पदार्थानां भेद इति वदतां तार्किकाणां मत एव नास्माकमित्याह **अयमर्थमित्यादिना** ।

**॥ इति प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च प्रथमः ॥**

* * *

**॥ अथ च तत्रान्ते प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च द्वितीयः ॥**

७३ **सु०——** किञ्च फलादीनां पूर्वोत्तरक्षणयोः भेदः साध्यते, उत अभेदाभावः । आद्ये सिद्धसाधनम्, भेदस्यास्माभिरप्यङ्गीकृतत्वात्, तावता क्षणभङ्गासिद्धेः । द्वितीये दोषमाह **अनुभूतित इति** ।

**अनु०——** अनुभूतितः ।
विशेषदर्शनं मानं यदि न स्थैर्यदृक्कुतः ॥

“ ‘तदिदं फलमि’ति प्रत्यभिज्ञया पूर्वोत्तरक्षणयोरभेदसिद्धेर्बाधितविषयमनुमानमि”ति शेषः । भ्रान्ता प्रत्यभिज्ञा नाभेदं साधयितुमलमिति चेत्, तर्हि भ्रान्तं परिमाणभेददर्शनं न भेदसाधनायालमिति ब्रूमः । परिमाणभेददर्शनं बाधकाभावात् प्रमाणमेवेति चेत् तत्राह **विशेषेति** ।

तर्हि **स्थैर्यदृक्कुतो न मानम्,** तस्या अपि बाधकरहितत्वात् । विशेषदर्शनं बाधकमिति चेत्, तर्हि स्थैर्यदर्शनं कुतो न बाधकम् । अतः अनुपलभ्यमानविशेषयो(रनयो)र्बाध्यबाधकभावायोगात्, अन्योन्यप्रतिपक्षताननुभवाच्च अन्यतरपक्षपातं परित्यज्य भेदाभेदविषयतयैव व्यवस्थापनं युक्तम्; अन्यथा दृष्टान्ते साध्यसन्देहेनापि परानुमानं दुष्टं स्यात् इति । एवं तर्काङ्गान्तरवैकल्यं स्वयमूहनीयम् ।

परि०— **अन्यथा दृष्टान्त इति** । भेदाभेदविषयतयैव व्यवस्थापनाभाव इत्यर्थः ॥ **साध्येति** । अभेदाभावेन भेदाभेदेन वेति सन्देहेनापीत्यर्थः ॥ **एवं तर्काङ्गान्तरेति** । आत्मनः क्षणिकत्वेनापाद्यापादकयोः सहदर्शनतन्नियमादेर्गृहीतुमशक्यत्वेन व्याप्तिवैकल्यम् । प्रत्यभिज्ञया स्थायित्वसिद्धेरुक्तेर्यदि स्थायि स्यात् तर्हि सन्न स्यादिति तर्कस्य विपर्ययपर्यवसानायोगादित्येवमूहनीयमित्यर्थः ।

यादु०— **एवं तर्काङ्गान्तरेति** । यदि नीलादिकं क्षणिकं न स्यात् तर्हि सन्न स्यादित्यत्राकाशे व्यभिचारेण व्याप्तिवैकल्यं, प्रत्यभिज्ञया स्थायित्वस्य समर्थितत्वेन तद्बाधात् क्षणिकमेवेति विपर्यये पर्यवसानासम्भवश्चेति तर्काङ्गान्तरवैकल्यं स्वयमूहनीयमित्यर्थः ।

वं०प०— **विशेषदर्शनं** परिमाणभेददर्शनम् । **बाधकं** स्थैर्यदृशः । **न बाधकं** विशेषदर्शनस्य ॥ **अन्यथेति** । एवं व्यवस्थापनमकृत्वा स्थैर्यदृग्विशेषदर्शनयोर्बाध्यबाधकभावः सत्प्रतिपक्षता वा यद्युच्यत इत्यर्थः । **दृष्टान्ते** फलादौ ॥ **साध्येति** । क्षणिकत्वरूपेत्यर्थः ।

कं०रा०— **एवमिति** । स्थायित्वेऽर्थक्रियाकारित्वानुपपत्तिरिति परोक्ततर्कस्य प्रतिकूलतर्काप्रतिहत्यननुकूलत्वरूपाङ्गवैकल्यमिव स्थायित्वार्थक्रियाकारित्वाभावयोर्व्याप्त्यसम्प्रतिपत्तेरापाद्यापादकव्याप्तिवैकल्यम्, तदेवेदमिति प्रबलप्रत्यक्षप्रत्यभिज्ञानेन स्थायित्वे सिद्धे प्रमाणाबाधेन स्थायि चेदर्थक्रियाकारि न स्यात् । अर्थक्रियाकारि चेदं तस्मान्न स्थायीति विपर्यये पर्यवसानायोगात् तद्वैकल्यं चेत्यङ्गान्तरवैकल्यं स्वयमूहनीयमित्यर्थः । न च वाच्यं स्थायीभावः स्वीयामर्थक्रियां किं क्रमेण कुर्याद्युगपद्वा । आद्ये कालान्तरभाविनीमर्थक्रियां

प्रतीदानीं समर्थो न वा । प्रथमे तामपीदानीं एव कुर्यात् । समर्थस्य विक्षेपायोगात् । द्वितीये तदापि न कुर्या-दित्यादिना स्थायित्वार्थक्रियाकारित्वाभावयोर्व्याप्तिरुपपादितेति । स्थायिनो भावस्य क्रमेणार्थक्रियाकारिणः कालान्तरभाविनीमर्थक्रियां प्रतीदानीं समर्थितत्वेऽपीदानीं तत्कारित्वाभावस्य परमते कार्योत्पादनसमर्थस्य कारणस्य स्वक्षण एव कार्योत्पादकत्वाभाववदुपपत्तेरिति ।

**श्रीनिधि०—** **अस्माभिरिति** । खण्डिते भेदाभेदवादिभिरित्यर्थः । **अन्यथेति** । प्रत्यभिज्ञापरिमाण-भेददर्शनयोरेवं विषयव्यवस्थामनङ्गीकृत्य प्रत्यभिज्ञानोदाहरण इत्यर्थः । **साध्यसन्देहेनापीति** । मा वाऽस्तु तद्बाधने साध्यवैकल्यमित्यपेरर्थः । **परानुमानं दुष्टमिति** । दृष्टान्तस्य सन्दिग्धसाध्यविकलत्वेनेत्यर्थः । **एवं तर्काङ्गान्तरवैकल्यमिति** । तथाहि । स्थायीभावः स्वीयामर्थक्रियां क्रमेण कुर्याद् युगपत् कुर्यादित्युक्तम् । तत्र क्रमेणेति वदामः । अर्थक्रियान्तरसामर्थ्यमप्यस्तीदानीमिति च । न चैवं समर्थस्य विक्षेपायोगः । सहकार्यन्तर-विरहेण तदुपपत्तेः । अस्तु वा तदानीं सामर्थ्याभावः । तथा सति भावभेदः स्यादित्युक्तमिति चेदत्र वक्त-व्यम् । किमत्यन्ताभेदः स्यादित्युत भेदमात्रं स्यादिति । आद्ये व्याप्त्यभावः । फलादौ तु इदानीमपि सन्दे-हात् । द्वितीये त्विष्टापादनम् । विशिष्टशुद्धयोर्भेदाभेदाङ्गीकारात् । तस्मादत्यन्तभिन्न इति विपर्यये पर्यवसाने प्रत्यभिज्ञाबाधश्चेत्यूह्यमित्यर्थः ।

**शे०चं०—** ननु भेदाङ्गीकारेण क्षणभङ्गसिद्धेरस्मन्मतप्रवेशः स्यादित्यतोऽभेदासहकृतपूर्वोत्तरक्षणवर्ति-द्रव्यभेदस्यैव क्षणभङ्गसाधकत्वेन भेदमात्रस्य तदसाधकत्वान्न भेदमात्रेण क्षणभङ्गसिद्धिरिति नोक्तदोष इत्या-शयेनाह **तावतेति** । 'दृश्यते प्रत्यभिज्ञात' इति पूर्वग्रन्थानुरोधेनात्रानुभूतिपदं प्रत्यभिज्ञापरं, तृतीयार्थे चायं तसिरित्यभिप्रेत्य व्याचष्टे **तदिदं फलमिति** । **प्रत्यभिज्ञयेति** । भ्रान्ता प्रत्यभिज्ञेत्यादौ भ्रान्तिर्भ्रान्तेति भावे क्तः ॥ **कुतो न बाधकमिति** । न च विशेषदर्शनस्य भ्रमत्वे सिद्धे बाधकाभावात् स्थैर्यदर्शनस्य प्रामाण्यसिद्धिः तत्सिद्धौ च तद्बाधितत्वेन विशेषदर्शनस्य भ्रमत्वसिद्धिः स्यादित्यन्योन्याश्रय इति वाच्यम् । तथा सति स्थैर्य-दर्शनस्य भ्रमत्वसिद्धौ बाधकाभावाद्विशेषदर्शनस्य प्रामाण्यसिद्धिः तत्सिद्धौ च तद्बाधितत्वात् स्थैर्यदर्शनस्य भ्रमत्वसिद्धिरित्यन्योन्याश्रयस्य त्वत्पक्षे (सत्त्वपक्षेऽपि) समानत्वादिति भावः । विशेषदर्शनस्थैर्यदर्शनयोः कुतो न बाध्यबाधकभाव इत्यतो बाध्यताप्रयोजकस्य न्यूनबलत्वस्य बाधकताप्रयोजकस्य चाधिकबलत्वस्य प्रकृते विरहादिति भावेन हेतुगर्भं विशेषणमाह **अनुपलभ्यमानविशेषयोरिति** । अस्तु तर्ह्युक्तरीत्या समानबलयोरनयोः परस्परप्रतिपक्षत्वमित्यत आह **अन्योन्येति** । तथा सति प्रतिपत्तॄणामुभयोदासीनत्वापत्तेरिति भावः ॥ अवश्यं चैतदेवमित्याह **अन्यथेति** । निश्चितसाध्यवैकल्यस्येव सन्दिग्धतद्वैकल्यस्यापि दृष्टान्तदोषत्वादिति भावः ॥ **एवं तर्काङ्गान्तरवैकल्यमिति** । नीलादिकं यदि क्षणिकं न स्यात् तर्हि सन्न स्यादिति तर्कमूलभूताया यदक्षणिकं तत् सत् न इति व्याप्तेरुक्तरीत्याऽऽकाशे व्यभिचाराद्व्याप्तिवैकल्यम् । प्रत्यभिज्ञया स्थायित्वस्य समर्थितत्वेन तद्बाधितत्वात् क्षणिकमेवेति विपर्ययपर्यवसानानुपपत्तिश्चेत्येवं तर्काङ्गान्तरवैकल्यं स्वयमूहनीयमित्यर्थः ।

वा०र०— **तदिदं फलमिति प्रत्यभिज्ञायेतेति विशिष्टं** प्रतीकोपादानम् । **स्वयमूहनीयमित्यर्थ इति** । उपलक्षणं चैतत् । मूलकारीयाननुकूलताख्याङ्गवैकल्योपपादनरीत्यैव प्रतितर्काप्रतिघातविपर्ययपर्यवसानयोरपि वैकल्यं स्वयमूहनीयमित्यपि द्रष्टव्यम् ।

विठ्ठ०— **भेदस्यास्माभिरिति** । भेदाभेदवादित्वादिति भावः । मास्तु परिमाणभेददर्शनं प्रत्यभिज्ञाबाधकं प्राबल्याभावात् । तथापि प्रत्यभिज्ञायाः न तद्बाधः प्राबल्यानिरूपणात् किन्तु प्रतिपक्षतामात्रता स्यात् । वस्तुतः परस्परप्रतिपक्षभावोऽप्यनुपपन्नः प्रतिपक्षफलस्योभयकार्यप्रतिबन्धस्यानुपलम्भादित्याशयेन उपसंहरति **अतोऽनुपलभ्यमानेति** । **अन्यथेति** । सोऽयमिति प्रत्यभिज्ञायाः परिमाणभेददर्शनानुमानस्य च भेदाभेदविषयतया व्यवस्थानङ्गीकारे दृष्टान्तीकृतदेहादावप्युक्तरीत्या साध्यसन्देहापत्त्या दृष्टान्ताभावेन परानुमानं दुष्टं स्यादित्यर्थः । **तर्काङ्गान्तरेति** । यदि नीलादिकं क्षणिकं न स्यादित्यत्र आकाशे व्यभिचारेण व्याप्तिवैकल्यम् । प्रत्यभिज्ञया स्थायित्वस्य समर्थितत्वेन तद्बाधात् क्षणिकत्वमेवेति विपर्यये पर्यवसानासम्भवश्चेति स्वयमूहनीयमित्यर्थः ।

**॥ इति प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्यालग्नताशङ्का तन्निरासश्च द्वितीयः ॥**

**॥ इति प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्याप्यसिद्धिशङ्का तन्निरासश्च द्वेधा ॥**

**॥ इति प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे असिद्धिशङ्कानिरासस्य समर्थनम् ॥**

**॥ इति प्रतिक्षणं कार्योत्पत्तौ प्रमाणाभावे 'यत्सत्तत्क्षणिकं यथा देहादि' इत्यनुमानेन असिद्धिशङ्का तन्निरासश्च ॥**

**॥ इति प्रतिक्षणं कार्योत्पत्त्यन्यथानुपपत्तिबलादस्य दोषस्य गत्यन्तरशङ्का, तन्निरासः, तन्निरासस्य समर्थनञ्च ॥**

**॥ इति स्थायिन इव क्षणिकस्यापि सत्त्वानुपपत्तेः अननुकूलता नाम तर्कदोषः ॥**

**॥ इति चतुर्थसूत्रार्थप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र सूत्राणां व्युत्क्रमेण व्याख्याने विशेषप्रदर्शनम् ॥**

७४ **सु०— नन्वेतानि सूत्राणि कुतो व्युत्क्रमेण(मतो) व्याख्यातानि । उच्यते । उपोद्घातप्रक्रियया सूत्रकारेणैवादौ बाधकानि निराकृत्य अन्ते निष्कण्टका प्रत्यभिज्ञोपन्यस्ता, भाष्यकारेण तु सुबोधत्वाय शिष्याकाङ्क्षाक्रमेण आदौ प्रत्यभिज्ञामभिधाय अनन्तरं तद्बाधकानि परिहृतानीति ।**

परि०— अत्र **ॐ अनुस्मृतेश्चे**त्यन्तिमसूत्रं व्याख्याय **ॐ आकाशे चाविशेषात् ॐ, ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ, ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथे**ति सूत्राणि व्याख्यातानि ॥ तत्र शङ्कते **नन्वेतानी**ति ।

**कं०रा०**— ननु सूत्रक्रमानुसारेण 'उत्तरोत्पादे च पूर्वनिरोधात्', 'असति प्रतिज्ञोपरोधो यौगपद्य-मन्यथे'ति सूत्रद्वयं व्याख्याय 'आकाशे चाविशेषात्', 'अनुस्मृतेश्चे'ति सूत्रद्वयं व्याख्येयं, तद्विहाय अनुस्मृते-श्चाकाशे चाविशेषादिति सूत्रद्वयव्याख्यानान्तरं उत्तरोत्पादे च पूर्वनिरोधात् असति प्रतिज्ञोपरोधो यौगपद्यमन्यथेति सूत्रद्वयव्याख्या भाष्यकृता कस्मादकारि । यदि च व्युत्क्रमेणैतत्सूत्राणां व्याख्याने किञ्चिन्नियामकमस्ति तर्हि तदनुसारेण तेनैव क्रमेण सूत्रकृता सूत्राणि निबन्धनीयानि । प्रकारान्तरेण तु कस्मान्निबद्धानीत्याशयेन शङ्कते **नन्वेतानीति** । सूत्रकारीयनिबन्धनक्रमे भाष्यकारीयव्याख्यानक्रमे च नियामकस्य भिन्नभिन्नत्वात् तदनुसारेणो-भयमप्युपपन्नमित्याशयेन परिहरति **उच्यत इति** । **शिष्याकाङ्क्षाक्रमेणेति** । शिष्याणां प्रथमं स्वपक्षसाधक-जिज्ञासा तद्बाधकपरिहारजिज्ञासा तु पश्चादिति तत्क्रमः प्रसिद्ध इति भावः ।

**श्रीनिधि०**— **एतानि सूत्राणीति** । 'अनुस्मृतेश्चे'त्यादीनि चत्वारि । अनुभाष्यरीत्या भाष्यदिशा 'अनुस्मृतेश्चे'ति सूत्रं अधिकरणान्ते प्रतीयते । अत्र त्वादौ तद्व्याख्यायानन्तरं 'आकाशे चाविशेषात्' इत्यादि सूत्रत्रयं व्याख्यातमित्यर्थः । **सुबोधत्वायेति** । अनयोः सूत्रयोः प्रत्यभिज्ञाकण्टकोद्धारत्वस्य झटिति बोध-नार्थमित्यर्थः । अन्यथा कैमुत्यशङ्कायाः झटिति तद्बोधो न भवेत् इति । तर्ह्यसङ्गतिः सूत्राणामित्यत आह **आकाङ्क्षाक्रमेणेति** ।

**शे०चं०**— **व्युत्क्रमेणेति** । आदौ 'समुदाय' इति, 'इतरेतरेति' सूत्रद्वयमनन्तरम् 'अनुस्मृतेश्चे'ति तत 'आकाशे चाविशेषादि'ति तत 'उत्तरोत्पादे चे'ति ततो 'असती'त्येवं व्युत्क्रमेणेत्यर्थः । यदि चानया प्रणाड्या व्याख्यानेऽस्ति किञ्चिन्नियामकमिति तथा व्याख्यानमुपपन्नमिति मन्यसे तर्हि तदनुरोधेनैव सूत्रनिर्माणक्रमस्यापि प्रसक्त्या क्रमान्तरेण तन्निर्माणानुपपत्तिरिति भावः । भिन्नभिन्नक्रमनिमित्ताश्रयणेन सूत्रभाष्ययोः प्रवृत्तेर्भिन्नक्रम-वत्त्वमित्यभिप्रेत्य सूत्रभाष्ययोस्तथा प्रवृत्तौ निमित्तविशेषमुपदर्शयति **उच्यत इत्यादिना** ॥

**विठ्ठ०**— ननु 'अनुस्मृतेश्च' इत्यन्तिमसूत्रं प्रथमं व्याख्याय 'आकाशे चाविशेषात्', 'उत्तरोत्पादे च पूर्वनिरोधात्', 'असति प्रतिज्ञापरोधो यौगपद्यमन्यथा' इति सूत्राणि पश्चात् कुतो व्याख्यातानीत्याशङ्क्य परिहरति **नन्वेतानीति** ।

**चषकः**— **निष्कण्टका** । अप्रामाण्यज्ञानानास्कन्दिता ।

**॥ इति सूत्राणां व्युत्क्रमेण व्याख्याने विशेषप्रदर्शनम् ॥**

* * *

### ॥ अथ तत्र ५–६ सूत्रयोरव्याख्याने कारणप्रदर्शनम् ॥

७५ **सु०— प्रतिसङ्ख्येत्यादिसूत्रद्वयं भाष्य एव स्पष्टमिति नात्र व्याख्यातम् ।**

**कं०रा०— प्रतिसङ्ख्येत्यादिसूत्रद्वयमिति ।** प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् उभयथा च दोषादिति सूत्रद्वयमित्यर्थः ।

**शे०चं०— प्रतिसङ्ख्येत्यादीति ।** प्रतिसङ्ख्येति सूत्रप्रतीकग्रहणेन समस्ततत्सूत्रग्रहणमत्राभिमतम् । आदिपदेन 'उभयथा च दोषादि'ति सूत्रान्तरपरिग्रहः । ततश्च 'प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदादि'ति सूत्रम् 'उभयथा च दोषादि'ति सूत्रं चेत्येवं सूत्रद्वयमित्यर्थः ।

**वा०र०—** प्रतिसङ्ख्याप्रतिसङ्ख्येत्यादेर्विशिष्टस्य सूत्रस्य सूत्रद्वयत्वानुपपत्तिमाशङ्क्य परिहरति **प्रतिसङ्ख्येतीति ।**

### ॥ इति ५–६ सूत्रयोरव्याख्याने कारणप्रदर्शनम् ॥

* * *

### ॥ अथ च तत्रान्ते सप्तमसूत्रस्य प्रकारान्तरेण व्याख्यानम् ॥

७६ **सु०—** 'दुःखाभावं सुखं चाहुरि'ति यदनूदितं तन्निराकरोति **दिगिति ।**

## अनु०— दिक्सुखे च खदृष्टान्ताद्भावौ सच्चेत्क्वचिद्भवेत् ।

**'खदृष्टान्तादि'**त्याकाशस्य भावत्वे यो न्यायोऽभिहितस्तस्मादिति हेत्वतिदेशः । धर्मिप्रतियोगिनिरपेक्षमेव विधिरूपेण प्रतीयमानत्वादित्यर्थः । **सत्** भावः **क्वचिद्भवेत् चेत्** 'तद्दृष्टान्तेन' इति शेषः ।

अनेन 'अन्यथा रूपादीनामपि भावत्वं न स्यादविशेषादि'ति बाधकं सूचयति ।

यद्यपि दिशो नाकाशाद्भिद्यन्ते, तथाऽप्याकाशस्य भागसद्भावं ज्ञापयितुं तासां ग्रहणम् । एकवचनं तु जात्यभिप्रायम् ।

एतेन 'आकाशे चाविशेषादि'ति सूत्रं प्रकारान्तरेण व्याख्यातं भवति ।

आकाशादीनां भावत्वसमर्थनेन 'पञ्चस्कन्धात्मकं विश्वमि'ति निरस्तम् ।

आत्मनो ज्ञानात्मकत्वं तु नास्माकं अनिष्टम् (विरुद्धम्), क्षणभङ्गिताया निरस्तत्वात् । ज्ञानस्यापि ग्राहकतायाः परेणाभ्युपगतत्वात् ।

मोक्षस्तु चतुर्थे परीक्षिष्यते ॥

**परि०— इति सूत्रं प्रकारान्तरेणेति** । आकाशे भावत्वसाधकन्यायस्य सुखेऽप्यविशेषाद्भावत्वं तस्य, अन्यथा नीलादेरपि भावत्वं न स्यादिति व्याख्यातमित्यर्थः । विप्रतिपन्नप्रमेयान्तरं कुतो न निरस्तमित्यत आह **आकाशादीनामिति** । सुखं दिग्भागाश्चादिपदार्थः ॥ **निरस्तत्वादिति** । 'कार्यं च कारणं चे'त्यादाविति भावः ॥ **ज्ञानस्यापि ग्राहकताया इति** । ज्ञानरूपस्याप्यात्मनः स्वप्रकाशताताया इत्यर्थः ॥ **चतुर्थ इति** । अध्याये द्वितीयपादे 'तत्र मोक्षस्वरूपं तु वादिनः प्रतिभाश्रया(बला)दि'त्यादिना परीक्षिष्यत इत्यर्थः ॥ ***मतद्वयनिरासः*** //

**यादु०— एतेनाकाशे चेति** । आकाशे यो भावत्वसाधको न्यायः तस्य सुखेऽप्यविशेषान्न सुखमभावरूपमिति सूत्रयोजनाऽत्र द्रष्टव्या । नन्वथाप्यात्मनः क्षणभङ्गता निराकार्येत्यत आह **क्षणभङ्गताया इति** । ननु सौगतैर्ज्ञानरूपस्यात्मन आलयत्वमेव स्वीकृतं, न ग्राहकत्वमतोऽस्ति तत्र विप्रतिपत्तिरित्यत आह **ज्ञानस्यापीति** । ग्राहकताया अपीत्यपिशब्दसम्बन्धः । अहमित्यात्मरूपज्ञानस्य न केवलमालयत्वं, किन्तु स्वग्राहकत्वमप्यस्तीति बौद्धैः स्वीकृतम् अतो न तत्र विवाद इति भावः । नन्वरूपज्ञानसन्ततिमित्यनूदितो मोक्षः कुतो न निराकृत इत्यत आह **मोक्षस्त्विति** ।

**वं०प०**— ननु दिशां बहुत्वाद्दिशश्च सुखं च दिक्सुखानीति वक्तव्यम् । दिक् च सुखं चेति विग्रहमित्यभिप्रेत्य दिक्सुखे इत्युक्तिः कथम् । विग्रहकाले दिक् चेत्येकवचनायोगात् तासां बहुत्वादित्यत आह **एकवचनमिति** । विग्रहकाल इति शेषः ।

**कं०रा०**— ननु दृष्टान्तमात्रस्यासाधकत्वात् । दिक्सुखे च खदृष्टान्ताद्भावावित्याकाशरूपदृष्टान्तमात्रेण दिक्सुखयोर्भावत्वं कथं साध्यत इत्यतो व्याचष्टे **खदृष्टान्तादितीति** । खदृष्टान्तादित्यस्याकाशभावत्वसाधकन्यायातिदेशपरत्वेन लब्धमर्थमाह **धर्मिप्रतियोगीति** । **अनेनेति** । धर्मिप्रतियोगिनिरपेक्षमेव प्रतीयमानयोरपि दिक्सुखयोर्भावत्वाभावे रूपादीनामपि भावत्वं न स्यादविशेषादिति बाधकं सच्चेत् क्वचिद्भवेदित्यनेन सूचयतीत्यर्थः । **यद्यपीति** । दिशामाकाशभावरूपत्वेनाकाशाद्भेदाभावादाकाशस्य भावत्वसाधनेनैव दिशामपि भावत्वं सिद्धमिति दिग्ग्रहणमत्र व्यर्थमिवाभातीति यद्यपि तथाऽप्याकाशस्य भागसद्भावं ज्ञापयितुं दिशां ग्रहणमित्यर्थः ।

ननु दिक्सुखे इत्यत्र दिशश्च सुखं चेति विग्रहाश्रयणे दिक्सुखानीति बहुवचनापत्त्या दिक् च सुखं चेत्येकवचनान्तविग्रह एवाश्रयणीयः तच्च न सम्भवति दिशामनेकत्वेनैकवचनायोगादित्यत आह **एकवचनं त्विति**। यद्वा दिशां सुखानां चानेकतया दिशश्च सुखानि चेति विगृह्य दिक्सुखानीति प्रयोक्तव्ये दिक्च सुखं चेत्येकवचनान्तविग्रहमाश्रित्य दिक्सुखे इति कथं प्रायोजीत्यत आहेत्यवतार्य उभयत्रैकवचनं जात्यभिप्रायमिति व्याख्येयम्। ननु परोक्तस्यात्मनो ज्ञानात्मकत्वस्यास्मन्मताविरुद्धत्वेऽपि तदुक्तस्य सन्तन्यमानज्ञानात्मकत्वस्यास्मन्मतविरुद्धत्वात् तन्निरासः कार्य एवेत्यत आह **क्षणभङ्गिताया इति**। ज्ञानस्य क्षणभङ्गितामाश्रित्य हि सन्तन्यमानत्वं परेणोक्तं तच्च क्षणभङ्गितानिरासेनैव निरस्तमिति न तन्निरासार्थं यत्नः कार्य इति भावः। ननु परोक्तमात्मनो ज्ञानात्मकत्वं ग्रहीतृत्वासमानाधिकरणमस्मदभिमतं तु तत्समानाधिकरणम् अतः कथं पराभिमतज्ञानात्मकत्वस्यास्मन्मताविरुद्धत्वमित्यत आह **ज्ञानस्यापीति**। ज्ञानरूपस्याप्यात्मनो ग्रहीतृतायाः परेणाभ्युपगतत्वान्न पराभिमतज्ञानात्मकत्वमस्मन्मतविरुद्धमिति भावः। न च रूपज्ञानसन्ततिं मोक्षमाहुरित्यनुदितस्य निर्विषयज्ञानसन्ततिरूपपराभिमतमोक्षस्य निरासः कस्मान्न क्रियत इत्यत आह **मोक्षस्त्विति**। पराभिमतमोक्षस्तु फलाध्याये न्यायविचारपूर्वकं निरसिष्यत इति नात्र निरसिष्यत इति भावः।

**श्रीनिधि०**— 'खदृष्टान्तादि'त्ययुक्तम्। तत्र परस्य भावत्वासम्मतेः। साधितमिति चेत् तर्हि 'सच्चेत् क्वचिद्भवेदि'त्यस्य वैयर्थ्यमित्यत आह **खदृष्टान्तादितीति**। हेत्वतिदेश इत्युक्तमतिदेशमेव हेतुं दर्शयति **धर्मिप्रतियोगीति**। धर्मिप्रतियोगिनौ विनैव प्रतीयमानत्वाद् विधिरूपेण प्रतीयमानत्वाच्चेत्यर्थः। 'सत्' इत्यनूद्यार्थमाह **सद्भाव इति**। **अनेनेति**। सद्रूपादिकं भवेच्चेत् इत्यनेनेत्यर्थः। ननु सर्वासां दिशां सर्वेषां च सुखानां भावत्वं सिसाधयिषितम्। तथा च कथं दिक् च सुखं चेति विग्रहवाक्ये एकवचनम्। बहुवचनेनैव विग्रह इति चेत् तर्हि दिक्सुखानीति स्यादित्यत आह **एकवचनं त्विति**। विग्रहवाक्य इति शेषः। **अनेन** खदृष्टान्तादिति कथनेन। **प्रकारान्तरेण व्याख्यातं भवतीति**। भाष्ये तु इदं सूत्रमेवं व्याख्यातम्। दीपादिषु विशेषदर्शनात् तत् क्षणिकत्वेनान्यत्रापि तदनुमाने आकाशे अविशेषदर्शनादन्यत्रापि स्थिरत्वमनुमीयेतेति व्याख्यातम्। अनेन तु आकाशे भावत्वसाधकहेतूनां दिक्कालयोरप्यविशेषात् चशब्दाद् रूपादिदृष्टान्तेन च भावत्वमनुमीयत इति व्याख्यातमित्यर्थः। अरूपज्ञानसन्ततिमित्यनेनानूदितं न दूष्यत इति न्यूनतेत्यतः तत्र सन्तन्यमानं ज्ञानमेव तस्य विषयोपप्लवः। संसार अरूपा निर्विषया ज्ञानसन्ततिर्मोक्ष इत्येतावदनुवादोऽभिमतः। तत्र किं ज्ञानरूपत्वस्यानिराकरणान्न्यूनता उत सन्तन्यमानत्वस्य उत तद्ज्ञानस्य निर्विषयतायाः। आद्य आह **आत्मन इति**। द्वितीय आह **क्षणभङ्गिताया इति**। तृतीय आह **ज्ञानस्येति**। संसारे सविषयत्वाङ्गीकारेऽपि मुक्तौ नाङ्गीकृतम्। तथा च तन्निरसनीयमेवेत्यतो नायमवसरस्तस्येत्याह **मोक्षस्त्विति**।

**शे०चं०**— 'दिक्सुखे च खदृष्टान्ताद्भावावि'ति मूले खदृष्टान्तादित्यस्य खदृष्टान्तेनेत्यभिप्रायकत्वे मूले हेत्वनुक्तिप्रसङ्गः। आकाशभावतायाः परासम्मतत्वेन तस्य दृष्टान्तत्वानुपपत्तिश्च भवतीत्यतो नेदं दृष्टान्ताभिधानं, किन्तु हेत्वतिदेश एवेति न कोऽपि दोष इत्यभिप्रेत्य तत्परतया तद्योजयति **खदृष्टान्तादितीति**। तमेवाभिनयेन

दर्शयति **धर्मीति** । तर्हि भाष्ये दृष्टान्तानभिधानप्रसङ्गो दोष इत्याशङ्क्य सच्चेत्कचिद्भवेदित्येतदेव तदभिधानमिति न तदनभिधानप्रसङ्गोऽपीत्यभिप्रेत्य तत्समर्पकतया तद्योजयति **सद्भाव इत्यादिना** । तर्हि रूपादिदृष्टान्तेनेत्येव वक्तव्यं, किमनया वक्रोक्त्येत्यतो विपक्षे बाधकसूचनद्वाराऽप्रयोजकताशङ्कानिरासार्थत्वान्न तदुक्तेरानर्थक्यमित्याशयेन तथोक्तेः प्रयोजनमाह **अनेनेति** ॥ **नाकाशाद्दिग्भिन्ना इति** । आकाशभाग एव दिशो न तु न्यायमत इव तस्मादर्थान्तरमित्यर्थः । ततश्चाकाशस्य भावत्वसाधकपूर्वग्रन्थेनैव तद्भागरूपदिशामपि भावत्वसिद्धेः पृथक् तद्भावत्वसाधनमनर्थकमित्याशयः । आकाशस्य सभागत्वे वादिनां विप्रतिपत्तेस्तन्निरासाय सभागत्वप्रतिपादन एव तात्पर्याद्भावत्वसाधने तात्पर्याभावान्नानर्थक्यमिति परिहरति **तथाऽपीति** ॥ **एतेनेति** । खदृष्टान्तादित्यादिभाष्येणेत्यर्थः ॥ **प्रकारान्तरेणेति** । 'आकाशस्याविशेषतः । अविशेषोऽखिलस्यापि सत्त्वात्किन्नानुमीयत' इति प्राचीनव्याख्यानापेक्षया आकाशे भावत्वसाधको यो न्यायस्तस्य सुखेऽप्यविशेषान्न सुखमभावरूपमिति प्रकारान्तरेण व्याख्यातं भवतीत्यर्थः । ननु 'पञ्चस्कन्धात्मना स्थितमि'ति प्रागनूदिताया विश्वस्य पञ्चस्कन्धात्मताया अनिरासाद्भाष्ये न्यूनत्वमित्याशङ्क्याकाशादीनां भावत्वसमर्थनपरपूर्वभाष्येणैव तन्निराससिद्धिः किं पृथक् तन्निरासेनेत्यभिप्रेत्य पृथक् तदनिरासो भाष्यकाराणामित्याशयेन भावत्वसमर्थनपरपूर्वभाष्येणैव तन्निराससिद्धिमाह **आकाशादीनामिति** । ननु च सन्तन्यमानं ज्ञानमेवात्मेति 'अरूपज्ञानसन्ततिमि'ति पूर्वपक्षग्रन्थे सूचिताया आत्मनो ज्ञानरूपताया अनिरासात् भाष्ये न्यूनत्वमेवेत्यतः तस्याः स्वसम्मतत्वेनानिरासोपपत्तेर्न न्यूनतेत्यभिप्रेत्य तस्या अविरुद्धतामाह **आत्मन इति** । ननु तथाऽपि 'आत्मानं च क्षणस्थितमि'त्यनूदिताया आत्मक्षणिकतायाः स्वसम्मतत्वाभावेन निराकार्यत्वात् तदनिरासान्न्यूनत्वमेव भाष्य इत्याशङ्क्य तस्या अपि 'उत्तरोत्पादे चे'ति सूत्रव्याख्यानावसरे 'अतो ज्ञातं मयेत्यादि न ज्ञेयमनुमा कुत' इत्यादिना आत्मानात्मप्रपञ्चसाधारण्येन निरस्तत्वान्न पुनस्तन्निरासापेक्षेत्याशयेनाह **क्षणेति** । नन्वात्मनो ज्ञानरूपताया उभयसम्मतत्वात् तत्र विवादासम्भवेऽपि स्वमते ज्ञानरूपस्यात्मनो ग्राहकताऽप्यस्ति न तु परमत इत्यस्त्येव विप्रतिपत्तिविषय इत्यत आलयज्ञानरूपत्वादात्मनः परमते आलयज्ञानकर्तृत्वरूपतद्ग्राहकत्वाभावेऽपि तदतिरिक्तप्रवृत्तिज्ञानकर्तृतायास्तन्मतेऽपि भावेनोक्तरूपग्राहकताया अपि सत्त्वान्न तदंशस्यापि विप्रतिपत्तिविषयतेत्याह **ज्ञानस्यापीति** । तथाऽपि 'अरूपज्ञानसन्ततिं मोक्षमि'त्यनूदितमोक्षस्यानिरासान्न्यूनत्वमेवेत्यतः तस्य 'ज्ञानं स्वरसभङ्ग्येव नित्यं सन्तानमिष्यते । बौद्धाभ्यामपराभ्यां तु तस्याप्युक्तानुमा रिपुरि'त्यादिना चतुर्थस्य द्वितीये निराकरिष्यमाणत्वादत्र अनिरासो न दोषापादक इत्याह **मोक्षस्त्विति** ।

**वा०र०—** मूलकृता खदृष्टान्तात् इत्यनूद्य आकाशस्य भावत्वे यो न्यायोऽभिहितः तस्मादिति व्याचक्षाणेनान्तो निर्णयः न्याय इति यावत् । आकाशे दृष्टो योऽन्तः तस्मादित्यनुव्याख्यानयोजना सूचिता भवतीति बोध्यम् । मूले सदित्यनूद्य भावः इत्यर्थकथनम् ।

**स०व्र०—** **प्रकारान्तरेणेति** । 'आकाशस्याविशेषतः । अविशेषोऽखिलस्यापि सत्त्वात्किं नानुमीयते' इत्यादिना पूर्वं व्याख्यातत्वात् प्रकारान्तरेणेत्युक्तमित्यर्थः । **ग्राहकताया इति** । जीवस्य ज्ञानरूपत्वमभ्युप-

गच्छताऽपि सौगतेनालयज्ञानरूपत्वस्यैवाङ्गीकारेण तदतिरिक्तप्रवृत्तिज्ञानकर्तृत्वस्य स्वीकाराद्युक्तं तन्मतेऽपि जीवस्य ज्ञानकर्तृत्वरूपग्राहकत्वमिति न तदंशे विप्रतिपत्तिरिति भावः ।

**विठ्ठ०—** खदृष्टान्तादित्यत्र दिक्सुखयोर्भवत्वे हेतुर्न प्रतीयत इत्यतो व्याचष्टे **खदृष्टान्तादितीति** । अतिदिष्टं हेतुं विशदयति **धर्मिप्रतियोगीति** । खदृष्टान्तादित्यस्य हेतुसूचनार्थत्वे दृष्टान्तः क इत्यतः तत्प्रदर्शनपरतया सद्भेदित्यंशं व्याचष्टे **सद्भाव इति** । भावः क्वचिद्भवेच्चेति नीलादिरूपं सत्तदृष्टान्तेन धर्मिप्रतियोगिनिरपेक्षतया विधिरूपेण प्रतीयमानत्वेन हेतुना दिक्सुखयोर्भावत्वं साध्यत इति भावः । **अनेनेति** । क्वचित् सद्भवेच्चेदित्यनेनेत्यर्थः । **एतेनाकाशे चेति** । आकाशे भावत्वसाधकस्य न्यायस्य सुखादौ चाविशेषात् भावत्वमेव । अन्यथा नीलादेरपि भावत्वं न स्यादविशेषादिति व्याख्यातमित्यर्थः । नन्वथापि पञ्चस्कन्धात्मना स्थितिमित्यनूदितं कुतो न दूषितमित्यत आह **आकाशादीनामिति** । अरूपज्ञानसन्ततिमिति सूचितमात्मनो ज्ञानात्मकत्वं दूषणीयमित्यत आह **आत्मन इति** । आत्मनः क्षणभङ्गता तर्हि निराकार्येत्यत आह **क्षणभङ्गिताया इति** । नन्वस्माभिर्ज्ञानरूपत्वेऽप्यात्मनो ज्ञातृत्वमङ्गीकृतं सौगतैस्तु ज्ञानत्वमेव तत्कथं न विरुद्धमित्युच्यत इत्यत आह **ज्ञानस्यापीति** । अरूपज्ञानसन्ततिं मोक्षमित्युक्तं अवशिष्टं वर्तत इत्यत आह **मोक्षस्त्विति** ।

**॥ इति सप्तमसूत्रस्य प्रकारान्तरेण व्याख्यानम् ॥**

**॥ इति उपन्यस्तमतनिराकरणपरतया एतदधिकरणगतानाम् अष्टानां सूत्राणां योजना ॥**

* * *

**॥ अथ च तत्र सौत्रान्तिकसिद्धान्तविशेषस्य निराकरणाभावे कारणप्रदर्शनम् ॥**

**॥ अथ तत्रादौ तस्यात्यन्तनिर्दलस्य मायावादवदुपेक्षणीयत्वमेव ॥**

७७ **सु०—** स्यादेतत् । वैभाषिकसौत्रान्तिकयोर्यः साधारणः स्वमतविरुद्धः सिद्धान्तः, स एव सूत्रकृता निराकृतः । यस्तु सौत्रान्तिकस्य सिद्धान्तविशेषः, 'प्रमाणं तावद् द्विविधम्, प्रमेयद्वैविध्यात् । तत्र ज्ञानातिरिक्तः सर्वोऽपि रूपादिप्रपञ्चोऽनुमेय एव न तु प्रत्यक्षः । ज्ञानं (तु) नीलाद्याकारं प्रत्यक्षवेद्यमि'ति, स कस्मान्न निराकृत इत्यत आह **विश्वमिति** ।

**अनु०—** विश्वं प्रत्यक्षगं त्यक्त्वा तयोर्योऽनुमितं वदेत् ।
मायावादिवदेवासावुपेक्ष्यो भूतिमिच्छता ॥

**तयोः** वैभाषिकसौत्रान्तिकयोर्मध्ये **यः** सौत्रान्तिकः, **विश्वं** रूपादिकं, **प्रत्यक्षगं त्यक्त्वा** रूपादेर्विश्वस्य प्रत्यक्षवेद्यतां वैभाषिकादिभिरभ्युपगतामनभ्युपगम्येति यावत्, **अनुमितं वदेत्** रूपादेर्विश्वस्यानुमानवेद्यतामङ्गीकुर्यात्, मायावादिना तुल्यं वर्तत इति **मायावादिवत्** ।

एतदुक्तं भवति । यथा सर्वान् दुःसमयानपाकुर्वता(ऽपि) सूत्रकृता न मायावादोऽत्र पादे निराकृतः, 'तस्यात्यन्तनिर्दलस्योपेक्षैव कार्या । न त्वीषत्सदलैः साङ्ख्यादिसमयैः सह निरास' इति ज्ञापनार्थम्, तथा बाह्यानुमेयतावादोऽपीति ।

ननु मायावादः सूत्रोत्पत्त्युत्तरकालभावी, तस्य कथं निरासप्रसक्तिः । मैवम् । 'अनादिकालतो वृत्ता' इत्युक्तत्वात्, अन्यथा साङ्ख्यादिनिरासस्याप्यप्रसक्तेरिति ।

**परि०— द्विविधमिति** । प्रत्यक्षानुमानभेदेनेति भावः । ननु मायावादिवदिति कथम् । तत्प्रतियोगिनः सौत्रान्तिकस्यासाविति प्रथमान्तनिर्देशेन मायावादी यथोपेक्ष्यः तथा सौत्रान्तिकोऽप्युपेक्ष्य इति वाच्यत्वात् तत्र प्रथमासमर्थात् इवार्थे वतिप्रत्ययस्य विधायकाभावादित्यत आह **मायावादिनेति** । तथा च 'तेन तुल्यं क्रिया चेद्वतिरि'ति सूत्रेण तृतीयासमर्थात् तुल्यार्थे वतिप्रत्ययः । उपेक्षणरूपक्रियातुल्यत्वस्योभयत्र भावादिति भावः । कथमनेनोक्तशङ्कानिरास इत्यत आह **एतदुक्तमिति । न मायावादोऽत्र पादे निराकृत इति** । कण्ठत इति योज्यम् । मताविशेषेणार्थान्निराकरणस्योत्तरनये स्फुटत्वात् । **इत्युक्तत्वादिति** । एतत्पादादाविति भावः ।

**यादु०— मायावादिना तुल्यं वर्तत इति** । तथा च 'तेन तुल्यं क्रिया चेद्वतिरि'त्यनेनैवात्र वतिर्न 'तत्र तस्ये'त्यनेन, षष्ठीसप्तम्यर्थयोः प्रकृतेऽन्वयासम्भवादिति ज्ञातव्यम् ।

**वं०प०— द्विविधं** प्रत्यक्षमनुमानं चेति द्विविधमित्यर्थः । कुतो द्वैविध्यमित्यत आह **प्रमेयेति** । परोक्षापरोक्षरूपप्रमेयेत्यर्थः । 'तत्र तस्येवे'त्यस्यायोगादाह **मायावादिनेति** ॥ **अप्रसक्तेरिति** । तस्यापि सूत्रोत्पत्त्युत्तरकालीनत्वादित्यर्थः ।

**कं०रा०— बाह्येति** । बाह्यस्य रूपादिप्रपञ्चस्यानुमेयत्ववादोऽपि सूत्रकृता न निराकृतः तस्यात्यन्तनिर्दलस्योपेक्षैव कार्या न त्वीषत्सदलैः साङ्ख्यादिसमयैः सह निरास इति ज्ञापनार्थमित्यर्थः । **अनादिकालत इति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहत' इति सकलसमयानां प्रवाहतोऽनादित्वस्योक्तत्वेन मायावादस्याप्यनादित्वात् तन्निरासप्रसक्तिरस्त्येवेति भावः ।

**श्रीनिधि०—** प्रमेयद्वैविध्यादित्युक्तम् । तद्वैविध्यमेव दर्शयति **तत्र ज्ञानातिरिक्त इति** । 'मायावादिवदि'त्यत्र 'तत्र तस्येवे'त्यनेन वतिप्रत्ययाङ्गीकारे अनन्वय इत्यतः **मायावादिना तुल्यं वर्तत** इत्युक्तम् । अनेन 'तेन तुल्यं क्रिया चेद् वतिरि'ति सूत्रं सूचयति । **अत्यन्तनिर्दलस्येति** । सर्वत्र बाधादिव्याहतित्रययुक्तत्वेनेति भावः । **ईषद् सदलैरिति** । तन्मते अनुभावादिबाधादेरविशेषेऽपि न सर्वत्रेति भावः । **अन्यथा साङ्ख्यादीति** । **अन्यथा** सूत्रोत्पत्त्युत्तरं पुरुषविशेषप्रवर्तिततत्वमात्रेण निरासाप्रसक्तौ ।

**शे०चं०— साधारण इति** । बाह्यार्थो घटादिः परमाणुपुञ्जरूपः क्षणिकः सन्नित्येवंरूप इत्यर्थः । ननु विश्वं त्यक्त्वेत्यत्र त्यागो नामानभ्युपगम एव वाच्यः । अन्यस्यासम्भवात् । न चासाविहास्ति । रूपादेर्विश्वस्य तेनाभ्युपगमादित्याशङ्क्य विश्वं प्रत्यक्षगं त्यक्त्वेत्यस्य विशिष्टनिषेधत्वाद्विशिष्टनिषेधस्य च सति विशेष्ये बाधे विशेषणविषयतायाः 'सविशेषणे ही'ति न्यायसिद्धत्वात् प्रत्यक्षवेद्यत्वरूपविशेषणविषयत्वप्राप्त्या रूपादेर्विश्वस्याभ्युपगमेऽपि तस्य प्रत्यक्षवेद्यताया अनभ्युपगमान्नानुपपत्तिरिति भावेन विशिष्टनिषेधस्य विशेषणविषयतया तात्पर्यमाह **रूपादेर्विश्वस्येत्यादि** । षष्ठ्यर्थसप्तम्यर्थयोः प्रकृतान्वयासम्भवेन मायावादिन इवेति वा मायावादिनीवेति वा षष्ठीसमर्थात् सप्तमीसमर्थाद्वा 'तत्र तस्येवे'त्यनेन वतेरसम्भवात् तदनुपपत्तिमाशङ्क्य 'तेन तुल्यं क्रिया चेद्वतिरि'ति लक्षणान्तरेण वतिप्रत्ययसम्भवान्न दोष इत्याशयेन तत्तुल्यक्रियतामुपदर्शयति **मायावादिनेति** । कथं सौत्रान्तिकस्य मायावादिना तुल्यक्रियात्वमित्यतः तदुक्तेस्तात्पर्यमाह **एतदुक्तं भवतीति** ॥ **तथा बाह्यानुमेयतावादोऽपीति** । अत्यन्तं निर्दलस्य बाह्यानुमेयतावादस्योपेक्षैव कार्या न त्वीषत्सदलैर्वैभाषिकादिभिः समयैः सह निरासः कार्य इति ज्ञापनार्थं बाह्यानुमेयतावादोऽप्यत्र पादे न निराकृत इत्यर्थः । **सूत्रोत्पत्त्युत्तरकालभावीति** । तस्य सूत्रव्याख्यानरूपत्वाद्व्याख्यानस्य च पश्चात्तनत्वनियमात् सूत्रोत्पत्त्युत्तरकालभावित्वं मायावादस्येति भावः ॥ **उक्तत्वादिति** । एतत्पादारम्भसमर्थनावसर इति शेषः । तथा च सूत्रोत्पत्तेः प्रागपि मायावादसत्त्वाद्युक्तैव तन्निरासप्रसक्तिरिति भावः ॥ **अन्यथेति** । अनादिकालतो वृत्तत्वव्यतिरेकेण तन्निरासप्रसञ्जकस्यान्यस्याभावादिति भावः ।

**वा०र०— सति विशेष्ये बाध इति** । एतच्च न्यायस्य बाधमूलकत्वं परीत्यैवाङ्गीकृत्योक्तम् । वस्तुतः स्वमते न जीर्णमलवद्वासाः स्नातकः स्यात् इत्यादौ उभयनिषेधगौरवेण लाघवादेकस्य विशेषणस्यैव निषेध इति जिज्ञासाधिकरणोक्तरीत्या अत्रापि उभयस्य त्यागविषयत्वस्वीकारे गौरवात् एकस्य विशेषणस्यैव त्यागविषयत्वमिति नानुपपत्तिरिति बोध्यम् । **अभ्युपगमेऽपीति** । तेनेति शेषः । अनुवर्तते वा । अनभ्युपगमादित्यत्रापि एवमेव । वैभाषिकादिभिरित्यादिपदेन सौत्रान्तिकव्यतिरिक्तमाध्यमिकादिपरिग्रहः ।

**वि०ठ०— द्विविधमिति** । प्रत्यक्षानुमानभेदेनेति शेषः । मूले **असाविति** सौत्रान्तिकस्य प्रथमान्तपदेन परामर्शात् मायावादिवदित्यस्यापि मायावादी यथेत्यर्थो वक्तव्यः । न चासौ युज्यते । वतिप्रत्ययस्य तत्र तस्येवेति वतिरिति सप्तम्याद्यर्थ एव विहितत्वेन प्रथमार्थे विधानाभावादित्यत आह **मायावादिनेति** । तथा च

'तेन तुल्यं क्रिया चेद्वतिरि'ति सूत्रेण तृतीयासमर्थात् तुल्यार्थे वतिर्विहिता । प्रकृते च उपेक्षणरूपक्रियाया उभयत्र तुल्यत्वादिति भावः । नन्वेतेनापि सौत्रान्तिकसिद्धान्तानिराकरणे किं नियामकं लब्धमित्यत आह **एतदुक्तं भवतीति** । **न मायावादोऽत्र निराकृत इति** । सूत्राक्षरार्थतयेति योज्यम् । अर्थान्निराकरणस्योत्तराधिकरणादौ स्पष्टत्वादिति ज्ञेयम् । **अन्यथा साङ्ख्यादिनिराकरणस्येति** । द्वापरे सूत्रप्रणयनस्य प्रमितत्वात् प्रायेण साङ्ख्यादिदुर्मतानां कलियुगे जातत्वादिति भावः ।

**॥ इति तस्यात्यन्तनिर्दलस्य मायावादवदुपेक्षणीयत्वमेव ॥**

* * *

**॥ अथ च तत्र अनिराकृतस्य अनुमततायाः प्रमाणाविरोधे प्रमाणानुसारित्वे चैवाङ्गीकर्तुं शक्यता ॥**

७८ सु०— "ननु 'अप्रतिषिद्धमनुमतं भवती'ति न्यायेन 'नीलादेर्विश्वस्याप्रत्यक्षत्वं सूत्रकारस्याभिमतमेवे'ति कुतो न कल्प्यते । न चैवं (नैवं) शक्यम् । प्रमाणाविरुद्धः प्रमाणानुसारी च सूत्रकारस्याभिप्रायः कल्पनीयः, न चायमर्थस्तथा" इत्याशयवानाह **सर्वेति** ।

## अनु०— सर्वप्रमाणसिद्धं यद्बुद्धेर्भेदेन सर्वदा ।
## कथं नु तस्य बुद्धित्वं

अयमत्रोत्तरक्रमः । नीलादेरर्थस्याप्रत्यक्षत्वं न वक्तुं शक्यते, नीलादिप्रतीतेरपरोक्षतायाः साक्षिसिद्धत्वात्, इन्द्रियव्यापारभावभावित्वेनानुमानसिद्धत्वाच्च ।

अथ मतम् 'येनार्थेन यज्ज्ञानं जायते तत् तदाकारं भवति, तच्च ज्ञानं स्वप्रकाशतया स्वगतं नीलाद्याकारमपि साक्षात्कुरुते, अतोऽपरोक्षतयोपलभ्यमानस्य नीलाद्याकारनिकरस्य बुद्धिगतत्वान्न कश्चिद्दोषः' इति । अत्रेदमुपतिष्ठते । यदपरोक्षतयाऽवभासमानं नीलाद्याकारचक्रं **बुद्धेर्भेदेन सर्वदा सर्वप्रमाणसिद्धं, तस्य कथं नु बुद्धित्वम्** अङ्गीक्रियते ।

बहिर्मुखतयेदन्त्वेन ह्ययं नीलाद्याकारोऽपरोक्षमवभासते, न जात्वन्तर्मुखतयाऽहं नीलमिति; तथा नीलापरोक्षज्ञानसमनन्तरं नीलार्थी नियमेन बहिः प्रवर्तते; तेनानुमीयतेऽनेन बहिरर्थ एव साक्षात्कृत इति । न ह्यन्यत्र ज्ञानमन्यत्र प्रवृत्तिरिति युज्यते; अतिप्रसङ्गात् ॥ मध्येऽनुमानं तु निरसिष्यते ॥ एवमाप्तोऽपि 'किमपरोक्षतया पश्यसी'ति पृष्टः अङ्गुलिं

**प्रसार्य 'इदमि'ति बाह्यमेव ब्रवीति । अतस्त्रिभिरपि प्रमाणैरपरोक्षतयाऽवभासमानस्य नीलाद्याकारस्य बुद्धितो भेद एवावसीयते । न चेदं सर्वं भ्रान्तम्, कदाऽप्यन्यथाप्रतीत्यभावात्, विनैव बाधकेन भ्रान्तित्वाभ्युपगमेऽतिप्रसङ्गात् ॥ अतोऽपरोक्षतयाऽवभासमानो नीलाद्याकारो बाह्य एव, न तु बुद्धिगत इति ।**

**परि०— अहं नीलमिति** । परेण ज्ञानस्यात्मत्वोपगमादेवमुक्तम् । ननु नीलाद्याकारस्य ज्ञानगतस्य आकस्मिकत्वायोगेन तद्धेतुतया बाह्यार्थमनुमाय पश्चाद्बहिरर्थे प्रवर्तत इत्यत आह **मध्य इति** । नीलाद्याकारावभासबाह्यार्थप्रवृत्त्योर्मध्य इत्यर्थः ॥ **निरसिष्यत इति** । 'विश्वमन्यच्च किंप्रमम्' इत्येतद्व्याख्याने स्यादेतदित्यनुमानप्रकारमाशङ्क्य निरसिष्यत इत्यर्थः ।

**गु०दी०— मध्येऽनुमानं तु निरसिष्यत** इत्यत्र **मध्ये** ज्ञानाश्रितनीलप्रत्यक्षप्रवृत्त्योर्मध्ये ज्ञानगतनीलाकारमूलीभूतं बाह्यनीलमपि फलबलादनुमीयत इत्यर्थः ।

**यादु०— स्वगतं** स्वस्वरूपभूतम् । एवं बुद्धिगतत्वादित्यादौ तदभिन्नत्वादित्येवार्थः । अतः 'कथं नु तस्य बुद्धित्वमि'त्यादि समञ्जसमिति ज्ञातव्यम् ॥ **बहिर्मुखतयेति** । परात्त्वेनेत्यर्थः ॥ **अन्तर्मुखतयेति** । प्रत्यक्त्वेनेत्यर्थः ॥ **अहं नीलमिति** । परेण सन्तन्यमानमहमित्याकारमालयज्ञानमेवात्मा, तदेव च नीलाद्याकारं भवतीति स्वीकृतत्वादहं नीलमित्युक्तमिति ज्ञातव्यम् । ननु नीलार्थी नीलापरोक्षज्ञानसमनन्तरं बुद्धिगतोऽपरोक्षतया अवभासमानोऽयं नीलाद्याकारः कादाचित्कत्वात्कारणसापेक्षः तच्च कारणमन्यन्न भवितुमर्हतीति नीलादिकमेव तथेत्यनुमाय बहिः प्रवर्तत इत्यत आह **मध्येऽनुमानमिति** । नीलापरोक्षज्ञानप्रवृत्त्योर्मध्य इत्यर्थः । **निरसिष्यत इति** । अनुपदमेव 'विश्वमन्यच्च किंप्रमम्' इत्यत्रेति शेषः ।

**कं०रा०— स्वप्रकाशतयेति** । स्वशब्दस्यात्मात्मीयपरत्वमादाय स्वस्वासाधारणधर्मविषयकप्रकाशता स्वप्रकाशतेति स्वीकृतत्वात् परेण ज्ञानस्योक्तं स्वप्रकाशत्वेन स्वगतनीलाद्याकारविषयत्वं सम्भवतीति भावः । **तेनेति** । बहिःप्रवर्तमानेन नीलापरोक्षज्ञानवतेत्यर्थः । ज्ञानगतनीलाकारापरोक्षज्ञानेन बाह्यार्थप्रवृत्तिः किं न स्यात् इत्यत आह **न हीति** । नन्वपरोक्षज्ञानस्य ज्ञानगतनीलाकारविषयत्वेऽपि बहिरर्थे प्रवृत्तिर्युज्यते । नीलाकारापरोक्षज्ञानप्रवृत्त्योर्मध्येऽनुमानेन बाह्यार्थस्य ज्ञातत्वादित्यत आह **मध्य इति** ।

**श्रीनिधि०**— ननु बाह्यानुमेयत्वं प्रमाणानुसारि न भवतीति सर्वप्रमाणासिद्धमिति मूलेनोच्यत इत्युक्तम् । न च तद् दृश्यते । किं बाह्यार्थस्य तु बुद्धितो भेद एव प्रमाणेनोपपाद्यते । तर्हि बाह्यार्थस्य बुद्ध्यभेद अप्रामाणिक इत्याहेत्यवतार्यतामिति चेन्न । प्रकृतासङ्गतेः । तथा च कथमिदमित्यत आह **अयमत्रोत्तर क्रम इति** । **बहिर्मुखतयेति** । आभिमुख्येनेत्यर्थः । **अन्तर्मुखतया** प्रत्यक्त्वेन । **तेनानुमीयत इति** । अयं बहि-

र्थसाक्षात्कारवान् तत्र प्रवृत्तिमत्त्वादिति अनुमीयते । अस्याप्रयोजकत्वं निराकरोति **न ह्यन्यत्रेति** । विषय-सप्तमीयम् । ननु नातिप्रसङ्गः । ज्ञानसाक्षात्कारानन्तरं बाह्यार्थानुमितिः । अनन्तरं तत्र प्रवृत्तिरित्यभ्युपगमादित्यत आह **मध्येऽनुमानं त्विति** । 'विश्वमन्यच्च किंप्रममि'त्यनेनेति भावः । **पृष्ट इति** । केनचिदिति शेषः । इदं वस्त्वत्रास्तीत्युक्त इति च । **अङ्गुलिं प्रसार्येत्यादि** । न हीदं मानान्तरे सम्भवार्हमिति भावः ।

**शे०चं०**— नन्वत्र मूले यदपरोक्षतयाऽवभासमानं नीलाद्याकारचक्रं बुद्धेर्भेदेन सर्वदा सर्वप्रमाणसिद्धं तस्य तद्बुद्धिगतत्वानुपपत्तिरेवोच्यते, न तु नीलादेर्विश्वस्याप्रत्यक्षत्वानुपपत्तिः । तत्कथमनेन तस्याप्रत्यक्षत्वनिरास इत्यतो नेदं साक्षात् तन्निरासकं, किन्तु साक्षात् तन्निरासमन्यदेव । इदं तु तत्र प्राप्तानुपपत्तिपरिहारेण तन्निरा-सकमिति परम्परयैवेत्यभिप्रेत्य साक्षात् तन्निरासकदर्शनपूर्वकं तत्र प्राप्तानुपपत्तिपरिहारकतया ग्रन्थं सङ्गमयितुमाह **अयमत्रोत्तरक्रम इति** ॥ **अत्रेदमिति** । एतदाशङ्कापरिहारार्थमिदं मूलमित्यर्थः । तत्कथमित्यतोऽपेक्षितपूरणपूर्वकं वाक्यं योजयति **यदपरोक्षतयेत्यादिनाऽङ्गीक्रियत इत्यन्तेन** । कथमपरोक्षतया प्रतीयमानस्य नीलाद्याकार-चक्रस्य बुद्धेर्व्यावृत्ततया सर्वप्रमाणसिद्धत्वमित्यतः तावत् तस्य प्रत्यक्षसिद्धतां दर्शयति **बहिर्मुखतयेति** । परात्त्वेनेत्यर्थः । तस्यैवाभिनयेनोपदर्शनम् **इदन्त्वेनेति** ॥ **अन्तर्मुखतयेति** । प्रत्यक्त्वेनेत्यर्थः । तस्यैवाभि-नयेनोपदर्शनम् **अहं नीलमितीति** । सन्तन्यमानमहमित्याकारमालयविज्ञानमेव परमते आत्मेति दर्शयितुमह-मित्युक्तम् । अन्यथा बुद्धिर्नीलमित्येवावक्ष्यदिति द्रष्टव्यम् । अनुमानसिद्धतामप्याह **तथेति** । अनेन नीलार्थी बहिरर्थमात्रसाक्षात्कारवान् नीलापरोक्षज्ञानसमनन्तरं नियमेन बहिःप्रवर्तमानत्वादित्यनुमानमुक्तं भवति । अप्रयो-जकतामाशङ्क्य परिहरति **न हीति** ॥ **अतिप्रसङ्गादिति** । तथा सति पुरोदेशे रजतसद्भावज्ञानानन्तरं रजतार्थिनो देशान्तरे प्रवृत्तिः स्यादित्यतिप्रसङ्गः स्यादित्यर्थः । ननु नीलापरोक्षज्ञानेन स्वगतनीलाकारस्यैव ग्रहणेऽपि नीलार्थिनो बहिर्नियमेन प्रवृत्तिः सम्भवति । ज्ञानगतनीलाकारग्रहणबहिःप्रवृत्त्योर्मध्ये बाह्यनीलानुमानप्रवृत्त्या बाह्य-नीलस्यापि ज्ञातत्वसम्भवात् । तथाहि । अपरोक्षतयाऽवभासमानो बुद्धिगतो नीलाद्याकारः सकारणकः कादा-चित्कत्वादित्यनुमानेन सकारणत्वसिद्धौ कारणान्तरस्यासम्भवेन बाह्यनीलाद्याकारस्यैव कारणत्वेनाभ्युपेयत्वा-दित्यत आह **मध्येऽनुमानं त्विति** । 'विश्वमन्यच्च किं प्रममि'त्येतद्व्याख्यानावसरे स्यादेतदित्यादिना मध्येऽनुमानमाशङ्क्य 'बाह्यतयैव नीलाद्याकारस्य स्फुरणादि'त्यादिना निरसिष्यत इत्यर्थः । आगमसिद्धतामप्युप-दर्शयति **एवमिति** । प्रत्यक्षादेर्भ्रमत्वान्न प्रमाणसिद्धत्वं तद्भेदस्येति शङ्कते **न चेदमिति** । एवं भाष्ये हेत्वंशं व्याख्याय 'कथन्नु तस्य बुद्धित्वमि'ति साध्यांशं तात्पर्यतो व्याचष्टे **अत इति** । अनेन तस्यापरोक्षतया अवभासमानस्य नीलाद्याकारस्य **कथं बुद्धित्वं** बुद्धिगतत्वं, न कथमपि, किन्तु तस्य बाह्यत्वमेवेति योजनोक्ता भवति ।

**वा०र०**— एवं **आप्तोऽपीति** मूले भवान् इति पूरणात् पश्यतीति युज्यते । यद्वा स पुरुषः किमप-रोक्षतया पश्यतीति पृष्ट आप्त इति पुरुषान्तरविवक्षया पश्यतीति प्रथमपुरुषोपपत्तिरिति ज्ञेयम् ।

**स०व्र०— बहिर्मुखतया** परात्त्वेनेत्यर्थः । **अन्तर्मुखतया** प्रत्यत्त्वेनेत्यर्थः । ननु च नीलापरोक्षज्ञानेन स्वगतनीलाकारस्यैव ग्रहणेऽपि तदनन्तरं नीलार्थिनो नियमेन बहिःप्रवृत्तिः सम्भवति । ज्ञानगतनीलाकारग्रहण-बहिःप्रवृत्त्योर्मध्ये बाह्यनीलानुमानस्य सद्भावेन तेनानुमानेन बाह्यनीलस्यापि ज्ञातत्वेन तत्र प्रवृत्त्युपपत्तेः । तथाहि । अपरोक्षतया अवभासितो बुद्धिगतो नीलाकारः सकारणकः कादाचित्कत्वादित्यनुमानेन सकारणकत्वे सिद्धे कारणान्तरस्यासम्भवात् बाह्यनीलाद्याकार एव कारणत्वेनाभ्युपेय इति । तथा च नोक्तदोष इत्यत आह **मध्येऽनुमानं निरसिष्यत इति** । अनुपदमेव 'स्यादेतदि'त्यादिना मध्ये अनुमानमाशङ्क्य 'बाह्यतयैव नीला-कारस्य स्फुरणादि'त्यादिना निरसिष्यत इत्यर्थः ।

**वि०— ** अर्थो विषयः स्वज्ञाने स्वाकारं समर्पयतीति भावः । **स्वगतमिति** । विषयसम्बन्धेन स्वस्मिन्नेव जायमानं ज्ञानाकारभूतं नीलाद्याकारमित्यर्थः । **बुद्धिगतत्वादिति** । उक्तरीत्या ज्ञानस्वरूपत्वादि-त्यर्थः । तथा च साक्ष्यादिसिद्धा नीलाद्यपरोक्षप्रतीतिर्ज्ञानगोचरैव । तथा च तद्विषयतया बाह्या नीलादयो-ऽनुमीयन्त इति भावः । **बहिर्मुखभयेति** । बाह्यपदार्थत्वेनेत्यर्थः । **अहं नीलमिति** । परेण सन्तन्यमान-महमित्याकारकमालयज्ञानमात्मा तदेव ज्ञानं विषयार्पितं नीलाद्याकारं भवतीत्युच्यते । यदि च परोक्तरीत्या नीलप्रतीते ज्ञानस्वरूपमात्मरूपत्वम् । तर्हि अहं नीलमिति प्रत्यत्त्वेनाह ...........रोल्लेखितया चावभासते । तस्मान्न नीलाद्याकारस्य परात्त्वादिना अपरोक्षेण प्रतीयमानस्य बुद्धिगतत्वम् । किं च नीलापरोक्षानन्तरं नीलार्थिनो नियमेन बहिःप्रवृत्त्यन्यथानुपपत्त्या च साक्षात्क्रियमाणो नीला नोक्तदोष इत्यत आह **मध्येऽनुमानं इति** । 'विश्वमन्यच्च किंप्रममि'त्यत्रानुपदमेव निरसिष्यत इत्यर्थः ।

* * *

**॥ अथ च तत्र बाह्यार्थस्याप्रत्यक्षत्वे तदसिद्धिरेव ॥**

**॥ अथ च तत्रादौ बाह्यार्थस्याप्रत्यक्षत्वे प्रमाणाभावः ॥**

७९ **सु०— किञ्च बाह्यार्थस्याप्रत्यक्षत्वे तदसिद्धिरेव स्यात्, प्रमाणाभावात्; तथा च बाह्यार्थाभ्युपगमो रिक्तः स्यादित्याह विश्वमिति ।**

**अनु०— विश्वमन्यच्च किंप्रमम् ।**

**अन्यत् ज्ञानमिति शेषः । का प्रमा यस्य तत् किंप्रमम् ।**

**॥ इति बाह्यार्थस्याप्रत्यक्षत्वे प्रमाणाभावः ॥**

* * *

॥ अथ च तत्र बाह्यार्थस्यानुमेयत्वे पक्षीकरणायोगः, व्याप्त्यसिद्धिश्च ॥

८० **सु०—** अनुमेयो बाह्याकार इति चेत् (न); सर्वथाऽसिद्धस्य पक्षीकरणायोगात्, लिङ्गाभावाद्व्याप्त्यसिद्धेश्च ।

स्यादेतत्, बुद्धिगतस्तावदाकारः अपरोक्षमवभासते, स कादाचित्कत्वात् किमपि कारणमपेक्षमाणो बाह्यं नीलाद्यनुमापयिष्यतीति । मैवम्, बाह्यतयैव नीलाद्याकारस्य स्फुरणात् ।

कुत्र चेदमुपलब्धम् 'यत्कादाचित्कं तत्कारणवदि'ति । ज्ञान एवेति चेत् (न) बाह्याप्रत्यक्षत्ववादे तत्रापि कारणवत्त्वानवधारणात् । ज्ञानं पूर्वज्ञानकारणकमुपलब्धमिति चेत्, तर्ह्याकारोऽपि पूर्वाकारजन्यः कल्प्यताम्, किं बाह्यार्थव्यसनेन । नीलज्ञाना(नोत्पादा)-नन्तरं पीतज्ञानोत्पाददर्शनान्नेति चेत् (न), सदृशजन्यत्वस्य परेण क्वाप्यनुपलब्ध(गन्तव्य)-त्वात् ।

**परि०—** ननु विशिष्य पक्षलिङ्गादेरभावेऽपि न्यायमते गगनादेरिव सामान्यपरिशेषाभ्यां बाह्यार्थस्य सिद्धिः स्यादिति शङ्कते **स्यादेतदिति** ॥ **बाह्यं नीलादीति** । अन्यस्यासम्भवादिति परिशेषात् तत्सिद्धिरिति भावः ॥ **बाह्यतयैवेति** । तथा च बुद्धिगतस्तावदित्यादिनोक्तः पक्षोऽसिद्ध इति भावः । व्याप्त्यसिद्धिं च वक्तुमाह **कुत्र चेदमिति** ॥ **तत्रापीति** । बाह्यार्थेऽपीत्यर्थः । यद्वा ज्ञानविषयेऽपीत्यर्थः । **परेणेति** । विरलेभ्यो मिलितादिजन्मवादिनेत्यर्थः ।

**गु०दी०—** **तत्रापि कारणवत्त्वानवधारणात्** इत्यत्र बाह्यनीलत्वस्याप्रत्यक्षत्वे तत्र ज्ञानेऽपि कारणवत्त्वानवधारणात् । इतःपूर्वमनिर्णीतत्वादित्यर्थः । **पूर्वाकारजन्य** इत्यत्र पूर्वाकारः पूर्वज्ञानगतनीलाकारः ।

**यादु०—** किमनित्यत्वं शब्दवृत्तीत्यादाविव सिषाधयिषितं बाह्याकाररूपं साध्यमेव पक्षीकृत्यानुमीयते, उत तद्विषयकं ज्ञानमिति विकल्पं मनसि निधायाद्यं दूषयति **सर्वथाऽसिद्धस्येति** । द्वितीयं दूषयति **लिङ्गा-भावादिति** । ननु विज्ञानं बाह्यार्थसापेक्षं विज्ञानत्वादिति विज्ञानत्वमेव लिङ्गं भविष्यतीत्यत आह **व्याप्त्य-सिद्धेरिति** । विज्ञानस्य पक्षतया तदतिरिक्तस्य बाह्यार्थस्याधुनाऽप्यसिद्धया दृष्टान्ताभावेनान्वयतो व्यतिरेकतो वा व्याप्तेरसिद्धेरित्यर्थः । सामान्यसिद्धिपरिशेषरूपं मानमाशङ्कते **स्यादेतदिति** । पक्षासिद्धिशङ्कापरिहारायोक्तम् **अपरोक्षमवभासत इति** । अपेक्षमाण इत्यस्यानन्तरमन्यस्यासम्भवादिति शेषः ॥ **बाह्यतयैवेति** । तथा च

बुद्धिगतनीलाद्याकारोऽस्माकमसम्मत इत्याश्रयासिद्ध्या सामान्यसिद्धिरेवानुपपन्नेति भावः । **कारणवत्त्वेति** । ज्ञानातिरिक्तं यद्बाह्यं तदेव तत्र कारणतया वक्तव्यम् । न ज्ञानमात्माश्रयप्रसङ्गत्वात् । तच्च त्वन्मते न प्रत्यक्षमिति न ज्ञाने कारणवत्त्वं निश्चेतुं शक्यमिति भावः । केचित्तु इन्द्रियादेरतीन्द्रियत्वेन तद्रूपकारणवत्त्वानवधारणादित्यर्थः । ज्ञानस्य कारणवत्त्वेऽपि व्यक्तिभेदान्नात्माश्रयत्वमित्याशङ्कते **ज्ञानमिति** ॥ **परेणेति** । त्वत्प्रतिवादिनेत्यर्थः । तं प्रति बाह्यार्थस्याधुनाऽप्यसिद्धेरिति भावः । तथा च विसदृशत्वेऽपि पूर्वाकारजन्यत्वेनार्थान्तरमाशङ्क्यैवेति ध्येयम् ।

**वं०प०— लिङ्गाभावादिति** । बाह्याकारस्यानुमेयत्वे तदनुमापकस्य लिङ्गस्याभावात् कुत्र व्याप्तिसिद्धिः स्यादिति दूषणान्तरम् ।

**कं०रा०— सर्वथेति** । सर्वथा असिद्धस्य बाह्यार्थस्य पक्षीकरणायोगात् तत्पक्षकानुमानेनैव तत्सिद्धिर्न सम्भवतीति भावः । असिद्धस्य बाह्यार्थस्य पक्षीकरणायोगेन तत्पक्षकानुमानेन तत्सिद्ध्यसम्भवेऽपि प्रतीयमानं ज्ञानगतनीलाद्याकारं पक्षीकृत्य तस्य बाह्यार्थपूर्वकत्वसाधनेन तत्सिद्धिर्भविष्यतीत्यत आह **लिङ्गाभावादिति** । ज्ञानगतनीलाद्याकारस्य बाह्यार्थपूर्वकत्वसाधने लिङ्गाभावात्, बाह्यार्थस्याद्याप्यसिद्ध्या तत्पूर्वकत्वरूपसाध्यस्याप्रसिद्धत्वेन पराभिमतहेतोरुक्तसाध्येन व्याप्यसिद्धेश्च नैवमप्यनुमानं सम्भवतीति भावः । ननु ज्ञानगतनीलाद्याकारस्यापरोक्षतया भासमानस्य पक्षीकरणेन कादाचित्कत्वहेतुना सकारणकत्वसाधने अन्यस्य कारणस्याभावात् बाह्यार्थ एव तत्कारणत्वेन सेत्स्यतीत्याशयेन शङ्कते **स्यादेतदिति** । **बाह्यतयेति** । नीलाद्याकारस्य बाह्यतयैव स्फुरणेन बुद्धिगतत्वाभावाद्बुद्धिगतनीलाद्याकारं पक्षीकृत्य सकारणकत्वानुमानं न सम्भवतीति भावः । **आकारोऽपीति** । ज्ञानगतनीलाद्याकारोऽपि पूर्वज्ञानगताकारजन्यः कल्प्यन्तां किं बाह्यार्थव्यसनेनेत्यर्थः । ननु नीलज्ञानानन्तरं पीतज्ञानोत्पाददर्शनान्नीलज्ञाने च पीताकाराभावान्नीलज्ञानगतनीलाकारस्य चोत्तरज्ञानगतपीताकारं प्रति विसदृशत्वेन जनकत्वायोगात् ज्ञानगताकारस्य पूर्वज्ञानगताकारजन्यत्वं न सम्भवतीति शङ्कते **नीलज्ञानानन्तरमिति** । **सदृशजन्यत्वस्येति** । सर्वत्र ज्ञानगताकारस्यान्तरत्वबाह्यत्वादिना विसदृशबाह्याकारजन्यतायाः परेण स्वीकृतत्वात् सदृशजन्यत्वं क्वाप्यनुपलब्धमिति भावः ।

**श्रीनिधि०—** बाह्याकारोऽनुमेय इति वदता वक्तव्या किं बाह्याकारमेव पक्षीकृत्य तदनुमीयते उत तत्कार्यं ज्ञानाकारं पक्षीकृत्य । आद्य आह **सर्वथासिद्धस्येति** । केनापि प्रकारेणेत्यर्थः । इदन्त्वादिना सिद्धे हि धर्मिणि अयं वृक्षः शिंशुपात्वात् इत्याद्यनुमानम् । न तु सर्वथाऽसिद्धे एवमिदन्त्वादिनाऽप्यसिद्धे बाह्याकारेण तेन रूपेण पक्षीकरणं येन अयं घट इत्याद्यनुमीयतेत्यर्थः । **लिङ्गाभावादिति** । लिङ्गज्ञानाभावादित्यर्थः । पृथुबुध्नोदरादिमत्त्वं यद्यपि लिङ्गमस्ति तथापि न तज्ज्ञानं युज्यते । तस्यापि बाह्यत्वानुमेयत्वात् । **व्याप्त्यसिद्धेश्चेति** । अत एवेति भावः । कस्मिंश्चिद्धर्मिणि कयोश्चिद्धर्मयोः सम्बन्धविशेषज्ञाने हि व्याप्तिसिद्धिरिति । द्वितीयं शङ्कते **स्यादेतदिति** । **किमपि कारणमपेक्षमाणो बाह्यं नीलाद्यनुमापयतीति** । इदं सकारणकं

कार्यत्वादित्यनुमानेन परिशेषसहकृतेन बाह्यार्थसिद्धिरित्यर्थः । **बाह्यतयैव नीलाद्याकारस्य स्फुरणादिति** । एवञ्चानुमानं व्यर्थमेव । तदर्थस्य सिद्धत्वात् । अन्यथा सिद्धसाधनापत्तेरित्यर्थः । व्याप्तिरपि न ज्ञातुं शक्येत्याह **कुत्र चेदमिति** । **बाह्याप्रत्यक्षत्ववाद इति** । कारणत्वाभिमतप्रतीत्या हि इदमस्य कारणमित्यन्वयव्यतिरेकाभ्यां अवधारणीयमिति भावः । अनुमानेन प्रतीतेर्कारणत्वावधारणमिति चेदन्योन्याश्रयापत्तेः । व्याप्तिज्ञाने अनुमानं तस्मिन् सति व्याप्तिज्ञानमिति भावः । **पूर्वज्ञानकारणकमिति** । धारावाहिकादिस्थले पूर्वज्ञानस्य विशेषणज्ञानत्वेन उत्तरज्ञानकारणत्वमुपलब्धमित्यर्थः । **नीलज्ञानानन्तरं पीतज्ञानदर्शनादित्यादि** । एवञ्च विप्रतिपन्नः उत्तरज्ञानाकारः पूर्वाकारजन्यो न तद्विसदृशत्वादित्यनुमानेन क्वचित् पूर्वाकारजन्यत्वासिद्धौ तद्दृष्टान्तेनान्यत्राप्यनुमीयत इति तद्विरोध इति भावः । इदमनुमानं व्याप्यत्वासिद्धम् अतो न बाधकमित्याशयेनाह **सदृशजन्यत्वस्येति** । **क्वापीति** । बाह्यं त्वप्रत्यक्षमेवेति । ज्ञानं तु विप्रतिपन्नमेवेति न दृष्टान्ततामश्नुत इति भावः । वासनादिकं बाह्यार्थस्यानुमातुमशक्यत्वात् प्रामाणिकत्वाच्चेत्यर्थः ।

**शे०चं०**— किं विप्रतिपन्नबाह्यार्थपक्षकानुमानमभिमतं, किंवा सम्प्रतिपन्नतज्ज्ञानपक्षकमिति विकल्पद्वयं मनसि निधाय आश्रयासिद्ध्या आद्यपक्षं दूषयति **सर्वथेति** । द्वितीयं दूषयति **लिङ्गाभावादिति** । ननु विज्ञानं बाह्यार्थसापेक्षं विज्ञानत्वादिति विज्ञानत्वमेव लिङ्गं भविष्यतीति न तदभाव इत्याशङ्क्य विज्ञानस्यात्र पक्षतया तदतिरिक्तस्य विज्ञानत्ववतो दृष्टान्तस्याभावेन अन्वयतोऽतिरिक्तस्य बाह्यार्थस्याद्याप्यसिद्ध्या दृष्टान्ताभावेन व्यतिरेकतश्च व्याप्त्यसिद्धेर्नैवमित्याह **व्याप्त्यसिद्धेरिति** । सामान्यसिद्धिपरिशेषाभ्यामेव बाह्यार्थसिद्धिरस्त्वित्याशङ्कते **स्यादेतदिति** । पक्षासिद्धिशङ्कापरिहारायोक्तम् **अपरोक्षमवभासत इति** । अपेक्षमाण इत्यस्यानन्तरमन्यस्यासम्भवादिति पूरणीयम् ॥ **बाह्यतयैवेति** । तथा च बुद्धिगतनीलाद्याकारासिद्धेराश्रयासिद्ध्या सामान्यसिद्धिरेवानुपपन्नेति भावः । आश्रयासिद्धिः स्वमते न दोष इत्यतो दोषान्तरमाह **कुत्र चेति** । तथा च व्याप्तिग्रहणस्थलाभावेन व्याप्तिज्ञानानुपपत्त्या व्याप्यत्वासिद्धेः सामान्यसिद्धिरनुपपन्नेति भावः । ज्ञान एव व्याप्तिग्रह इति वदन् प्रष्टव्यः । ज्ञानेऽभिमतं सकारणकत्वं वा बाह्यकारणकत्वं वा ज्ञानकारणकत्वं वेति विकल्पत्रयं मनसि निधायाद्यं दूषयति **बाह्याप्रत्यक्षत्ववाद इति** । बाह्यार्थस्य प्रत्यक्षत्ववादे ज्ञानस्य बाह्यार्थकारणकत्वनिश्चयसम्भवेऽपि त्वन्मते तस्याप्रत्यक्षत्वान्न ज्ञाने तत्कारणकत्वनिश्चय इति भावः । ननु ज्ञानं प्रति न बाह्यं कारणमभ्युपगम्यते, येन तस्याप्रत्यक्षत्वेन ज्ञानस्य तत्कारणकत्वावधारणानुपपत्तिः प्रसज्येत, किन्नाम पूर्वज्ञानमेव तत्र कारणम् । तच्च प्रत्यक्षमेवेति तत्कारणकत्वावधारणमुपपन्नमेवेति द्वितीयं शङ्कते **ज्ञानमिति** । उत्तरज्ञानस्य पूर्वज्ञानजन्यत्ववदुत्तरज्ञानाकारस्यापि पूर्वज्ञानाकारजन्यत्वसम्भवेन बाह्यार्थं विनाऽनुपपत्तेरभावेन ज्ञानाकारेण बाह्यार्थानुमानासम्भवादसिद्धिरेव स्यादित्याशयेन परिहरति **तर्हीति** । यत्र नीलज्ञानानन्तरं नीलज्ञानमेव भवति तत्र पूर्वज्ञानाकारस्योत्तरज्ञानाकारजनकत्वसम्भवेन बाह्यार्थं विना तदनुपपत्त्यभावेऽपि यत्र नीलज्ञानानन्तरं पीतज्ञानोत्पत्तिः तत्र पूर्वज्ञानाकारस्य विसदृशतयोत्तरज्ञानाकारजनकत्वासम्भवात् अस्त्येव बाह्यार्थं विना ज्ञानाकारानुपपत्तिरिति युक्तं तेन बाह्यार्थानुमानमिति भावेन शङ्कते **नीलज्ञानानन्तरमिति** । भवेदेतदेवं यदि कारणस्य

स्वसदृशकार्यजनकतानियमः स्यात् । न चासावस्ति । विरलपरमाणुभ्यो मिलितपरमाणूनां मिलितपरमाणुभ्यश्च विरलपरमाणूनाम् अधिपतीन्द्रियेभ्यश्चानधिपतीन्द्रियाणामुत्पत्तिदर्शनात् । ततश्च तद्वदेव नीलज्ञानाकारस्यापि विसदृशपीतज्ञानाकारजनकत्वोपपत्तेर्न तस्य बाह्यार्थेन विनाऽनुपपत्तिरिति कथं तदनुमापकत्वमित्याशयवानाह **सदृशेति** ।

**वा०र०— किं विप्रतिपन्नबाह्यार्थपक्षकमिति** । परमाणुसाधनविचारे वैशेषिकाधिकरणे परमाणुं पक्षीकृत्य इत्यादि प्राक् योजितम् । तदत्रोपयोगानुसारेण ज्ञेयम् । **अतिरिक्तस्य बाह्यार्थस्येति** । आन्तरस्य विज्ञानातिरिक्तस्याभावेन तस्य दृष्टान्तीकरणानुपपत्तेः इत्याशयः । परिशेषसिद्ध्यर्थमाह **पूरणीयमिति** । सदृश-कार्यजनकतानियमो भवताऽङ्गीकर्तुमर्हः स्यात् । न चैवमिति पाठः । अधिपतीन्द्रियमित्यन्तषष्ठ्यन्तत्रयस्यो-त्पत्तिदर्शनादिति वक्ष्यमाणेन सम्बन्धः । उत्पत्तिस्वीकारादिति पाठः । भवतेति शेषः । उत्पत्तिदर्शनादिति पाठे तु भवत्पक्षे इति शेषः । फलतस्तु स्वीकार एवार्थः । अनधिपतीन्द्रियाणां इत्यनन्तरं उत्पत्तिरिति वर्तते ।

**स०व्र०—** ननु ज्ञानं प्रति न बाह्यकारणमभ्युपगम्यते । येन तस्याप्रत्यक्षत्वेन ज्ञानस्य तत्कारण-वत्त्वावधारणानुपपत्तिः । किन्तु पूर्वज्ञानमेव तत्र कारणम् । तच्च प्रत्यक्षमेवेति तत्कारणवत्त्वावधारणमुपपन्नमिति शङ्कते **ज्ञानमिति** । **सदृशेति** । विरलपरमाणुभ्यः अविरलपरमाणूनामुत्पत्तेरन्यथाऽनुपपन्नत्वादिति भावः ॥

**वि०—** अनुमेयत्वपक्षे च किं बाह्याकारमेव पक्षीकृत्य अनुमीयते उत तद्विषयकं ज्ञानमिति विकल्पं मनसि निधाय आद्यं दूषयति **सर्वथाऽसिद्धस्येति** । द्वितीयं दूषयति **लिङ्गाभावादिति** । विज्ञानत्वादित्येव लिङ्गं ब्रूम इत्यत आह **व्याप्त्यसिद्धेरिति** । विज्ञानस्यैव पक्षतया तदतिरिक्तस्य बाह्यार्थस्य अद्याप्यसिद्ध्या दृष्टान्ताभावेन व्याप्त्यसिद्धेरित्यर्थः । बाह्याकारादन्यत्पक्षीकृत्येत्यभिप्रेत्य सामान्यसिद्धिपरिशेषरूपमनुमानमाशङ्कते **स्यादेतदिति** । पक्षासिद्धिशङ्कापरिहारायोक्तम् **अपरोक्षतयाऽवभासत इति** । **बाह्यं नीलाद्येति** । तदन्यस्या-प्रसक्तत्वादिति भावः । बुद्धिगतनीलाद्याकारस्य अस्मदसम्मतत्वेन आश्रयासिद्ध्या सामान्यसिद्धिरेवानुपपन्ने-त्याशयेन परिहरति **बाह्यतयैवेति** । व्याप्तिसिद्धिं च वक्तुमाह **कुत्र चेदमिति** । ज्ञाने व्याप्तिग्रह इति वदता ज्ञानस्य कारणवत्त्वावधारणमावश्यकं अन्यथा तत्र साध्यानुपस्थित्या तन्निरूपितव्याप्तेर्दुर्ग्रहत्वापत्तेः । तस्य च कारणं किं ज्ञानमेवोत बाह्यार्थः । नाद्यः आत्माश्रयप्रसङ्गात् । न द्वितीयः बाह्यार्थस्याप्रत्यक्षत्ववादे बाह्यार्थ-स्यैवाद्याप्यसिद्धत्वेन सुतरां तस्य ज्ञानं प्रति कारणत्वमिति ज्ञाने कारणवत्त्वं नावधारयितुं शक्यम् । तथा च तत्कादाचित्कतत्कारणवदित्येतदज्ञानमुपलब्धमित्ययुक्तमित्याशयेनाह **बाह्याप्रत्यक्षत्ववाद इति** । ज्ञानस्य कारणं ज्ञानमेव, न चात्माश्रयः । व्यक्तिभेदाश्रयणादिति शङ्कते **ज्ञानं पूर्वेति** । स ह्युत्तरोत्तरज्ञानगतो नीला-द्याकारः पूर्वपूर्वज्ञानगताकारजन्य इत्येव कल्प्यतां लाघवात् । किं बाह्यार्थकल्पननिबन्धेनेत्याशयेन समाधत्ते **तर्हीति** । अस्त्वेवं यत्र सजातीयज्ञानपरः पटोत्पादस्तत्र । यत्र तु नीलज्ञानमनन्तरं पीतज्ञानं न तत्र ज्ञाना-कारस्य पूर्वनीलाकारज्ञानजन्यत्वं वै सादृश्येन तज्जनकत्वानङ्गीकारात् । अतः सर्वत्र बाह्यार्थजन्यत्वमेवेष्टव्य-

मित्याशयेन शङ्कते **नीलज्ञानानन्तरमिति** । स्यादेतदेवं यदि बाह्यार्थः सिद्धः स्यात् तस्य परेण बाह्यार्था-प्रत्यक्षतावादिना क्वाप्यनुपलब्धत्वात् । अतो विसदृशपूर्वाकारजन्यत्वाङ्गीकार एव युक्तः । विरलेभ्यो मिलित-जन्मवादिना परेण सदृशजन्यनियमस्य क्वाप्यनुपलब्धत्वाच्च । पीतादिज्ञानाकारस्यापि पूर्वनीलाद्याकारजन्यत्वाङ्गी-कारो नानुपपन्न इत्याशयेन परिहरति **सदृशजन्यत्वस्य चेति** ।

**॥ इति बाह्यार्थस्यानुमेयत्वे पक्षीकरणायोगः, व्याप्त्यसिद्धिश्च ॥**

* * *

**॥ अथ च तत्रान्ते बाह्यार्थस्य प्रत्यक्षसिद्धत्वे शङ्कान्तरानास्पदता ॥**

## ८१ सु०— किञ्च वासनादिकमान्तरमेव सहकारीकृत्य विसदृशमपि(मेव) ज्ञानं जनयतीति कल्पनीयम्, न बाह्यम्; दृष्टेनैव कथञ्चिदुपपत्तावदृष्टकल्पनानुपपत्तेः; अतो बाह्योऽ(प्य)र्थः प्रत्यक्षसिद्धः, इति शङ्कानास्पदत्वादिदं मतमत्र न दूषितमित्युक्तम् ।

**परि०— दृष्टेनैवेति** । प्रत्यक्षसिद्धेनैवेत्यर्थः ।

**गु०दी०— किं च वासनादिकम्** इत्यत्र उत्पत्स्यमानपीतज्ञानजनकनीलकारणीभूतकादाचित्कनील-ज्ञानादपि प्रागनुभूतपीतवासनादिकमित्यर्थः ।

**यादु०— दृष्टेनैवेति** । क्लृप्तेनैवेत्यर्थः । यद्वाऽऽन्तरमेव सर्वं दृष्टमिति परेणाङ्गीकृतत्वादान्तरं वासना-दिकं दृष्टं, बाह्यं नीलाद्यदृष्टमिति ज्ञातव्यम् ।

**वं०प०—** नीलज्ञानानन्तरं पीतज्ञानोत्पाददर्शनादित्यत्रैव दूषणान्तरमाह **किञ्चेति** । अयमर्थः । पूर्वाकारेणैवोत्तराकारो जन्यते । न चोक्तदोषः । ज्ञानं नीलाकारं ज्ञानं स्वेन विसदृशं पीताकारं ज्ञानरूपं कार्यं जनयति । कथमिति चेत् । आन्तरवासनादिरूपसहकारिवशादिति ब्रूमः । तथा च न तदर्थं बाह्योऽर्थः कल्प्य इति । कुत इत्यत आह **दृष्टेनैवेति** ।

**कं०रा०— वासनादिकमिति** । विसदृशमपि नीलाद्याकारज्ञानगतनीलाकारादिकं पीतादिगोचर-वासनादिकमान्तरमेव सहकारीकृत्य पीताद्याकारज्ञानगतपीताकारादिकं जनयतीत्येव कल्पनीयं न तज्जनकत्वेन बाह्यपीतादिकं कल्पनीयं, दृष्टेनैव पूर्वज्ञानगताकारेणोत्तरज्ञानगताकारस्य कथञ्चिदुपपत्तावदृष्टकल्पनानुपपत्ते-रित्यर्थः ।

**शे०चं०**— ननु कारणस्य सदृशकार्यजनकत्वनियमेऽपि युज्यते विरलपरमाणुभ्यो मिलितपरमाणूनां तेभ्यश्च विरलपरमाणूनामुत्पत्तिः तथा अनधिपतीन्द्रियेभ्योऽप्यधिपतीन्द्रियाणां तेभ्यश्च अनधिपतीन्द्रियाणां सदृशकार्यजननस्वभावस्यापि कारणस्यादृष्टादिसहकारिवशाद्विसदृशकार्यजनकत्वसम्भवान्नीलपीतादिज्ञानस्थले च सहकारिविशेषसमवधानाभावान्न विसदृशकार्यजनकत्वं सम्भवतीत्यत आह **किञ्चेति** । आन्तरवासनादिसहकारि-सम्पत्त्या पूर्वज्ञानाकारस्यैव, विसदृशोत्तरज्ञानाकारजनकत्वस्य सम्भवान्न बाह्यस्य पीताकारस्य पीतज्ञानाकारा-र्पकत्वं कल्प्यमित्याशयः । ननु पूर्वज्ञानस्येव बाह्यस्याप्यर्थस्य ज्ञानाकारजनकत्वसम्भवे कुत एतदवधारणम् । यत्पूर्वज्ञानमेवाऽऽन्तरवासनादिसहकारिवशाद्विसदृशमुत्तरज्ञानं जनयति, न तु बाह्यं नीलादीत्यत आह **दृष्टे-नैवेति** । क्लृप्तेनैवेत्यर्थः । यद्वाऽऽन्तरमेव सर्वं दृष्टमिति परेणाङ्गीकृतत्वादान्तरं वासनादिकं दृष्टं, बाह्यं नीलाद्यदृष्टमिति ज्ञातव्यम् । 'विश्वमन्यच्च किंप्रममि'त्युपक्रान्तं बाह्यार्थस्याप्रत्यक्षत्वे तदसिद्धिप्रसङ्गमुपसंहरति **अत इति** । अनुमेयत्वे तदसिद्धिप्रसङ्गादित्यर्थः । बाह्यार्थानुमेयतावादस्यानिरस्यताया युक्त्योपपादितत्वात् तत्प्रतिपाद-कोत्तरग्रन्थवैयर्थ्यमाशङ्क्य पूर्वोपपादितप्रकारापेक्षया प्रकारान्तरेण तदुपपादनार्थत्वान्नानर्थक्यमिति भावेन प्रकार-भेदमभिनयेनोपदर्शयन्नुत्तरग्रन्थं सङ्गमयति **शङ्कानास्पदत्वादित्यादिना** । बाह्यार्थानुमेयतावादस्यातिनिर्दलत्वेन शङ्काविषयत्वशून्यत्वादित्यर्थः । **उक्तं** सर्वप्रमाणसिद्धमित्यादिना पूर्वग्रन्थ इति शेषः ।

**वि०ठ०**— अस्तु वा सदृशकारणजन्यत्वमेव सर्वत्र तथापि सहकारिसामर्थ्याद्विसदृशमपि जायत इति कल्पनमुचितम् । प्रमितेनैव सहकारिबलात् कार्यजन्मोपपत्तौ अप्रमितबाह्यार्थकल्पनाया अन्याय्यत्वादिति पक्षा-न्तरमाह **किं चेति** । श्लोकद्वयार्थमुपसंहरति **अत इति** । न दूषितं सूत्रकारेणेति शेषः ।

**।। इति बाह्यार्थस्य प्रत्यक्षसिद्धत्वे शङ्कान्तरानास्पदता ।।**

**।। इति बाह्यार्थस्याप्रत्यक्षत्वे तदसिद्धिरेव ।।**

**।। इति अनिराकृतस्य अनुमतताया: प्रमाणाविरोधे प्रमाणानुसारित्वे चैवाङ्गीकर्तुं शक्यता ।।**

* * *

**।। अथ च तत्रान्ते तस्य स्फुटतरानल्पदोषत्वेन शिष्यैरेव हेयतया ज्ञातुं शक्यत्वम् ।।**

८२ **सु०**— यद्वा स्फुटतरानल्पदोषत्वेन शिष्यैरेव हेयतया ज्ञातुं शक्यत्वादित्याशयेनाह **सर्वेति** ।

**अनु०**— सर्वलोको बिभेत्यज्ञो यस्मादनुभवात् सदा ।
तस्यापलापिनः किन्न निष्प्रमाणकवादिनः ।।

**माध्यमिकादयोऽपि बाह्यार्था(ह्य)नपह्नुवाना अपि ह्यनुभवाद्बिभ्यतः सांवृतसत्त्वा-द्यभ्युपयन्ति, ततः सर्वैरनुसरणीय एवायमनुभवः । तमपि यः सौत्रान्तिकः अपलपति, अनुभवसिद्धाया अपरोक्षस्य नीला(द्या)कारस्य बाह्यताया अपाकरणात्; तथा निष्प्रमाणकं वदति, नीलाद्याकारस्य बुद्धिस्थतायां प्रमाणाभावात्; तस्य(प्य) अनुभवस्य, अपलापिनः निष्प्रमाणकवादिनः, तस्य सौत्रान्तिकस्य; किं, दूषणं, न, भवेत्; सर्वमपि भवेदिति ।**

**परि०—** **बिभ्यत** इति प्रथमाबहुवचनम् । 'नाभ्यस्ताच्छतुरि'ति नुमभावः ।

**गु०दी०—** **स्फुटतरानल्पदोषत्वेन शिष्यैरेव हेयतया ज्ञातुं शक्यत्वात्** इति वदता बाह्यस्थिर-नीलाज्ज्ञानेऽपि स्थिरमेव नीलमुत्पादनीयम् । न तु कादाचित्कं तत्कारणीभूतकादाचित्कनीलस्य बहिरप्य-भावात् । अतस्तस्मिन् ज्ञाने पुनः पीतादेरनवकाशः । किञ्च बाह्यनीलाज्ज्ञाने नीलोत्पादे बाह्यघटगजाद्याकारा-ज्ज्ञानेऽपि घटगजाद्याकारोत्पत्तिः स्यात् । स च न बाह्याद्याकारात्सूक्ष्मो वक्तुमुचितः । तत्कारणीभूतसूक्ष्म-कारणस्य बहिरभावात् । एवं च घटगजादिज्ञाने हृदयविदारणं स्यात् । किञ्चैवं सत्यान्तरज्ञानस्य मूलीभूत-बाह्यज्ञानमपि कल्पनीयं स्यात् । किञ्च बाह्यवह्नेरौष्ण्याज्ज्ञानेऽप्यौष्ण्यं स्यात् । तथा चान्तरपि दाहप्रसङ्गः । बाह्यकालकूटात् ज्ञानेऽपि कालकूटं स्यात् । तथा च स्वस्यैव मरणं स्यात् । किञ्च स्वरूपसद्बाह्यं नीलमान्तर-नीलोत्पादकं वा ज्ञातं वा । नाद्यः सर्वदा नीलोत्पत्तिप्रसङ्गात् । द्वितीये आन्तरनीललिङ्गकानुमानेनैव बाह्यनील-ज्ञानमित्यन्योन्याश्रय इत्यादयोऽपि दोषाः सूचिताः ॥ २ । २ । ७ ॥

**कं०रा०—** कथं सौत्रान्तिकस्यानुभवापलापित्वमित्यत आह **अनुभवसिद्धाया इति** । परस्य निष्प्रमाणकत्वादित्वं कथमित्यत आह **नीलाद्याकारस्येति** । परोक्तायां नीलाद्याकारस्य बुद्धिस्थतायां प्रमाणा-भावादित्यर्थः ।

**श्रीनिधि०—** **हेयतया ज्ञातुं शक्यत्वादिति** । न दूषितमिति शेषः ।

**शे०चं०—** तस्यापलापिन इति व्यधिकरणे षष्ठ्यावित्यभिप्रेत्य योजयति **तस्यानुभवस्यापलापिन इति** । तस्येत्यस्यावृत्तिं समानाधिकरणषष्ठीत्वं चाश्रित्याह **तस्येत्यादि** ।

**विठ्ठ०—** सौत्रान्तिकसिद्धान्तविशेषानिराकरणे उपेक्षणीयत्वे निमित्तमुक्तं, निमित्तान्तरकथनपरतयोत्तर-मूलं सङ्गमयितुमाह **यद्वेति** ।

**॥ इति तस्य स्फुटतरानल्पदोषत्वेन शिष्यैरेव हेयतया ज्ञातुं शक्यत्वम् ॥**

**॥ इति सौत्रान्तिकसिद्धान्तविशेषस्य निराकरणाभावे कारणप्रदर्शनम् ॥**

* * *

॥ अथ तत्र उक्तार्थेऽभिहितानामेतन्मतविरुद्धानुभवानामभिनयेन दर्शनम्, तेषां दुष्टत्वप्रदर्शनञ्च ॥

८३ **सु०**— " 'एकत्वमनुभूतिस्थं' 'खदृष्टान्तात्' 'तस्यापलापिन' इति परपक्षे तत्र तत्र अनुभवविरोधोऽभिहितः, स कथम्" इत्यतः अभिनयेन तं दर्शयति **सोऽहमिति** ।

**अनु०— सोऽहं तदिदमेवाहं सुखी सद्गगनं दिशः ।**
**सत्या इत्याद्यनुभवाः सदा तत्प्रतिपक्षगाः ॥**

अत्र 'स एवाहमि'त्यात्मैकत्वग्राही प्रत्यभिज्ञाऽनुभवो दर्शितः । 'तदिदमि'त्यनात्मनः । 'अहं सुखी'ति सुखस्य विधित्वानुभवः । **सत्** भावरूपं, गगनं, दिशः, **सत्याः** भावरूपाः इति गगनस्य (च) दिशां च भावत्वानुभवः । 'आदि'पदात् 'इदं नीलं', 'नाहं नीलमि'त्यादेः (परिग्रहः) ग्रहणम् । **तत्प्रतिपक्षगाः** तदभ्युपगतार्थविरुद्धविषयाः ।

**परि०**— **इति परपक्ष इति** । इति वाक्यत्रयेणेत्यर्थः ॥ **अभिनयेनेति** । तदाकारप्रदर्शिनेनेत्यर्थः । **सदित्यनुवादः** । **भावरूपमिति** व्याख्या ॥

**यादु०**— **अभिनयेनेति** । आकारप्रदर्शिनेनेत्यर्थः ॥ **स एवायमिति** । एवकारस्यात्र सम्बन्धप्रदर्शनमात्मनो निर्विकारत्वात् पूर्वोत्तरकालभाविनस्तस्य अत्यन्ताभेद एव प्रत्यभिज्ञाविषय इति प्रदर्शनार्थमिति ज्ञातव्यम् ॥

**वं०प०**— 'इदं नीलमि'ति नीलादेर्बाह्यत्वानुभवः । आन्तरत्वाभावानुभवप्रदर्शनं **नाहं नीलमिति** ।

**कं०रा०**— **एकत्वमिति** । 'एकत्वमनुभूतिस्थं त्यक्त्वा निर्मानिका भिदा । कुत आत्मादिकेषु स्यात् बल्येवानुभवो यतः । दिक्सुखे च खदृष्टान्ताद्भावौ सच्चेत् क्वचिद्भवेत् । तस्यापलापिनः किं न निष्प्रमाणकवादिन' इति परपक्षे तत्र तत्रानुभवविरोधोऽभिहित इत्यर्थः । सद्गगनं दिशः सत्या इत्याद्यनुभवेन गगनादेः सत्यत्वमेव सिद्ध्यतीति न भावत्वमित्यतो व्याचष्टे **सदिति** ।

**श्रीनिधि०**— **तदिदमित्यनात्मन इति** । एकत्वग्राही प्रत्यभिज्ञानुभवो दर्शित इति वर्तते । **अपरोक्षस्य** अपरोक्षं प्रति विषयस्य । 'तस्यापलापिनः' इत्यनेन योऽनुभवविरोध उक्तः तदनुभवविरोधे स्वाभिनयेन दर्शनं न प्रतीयते इत्यत आह **आदिपदेनेति** ।

**शे०चं०— तत्र तत्रेति** । आत्मादेः क्षणिकत्वादावित्यर्थः ॥ **अभिनयेनेति** । तदाकारप्रदर्शनेन इत्यर्थः ॥ **स एवाहमिति** । अनेन तदिदमेवेत्यत्रत्यस्य एवकारस्य न यथाश्रुतः सम्बन्धः, किन्तु सोऽहमित्यनेन सम्बन्ध इत्युक्तं भवति । तदपि चात्मनो निर्विकारत्वात् पूर्वोत्तरकालभाविनस्तस्यात्यन्ताभेद एव प्रत्यभिज्ञाविषय इति प्रदर्शनार्थमित्यवधेयम् । **विधित्वेति** । भावत्वेत्यर्थः ।

**विठ्ठ०— अभिनयेनेति** । आकारप्रदर्शनेनेत्यर्थः । **स एवाहमिति** । आत्मनः पूर्वोत्तरकालभाविनोरत्यन्ताभेद एव प्रत्यभिज्ञाविषय इति ज्ञापनायैव शब्दसम्बन्धोऽत्र दर्शित इति ज्ञेयम् ।

**॥ इति उक्तार्थेऽभिहितानामेतन्मतविरुद्धानुभवानामभिनयेन दर्शनम्, तेषां दुष्टत्वप्रदर्शनश्च ॥**

* * *

**॥ अथ च तत्रान्ते वैभाषिकसौत्रान्तिकमतनिराकरणोपसंहारः ॥**

८४ **सु०—** वैभाषिकसौत्रान्तिकसमय(मत)निराकरणमुपसंहरति **अत इति** ।

**अनु०— अतो निर्मानमखिलप्रमाणप्रतिपक्षगम् ।**
**दुर्मतं को नु गृह्णीयाद्विनाऽसुरततिं क्वचित् ॥**

**अखिलप्रमाणप्रतिपक्षगं** सर्वप्रमाणविरुद्धार्थविषयम्, अत एव दुर्मतम् । दिङ्नागप्रभृतिभिर्बहुभिर्गृहीतत्वात् कथं 'को नु गृह्णीयादि'त्याक्षेप इत्यत उक्तं **विनेति** । सत्पुरुषविषय एवायमाक्षेप इति भावः । न चैवं निराकरणवैयर्थ्यम्; उक्तार्थानुसन्धाने 'को नु गृह्णीयादि'ति व्याख्यानादिति ॥

**वं०प०— सत्पुरुषेति** । तथा च को नु गृह्णीयादित्यस्य कः सज्जनो गृह्णीयान्न कोऽपीत्यर्थो द्रष्टव्यः । ननु स्वत एव सज्जनेनेदं मतं न गृह्यतेऽतो वैभाषिकसौत्रान्तिकयोर्निराकरणमयुक्तमित्याशङ्क्य निराकरोति **न चैवमिति** । कुतो न वैयर्थ्यमित्यत आह **उक्तार्थेति** । उक्तार्थानुसन्धान इति मूले शेषोक्तिः । तथा च सज्जनस्यापि यद्यस्मदुक्तं तन्निराकरणप्रकारानुसन्धानं स्यात् तदैव न गृह्णीयात् । नो चेद् गृह्णीयादेव । ततस्तस्य सज्जनस्य तन्मताग्रहणप्रयोजकभूतोक्तार्थानुसन्धानाय अस्माभिर्निराकरणं कृतमिति न तस्य वैयर्थ्यमिति भावः ॥

**कं०रा०— दिङ्नागेति** । सौत्रान्तिकमतानुवर्तिपुरुषविशेषस्य नाम ।

**श्रीनिधि०**— 'अखिलप्रमाणप्रतिपक्षगमि'त्यनेन तन्मतस्य प्रमाणैः प्रतिपक्षितत्वमात्रं प्रतीयते । तच्च पूर्वोपपादनविरुद्धमित्यत आह **सर्वप्रमाणविरुद्धार्थविषयमिति** । **प्रति**शब्दः प्रत्यर्थिनः नष्टा इत्यादौ विरोधेऽप्यर्थे वर्तत इति प्रसिद्धमिति भावः । **सत्पुरुषविषय एवेति** । दिङ्नागप्रभृतयस्तु दुष्पुरुषा असुरतमा इति भावः । **न चैवमिति** । सत्पुरुषैरस्य ग्रहणप्रसक्तौ निराकरणस्य च सत्पुरुषग्रहणानिवारणार्थत्वादिति भावः ।

**शे०चं०**— मूले 'निर्मानमखिलप्रमाणप्रतिपक्षगमि'ति दुर्मतत्वोपपादकं हेतुगर्भं विशेषणद्वयमिति भावेन तथैव योजयति **अत एवेति** । निर्मानत्वादेवेत्यर्थः । **एवमिति** । आक्षेपस्य सत्पुरुषमात्रविषयत्वाभ्युपगम इत्यर्थः । आक्षेपस्य सत्पुरुषमात्रविषयत्वे सत्पुरुषाणां तद्ग्रहणप्रसक्तेरेवाभावेन तन्निवारणार्थत्वायोगात् तदर्थकनिराकरणस्य वैयर्थ्यं स्यादित्याशयः ॥ **उक्तार्थानुसन्धान इति** । तथा चोक्तरीत्या हेयत्वप्रतिपादनेन तदनुसन्धाने सत्पुरुषाणां तद्ग्रहणप्रसक्त्यभावेऽपि मतनिराकरणाभावे तद्धेयत्वानुसन्धानाभावेन सत्पुरुषाणामपि तद्ग्रहणप्रसक्तेः सत्त्वेन तन्निराकरणार्थत्वसम्भवात् तदर्थकनिराकरणस्यार्थवत्त्वमेवेति भावः ।

**विठ्ठ०**— सौत्रान्तिकमतप्रवर्तकस्य दिङ्नाग इति नाम । दुर्मतं कोऽनुगृह्णीयादित्याक्षेपस्य सत्पुरुषविषयत्वे सज्जनोऽनुगृह्णातीति लाभेन सज्जनस्य मिथ्याज्ञानप्रसक्त्यभावप्रास्या न तदज्ञाननिरासाय दुर्मतनिराकरणं प्रयोजनवदित्यत आह **न चैवमिति** । एतदधिकरणोक्तार्थानुसन्धानाभावे सत्पुरुषस्य मिथ्याज्ञानप्रसक्तिः स्यात् । सा माभूदित्येतदर्थं निराकरणं सार्थकमिति ।

**॥ इति वैभाषिकसौत्रान्तिकमतनिराकरणोपसंहारः ॥**

**॥ इति उपन्यस्तस्य मतस्य निराकरणम् ॥**

## ॥ इति समुदायाधिकरणम् ॥

## ॥ २-२-७ ॥

* * *

# ॥ अथ असदधिकरणम् ॥
## ॥ २-२-८ ॥

॥ अथ माध्यमिकमतनिराकरणम् (चतुर्धाविभक्तसौगतमतेषु तृतीयमतस्य निराकरणम्) ॥
॥ अथ तत्रादौ उक्तार्थविरोधदर्शनपर्याप्तः माध्यमिकमतोपन्यासः ॥
॥ अथ तत्राप्यादौ तत्त्वविषयविप्रतिपत्तिदर्शनम् ॥

**ब्र०सू०— ॐ नासतोऽदृष्टत्वात् ॐ ॥**

१ सु०— माध्यमिकमतमत्रापाक्रियते ।

तस्योक्तार्थविरुद्धतां दर्शयितुं तत्तावदुपन्यस्यति **अपर** इति ।

**अनु०—** अपरः शून्यमखिलं मनोवाचामगोचरम् ।
निर्विशेषं स्वयम्भातं निर्लेपमजरामरम् ।
अशेषदोषरहितमनन्तं देशकालतः ।
वस्तुतश्च

**अपरो** माध्यमिक, **'इति ब्रूत'** इति वक्ष्यमाणेन सम्बन्धः । **शून्यम्** 'एव तत्त्वं न ततोऽन्यदस्ती'ति शेषः । ननु पञ्चस्कन्धास्ततोऽतिरिक्ताः सन्तीत्यत उक्तं **अखिलमिति** । पञ्चस्कन्धात्मकमखिलं जगच्छून्यमेव, न ततोऽन्यदित्यर्थः । तच्छून्यं कुतः सिद्धमित्यत उक्तं **स्वयम्भातमिति** । स्वयम्भातत्वं च न स्वकर्मकप्रकाशत्वम् । किन्त्वपराप्रकाश्य-(श)त्वमेवेत्याशयेनोक्तं **मन इति** । प्रमाणमात्रोपलक्षणमेतत् । कुतः प्रमाणाविषयत्वं शून्यस्य, निर्धर्मकत्वात्, 'सधर्मक एव प्रमाणप्रवृत्तिः' इत्युक्तं **निर्विशेषमिति** । निखिल-जगदात्मकं चेच्छून्यम्, तर्हि तद्धर्मा लेपजरामरणदुःखपरिच्छेदादयस्तस्यैव स्युरिति कथं निर्विशेषत्वादिकमित्यत आह **निर्लेपमिति** । **लेपो** धर्माधर्मसम्बन्धः । **दोषा** दुःखादयः ।

**वस्तुतश्चानन्तं** वस्त्वन्तरप्रतियोगिकान्योन्याभावरहितम् । यद्वा शुद्धं सर्वगतं नित्यं सर्वात्मकं शून्यमभिलप्यते, तत्कथं निर्विशेषमित्यु(मु)च्यत इत्यत एतदुक्तम्; लेपादिदोषाभावमात्रेण शुद्धमुच्यते, देशादिपरिच्छेदाभावमादाय सर्वगतत्वादिवादो, न तु कमपि धर्ममाश्रित्येति ।

**परि०**— पाठक्रमादाकाङ्क्षाक्रमो बलीयानिति भावेनाह **तच्छून्यं कुत इत्यादिना** ॥ **अपराप्रकाश्यत्वमिति** । परप्रकाश्यत्वाभाव इत्यर्थः ॥ **सधर्मक एवेति** । महत्त्वादिमत्येव प्रत्यक्षस्य व्यापकताशक्यतावच्छेदकादिमत्येवानुमानादेः प्रवृत्तेरिति भावः । तद्धर्माः क इत्यत आह **लेपेति** । लेपदोषपदयोरपौनरुक्त्यायार्थभेदमाह **लेपो धर्माधर्मेति** ।

**यादु०**— **सधर्मक एवेति** । रूपादिमत्येव प्रत्यक्षस्य, व्यापकतावच्छेदकधर्मवत्येवानुमानस्य, प्रवृत्तिनिमित्तादिमत्त्येव शब्दस्य, प्रवृत्तेरित्यर्थः । निर्लेपमशेषदोषरहितमित्यत्रत्ययोर्लेपदोषपदयोः पौनरुक्त्यपरिहारायार्थभेदमाह **लेपो धर्माधर्मेत्यादिना** ॥ **वस्त्वन्तरेति** । स्वव्यतिरिक्तवस्त्वन्तरस्यैव परमार्थतोऽभावादिति भावः ।

**वं०प०**— **एतदुक्तं** निर्लेपमिति वाक्यम् ॥ **दोषाभावमात्रेणेति** । अन्यापोहेनेत्यर्थः ।

**कं०रा०**— **अपराप्रकाश्यत्वमिति** । पराप्रकाश्यत्वमित्यर्थः । **निर्धर्मकत्वादिति** । न च वाच्यं प्रमाणाविषयत्वरूपधर्मवत्त्वाङ्गीकाराच्छून्यस्य निर्धर्मकत्वमसिद्धमिति । निर्धर्मकशब्दस्य भावरूपधर्मराहित्यपरत्वात् । न च वाच्यं शून्यं प्रमाणाविषयः निर्धर्मकत्वादित्यनुमानविषयत्वाच्छून्यस्य प्रमाणाविषयत्वासम्भव इति । प्रमाणाविषयत्वरूपस्वयम्भातत्वसिद्ध्यर्थमुक्तानुमानविषयत्वेऽपि शून्यस्य स्वरूपसिद्ध्यर्थं तद्विषयत्वाभावात् स्वरूपसिद्ध्यर्थप्रमाणविषयत्वाभावस्य चैव च प्रमाणाविषयपदेन विवक्षितत्वादिति । वस्तुतः अनन्तत्वं निर्वक्ति **वस्त्वन्तरेति** । **तत्कथमिति** । शून्यं शुद्धमित्याद्यभिलापानुसारेण शून्ये शुद्धत्वादिधर्माणां प्राप्तत्वात् कथं निर्विशेषं शून्यमुच्यत इत्यतो **निर्लेप**मित्याद्युक्तमित्यर्थः ।

**श्रीनिधि०**—

दोषशून्यं शून्यवक्तुः सुखशून्यप्रदं सदा ।  
शून्यदं भक्तविघ्नादेः सदा तं नृहरिं भजे ॥

**न स्वकर्मकप्रकाशत्वमिति** । कर्तृकर्मविरोधादिति भावः । **तस्यैव स्युरिति** । नान्यस्य तद्भिन्नस्याभावादित्यर्थः । ननु निर्लेपदोषरहितपदयोः पौनरुक्त्यमित्यत्र तयोरर्थभेदमाह **लेपो धर्माधर्मसम्बन्धः** । **दोषा**

**दुःखादय इति** । निखिलजगदात्मकं चेच्छून्यमित्यादिव्यावर्त्यपेक्षया **यद्वा** इत्युक्तम् । **तत्कथं निर्विशेषमित्युक्तमिति** । शुद्धत्वादेरेव विशेषत्वादिति भावः । **एतदुक्तमिति** । **एतत्** निर्लेपत्वादिकम् । **लेपादिदोषाभावमात्रेण शुद्धमुच्यत इति** । जरामरणराहित्यमात्रेण च नित्यमुच्यत इति च द्रष्टव्यम् ।

**शे०चं०**— अधिकरणप्रतिपाद्यानुक्तेर्मूले न्यूनतामाशङ्क्य भाष्य एव तस्योक्तत्वादत्रानुक्तिर्न दोषायेत्यभिप्रेत्य शून्यवादमपाकरोतीति भाष्यं मनसि निधायैतदधिकरणप्रतिपाद्यमाह **माध्यमिकेति** । नन्वपरः शून्यमित्यादिग्रन्थोऽनर्थकः । न चायं तन्मतोपन्यासः । तस्याप्यनर्थकत्वादित्यतो विप्रतिपत्तिविषयसूचनेन तदनिरस्यताशङ्कानिरसनद्वारा तन्निरस्यतासमर्थनार्थत्वात् तस्य नानर्थक्यमित्यभिप्रेत्य तन्मतोपन्यासवैयर्थ्यं परिहरंस्तन्मतोपन्यासपरतयोत्तरग्रन्थं सङ्गमयति **तस्येति** । मूले शून्यमित्युक्त्या प्रसक्तं निःस्वरूपत्वं 'शून्यं तत्त्वमविज्ञेयमि'त्यादितद्वाक्यानुसारेणापेक्षितशेषं पूरयन् परिहरति **शून्यमेवेत्यादिना** । अत्र मूलस्थं शून्यपदं सावधारणमित्यभिप्रेत्य शून्यमेवेत्यनुवादः, तत्त्वमित्यादिस्तु शेष इति द्रष्टव्यम् । **न स्वकर्मकप्रकाशत्वमिति** । विषयविषयिभावस्य प्रत्यक्पराग्भावरूपत्वेनैकस्य युगपदुभयरूपताया विरुद्धतया स्वस्य स्वविषयकज्ञानताया अयोगादिति भावः । यद्वा ज्ञानमर्थं विषयीकरोतीति व्यवहारान्यथाऽनुपपत्त्या ज्ञानस्यापि विषयीकरणलक्षणव्यापारं प्रति कर्तृत्वेन स्वविषयत्वे कर्तृकर्मभावो वाच्यः । न चासौ वक्तुं शक्यः । परसमवेतक्रियाफलशालित्वस्यैव कर्मलक्षणत्वेनैकस्यां क्रियायां कर्तृकर्मणोरेकत्वस्य विरुद्धत्वात् अतो न स्वविषयत्वं ज्ञानस्येति भावः । प्रमाणविशेषभूतमनोवागगोचरत्वमात्रेण न परप्रकाश्यत्वाभावसिद्धिः । तथा सति चक्षुराद्यगोचरत्वमात्रेण रसरूपादेरपि तत्सिद्धिप्रसङ्गादित्यतोऽत्र वाक्ये विशेषवाचकमनोवाक्शब्दयोः प्रमाणसामान्योपलक्षकत्वेन प्रमाणमात्रागोचरत्वलाभात् परप्रकाश्यत्वाभावसिद्धिरविकलैवेत्याशयेनाह **प्रमाणमात्रोपलक्षणमेतदिति** ॥ **सधर्मक एवेति** । रूपादिमत्येव चक्षुरादेः, व्याप्त्या व्यापकतावच्छेदकधर्मविशिष्टत्वेन पक्षधर्मतया च पक्षसंसृष्टत्वेन, साध्यस्य सिद्ध्योक्तधर्मवत्येव साध्येऽनुमानस्य, शब्दप्रवृत्तिनिमित्तादिमत्येव च शब्दस्य प्रवृत्तिदर्शनादित्यर्थः । निर्विशेषत्वादिकमित्यादिपदेन स्वयम्भातत्वमनोवाचामगोचरत्वयोः परिग्रहः ।. निर्लेपमशेषदोषरहितमिति पदद्वयान्तर्गतयोर्लेपदोषपदयोः पौनरुक्त्यनिरासायार्थभेदमाह **लेपो धर्माधर्मसम्बन्ध इत्यादिना** । अनन्तमित्यस्य देशकालाभ्यामिव वस्तुत इत्यनेनापि सम्बन्धान्न साकाङ्क्षतेत्यभिप्रेत्य तथासम्बन्धमाह **वस्तुतश्चानन्तमिति** । वस्तुतोऽनन्तत्वं नाम सकलवस्त्वात्मकत्वमिति प्रतीतिनिरासाय तन्निर्वक्ति **वस्त्वन्तरेति** । स्वव्यतिरिक्तस्य सर्वस्य कल्पितत्वेनावस्तुत्वान्न वस्त्वन्तरप्रतियोगिकभेदवत्त्वं तस्येत्यर्थः ॥ **एतदिति** । निर्लेपमित्यादिकमित्यर्थः । देहादीत्यादिपदेन कालवस्तुनोः परिग्रहः । सर्वगतत्वादीत्यादिपदेन नित्यत्वसर्वात्मकत्वयोः परिग्रहः ॥ **कमपि धर्ममिति** । परममहत्परिमाणाप्रच्युतसत्तासर्वतादात्म्यरूपमित्यर्थः ।

**वा०र०**— गोचरशब्दे नपुंसकत्वं ईक्षत्यधिकरणमूलटीकानुसारेण उपपाद्यम् । स्वविषयत्वं हि कर्तृकर्मविरोधात् तैर्नाङ्गीक्रियत इति तत्त्वोद्योतव्याख्यानावसरे ननु ज्ञानस्य सविषयत्वेत्याद्यभिधाय अतो विषय-

विषयिभावस्येत्याशङ्कितं पक्षमाह **विषयविषयिभावस्येति** । मैवं ज्ञानस्यापि इत्याद्युक्तस्थलीयटीकानुसारेण कर्तृकर्मविरोध इति ते वदन्ति इति तत्त्वनिर्णयटीकास्थनिष्कर्षन्यायेन च पक्षान्तरमाह **यद्वा ज्ञानमिति** । चक्षुरादेः व्याप्त्या व्यापकतावच्छेदकेत्यादिरुक्तधर्मवत्येव साध्ये अनुमानस्येति पाठः । पाङ्क्षोधाक्षरक्रम-व्यत्यासेनान्यथा चेत् पाठः स लेखकनिमित्तक इति बोध्यम् । चक्षुरादेरित्यस्यानुमानस्येत्यस्य च प्रवृत्तिदर्श-नात् इत्युत्तरेण सम्बन्धः । व्याप्त्या पक्षधर्मतयेत्येतयोर्हेतोरिति शेषः । विशिष्टत्वेनेत्यस्य साध्यस्येत्युत्तरेण सम्बन्धः । **उक्तधर्मेति** । व्यापकतावच्छेदकेत्याद्युक्तेत्यर्थः । **धर्माधर्मसम्बन्ध इति** मूलम् । ननु अधर्म-सम्बन्धस्य दोषत्वेऽपि धर्मसम्बन्धस्य कथं दोषत्वम् । येनादोषप्रकारेण लेपपदमुभयार्थतया व्याख्यातुं शक्यं भवेदिति चेत् न । 'पुण्यपापे विधूये'ति श्रुतौ पुण्यपापाञ्जनाख्याविद्याविधूननाभिधानात् इति पृथगधिकरणीय-सुधानुसारेणाविद्याविधूननसमकक्षतया पुण्यपापविधूननस्य उक्ततया पापस्येव पुण्यस्यापि हेयत्वान्यथानुपपत्त्या दोषत्वस्य जीवे श्रुतिसिद्धत्वेन 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' इति गीताव्याख्यानावसरे 'कुर्वा-णोऽपि यतः सर्वं पुण्यपापैः न लिप्यते' इति पुण्यपापसम्बन्धस्यैव स्पष्टं लेपपदार्थतया तात्पर्यकृतोक्तत्वेन उक्ततात्पर्यवाक्यव्याख्यानावसरे जीवो न करोति न लिप्यत एवेति द्रष्टव्यम् । लेपश्च तत्फलेनेति पुण्यपापरूप-कर्मफलसम्बन्धाभावस्यैव मूलकृताऽभिहितत्वेन 'कुर्वाणोऽपि यतः सर्वं पुण्यपापेन लिप्यते । जन्ममृत्यादिरहितः सत्त्वादिगुणवर्जितः । विष्णुस्तद्विपरीतस्तु जीवोऽतस्तौ पृथक् सदा' इति तात्पर्योदाहृतप्रमाणवाक्ये पुण्यपाप-सम्बन्धादिधर्मशून्यत्वं विष्णुरित्यन्तेन विष्णोरभिधाय जीवस्य तद्विपरीतत्वोक्त्या पुण्यपापसम्बन्धादिधर्मयुक्त-त्वस्योक्ततया निर्दोषत्वसदोषत्वरूपभेदकधर्मोक्त्यन्यथानुपपत्त्या पुण्यस्यापि जन्मादिसमानकक्ष्यतया जीवे दोष-तायाः सिद्धेः । अत एव 'स गुणाल्पत्वमात्रत्वान्नर्जुत्वेन विरुध्यते' इत्युपासनापादीयानुव्याख्यानव्याख्यानरूपमूले महोद्यमाभावो दोष एव हेयत्वादित्युक्तम् । मुक्तिगतानन्दातिशयहेतुभूतेषु पुण्यस्यादोषत्वेऽपि संसारापादकानिष्ट-पुण्यस्य दोषतायाः अनिवार्यत्वाच्च । बहुलस्येश्वरे दोषत्वाभावेऽपि जीवे दोषत्ववत् पुण्यस्य जीवे दोषत्वा-भावेऽपि ईश्वरे दोषतया तन्न्यायेन शून्येऽपि तथात्वमित्यप्याहुः । तत्त्वप्रकाशिकास्थ'चिन्तासन्तापलेपे'त्येत-दभिनवचन्द्रिकायां तु चिन्तासाधारणदोषसमभिव्याहृतलेपपदार्थः पुण्यसम्बन्धोऽपि भवतीत्युक्तम् । न चात्र लेपपदसमभिव्याहृतं साधारणं दोषान्तरं कल्प्यते । वस्तुतस्तु परव्याख्यानानुसारात् नात्र शङ्कावकाशः । तस्मात् युक्तमुक्तं मूले **धर्माधर्मसम्बन्ध इति** । **देशकालाभ्यामिवेति** । देशकालज इत्यनेनेत्यर्थः । फलितार्थाभिप्रायेण देशकालाभ्यामित्युक्तमिति न दोषः । **साकाङ्क्षतेति** । वस्तुत इत्यस्येति शेषः ।

**स०व्र०— कुत इति** । केन प्रमाणेनेत्यर्थः । प्रमाणागोचरत्वान्न तस्य प्रमाणेन सिद्धिरपेक्षितेति भावेन गूढाभिसन्धिराह **स्वयम्भातमितीति** । अभिसन्ध्युद्घाटनं च मनोवाचामित्यादिना करिष्यतीति द्रष्टव्यम् ।

**विठ्ठ०— न ततोऽन्यदिति** । सर्वस्य शून्ये आरोपितत्वेन तदनन्यत्वादित्यर्थः । **सधर्मक एवेति** । रूपादिमत्येव प्रत्यक्षस्य व्यापकतावच्छेदकधर्मवत्येवानुमानस्य प्रवृत्तिनिमित्तवत्येवागमस्य प्रवृत्तेरित्यर्थः । परिच्छेदो

ज्ञानम् । निर्लेपं अशेषदोषरहितमित्येतयोरपौनरुक्त्यायाह **लेपो धर्माधर्मसम्बन्ध इति** । **वस्त्वन्तरेति** । स्वव्यतिरिक्तवस्त्वन्तरस्य परमार्थतोऽभावादिति भावः । **तत्कथमिति** । शून्ये शुद्धत्वादिसर्वधर्माणां सत्त्वात् निर्विशेषाभ्युपगमे विरोधप्राप्तेरिति भावः । **कमपि धर्ममिति** । पावित्र्यादिधर्ममित्यर्थः ।

**चषकः— स्वकर्मकप्रकाशत्वं** तादृशप्रकाशतादात्म्यम् । **अपराप्रकाश्यत्वं** परप्रकाश्यत्वाभावः । **सधर्मक एव** । सामानाधिकरण्यप्रत्यासत्त्या महत्त्वविशेषितरूपादिविशेषित एव प्रत्यक्षस्य, किञ्चिन्निष्ठव्याप्ति-निरूपकत्वादिविशिष्ट एवानुमानस्य, प्रवृत्तिनिमित्तादिमत्येव शब्दस्य, प्रवृत्तेरिति भावः । लेपदोषपदयोरैकार्थ्यात् पौनरुक्त्यं मा प्रासाङ्क्षीदित्यर्थभेदमाह **लेप इत्यादि** । **वस्त्वन्तरेति** । स्वान्यवस्तुन एव परमार्थतोऽभावादिति भावः ।

**॥ इति तत्त्वविषयविप्रतिपत्तिदर्शनम् ॥**

* * *

**॥ अथ तत्र सहेतुकम् उपायोपेयपदार्थयोर्विप्रतिपत्तिदर्शनम् ॥**
**॥ अथ तत्रादौ शून्यस्य लक्षणकथनम् ॥**

२ **सु०—** उपायोपेयभावावस्थितपदार्थख्यापनं शास्त्रधर्मः । अतस्तत्त्वविषयां विप्रति-पत्तिं दर्शयित्वा विप्रतिपन्ने उपायोपेये दर्शयति **तदस्मीति** ।

**अनु०—** तदस्मीति नित्योपासाऽपरोक्षितम् ।
रागादिदोषरहितं तद्भावं योगिनं नयेत् ॥

**तत्** शून्यम् अहम् **अस्मीति नित्योपासयाऽपरोक्षीकृतम्** । **तत्** शून्यं **रागादिदोष-रहितं योगिनं तद्भावं** शून्यत्वलक्षणं मोक्षं **नयेत्** इति सम्बन्धः । यथोक्तम् । 'प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिनः (तापिनः) (भाविनः)' इति ।

**परि०— तस्य तायिन इति** । तायृ सन्तानपालनयोः । तायिनः सन्तन्यमानस्य तस्य कर्तृत्वभोक्तृत्वादिभ्रान्त्यात्मकस्य संसारस्य प्रदीपस्येव निर्वाणं निवृत्तिर्मोक्ष इत्यर्थः । केचित्तु भाविन इति पाठमुपेत्य शून्यभावनावधृतस्यात्मन इति व्याचक्षते । अन्ये तु तापिन इति पाठमुपेत्य योगिनस्तस्यात्मन इत्यर्थ इत्याहुः ।

**गु०दी०— विमोक्षस्तस्य तायिन** इत्यत्र तायिनो ज्ञानिन इत्यर्थः ।

**यादु०— शून्यत्वलक्षणमिति** । आदौ कर्तृत्वादिविशिष्टात्मविनाशलक्षणं, पश्चान्महाशून्यत्वलक्षणं चेत्यर्थः । यद्वक्ष्यति । 'यस्य शून्यैकरसताज्ञानात्सा त्वपगच्छति । स पुद्गलत्वान्निर्मुक्तो महाशून्यत्वमेष्यति' इति । आदावात्मविनाशरूपो मोक्ष इत्यत्र तत्सम्मतिमाह **यथोक्तमिति** ॥ **प्रदीपस्येवेति** । यथा तैलाद्यपगमे प्रदीपस्य निर्वाणं विनाशः तथा भाविनः शून्यभावनावतस्तस्य कर्तृत्वादिविशिष्टस्यात्मनः संवृत्यपगमे निर्वाणं विमोक्ष इत्यर्थः । तापिन इति पाठे ज्ञानिन इत्यर्थ इत्याहुः ।

**वं०प०— उपायोपेये** मोक्षसाधने धर्मादौ मोक्षे चेत्यर्थः ।

**कं०रा०— प्रदीपस्येति** । तस्य तापिनस्तपस्विनः प्रदीपस्येव निर्वाणं शून्यत्वं विमोक्ष इत्यर्थः । **तापिन इति** पाठे तप गतावित्यस्माद्घञि उपधावृद्धौ च निष्पन्नस्तापशब्दः ज्ञानवाची, गत्यर्थानां ज्ञानार्थत्वात् । तथा च तस्य तापिनः तस्य ज्ञानिन इत्यर्थः । तायिन इति पाठे तायृ सन्तानपालनयोरित्यस्मान्निष्पन्नस्तायशब्दः सन्तानवाची तथा च तायिनः शून्यविषयकज्ञानसन्तानवत इति वार्थः । अस्मिन्पक्षे ज्वालासन्तानयुक्तस्य दीपस्येव ज्ञानसन्तानयुक्तस्य मुनेः निर्वाणं शून्यत्वापत्तिर्मोक्षमिति दृष्टान्तदार्ष्टान्तिकानुगुण्यमिति द्रष्टव्यम् ।

**श्रीनिधि०—** ननु 'तदस्मीति नित्योपासापरोक्षितमि'ति किमर्थमुच्यते । वाद्युक्तमनूद्यत इति चेत् तेनापि किमर्थमुक्तमिदमित्यत आह **उपायोपेयेति** । **ख्यापनं** ख्यापकत्वम् । **प्रदीपस्येव निर्वाणं विमोक्षः** विमोक्षः प्रदीपस्य निर्वाणमिव आत्यन्तिकोच्छेद इव । यथा प्रदीपसन्तानानां वातादिना अत्यन्तमुच्छेदः । एवं उक्तरीत्या शून्यभावनया अहमहमादिदोषाणामत्यन्तमुच्छेदो भवति । स एव मोक्ष इत्यर्थः ।

**शे०चं०— शास्त्रधर्म इति** । वक्तृश्रोत्रोरभिमतमनन्यसाध्यं फलमधिकृत्य तद्धेतुभूतं प्रमाणान्तराप्राप्तमर्थं प्रतिपादयतां वाक्यानां समूहस्यैव शास्त्रत्वेनोपायोपेयभावानवस्थितपदार्थख्यापकस्य निर्विषयत्वेन निष्प्रयोजनत्वेन च काकदन्तपरीक्षादिग्रन्थवदशास्त्रत्वादिति भावः । तदस्मीति नित्योपासनाऽपरोक्षितमित्यत्र विशेष्यानुक्त्या न्यूनतामाशङ्क्य तदस्मीति पूर्वप्रकृततच्छब्दोक्तशून्यस्यैव विशेष्यत्वान्नानुपपत्तिरिति भावेन विशेष्यं पूरयति **तच्छून्यमिति** ॥ **शून्यत्वलक्षणमिति** । आदौ कर्तृत्वादिविशिष्टात्मविनाशलक्षणं, पश्चान्महाशून्यत्वलक्षणं चेत्यर्थः । 'यस्य शून्यैकरसताज्ञानात्सा त्वपगच्छति । स पुद्गलत्वान्निर्मुक्तो महाशून्यत्वमेष्यती'ति वक्ष्यमाणत्वादिति ध्येयम् । आदावात्मविनाशरूपो मोक्षो भवतीत्येतत्कुतोऽवगतमित्यतस्तद्वाक्यादेवेत्यभिप्रेत्य तत्पठति **यथोक्तमित्यादिना** । तनोतीति तायी तनु विस्तार इति धातोः । तायिनो विस्तारिणस्तस्यावबोधसन्तानस्य प्रदीपस्यैव निर्वाणं निवृत्तिर्मोक्ष इत्यर्थः । न चैवं ज्ञाननाशस्यैव मोक्षत्वमित्यस्मा-

द्वाक्याल्लभ्यते न त्वात्मनाशस्य, तत्कथमस्योदाहरणत्वमिति वाच्यम् । परेण ज्ञानस्यैवात्मत्वाङ्गीकारादिति भावः ।

**वा०र०**— समयप्रयोजनाभावादित्येतत्तत्त्वनिर्णयव्याख्यानमनुसृत्याह **वक्तृश्रोत्रोरिति** । आदिपदेन स्फीतालोकमध्यवर्तिघटप्रतिपादकवाक्यादिकं गृह्यते । एतच्च जिज्ञासाधिकरणपूर्वपक्षप्रदर्शनपरमूले विषयादिसद्भावो हीत्यादिनोक्तं ज्ञातव्यम् । तच्छून्यमहमित्येतदवतारयति **तदस्मीतीति** । **वक्ष्यमाणत्वादिति** । सपरिकरशून्यमतोपन्यासपरमोक्षवादीयानुव्याख्याने चतुर्थस्य द्वितीये वक्ष्यमाणत्वादित्यर्थः । मोक्षवादीयन्यायमकरन्दस्य प्रदीपस्येवेति सम्मतिवाक्यस्य तायिनः इत्येतद्व्याख्यानरूपतायिनो विस्तारिणो बोधसन्तानस्येत्यादितत्त्वप्रदीपिकानुसारेण न्यायवाचस्पत्याद्यनुसारेण च व्याचष्टे **तायिनो विस्तारिण इति** । तायतीति तायि विस्तारी इत्यादि व्याख्यानप्रकारोऽपि शोधयित्वा लेखनीयः । अनेन तस्य तायिनः इत्येव सम्मतिवाक्यपाठ इति सूचितं भवति । न्यायमकरन्दन्यायवाचस्पत्याद्यननुसारिभाविन इत्येतत्पाठानुसारेण प्रवृत्तान्यथाख्यातिव्याख्यानं तु वाक्यार्थविनोदे दूषितमिति ध्येयम् ।

**स०व्र०**— **तायिन इति** । 'प्रदीपस्येव निर्वाणं निर्मोक्षस्तस्य तायिनः' इति पाठः । अयमर्थः । तनोतीति तायी । 'तनु विस्तारे' इति धातोः । तथा च, तायिनः तस्य विस्तारिणः तस्य बोधसन्तानस्य प्रदीपस्येव निर्वाणं निवृत्तिः मोक्ष इति । न चैवमपि ज्ञाननाशस्यैव मोक्षत्वमस्मात् वाक्याल्लभ्यते । न त्वात्मनाशस्य । तत्कथमस्योदाहरणमिति वाच्यम् । परेण ज्ञानस्यैवात्मत्वाङ्गीकारादिति भावः ।

**विठ्ठ०**— आत्मविनाशरूप एव मोक्ष इत्यत्र तदीयसम्मतिमाह **प्रदीपस्येति** । यथा तैलाद्यपगमे प्रदीपस्य निर्वाणं विनाशः तथा भाविनः शून्यभावनावतः तस्यात्मनो निर्वाणं शून्यताप्राप्तिर्मोक्ष इत्यर्थः । तायिन इति पाठे तु ज्ञानिन इत्यर्थः । अत्रोक्तं गुर्वर्थदीपिकायां वादिराजस्वामिभिः तायिन इत्येव पाठः । तन्मूलकोषे तथा दर्शनादिति । केचित् तापिन इति पाठमुपेत्य योगिन इत्यर्थ इत्याहुः ।

**चषकः**— **शून्यत्वलक्षणमिति** । 'यस्य शून्यैकरसताज्ञानात्सा त्वपगच्छति । स पुद्गलत्वनिर्मुक्तो महाशून्यत्वमेष्यती'त्यभिधास्यमानतया आदौ कर्तृत्वादिविशिष्टात्मनाशलक्षणं पश्चान्महाशून्यत्वलक्षणं चेत्यर्थः । उक्तार्थे तदीयवचनं प्रमाणयति **यथोक्तमिति** । अत्र तायिन इति पाठमूरीकुर्वाणाः तायृसन्तानपालनयोरिति स्मृतेः तायिनः सन्तन्यमानस्य कर्तृत्वभोक्तृत्वादिभ्रान्त्यात्मकस्य संसारस्य प्रदीपस्य इव निर्वाणं निवृत्तिर्मोक्ष इत्यार्तीथपन् । भाविन इत्यानुपूर्वीमुपगच्छन्तो भाविनः शून्यभावनावत इति तापिन इत्येवोपदधानाः योगिन इति च व्याकुर्वते ।

**॥ इति शून्यस्य लक्षणकथनम् ॥**

* * *

।। अथ शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का, तत्समाधानञ्च द्वेधा ।।

।। अथ तत्रादौ शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का, तस्याः प्रथमं समाधानञ्च ।।

३ **सु०—** यदि शून्यमुक्तरूपं कथं तर्ह्यखिलं शून्य(मित्युक्त)मित्यत आह **तस्यैवेति** ।

## अनु०— तस्यैवानादिसंवृत्या नानाभेदात्मकं जगत् । सदिवाभाति

शून्यस्य **एव** । संव्रियतेऽनयेति **संवृतिः** अविद्या । संवृतेः सत्यत्वेऽद्वैतहानिः आरोपितत्वे तु संवृत्यन्तरापेक्षेत्यतः **अनादि** इत्युक्तम् । **नानाभेदात्मकं** पञ्चस्कन्धात्मकम् ।

शून्याविद्याकल्पितत्वादखिलं शून्यमित्युच्यते, न पुनस्तदेव तदिति; तत्किमसदेवेदम्; तथात्वे वा कथं सदिति प्रतिभासः । सत्त्वारोपात् ।

**परि०—** **संव्रियतेऽनयेति** । करणव्युत्पत्त्या शून्यावरणहेत्वविद्या संवृतिरुच्यत इत्यर्थः । कथमिति पृष्टस्योत्तरं **सत्त्वारोपादिति** ।

**यादु०—** **सत्त्वारोपादिति** । तथा च सत्त्वेन प्रतीतिरेव सत्ता, नार्थगतं सत्त्वमस्तीत्येतन्मताभिप्रायः ।

**वं०प०—** **शून्यमुक्तरूपमिति** । यदि शून्यमुक्तरूपं शुद्धसर्वगत्वादिरूपं तर्ह्यखिलं शून्यमित्यनेन अशुद्धासर्वगतादिरूपजगताऽनन्यत्वं कथमुक्तमित्यर्थः ।। **तत्किमिति** । यदि शून्याविद्याकल्पितत्वेन । जगदारोपितं स्यादित्यर्थः । असद्भवत्येवेति चेत् तत्राह **तथात्वे वेति** । असत्त्वे वेत्यर्थः । 'तस्य चे'ति चशब्दसमुच्चेयं दूषणमाह **सत्त्वारोपादिति** ।

**कं०रा०—** **यदीति** । यदि शून्यं 'निर्विशेषं स्वयंभातं निर्लेपमजरामरमि'त्याद्युक्तरूपं तर्हि कथमखिलं शून्यात्मकमित्युक्तमखिलस्य जगतो निर्विशेषमित्याद्युक्तरूपत्वाभावेन शून्यात्मकत्वायोगादित्यत आहेत्यर्थः । **संवृत्यन्तरेति** । संवृत्यारोपार्थं संवृत्यन्तरापेक्षेति भावः । **अनादीत्युक्तमिति** । साद्यारोपितस्यैव संवृत्यपेक्षा न त्वनाद्यारोपितस्याविद्यायाश्च अनाद्यारोपितत्वान्न संवृत्यन्तरापेक्षेत्याशयेन अनादीत्युक्तमिति भावः । **सत्त्वारोपादिति** । जगति सत्त्वप्रत्ययस्यारोपरूपत्वात् सत्त्वाभावेऽपि सदिति प्रतिभासः सम्भवतीति भावः ।

**श्रीनिधि०—** **उक्तरूपमिति** । निर्विशेषत्वादिरूपमित्यर्थः । **अखिलमित्युक्तमिति** । अखिलस्य सविशेषत्वादिरूपत्वाद् विरुद्धधर्माधिकरणयोरैक्यायोगादिति भावः । **संव्रियत इति संवृतिरिति** । संव्रियते आच्छाद्यते निर्विशेषाद्यनयेति संवृतिरित्यर्थः । **आरोपितत्वे तु संवृत्यन्तरापेक्षेति** । आरोपस्य संवृति-

कार्यत्वादिति भावः । **अनादीत्युक्तमिति** । नाज्ञानं सत्यं नाप्यारोपितम् । न चैवं मिथ्यात्वासिद्धिः । अज्ञान-तत्कार्ययोरन्यतरत्वमसत्त्वमिति विवक्षितत्वात् ।

**शे०चं०— उक्तरूपमिति** । निर्विशेषत्वादिरूपमित्यर्थः ॥ **कथं तर्हीति** । तस्यानेवंरूपतयोक्तरूप-शून्यात्मताया बाधितत्वादिति भावः । ननु संवृतेः किं लक्षणं किं च कार्यमित्यतोऽविद्यालक्षणादिकमेव तल्लक्षणादिकमित्यभिप्रेत्य तयोर्भेदे तदनुपपत्तेस्तदभेदमाह **संवृतिरविद्येति** । अभिधानादेरभावेन रूढ्या संवृतिशब्दस्याविद्यापरत्वासम्भवादाह **संव्रियत इति** ॥ **अद्वैतहानिरिति** । संवृतेः शून्यात्मकत्वासम्भवेन तदतिरिक्तत्वावश्यम्भावात् तस्याः सत्त्वे तयैव सद्वितीयत्वमिति भावः ॥ **संवृत्यन्तरापेक्षेति** । आरोपस्य संवृतिकार्यत्वात् । तथा चानवस्थेति भावः ॥ **अतोऽनादीत्युक्तमिति** । तथा च संवृतेरारोपितत्वेऽप्यनादित्वेन संवृत्यन्तरानपेक्षत्वान्नानवस्थेति भावः । उपलक्षणं चैतत् । संवृतेर्भेदादिवत् स्वनिर्वाहकत्वेन संवृत्याख्य-स्यारोपितस्य संवृत्यन्तरानपेक्षत्वाच्च नानवस्थेत्यपि द्रष्टव्यम् । तथाऽपि यदि शून्यमुक्तरूपं कथं तर्ह्यखिलं शून्यमित्युक्तमिति शङ्काया न परिहार इत्यत आह **शून्याविद्येति** । ओमिति वदन्तं प्रति तथा सति असद्रूपे तस्मिन्नसदित्येव प्रतीतेरावश्यकतया सन्घट इत्यादिसत्त्वप्रत्ययानुपपत्तिरित्याह **तथात्वे चेति** । किमत्र प्रमारूप-सत्त्वप्रत्ययो न स्यादित्यभिमतं, भ्रमरूपो वा । नाद्यः । सत्त्वप्रत्ययस्य प्रपञ्चे प्रमात्वस्यास्माकमसम्मतत्वेनेष्टा-पत्तेरिति मनसि निधाय द्वितीयं दूषयति **सत्त्वारोपादिति** । अनिदंरूपेऽपि रूप्येऽधिष्ठानगतेदन्तारोपादिदं रूप्यमिति प्रत्ययवत् सत्त्वाभावेऽपि घटादिप्रपञ्चस्य मायिमतेऽधिष्ठानीभूतब्रह्मगतसत्त्वारोपात् सन्घट इति प्रत्यय-वच्चैतन्मतेऽप्यधिष्ठानीभूतशून्यगतसत्त्वारोपाद् घटादौ सत्त्वप्रत्ययो नानुपपन्न इत्यर्थः ।

५६ **वा०र०— तस्यानेवंरूपतयेति** । अखिलस्य घटादेः निर्विशेषत्वादिरूपवत्त्वाभावेनेत्यर्थः । अविद्या-परत्वासम्भवात् उक्तमिति पाठः । आहेति पाठेऽपि अयमेवार्थः । **शून्यात्मकत्वासम्भवेनेति** । विरुद्धधर्माधि-करणत्वं सोपाधिकत्वनिरुपाधिकत्वप्रयुक्तमस्तीति भावः । न चानादित्वेन वा भेदादिवत्स्वनिर्वाहकत्वेन वेति प्रतिकूलतर्ककथनावसरीयन्यायामृतानुसारेणाह **उपलक्षणं चैतदिति** । उक्तोपलक्षणनिमित्तं च संवृतेरित्युत्तर-वाक्ये एव स्पष्टम् । आरोपस्य सदृशाधिष्ठानसापेक्षतानियमेनारोपान्तरापेक्षत्वे तस्याप्युक्तरीत्या आरोपान्तरापेक्ष-त्वापत्त्या कल्पाद्यभूतस्यापि पूर्वकल्पीयारोपाभावेऽनुपपत्त्या तत्सापेक्षत्वमिति आरोपपरम्परया अनवस्थाया आशङ्कापूर्वकनिराकरणं च उत्तरवाक्यार्थः । अनादिसंवृत्येति मूलवाक्येऽनादित्वे सति प्रपञ्चोपादानत्वस्य लक्षणत्वेन प्रतीतेः प्रपञ्चस्य कार्यतायाश्च प्रतीतेः लक्षणकार्ये उक्ते इति किं लक्षणं इत्यादि शङ्का परिहृतेति ध्येयम् । अत्र पक्षे ब्रह्मणः प्रपञ्चोपादानाविद्याश्रयत्वेऽपि साक्षात् तदुपादानत्वानाश्रयणात् न दोषः ।

**विठ्ठ०— सत्त्वारोपादिति** । रजते सत्त्वारोपवत् प्रपञ्चे सत्त्वारोपादेव सदिति प्रतीतिनिर्धर्मिगतं सत्त्व-मस्तीति भावः ।

**॥ इति शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का तस्याः प्रथमं समाधानञ्च ॥**

* * *

॥ अथ तत्र तस्याः शङ्कायाः द्वितीयं समाधानं सत्त्वद्वैविध्यदर्शनद्वारा ॥

४ **सु०**— पक्षान्तरमाह **सत्यत्वमिति** ।

**अनु०**— सत्यत्वं सांवृतं तस्य चेष्यते ।

**तस्य** आरोपितस्य अपि जगतः, **सांवृतं सत्यत्वमिष्यते**, अतो न सत्प्रत्ययविरोधः ।

अस्ति चेत् जगतः सत्त्वं कथं तर्ह्यसत्, येन 'सदिवाभाती'त्युक्तमित्यत आह **पारमार्थिकेति** ।

पारमार्थिकसत्यत्वं शून्यादन्यस्य न क्वचित् ।

सर्वथाऽबाध्यत्वं **पारमार्थिक(स)त्त्वं** तदभावादसदिदं जगदुद्गीयत इति ।

पारमार्थिकसत्त्वाभावे कथं जगत्यर्थक्रियादिव्यवहार इत्यत आह **सांवृतेनैवेति** ।

सांवृतेनैव सत्त्वेन व्यवहारोऽखिलो भवेत् ॥

**अखिलः** हानोपादानोपेक्षाऽभिज्ञाऽभिवदनार्थक्रियालक्षणः । **व्यवहारस्याप्यसत्त्वात्** । 'स्वप्न इवे'ति शेषः । **पारमार्थिकसत्त्वमेव व्यवहारविरोधि, तस्य सर्वक्रियारहितत्वात्, न तु तदभावः,** इति भावेनोक्तं **सांवृतेनैव सत्त्वेनेति** ।

**परि०**— **कथं तर्ह्यसदिति** । जगदिति योज्यम् । **तस्य** पारमार्थिकसत इत्यर्थः ।

**यादु०**— **अर्थक्रियेति** । जलाहरणादिरूपार्थक्रियेत्यर्थः ।

**वं०प०**— ननु व्यवहारस्यापि सत्त्वेऽद्वैतहानिरित्यत आह **व्यवहारस्यापीति** । **तस्य** पारमार्थिकसत्त्ववतः शून्यस्य । तदभावो न तु पारमार्थिकसत्त्वाभावो व्यवहारविरोधीत्यर्थः ।

**श्रीनिधि०**— **पक्षान्तरमाहेति** । पूर्वं तु स्वरूपेण सत्तासंस्पर्श एव नास्तीत्यारोपादित्युक्तम् । इदानीं सत्तासंस्पर्शाङ्गीकारेण प्रतीतिरुपपाद्यत इति पक्षान्तरत्वं द्रष्टव्यम् । **अर्थक्रियादिव्यवहार इति** । तत्तदुचितव्यवहार इत्यर्थः । नन्वपरमार्थसतः कथं सत्यस्योत्पत्तिरित्यत आह **व्यवहारस्यापीति** ।

**शे०चं०**— ननु च न सन्घट इत्यत्र सन्नित्यधिष्ठानशून्यानुवेधः । चाक्षुषादिज्ञाने रूपादिहीनस्य शून्यस्य स्फुरणायोगात् । अन्यथा नीलो घट इत्यादौ नील इत्यादिरधिष्ठानानुवेध इत्यापातात् । नैल्यादिकं घटेऽस्ति सत्त्वं तु नेति चेन्न । अस्यारोपितत्वसिद्ध्यधीनत्वेनेतरेतराश्रयत्वादिति पूर्वत्रारुच्याऽर्थगतस्य सांवृतसत्त्वस्य सत्त्वात् सत्त्वप्रत्यय इति पक्षान्तरोपदर्शनं भाष्य इति भावेनाह **पक्षान्तरमाहेति** ॥ **कथं जगत्यर्थक्रियादीति** । आदिपदेन हानादिपरिग्रहः । तुच्छस्याप्यर्थक्रियाकारित्वप्रसङ्गेन धीमात्रस्य नित्यातीन्द्रियस्य तदभावप्रसङ्गेनापरोक्षधियः, अमृतत्वेनापरोक्षतो ज्ञातस्यापि विषस्यासञ्जीवकत्वेनापरोक्षसत्त्वधियः, प्रपञ्चासत्त्वसिद्धेः प्राक् तदसिद्ध्याऽन्योन्याश्रयप्रसङ्गात् व्यावहारिकसत्त्वस्य, अननुगमेन सत्तात्रयस्य तद्द्वयस्य वा, परमार्थतोऽसत्त्वेन तत्र सत्त्वस्य विरुद्धतया सत्त्रयानुगतस्य सद्द्वयानुगतस्य सत्त्वसामान्यस्य, गौरवप्रसङ्गादसद्विलक्षणत्वस्य, तुच्छेऽतिप्रसङ्गादप्रातिभासिकत्वस्य, गौरवादप्रातिभासिकसत्त्वस्य, अतिगौरवादसद्वैलक्षण्ये सति प्रातिभासिकवैलक्षण्यस्य चार्थक्रियाकारित्वे अतन्त्रत्वेन परमार्थसत्त्वस्यैव तत्र तन्त्रत्वादर्थक्रियाकारित्वव्यापकस्य पारमार्थिकसत्त्वस्य व्यावृत्तौ तद्व्याप्यस्यार्थक्रियाकारित्वस्यापि व्यावृत्त्यवश्यम्भावादिति भावः । **अर्थक्रिया** जलाहरणादिरूपार्थक्रियेत्यर्थः । तावताऽपि कथमुक्ताक्षेपपरिहार इत्यतोऽपेक्षितशेषं पूरयति **व्यवहारस्यापीति** । किमत्र पारमार्थिकव्यवहारो न स्यादित्यापाद्यते किं वा व्यावहारिको व्यवहारो न स्यादिति । नाद्यः । उक्तरूपस्य व्यवहारस्य पारमार्थिकत्वाभावेन तदभावापादनस्येष्टत्वात् । न द्वितीयः । पारमार्थिकसत्त्वस्य पारमार्थिकव्यवहारव्यापकत्वेन तद्व्यावृत्त्या पारमार्थिकव्यवहाराभावाप्राप्तावपि तद्व्यावृत्तेर्व्यवहारव्यावृत्त्यप्रापकतया सांवृतसत्त्वेन व्यावहारिकव्यवहारसम्भवात् । प्रामाणिकत्वाच्चास्यार्थस्य नान्योन्याश्रय इति भावः । अपारमार्थिकव्यवहारस्यापारमार्थिकसत्त्वेन सिद्धेरसम्भावनापरिहाराय स्वप्नादिवदिति सूत्रानुसार्युत्तरभाष्यानुसारेणानुरूपं दृष्टान्तमाह **स्वप्न इवेति** । सांवृतेन सत्त्वेन व्यवहारो भवेदित्येतावतैव पूर्तेरेवकारवैयर्थ्यमित्याशङ्क्य अङ्गीकृत्य परमार्थसत्त्वस्य व्यवहारप्रयोजकतां व्यवहारस्याप्यसत्त्वात् परमार्थसत्त्वाभावेऽपि न व्यवहारानुपपत्तिरिति समाहितम् । वस्तुतस्तु परमार्थसत्त्वस्य व्यवहारविरोधित्वेन तत्राप्रयोजकत्वात् परमार्थसत्त्वाभावेनैवार्थक्रियाकारित्वोपपत्तेर्विरुद्धतयैव तर्कखण्डनसम्भवान्न तदर्थं व्यवहारस्यासत्त्वकथनापेक्षेत्यर्थविशेषसूचकत्वान्न तस्य वैयर्थ्यमित्यभिप्रेत्य तथा एवकारतात्पर्यमाह **पारमार्थिकसत्त्वमेवेति** ॥ **वि(सर्व)क्रियारहितत्वादिति** । अर्थक्रियाकारित्वे च क्रियावेशप्रसक्त्या विकारावश्यम्भावादित्यर्थः ।

**वा०र०**— प्रत्यक्षस्य जात्या प्राबल्यपरन्यायामृते नन्विदं रूप्यमित्याशङ्क्य चाक्षुषादिज्ञान इत्यादिना तत्परिहृतम् । तदनुसारेणावतारयति **ननु च न सन्निति** । असतः साधकत्वे बाधककथनेन परमार्थसत्त्वस्यैव साधकत्वे तत्र त्विदित्यादिन्यायामृतानुसारेणाह **तुच्छस्यापीत्यादिना** । **तावतापीति** । सांवृत्तसत्त्वाङ्गीकारमात्रेण इत्यर्थः । **कथमुक्तेति** । पारमार्थिकसत्त्वाभावे व्यवहारो न स्यादित्याक्षिपता पारमार्थिकव्यवहाराभावस्यापादनेन सांवृतसत्यत्वेनोक्तव्यवहारनिर्वाहाभावात् तदाक्षेपपरिहारो न सम्भवति इत्याशयः । **अपेक्षितं शेषमिति** । अनेन व्यवहारस्याप्यसत्त्वात् स्वप्नवत् इत्येतावान् शेष इति सूचितं भवति । असत्त्वादित्यस्य

पारमार्थिकापारमार्थिकसत्त्वनिषेधपरत्वभ्रमनिरासाय पारमार्थिकपरत्वेन व्याख्यानं सूचयन् मूलेऽभिप्रेतप्रयोजकत्वेष्टापादनत्वे पक्षभेदेन दर्शयंश्च विकल्पमुखेन ग्रन्थतात्पर्यमाह **किमत्र पारमार्थिक इत्यादिना** । **व्यवहारो न स्यादिति** । व्यवहारमात्रं न स्यादित्यर्थः । व्यावहारिकव्यवहार इति यावत् । कथं व्यवहार इत्यत्र कथमित्यस्याक्षेपार्थत्वेन व्यवहारो न स्यादिति पर्यवसानमाश्रित्य तदनुसारेण विकल्पः । व्यवहारव्यावृत्तीत्यत्रापि व्यवहारमात्रव्यावृत्तीत्यर्थः । अनेन व्यवहारस्य पारमार्थिकसत्त्वाभावात् अपारमार्थिको व्यवहारः सांवृतेन सत्त्वेन भवेदिति भाष्ययोजना मूलाभिप्रेततया सूचिता भवति । **सम्भवादिति** । ततश्च पारमार्थिकसत्त्वाभावोऽप्रयोजक इति हृदयम् ।

ननु व्यवहारस्य व्यावहारिकत्वे सिद्धे तस्य पारमार्थिकसत्त्वानपेक्षतया तदभावेऽप्युपपत्तिसिद्धिः । तदभावेऽप्युपपत्तौ सिद्धायां च तस्य व्यावहारिकत्वसिद्धिरित्यन्योन्याश्रयत्वमित्यत आह **प्रामाणिकत्वाच्चेति** । बीजाङ्कुरपरम्परास्थलेऽनवस्थायाः सिद्धविषयत्वेनादोषत्ववदिहान्योन्याश्रयोऽपि सिद्धविषय इत्यदोष इति सांवृतेनेति वदतोऽभिप्राय इत्यर्थ इति भावेनैवमुक्तिरिति यावत् । **उत्तरभाष्येति** । स्वप्नभ्रान्तिवदेवेदमित्युत्तरभाष्येत्यर्थः । **दृष्टान्तमाहेति** । यद्यपि स्वप्नवदित्यपि शेषपूरणमेव । तथा च दृष्टान्तं पूरयतीत्याद्येव वाच्यम् । तथापि विशिष्टस्य शेषपूरकतया प्रागवतारानन्तरं व्यवहारस्याप्यसत्त्वादित्यंशतात्पर्यमभिधाय इदानीं स्वप्नवदित्यंशतात्पर्यकथनमिति पुनः शेषत्वानुक्तिरिति ज्ञातव्यम् । अथवा पूरयतीति प्रकृतत्वात् आहेत्यस्य पूरयतीत्यर्थः । अथवा दृष्टान्तं शेषपूरणेनाहेति योज्यम् । **वक्ष्यति च शेषपूरणेनेति** । विवक्षितार्थलाभाय उभयपूरणेऽपि तत्तद्व्यावर्त्यशङ्काभेदेन पृथगवतार इति ज्ञेयम् । व्यवहारस्यासत्त्वेन पारमार्थिकसत्त्वानपेक्षितत्ववचनस्य पारमार्थिकसत्त्वे व्यवहारविरोधित्वादिवचनेन विरोध इत्यतः पूर्वोत्तरग्रन्थयोः अङ्गीकारवादत्ववास्तवकथनत्वाभ्यां प्रवृत्तेन विरोध इति दर्शयन् उत्तरवाक्यं अवतारयति **अङ्गीकृत्येत्यादिना** । पारमार्थिकसत्त्वस्य प्रकृतत्वेऽपि बुद्ध्या विवेकेन परामर्शाभिप्रायेण तस्य विक्रियेत्यत्र तच्छब्देन पारमार्थिकसत्परामर्शो बुद्धिप्रकृतपरामर्श इति ज्ञेयम् ।

**वि॰— आरोपितस्येति** । शून्यतत्त्वे आरोपितस्य । **अर्थक्रियेति** । जलाहरणादिका । असत्यस्यापि सत्यत्वव्यवहारे दृष्टान्तः **स्वप्न इवेति शेष इति** । जगत इव तद्व्यवहारस्याप्यसत्त्वात् स्वप्नव्यवहार इवोपपद्यत इति 'व्यवहारोऽखिलो भवेत्' इत्यंशेनोक्त्वा सांवृतेनैव सत्त्वेनेत्यस्योपयोगमाह **पारमार्थिकेति** ।

**॥ इति तस्याः शङ्कायाः द्वितीयं समाधानं सत्त्वद्वैविध्यदर्शनद्वारा ॥**

**॥ इति शून्यस्योक्तरूपत्वे अखिलस्य शून्यत्वानुपपत्तिशङ्का तत्समाधानश्च द्वेधा ॥**

**॥ इति सहेतुकम् उपायोपेयपदार्थयोर्विप्रतिपत्तिदर्शनम् ॥**

* * *

॥ अथ तत्रान्ते सृष्टिप्रलयविषये विगानदर्शनम् ॥

५ **सु०**— सृष्टिप्रलयविष(यं)ये विगानं दर्शयति **शून्यादिति** ।

**अनु०**— शून्यात्संवृतियोगेन विश्वमेतत्प्रवर्तते ।
सृष्टिकाले पुनश्चान्ते स्तिमितं शून्यतां व्रजेत् ।
इति ब्रूते

**सृष्टिकाले प्रवर्तते** जायते । शून्यस्य निष्क्रियत्वात् कथं विश्वकर्तृत्वमित्यत उक्तं **संवृतियोगेनेति** । **अन्ते** प्रलयकाले । **स्तिमितं** निष्क्रियम् । **अनेन** 'क्रियाविभागादिन्यायेन या विश्वस्य सत्यत्ववादिनां प्रलयप्रक्रिया सा' निराक्रियते । 'स्वाप्नगजादिरिवे'ति शेषः ।

**परि०**— **क्रियाविभागादीति** । ईश्वरसञ्जिहीर्षया भूतकारणाणुषु क्रियायां जातायां तया अणुद्वयविभागे सति तत्संयोगरूपासमवायिकारणनाशेन द्व्यणुकनाशे क्रमादन्त्यावयविपर्यन्तनाश इत्येवंरूपेणोक्ततार्किकादीनां प्रलयप्रक्रियेत्यर्थः ।

**यादु०**— **क्रियाविभागादीति** । ब्रह्मणो वर्षशतान्ते महेश्वरस्य सञ्जिहीर्षया पृथिव्याद्यारम्भकाणुषु क्रिया जायते । ततो विभागः ततोऽसमवायिकारणसंयोगानां नाशः ततो द्व्यणुकानां नाशः ततस्त्र्यणुकादीनां महापृथिव्यादिपर्यन्तानां कार्याणां समवायिकारणनाशेन नाश इति क्रियाविभागादिक्रमेणेत्यर्थः ।

**श्रीनिधि०**— **संवृतियोगेनेतीति** । कथमिदं घटत इति चेत् उपाधेरयं स्वभावो यदविद्यमानसम्पादकत्वम् । यथा घटादिराकाशभेदनमि..... । **शून्यतां व्रजेदिति** । शून्यसम्बन्ध्यविद्यामात्रतां व्रजेदित्यर्थः । अत एव **शून्याविद्याकल्पितत्वादिदं शून्यमित्युच्यत** इत्युक्तं पूर्वम् । **स्वाप्नगजादिरिवेति** । सांवृतो गजादिः स्वप्नान्तेऽविद्यामात्रतां यथा व्रजेत् तथेत्यर्थः ।

**शे०चं०**— सृष्टिकाल इत्यस्य नोत्तरत्र सम्बन्धः किन्तु पूर्वत्रेति भावेन अन्वयं दर्शयन् सृष्ट्यादिविगानप्रदर्शकत्वलाभाय तदनुगुणतया प्रवर्तत इत्यादिपदजातं व्याचष्टे **सृष्टिकाल इत्यादिना** ॥ **अनेनेति** । निष्क्रियार्थकस्तिमितपदेनेत्यर्थः ॥ **क्रियाविभागादिन्यायेनेति** । ब्रह्मणो वर्षशतान्ते महेश्वरस्य सञ्जिहीर्षया पृथिव्याद्यारम्भकाणुषु क्रिया जायते, ततो विभागस्ततोऽसमवायिकारणसंयोगानां नाशस्ततो द्व्यणुकानां नाशः ततस्त्र्यणुकादीनां महापृथिव्यादिपर्यन्तानां कार्याणां समवायिकारणनाशेन नाश इति प्रशस्तदेवाचार्योदीरितक्रिया-

विभागादिक्रमेणेत्यर्थः । संवृतियोगमात्रेण शून्याज्जगत्सृष्ट्यादेरसम्भावनाशङ्कापरिहाराय स्वप्नभ्रान्तिवदेवेदमित्याद्युत्तरभाष्यानुसारेणानुरूपं दृष्टान्तं शेषपूरणेनाह **स्वाप्नेति** ।

**वा०र०—** सृष्टिसंहारप्रकरणस्थप्रशस्तदेवाचार्योक्त्यनुसारेणाह **ब्रह्मणो वर्षशतान्त इति** ।

**स०व्र०— अनेनेति** । निष्क्रियत्वार्थकस्तिमितपदेनेत्यर्थः ।

**वि०ठ०— क्रियाविभागादीति** । ब्रह्मणो वर्षशतान्ते महेश्वरस्य सञ्जिहीर्षया पृथिव्याद्यारम्भकपरमाणुषु क्रिया जायते । ततो विभागः अथासमवायिकारणानां संयोगानां नाशः तथा द्व्यणुकानां नाशे त्र्यणुकादिमहापृथिव्यन्तानां कार्याणां तत्तत्समवायिकारणनाशेन नाश इति क्रियाविभागादिक्रमो ज्ञातव्यः ।

**॥ इति सृष्टिप्रलयविषये विगानदर्शनम् ॥**

**॥ इति उक्तार्थविरोधदर्शनपर्याप्तः माध्यमिकमतोपन्यासः ॥**

* * *

**॥ अथ तत्र उपन्यस्तस्य माध्यमिकमतस्य निरसनम् ॥**

**॥ अथ तत्रादौ उपन्यस्तमाध्यमिकमतनिरासकत्वमस्याधिकरणस्य ॥**

६ **सु०—** एवमुपन्यस्तमतनिरासार्थत्वेनाधिकरणमवतारयति **तमुद्दिश्येति** ।

## अनु०— तमुद्दिश्य जगाद जगतां गुरुः ।

**जगाद** इदमधिकरणमिति शेषः ।

**॥ इति उपन्यस्तमाध्यमिकमतनिरासकत्वमस्याधिकरणस्य ॥**

* * *

**॥ अथ तत्र असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अप्रामाणिकत्वरूपातिप्रसङ्गदर्शनम्**
**(तत्रैतदधिकरणीयादिमसूत्रद्वयव्याख्यानम्) ॥**
**॥ अथ तत्रादौ (एतदधिकरणीयप्रथमसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे प्रत्यक्षागमरूपप्रमाणाभावः ॥**
**॥ अथ तत्राप्यादौ प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वकथनम् ॥**

७ **सु०—** यत्तावदुक्तं 'शून्यादेवेदं जगदुत्पद्यत' इति तद्यथाश्रुतमपाकर्तुं सूत्रम् **'ॐ नासतोऽदृष्टत्वात् ॐ'** इति । तद्व्याचष्टे **नासत** इति ।

**अनु०— नासतो जगतो भावो**

**असतः** सर्वविशेषविनिर्मुक्तत्वेन गगनकुसुमसमानाच्छून्यात् **जगतो भावो** जन्म नोपपद्यते ।

कुत इत्यत आह **न हीति** ।

न हि दृष्टाऽसतो जनिः ।

सतः क्वचित्

**सतो** भवतः कार्यस्येति यावत् । **क्वचित् असतो जनिर्न दृष्टा** यतः ।

अत्र सर्वत्र शून्यस्यासत्त्वमापाद्य दूषणाभिधानमिति ज्ञातव्यम् ।

**परि०— यथाश्रुतमिति** । शून्यविवर्तत्वमनाश्रित्य शून्याज्जगज्जायत इति यथाश्रुतमित्यर्थः ।

**यादु०— यथाश्रुतमिति** । शून्याविद्यया शून्येऽध्यस्तमेव जगच्छून्यकारणकमित्युच्यत इति तदभिप्रेतपक्षस्याप्यग्रे 'स्वप्नभ्रान्तिवदेवेदं संवृत्यैवोपलभ्यते । यदि सत्त्वेने'त्यादिना दूषयिष्यमाणत्वादिति भावः । अत्र शून्याज्जगदुत्पद्यत इति परेणोक्ते किं यथाश्रुत एव कार्यकारणभावोऽत्राभिप्रेत उत तदविद्याकल्पितत्वादिरूप इति विकल्पेनोत्थानान्न छलप्रसङ्ग इति ज्ञातव्यम् । ननु परेण शून्ये पारमार्थिकसत्त्वस्याङ्गीकारात् कथं तस्यासत्त्वमाश्रित्य दूषणाभिधानमित्यत आह **अत्र सर्वत्रेति** । यदि शून्यं सर्वविशेषविनिर्मुक्तं स्यात् तर्ह्यप्रामाणिकं स्यात् सधर्मक एव प्रमाणप्रवृत्तेर्दर्शनात् ततश्च गगनकुसुमवदसत्स्यादित्यापाद्येत्यर्थः ।

**कं०रा०**— ननु शून्यस्य परेण निर्विशेषत्वमेवोक्तं न त्वसत्त्वम् अतः कथं 'नासतो जगतो भाव' इत्यादिदूषणाभिधानमित्यत आह **अत्रेति** । सत्त्वरूपधर्मरहितस्यासद्रूपत्वावश्यम्भावात् पराङ्गीकृतेन निर्विशेषत्वेन शून्यस्यासत्त्वमापाद्य दूषणाभिधानमत्र सर्वत्रेति ज्ञातव्यमित्यर्थः ।

**श्रीनिधि०**— **यथाश्रुतमपाकर्तुमिति** । शून्यं जगत्कारणमिति यथाश्रुतं दूषयितुं न तु तदभिमत-भ्रमाधिष्ठानत्वरूपकारणविशेषत्वकारणत्वं दूषयितुमित्यर्थः । ननु परेण शून्यं सदित्यङ्गीकृतं तत्कथमसत इत्युच्यते इत्यत आह **अत्र सर्वत्रेति** । 'नासतो जगतो भावः यद्येवं सप्तमरसात्' इत्यादौ सर्वत्रेत्यर्थः । यद्यपि यद्येवमित्यादौ असत इति नास्ति । तथाऽप्येवमित्यादेरर्थः असतोऽपि कार्याङ्गीकार इत्यर्थत्वादेवमुक्तमिति ध्येयम् । **आपाद्येति** । निर्विशेषत्वेनापाद्येत्यर्थः ।

**शे०चं०**— **यथाश्रुतमिति** । यद्यपि 'शून्यात्संवृतियोगेन विश्वमेतत्प्रवर्तत' इति ग्रन्थानुरोधेन जगतः शून्याविद्याकल्पितत्वसिद्ध्या तदारोपाधिष्ठानत्वमेव शून्यस्य जगत्कारणत्वं परस्याभिमतमिति तदेव निराकर्तुमुचितम् । अन्यथाऽनभिमतपक्षनिरासेन छलप्रसङ्गात् । तथाऽपि शून्याज्जगदुत्पद्यत इति वदतः किं यथाश्रुत एव कार्यकारणभावोऽभिमतः किंवा तदविद्याकल्पितत्वात् तत्राध्यस्तत्वरूप इति विकल्पद्वयं मनसि निधाय द्वितीये वक्ष्याम इति भावेन यथाश्रुत एव शून्यजगतोः साध्यसाधनभावो विवक्षित इत्याद्यपक्षस्य नासतोऽदृष्टत्वादित्येतदुत्तरमित्येवं विकल्पमुखेन दूषणप्रवृत्तेर्न छलप्रसङ्ग इति ध्येयम् । ननु 'पारमार्थिकसत्यत्वं न क्वचिदि'ति वदता परेण शून्यस्य पारमार्थिकसत्यत्वाभ्युपगमेन तदसत्त्वाभावान्नासत इत्यादिदोषस्य निरालम्बनत्वमित्याशङ्क्याह **अत्र सर्वत्रेति** । यदि शून्यं निर्विशेषं स्यात् तर्ह्यप्रामाणिकं स्यात् सधर्मक एव प्रमाणप्रवृत्तेर्दर्शनात् । ततश्च गगनकुसुमवदसत्स्यादित्यसत्त्वापादनपूर्वकमेवैतद्दूषणप्रवृत्तेर्न तन्निरालम्बनत्वमित्यर्थः ।

**वा०र०**— न हि दृष्टेति भाष्ये कुत इत्याशङ्कानिवारकत्वोपपत्त्यर्थं हेत्वर्थकपदप्रयोगस्याकरणान्न्यूनतेति न शङ्कनीयम् । हीत्यस्यैव हेत्वर्थकतया भाष्ये प्रयुक्तत्वादित्याशयेन मूले **दृष्टा यत इति** हिशब्दो व्याख्यातः इति ज्ञेयम् । **अत्र सर्वत्र शून्यस्यासत्त्वमापाद्य दूषणाभिधानमिति** मूले । अत्र सर्वत्रेत्यस्य शून्यस्य कारणत्वादेरसत्त्वयुक्त्या निराकरणस्थल इत्यर्थः । तेन असदिति चेन्न प्रतिषेधमात्रत्वात् इत्यादिस्थलान्तरेऽपि उक्तयुक्तिसञ्चारो यत्र यत्रास्ति तत्र तत्रासत्त्वापादनमुखेन दूषणं ज्ञातव्यमिति प्राप्नोतीति ज्ञेयम् । असदिति चेत् इत्यत्र प्रागभावो सच्छब्दवाच्य इति पक्षे तदतिरिक्तस्थलं ग्राह्यम् ।

**स०व्र०**— **यथाश्रुतमपाकर्तुमिति** । यद्यपि 'शून्यात्संवृतियोगेन विश्वमेतत्प्रवर्तते' इति शून्यस्य सर्वारोपाधिष्ठानत्वाभिप्रायेणैव पूर्वं तथोक्तम् । न तु शून्यस्य दण्डादेरिव कारणत्वाभिप्रायेण । तथाऽपि पराभिप्रेतार्थविवक्षयैव शून्यस्य सर्वकारणत्वमेवोक्तमिति भावेन यथाश्रुतमपाकर्तुमित्युक्तमिति भावः ।

**विष्ठ०— यथाश्रुतमिति** । शून्याज्जगदुत्पद्यत इत्येवं यथाश्रुतमित्यर्थः । तस्यैवानादिसंवृत्या नाना-भेदात्मकं जगदित्युक्तं शून्येऽध्यस्तत्वं तदभिप्रेतं तु स्वप्नभ्रान्तिवदेवेदमित्यादिनोत्तरत्र निरसिष्यतीति भावः । शून्यप्रपञ्चयोः किं यथाश्रुत एव कार्यकारणभावः किञ्च तत्संवृत्तिकल्पितत्वमिति विकल्पेनोत्थानान्न छलप्रसङ्ग इति ज्ञातव्यम् । ननु परेण शून्यस्य पारमार्थिकसत्त्वाभ्युपगमात् कथं 'नासतो जगतो भाव' इत्यसत्त्वापादनेन दूषणाभिधानमित्यत आह **असतः सर्वविशेषविनिर्मुक्तत्वेनेति** । सर्वविशेषविनिर्मुक्तत्वाभ्युपगमाच्छून्यस्या-सत्त्वमुक्तप्रायम् । अतः पारमार्थिकतावचनं रिक्तमेवेति भावः । अस भुवीति धातोः सत इत्यनूद्य भवत इति प्रतिपदम्, कार्यस्येति तात्पर्यार्थः । सर्वविशेषविनिर्मुक्तत्वेनेत्युक्ताभिप्रायं स्फुटयति **अत्र सर्वत्रेति** । **असत्त्व-मापाद्येति** । निर्विशेषत्वेनापादकेनेति शेषः ।

**चषकः— यथाश्रुतं** श्रूयमाणानुपूर्वीकमहिमाधिगतम् ।

**॥ इति तत्र प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वकथनम् ॥**

* * *

**॥ अथ तत्रान्ते प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वस्योपयोगे अभिसन्धिप्रदर्शनम् ॥**

८ **सु०—** स्यादेतत् । प्रमाणाभावः प्रमेयाभावं साधयति । न पुनः प्रमाणविशेषा-भावः । "मा हि भूदस्मदादिप्रत्यक्षव्यावृत्त्या धर्माद्यभावसिद्धिः, तदत्रापि प्रमाणाभावादिति हेतुर्वक्तव्यः, 'अदृष्टत्वादि'ति प्रत्यक्षाभावकथनं तु कथम्, अनैकान्तिकत्वादि''त्यत आह **प्रमाणं चेति** ।

**अनु०—** प्रमाणं च दृष्टिरेवाखिलाद्वरम् ।

**दृष्टिः** प्रत्यक्षम् **एव अखिलात्** अनुमानादागमात् **च वरं** प्रमाणम् ।

अयमभिसन्धिः । 'नासतो जगतो भाव' इति प्रतिज्ञाय, 'कुतः' इत्याकाङ्क्षायां, तत्र 'प्रमाणाभावादि'ति हेतुं मनसि निधाय, 'कथं तत्र प्रमाणाभावः' इति जिज्ञासायाम्; अनुमानागमयोः प्रत्यक्षमूलत्वेन ततः प्रत्यक्षमेव वरं प्रमाणमिति आदौ 'अदृष्टत्वादि'ति तदभावोऽयं दर्शितः, न तु प्रधानप्रतिज्ञायां हेतुत्वेन, येनोक्तदोषः स्यादिति ।

तर्ह्यनुमानाद्यभावो(ऽपि) वक्तव्य इत्यत आह **प्रमाणं चेति** । अयमाशयः । वेदादेः शून्यवादिना प्रामाण्यं नाङ्गीक्रियते, तदीयागमस्य त्वस्माभिः; इत्यतो नास्त्यत्रागमः सम्प्रतिपन्न इति शिष्यैरेव शक्यते ज्ञातुम् । प्रत्यक्षाभावेनानुमानस्याप्यभावः सिद्ध एव, प्रत्यक्षस्यानुमानोपजीव्यत्वात्, प्रत्यक्षेण क्वचिदुपलब्धमेव ह्यनुमानेन (क्वचित्) साधनीयम्; अतोऽनुमाना(द्य)भावस्यानुक्तावपि लाभात् 'अदृष्टत्वादि'त्येवोक्तं सूत्रकृतेति । अत एव प्रागुक्तं **क्वचिदिति** ।

**परि०**— प्रमाणविशेषाभाव एव प्रमेयाभावं साधयतु को दोष इत्यत आह **मा हि भूदिति** । हि यस्मात् एवं मा भूत् अस्मदादिप्रत्यक्षनिवृत्त्या धर्माद्यभावो नैव स्यात् तस्मात् प्रमाणविशेषाभावः प्रमेयाभावं न साधयति । अन्यथा धर्माद्यभावसिद्धिरपि स्यादित्यर्थः ॥ **तदत्रापीति** । असतः कार्य-जनिर्नेत्यत्रापीत्यर्थः ॥ **अनैकान्तिकत्वादिति** । धर्मादेः प्रत्यक्षेणादृष्टत्वेऽपि धर्माद्यभावाभावेन तत्रा-नैकान्त्यादित्यर्थः । प्रकारान्तरेण तदेव वाक्यमवतार्य भावमाह **तर्ह्यनुमानाद्यभावोऽपीति** ॥ **अत एवेति** । दृष्ट्यभावेनानुमानाभावस्य सिद्धत्वादेव । क्वचिन्न हि दृष्टेत्युक्तम् । तथा च क्वचिदप्यनुपलम्भेन दृष्टान्ताभावेनानुमानाभावसिद्धिरिति भावः ।

**यादु०**— **उपजीव्यत्वादिति** । अनेन मूले वरशब्दः उपजीव्यत्वार्थकोऽखिलादित्यस्य च विभक्ति-विपरिणामेनानुमानस्येत्यर्थ इति सूचितमिति ज्ञातव्यम् ॥ **अत एवेति** । प्रत्यक्षेण क्वचिदुपलब्धमेव क्वचि-त्साधनीयं, न चेदं क्वचित् प्रत्यक्षेणोपलब्धम् अतो न साधनार्हमिति परमते प्रत्यक्षाभावोक्त्या अनुमान-स्याप्यभावो लभ्यत इति सूत्रकृदभिप्रायप्रदर्शनार्थमेव प्राक् क्वचिदित्यनेन दृष्टान्ताभाव उक्तः अन्यथा तदुक्ति-र्व्यर्था स्यादिति भावः ।

**वं०प०**— **अत एवेति** । अनुमानं प्रति प्रत्यक्षस्योपजीव्यत्वादेव असतः सकाशात् सत उत्पत्तेः क्वाप्यदृष्टत्वेन तन्मूलकमनुमानमपि न सम्भवतीत्यर्थः ।

**श्रीनिधि०**— **अनैकान्तिकत्वादिति** । प्रमाणविशेषमन्तरापि प्रमेयस्य सत्त्वेनानैकान्तिकत्वा-दित्यर्थः । **प्रत्यक्षेण क्वचिदुपलब्धमेव हि अनुमानेन क्वचित्साधनीयमिति** । महानसादावुपलब्ध एव हि वह्निः पर्वतादौ क्वचिदनुमीयत इत्यर्थः । यद्यपि क्वचिदनुमितस्यापि क्वचिदनुमितिरस्ति । तथाऽप्यन्ततः प्रत्यक्ष-मेव तत्रानुसरणीयमिति भावः । अनेन साध्यप्रसिद्धिसम्पादकत्वेन प्रत्यक्षस्योपजीव्यत्वमुक्तम् । उपलक्षण-मिदम् । धर्मिलिङ्गादिग्राहकत्वेनापि द्रष्टव्यम् । **अत एव प्रागुक्तमिति** । अनुमानाभावज्ञापनार्थत्वादेवेत्यर्थः ।

**शे०चं०**— ननु प्रमाणं च दृष्टिरेवेत्युत्तरवाक्यमनर्थकम् । न चैतत्प्रत्यक्षस्यानुमानादिकं प्रति मूलत्व-कथनार्थत्वान्नानर्थक्यमिति वाच्यम् । तन्मूलत्वकथनस्यापि प्रकृतोपयोगाभावात् । न च प्रत्यक्षाभावेन तन्मूल-कानुमानादेरभावोपपादनार्थत्वात् तस्योपयोग इति वाच्यम् । अनुमानाद्यभाववर्णनस्याप्यनर्थकत्वात् । न च प्रमाणमात्राभावोपपादनार्थत्वात् तस्यार्थवत्त्वम् । तदभाववर्णनस्यापि प्रकृतोपयोगादर्शनात् । न च जगदसतोः कार्यकारणभावो नास्तीति प्रतिज्ञातार्थोपपादकत्वात् तस्य प्रकृतोपयोग इति वाच्यम् । अदृष्टत्वादिति सौत्रहेतुनैव प्रतिज्ञातार्थसिद्धिसम्भवेन तत्साधकतया प्रमाणाभावस्याननुसरणीयत्वादित्याशङ्क्याऽदृष्टत्वमात्रस्य प्रतिज्ञातार्थ-साधकत्वासम्भवेन प्रमाणाभावस्य तत्साधकतयाऽवश्यमनुसरणीयत्वात् । उक्तप्रनाड्या तदुपपादकत्वात् प्रत्यक्ष-वरत्वकथनस्य नानर्थक्यमित्याशयेन उत्तरग्रन्थं योजयितुं भवेदेतदेवं यद्यदृष्टत्वमात्रस्य प्रतिज्ञातार्थासाधकत्वं प्रमाणाभावस्य च तत्साधकत्वमिति स्यात् । तदेव कथमित्यतस्तदुभयमुपपादयितुं शङ्कामुत्थापयति **स्यादेत-दिति । मा हि भूदिति** । न भवति हीत्यर्थः । **वक्तव्य इति** । तस्य तत्साधकत्वादिति भावः । **कथमिति**। तस्यातत्साधकत्वादिति भावः । कुतस्तस्यासाधकत्वमित्यतः तदुपपादयति **अनैकान्तिकत्वादिति** । धर्मा-धर्मादाविति शेषः । तत्रास्मदादिप्रत्यक्षव्यावृत्तिसत्त्वेऽपि तदभावाभावादिति भावः । नन्वेवमप्यदृष्टत्वादिति सौत्र-हेतोर्न व्यभिचारपरिहार इत्याशङ्क्य तस्य प्रमेयाभावसाधकतयाऽभिमतहेत्वन्तरोपपादकत्वेन स्वातन्त्र्येण प्रमेया-भावासाधकत्वान्न व्यभिचार इत्यभिप्रेत्य प्रमाणं चेत्यादिभाष्याभिप्रायमाह **अयमिहाभिसन्धिरिति** ॥ **उक्तदोष इति** । अनैकान्त्यरूप इत्यर्थः । इतीत्यस्येत्ययमिति सम्बन्धः ।

**उपजीव्यत्वादिति** । अनेन मूले वरशब्द उपजीव्यत्वार्थकोऽखिलादित्यस्य विभक्तिविपरिणामेनानु-वृत्त्यर्थ इति सूचितमिति ज्ञातव्यम् । उपजीव्यतामेवोपपादयति **प्रत्यक्षेण हीति** । अन्यथा अप्रसिद्धविशेषण-त्वापातादिति भावः ॥ **अत एवेति** । प्रत्यक्षेण क्वचिदुपलब्धमेव ह्यनुमानेन क्वचित्साधनीयम् । न चेदं क्वचित् प्रत्यक्षेणोपलब्धं अतो न साधनार्हमिति परमते प्रत्यक्षाभावोक्तिमात्रेणानुमानस्याप्यभावो लभ्यत इति सूत्रकृ-दभिप्रायदर्शनार्थमेव प्राक् क्वचिदित्यनेन दृष्टान्ताभाव उक्तः । अन्यथा तदुक्तिर्व्यर्था स्यादिति भावः ।

**वा०र०**— माङ्योगे लुङः सर्वलकारापवादकतया लुङ् लडर्थ इत्याशयेनाह **न भवति हीत्यर्थ इति । तत्साधकत्वादितीति** । प्रमेयाभावसाधकत्वादित्यर्थः । प्रमेयाभावसाधकत्वमतत्साधकत्वम् । मूले अयमिहाभिसन्धिः इत्येव प्रायिकः पाठः इति भावेन तथैव प्रतीकोपादानम् **अयमिहाभिसन्धिरितीति** । मूले शङ्कान्तरनिरासायापि प्रमाणं चेति इत्यवतारितमिति ज्ञेयम् ।

**वि०ठ०**— कथमनेनोक्तानैकान्तिकतापरिहार इत्यतः प्रधानप्रतिज्ञायां हेतुत्वेनादृष्टत्वादित्येतन्नोच्यते, येन प्रत्यक्षेणादृष्टत्वेऽपि मानान्तरेण सिद्धसम्भवादनैकान्तिकता स्यात् । सविशेष एव प्रमाणप्रवृत्तेः । अत एव निर्विशेषस्य गगनकुसुमादेरप्रामाणिकत्वादसत्त्वमिति भावः । किन्तु प्रमाणमात्राभाव एव तत्र हेतुः । तत्र प्रमाणेषु प्रत्यक्षस्य प्राधान्यादादौ तदभावोक्तिरित्यत आह **अयमभिसन्धिरिति** । ननु प्रमाणमात्राभावस्य हेतुत्वे सूत्रे

अदृष्टत्वादिति प्रत्यक्षाभावो तदनुमानागमाभावोऽपि वक्तव्य इत्याशङ्कायाः कः परिहार इत्यतो न बौद्धं प्रत्यागमः स्वतःसिद्ध इति बहिरेवोक्तादृष्टरूपं प्रमाणं च अखिलादित्यस्य विभक्तिविपरिणामेन अखिलस्यानुमानस्य वरं प्रधानमुपजीव्यमिति यावदिति मूलार्थमभिप्रेत्य अदृष्टत्वादित्यनेनैवानुमानाद्यभावोऽप्युक्तप्राय इत्याह **अयमाशय इति** । **अत एवेति** । प्रत्यक्षेण महानसादौ उपलब्धमेवाग्न्यादिकं क्वचित्पर्वतादौ साधनीयम् । न चेदमसतः कारणत्वं क्वचित्प्रत्यक्षेणोपलब्धं अतो न साधनार्हमिति परमते प्रत्यक्षाभावोक्त्यानुमानस्याप्यभावो लब्ध इति सूत्रकृदभिप्रायदर्शनार्थमेव प्रागसतः सकाशात् सतो जनिः क्वचिन्न हि दृष्टेति दृष्टान्ताभावो उक्तः, अन्यथा तदुक्तिर्व्यर्था स्यादिति भावः ।

चषकः— **मा हि भूदिति** । माङि लुङः सर्वलकारापवादकतया लङर्थे लुङिति न हि भवतीत्यर्थः ।

**॥ इति तत्र प्रत्यक्षागमाभावयोः सङ्ग्राहकतया अदृष्टत्वस्योपयोगे अभिसन्धिप्रदर्शनम् ॥**

**॥ इति (ऐतदधिकरणीयप्रथमसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे प्रत्यक्षागमरूपप्रमाणाभावः ॥**

* * *

**॥ अथ (ऐतदधिकरणीयद्वितीयसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अनुमानरूपप्रमाणाभावः ॥**

**॥ अथ तत्र सामान्यतोदृष्टानुमानानां तर्कप्रतिघातः ॥**

**॥ अथ तत्रापि एतत्सूत्रस्य त्रेधा व्याख्यानम् ॥**

**॥ अथ तत्रादौ एतत्सूत्रस्य प्रथमं व्याख्यानम् ॥**

९ सु०— 'मा भूच्छून्याज्जगदुत्पत्तौ प्रत्यक्षं प्रमाणम्, मा च भूदागमः, तथाऽप्यनुमानं भविष्यति; असतः सदुत्पत्तौ प्रत्यक्षाभावेन दृष्टानुमानानुपपत्तावपि सामान्यतो दृष्टस्योपपत्तेः । कारणस्य हि सत्त्वे निषिद्धेऽसत एव जन्म सेत्स्यती'त्याशङ्क्यानुमानानां तर्कप्रतिघातं वक्तुं सूत्रम् '**ॐ उदासीनानामपि चैवं सिद्धिः ॐ**' इति । तद्व्याचष्टे **यद्येवमिति** ।

## अनु०— यद्येवं ससमरसान्मधुरादिव पीनता ।
## भवेज्जनस्य मार्जारशृङ्गं गोरिव घातकम् ॥

यद्यसत एव यत्किञ्चित्कार्यं जायेत तदा 'मधुरादिव ससमरसाज्जनस्य पीनता स्यात्', 'गोः शृङ्गमिव मार्जारशृङ्गमपि जनस्य घातकं भवेदविशेषादि'त्यनेन एवं सत्यु-

**दासीनानां हेयो(पादेयो)पेक्षणीयबुद्ध्यविषयाणां ससमरसादीनामपि सकाशात् पीनत्वादि-कार्यस्य सिद्धिः प्रसज्येतेति सूत्रं व्याख्यातं भवति ।**

९ **परि०— दृष्टानुमानेति** । क्वचिद्दृष्टस्यान्यत्रानुमानं दृष्टानुमानम् । अनीदृशं सामान्यतो दृष्टानुमानमिति ज्ञेयम् ॥ **सत्त्वे निषिद्ध इति** । स्वप्रकार्यं प्रति यत्कारणं तद्दृष्टान्तेन कारणत्वहेतुना आदिकालीनकारणं सन्नेत्यनुमानेन सत्त्वे निषिद्धे कार्यस्य कारणजन्यत्वनियमात् असत एव जन्म सेत्स्यतीत्यर्थः ।

९ **यादु०—** अस्मदापादितं शून्यस्यासत्त्वमभ्युपेत्य माध्यमिकः प्रत्यवतिष्ठते **मा भूच्छून्यादिति** ॥ **दृष्टानुमानेति** ॥ प्रत्यक्षयोग्यार्थानुमापकस्यैव दृष्टानुमानत्वादिति भावः ॥ **सामान्यतो दृष्टस्येति** । तस्य प्रत्यक्षायोग्यार्थानुमापकरूपत्वादिति भावः । तादृशमनुमानं प्रकृते दर्शयति **कारणस्य हीति** । आदिकार्यं कारणजन्यं कार्यत्वात् घटवदिति साध्यमानस्यादिकार्यकारणस्येत्यर्थः । तत्र प्रसक्तप्रतिषेधं करोति **सत्त्वे निषिद्ध इति** । 'विवादास्पदं कारणं, न सत्, कारणत्वाद्वर्णदैर्घ्यादिवदि'त्यादिहेतुभिरिति शेषः । दण्डादिश्च पक्षतुल्य एवेति न तत्र व्यभिचारः । 'अन्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः । नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः' इत्यादिखण्डनोक्तहेतुभिरिति वा शेषो ज्ञातव्यः । अत एव रूपादिज्ञानं करणसाध्यं क्रियात्वात् छिदिक्रियावदित्यनुमानं प्रसक्तप्रतिषेधसहितमतीन्द्रियार्थानुमापकं सामान्यतो दृष्टतया परैरुदाहृतमिति ज्ञातव्यम् ।

९ **कं०रा०— असतः सदुत्पत्ताविति** । असतः सदुत्पत्तौ प्रत्यक्षाभावेन दृष्टान्ताभावाज्जगदसत्कारणकं भवितुमर्हतीति विशेषानुमानानुपपत्तावपि 'जगत् सकारणं कार्यत्वात् सम्मतवदि'ति सामान्यतो दृष्टस्योप-पत्तेरित्यर्थः । ननु सामान्यतो दृष्टेन जगतः सकारणकत्वमात्रं सिद्ध्यति न त्वसतः सकाशाज्जन्मेत्यत आह **कारणस्येति** । कार्यस्येव कारणस्यापि सत्त्वे सत्त्वाविशेषादिदं कार्यमिदं कारणमिति व्यवस्थानुपपत्तिरित्यादि-युक्त्या कारणस्य सत्त्वे निषिद्धे जगत्सकारणकं कार्यत्वादिति सामान्यतो दृष्टेनैव असतः सकाशाज्जगतो जन्म सेत्स्यतीति भावः । **एवं सतीति** । असतः सकाशात् कार्योत्पत्त्यनङ्गीकार इत्यर्थः ।

९ **श्रीनिधि०—** नन्वनुमानं भविष्यतीत्ययुक्तं, साध्यप्रसिद्धेः सम्पादयितुमशक्यत्वादिति चेन्न । अनुमानं द्विविधम् । दृष्टं सामान्यतो दृष्टञ्चेति । तत्र प्रत्यक्षयोग्यार्थं दृष्टम् । तदयोग्यार्थं सामान्यतो दृष्टमिति । तत्राद्यस्यासम्भवेऽपि द्वितीयं भविष्यतीति भावेन अनुमानं भविष्यतीति शङ्कितम् । तदेतदाह **असतः सदु-त्पत्तावित्यादिना** । सामान्यतो दृष्टमुपपादयति **कारणस्य हीति** । सत्कारणं न विक्रियाशून्यादित्यनुमाने-नेत्यर्थः । साधकस्य यस्य यद्रूपावच्छिन्नत्वे स्वोचितसाधकत्वं बाधितं तस्य तद्रूपविपरीतावच्छिन्नस्यैव तत्साधकत्वम् । यथा वह्निकार्यस्य धूमत्वराहित्यावच्छिन्नस्य तद्रूपविपरीतधूमत्वावच्छिन्नस्यैव तथात्वमिति व्याप्त्याऽसतो जन्म सेत्स्यतीत्यर्थः ।

९ शे०चं०— **दृष्टानुमानेति** । प्रत्यक्षयोग्यार्थानुमापकस्यैव दृष्टानुमानत्वादिति भावः ॥ **सामान्यतो दृष्टस्येति** । प्रत्यक्षायोग्यार्थानुमापकत्वरूपत्वात् तस्येति भावः । किं तत्सामान्यतो दृष्टानुमानमित्यतः सामान्यसिद्धिपरिशेषरूपमेवेत्यभिप्रेत्य तद्दर्शयति **कारणस्य हीति** । 'आदिकार्यं सकारणकं कार्यत्वात् घटवत्' इति साध्यमानस्यादिकार्यकारणस्येत्यर्थः । परिशेषं दर्शयति **सत्त्वे निषिद्ध इति** । 'विवादपदं कारणं न सत् कारणत्वात् वर्णदैर्घ्यादिवदि'त्यादिहेतुभिरिति शेषः । दण्डादिश्च पक्षतुल्य एवेति न तत्र व्यभिचारः । 'अन्तर्भावितसत्त्वं चेत्कारणं तदसत् ततः । नान्तर्भावितसत्त्वं चेत् कारणं तदसत् ततः' इति खण्डनोक्तहेतुभिरिति वा शेषो ज्ञातव्यः । सामान्यसिद्धिपरिशेषयोरपि सामान्यतो दृष्टत्वं परेषामपि सम्मतम् । रूपाद्युपलब्धिः सकरणिका क्रियात्वादिति सामान्यसिद्धेः प्रसक्तप्रतिषेधसहिताया अतीन्द्रियार्थानुमापकतया सामान्यतो दृष्टतायाः परैरङ्गीकृतत्वादित्यवधेयम् । यद्वा आदिकार्यं सकारणकं कार्यत्वात् घटवदिति सामान्यतो दृष्टस्येत्यर्थः । अस्य च नित्यातीन्द्रियार्थानुमापकत्वात् रूपादिज्ञानं सकारणं कार्यत्वात् छिदिक्रियावदित्यादिनित्यातीन्द्रियार्थसाधकानुमानवत् सामान्यतो दृष्टत्वम् । अथवा यथा कार्यत्वस्य सामान्यस्य कुठारादिनिष्ठकारणत्वसामान्यावलम्बनेनैव चक्षुराद्यनुमापकत्वं, न तु चक्षुराद्याकारेणेति भवति सामान्यतो दृष्टत्वं तथैव कार्यत्वस्य सामान्यस्य मृदादिकारणनिष्ठकारणत्वसामान्यावलम्बनेनैव शून्यानुमापकत्वं न तु शून्याकारेणेति भवति सामान्यतो दृष्टत्वमिति ज्ञेयम् । ननु चास्य सामान्यतो दृष्टस्य सकारणकत्वमात्रसाधकत्वेऽप्यसत्कारणकत्वसाधकत्वाभावात् कथं तत्र प्रमाणत्वं इत्यतो यथा सकारणकत्वसाधकस्य कार्यत्वस्य केवलस्य चक्षुरादिकरणकत्वसाधकत्वाभावेऽपि प्रसक्तप्रतिषेधसहकृतस्य तस्य चक्षुरादिकरणकत्वसाधकत्वं, तथा कार्यत्वस्यापि केवलस्यासत्कारणकत्वासाधकत्वेऽपि प्रसक्तप्रतिषेधसहकृतस्य अस्य तत्साधकत्वान्नानुपपत्तिरिति भावेन प्रसक्तप्रतिषेधमुपदर्शयति **कारणस्य हि सत्त्वे निषिद्ध इति** । कारणस्य हि सत्त्वमसत्त्वं वा वाच्यम् । तृतीयप्रकाराभावात् । तत्र च बाध्यतया कारणस्य सत्त्वे निषिद्धेऽसत्त्वसिद्ध्या असत्कारणकत्वसिद्धिरिति । यद्वा प्रसक्तयोः सत्त्वासत्त्वयोर्मध्ये 'अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः । नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः' इति खण्डनोक्तवक्ष्यमाणहेतुभिः सत्त्वे प्रतिषिद्धेऽन्यत्राप्रसङ्गादसत्त्वप्राप्त्या तत्सहकृतसामान्यतो दृष्टेन असत्कारणत्वसिद्धिरिति भावः ॥ **असत एवेति** । यद्यपि शून्यस्यासत्त्वं न तत्सिद्धान्तः, तथाऽपि निर्विशेषत्वबललब्धाप्रामाणिकत्वसिद्धासत्त्वाभ्युपगमेनेयं शङ्केति भावः ।

**यद्यप्यसत एवेति** । अत्र यद्यसतः किञ्चिदुत्पद्येत तर्हि सप्तमरसाज्जनस्य पीनता स्यादित्येवापादनशरीरमभिमतं, न तु मधुरादिवदित्यपि तदन्तर्गतं, वैयर्थ्यात् । किन्तु यत्किञ्चित्कार्यकारित्वमनापाद्य पीनत्वकारित्वापादने को हेतुरित्यतस्तस्यैव स्वोचितत्वाद्युक्तं तदापादनमिति भावेनोक्तं **मधुरादिवदिति** । मधुरादिरसस्य पीनत्वकारित्वेनास्यापि रसत्वाविशेषात् पीनत्वापादकत्वमावश्यकमिति भावः । एतच्च चित्ररसो नास्तीति प्राचां मतमाश्रित्योक्तम् । चित्ररूपवच्चित्ररसोऽप्यस्तीति मते त्वष्टमरसाज्जनस्य पीनता स्यादित्यापादनं द्रष्टव्यम् । प्रसङ्गमूलभूतव्याप्तिवैकल्यात् प्रसङ्गद्वयस्याभासत्वमाशङ्क्य दृष्टान्ताभावेन विशेषव्याप्त्यभावेऽप्यविशेषलक्षणसामान्यव्याप्तिसद्भावान्न तस्याभासत्वमित्याशयेनोक्तम् **अविशेषादिति** । सौत्रोदासीनशब्दव्याख्यानरूप-

भाष्यस्थं हेयोपादेयबुद्धिवर्जितानामिति हेतुगर्भं विशेषणमयुक्तम्, तद्वर्जितानामपि तन्त्वादीनां हेतुत्वदर्शनादित्याशङ्क्य तद्बुद्धिविषयतावर्जितत्वं भाष्ये विवक्षितम् । तन्त्वादयश्च तद्बुद्धिविषया एवेति न दोष इत्याशयेनोक्तं **हेयोपादेयोपेक्षणीयबुद्ध्यविषयाणामिति** ।

९ वा०२०— **सामान्यसिद्धिपरिशेषरूपमेवेति** । अत्र व्याप्यव्यापकयोरन्यादृशत्वेऽपि तत्सामान्याकारानुगमेन साध्यसाधनभाव इति पद्धत्युक्तप्रकारस्य प्रकारान्तरत्वं स्फुटमिति न दोषः । अत एव प्रत्यक्षायोग्येति तत्रोक्तप्रथमलक्षणानुगम एवोक्त इति ज्ञेयम् । **खण्डनोक्तहेतुभिरिति** । अस्यार्थः । अन्तर्भावितसत्त्वं चेत् । यदि कारणं अन्तर्भावितसत्त्वम् । कोऽर्थः कारणकोटौ यदि सत्त्वं निवेश्यत इति सत्त्वविशिष्टस्य कारणत्वमिति यावत् । तर्हि असत्कारणमित्यापातम् । कुतः ततः कारणस्यान्तर्भावितसत्त्वात् । न चान्तर्भावितसत्त्वे कथं कारणस्यासत्त्वमिति वाच्यम् । स्वविशिष्टस्वस्याभावात् । कुतः । स्वविशिष्टे स्ववृत्तिः अंशतः स्ववृत्तिमापादयतीत्यात्माश्रयात् । न च विशिष्टं पदार्थान्तरमिति वाच्यम् । तथापि स्वस्मिन् स्ववृत्तिवत् स्वविशिष्टे स्वव्यतिरेकनियमदर्शनात् । तथा च सत्त्वविशिष्टस्य कारणत्वे सत्त्वविशिष्टस्यासत्त्वात् असदेव कारणमित्यायाति । न च स्वरूपसत्त्वानामनन्तत्वात् सत्त्वविशिष्टे सत्त्वं भविष्यतीति वाच्यम् । तर्हि तैरेव सद्व्यवहारोपपत्तौ सत्तैव नाङ्गीक्रियेत इति वृद्धिमिच्छतो मूलहान्यापत्तेः । अथानुगमार्थं सत्ताभ्युपगम इति न वाच्यम् । सत्तां विनापि अभावादौ स्वरूपसत्त्वैरेवानुगमदर्शनादिति । तथा च स्वरूपसत्त्वाङ्गीकारो न युक्त इति । अथ नान्तर्भावितसत्त्वं तदपि सत्तामनन्तर्भाव्यकारणसत्त्वं कारणकोटौ न निवेशयिष्यते । सत्त्वाविशिष्टमेव कारणमिति यावत् । तत् तर्हि असदपि तथास्तु । कुतः । सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाविशेषात् । तथा च असतः कारणत्वमापातम् । ननु कारणत्वस्य सत्त्वनियतत्वात् कथं असतः कारणत्वं नियतपूर्वसत्त्वस्यैव कारणत्वादिति चेत् । न द्वित्रिचतुरकक्ष्यास्वबाधितत्वसत्त्वबुद्ध्यैव कारणत्वोपपत्तेः इति न्यायामृतकण्टकोद्धारे कृतोऽवसेयः । एतच्च विद्यासागर्याद्यनुसारेण शोध्यमस्ति । खण्डनतट्टीकयोर्मेलनात् । प्रत्यक्षयोग्यानुमापकं दृष्टमित्यादि पद्धत्याद्यनुसारेणाह **प्रत्यक्षयोग्येत्यादि** । ............अनुसारेणाह **सामान्यसिद्धिपरिशेषयोरपीति** । ..... **यद्वेति** । अथवा यथाभूतयोः व्याप्यव्यापकभावः तथाभूतयोरेव साध्यसाधनभावे दृष्टम् । व्याप्यव्यापकयोरन्यादृशत्वेऽपि तत्सामान्याकारानुगमेन साधने सामान्यतो दृष्टमिति पद्धत्यादिगतलक्षणानुसारेणाह **अथवेति** । पद्धतिवाक्यव्याख्यानं अस्माभिः कृतमस्ति । तदप्यनुगुणं योज्यम् । **अथवेति** ....... । .........आह **ननु चेति** । .......... **यद्वेति** । ....... आह **यद्यपीति** । **वक्ष्यमाणेति** । एतादृशस्य वक्ताराविति भाष्यमूल इति शेषः । **चित्ररूपवच्चित्ररसोऽप्यस्तीति मते त्विति** । एतत्समर्थनप्रकारः पदार्थचन्द्रिकायां तद्व्याख्यानादौ च चित्ररूपप्रतिबन्द्या कृतो ध्येयः । अत एव षड्रसा हरीतकीति वदन्ति । शृङ्गपदं बुद्ध्या विवेकेन गोरित्यनेनापि सम्बध्यत इति भावेन गोः शृङ्गमिवेति मूलेऽभिहितम् । **इत्याशङ्क्येति** । उपलक्षणं चैतत् । भाष्ये उपलक्षणीयानुक्तिरयुक्तेत्याशङ्क्येत्यपि ध्येयम् । इत्याशयेन इत्यत्रापि उपलक्ष्यार्थमात्रप्रदर्शनं भाष्ये सूत्रोक्तोदासीनरूपोपेक्षणीयमपि ग्राह्यमित्याशयेनेत्यपि ध्येयम् ।

९ **स०व्र०— कारणस्य हि सत्त्वे निषिद्धे इति** । कार्यत्वेन सकारणकत्वे सिद्धे त्वद्रीत्या सत्कारणत्वं वाच्यम् । मद्रीत्या शून्यकारणत्वं वा तृतीयप्रकाराभावात् । तत्र बाध्यत्वेन सत्कारणत्वे निषिद्धे शून्यकारणकत्वमेव सिद्ध्यतीति भावः ।

९ **विट्ठ०—** अस्माभिरापादितं शून्यस्यासत्त्वमभ्युपगत्यानुमानाभावोऽसिद्ध इति शङ्कते **मा भूच्छून्यादिति । दृष्टानुमानेति** । यथाभूतयोर्व्याप्यव्यापकभावोऽन्यत्र दृष्टस्तथाभूतयोरेव साध्यसाधनभावेनार्थानुमापकत्वे दृष्टानुमानं स्यात् । तच्च दृष्टान्ताभावेनानुपपत्तावपीत्यर्थः । **सामान्यतो दृष्टस्येति** । तत्कार्यं तत्सहकारिणमिति सामान्यतो दृष्टव्याप्तिकानुमानस्येत्यर्थः । प्रकृतसाध्यसिद्धिः सामान्यसिद्धिपरिशेषाभ्यामेवेति सामान्यतो दृष्टत्वमस्यानुमानस्येत्याशयेन तद्दर्शयति **कारणस्येति** । प्रपञ्चस्य कार्यत्वेन सह कारणकत्वेऽनुमिते तच्च कारणं सन्न भवति । कारणत्वाद्वर्णदैर्घ्यादिवदिति सत्त्वे प्रतिषिद्ध इत्यर्थः । यद्येवमिति श्लोके कारणतया प्रमितानां मधुराक्षरादीनां कारणतावदत्यन्तासतामपि कारणत्वमापद्यते, कार्यार्थीत्यत्र तु घटादिकार्यचिकीर्षावतः कुविन्दादेः कार्यपर्यवसानाय तन्त्वादिस्वीकारोपपत्तिरापाद्यत इति स्फुटो भेद इत्यवगन्तव्यम् ।

**।। इति एतत्सूत्रस्य प्रथमं व्याख्यानम् ।।**

* * *

**।। अथ तत्र एतत्सूत्रस्य द्वितीयं व्याख्यानम् ।।**

१० **सु०—** प्रकारान्तरेण व्याख्याति **कार्यार्थीति** ।

## अनु०— कार्यार्थी कारणं सच्च नोपादद्यात्कथञ्चन ।

**यद्यसत एव कार्यमुत्पद्यते तदा पटादिकार्यार्थी कुविन्दादिः सत् तन्त्वादिकारणं सर्वथा नोपाददीत । असत एव पटाद्युत्पत्तेः ।**

**अतिप्रसङ्गान्तरमाह नेति ।**

## न प्रवर्तेत चेष्टाय शून्यादेवेष्टसम्भवात् ।

**न केवलमसतः कार्योत्पत्तौ सत्कारणोपादानानुपपत्तिः, किन्त्विष्टाय पटाद्युत्पादाय न प्रवर्तेत, न प्रयतेत च । कुतः । शून्यादेवेष्टसम्भवात् ।**

**एतेन तन्त्वाद्युपादानादु(द्यु)दासीनानां** चिकीर्षादिरहितानां **च पुंसां पटादिसिद्धिः स्यादिति सूत्रं** व्याख्यातं भवति ।

**परि०**— चशब्दार्थमाह **न केवलमिति** । न प्रवर्तेतेत्यनुवादः । चशब्दान्वयेनार्थमाह **न प्रयतेत चेति** ॥ **एतेनेति** । कार्यार्थी न प्रवर्तेतेति चोक्तातिप्रसङ्गद्वयपरेण ग्रन्थेनेत्यर्थः । **उदासीनानां** उद्गत्यासीनानामित्यर्थः । प्रयत्ने उदासीना(नाञ्चेति)नामिति वक्तव्यम् । स्पष्टत्वादयं तदर्थानुवादः **चिकीर्षादिरहितानां चेति** ।

**यादु०**— **पटादिकार्यार्थीति** । पटादिचिकीर्षावानित्यर्थः । तथा च पटादिचिकीर्षावान्न स्यात् स तन्त्वाद्युपादानवांश्च न स्यादिति आपादनद्वयमत्र विवक्षितम् । अत एव वक्ष्यति **चिकीर्षादिरहितानामिति** ।

**वं०प०**— **उपादानात्** स्वीकारात् । **आदिपदेन** प्रयत्नः ।

**श्रीनिधि०**— **न प्रवर्तेत चेष्टायेत्यत्रत्य**चशब्दार्थमाह **न केवलमसतः कार्योत्पत्तावित्यादिना** । उक्तातिप्रसङ्गद्वयानुसारेण सूत्रार्थमाह **एतेनेति** । **चिकीर्षादिरहितानां चेति** । द्वितीयातिप्रसङ्गानुसारेणेति द्रष्टव्यम् ।

**शे०चं०**— आद्यमतिप्रसङ्गमभिसन्धायाह **तन्त्वाद्युपादानादुदासीनानामिति** । द्वितीयमतिप्रसङ्गमभिसन्धायाह **चिकीर्षादिरहितानामिति** ।

**वा०र०**— **आद्यमतिप्रसङ्गमिति** । कार्यार्थी कारणमित्यतिप्रसङ्गमित्यर्थः । **द्वितीयमिति** । न प्रवर्तेत न प्रयतेत चेति द्वितीयमित्यर्थः । कार्यार्थीत्याद्यतिप्रसङ्गद्वयस्य समुच्चयकथनपरेण न केवलमित्यनेन मूलेन मिलित्वा अतिप्रसङ्गद्वयं एकः सर्वत्रार्थ इति सूचयति । अत एव तथैव सूत्रार्थं कथयिष्यतीति ध्येयम् ।

**॥ इति एतत्सूत्रस्य द्वितीयं व्याख्यानम् ॥**

* * *

**॥ अथ तत्रान्ते एतत्सूत्रस्य तृतीयं व्याख्यानम् ॥**

११ **सु०— प्रकारान्तरेण व्याख्याति देशेति ।**

## अनु०— देशकालादिनियमो न हि शून्यात्सतो भवेत् ।

**शून्यात्सतः** शून्यादेव भवतः कार्यस्य, देशकालवयोवस्थानियमो **न भवेत्**। तथा हि। यदि जगच्छून्यादेव भवेत् तदा 'गोधूमाः कृष्णभूमौ सम्पद्यन्ते, न पाण्डुभूमौ', 'वसन्ते किंशुकाः पुष्पिता भवन्ति, न वर्षासु', 'त्रिहायण्येव गौर्गर्भं धत्ते, नान्यथा', 'सतुषा एव व्रीहयोऽङ्कुरानुत्पादयन्ति, नेतरथे'त्यादिदेशकालादिनियमः कार्योत्पत्तौ न स्यात्, शून्यस्य सर्वत्राविशिष्टत्वात्।

अनेन '**उदासीनानां** देशकालादिनियमानपेक्षाणाम् **अपि कार्याणां सिद्धिः** उत्पत्तिः स्यादि'ति सूत्रं व्याख्यातं भवति। शून्यादेव कार्योत्पत्तौ कर्त्रुपादाननिमित्तापेक्षा न स्यात् इति समुदायार्थः।

**परि०**— उक्तप्रसङ्गचतुष्टयस्य निष्कृष्यार्थमाह **कर्त्रुपादाननिमित्तेति**। अतिप्रसङ्गद्वय-तात्पर्यं **निमित्तापेक्षा न स्यादिति**। चिकीर्षादिर्निमित्तत्वात्।

**कं०रा०**— **त्रिहायणीति**। त्रयो हायना यस्याः सेति बहुव्रीहिसमासे 'दामहायनान्ताच्चे'ति टापि 'त्रिचतुर्भ्यां हायनस्ये'ति णत्वे च त्रिहायणीति रूपं निष्पन्नमिति ध्येयम्।

**श्रीनिधि०**— उक्तस्य देशादिनियमचतुष्टयस्य क्रमेणोदाहरणं **गोधूमाः इत्यादि**। ननु 'कार्यार्थी' इत्याद्ययुक्तम्। शून्यस्य इष्टहेतुत्वेऽपि उपादानत्वेन तन्त्वादेरुपादानोपपत्तेः। 'न प्रवर्तेत चेष्टाये'त्यप्ययुक्तम्। कर्तव्या पारमन्तरा कार्योत्पादानुपपत्तेः। 'देशकालादी'त्यप्ययुक्तम्। देशविशेषादेर्निमित्तत्वेन तन्नियमसम्भ-वात्। न हि शून्यस्यैव उपादानत्वादिकमभिमतम्। येनेदमापादनं सङ्गच्छेत इत्यत आह **समुदायार्थ इति**। 'कार्यार्थी कारणं सच्च नोपादद्यादि'त्यादीत्यर्थः।

**शे०चं०**— देशनियममुदाहरति **तदा गोधूम इति**। कालनियममुदाहरति **वसन्त इति**। वयो नियममुदाहरति **त्रिहायण्येवेति**। अवस्थानियममुदाहरति **सतुषा एवेति**॥ **समुदायार्थ इति**। 'कार्यार्थी कारणं सच्चे'त्यारभ्य 'सतो भवेदि'त्यन्तस्य ग्रन्थसन्दर्भस्य तात्पर्यार्थ इत्यर्थः।

**वा०र०**— **त्रिहायण्येवेतीति**। त्रीणि हायनानि वर्षाणि यस्याः इति त्रिहायणी।

**विठ्ठ०**— **कर्त्रुपादानेति**। द्वितीयतृतीयातिप्रसङ्गलब्धार्थकथनं कर्त्रपेक्षा न स्यादिति। **उदासी-नेति**। कारणान्तरस्याप्युपलक्षणं एतदाद्यतिप्रसङ्गार्थकथनं अन्तिमप्रसङ्गतात्पर्यकथनं निमित्तापेक्षा न स्यादितीति विवेकः।

चषकः— पुष्पिता इति । सञ्जातपुष्पा इत्यर्थः, 'तदस्य सञ्जातं तारकादिभ्य इतजि'ति स्मृतेः । त्रिहायणीति । बहुव्रीहिः । त्रिचतुर्भ्यां हायनस्य णत्वमिति वचनाण्णत्वम् ।

**॥ इति एतत्सूत्रस्य तृतीयं व्याख्यानम् ॥**

**॥ इति एतत्सूत्रस्य त्रेधा व्याख्यानम् ॥**

**॥ इति तत्र सामान्यतोदृष्टानुमानानां तर्कप्रतिघातः ॥**

**॥ इति (एतदधिकरणीयद्वितीयसूत्रव्याख्यानम्) असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अनुमानरूपप्रमाणाभावः ॥**

**॥ इति असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः सर्वदात्वे अप्रामाणिकत्वरूपातिप्रसङ्गदर्शनम् (तत्रैतदधिकरणीयादिमसूत्रद्वयव्याख्यानम्) ॥**

* * *

**॥ अथ तत्र असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः आदिकालीनत्वमात्रत्वेऽप्यतिप्रसङ्गदर्शनम् ॥**

१२ **सु०—** नन्वादिसृष्टावेव शून्यात्कार्योत्पादं ब्रूमो न सर्वदा, अन्यदा तु कर्त्रादिकारणगणादेव, अतो नातिप्रसङ्गः; इत्यत आह **पुरुषेति** ।

**अनु०—** पुरुषेच्छानुसारेण यदि किञ्चित्प्रजायते ।
किन्नानुमीयते तद्वद्वस्तुत्वात्पुरुषोद्भवः ।
सर्वस्यापि

**किञ्चित्** इति अधुनातनं कार्यम् । **वस्तुत्वात्** कार्यत्वात् । **सर्वस्यापीति** । आदिकालीनस्यापि कार्यस्येत्यर्थः ।

अनेन '**ना** पुरुषः, **सतः** आदिकालीनस्य कार्यस्य, कर्ताऽनुमातव्यः । कुतः । **दृष्टत्वात्** अधुनातनानां कार्याणां पुरुषकर्तृत्वस्य निश्चितत्वादि'ति प्रथमसूत्रं प्रकारान्तरेण व्याख्यातं भवति । सूत्रभाष्ययोः पुरुषग्रहणं तु उपादानाद्युपलक्षणम् ।

**परि०—** **प्रथमसूत्रमिति** । 'नासतोदृष्टत्वादि'ति सूत्रमित्यर्थः ।

**वं०प०—** यद्वस्तु तत्पुरुषेच्छाधीनोत्पत्तिकमित्ययुक्तम् । शून्ये मद्रीत्या व्यभिचारादित्यत आह **कार्यत्वादिति** ।

**कं०रा०**— वस्तुत्वं नित्ये पुरुषोद्भवत्वं व्यभिचरतीत्यत आह **वस्तुत्वादिति** । सर्वपक्षीकारेण पुरुष-कर्तृकत्वानुमानेऽधुनातनकार्ये अंशतः सिद्धसाधनं नित्ये अंशतो बाधश्च स्यादित्यतो व्याचष्टे **सर्वस्यापीतीति** । **अनेनेति** । 'पुरुषेच्छानुसारेण यदि किञ्चित्प्रजायते । किं नानुमीयते तद्वद्वस्तुत्वात्पुरुषोद्भवः । सर्वस्यापी'त्यनेन ना सतो दृष्टत्वादिति प्रथमसूत्रं ना पुरुषः सत आदिकालीनस्य कार्यस्य कर्ता अनुमातव्यः । कुतः दृष्टत्वात्, अधुनातनकार्येषु पुरुषकर्तृकत्वस्य निश्चितत्वादिति प्रकारान्तरेण व्याख्यातं भवतीत्यर्थः ।

**श्रीनिधि०**— **सूत्रभाष्ययोरिति** । (तच्च) सूत्रे पुरुषग्रहणं नृपदेनेति द्रष्टव्यम् ।

**शे०चं०**— वस्तुत्वस्य परीत्या शून्ये व्यभिचरितत्वादहेतुत्वमित्यतोऽनूद्य व्याचष्टे **वस्तुत्वात्कार्यत्वादिति** । अधुनातनकार्यांशे सिद्धसाधनताप्रसङ्गादाह **आदिकालीनस्येति** ॥ **प्रकारान्तरेणेति** । 'नासतो जगतो भावो न हि दृष्टाऽसतो जनिः । सतः क्वचिदि'ति प्राचीनव्याख्यानापेक्षया प्रकारान्तरेणेत्यर्थः । ननु चेदानीन्तनकार्यस्य कर्त्रुपादाननिमित्तेभ्य उत्पत्तौ शङ्कितायां तर्हीदानीन्तनकार्यदृष्टान्तेनादिकार्यस्यापि कार्यत्वात् कर्त्रुपादाननिमित्तवत्त्वस्यानुमानसम्भवात् न तस्य शून्याज्जन्मसिद्धिरित्येव वक्तव्यम् । तत्कथं पुरुषेच्छानुसारेणेति भाष्ये नासत इति सूत्रे चेदानीन्तनकार्यदृष्टान्तेनादिकार्यस्य सकर्तृकत्वमात्रसाधनमित्यतः सूत्रभाष्ययोः पुरुषपदस्योपादाननिमित्तोपलक्षणत्वेन कर्त्रुमात्रपरत्वाभावेनादिकार्यस्य कर्त्रुपादाननिमित्तवत्ताया एवोभयत्र साधनान्नानुपपत्तिरित्याह **सूत्रभाष्ययोरिति** ।

**विठ्ठ०**— पुरुषेच्छानुसारेणेत्युक्तमर्थं 'ना सतो दृष्टत्वादि'ति सूत्रार्थतया सौत्रपदविभागतदर्थप्रदर्शनपूर्वकं दर्शयति **ना पुरुष इति** ।

**॥ इति असद्भूताच्छून्यात्सकाशात् जगदुत्पत्तेः आदिकालीनत्वमात्रत्वेऽप्यतिप्रसङ्गदर्शनम् ॥**

* * *

**॥ अथ तत्र उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का तन्निरासश्च ॥**

**॥ अथ तत्रादौ उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का ॥**

**१३ सु०— नन्विदं सर्वमपि स्वव्याहतम् । तथा हि । यदुक्तं 'नासतोऽदृष्टत्वादि'ति तत्सतः कारणत्वेऽपि समानम् । न हि सतः कारणत्वमपि क्वाप्यावयोः सम्मतम् । ननु च 'मधुरादिव', 'गोः शृङ्गमिवे'त्यादिना सतः सृष्टिसंहारकारित्वं निदर्शितम्, मैवम्, सर्वस्यापि जगतोऽसत्त्वेन तदन्तःपातिनो मधुरादेरपि सत्त्वाभावात् ।**

**यश्चायमतिप्रसङ्गः 'असतः कारणत्वे ससमरसादेरपि मधुरादि(वत्) कार्यकारित्वप्रसङ्गः' इति, सोऽपि सतः कारणत्वे तन्त्वादीनां मृदादिकार्यकारित्वप्रसङ्गेन तुल्यः ।**

तथाऽपि कारणत्वमात्रं सतोऽस्तीति चेत् (न), तत्सत्त्वासम्मतेरुक्तत्वात् । न हि सकल-विक्रियातीतस्य कारणत्वं शक्यसम्भावनम् । मधुरादीनां सप्तमरसादीनां चासत्त्वाविशेषेऽपि सद्बुद्धिभावाभावाभ्यां विशेषात् ।

यदपि 'कार्यार्थी'त्यादि । तत्, ईश्वरस्य सर्वकारणत्वे तत एव पटादिसम्भवात् तन्त्वाद्युपादानं न स्यात्, कुविन्दादेरिच्छादिकं च व्यर्थं स्यादिति समानम् ।

एतेन देशकालादीति प्रसङ्गोऽपि समीकृतो वेदितव्यः । यच्च पुरुषेच्छानुसारेणेत्युक्तं (तदपि) तन्महदादिकार्यस्य कुलालादिजन्यतासाधनसमानयोगक्षेममिति ।

**परि०— तथापीति** । मृदादिकार्यकारित्वेऽपीत्यर्थः ॥ **उक्तत्वादिति** । जगतोऽसत्त्वेन तदन्तःपातिन इत्यादिना, पूर्वग्रन्थ इति भावः । नन्वन्यस्य कारणस्य सत्त्वासम्मतावपि सद्रूपं शून्यं कारणमुपेतमस्तीत्यतः शून्यस्य सद्रूपत्वेति कारणत्वं नोपेयत इत्याह **न हीति** । शून्यस्येति योज्यम् । नन्वसत एव कारणत्वे सप्तमरसादपि पीनता स्यादित्युक्तमित्यत आह **मधुरादीनामिति** । न प्रवर्तेतेत्यस्योत्तरं **कुविन्दादेरिति** । ईश्वरस्य सर्वकारणत्व इत्यापादकानुकर्षः । **कुलालादिजन्यतेति** । कुलालादिजन्यवर्तिघटादिजन्यतोपलम्भेन महदादिकं कुलालादिजन्यमिति साधितं यथा बाधितं तथेदमपीत्यर्थः ।

**यादु०— कारणत्वमात्रमिति** । तन्त्वादेर्घटादिकारणत्वाभावेऽपि पटादिकारणत्वमस्त्येवेत्यर्थः । सप्तमरसादेस्तु न क्वापि कारणत्वम् अतो न प्रतिबन्दी युक्तेति भावः ॥ **तत्सत्त्वासम्मतेरिति** । तस्य तन्त्वादिरूपकारणस्य सत्त्वासम्मतेः । 'न हि सतः कारणत्वं क्वाप्यावयोः सम्मतमि'त्यत्रोक्तत्वादित्यर्थः । मन्मते सर्वस्य जगतः सत्त्वाभावे तदन्तःपातिनस्तन्त्वादेरपि न सत्त्वमिति भावः । ननु त्वयेदानीमस्मदापादितं शून्यस्यासत्त्वमङ्गीकृत्यैव प्रत्यवस्थानं कृतं, न वस्तुतस्त्वन्मते शून्यमसत् किन्तु पारमार्थिकसद्रूपं जगत्कारणं च । अतः सतः कारणत्वं क्वापि न सम्मतमिति रिक्तं वच इत्यत आह **न हि सकलेति** । तथा च यत्पारमार्थिकं शून्यं न तत्कारणं, यच्च संवृत्यवच्छिन्नं कारणं न तत्पारमार्थिकम् अतः सतः कारणत्वं न मम क्वापि सम्मतमिति भावः ।

**वं०प०— समीकृत इति** । ईश्वरस्य सर्वकारणत्वे तत एव गोधूमाद्युत्पत्तौ सम्भवत्यां देशादिनियमो व्यर्थ इत्यर्थः ।

**कं०रा०— मधुरादिवेति** । मधुरादिव पीनतेति मधुररसस्य पीनत्वोत्पादकत्वोक्त्या सतः सृष्टि-कारणत्वं निदर्शितं गोः शृङ्गमिव घातकमित्युक्त्या सतः संहारकारणत्वं च निदर्शितम् । अतः सतः कारणत्व-मपि क्वाप्यावयोर्न सम्मतमिति कथमुक्तमिति भावः । **तत्सत्त्वासम्मतेरिति** । जगदन्तःपातितन्त्वादिसत्त्वा-सम्मतेरुक्तप्रायत्वादित्यर्थः । ननु सतः शून्यस्य कारणत्वं त्वयाऽङ्गीकृतम् अतः कथं सतः कारणत्वमपि क्वाप्यावयोर्न सम्मतमित्युक्तमित्यत आह **नहीति** । सकलविक्रियारहितस्य शून्यस्य वास्तवं कारणत्वं न हि सम्भावयितुं शक्यम् अतस्त्वदभिमतं धर्मिसमसत्त्वं सतः कारणत्वं क्वाप्यसम्मतमिति भावः । यदुक्तं जगदन्तः-पातिनो मधुरादेरपि सत्त्वाभावादिति तदयुक्तं, तथात्वे मधुरादीनां सप्तमरसादीनां चासत्त्वाविशेषेण कार्यकारित्व-तदभावव्यवस्थाऽनुपपत्तेरित्यत आह **मधुरादीनामिति** । मधुरादीनां सप्तमरसादीनां चासत्त्वाविशेषेऽपि सद्बुद्धि-विषयत्वभावाभावाभ्यां विशेषात् कार्यकारित्वतदभावव्यवस्थोपपन्नेति भावः । **इति समानमिति** । इत्यनेन समानमित्यर्थः । **एतेनेति** । शून्यस्य कारणत्वपक्षे 'कार्यार्थिकारणं सच्च नोपादद्यात् कथञ्चने'त्यादिनोक्तप्रसङ्ग-स्येश्वरस्य सर्वकारणत्वेन तत एव पटादिसम्भवात् तन्त्वाद्युपादानं न स्यादित्यादिप्रसङ्गसमीकरणेन 'देशकालादि-नियमो न हि शून्यात् सतो भवेदि'ति योऽयं शून्यस्य सर्वकारणत्वे प्रसङ्गोऽभिहितः सोऽपीश्वरस्य सर्वकारणत्वे तस्य सर्वत्राविशिष्टत्वाद्गोधूमाः कृष्णभूमौ सम्पद्यन्ते । वसन्ते किंशुकाः पुष्पिता भवन्तीत्यादिरूपो देशकालादि-नियमो न स्यादिति प्रसङ्गेन समीकृतो वेदितव्य इत्यर्थः ।

**श्रीनिधि०— ननु मधुरादिव गोः शृङ्गमिवेत्यादिना, सतः सृष्टिसंहारकारित्वं निदर्शितमिति** । मधुरादिवेत्यनेन विपक्षेऽतिप्रसङ्गकथनेन सतः सृष्टिकारित्वं निदर्शितम् । गोरित्यनेन संहारकारित्वमिति द्रष्ट-व्यम् । **मधुरादेरिति** । **आदि**पदेन गोः शृङ्गमुच्यते । **कारणत्वमात्रमिति** । **मात्र**पदेन पटादेरेवेति नियमं व्यावर्तयति **तत्सत्त्वासम्मतेरिति** । **तस्य** तन्त्वादिकारणस्य । ननु त्वया शून्यस्य सत्त्वमङ्गीकृतं कारणत्वं च । तथा च न हि सतः कारणत्वं क्वाप्यावयोः सम्मतमित्ययुक्तमित्यत आह **न हि सकलविक्रियारहित-स्येति** । संवृतियोगेनैव तस्य कर्तृत्वं न तु स्वतः । संवृतिविशिष्टं चासदेवेति भावः । **सद्बुद्धिभावाभावाभ्या-मिति** । तद्विषयसत्त्वप्रकारकबुद्धिभावाभावाभ्यामित्यर्थः । **समीकृतः** समानीकृतः ।

**शे०चं०—** ननु सतः कारणत्वे तन्त्वादेरपि मृदादिकार्यकारित्वापादनमनुपपन्नम् । सत्त्वस्य कार्य-कारित्वमात्रप्रयोजकतया सत्त्वे तन्मात्रापादनस्य सङ्गतत्वेऽपि, मृदादिरूपसद्विशेषत्वस्यैव मृदादिकार्यकारित्वे प्रयोजकत्वेन, सत्त्वस्य तद्रूपविशेषप्रयोजकत्वाभावेन तदापादनस्यायोगात् । तन्त्वादेः पटादिरूपकार्यकारित्वेन कार्यकारित्वमात्रापादनस्य चेष्टापादनरूपत्वेनासम्भवात् । अतोऽत्र तादृशापादनोपपत्त्यर्थम् आपादकमप्यन्य-कारणकार्यकारित्वमेव वाच्यम् । ततश्चात्र सतः कारणान्तरकार्यकारित्वे तन्त्वादेरपि मृदादिकार्यकारित्वं स्यादित्येव प्रसङ्गः पर्यवसन्नः । न चासौ युज्यते । विपर्ययपर्यवसानहीनस्य तर्काभासतया तत्पर्यवसानावश्य-म्भावेन प्रकृते तन्त्वादेर्मृदादिकार्यकारित्वं च नास्ति । तस्मात्सतोऽपि कारणान्तरकार्यकारित्वं नास्तीत्येवंरूप-

विपर्ययपर्यवसानेन सतः कारणान्तरकार्यकारित्वाभावप्राप्तावपि स्वोचितकार्यकारित्वमात्रस्यैवापादनेन तत्र विपर्ययपर्यवसानेन असतः कारणत्वमात्राभावप्राप्तेः । ततश्च वैषम्यान्न मृदादिकार्यकारित्वप्रसङ्गतुल्यत्वमित्याशयेन शङ्कते **तथाऽपि कारणत्वमात्रमिति** । उक्ततर्केण असतः कारणताया असत्त्वसिद्धावपि सर्वस्यापि जगतोऽसत्त्वेन तदन्तःपातिनस्तन्त्वादेः सत्त्वासम्मतेर्न सतः कारणत्वसिद्धिरित्याह **तदिति** । तस्य तन्त्वादिरूपकारणस्य सत्त्वासम्मतेः 'न हि सतः कारणत्वं क्वाप्यावयोः सम्मतमि'त्यत्रोक्तत्वादित्यर्थः । ननु सतः कारणत्वासम्मतावपि न किञ्चिन्नियामकमित्याशङ्क्य सतः कारणत्वे विक्रियाप्रसङ्गात् पारमार्थिकत्वहानिप्रसङ्गेन पारमार्थिकत्वस्य कारणत्वविरोधित्वान्न सतः कारणत्वसम्मतिरित्याह **न हीति** । यद्वा कारणत्वस्य सत्त्वविरोधित्वाच्च न सतः कारणत्वं सम्भवतीत्याह **न हीति** । नापीत्यर्थः । क्वचित्तथैव पाठः । नन्वेवं सतः कारणत्वासम्मतौ मधुरादीनां सप्तमरसादीनां चाविशेषादुभयेषां पीनत्वजनकत्वं तदजनकत्वं वा स्यात् । न तु केषाञ्चिज्जनकत्वं केषाञ्चिदजनकत्वमिति वैषम्यमित्यत आह **मधुरादीनामिति** ।

**वा०र०**— अस्तु तर्हि कार्यकारित्वमात्रापादनमेतत् इत्यत आह **कार्यकारित्वमात्रापादनस्य चेति** । कथमिष्टापादनता इत्यत उक्तं **पटादिरूपकार्यकारित्वेनेति** । **असतः कारणत्वमात्राभावप्राप्तेरिति** । उपलक्षणं चैतत् । असतः सत्कारणत्वस्य परेणाङ्गीकारेणापादकसिद्धेः अस्मदीयतर्कस्य अनाभासत्वेऽपि सतः कारणत्वमात्रवादिना अन्यकारणस्य अन्यकारणत्वानङ्गीकारेणापादकासिद्ध्या परकीयतर्कस्याभासत्वं सिद्धमित्यपि बोध्यम् । **सतः कारणतायाः असत्त्वेति** । विपर्ययपर्यवसानाभावेन सतः कारणतायाः अभावस्यासिद्धावपि इत्यर्थः । **न सतः कारणत्वसिद्धिरिति इति** । सतः कारणत्वाभावसिद्धिरितीत्यर्थः । **कारणत्वस्य सत्त्वविरोधित्वाच्चेति** । अनेन सर्वविक्रियातीतत्वं सत्त्वं कारणत्वं च विक्रियावत्त्वमिति विवेकः सूचितो भवति ।

**स०व्र०**— **असतः कारणत्व इति** । अत्र असतः कारणत्वे सप्तमरसादेरपि पटतन्त्वादिरूपकार्यकारित्वप्रसङ्ग इत्येवापादनं विवक्षितम् । तत्र घटादिकार्यकारित्वमनापाद्य पीनत्वरूपकार्यकारित्वापादने को हेतुरित्यतः तस्यैव स्वोचितत्वात् युक्तमापादनमिति भावेन मधुरादिवदित्युक्तम् । मधुरादिरसस्य पीनत्वकारित्वेन अस्यापि रसत्वाविशेषात् पीनत्वापादकत्वमुपपन्नमिति हृदयम् । **सतः कारणत्वे इति** । सतः कारणत्वे तन्त्वादेरपि मृदादिकार्यकारित्वापादनमप्रयोजकम् । सत्त्वस्य कार्यकारित्वमात्रप्रयोजकत्वे सत्त्वे कार्यकारित्वमात्रापादनस्य सङ्गतत्वेऽपि मृदादिरूपसद्विशेषत्वस्यैव घटादिकार्यकारित्वे प्रयोजकत्वेन सत्त्वस्य मृदादिकार्यकारित्वरूपतद्विशेषे प्रयोजकत्वाभावेन अप्रयोजकतया सत्त्वेन तदापादनासम्भवात् । तन्त्वादेः पटादिरूपकार्यकारित्वेन तन्मात्रापादनस्येष्टत्वेनासम्भवात् । तथा च तादृशापादनोपपत्त्यर्थमापादकमप्यन्यकार्यकारित्वमेव वाच्यम् । ततश्च सतः अन्यकार्यकारित्वे तन्त्वादेरपि मृदादिरूपकार्यकारित्वप्रसङ्ग इत्येवापादनस्य कर्तव्यत्वात् । तत्र च विपर्ययपर्यवसानस्यावश्यकत्वादस्य तन्त्वादेर्मृदादिकार्यकारित्वं नास्ति तस्मात् सतोऽपि कारणान्तरकार्यकारित्वं नास्तीत्येवंरूपस्यैव वाच्यत्वात् विपर्ययपर्यवसानेन कारणान्तरकार्यकारित्वाभावप्राप्तावपि

स्वोचितकार्यकारित्वाहानेः कारणत्वमात्रं सतः प्राप्तमेव । असतः कारणत्वे च सप्तमरसादेरपि कार्यकारित्वमात्रस्यैवापादनेन विपर्ययपर्यवसानेन असतः कारणत्वमात्राभावस्य प्राप्तत्वेन वैरूप्यात् कथं समीकरणमिति भावेन शङ्कते **कारणत्वमात्रमिति** । उक्ततर्केण कारणत्वस्य सत्त्वसिद्धावपि सर्वान्तःपातिनः तन्त्वादेः सत्त्वासम्मत्या न सतः कारणत्वसिद्धिरित्यत आह **तदिति** । ननु कारणत्वस्य सत्त्वासम्मतावपि न किमपि मानम् अत्राह **न हीति** । सतः कारणत्वाङ्गीकारे विक्रियापत्त्या पारमार्थिकसत्त्वस्य कारणत्वविरोधित्वान्न सतः कारणत्वसम्मतिरिति भावः । ननु सतः कारणत्वासम्मतौ मधुरादीनां सप्तमरसस्य च रसत्वाविशेषात् पीनत्वकारित्वं स्यादित्युक्तातिप्रसङ्गानिस्तार इत्यत्राह **मधुरादीनामिति** ।

**विठ०— कारणत्वमात्रमिति** । तन्त्वादेर्घटादिकारणत्वाभावेऽपि पटादिकारणत्वमस्तीति न सप्तमरसादिप्रतिबन्दी' तस्य क्वापि कारणाभावादिति भावः । **तत्सत्त्वासम्मतेरिति** । तस्य तन्त्वादिरूपकारणस्यास्मन्मते सत्त्वासम्मतेः । न हि सतः कारणत्वं क्वाप्यावयोः सम्मतमित्यत्रोक्तत्वादित्यर्थः । सर्वस्यापि जगतोऽसत्त्वेन तदन्तःपातिनस्तन्त्वादेरपि सत्त्वाभावादिति भावः । ननु तवापि सतः कारणत्वं सम्मतमेव परमार्थकसतः शून्यस्य जगत्कारणताभ्युपगमात् अतः सतः कारणत्वं न सम्मतमिति स्ववचनविरुद्धमित्यतः सकलविक्रियातीतस्य शून्यस्य कारणत्वमेव नास्ति किन्तु संवृत्यवच्छिन्नस्यैव न च तत्पारमार्थिकं अतः कारणत्वं न सम्मतमित्युपपद्य इत्याशयेनाह **न हि सकलेति** । नन्वसतः कारणत्वे सप्तमरसादपि पीनता स्यादित्युक्तमित्यत आह **मधुरादीनामिति** । **एतेनेति** । ईश्वरस्य सर्वकारणत्व इति कथनेनेत्यर्थः । **समीकृत इति** । ईश्वरादेव भवतः कार्यस्य देशकालवयोवस्थानियमो न स्यादिति समानमित्येव प्रसङ्गः सम्मतया कृत इत्यर्थः । **महदादिकार्यस्येति** । महदादिकार्यं कुलालादिकर्तृकं कार्यत्वाद्घटादिवदित्यनेन तुल्यमिति भावः । अनुभवविरोध इत्यस्यानुभवविरोधेन तदनादर इति यावदित्यर्थो बोध्यः ।

**॥ इति उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का ॥**

* * *

**॥ अथ उक्तार्थस्य सर्वस्य व्याहतत्वशङ्कायाः निरासः (एतदधिकरणीयतृतीयचतुर्थसूत्रयोर्व्याख्यानम्) ॥**

**॥ अथ तत्रादौ एतदधिकरणीयतृतीयसूत्रव्याख्यानम् ॥**

१४ **सु०— अत्र यद्विश्वस्यासत्त्वमुक्तं तत्तावन्निराकर्तुं सूत्रम् 'ॐ नाभाव उपलब्धेः ॐ' इति । तद्व्याचष्टे न चेति ।**

**अनु०—** न चाभावो विश्वं सदिति गम्यते ।

यतो

भवतीति भावः, न भावोऽभावः, असदिति यावत् । **सदिति गम्यते यत इत्यनेन विश्वसत्यत्वे प्रत्यक्षं प्रमाणमुक्तं वेदितव्यम् ।**

प्रत्यक्षेण सदित्यनुभूयमानमपि विश्वमसच्चेत्को दोष इत्यत आह **अनुभवेति** ।

## अनुभवरोधे तु वचनं वादिनः कुतः ।

**अनुभव(वि)रोधे तु** क्रियमाण इति शेषः । (तत्र) यदि सत्त्वेनोपलभ्यमानमप्यसत् स्यात् तदोत्तरं वदत्यपि शून्यवादिनि 'नोक्तं त्वयेत्यतस्तेऽप्रतिभे'ति ब्रुवाणं परं प्रति शून्यवादिनः स्ववचनसाधको(नो)पायाभावात् पराजय एवापद्येत । यदि च 'प्राश्निकाद्यवगतं कथं मद्वचनं नास्ती'ति ब्रूयात् तदा 'अङ्गीकृतं प्रत्यक्षस्य प्रामाण्यमि'ति सत्त्वेन तदवगतं विश्वं कथमसत्स्यादिति ।

**परि०— भवतीति भाव इति** । भू सत्तायामित्यतो भवतेश्चेत्यणप्रत्ययेऽचोञ्णितीति वृद्धावावादेशे भाव इति सिद्धेरिति भावः ॥ **अनुभव(वि)रोधे त्विति** । अनुभवानादरे त्वित्यर्थः ।

**कं०रा०—** परेण विश्वस्यासत्त्वमेवोक्तं न तु अभावरूपत्वम् अतः न च अभावो विश्वमिति प्रतिज्ञानुपपत्तिरित्यतो व्याचष्टे **भवतीति** । भवतीति भाव इति कर्तृव्युत्पत्त्या भावशब्दस्य सद्वाचित्वेन नञ्तत्पुरुषरूपाभावशब्दस्यासत्त्ववत्त्वान्न प्रतिज्ञानुपपत्तिरिति भावः । यद्यपि न विद्यते भावः सत्ता यस्येति बहुव्रीह्याश्रयणेऽप्यभावशब्दस्यासत्परत्वं सिद्ध्यति तथापि उत्तरपदार्थप्रधानतत्पुरुषसम्भवेऽन्यपदार्थप्रधानबहुव्रीह्याश्रयणमयुक्तमित्याशयेनैवमुक्तमिति ध्येयम् ।

**श्रीनिधि०—** असत्त्वं निराकर्तुं सूत्रमित्ययुक्तम् । तत्राभावत्वस्य निराकरणादित्यतो नायं भावसाधनः । किन्तु कर्तृसाधन इत्याह **भवतीति भाव इति** ।

**शे०चं०—** विश्वस्याभावरूपतायाः परेणानभ्युपगमात् 'न चाभावो विश्वमि'त्यसदनुवादः । अभवनं अभाव इत्याश्रयणेऽपि विश्वस्यासत्त्वाङ्गीकारेऽप्यसत्त्वरूपत्वानङ्गीकारादुक्तदोष एवेत्यतोऽन्यथा व्याचष्टे **भवतीति भाव इत्यादिना** ।

**वा०र०— असत्त्वाङ्गीकारेऽपि असत्त्वरूपत्वेति** । अभवनवत्त्वाङ्गीकारेऽपि अभवनरूपत्वाङ्गीकारादित्यर्थः । न च अभावो विश्वमित्यसदनुवाद इत्येव पाठः । विश्वं सदित्यसदनुवाद इति सत्पदान्तर्भावस्तु लेखकदोषात् । मूलकोशेऽभावात् इति बोध्यम् ।

**स०व्र०**— विश्वस्याभावरूपत्वस्य परेणानभ्युपगमात् 'न चाभावो विश्वं सदि'त्यसदनुवादः । अभवनं अभावः इत्यङ्गीकारेऽपि असत्त्वस्य विश्वरूपत्वानङ्गीकारात् उक्तो दोष एवेत्यतो व्याचष्टे **भवतीति भावः** । **न भावोऽभाव इति** ।

**वि०ठ०**— **अङ्गीकृतं प्रत्यक्षस्य प्रामाण्यमितीति** । इति हेतोः स्नेहप्रत्यक्षेण सत्यत्वेन प्राश्निकाद्यवगतं विश्वं कथमसत्स्यादित्यर्थः ।

**चषकः**— **भवतीति भाव इति** । नायं घञन्तः किन्तु भवतेश्चेत्यनुशिष्टकर्तृसाधनाणप्रत्ययान्त इति व्याचक्षाणाः । **अनुभवविरोधे** अनुभवानादरे ।

**॥ इति एतदधिकरणीयतृतीयसूत्रव्याख्यानम् ॥**

* * *

**॥ अथ एतदधिकरणीयचतुर्थसूत्रव्याख्यानम् ॥**
**॥ अथ उक्तदोषपरिहारशङ्का ॥**

१५ **सु०**— उक्तदोषपरिहारं शङ्कते **स्वप्नेति** ।

## अनु०— स्वप्नभ्रान्तिवदेवेदं संवृत्यैवोपलभ्यते । यदि सत्त्वेन

स्वप्नश्च भ्रान्तिश्च तयोरिव **स्वप्नभ्रान्तिवत्** । यद्यपि परस्य स्वप्नोऽपि भ्रान्तिरेव, तथाऽपि गोबलीवर्दन्यायेन लोकव्यवहारमपेक्ष्य पृथगुक्तिः । यथा स्वप्ने भ्रान्तौ चासदेव गजादिकं सर्पादिकं च सदित्युपलभ्यते, तथाऽसदेव इदं विश्वं **स**(त्यत्वे)**त्त्वेन** उपलभ्यते; एतदेव विश्वस्य शून्यकारणत्वं नाम, नापरम्; तत्र कथं सदित्युपलम्भेन विश्वस्य स(त्य)त्वसिद्धिः । न चैवम् 'अधिष्ठानस्य द्रष्टुः करणानां तद्दोषाणां च सत्त्वमङ्गीकार्यम्, अन्यथा भ्रान्तिवैचित्र्याद्यनुपपत्तिरि'ति वाच्यम्, असत्प्रकाशनशक्त्या **संवृत्यैव** सर्वस्योपपत्तौ तदङ्गीकारवैयर्थ्यात् । एवञ्च न वचनासिद्धिः, सांवृतसत्त्वस्य वचनस्य प्रत्यक्षेणैव सिद्धेः, तावतैव व्यवहारोपपत्तौ पारमार्थिकसत्त्वस्योपयोगाभावादिति ।

६७ **परि०—** 'तत्र तस्येवे'ति सप्तम्यन्ताद्वतिरित्याह **तयोरिवेति** ॥ **लोकव्यवहारमिति** । लौकिकैः स्वाप्नभ्रमयोर्यो भेदव्यवहारः तमपेक्ष्येत्यर्थः ॥ **एतदेवेति** । असतः सत्त्वेनोपलभ्यमानत्वमेवेत्यर्थः ॥ **न चैवमिति** । सत्त्वबुद्धेर्भ्रमत्व इत्यर्थः । अधिष्ठानस्य द्रष्टुरिति, व्यधिकरणे षष्ठ्यौ ॥ **अन्यथेति** । अधिष्ठानाद्यभावे तद्वैचित्र्यनिबन्धनस्य भ्रान्तिबाधव्यवहारप्रवृत्त्यादिवैचित्र्यायोगादित्यर्थः ।

**यादु०— एतदेव विश्वस्येति** । शून्याविद्यया सदिति प्रतीयमानत्वमेवेत्यर्थः । अनेन यथाश्रुतकार्यकारणभावो वा, उत तदविद्याकल्पितत्वादिरूप इति पूर्वमभिप्रेते विकल्पे द्वितीयपक्षश्चाशङ्कित इति ध्येयम् ।

**वं०प०— असत्प्रकाशनम्** अविद्यमानप्रकाशनम् ।

**श्रीनिधि०— स्वप्नश्च भ्रान्तिश्चेति** । **स्वप्न**पदेन स्वाप्नज्ञानमुच्यते । **स्वप्ने भ्रान्तौ चेति** । गजादिकं **स्वप्ने** । **भ्रान्तौ** सर्पादिकमिति विवेकः । यदि विश्वमसदेव स्यात् तर्हि कथं तस्य शून्यकारणकत्वम् । न हि असतः निःस्वरूपस्य कारणप्रयोज्यत्वं युक्तमित्यत आह **एतदेवेति** । **एतदेव** शून्याविद्याधीनप्रतीतिकत्वमेव । **न चैवमिति** । **एवं** विश्वस्यारोपितत्वे । **अन्यथा** सत्यत्वानङ्गीकारे । **भ्रान्तिवैचित्र्याद्यनुपपत्तेरिति** । तथाहि दोषाणामसत्त्वे भ्रान्तिवैचित्र्यं न स्यात् । एकरूपैव स्यात् रजतसर्पत्वादिप्रकारिका न स्यात् । तथाच तद्वैचित्र्यं दोषवैचित्र्याधीनमिति तत्सत्त्वमङ्गीकरणीयम् । अधिष्ठानस्यासत्त्वे अत्रैव रजतभ्रमः नान्यत्रेति न स्यात् । सर्वत्र वा स्यात् नैव वा स्यात् । तस्मात् तद्वैचित्र्यमधिष्ठानवैचित्र्येणेति तत्सत्त्वसिद्धिः । तथा द्रष्टुरसत्त्वे अस्यैव रजतभ्रमः नान्यस्येति न स्यात् । सर्वस्य वा स्यात् । कस्यापि वा न स्यात् । तथा कारणानामसत्त्वे कालनियमो न स्यात् । सुप्त्यादावपि स्यादिति द्रष्टव्यम् । **असत्प्रकाशनशक्त्या संवृत्यैवेति** । असतः प्रकाशने शक्तिः यस्याः सा असत्प्रकाशनशक्तिः, तया । अघटितघटनापटीयसी संवृतिरिति भावः ।

**शे०चं०— तयोरिवेति** । 'तत्र तस्येवे'ति षष्ठ्यन्ताद्वतिरिति भावः । यद्यप्यत्र भ्रान्तिस्वप्नवदिति वक्तव्यम्, 'द्वन्द्वे घी'ति घ्यन्तस्य पूर्वनिपातस्मरणात् । तथाऽपि 'स्वप्नमायासरूपे'ति श्रुत्यनुसारिस्वप्नादिवदिति सूत्रानुसारेण स्वप्नभ्रान्तिवदित्युक्तम् । वस्तुतस्तु 'लक्षणहेत्वोः क्रियायाः' 'समुद्राभ्राद्घ' इत्यादिषु यथायथं व्यभिचारं कुर्वता सूत्रकृतैतत्प्रकरणस्यानित्यत्वज्ञापनात् 'अल्पाच्तरमि'त्यस्यानित्यत्वात् 'शकुनिसूत्रयोरिति साध्वि'ति वदता ग्रन्थकारेण तदनित्यत्वस्य ज्ञापनाच्च 'द्वन्द्वे घी'त्यस्यात्राप्रसक्तिरिति ध्येयम् ॥ **गोबलीवर्दन्यायेनेति** । यथा गावः समागता बलीवर्दाश्चेत्यादौ लौकिकव्यवहारे बलीवर्दानामपि गोत्वाक्रान्ततया गोग्रहणेनैव ग्रहणप्राप्तावपि गोविशेषत्वात् सामान्यविशेषापेक्षया पृथगुक्तिः, तथा स्वप्नस्य भ्रान्तित्वेन भ्रान्तिग्रहणेन ग्रहणप्राप्तावपि तद्विशेषत्वात् सामान्यविशेषापेक्षया पृथगुक्तिर्युज्यत इति भावः ॥ **एतदेवेति** । शून्याविद्यया सदिति प्रतीयमानत्वमेवेत्यर्थः । अनेन तदविद्याकल्पितत्वादिरूप एव शून्यजगतोः कार्यकारणभावोऽभिमत इति प्राग्विकल्पितद्वितीयपक्षस्य निराकरणायेयमाशङ्केति सूचितं भवति । कल्पितत्वस्य साधिष्ठानत्वव्याप्यत्वा-

द्व्यापकीभूतसाधिष्ठानत्वव्यावृत्त्या तद्व्याप्यस्य कल्पितत्वस्यापि व्यावृत्तिरेवेत्यभिप्रेत्य कल्पितत्वे साधिष्ठानादित्वं स्यादित्याक्षिपति **न चैवमिति** ॥ **अधिष्ठानस्येति** । इदं रजतमित्येव भ्रान्तेर्दर्शनात् रजतमित्येव च तददर्शनात् भ्रान्तेरधिष्ठानसापेक्षत्वमिति भावः ॥ **द्रष्टुरिति** । भ्रमस्य समानाश्रयप्रमानिवर्त्यत्वेन ज्ञानस्य ज्ञातृसापेक्षत्वेन च द्रष्टृवश्यम्भावादिति भावः ॥ **करणानामिति** । प्रलये सत्यामप्यविद्यायामिन्द्रियादिकरणाभावेन तज्जन्यप्रमाया इव तज्जन्यभ्रमस्याप्यदर्शनेन भ्रान्तेः करणसापेक्षत्वनिश्चयादिति भावः ॥ **तद्दोषाणामिति** । अन्यथाऽप्रामाण्यस्य स्वतस्त्वापत्तेर्भ्रान्तेर्दोषापेक्षत्वनिश्चयादिति भावः । यद्यप्यप्रामाण्यस्य स्वतस्त्वापत्तिर्न परस्यानिष्टा तथाऽपि तं प्रत्यप्यप्रामाण्यपरतस्त्वव्यवस्थापनेन तत्सिद्धिमभिप्रेत्यैतदापादनमित्यवधेयम् । उपलक्षणमेतत् । देहादीनां चेत्यपि द्रष्टव्यम् ॥ **सत्त्वमिति** । अधिष्ठानादेरध्यस्तत्वे च तदध्यासस्याप्यधिष्ठानाद्यन्तरसापेक्षत्वेनानवस्था-द्यापत्तेरिति कथं न विश्वसत्यत्वसिद्धिरिति भावः । ननु शून्यमेव जगद्भ्रमाधिष्ठानादिकं भविष्यति । तच्च सदेवेति न शून्यातिरिक्तविश्वसत्यत्वसिद्धिरित्यत आह **अन्यथेति** । शून्यस्यैव जगद्भ्रमाधिष्ठानत्वे तस्याविचित्रत्वेन घटोऽयं, पटोऽयमित्येवंरूपानेकभ्रान्तिविषयत्वानुपपत्तिः । यद्यप्यविचित्रस्यापि रज्जुखण्डस्य सर्प-माला-बलीवर्द-मूत्रत्वादिप्रकारकविचित्रविषयभ्रान्तित्वच्छून्यस्यापि विचित्रानेकभ्रान्तिविषयत्वं वक्तुं शक्यं, तथाऽप्यविचित्रस्य युगपद्विचित्रानेकभ्रान्तिविषयत्वासम्भवस्यात्राभिप्रेतत्वात् रज्जुखण्डस्य च क्रमिकविचित्रभ्रान्तिविषयतायामपि युगपत् तदभावाददोषः । आदिपदेनाधिष्ठानत्वस्य परिग्रहः । तदनुपपत्तिश्च निःसामान्ये निर्विशेषे च शून्ये, अधिष्ठानत्वे तन्त्रस्य सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषत्वस्याभावात् । ततश्च शून्यस्याधिष्ठानत्वाद्यनुपपत्त्या तदतिरिक्तस्य विश्वस्यैव तत्त्वे वाच्ये कथं न विश्वसत्यत्वसिद्धिरिति भावः । केशोण्ड्रकादिभ्रमस्य निरधिष्ठान-स्यापि दृष्टत्वान्न भ्रान्तेरधिष्ठानसापेक्षत्वनियमः । प्रलये देहाद्यभावाद्भ्रमादर्शनेन भ्रान्तेस्तत्सापेक्षत्वेऽपि न भ्रमस्य तत्सत्त्वापेक्षत्वम् । अध्यस्तैरपि देहादिभिस्तदुपपत्तेः । न चैवमनवस्थाद्यापातः । तद्भ्रमस्यानादित्वेन तदनव-काशात् । न च कल्पाऽऽद्यभ्रमानुपपत्तिः । कल्पान्तरीयभ्रमजन्यवासनयाऽपि तदुपपत्तिरिति भावेन परिहरति **असत्प्रकाशनशक्त्येति** । ननु सांवृतसत्यस्य वचनस्य प्रत्यक्षेण सिद्धावपि पारमार्थिकस्य तस्यासिद्धेस्तवा-प्रतिभैवेत्यत आह **तावतैवेति** । सांवृतसत्त्वमात्रेणैवेत्यर्थः । उपयोगाभावादित्युपलक्षणम् । सकलविक्रियातीत-त्वेन व्यवहारविरोधित्वाच्चेत्यपि द्रष्टव्यम् ।

**वा०२०— तदनित्यत्वज्ञापनाच्चेति** । एतत्पूर्वनिपातप्रकरणस्यानित्यत्वज्ञापनाच्चेत्यर्थः । अनेना-ल्पाच्तरशास्त्रानित्यत्वलाभेऽपि एतत्प्रकरणानित्यतायाः साक्षादलाभात् उक्तं **ज्ञापनादिति** । एवं पूर्वत्रापि द्वन्द्वेच्छेत्यस्याल्पाच्तरमित्यस्य चानित्यत्वलाभेऽपि प्रकरणानित्यत्वासिद्धिरित्यतो ज्ञापनादित्युक्तम् । अत एव इत्यादिषु यथायथं व्यभिचारमिति तत्रोक्तम् । तेनोदाहरणान्तरं गवेषणीयमिति सूचितम् । कुरुपाण्डववत् तेषा-मुपपत्तेः । पृथग्वच इत्येतत् स्वप्राधिकरणानुव्याख्यानव्याख्यानरूपमूलानुसारेणाह **सामान्यविशेषापेक्षयेति** । बलीवर्दानां गवावान्तरभेदत्वेन तद्विशेषतया गावो बलीवर्दाश्चेत्यनयोः साक्षात् एकार्थत्वाभावेन पृथगुक्तिर्युक्ते-त्यर्थः । उक्तं च गीतातात्पर्यटीकायाम् । 'पाण्डवानां कुर्ववान्तरभेदत्वेन कुरुपाण्डवानां साक्षादैक्याभावात्'

इति । एवं 'योगो न्यासश्चेत्येक एवार्थोऽपि तु न्यासो योगावान्तरभेदोऽतः कुरुपाण्डववत् पृथगुक्तिरिति च । तथैवोपपत्तिविशेषा' इत्येतत् प्रमाणलक्षणटीका च । 'चिच्चेत्ययन्ते'त्येतत् तत्त्वोद्योतटीकाव्याख्यानप्रपञ्चेऽस्मदुपपादनं च ज्ञेयम् । **तथा स्वप्नस्येति** । स्वप्नभ्रान्त्यवान्तरभेदत्वेन तद्विशेषतया स्वप्नो भ्रान्तिश्चेत्यनयोः साक्षादेकार्थत्वाभावेन पृथगुक्तिर्युक्तेत्यर्थः ।

**प्राग्विकल्पितद्वितीयपक्षस्येति** । यथाश्रुतमपाकर्तुमिति मूले विकल्पमुखेन ग्रन्थप्रवृत्तेरभिप्रेतत्वेन तथा तद्व्याख्यानावसरे प्रदर्शितस्येत्यर्थः । साधिष्ठानादित्वमित्यादिपदेन सद्रष्टृकत्वसकरणकत्वसदोषकत्वपरिग्रहः । **परस्येति** । असत्कारणत्वाङ्गीकारिण इत्यर्थः । सर्वजगत्प्रत्ययस्य भ्रमत्वाङ्गीकारादिति भावः । **देहादिनां चेत्यपीति** । अत्रादिपदेन भ्रमस्थलीयन्यायामृतस्थदेहेन्द्रियादिकं चेत्यादिपदेनोक्तं ग्राह्यम् । यद्वा अज्ञानादि तदुक्तं ग्राह्यम् । देहस्य प्रलये सत्यामप्यविद्यायामित्यनेन इन्द्रियेषूक्तेन न्यायेन अज्ञानबाधकज्ञानयोश्च दोषे उक्ताप्रामाण्यस्वतस्त्वापत्तिरूपन्यायेनावश्यकत्वमिति बोध्यम् । न च एकमेव युगपत् बहुधा दृश्यते भ्रान्तावित्येतत् तत्त्वनिर्णयटीकानुसारेण व्याचष्टे **शून्यस्यैवेति** । तत्र युगपदिति विशेषणकृत्यानुसारेणाशङ्क्य निराकरोति **यद्यप्यविचित्रेत्यादिना** । उक्तन्यायामृतस्थलीय'निःसामान्ये निर्विशेषे चे'ति वाक्यानुसारेणाह **तदनुपपत्तिश्चेति** । **केशोण्ड्रकादीति** । एतच्चाङ्गीकृत्योक्तम् । वस्तुतः तन्मतेऽपि तस्य तेजोधिष्ठानत्वमस्त्येव । 'स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यास' इत्यध्यासभाष्ये परत्रेत्यनेनोक्तस्याधिष्ठाननियमस्य केशोण्ड्रकादिभ्रमस्य निरधिष्ठानत्वेन व्यभिचारमाशङ्क्य तेजोधिष्ठानत्वेन समाधानस्य कृतत्वात् । अत एव अतो न कुत्रापि सदृशसत्यवस्तुद्वयं विना भ्रम इत्येतत् तत्त्वनिर्णयव्याख्यानावसरे टीकायां एवमेव प्रतिपादितम् । 'न चात्मन्यनात्मभ्रमः क्वापि दृष्ट' इत्येतत् तत्त्वनिर्णयावताररूपटीकानुसारेण न्यायामृतानुसारेण 'भ्रमत्वे तु इयमुक्तिश्चे'ति प्रथमचतुर्थपादीयानुव्याख्यानावतारानुसारेण चाशयमाह **अध्यस्तैरपीति** । प्रत्यक्षेण सिद्धावपीति पाठः । **सकलविक्रियातीतत्वेनेति** । तद्रूपत्वेनेत्यर्थः ।

**स०व्र०— स्वप्नभ्रान्तिवदिति** । यद्यप्यत्र 'द्वन्द्वे घि' इत्युक्तत्वात् भ्रान्तिस्वप्नवदिति वाच्यम् । तथापि 'स्वप्नमायासरूपा' इति श्रुत्यनुसारि 'स्वप्नादिवत्' इति सूत्रानुसारेण स्वप्नभ्रान्तिवदित्युक्तमिति ध्येयम् । **न चैवमिति** । शून्यस्यैव कारणत्वे तस्याविचित्रत्वेन घटोऽयं पटोऽयमित्येवंरूपानेकविधभ्रान्तिकारणत्वासम्भवेन शून्यातिरिक्तमेव तत्कारणं वाच्यमित्यर्थः ।

**विठ्ठ०—** तत्र तस्येवेति सप्तम्यन्ताद्वतिरित्याह **तयोरिवेति** । ननु यद्यारोपितं विश्वं तर्हि शून्यकारणकमित्यनुपपन्नमित्यत आह **एतदेवेति** । शून्यसंवृत्या सदिति प्रतीयमानत्वरूपमारोपितत्वमेवेत्यर्थः । एतेन यथाश्रुतः कार्यकारणभावो वा उत तदविद्याकल्पितत्वादिरूप इति प्राग्विकल्पितद्वितीयपक्षोऽयमाशङ्कित इति ध्येयम् । **अन्यथेति** । अधिष्ठानादीनां सत्यत्वाभाव इत्यर्थः । अधिष्ठानस्य सत्यत्वाभावे शुक्त्यधिष्ठाने जायमानभ्रान्तेऽस्तु रजतविषयत्वं रज्ज्वधिष्ठाने जायमानभ्रान्तेऽस्तु सर्पविषयत्वमिति भ्रान्तिवैचित्र्यं न स्यात् ।

द्रष्टुः सत्यताभावे भ्रान्तिरेव न स्यात् । कर्तृरहितक्रियायोगात् एवमकरणकक्रियानुपपत्तेः करणादिसत्तानभ्युपगमेऽपि न भ्रान्तिः स्यादिति भावः ।

**चषकः— तयोरिवेति** । 'तत्र तस्येवे'ति स्मृतेः षष्ठ्यन्तात्सप्तम्यन्ताद्वा वतिरिति भावः । **सत्त्वेनोपलभ्यते** सत्त्वप्रकारकोपलब्धिविषयः । सत्त्वं न विपर्यस्तं निरधिष्ठानादित्वादित्यनुमानेऽप्रयोजकत्वाशङ्कानिरसनौपयिकीं विपर्यस्तत्वापादकसाधिष्ठानादित्वापाद्यकापत्तिं दिदर्शयिषुराशङ्कते **न चेति** । **एवं** सत्त्वप्रतीतेर्विपर्यासरूपत्वे । अन्यथा शून्यस्यैव तादृशविपर्यासाधिष्ठानतामुपेत्य सामञ्जस्योपपादनान्न शून्यातिरिक्तस्य सत्यतासिद्धिरित्यभिहितौ । **भ्रान्तीति** । तथा सति तादृगधिष्ठानस्यावैचित्र्यादेकक्षणावच्छेदेनोत्पद्यमान-'घटोऽयं पटोऽयमि'त्यनेकविचित्रविपर्यासाधिष्ठानत्वानुपपत्तेरिति भावः । अधिष्ठानमन्तरेणापि केशोण्ड्रकादिभ्रमदर्शनादध्यस्यमानदेहादिभिरेव भ्रान्त्युपपत्तेः कल्पाद्यकालीनभ्रमस्य कल्पान्तरीयभ्रमजन्यवासनयैवोपपत्तेर्न क्षतिरित्यभिप्रेत्य प्रतिविधत्ते **असत्प्रकाशनशक्त्येति** ।

**॥ इति उक्तदोषपरिहारशङ्का ॥**

* * *

**॥ अथ तत्र उक्तदोषशङ्कापरिहारः (प्रपञ्चप्रत्ययस्य निवृत्त्यभावात् जगतः सांवृतिकसत्यत्वाभावात् पारमार्थिकसत्यत्वसमर्थनम्) ॥**

**१६ सु०— एतत्परिहाराय 'ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ' इति सूत्रम् । तद्व्याचष्टे किञ्चेति ।**

## अनु०— किञ्चात्र भ्रमो नैव निवर्तते ।

**भवेदेवं यदि प्रपञ्चे रज्जुसर्पादाविव सत्त्वप्रत्ययो भ्रमः स्यात् । न चैवम् । तथात्वे अत्र प्रपञ्चे सत्त्वभ्रमः किं इति नैव निवर्तते । ज्ञानानां भ्रमत्वावधारणं हि बाधबोधाधीनम्, सम्प्रतिपन्नस्थले तथा दर्शनात् । प्रत्ययत्वमात्राधीनत्वे प्रागपि बाधबोधोदयाद्रज्जुसर्पादिज्ञाने लौकिकपरीक्षकाणां भ्रमत्वावधारणं स्यात्, न चैवं क्वचिद् दृष्टम् । न च प्रपञ्चसत्तावगमस्य बाधकं पश्यामः । ततो न भ्रमत्वावधारणं युक्तमिति ।**

**स्वप्नस्य भ्रान्तित्वाभावो, भ्रमस्य चाधिष्ठानाद्यपेक्षानियमः, सांवृतसत्त्वस्य व्यवहारनिर्वाहकत्वस्याभावश्चान्यत्र समर्थितोऽत्रानुसन्धेयः ।**

**परि०—— अत्रेत्यनुवादः प्रपञ्च** इति व्याख्या ॥ **नैव निवर्तत इति** । नैव बाध्यत इत्यर्थः । किञ्चेति चशब्दो भ्रमत्वबाध्यत्वयोर्व्याप्तिं, प्रकृते बाधाभावं च समुच्चिनोतीति भावेन तदाह **ज्ञानानामिति** ॥ **न चैवमिति** । भ्रमत्वावधारणमित्यर्थः ॥ **अन्यत्रेति** । स्वप्नस्य भ्रान्तित्वाभावादिः 'सन्ध्ये सृष्टिराह ही'त्यग्रे भक्तिपादीयानुव्याख्याने 'न च स्वप्नोऽपि नो मृषा । वासनाजनितत्वेन' इत्यादिप्रकृतिनयानुव्याख्याने, तत्त्वनिर्णयादौ चेति भावः ।

**यादु०——** मूलगतचशब्दार्थमाह **स्वप्नस्य भ्रान्तित्वाभाव इत्यादिना** ।

**कं०रा०——** 'किं चात्र भ्रमो नैव निवर्तत' इत्यत्र अत्रेतिपदं व्याचष्टे **प्रपञ्च इति** । भ्रमपदं शेषपूरणेन व्याचष्टे **सत्त्वेति** । अव्ययानामनेकार्थत्वात् चशब्दमित्यर्थत्वेन व्याचष्टे **किमितीति** । **प्रत्ययत्वमात्राधीनत्व इति** । भ्रमत्वावधारणस्येति शेषः ।

**श्रीनिधि०—— किमिति नैव निवर्तत इति** । अनेन किंशब्द आक्षेपार्थः । **चशब्दो** हेत्वर्थ इत्युक्तं भवति । बाधितज्ञानं कुतो न जायते इति यावत् । न च जायते तस्मान्न भ्रम इति । ननु बाधकाभावेऽपि भ्रमत्वं किं न स्यादित्यतोऽप्रयोजकत्वं परिहरति **ज्ञानानां भ्रमत्वावधारणं हीति** । **सम्प्रतिपन्नस्थल इति** । रज्जुसर्पादिस्थल इत्यर्थः । **अन्यत्रानुसन्धेय इति** । विष्णुतत्त्वनिर्णयादावित्यर्थः । अनेन न्यूनतादोषः परिहृतः । तथा हि । स्वाप्नो न भ्रमः बाधशून्यत्वात् सुप्तोत्थितस्य बाधदर्शनात् । असिद्धिरिति चेत् किमेतावता । अन्यथा घटध्वंसानन्तरं घटो नास्तीति प्रतीत्या तत्प्रत्ययोऽपि भ्रमः स्यात् । किन्नाम यदा प्रतीयते तदा तदसत्त्वज्ञाने परं भ्रमत्वम् । न च स्वप्नकाले गजादिर्नास्तीति ज्ञानमस्तीति । अधिष्ठानाद्यनपेक्षायां च प्रागुक्तदोषपातः स्यात् । अघटितघटनापटीयसी संवृतिः अतः सर्वं घटत इति चेत् तर्ह्यात्मनोऽपि तत एव सांवृतत्वप्रसङ्गः । तदुक्तं 'अविद्यादुर्घटत्वं चेत्स्यादात्मापि हि तादृशः' इति । सांवृतस्यापि व्यवहारनिर्वाहकत्वे रज्जुसर्पादिरपि तथा स्यात् । तत्रापि भयकम्पादिजनकत्वमस्तीति चेन्न । तज्ज्ञानस्यैवान्वयव्यतिरेकाभ्यां तथात्वात् । व्यावहारिकं सत्त्वमधिकमत्रास्तीति चेत् तर्हि सत्त्वमेव स्वीकृतं स्यात् । पारमार्थिकत्वाभावाददोष इति चेन्न । सद्वैविध्ये मानाभावात् । अन्यथा विश्वमेव पारमार्थिकं शून्यं तु व्यावहारिकमित्युक्ते किमुत्तरमिति दिक् ।

**शे०चं०——** ननु 'प्रपञ्चे सत्त्वभ्रमः किमिति नैव निवर्तत' इति ग्रन्थेन किं दूषणमुक्तं भवतीत्याशङ्क्य भ्रमत्वावधारकप्रमाणाभावात् सत्त्वप्रत्ययस्य तदवधारणानुपपत्तिरुक्ता भवतीत्यभिप्रेत्य, किं तद्भ्रमत्वावधारकं प्रमाणं, कुतश्च तस्य तदवधारकत्वं, कुतश्च तस्यैव तदवधारकत्वम्, कथं चात्र तदभावः, येन भ्रमत्वानुपपत्तिरित्यतस्तदवधारकं प्रमाणं तावदाह **ज्ञानानामिति** । कुतस्तस्यावधारकत्वमिति द्वितीयशङ्कां परिहरति **सम्प्रतिपन्नेति** । कुतस्तस्यैव तदवधारकत्वमन्यस्यापि तत्सम्भवादिति तृतीयशङ्कां परिहरति **प्रत्ययत्वेति** । अस्त्येव बाधबोधोदयात्प्रागपि रज्जुसर्पादिज्ञाने लौकिकपरीक्षकाणां भ्रमत्वावधारणमितीष्टापादनमेतदित्यत आह

**न चैवमिति** । तथाऽपि कथं प्रकृते तदवधारकप्रमाणाभाव इत्यतो बाधबोधः किं योग्य उतायोग्य इति विकल्पद्वयं मनसि निधाय नान्त्यः अयोग्यस्य शङ्कितुमशक्यत्वादिति द्वितीयपक्षदूषणं च मनसि निधाय अनुपलम्भबाधितत्वान्नाद्य इत्याह **न च प्रपञ्च इति** । निगमयति **अत इति** । **युक्तमिति** । अनेन 'कर्मणि च' इत्यादाविव चशब्द इत्यर्थ इत्युक्तं भवति । मूले न्यूनतामाशङ्क्य परिहरति **स्वप्नस्येत्यादिना** ॥ **अन्यत्रेति** । अन्यत्रात्र च समर्थित इति सम्बन्धः । 'स्वप्नेऽपि वासनारूपमेव जगन्मनसि स्थितं बहिष्ठत्वेन प्रतीयत' इत्यादिना तत्त्वनिर्णये । तथा अत्र प्रथमस्य चतुर्थपादे 'न च स्वप्नोऽपि नो मृषा । वासनाजनितत्वेन तस्याप्यङ्गीकृतत्वतः' इत्यादिना, तृतीयस्य द्वितीये 'सन्ध्ये सृष्टिराह ही'त्यधिकरणे 'वासनाः सर्ववस्तूनामि'त्यादिना, तथा 'स्वाप्नानामपि चैतेषां न बाधो दृश्यते क्वचिदि'त्यादिना च स्वप्नस्य भ्रान्तिकल्पितत्वाभावः । कल्पितत्वे च जगतः, सत्यं जगद्द्वयमपेक्षितम् । न हि सत्यशुक्तेः सत्यरजतस्य तयोः सादृश्यस्य चाभावे भ्रान्तिर्भवति। 'अधिष्ठानं च सदृशं तथ्यवस्तुद्वयं विना । न भ्रान्तिर्भवति क्वापी'त्यादिना तत्त्वनिर्णये, 'अन्यगा चेत्स्वतोऽन्यता । नादेहयोगिनो दृष्टिरिति तत्कारणं स्वतः । देहिनः कारणयुता देहाश्च यदि न भ्रमात् । किं भ्रान्तिकल्पितमि'त्यादिना प्रथमस्य चतुर्थे च भ्रमस्याधिष्ठानाद्यपेक्षानियमः । 'मिथ्यायाः साधकत्वं च', 'न सिद्धं चान्यसाधनम्', 'व्यवहारसतश्चापि साधकत्वं तु पूर्ववदि'त्यादिना जिज्ञासासूत्रे, 'व्यावहारिकता चास्य स्यादबाध्यत्व एव हि । बाध्यं नार्थक्रियाकारी'त्यादिना प्रकृत्यधिकरणे च, सांवृतसत्यत्वस्य व्यवहारनिर्वाहकत्वाभावश्च समर्थित इत्यर्थः ।

**वा०र०**— किं चात्र भ्रमो नैव निवर्तत इति भाष्यस्यार्थानुवादः **प्रपञ्चे सत्त्वभ्रमः किमिति नैव निवर्तत इतीति** । **अनुपपत्तिरुक्तेति** । अनुपपत्तिर्दूषणमुक्तेत्यर्थः । विकल्पद्वयमित्यस्य मनसि निधायेत्युत्तरेण सम्बन्धः । **कर्मणि चेत्यादाविति** । उक्तं च कर्मणि चेति सूत्रवृत्त्यादौ । निपातानामनेकार्थत्वादित्यर्थः । उभयप्राप्तौ कर्मणि इति प्राप्तषष्ठ्याः समासनिषेधार्थमिदं सूत्रमिति ज्ञेयम् । स्वप्नसत्यत्वं भ्रमस्याधिष्ठानप्रधानदेहेन्द्रियाद्यपेक्षा सांवृतसत्त्वस्य व्यवहारासाधकत्वं च यथायथं तत् तत्त्वनिर्णयानुव्याख्यानवाक्यस्यार्थकथने आवश्यकत्वेन व्युत्पादितम् । तत एव सुज्ञेयमिति भावेन तत्तद्वाक्यमुदाहरति **स्वप्नेऽपीत्यादिना** ।

**विट्ठ०**— **असत्प्रकाशनशक्त्येति** । असद्विषयज्ञानजननशक्तियुक्त्येत्यर्थः । **सर्वस्येति** । भ्रान्तिवैचित्र्यादेरित्यर्थः । स्ववचनसाधनोपायाभावादित्यस्य परिहारमाशङ्कते **एवं चेति** । भ्रमत्वावधारणं न बाधबोधाधीनं किन्तु प्रत्ययत्वमात्राधीनमिति ब्रूम इत्यत आह **प्रत्ययत्वमात्राधीनत्वेति** । मूलगतचशब्दार्थमाह **स्वप्नस्य भ्रान्तित्वाभाव इत्यादिना** । **अन्यत्रेति** । 'न च स्वप्नोऽपि नो मृषे'त्यादौ भक्तिपाद इत्यर्थः ।

**चषकः**— **अन्यत्र समर्थित इति** । 'स्वप्ने वासनारूपमेव जगन्मनसि स्थितं बहिष्ठत्वेन प्रतीयत' इत्यादिना तत्त्वनिर्णये च, प्रथमस्य तुरीये 'न च स्वप्नोऽपि नो मृषे'त्यादिना 'न भ्रान्तिरि'त्यादिना, 'मिथ्यायाः साधकत्वं चे'त्यादिना तत्र तत्र समर्थितोऽनुसन्धेय इति भावः ।

* * *

१७ **सु०**— स्यादेतत् । किं प्रपञ्चप्रत्ययस्येदानीं बाधो नास्तीत्युच्यते उतोत्तरकालेऽपि । आद्ये न तावता भवतोऽपि विश्वसत्यत्वावधारणं, शुक्तिरजतादौ तदयोगात् । द्वितीयस्तु नास्ति 'प्रपञ्चप्रत्ययो बाधिष्यते प्रत्ययत्वात् सम्प्रतिपन्नवत्' इत्यागामिबाधसिद्धेरित्यत आह **अनादेरिति** ।

**अनु०— अनादेरस्य विश्वस्य निवृत्तिर्यदि चेष्यते ।**
**निवृत्तिश्च निवर्तेत तस्या भ्रान्तित्वसम्भवात् ॥**

अनादितोऽनुवृत्तस्येत्यर्थः । **विश्वस्य** तत्प्रत्ययस्य, **निवृत्तिः** बाधः । **निवर्तेत** बाध्येत । यदि प्रत्ययत्वात् प्रपञ्चप्रत्ययस्य बाधोऽनुमीयते, तदाऽवश्यं बाधप्रत्ययस्यापि बाधेन भाव्यम्, अन्यथा प्रत्ययत्वहेतोस्तत्र व्यभिचारापत्तेः । बाधकप्रत्ययस्य बाध्यत्वे प्रपञ्चप्रत्ययस्य याथार्थ्यसिद्धिः । तिष्ठतु तावत्परमार्थचिन्ता, व्यावहारिके तु तथा दृष्टमेव । न केवलमिदमापादनं किन्तु सम्भावितं चैतत् । यत्प्रपञ्चप्रत्ययस्य याथार्थ्यं तन्नास्तिताप्रत्ययस्य बाध्यत्वम्, अनादितोऽनुवृत्तस्यानेकसजातीयविजातीयसंवाद(व)तो याथार्थ्यसम्भवात्, कादाचित्कस्य संवादविधुर(रुद्ध)त्वेन भ्रमत्वसम्भवादिति ।

**परि०**— ननु बाधकप्रत्ययस्येत्याद्ययुक्तम् । मां प्रति परमार्थतो याथार्थ्यस्य क्वाप्यसिद्धेरित्यत आह **तिष्ठत्विति** । 'तस्या भ्रान्तित्वे'ति पादं व्याचष्टे **न केवलमिति** ।

**वं०प०**— ननु निवृत्तेरपि निवृत्तौ किमायातं प्रकृत इत्यत आह **बाधकेति** ॥ ननु बाधकप्रत्ययस्य बाध्यत्वेऽपि प्रपञ्चप्रत्ययस्य याथार्थ्यसिद्धिः परमार्थतः प्रत्ययद्वयस्याप्यसत्त्वाङ्गीकारात् । न हि वन्ध्यापुत्रस्य श्यामत्वाभावे गौरत्वं सिद्ध्यतीति चेत् । सत्यम् । आस्तां त्वदीया परमार्थचिन्ता, व्यावहारिकीं मर्यादामवलम्बमानेन परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वमङ्गीकार्यमेव । ततश्च प्रपञ्चबाधप्रत्ययस्य बाध्यत्वे प्रपञ्चप्रत्ययस्य याथार्थ्यमनिवार्यमेवेत्याह **तिष्ठत्विति** । **संवादवतः** प्रपञ्चप्रत्ययस्य । **कादाचित्कस्य** तन्नास्तिताप्रत्ययस्य ।

**कं०रा०**— **शुक्तिरजतादाविति** । शुक्तौ रजतभ्रमानन्तरमेव यत्र बाधो न वृत्तस्तत्र तात्कालिकबाधाभावमात्रेण शुक्तिरजतादेः सत्यत्वावधारणाभावादित्यर्थः । ननु तत्प्रत्ययबाधकस्य बाध्यत्वे तत्प्रत्ययस्य

याथार्थ्यमिति व्याप्तिः सर्वस्यापारमार्थिकत्ववादिनं प्रत्यसिद्धैव । सर्वप्रत्ययानामपारमार्थिकविषयत्वेन याथार्थ्यस्य कुत्राप्यभावात्, अतः कथं प्रपञ्चप्रत्ययबाधकस्य बाध्यत्वे तत्प्रत्ययस्य याथार्थ्यसिद्धिरित्युच्यत इत्यत आह **तिष्ठत्विति** । यत्प्रत्ययबाधकस्य बाध्यत्वं तत्प्रत्ययस्य याथार्थ्यमिति व्याप्तौ परमार्थगोचरे कस्मिंश्चित्प्रत्यये-ऽनुपलब्धत्वेऽपि व्यावहारिकसदर्थगोचरे रजते रजतमिति ज्ञाने तद्बाधकप्रत्ययबाध्यत्वोपपत्तौ सोपलब्धेति तथापादनं युक्तमेवेति भावः । न च वाच्यं परमार्थसच्छून्यगोचरप्रत्यये परं प्रत्युक्तव्याप्तिः सिद्ध्येत । तिष्ठतु तावत् परमार्थचिन्तेत्युक्त्यनुपपत्तिरिति परेण शून्यस्य प्रमाणविषयत्वलक्षणस्वप्रकाशताया अङ्गीकृतत्वेन तद्गोचर-प्रत्ययस्यैवाभावात् । न चैवं तत्प्रत्ययस्येत्यागामिग्रन्थानुपपत्तिः । स्वरूपेण शून्यगोचरप्रत्ययाभावेऽपि प्रपञ्चा-भावत्वादिप्रकारस्य शून्यगोचरप्रत्ययस्य तन्मतेऽपि सत्त्वेन तदभिप्रायेणागामिग्रन्थोपपत्तेः । न चैवं प्रपञ्चा-भावत्वप्रकारकपरमार्थसच्छून्यगोचरप्रत्यय एव परमतेऽपि व्याप्तिग्रहसम्भवात् । तिष्ठतु तावत् परमार्थचिन्ते-त्युक्त्यनुपपत्तितादवस्थ्यमिति वाच्यम् । प्रपञ्चाभावत्वप्रकारकशून्यगोचरप्रत्ययानन्तरं कदापि तद्बाधकानवतारेण स्वबाधकबाध्यत्वोपेतत्वरूपहेतोरेवाभावेन तत्प्रत्यये व्याप्तिग्रहासम्भवादिति यदुक्तं तत्प्रपञ्चप्रत्ययस्य याथार्थ्ये तन्नास्तिताप्रत्ययस्य तु बाधकत्वमित्येतदेव सम्भावितमिति ।

**श्रीनिधि०— न तावतेति** । सत्त्वेन प्रतीतिकाले बाधो नास्तीत्येतावतेत्यर्थः । **शुक्तिरजतादा-विति** । अन्यथा शुक्तिरजतादावपि सत्त्वेन प्रतीतिकाले बाधो नास्तीत्येतावता सत्त्वावधारणं स्यादिति भावः । **बाधकप्रत्ययस्य बाध्यत्वे इति** । प्रकृते तु प्रपञ्चसत्त्वप्रत्ययबाधकस्य तदसत्त्वप्रत्ययस्य बाध्यत्वे प्रपञ्चस्य पारमार्थिकत्वसिद्धिरित्यर्थः । नन्वेवं व्याप्तिर्न क्वाप्यावयोः सम्मतेत्यत आह **तिष्ठतु तावदिति** । **व्यावहारिक इति** । व्यावहारिकसत्त्वगोचरप्रत्ययबाधकस्य 'इदं रजतं ने'ति प्रत्ययस्य बाध्यत्वे रजतस्य व्यावहारिकत्वं दृष्टमित्यर्थः । एवञ्च विशेषव्याप्तेरयोगेऽपि सामान्यव्याप्तिर्भवत्येव । व्यावहारिकदृष्टान्तेति भावः । अत एव **तावत्** इत्युक्तम् । अनादेस्तस्याभ्रान्तित्वसम्भवादित्यनयोरुपयोगतात्पर्ये आह **न केवलमिति** । यदेतदिति सम्बन्धः । **सजातीयविजातीयेति** । **सजातीयं** प्रमाणान्तरम् । **विजातीयं** अर्थक्रियादिकम् ।

**शे०चं०— तावता** इदानीं बाधाभावमात्रेण । कुतो नेत्यतः तथा सतीदानीन्तनबाधाभावस्य क्वचि-च्छुक्तिरजतादिज्ञानेऽपि सद्भावात् तस्यापि भ्रमत्वाभावावधारकत्वं स्यात् । न च तद्युज्यत इत्याह **शुक्ति-रजतादाविति** । विश्वप्रत्ययस्य जन्यत्वात् कथमनादित्वाभिधानमित्यतो व्याचष्टे **अनादितोऽनुवृत्तस्येति** । विषयेण विषयिण उपलक्षणमित्यभिप्रेत्याह **तत्प्रत्ययस्येति** । निवृत्तेर्विषयसत्त्वेऽप्युपपन्नाया न तत्प्रत्ययभ्रमत्व-साधकत्वमित्यत आह **निवृत्तिर्बाध इति** । नन्वस्तु प्रपञ्चप्रत्ययस्य प्रत्ययत्वेन बाधानुमानं, तथाऽपि विश्व-बाधप्रत्ययस्य बाधः कुतोऽङ्गीकार्यः । विपक्षे बाधकाभावेनाप्रयोजकत्वादित्यतो व्याप्तिमुपपादयति **अन्यथेति** । तथाऽपीष्टापादनरूपत्वान्नायं तर्क इत्यत आह **बाधकप्रत्ययस्येति** । अनेन प्रपञ्चप्रत्ययो बाधिष्यत इति परानुमानस्य प्रतितर्कपराहतिरुक्ता वेदितव्या । प्रपञ्चयाथार्थ्यं च तवानिष्टम् अतो न बाधकप्रत्ययस्य बाध्यत्वम्। ततश्च विश्वप्रत्ययस्यापि प्रत्ययत्वेन न बाध्यत्वमिति विपर्ययपर्यवसानेन लाभादिति द्रष्टव्यम् । तर्कमूलभूत-

व्याप्तिमप्युपपादयति **तिष्ठतु तावदिति** ॥ एतदित्युक्तमेव दर्शयति **यत्प्रपञ्चेति** । तस्य सम्भावितितामुपपादयति **अनादित इति** ॥ **सजातीयविजातीयसंवादत इति** । विशेषदर्शनजन्यसमानविषयकज्ञानान्तररूपसजातीय-संवादात्, अर्थक्रियादिरूपविजातीयसंवादाच्चेत्यर्थः ॥ **संवादेति** । सजातीयविजातीयसंवादेत्यर्थः ।

**वा०र०— तथा सतीदानीन्तनेति** । यदेदं रजतमिति भ्रमो जायते स कालोऽत्र इदानींशब्देन उच्यत इति न कश्चित् दोषः ।

**स०व्र०—** नन्वस्तु प्रपञ्चप्रत्ययस्य प्रत्ययत्वेन बाधानुमानम् । तथापि विश्वबाधप्रत्ययस्य बाधः कुतोऽङ्गीकार्यः । विपक्षे बाधकाभावेनाप्रयोजकत्वादित्यतो व्याप्तिमुपपादयति **अन्यथेति** । ननु तथापि इष्टा-पादनरूपत्वान्नायं तर्कः साधुरित्यत्राह **बाधकप्रत्ययस्येति** । द्वितीयतर्कस्य व्याप्तिमुपपादयति **तिष्ठतु ताव-दिति** । अनेन प्रपञ्चप्रत्ययो बाधिष्यते इति परानुमानस्य प्रतितर्कपराहतिरुक्ता वेदितव्या । प्रपञ्चयाथार्थ्यञ्च तवानिष्टम् अतो न बाधकप्रत्ययस्य बाध्यत्वं, अतश्च विश्वप्रत्ययस्यापि प्रत्ययत्वेन न बाध्यत्वमिति विपर्यय-पर्यवसानेन लाभादिति भावः ।

**वि०ठ०—** विश्वस्य सृष्टिप्रलयसद्भावादाह **अनादितोऽनुवृत्तस्येति** । ननु बाधकप्रत्ययस्य बाध्यत्वे प्रपञ्चप्रत्ययस्य याथार्थ्यसिद्धिरित्ययुक्तं सर्वमिथ्यात्ववादिना एवंविधनियमस्यापि परमार्थतोऽनभ्युपगमादित्यत आह **तिष्ठतु तावदिति** । तस्याभ्रान्तित्वसम्भवादित्यंशं व्याचष्टे **न केवलमिति** । एतदित्युक्तं दर्शयति **यत्प्रपञ्चप्रत्ययस्येति** । बाध्यत्वमित्यतःपरं इतिशब्दोऽध्याहार्यः । तस्य च इत्येतत्सम्भावितमिति सम्बन्धः सम्भावितत्वोपपादनं **अनादितो अनुवृत्तस्येति** । संवादवतः विश्वप्रत्ययस्येति शेषः । कादाचित्कस्येत्यत्र विश्वनास्तिताप्रत्ययस्येति शेषः ।

* * *

**॥ अथ तत्र दृष्टस्य भ्रान्ततायाः अदृष्टस्य चाभ्रान्ततायाः सर्वसम्मत्यभावः ॥**

१८ **सु०—** 'ननु च प्रपञ्चनिवृत्तिर्नाम शून्यमेव; तच्च परमार्थरूपं, न कल्पितम्, अदृष्ट-त्वात्; तत्कथं तत्प्रत्ययस्य बाध्यता स्यात्; किन्तु प्रपञ्चस्य दृष्टत्वेन कल्पितत्वसम्भवात् तत्प्रत्यय एव बाध्यः, हेतुश्च प्रपञ्चप्रत्ययत्वेन विवेक्तव्य इत्यत आह **दृष्टस्येति** ।

**अनु०— दृष्टस्य भ्रान्तिता चेत्स्याददृष्टे न भ्रमः कुतः ।**

**भ्रान्तिताभ्रमशब्दाभ्यां** कल्पितत्वमुच्यते ।

**इदमुक्तं भवति । विपरीतमेतदुक्तं यत्सर्वप्रमाणदृष्टस्य प्रपञ्चस्य कल्पितत्वमादाय तत्सत्ताप्रत्ययस्य बाध्यत्वस्वीकरणम् । केनापि प्रमाणेनादृष्टस्य शून्यस्याकल्पितत्वं गृहीत्वा तत्सत्त्वप्रत्ययस्याबाध्यत्वोपादानम्; प्रामाणिकमकल्पितम् अप्रामाणिकं चाङ्गी-क्रियमाणं कल्पितमिति सर्वसम्मतत्वादिति ।**

**परि०— हेतुश्च, प्रपञ्चप्रत्ययत्वेन विवेक्तव्य इति** । तथा च प्रत्ययत्वहेतोस्तत्र व्यभि-चार इति प्रागुक्तदोषो नेति भावः । अस्फुटत्वादाह **इदमुक्तमिति** । एतदित्यस्य विवरणं **यदि**त्या-दिना **उपादानमि**त्यन्तेन । कुत एतद्विपरीतमित्यत आह **प्रामाणिकमिति** । सम्मतत्वादितीति-शब्दस्य पूर्वेणेदमुक्तमित्यनेनान्वयः ।

**वं०प०— अदृष्टत्वादिति** । पारमार्थिकस्वरूपस्य कल्पितत्वसाधकदृश्यत्वहेतोरभावादित्यर्थः । ननु प्रत्ययत्वहेतोः प्रपञ्चनिवृत्तिप्रत्यये व्यभिचार इत्यत आह **हेतुश्चेति** । तथा च तन्निवृत्तिप्रत्यये न प्रपञ्चप्रत्यय-त्वमिति न व्यभिचारः ।

**कं०रा०—** तद्वैपरीत्यं शङ्कते **ननु चेति** । प्रपञ्चनिवृत्तिः प्रपञ्चात्यन्ताभावः । **अदृष्टत्वादिति** । दृग्विषयत्वाभावादित्यर्थः । **तत्प्रत्ययस्येति** । प्रपञ्चात्यन्ताभावरूपशून्यप्रत्ययस्येत्यर्थः । **कल्पितत्वसम्भ-वादिति** । दृग्विषयस्य शुक्तिरूप्यादेः कल्पितत्वदर्शनादिति भावः । यदुक्तं प्रपञ्चनास्तिताप्रत्ययस्याबाध्यत्वे प्रपञ्चप्रत्ययो बाधिष्यत इत्यत्र हेतुकृतप्रत्ययत्वस्य तत्र व्यभिचार इति तत्राह **हेतुश्चेति** । न च वाच्यं प्रपञ्चनास्तिताप्रत्ययस्यापि प्रतियोगित्वेन प्रपञ्चगोचरतया प्रपञ्चप्रत्ययत्वस्य तत्र सत्त्वाद्व्यभिचारतादवस्थ्य-मिति । प्रपञ्चप्रत्ययत्वशब्देन जडसत्त्वगोचरप्रत्ययत्वस्य विवक्षितत्वात् । प्रपञ्चनास्तिताप्रत्यये च तदभावात् । एतेन प्रपञ्चशब्दस्य विश्वविस्तारवाचित्वात् तदगोचरप्रत्ययत्वस्य दृष्टान्तत्वेनाभिमते शुक्तिरूप्यादिप्रत्यये पक्षत्वे-नाभिमते घटःसन्नित्यादिप्रत्यये चाभावात् साधनवैकल्यादिकमित्येतन्निरस्तम् । विवक्षितस्य जडसत्त्वगोचर-प्रत्ययत्वस्योभयत्र सत्त्वादिति ।

**श्रीनिधि०— प्रपञ्चनिवृत्तिर्नाम शून्यमेवेति** । अत्र **निवृत्तिर्नाम** सकारणकस्य प्रपञ्चस्य ध्वंसः । स च शून्यस्वरूपमेव नातिरिच्यत इत्यर्थः । न तु नासीदस्ति तज्ज्ञानम् ।

**शे०चं०— प्रपञ्चनिवृत्तिरिति** । तद्बाध इत्यर्थः ॥ **अदृष्टत्वादिति** । सर्वथाऽदृष्टे संस्काराभावेन तत्साध्यकल्पनाया अयोगादिति भावः ॥ **दृष्टत्वेनेति** । तत्र दर्शनजन्यसंस्कारसद्भावेन कल्पनाहेतुसद्भावादिति भावः । तथाऽपि प्रत्ययत्वहेतोर्न व्यभिचारपरिहार इत्यत आह **हेतुश्चेति** । एतदिति परामृष्टमेव दर्शयति **यदिति** । तस्य विपरीतोक्तितां दर्शयति **प्रामाणिकमिति** । इतीदमिति सम्बन्धः ।

**वा०र०**— **इतीदमितीति** । सम्मतत्वादितीत्यस्य इतिशब्दस्य इदमुक्तमित्यत्रत्येदमित्यनेन सम्बन्धः ।

**स०ब्र०**— **दृष्टत्वेनेति** । सर्वथा अदृष्टे संस्काराभावेन कल्पनाया एवासम्भवादिति भावः ।

**वि०ठ०**— ननु प्रपञ्चनिवृत्तिर्नाम प्रपञ्चस्य नास्तितैव । नास्तिता च शून्यमेव । तच्च यद् दृष्टं तदेव भ्रान्तिकल्पितं भवति । न हि शून्यं दृग्विषयं अतो अकल्पितत्वात् पारमार्थिकमेवेति सिद्धम् । ततश्च न नास्तिताप्रत्ययस्य बाधो युक्तः । प्रपञ्चस्य तु दृष्टत्वेन कल्पितत्वात् तत्प्रत्ययस्य बाधितत्वं युक्तम् । न च तर्हि प्रत्ययत्वेन हेतोः निवृत्तिप्रत्यये व्यभिचार इति वाच्यम् । प्रपञ्चत्वप्रत्ययत्वेन हेतुविशेषणादिति शङ्कते **नन्विति** । शङ्कापरिहारं व्यञ्जयति **इदमुक्तं भवतीति** ।

* * *

**॥ अथ च तत्र उक्तार्थस्य दृष्टान्तेन समर्थनम् ॥**

१९ **सु०**— एतदेव दृष्टान्तेन दर्शयति **गवामिति** ।

## अनु०— गवामभृङ्गिभावेन न हि स्याच्छशभृङ्गिता ।

**अभृङ्गिभावेन** सहितेति शेषः ।

'कश्चिद्गवां भृङ्गित्वमस्ती'त्याह कश्चिच्छशस्येति । तत्र परोक्तरीत्या 'गवां भृङ्गिता कल्पिता, दृष्टत्वात्; शशभृङ्गिता त्वकल्पिताऽदृष्टत्वादि'ति स्यात् । न ह्येवं लोके प्रतीतिः, लोकानुसारेणैव च परमार्थो बोद्धव्यः, नान्यथा; लोकन्यायस्यैव तद्बोधोपायत्वादिति ।

**श्रीनिधि०**— **एतदेवेति** । प्रामाणिकमकल्पितम् । अप्रामाणिकं चाङ्गीक्रियमाणं कल्पितमित्येतदेवेत्यर्थः । ननु शशभृङ्गितायां गवामभृङ्गिभावो न कारणम् । नापि कारणं नापि कर्तृ, तत्कथं तृतीयेत्यत आह **सहितेति शेष इति** । 'सहयोगे तृतीये'ति भावः । गवां भृङ्गराहित्यं शशस्य भृङ्गित्वं च न स्यादित्यर्थ इति यावत् । स्यादितीष्टमित्यर्थ आह **नह्येवं लोके प्रतीतिरिति** । **लोकानुसारेणैव चेति** । लोकप्रत्ययानुसारेणेत्यर्थः । **लोकन्यायस्यैवेति** । लोकानुमतस्य यस्य उपायस्य लिङ्गादेरित्यर्थः । **तद्बोधोपायत्वादिति** । परमार्थबोधोपायत्वादित्यर्थः । लोकनयस्य यादृग्विधस्य वा परमार्थबोधोपायत्वमनुमतम् । तस्य तादृशस्य वा तदुपायत्वमङ्गीकृत्य परमार्थो बोधनीयः । अन्यथा उन्मत्तवदुपेक्षणीय एव स्यादित्यर्थः ।

**शे०चं०**— इष्टापत्तिं परिहरति **न ह्येवमिति** । माऽस्तु लोके तथा, प्रकृते तु तथैव किन्न स्यादित्यत आह **लोकेति** ।

॥ इति उक्तार्थस्य दृष्टान्तेन समर्थनम् ॥

॥ इति दृष्टस्य भ्रान्ततायाः अदृष्टस्य चाभ्रान्ततायाः सर्वसम्मत्यभावः ॥

॥ इति प्रपञ्चप्रत्ययस्य उत्तरकाले बाधशङ्का तन्निरासश्च ॥

॥ इति उक्तदोषशङ्कापरिहारः (प्रपञ्चप्रत्ययस्य निवृत्त्यभावात् जगतः सांवृतिकसत्यत्वाभावात् पारमार्थिकसत्यत्वसमर्थनम्) ॥

॥ इति ऐतदधिकरणीयचतुर्थसूत्रव्याख्यानम् ॥

* * *

॥ अथ तत्र उक्तार्थेन उक्तव्याहतत्वशङ्कानां समीकरणान्तराणाञ्च निरासक्रमप्रदर्शनम् ॥

॥ अथ च तत्र पूर्वपक्ष्युक्तस्य 'सतोऽपि कारणत्वे प्रमाणाभाव'स्य परिहारे तेनापादितायाः व्याहतत्वशङ्कायाः समीकरणान्तराणाञ्च परिहारः ॥

२० सु०— 'तदेवं प्रत्यक्षबलेन विश्वसत्यता साधिता, तद्बाधकशङ्का च परिहृता; ततः किं सिद्धमि'त्यतो "यदुक्तं पूर्वपक्षिणा 'सतोऽपि कारणत्वे प्रमाणाभावः' इति तत्परिहृतम्" इति वदन् समीकरणान्तरमपि परिहरति **अस्माकं त्विति** ।

## अनु०— अस्माकं तु प्रमाणेन प्रसादादीश्वरस्य च ।
## उक्तभङ्ग्याऽऽगमानां च प्रामाण्याद्युज्यतेऽखिलम् ॥

सत्कारणत्ववादिनाम् **अखिलं** परेणाक्षिप्तं **युज्यते** । कथम् । बाधविधुरेण प्रमाणेन जगतः सत्यत्वसिद्धौ मधुरादीनां पुष्ट्यादिकारणानां सत्त्वसिद्धेः । तन्त्वादीनां च विचित्र-स्वभावतया प्रमाणेन सिद्धानां न मृदादिकार्यकारित्वप्रसङ्गः । न हि सत इवासतोऽपि स्वभावभेदोऽसत्त्वव्याघातात् । प्रमाणेनैव सतः कारणत्वोपलब्धेरनुपपत्तिराभासभूतैव । प्रमाणेन सत्तया प्रमितानां मधुरादीनां सद्बुद्धिमात्रवैलक्षण्यकल्पना त्वयुक्तैव, अन्यथा सद्बुद्ध्याऽवगतात्सप्तमरसादपि पीनता सती स्यात् । ईश्वरस्य सर्वकारणत्वेऽपि तन्त्वा-द्यपेक्षा, पुरुषप्रयत्नाद्यपेक्षा, देशकालादिनियमश्च युज्यत एव; तन्त्वाद्यपेक्षयैव कार्यमुत्प-द्यतामितीश्वरस्य **प्रसादात्** सङ्कल्पात् । न चैवं निर्विशेषस्य शून्यस्य सङ्कल्पो युज्यते । न चैतदप्रामाणिकम्, आरम्भणाधिकरणोक्तरीत्या अत्र आगमानुमानादीनां प्रमाणत्वात् । न च वेदाद्यागमप्रामाण्यमसिद्धम्, प्रथमसूत्रोक्तरीत्या आगमप्रामाण्यस्य सिद्धत्वात् । अनु-

मानेऽतिप्रसङ्गोऽप्यागमप्रामाण्येनैवापास्त इति । 'ब्रह्मादीन् सृष्ट्यादावीश्वरस्तेषु कृपया-ऽपेक्षते, परमेश्वरनियोगानुष्ठाने तेषां परमपुरुषार्थलाभादि'ति ज्ञापयितुं प्रसादादित्युक्तम् ।

**परि०— समीकरणान्तरमिति** । अन्यदपि साम्यकरणमित्यर्थः ॥ **अनुपपत्तिराभास-भूतैवेति** । सतः कारणत्वे तन्त्वादीनां घटादिकार्यकारित्वं स्यादित्युक्तानुपपत्तिराभासभूतेत्यर्थ इत्येके । अनुपपत्तिर्नाम यत्सत् तन्न कारणं, यत्कारणं तन्न सदिति प्रागुक्तव्याप्तिरित्यन्ये । सतां कारणत्वानुपपत्तिसाधकसकलविक्रियातीतत्वरूपयुक्तिरनुपपत्तिरित्यपरे । **प्रसादात्** इत्यनुवादः **सङ्क-ल्पात्** इति व्याख्या । उक्तभङ्ग्येत्यस्यार्थः **आरम्भणेत्यादि** । अत्र भगवान् सर्वस्वतन्त्रोऽपि स्वाधीनसाधनान्येव लीलयोपादाय सृष्ट्यादि करोतीत्यर्थे 'शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा । स्वभिन्नं कारणाभिन्नं भिन्नं विश्वं करोत्यज' इत्याद्यागमानां, 'विमता सृष्टिः कर्त्रन्यसाधनसाध्या सृष्टित्वात् पटसृष्टिवत्' इत्याद्यनुमानानां 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्र पूर्वपादेऽभिधानादिति भावः । एतेन मूले चशब्दोऽनुमानसमुच्चय इति सूचितम् । उक्तभङ्ग्येत्यर्थं प्रकारान्तरेण व्याचष्टे **प्रथमसूत्रेत्यादिना** । जिज्ञासासूत्रे 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यादिनोक्तेत्यर्थः ॥ **अनुमानेऽतिप्रसङ्गोऽपीति** । 'पुरुषेच्छानुसारेणे'त्यत्र परं प्रति यदस्मदुक्तमनुमानं तत्र महदादि-कार्यस्य कुलालादिजन्यतासाधनसमानयोगक्षेममित्युक्तोऽतिप्रसङ्ग इत्यर्थः । तथा च बाधितविषयं परानुमानमिति भावः ॥ ***विश्वसत्यताप्रत्यक्षस्यान्यथासिद्धिनिरासकपरतया 'वैधर्म्याच्च न स्वप्नादिवदि'त्यस्याद्यं वर्णकम् ॥***

**गु०दी०— प्रथमसूत्रोक्तरीत्या** इत्यत्र 'न विलक्षणत्वादस्य तथात्वं चशब्दात्' इत्येतदध्यायप्रथम-पादसूत्रोक्तरीत्येत्यर्थः ।

**यादु०— अनुपपत्तिराभासभूतैवेति** । यत्सत्तन्न कारणं, यत्कारणं तन्न सदित्यनुपपत्तिर्व्याप्तिरिति यावत् । तर्कताण्डवे तथा प्रतिपादितत्वात् । सा च व्यभिचारादाभासभूतैवेत्यर्थः । यद्वाऽनुपपत्तिशब्देन सतः कारणत्वानुपपत्तिसाधिका सकलविक्रियातीतत्वरूपा युक्तिर्ग्राह्या, सा स्वरूपासिद्ध्यादिनाऽऽभासभूतैव । सतो मृदादेर्विकारस्यानुभूयमानत्वादित्यर्थः ॥ **आगमानुमानानामिति** । 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदे'त्याद्यागमानां, 'युक्तेः शब्दान्तराच्च', 'पटवच्च', 'यथा प्राणादिः' इत्यत्रोक्तानुमानानां चेत्यर्थः । 'अनुमानानामिति' मूलगतचशब्दार्थतयोक्तानामिति ज्ञातव्यम् । यद्यप्येता-न्यनुमानानि नोक्तसङ्कल्पसाधकानि, तथाऽपीश्वरसृष्टौ साधनान्तरसद्भावसाधकानि भवन्तीत्येतावन्मात्रेण तेषा-मत्रोपादानमिति ज्ञातव्यम् । **प्रथमसूत्रेति** । 'अथातो ब्रह्मजिज्ञासे'ति प्रथमसूत्रगतातःशब्दोक्तरीत्येत्यर्थः ।

'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यादिना आगमप्रामाण्यस्याप्यतःशब्दार्थतया व्याख्यातत्वात् ॥ **अनुमानेऽतिप्रसङ्ग इति** । पुरुषेच्छानुसारेणेत्यत्रोक्तमस्मदनुमानं महदादिकार्यस्य कुलालादिजन्यतासाधनसमान-योगक्षेममित्युक्तोऽतिप्रसङ्ग इत्यर्थः ॥ **प्रसादादित्युक्तमिति** । तथा च ब्रह्माद्यपेक्षयैव कार्यमुत्पद्यतामितीश्वर-सङ्कल्प एव प्रसादरूप इति भावः ।

**वं०प०— समीकरणान्तरं** सतः कारणत्वे तन्त्वादीनां मृदादिकार्यकारित्वप्रसङ्ग इत्यादि । नन्वसत एव कारणत्वाङ्गीकारेऽप्यतिप्रसङ्गपरिहारस्त्वसतोऽपि विचित्रस्वभावाङ्गीकारेण भविष्यतीत्यत आह **नहीति** । कुतो नहीत्यत आह **असत्त्वेति** । निःस्वभावत्वस्यैवासत्त्वेनासतोऽपि स्वभावभेदाङ्गीकारे निःस्वभावत्वरूपा-सत्त्वव्याघातादित्यर्थः ॥ **आगमेति** । आरम्भणाधिकरणोक्तागमस्तु 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदा' इत्येवंरूपः । नन्वेवं तर्हीश्वरस्यादिसृष्टौ निमित्तकारणभूतब्रह्माद्यपेक्षा कुत इत्यत आह **ब्रह्मादीनिति** ।

**कं०रा०— विचित्रेति** । पटादिरूपकार्यविशेषमात्रजननस्वभावतयेत्यर्थः । तथा च पटादिरूपकार्य-विशेषमात्रजननस्वभावत्वेन प्रमाणसिद्धत्वे सति कारणत्वमेव मृदादिकार्यकारित्वापादकं सामान्यकारणे तथा दृष्टत्वान्न तु कारणत्वमात्रमप्रयोजकत्वात् । उक्तविशेषणविशिष्टकारणत्वस्य च पटादिरूपकार्यविशेषमात्र-जननस्वभावत्वेन प्रमाणसिद्धेषु तन्त्वादिष्वसत्त्वान्न मृदादिकार्यकारित्वापादनं युक्तमिति भावः । ननु कारणत्व-मेवापादकीकृत्य तन्त्वादीनां मृदादिकार्यकारित्वापादने को दोष इत्यत आह **प्रमाणेनैवेति** । प्रमाणेनैव सतः कारणत्वोपलब्धेः सतः कारणत्वे तन्त्वादीनां मृदादिकार्यकारित्वं स्यान्न च तन्त्वादीनां मृदादिकार्यकारित्वमस्ति तस्मान्न सतः कारणत्वमिति विपर्ययपर्यवसानायोगादुक्तबाधकतर्करूपानुपपत्तिराभासभूतैवेत्यर्थः । **प्रमाणेनेति** । प्रमाणेन सत्तया प्रमितानां मधुरादीनामसद्भ्यः सप्तमरसादिभ्यः सत्त्वेनैव वैलक्षण्यसम्भवे सद्बुद्धिविषयत्वमात्रेण वैलक्षण्यकल्पनाऽनुपपन्नैवेत्यर्थः । **अन्यथेति** । मधुरादीनां सद्बुद्धिविषयत्वमात्रकृतेन सप्तमरसादिवैलक्षण्येन पीनतादिरूपकार्यकारित्व इत्यर्थः । **तन्त्वाद्यपेक्षयेति** । तन्त्वाद्यपेक्षया पुरुषप्रयत्नाद्यपेक्षया देशकालविशेषा-द्यपेक्षयैव च तत्तत्कार्यमुत्पद्यतामितीश्वरस्य प्रसादशब्दितसङ्कल्पादित्यर्थः । **प्रथमेति** । 'अथातो ब्रह्मजिज्ञासे'ति सूत्रव्याख्यानावसरे 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यादिनोक्तरीत्या आगमप्रामाण्यस्य सिद्धत्वा-दित्यर्थः । ननु आरम्भणाधिकरणोक्तरीत्या अनुमानबाधेन ईश्वरकर्तृककार्येषु कारणान्तरापेक्षाङ्गीकारे लोके कर्त्रनधीनसत्ताककारणान्तरापेक्षाया दृष्टत्वात् सोऽप्यनुमानतोऽङ्गीकार्यः स्यादित्यतिप्रसङ्ग इत्यत आह **अनुमान इति** । अनुमाने योऽयमतिप्रसङ्गः सोऽप्यागमप्रामाण्यस्य समर्थितत्वात् 'द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षये'त्याद्यागमेन च सर्वस्येश्वराधीनसत्ताकत्वबाधनेन कर्त्रनधीन-सत्ताककारणान्तरापेक्षानुमानस्य बाधितविषयत्वान्निरस्त इत्यर्थः । अथवा पुरुषेच्छानुसारेण यदि किञ्चित्प्रजा-यते । किं नानुमीयते तद्वद्वस्तुत्वात्पुरुषोद्भवः । सर्वस्यापीति सिद्धान्त्युक्तानुमाने महदादिकार्यस्य

कुलालादिजन्यता साधनताजन्यमप्येवं स्यादिति यः पूर्वपक्षिणोक्तोऽतिप्रसङ्गः सोऽप्यागमप्रामाण्येनैवापास्तः । आगमेषु महदादि-कार्यस्य जीवजन्यतया निषिद्धत्वेनातिप्रसङ्गानुमानस्यागमबाधितत्वादित्यर्थः ।

**श्रीनिधि०— यदुक्तं पूर्वपक्षिणेति** । न हि सत्कारणत्वमावयोः सम्मतमित्यनेनेति भावः । विचित्र-स्वभावतया समाधाने मयापि मधुरादेः सप्तमरसादेश्चासत्त्वाविशेषेऽपि विचित्रस्वभावतया मधुरादेरपि न तौ हेतुत्वम् । न सप्तमरसादेरित्युच्यत इति साम्यमित्यत आह **न हि सत इवेति** । **अनुपपत्तिरिति** । न हि सकलविक्रियातीतस्य इत्यादिनोक्तेत्यर्थः । **आगमानां प्रमाणत्वादिति** । 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छा-नियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदा' इत्यादीनामिति भावः । **अनुमानेऽतिप्रसङ्गोऽपीति** । आदिकालीनं कार्यं मनुष्यकर्तृकं कार्यत्वात् घटवत् इत्यनुमाने **अतिप्रसङ्गः** महदादि कार्यं कुलालादिजन्यं कार्यत्वाद् घटवत् इत्यतिप्रसङ्ग इत्यर्थः । इच्छाया इति सामान्यपदं विहाय विशेषोपादानस्य प्रयोजनं दर्शयति **ब्रह्मादीनिति** ।

**शे०चं०— समीकरणान्तरमपीति** । सतः कारणत्वे तन्त्वादिना मृदादिकार्यकारित्वप्रसङ्ग इत्यादि-रूपमित्यर्थः । सतः कारणत्वे तन्त्वादीनां मृदादिकार्यकारित्वप्रसङ्ग इत्युक्तं समीकरणं निराकरोति **तन्त्वादीना-मिति** । नन्वेवं सप्तमरसादीनामपि विचित्रस्वभावत्वादेव न मधुरादिकार्यकारित्वप्रसङ्ग इत्यत आह **न हीति** । न हि सकलविक्रियातीतस्य कारणत्वं शक्यसम्भावनमित्युद्भावितामनुपपत्तिमपि निराकरोति **प्रमाणेनैवेति** । मधुरादीनां सप्तमरसादीनां चेत्युक्तं विशेषं निराकरोति **प्रमाणेनेति** । प्रमाणविरोधादिति भावः ॥ **अन्यथेति** । सद्बुद्धिमात्रेणैव वैलक्षण्याभ्युपगम इत्यर्थः । सद्बुद्धिविषयत्वस्य मधुरादाविव तत्राप्यविशेषादिति भावः ॥ **तन्त्वाद्यपेक्षयैवेति** । न च कार्योत्पत्त्यर्थं तन्त्वाद्यपेक्षत्वेऽस्वातन्त्र्यप्रसङ्ग इति वाच्यम् । तेषां स्वाधीनसत्ता-प्रतीतिप्रवृत्तिकतया तदपेक्षाया अनपेक्षत्वेन तदनापत्तेरित्याशयात् । नन्वेवं शून्यस्य सर्वकारणत्वेऽपि तन्त्वाद्य-पेक्षयैव कार्यमुत्पद्यतामिति तस्य सङ्कल्पात् तन्त्वाद्यपेक्षोपपत्तिरित्यत आह **न चेति** । कुतो नेत्यतो निर्विशेष-त्वाच्छून्यस्य तादृशसङ्कल्पानुपपत्तेरिति भावेनोक्तं **निर्विशेषस्येति** ॥ **न चैतदप्रामाणिकमिति** । तन्त्वाद्य-पेक्षयैव कार्यमुत्पद्यतामितीश्वरस्य सङ्कल्पः, अपेक्षणीयस्य साधनस्य तदधीनत्वं चेत्येतदप्रामाणिकं नेत्यर्थः ॥ **अनुमानागमानामिति** । 'शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथा । स्वभिन्नं कारणाभिन्नभिन्नं विश्वं करो-त्यजः,' 'साधनानां साधनत्वं यदाऽऽत्माधीनमिष्यते । तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेत्', 'द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया,' 'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनरि'त्याद्यागमानां 'शक्तोऽपि ह्यन्यथा कर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव करोतीदं जगत्सदे'ति, 'ईश्वरकर्तृकसृष्टिः स्वव्यतिरिक्तसाधनसाध्या सृष्टित्वात् कुविन्दकर्तृकपटसृष्टिवदि'ति, 'न तत्साधनं स्वतन्त्रं, प्रेरणार्थं भगवताऽनुप्रविष्टत्वात् यथा प्राणादिरि'त्येवंरूपाणां, '**युक्तेः**' '**पटवच्च**', '**यथा प्राणादिरि**'ति सूत्रोक्त-युक्तीनां चेत्यर्थः । अनुमानानामिति मूलगतचशब्दार्थतयोक्तमिति ज्ञातव्यम् । यद्यप्येतान्यनुमानानि नोक्तसङ्कल्प-

साधकानि, तथाऽपीश्वरसृष्टौ साधनान्तरसद्भावसाधकानि भवन्तीत्येतावन्मात्रेण तेषामत्रोपादानमिति ज्ञातव्यम् । वेदाद्यागमेत्यत्रादिपदेन 'प्रकृतिं स्वामवष्टभ्ये'त्यादिस्मृतिसङ्ग्रहः ॥ **प्रथमसूत्रेति** । जिज्ञासासूत्रे विषयसन्निकर्षाभावप्रयुक्ततदप्रामाण्यशङ्कायाः परिहृतत्वादिति भावः ॥ **अनुमानेऽतिप्रसङ्गोऽपीति** । 'पुरुषेच्छानुसारेण यदा दृष्टः पटोद्भवः । एतादृशत्वमन्यस्य वस्तुत्वात्केन वार्यते' इति प्रागुक्तास्मदनुमाने, तथा सति महदादिकार्यस्य कुलालादिजन्यत्वसाधनमपि तत एव स्यादित्युक्तोऽतिप्रसङ्गोऽपीत्यर्थः । मूले सङ्कल्पादित्येव वक्तव्ये तथाऽनुक्त्वा प्रसादादित्युक्तेः प्रयोजनमाह **ब्रह्मादीनिति** ।

**वा०र०— जगत्सदेतीत्यनन्तरं** उक्तरीत्येति शेषः । इतीत्यस्यैव वेत्युक्तरीत्येत्यर्थः । **विषयसन्निकर्षाभावेति** । विषयश्च सन्निकर्षश्च तदुभयाभावेत्यर्थः । **परिहृतत्वादिति** । 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यादिनेति शेषः । **आगमप्रामाण्येनैवापास्त इति** मूले आगमेन तत्तत्कारणविशेषोपपादनेनैवेश्वरः तत्तत्कार्यं करोति इति प्रतिपादनात् न कुलालादिजन्यत्वं मृदादिकार्यस्य प्रसज्यत इत्यर्थः ।

**स०व्र०—** सतः कारणत्वे मृदादीनामपि तन्त्वादिकार्यकारित्वप्रसङ्ग इत्युक्तसमीकरणं निराकरोति **तन्त्वादीनामिति** । नन्वेवं सप्तमरसादेरपि विचित्रस्वभावादेव न मधुरादिकार्यकारित्वप्रसङ्ग इत्यत्राह **न हीति** । न हि सकलविक्रियाऽतीतस्य कारणत्वं शक्यसम्भावनमित्युक्तानुपपत्तिमपि निराकरोति **प्रमाणेनैवेति** । मधुरादीनां सप्तमरसादीनां चेत्युक्तं विशेषं निराकरोति **प्रमाणेनेति** । **प्रथमसूत्रेति** । विषयाभावात् सन्निकर्षाभावाच्च नागमस्य प्रामाण्यमिति आगमसामान्यप्रामाण्यविषयकशङ्कायाः, परिहारस्य तदुपपादकजिज्ञासासूत्रोक्तत्वादित्यर्थः । यत्तु 'न विलक्षण'सूत्रमेव प्रथमसूत्रम् । स्मृत्यधिकरणसूत्रस्य पादचतुष्टयार्थप्रतिपादकस्य एतत्प्राथम्याविघातकत्वादिति । तन्न । 'अभिमान्यधिकरण' इव अत्रापि अनृतत्वादिहेतुविशेषेण वेदविशेषस्याप्रामाण्यशङ्कायां तत्परिहारस्यात्र कृतत्वेऽपि विषयादिप्रदर्शनेन प्रामाण्यानभिधानात् । **अतिप्रसङ्गोऽपीति** । महदादिकार्यस्य कुलालादिजन्यत्वसाधनप्रसङ्ग इत्यर्थः ।

**वि०ठ०— समीकरणान्तरमिति** । अस्माभिरसतः कारणत्वे तत्त्वादीनां मृदादिकार्यकारित्वप्रसङ्गेन तुल्यमित्याद्युक्तं तत्समीकरणान्तरमित्यर्थः । **अनुपपत्तिराभासभूतैवेति** । सकलविक्रियातीतत्वात् सतः कारणत्वमुपपन्नमित्युक्तानुपपत्तिः सकलविक्रियातीतत्वादेरसिद्ध्यादिना आभासभूतैवेत्यर्थः । यद्वा यत्सत् तन्न कारणं यच्च कारणं न तत् सदिति अनुपपत्तिर्व्याप्तिरिति यावत् । सा व्यभिचरितत्वादाभासभूतैवेत्यर्थः । **आरम्भणाधिकरणेति** । 'शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः । कारणैर्नियतैरेव बिभर्तीदं जगत्सदा' इत्यादिना तत्रोदाहृतानामागमानाम्, 'युक्तेः शब्दान्तराच्च, पटवच्च, यथा प्राणादिः' इत्यत्रोक्तानुमानानां चेत्यर्थः । एतेन मूलगतचशब्दोऽनुमानसमुच्चयार्थ इति सूचितमिति ज्ञेयम् । **प्रथमसूत्रेति** । जिज्ञासासूत्रगतातःशब्दार्थतया 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्युक्तिरीत्या आगमप्रामाण्यस्य सिद्धत्वादित्यर्थः । **अनुमानेऽतिप्रसङ्ग इति** । पुरुषेच्छानुसारेणेत्यत्रोक्तमस्मदनुमानं महदादिकार्यस्य कुलालादिजन्यतासाधनसमानयोगक्षेममित्युक्तो-

ऽतिप्रसङ्ग आगमप्रामाण्येन बाधितविषयतयोपाधिः इत्यर्थः । ईश्वरस्यैव विश्वस्रष्टृत्वे ब्रह्मादीनिति कर्तृतापरागमविरोध इति शङ्कापरिहाराय प्रसादादितिपदाभिप्रायमाह **ब्रह्मादीनिति** । स्वेन सृष्ट्यादौ कर्तव्ये निमित्तमात्रतया ब्रह्मादीनपेक्षत इत्यर्थः । तथा चात्रापि प्रसादपदेन ब्रह्माद्यपेक्षया कार्यमुत्पद्यतामिति सङ्कल्प एव विवक्षित इति भावः ।

**चषकः— आरम्भणाधिकरणेति** । 'शक्तोऽपि भगवान्विष्णुरकर्तुं कर्तुमन्यथे'त्यादिना, 'सन्ध्ये सृष्टिराह ही'ति नये 'वासनाः सर्ववस्तूनामि'त्यादिना, 'स्वाप्नानामपि चैतेषां न बाधो दृश्यते क्वचित्' इत्यादिना, 'अधिष्ठानं च सदृशं तथ्यवस्तुद्वयं विना' इत्याद्यागमानां, 'विमता सृष्टिः कर्त्रन्यसाधनसाध्या सृष्टित्वात् पटसृष्टिवदि'त्याद्यनुमानानामित्यर्थः ।

**॥ इति पूर्वपक्ष्युक्तस्य 'सतोऽपि कारणत्वे प्रमाणाभाव'स्य परिहारे तेनापादितायाः व्याहतत्वशङ्कायाः समीकरणान्तराणाञ्च परिहारः ॥**

**॥ इति उक्तार्थेन उक्तव्याहतत्वशङ्कानां समीकरणान्तराणाञ्च निरासक्रमप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र प्रकारान्तरेणाप्यैतदधिकरणीयचतुर्थसूत्रव्याख्यानम्**
**(विश्वमिथ्यात्वेऽभिहितानुमानदूषकत्वेन) ॥**

**॥ अथ तत्रादौ विश्वमिथ्यात्वे उक्तस्यानुमानस्य शङ्कनम् ॥**

२१ **सु०—** प्राक् विश्व(स्य)सत्यत्वसाधनायोपन्यस्तस्य प्रत्यक्षस्यान्यथासिद्धिमाशङ्क्य तत्परिहारत्वेन **'वैधर्म्याच्च न स्वप्नादिवदि'**ति सूत्रं व्याख्यातम् । इदानीं विश्वमिथ्यात्वे पराभिहितस्य अनुमानस्य दूषकत्वेनापि (तद्भङ्ग्या)व्याख्यातुं मिथ्यात्वेऽनुमानं तावच्छङ्कते **दृश्यत्वादिति** ।

## अनु०— दृश्यत्वाद्विमतं मिथ्या स्वप्नवच्चेत्

'सर्वं मिथ्ये'त्युक्ते सम्प्रतिपन्नमिथ्यात्वे शुक्तिरजतादौ सिद्धसाधनता, शून्ये बाधः (च) स्यात्, अतः सत्यत्वमिथ्यात्वाभ्यां विमतमित्युक्तम् । 'विमतं गगनादिकं मिथ्या दृश्यत्वात् स्वप्नवदि'त्यनुमानेन विश्वमिथ्यात्वसिद्धेः कथं (तत्)सत्यत्वमङ्गीक्रियत इत्यर्थः ।

**परि०— सम्प्रतिपन्नमिथ्यात्व इति** बहुव्रीहिः । विमतमित्यस्य विशेष्यमाह **गगनादिक-मिति** । शून्यासत्प्रातीतिकेभ्योऽन्यदित्यर्थः । अधिकं न्यायामृते ।

**यादु०— सिद्धसाधनतेति** । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे रजतादौ तादृशसिद्धेर्जातत्वात्सिद्धसाधनतैव, नांशतः सिद्धसाधनता । पक्षतावच्छेदकनानात्व एव तस्य दोषत्वादित्यव-धेयम् ॥ **बाधश्चेति** । यद्यपि समानप्रकारकविरहज्ञानस्यैव सिद्धिप्रतिबन्धकतया नांशे बाधस्य प्रतिबन्धकत्वं, तथाऽपि पक्षतावच्छेदकावच्छिन्ने सर्वत्र जायमानाया अनुमितेस्तदंशे प्रमात्वबाध इत्यत्र तात्पर्यमित्याहुः ।

**वं०प०— अन्यथासिद्धिमिति** । सदित्युपलम्भेन न विश्वस्य सत्यत्वसिद्धिः, असदेव विश्वं सत्त्वेन प्रतीयत इत्यङ्गीकारादित्युक्तान्यथासिद्धिमित्यर्थः ।

**श्रीनिधि०— सूत्रं व्याख्यातमिति** । विश्वप्रत्ययः स्वप्नादिवत् न वैधर्म्याद् बाधाभावाभावरूप-वैलक्षण्यादिति व्याख्यातमिति भावः । **शुक्तिरजतादौ सिद्धसाधनता शून्ये बाधश्चेति** । अंशत इति भावः । इदञ्च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरनुमानं फलमिति पक्षाभिप्रायेण द्रष्टव्यम् । **सम्प्रति-पन्नमिथ्यात्व इति** । सम्प्रतिपन्नं मिथ्यात्वं यस्मिन् तत्तथोक्तम् ।

**शे०चं०—** ननु 'दृश्यत्वाद्विमतमि'त्युत्तरग्रन्थोऽनर्थकः । न च अयं विश्वमिथ्यात्वेऽनुमानमाशङ्क्य तन्निरासार्थत्वान्नानर्थक्यमिति वाच्यम् । तस्यापि प्रकृते सङ्गत्यदर्शनात् । न च 'वैधर्म्याच्च न स्वप्नादिवत्' इत्येतत्सूत्रव्याख्यानत्वात् तस्यापि प्रकृतसङ्गतिरिति वाच्यम् । किञ्चेत्यादिना तस्य प्रागेव व्याख्यातत्वा-दित्याशङ्क्य प्रकारान्तरेण व्याख्यानार्थत्वात् अस्य ग्रन्थस्य नानर्थक्यमिति भावेन पूर्वोत्तरग्रन्थयोर्विषयभेदं दर्शयं-स्तत्सूत्रव्याख्यानतयोत्तरग्रन्थं सङ्गमयति **प्रागित्यादिना** ॥ **शुक्तिरजतादाविति** । ननु शुक्तिरजतादौ तत्सिद्धा-वपि नांशे सिद्धसाधनम् । पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरिहोद्देश्यतया तदवच्छिन्ने साध्यसिद्धेरभावात् । न च तत्सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात् तत्सिद्धेरंशतः सिद्धसाधनमिति वाच्यम् । तथा सत्युद्देश्य-सिद्ध्या सम्पूर्णसिद्धसाधनत्वप्रसङ्गेनांशतः सिद्धसाधनत्वानवकाशात् । किञ्चैवं तत्सामानाधिकरण्येन साध्य-सिद्धिरूपोद्देश्यसिद्धेरविकलत्वेनोद्देश्यसिद्ध्यविरोधादंशतो बाधस्यादोषत्वप्रसङ्गः । ततश्च यद्यत्र पक्षतावच्छेदक-सामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तर्ह्यंशतः सिद्धसाधनत्वेऽपि नांशतो बाधः । यदि च पक्षतावच्छेद-कावच्छेदेन साध्यसिद्धिरुद्देश्या, तर्ह्यंशतो बाधप्रसक्तावपि नांशतः सिद्धसाधनतेति कथमुक्तदोषद्वयसमावेशोऽत्रेति चेत् किमत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्यतयाऽभिमता, किंवा पक्षतावच्छेदकावच्छेदेन । आद्ये शुक्तिरजतादौ पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्ध्योद्देश्यसिद्धेः सम्पूर्णैव सिद्धसाधनता, द्वितीये अंशे बाधः इति पक्षभेदेन दूषणद्वयस्याभिमतत्वात् । यद्यपि समानप्रकारकविरहज्ञानस्यैव प्रतिबन्धकतया

शून्यत्वावच्छेदेन साध्याभावनिश्चयेऽपि सर्वत्वावच्छेदेन तदसिद्ध्या नांशबाधस्य दूषणत्वं सम्भवति । तथाऽपि पक्षतावच्छेदकावच्छिन्ने सर्वत्र जायमानाया अनुमितेस्तदंशे प्रमात्वप्रतिबन्धकतया तस्य दोषत्वमित्यत्र तात्पर्याददोषः । यत्तु उक्तविधया विकल्पद्वयमाश्रित्याद्येंऽशतः सिद्धसाधनत्वं, द्वितीयेंऽशतो बाध, इत्यत्रैतद्ग्रन्थ-तात्पर्यवर्णनम्, तन्न । मूलकोशेषु सिद्धसाधनत्वमात्रस्योक्तत्वात् तस्य चोक्तरीत्या सम्पूर्णस्यैव सम्भवेन अंशतः सिद्धसाधनत्वपर्यन्तं धावनानर्थक्यात् । पक्षतावच्छेदकनानात्व एव तस्य दोषतया तदैक्ये तद्दूषण-त्वासम्मतेश्चेति ।

**वा०र०—** शुक्तिरजतादौ शून्य इति विशिष्य मूले अभिधानेन अंशे सिद्धसाधनताबाधावुक्ताविति सिद्धवत्कृत्याह **नांशे सिद्धसाधनमिति** । इति चेदित्यनन्तरं नेति प्रतिज्ञापदयुक्तः पाठः । एवं शुक्तिरजतादौ शून्य इत्युक्त्यांशे सिद्धसाधनताबाधावुक्ताविति भ्रान्त्याशङ्कायां तत्परिहाराय सम्पूर्णसिद्धसाधनता । अंशे च बाध इति विवेकेन दर्शयति **किमत्रेत्यादिना** । न्यायामृतटीकायां जिज्ञासाधिकरणीयवाक्यार्थचन्द्रिकायां चांशतः सिद्धसाधनत्वादिविचारः मिथ्यात्वखण्डनटीकाव्याख्याने च अत्र स्पष्टनीयोऽस्ति । जिज्ञासाधिकरणीयास्मदुप-पादनं चात्रावधेयम् । **समानप्रकारकविरहेति** । तत्तद्विरहेत्यर्थः । अनुमानीयरुचिदत्तादौ विचारितमेतत् । अंशे-सिद्धसाधनतेति प्राचीनानां पक्षं निराकर्तुं अनुवदति **यत्त्विति** । **असम्मतेश्चेति** । इतिशब्दो दूषणसमाप्तौ ।

**स०व्र०— शुक्तीति** । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वे शुक्तिरजतादौ तत्सिद्ध्या सिद्धसाधनम् । तत्परिहाराय पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वोक्तौ शून्ये बाधः स्यादित्यर्थः । तेन पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यत्वे अंशतः सिद्धसाधनमिति वाच्यम् । तथा चोद्देश्यसिद्ध्या सम्पूर्णसिद्धसाधनत्वापत्त्या अंशतः सिद्धसाधनत्वोक्त्यनुपपत्तिः । तत्सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यविरोधित्वाभावेनांशतो बाधानुपपत्तिश्चेति दोषानवकाशः । सिद्धसाधनत्वमात्राभिधानेनांशतः सिद्धसाधनत्वानभिधानात् पक्षतावच्छेदकावच्छेदेन तत्सिद्धेरुद्देश्यत्वेनेत्यभिधानेन अन्त्यदोषस्याप्यनवकाशा-दिति भावः ।

**वि०ठ०— सिद्धसाधनेति** । पक्षतावच्छेदकसमानाधिकरणतयैव साध्यसिद्धेरुद्देश्यत्वेन पक्षताव-च्छेदकाधिकरणेऽपि क्वचित्साध्यस्य प्राक्सिद्धत्वे क्वचिद्बाधितत्वे वा सर्वत्र जायमानानुमितिप्रतिबन्धाच्छुक्ति-रजतादौ सिद्धसाधनतायाः शून्ये बाधस्य चानुमानदूषणत्वमिति मन्तव्यम् ।

**॥ इति विश्वमिथ्यात्वे उक्तस्यानुमानस्य शङ्कनम् ॥**

* * *

॥ अथ तत्र विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणम् ॥

॥ अथ तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दूषणं तत्समर्थनश्च ॥

॥ अथ च तत्रादौ दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दूषणम् ॥

२२ **सु०**— दूषयितुं पृच्छति **इयं चेति** ।

**अनु०—** **इयं च मा ।**

तिष्ठतु तावद्विश्वम्, **इयं च मा** इदमेव दृश्यत्वानुमानम्, 'मिथ्या सत्यं (त्या वे) वे'ति शेषः ।

आद्यं दूषयति **मिथ्येति** ।

**मिथ्या चेत्साध्यसिद्धिर्न**

नहि शब्देऽविद्यमानेन चाक्षुषत्वेन शब्दानित्यत्वं सिद्ध्यतीति भावः ।

द्वितीये दृश्यत्वं दृश्यमदृश्यं वा ॥ प्रथमं दूषयति **व्यभिचार इति** ।

**व्यभिचारो न चेद्भवेत् ।**

**दृश्यत्वं मिथ्या न चेत्,** अथ च दृश्यम्; तदा (दृश्यत्वस्य) दृश्यत्व एव **व्यभिचारो भवेत्** ॥ द्वितीये त्वज्ञानासिद्धता हेतोरिति भावः ।

**परि०**— चशब्दसूचितमाह **तिष्ठतु तावद्विश्वमिति** । एतच्चासङ्गतिनिरासाय वा, प्रकृतानुपयुक्तोक्तिरूपनिग्रहस्थाननिरासाय वोक्तम् । विश्वमिथ्यात्वे दोषं पश्चाद्वक्ष्याम इति भावः । मिथ्यात्वमसत्त्वमित्युपेत्याह **नहि शब्द इति** ।

**कं०रा०**— दृश्यत्वानुमानस्य मिथ्यात्वे साध्यसिद्धिः कुतो नेत्यत आह **नहीति** । शब्दवृत्तित्वरहितेन चाक्षुषत्वेन शब्दानित्यत्वं यथा स्वरूपासिद्धत्वान्न सिद्ध्यति ! तथा दृश्यत्वहेतोर्मिथ्यात्वाङ्गीकारे तस्य पक्षवृत्तित्वराहित्यान्न तेन मिथ्यात्वं सिद्ध्यतीति भावः ।

**शे०चं०**— 'सत्त्वं चास्यानुभूतित' इत्यादिनोत्तरत्र प्रतिज्ञादोषस्य बाधादेरप्यभिधास्यमानत्वादवसर-क्रमानुरोधेन प्रतिज्ञादोषस्यैव प्रथममभिधातव्यत्वात् तमनुक्त्वा हेतुदोषस्य व्यभिचारादेरेव प्रथममभिधाने किन्नि-मित्तमित्यत 'इयं च मे'त्यत्र सावधारणार्थकचशब्दाभिप्रायमाह **तिष्ठतु तावदिति** । दृश्यत्वस्य मिथ्यात्वेऽपि साधकत्वं भविष्यतीत्यप्रयोजकतामाशङ्क्य तथा सत्यविशेषाच्छब्देऽसतश्चाक्षुषत्वस्यापि तदनित्यत्वसाधकता-प्रसङ्गान्नैवमित्याह **न हीति** ।

**वा०र०**— **सत्यं वेतीति** मूलम् । अनुमानमिति व्याख्यानापेक्षया सत्यमित्येतत् नपुंसकम् । अन्यथा सत्येति स्त्रीलिङ्गापत्तिः ।

**स०व्र०**— 'सत्त्वं चास्यानुभूतित' इत्यादिनोत्तरत्र प्रतिज्ञादोषस्य बाधादेरभिधानादादौ प्रतिज्ञा-दोषमनुक्त्वा व्यभिचारादेरेवाभिधाने किं निमित्तमित्यतः 'इयं च मा' इत्यत्रावधारणार्थकचशब्दाभिप्रायमाह **तिष्ठत्विति** ।

**वि०**— मिथ्यात्वमित्यभिप्रेत्याह **न हि शब्द इति** ।

**॥ इति तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य असिद्धिव्यभिचाराभ्यां दूषणम् ॥ ७४**

* * *

**॥ अथ तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य**
**असिद्धिव्यभिचाराभ्यां दत्तस्य दूषणस्य समर्थनम् ॥**
**॥ अथ च तत्र दृश्यत्वस्य मिथ्यात्वे साध्यासाधकतादोषस्य निराकरणायोगः ॥**
**॥ अथ च तत्रापि मिथ्यात्वेन सम्प्रतिपन्ने साधकत्वविप्रतिपत्तेः, साधकत्वेन सम्मते च**
**मिथ्यात्वविप्रतिपत्तेः साध्यासाधकतातादवस्थ्यम् ॥**

२३ सु०— 'स्यादेतत् । मिथ्यैव दृश्यत्वमिति ब्रूमः । न चैवं साध्यासाधकत्वम्, वर्णदैर्घ्यादीनां मिथ्याभूतानामपि साधकत्वस्योभयसिद्धत्वात्, चाक्षुषत्वादीनां त्वारोपा-भावात्, आरोपेऽप्यसांव्यावहारिकत्वादसाधकत्वं, न तु मिथ्यात्वादि'त्यत आह **साध-कत्वमिति** ।

## अनु०— साधकत्वमसत्यस्य साध्यं विप्रतिपत्तितः ।

**यत्रोदाहरणे मिथ्यात्वं सम्प्रतिपन्नं तत्र साधकत्वे, यत्र च साधकत्वं सम्मतं तत्र मिथ्यात्वे, विप्रतिपत्तितोऽसत्यस्य साधकत्वं साध्यम् एव; न पुनरस्माकं सिद्धमिति ।**

**परि०— वर्णदैर्घ्यादीनामिति** । वर्णेष्वारोपितानां दैर्घ्यप्लुतह्रस्वत्वादीनामित्यर्थः । तर्हि चाक्षुषत्वाद्यपि शब्दानित्यत्वादि साधयेदित्यत आह **चाक्षुषत्वादीनामिति** ।

**वं०प०—** वर्णदैर्घ्यादीनामित्यादिपदेन सवितृसुषिरादेर्ग्रहणम् । तर्हि असत्त्वाविशेषाच्चाक्षुषत्वादीनामपि साधकत्वं स्यादित्यत आह **चाक्षुषत्वादीनामिति** । पक्षे आरोपाभावादित्यर्थः ।। **यत्रोदाहरण इति** । सवितृ-सुषिरादौ । **तत्र साधकत्वे इति** । तज्ज्ञानस्यैव साधकत्वात् तस्य च सत्यत्वादिति भावः । **यत्र च** वर्ण-दैर्घ्यादौ ।। **तत्र मिथ्यात्व इति** । वर्णेषु वर्णदैर्घ्यं नाम दीर्घध्वनिव्यङ्ग्यत्वमेव, नान्यत् । तच्च सत्यमेवेति भावः ।

**कं०रा०— न चैवमिति** । दृश्यत्वस्य मिथ्यात्वे साध्यासाधकत्वमिति न च । नगो नाग इत्यादौ मिथ्याभूते वर्णदैर्घ्यादावर्थभेदसाधकत्वस्य प्रतिबिम्बे च बिम्बसाधकत्वस्य स्वाप्नेऽर्थे च शुभाशुभसाधकत्वस्य स्फटिकलौहित्ये चोपाधिसन्निधानसाधकत्वस्य रेखारोपितवर्णे चार्थसाधकत्वस्य सवितृसुषिरादौ चारिष्टादि-साधकत्वस्योभयसिद्धत्वादित्यर्थः । ननु शब्दादिष्वविद्यमानानां चाक्षुषत्वादीनामनित्यत्वाद्यसाधकत्वं मिथ्यात्व-प्रयुक्तं दृष्टमिति कथं मिथ्याभूतस्य साधकत्वमित्यत आह **चाक्षुषत्वादीनामिति** । दृश्यत्वस्य तु गगनादा-वारोपितत्वात् सांव्यावहारिकत्वाच्च साधकत्वं युक्तमिति भावः । **यत्रेति** । यत्र सवितृसुषिरादौ मिथ्यात्वं सम्प्रतिपन्नं तत्र तद्दर्शनस्यैवारिष्टादिसाधकत्वेन मिथ्याभूतस्य सवितृसुषिरादेः साधकत्वे यत्र दीर्घध्वनिसाहि-त्यादिरूपे वर्णदैर्घ्ये साधकत्वं सम्मतं तत्र मिथ्यात्वे विप्रतिपत्तेः । असत्यस्य साधकत्वं त्वया साध्यमेव न पुनरस्माकं सिद्धमित्यर्थः ।

**श्रीनिधि०— वर्णदैर्घ्यादीनामिति** । आदिपदेन सवितृसृष्टिरादिर्गृह्यते । वर्णदैर्घ्यस्य चार्थविशेष-साधकत्वं 'वासुदेव' इत्यादौ दृष्टम् । वसुदेव इत्यादेः योऽर्थस्तदपेक्षार्थविशेषस्य तेन साधनादिति द्रष्टव्यम् । **असांव्यावहारिकत्वात्** प्रातिभासिकत्वात् । **आरोपाभावादिति** । वस्तुतः शब्दनिष्ठत्वं नास्ति । आरोपोऽपि नास्ति चेत् कथं तत्राज्ञातस्य चाक्षुषत्वस्य तदनित्यतासाधकत्वमिति भावः । **यत्रोदाहरणे मिथ्यात्वमिति** । सवितृसुषिरादावित्यर्थः । **तत्र तज्ज्ञानस्यैव साधकत्वादिति** । **यत्र च साधकत्वमिति** । वर्णदैर्घ्यप्रति-बिम्बादावित्यर्थः । **साधकत्वमिति** । मिथ्याभूतस्येति शेषः ।

**शे०चं०— न चैवमिति** । मिथ्यात्वस्यासाधकत्वव्याप्तत्वादिति भावः । अत्र साध्यग्रहणं प्रकृताभिप्रायेणैव । न त्वापाद्यशरीरान्तर्गततया । तथा सति वक्ष्यमाणव्यभिचारस्यालग्नकत्वप्रसक्तेरित्यवधेयम् ।

व्याप्तिविकलत्वात् तर्काभासोऽयमित्याशयेनाह **वर्णदैर्घ्यादीनामिति** । आदिपदेन रेखारोपितवर्णस्फटिकलौहित्यादिपरिग्रहः । **साधकत्वस्य** अर्थभेदादिसाधकत्वस्य । यद्यपि दैर्घ्यादयो ध्वनिष्विव वर्णेष्वपि स्वाभाविका एवेत्यादिना प्रथमसूत्रे तेषां सत्यत्वव्यवस्थापनान्न मिथ्यात्वमिति न तत्र व्यभिचारः तथाऽपि स्वमते तेषां मिथ्यात्वात् स्वरीत्या व्यभिचारशङ्केयम् । उभयसिद्धत्वोक्तिस्तु साधकत्वमात्रस्योभयसिद्धत्वाभिप्राया, न तु तन्मिथ्यात्वस्याप्युभयसिद्धत्वाभिप्रायेत्यदोषः । तर्ह्यविशेषाच्चाक्षुषत्वादेरपि शब्दानित्यत्वसाधकत्वं स्यादित्याशङ्क्य दृश्यत्वादेश्चाक्षुषत्वादेश्च मिथ्यात्वाविशेषेऽप्यारोपितत्वानारोपितत्वाभ्यां वाऽरोपितत्वेऽपि सांव्यावहारिकत्वासांव्यावहारिकत्वाभ्यां वा विशेषेण तर्कमूलभूताविशेषव्याप्तेरसिद्धेर्नायं दोषप्रसङ्ग इत्याह **चाक्षुषत्वादीनां त्विति** ।

**वा०र०**— **आपाद्येति** । अनेन स्यात् इति मूले शेषः पूरणीय इति सूचितं भवति । **वक्ष्यमाणेति** । आरोपितानां वर्णदैर्घ्यादीनां नगो नागः इत्यादौ प्रतीयमानानां अर्थभेदसाधकत्वेऽपि साध्यसाधकत्वाभावादिति भावः । **स्वमत इति** । शून्यवादिमत इत्यर्थः ।

**वि०ठ०**— **वर्णदैर्घ्यादीनामिति** । नगो नाग इत्यादौ नकारादावारोपितानां दीर्घप्लुतादीनां गजाद्यर्थान्तरसाधकत्वस्येत्यर्थः । आदिपदेन रज्वादावारोपितसृत्यादिहेतूनां ग्रहणम् । तर्ह्यसत्त्वाविशेषाच्चाक्षुषत्वाद्यपि शब्दानित्यत्वादिकं साधयेदित्यत आह **चाक्षुषत्वादीनामिति** । **आरोपेऽपीति** । केवलं मन्दमतीनामिति शेषः । **असांव्यावहारिकत्वादिति** । लोके तादृशसंव्यवहाराभावादित्यर्थः । केचित्तु व्यावहारिकत्वाभावादित्यर्थ इत्याहुः । **यत्रोदाहरण इति** । रज्जुसर्पादावित्यर्थः । **यत्र चेति** । वर्णदैर्घ्यादावित्यर्थः ।

**चषकः**— वर्णदैर्घ्यादीनां वर्णेष्वारोपितानां दीर्घत्वादीनाम् ।

**॥ इति मिथ्यात्वेन सम्प्रतिपन्ने साधकत्वविप्रतिपत्तेः, साधकत्वेन सम्मते च मिथ्यात्वविप्रतिपत्तेः साध्यासाधकतातादवस्थ्यम् ॥**

* * *

**॥ अथ च तत्रान्ते विप्रतिपन्नस्य साधनश्च साध्यासाधकता–अनवस्थाभ्यां अशक्यम् ॥**

२४ **सु०**— विप्रतिपत्तौ साधकत्वं मिथ्यात्वं वा साधयिष्यामीति चेत् । किं सत्येन प्रमाणेनोत मिथ्याभूतेन । आद्ये तूक्तमेवोत्तरम् । द्वितीये दोषमाह **तस्य चेति** ।

## अनु०— तस्य च

**न हि क्वाप्यस्माकं मिथ्याभूतस्य साधकत्वं सम्मतम् । अतस्तस्यापि साधकत्वं साध्यमेव ।**

**तस्यापि साधकत्वं साधयिष्यामीत्यत आह इतीति ।**

## इत्यनवस्था स्यात्

**पूर्वोक्तप्रकारेणेत्यर्थः । न हि सर्वमसत्यं साधकमित्येकं प्रमाणमस्ति, नापि सद्वादी कदाऽपि सत्त्वासत्त्वोदासीनेन प्रमाणेन साध्यसिद्धिमङ्गीकुर्यात्, येनानवस्थाशान्तिर्भवेदिति ।**

**परि०— विप्रतिपत्तौ साधकत्वमिति** । मिथ्याभूतस्येति योज्यम् । मिथ्यात्वं वेत्यत्र साधकस्येति च ॥ **आद्ये तूक्तमेवोत्तरमिति** । सत्यं प्रमाणं दृश्यमदृश्यं वा । आद्ये दृश्यत्वहेतोर्व्यभिचारः । अन्त्येऽज्ञानासिद्धिरित्यर्थः । न विप्रतिपन्नं प्रत्यक्षं प्रमाणतयोपन्यसितुं शक्यम् । येनाज्ञानासिद्धिर्न लगेत् । किन्त्वनुमानरूपमेवेत्यन्ये । 'सता चेद् द्वैतसिद्धिः स्यान्न सिद्धं चान्यसाधनमि'त्युत्तरमुक्तमेवेत्यर्थ इत्यपरे । न चैवं द्वितीयकल्पेऽपि 'न सिद्धं चान्यसाधनमि'त्युत्तरमुक्तमेवेति वाच्यम् । अनवस्थोक्त्या पुनस्तस्यैवार्थस्यात्र स्मरणमित्यन्ये ॥ ***दृश्यत्वहेतोरसिद्धिव्यभिचारयोरुक्तिः ॥***

**यादु०— आद्ये तूक्तमेवेति** । 'सता चेद् द्वैतसिद्धिः स्यादि'त्युत्तरं प्रथमाधिकरणे उक्तमेवेत्यर्थः । सत्यं प्रमाणं दृश्यं चेत् तत्र व्यभिचारः । न चेदज्ञानासिद्धिरित्युत्तरमुक्तमेवेत्यर्थ इति केचित् । तत्र तत्सत्यं प्रमाणं अप्रत्यक्षं चेत् कथमज्ञानासिद्धिरुद्भाव्येतेति चिन्त्यम् ।

**वं०प०—** ननु नानवस्था, सर्वमसत्यं साधकमित्येतदेकेनैव प्रमाणेन साध्यते, न परम्पराऽङ्गीक्रियते । तथा अस्तु वा परम्परा, तथाऽपि नानवस्था । सत्त्वासत्त्वोदासीनेन प्रमाणेन साध्यसिद्ध्यङ्गीकारादित्यत आह **न हीत्यादिना** । **अङ्गीकुर्यात्** सत्त्वासत्त्वोदासीनस्य प्रमाणस्य बुद्धावेवानारोहेण तेन साध्यसिद्ध्ययोगादित्यर्थः ।

**कं०रा०— आद्ये त्विति** । मिथ्याभूतस्य साधकत्वं साधकस्य मिथ्यात्वं वा येन लिङ्गेन साध्यते तस्य सत्यत्वपक्षे तल्लिङ्गं दृश्यं न वा । दृश्यत्वे दृश्यत्वहेतोस्तत्रैव व्यभिचारः । अदृश्यत्वे तस्याज्ञानासिद्धिरिति दूषणमुक्तप्रायमेवेत्यर्थः । ननु सर्वमसत्यं साधकमित्येकेन मिथ्याभूतप्रमाणेन साध्यते, तथा च नानवस्था । मिथ्याभूततत्प्रमाणसाधकताया अपि तेनैव सिद्ध्या तत्सिद्ध्यर्थं प्रमाणान्तरानपेक्षणादित्यत आह **नहीति** । ननु

सदित्यसदिति वाऽङ्गीकृतेन प्रमाणेन साध्यसिद्धिरिति न ब्रूमः येन व्यभिचारादिकमनवस्था वा स्यात् । किं नाम उभयोदासीनेन प्रमाणस्वरूपमात्रेण, अतो न कश्चिद्दोष इत्यत आह **नापीति** । अनवस्थाशान्तिरित्युपलक्षणं व्यभिचारादिपरिहारोऽपीत्यपि ग्राह्यम् ।

**श्रीनिधि०— मिथ्यात्वं वेति** । साधकस्येति शेषः । **आद्ये तूक्तमेवोत्तरमिति** । सत्यभूतं प्रमाणं दृश्यमदृश्यं वा । आद्ये दृश्यत्वहेतोस्तत्र व्यभिचारः स्याद् । द्वितीये अज्ञानासिद्धिता तस्येति उक्तमुत्तरमित्यर्थः। नन्वनवस्थादोषो नास्ति क्रमेण साधने खलु सः । युगपदेव सर्वेषामसतां साधकत्वसाधनात् । यद्वा साधनस्य विप्रतिपत्त्यधीनत्वात् । विप्रतिपत्तेश्च सार्वकालिकत्वाभावात् नानवस्थेत्यत आह **न हि सर्वमसत्यं साधकमिति** । सर्वमसत्यं साधकमित्येतदर्थविषयकमित्यर्थः । अनुपलम्भादिति भावः । द्वितीयस्योत्तरं **नापि सद्वादीति** । **साध्यसिद्धिमङ्गीकुर्यादिति** । एवमङ्गीकार एव विप्रतिपत्त्यभाव इति भावः । येन तदा विप्रतिपत्त्यभावान्न साधनप्रसक्तिरित्यनवस्था न स्यादित्यर्थः ।

**शे०चं०— विप्रतिपत्ताविति** । अत्र वाशब्दो व्यवस्थितविकल्पार्थः । मिथ्यात्वेन सम्प्रतिपन्ने साधकत्वविप्रतिपत्तिश्चेत् तस्य साधकत्वं साधयिष्यामि । साधकत्वेन सम्प्रतिपन्ने मिथ्यात्वविप्रतिपत्तिश्चेत् तन्मिथ्यात्वं साधयिष्यामीत्यर्थः ॥ **आद्ये तूक्तमेवोत्तरमिति** । 'सता चेद् द्वैतसिद्धिः स्यादि'त्युत्तरं जिज्ञासाधिकरणे उक्तमेवेत्यर्थः ।

**वा०र०—** ननु प्रश्न इति वचननिमित्तेयमनवस्था प्रश्नाद्यभावे शान्ता भविष्यति इत्यत आह **नापि सदादीति** मूलम् । तथा च सत्त्वासत्त्वविकल्पविश्रान्त्यभावात् अनवस्था स्यादेवेति भावः ।

**स०व्र०— विप्रतिपत्ताविति** । अत्र वाशब्दो विकल्पार्थः । मिथ्यात्वेन सम्प्रतिपन्ने साधकत्वविप्रतिपत्तिश्चेत् तस्य साधकत्वं साधयिष्यामि । साधकत्वेन सम्प्रतिपन्ने मिथ्यात्वविप्रतिपत्तौ च मिथ्यात्वं साधयिष्यामीति विकल्पो द्रष्टव्यः । **उक्तमेवोत्तरमिति** । साधकत्वेनाभिमतप्रमाणस्य सत्यत्वे प्रष्टव्यम् । तत्किं दृश्यमदृश्यं वेति । आद्ये दृश्यत्वहेतोस्तत्र व्यभिचारः । द्वितीये अज्ञानासिद्धिः इत्युक्तमेवोत्तरमित्यर्थः ।

**विठ्ठ०— साधकत्वं मिथ्यात्वं वेति** । मिथ्यात्वेन प्रतिपन्ने साधकत्वस्य विप्रतिपत्तौ साधकत्वं साधयिष्यामि । साधकतासम्प्रतिपन्ने तु मिथ्यात्वं साधयिष्यामीत्यर्थः । **आद्ये तूक्तमेवेति** । 'सता चेत् द्वैतसिद्धिः स्यात्' इत्युत्तरं जिज्ञासाधिकरणे उक्तमित्यर्थः । केचित्तु तत्सत्यं प्रमाणं दृश्यमदृश्यं वा । आद्ये दृश्यत्वस्य तत्र व्यभिचारः । द्वितीयेऽज्ञानासिद्धिरित्युक्तप्रायमित्याहुः । अत्र तु सत्यं प्रमाणम् । अप्रत्यक्षं चेत्तर्ह्यज्ञानासिद्धिः कथं दूषणमिति चिन्त्यम् । ननु परम्पराङ्गीकारे खल्वनवस्था न चैवं स्वाध्यायोऽध्येतव्य इतिवदेकेनैव प्रमाणेन सर्वमसत्यं साधकमिति निर्णयोपपत्तेः सत्त्वासत्त्वोदासीनप्रमाणेन साध्यसिद्ध्यङ्गीकारे त्वनवस्थाशङ्कैव नास्तीत्यतः पक्षद्वयं क्रमेण दूषयति **न हि सर्वमित्यादिना** ।

।। इति विप्रतिपन्नस्य साधनञ्च साध्यासाधकता–अनवस्थाभ्यां अशक्यम् ।।

।। इति दृश्यत्वस्य मिथ्यात्वे साध्यासाधकतादोषस्य निराकरणायोगः ।।

।। इति तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य
असिद्धिव्यभिचाराभ्यां दत्तस्य दूषणस्य समर्थनम् ।।

।। इति तत्र दृश्यत्वहेतोः मिथ्यात्वसत्यत्वाभ्यां विकल्प्य
असिद्धिव्यभिचाराभ्यां दूषणं तत्समर्थनञ्च ।।

* * *

।। अथ च तत्र दृश्यत्वहेतोः प्रमाणबाधकथनम् ।।

२५ **सु०— एवमसिद्धिव्यभिचाराभ्यामनुमानं निराकृत्य प्रमाणबाधं चाह सत्त्वं चेति ।**

**अनु०— सत्त्वं चास्यानुभूतितः ।**

**अस्य प्रपञ्चस्य । अनुभूतितः सिद्धम् 'अतो बाधितविषयं चानुमानमि'ति शेषः ।**

**परि०— एवमसिद्धिव्यभिचाराभ्यामिति** । अत्रासिद्धिपदेनाज्ञानासिद्ध्यन्यतरवादिरीत्या स्वरूपासिद्धी ग्राह्ये ।।

**श्रीनिधि०— असिद्धिव्यभिचाराभ्यामिति** । असिद्धिः अज्ञानासिद्धिः ।

**शे०चं०— अनुभूतित इति** । 'आद्यादिभ्य उपसङ्ख्यानात्' तृतीयार्थे तसिः ।।

**वा०र०— आद्यादिभ्यः इति** । तस्यादित उदात्तमर्धह्रस्वमित्येतत्सूत्रीयादित इति सप्तम्यर्थे तसिज्ञापनेन तन्मूलकसार्वविभक्तिकतसिविधायकप्रतियोगे पञ्चम्यास्तसिरित्येतत्सूत्रीयादिमध्यपृष्ठपार्श्वेत्याद्युपसङ्ख्यानेन तृतीयार्थे तसिरित्यर्थः । आदिमध्यपृष्ठपार्श्वादिभ्यः उपसङ्ख्यानमित्यस्यायं सङ्ग्रह इति तृतीयषष्ठयोः गीताभाष्यटीकाव्याख्याने पूर्वग्रन्थव्याख्याने च टीकाकारीयवचनादिति ज्ञेयम् ।

।। इति तत्र दृश्यत्वहेतोः प्रमाणबाधकथनम् ।।

* * *

॥ अथ तत्र जडत्वपरिच्छिन्नत्वादिहेतूनां निराकरणम् ॥

॥ अथ च तत्र जडत्वाद्यनुमानानां अनुभूतिविरोध–व्यभिचार–असिद्ध्यादिभिर्दूषणम् ॥

२६ **सु०—** न केवलं दृश्यत्वानुमानस्यानेन दोषेणाभासत्त्वं, किन्तु यदन्यदपि प्रपञ्च-मिथ्यात्वेऽनुमानं जडत्वं वा परिच्छिन्नत्वं वा परैरुच्यते तस्यापीत्याह **अनुभूतीति** ।

## अनु०— अनुभूतिविरोधेन मिथ्यात्वे मा न काचन ।

उपलक्षणमेतत्, पूर्वोक्तव्यभिचारासिद्धिभ्यां चेत्यपि द्रष्टव्यम् । तथाहि । जडत्वा-दिकं सत्यं मिथ्या वा ॥ आद्ये जडत्वादिमन्न वा । प्रथमे व्यभिचारः । द्वितीयेऽप-सिद्धान्तः ॥ मिथ्या चेत् साध्यसिद्धिर्नेति ।

**परि०—** **अपसिद्धान्त इति** । परेण शून्यादन्यत्सर्वं जडं परिच्छिन्नं चेत्यभ्युपगमादिति भावः ।

**वं०प०—** **द्वितीय इति** । जडत्वादिहेतुना सर्वस्यापि मिथ्यात्वसाधनात् स्वस्यापि सर्वान्तःपातित्वेन स्वस्मिन्नपि मिथ्यात्वं साधयतीत्यङ्गीकृतम् । तत्र स्वस्मिन् स्वस्याभावे तत्र हेतोरेवाभावेन मिथ्यात्वसाधन-मयुक्तमित्यपसिद्धान्तः । जडे जडत्वाभावे चेतनत्वापत्त्या वा अपसिद्धान्तः ।

**कं०रा०—** **अपसिद्धान्त इति** । शून्यातिरिक्तस्य सर्वस्य परेण जडत्वपरिच्छिन्नत्ववत्ताया अङ्गीकृत-त्वादिति भावः ।

**शे०चं०—** **पूर्वोक्तेति** । 'मिथ्या चेत्साध्यसिद्धिर्न व्यभिचारो न चेद्भवेदि'ति पूर्वोक्तेत्यर्थः ॥ **सत्यं मिथ्या वेति** । यद्यपि 'इयं च मा । मिथ्या चेत्साध्यसिद्धिर्ने'ति पूर्वग्रन्थानुरोधादसिद्धिव्यभिचाराभ्यामिति पूर्वोत्तरदूषणातिदेशग्रन्थानुरोधाच्च मिथ्या सत्यं वेत्येवं विकल्पं मनसि निधाय तत्क्रमेणैव दूषणाभिधान-मुचितम् । तथाऽपि मिथ्यासत्ययोः सत्यमर्थतः प्रधानमिति विकल्प्य दूषणाभिधानमिदम् । 'इयं च मे'त्यादि-पूर्वभाष्ये तु परेणाङ्गीचिकीर्षितत्वान्मिथ्यात्वकल्पस्य प्राधान्यमभिप्रेत्य मिथ्या सत्यं वेति विकल्प्य तत्क्रमेणैव दूषणमुक्तम् । तदनुसारेणैव चासिद्धिव्यभिचाराभ्यामिति दूषणातिदेशः कृत इत्यवधेयम् ॥ **व्यभिचार इति** । जडत्वादिहेतुमति जडत्वादौ मिथ्यात्वाभावादिति भावः ॥ **अपसिद्धान्त इति** । जडत्वादेर्जडत्वादिमत्त्वाभावे चेतनत्वापरिच्छिन्नत्वप्रसक्तेरपसिद्धान्त इति भावः ॥ **मिथ्या चेत्साध्यसिद्धिर्नेतीति** । जडत्वादेर्मिथ्यात्वात् तेन मिथ्यात्वरूपसाध्यसिद्धिर्न स्यात् । न हि शब्देऽविद्यमानेन चाक्षुषत्वेन तदनित्यत्वं सिद्ध्यतीति भावः ।

**वा०र०— अतिदेशेति** । पूर्वटीकाग्रन्थेत्यर्थः । तर्हि पूर्वमपि कुतो न कृतमित्यत आह **इयं च मेत्यादीति** ।

**स०व्र०— मिथ्या चेत् साध्यसिद्धिर्नेति** । जडस्य मिथ्यात्वे तेन मिथ्यात्वरूपसाध्यसिद्धिः न स्यात् । न हि अविद्यमानेन चाक्षुषत्वेन शब्दानित्यत्वं सिद्ध्यतीति भावः ।

**विठ्ठ०— अपसिद्धान्त इति** । शून्यादन्यस्य जडत्वाद्यङ्गीकारात् परेणेति भावः ।

* * *

**॥ अथ च तत्र प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का तन्निवारणञ्च ॥**

**॥ अथ च तत्र प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का, तन्निवारकतया प्रत्यक्षस्य सार्वकालीनत्वञ्च ॥**

२७ **सु०— 'भवेदसत्त्वमनुमानानां यद्यनुभवविरोधो भवेत्, न चासावस्ति । मिथ्यात्वापरपर्यायं बाध्यत्वं ह्यनुमानसाध्यम्; न च तदभावः प्रत्यक्षेण वेद्यः, तस्य वर्तमानमात्रविषयत्वेन कथञ्चिद्वर्तमानकालीनबाधाभावविषयत्वेऽपि कालान्तर(गत)भाविबाधाभावविषयत्वायोगादि'त्यत आह अतीतेति ।**

## अनु०— अतीतानागतौ कालावपि नः साक्षिगोचरौ ।

**अत्र 'अतीत'ग्रहणं प्रासङ्गिकम् । न केवलं वर्तमान इत्यपेरर्थः । नः सर्वेषाम् । अन्यथा तद्विशिष्टव्यवहारानुपप(त्ते)त्तिरिति भावः ।**

**परि०—** वर्तमानकालेऽपि सर्वपुरुषीयबाधाभावाग्रहणात् **कथञ्चिद्वर्तमानकालीनेत्युक्त**मित्येके । अधिष्ठानगताबाध्यत्वमेव वर्तमानेऽपि विषये च घटादिगतमबाध्यत्वमिति **कथञ्चिदि**त्युक्तमित्यन्ये । अनागतस्यैवात्र प्रस्तुतत्वात् आह **अत्रातीतग्रहणमिति** । प्रकृतोपयोगाय आह **नः सर्वेषामपीति** । एते च वयं च वयम् । 'त्यदादीनि सर्वैर्नित्यमि'त्यस्मदादेशो शेष इति भावः ॥ **अन्यथा तद्विशिष्टेति** । अतीतानागतकालविशिष्टः 'आसीत्, भविष्यती'त्यादिरूपो व्यवहार इत्यर्थः । कालादेः साक्ष्यन्यप्रमाणगोचरतायाः आनुमानिकपादे, वैशेषिकनये, वादावल्यां च निरासादिति भावः ।

**यादु०— अन्यथा तद्विशिष्टेति** । न चानुमानाद्युपनीतकालमादाय विशिष्टव्यवहारोपपत्तिरिति वाच्यम् । 'तदेतदिति सर्वं वा दृश्यं वा स्मृतिगोचरम् । साक्षिसिद्धेन कालेन खचितं ह्येव वर्तत' इत्यत्र प्रथमाध्याये काले प्रमाणान्तरप्रवृत्त्यसम्भवस्य निपुणतरमुपपादितत्वादिति भावः ।

**वं०प०— बाध्यत्वं** प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम् ।

**कं०रा०— अन्यथेति** । अतीतानागतकालयोः साक्षिगोचरत्वाभावे तत्कालविशिष्टवस्तुव्यवहारानुपपत्तेरित्यर्थः ।

**श्रीनिधि०— कथञ्चिद्वर्तमानकालीनबाधाभावविषयत्वेऽपीति** । प्रत्यक्षं व्यावहारिकसत्त्वविषयमित्यभिमानेन **कथञ्चित्** इत्युक्तम् । नन्वतीतकाले वर्तमानकाल इव साधनाभावः तस्यापसिद्धान्तः । अन्यथा इदानीं सत्त्वेन प्रतीत्ययोगात् । तथा चातीतग्रहणं किमर्थमित्यत आह **अत्रेति** । नः अस्माकमित्यर्थत्वे च तं प्रत्युपन्यासोऽसम्मतः स्यादत आह **नः सर्वेषामिति** ।

**शे०चं०— वर्तमानमात्रविषयत्वेनेति** । प्रत्यक्षस्य वर्तमानमात्रग्राहकत्वात् वर्तमानकाले यदसत्त्वं तदभावरूपसत्त्वग्राहकत्वसम्भवेऽपि कालत्रयेऽपि यदसत्त्वं तदभावरूपसत्त्वग्राहकत्वं नोपपद्यते । तस्य कालान्तराविषयत्वेन तत्सम्बध्यसत्त्वाभावग्राहकत्वासम्भवादिति भावः । वर्तमानकाले पारमार्थिकस्यासत्त्वस्य अनुमानवेद्यत्वाद्व्यावहारिकबाधाभावविषयस्य प्रत्यक्षस्यानुमानप्रमेयभूतपारमार्थिकबाधाभावविषयकत्वेन न तदंशेऽपि बाधकत्वमिति भावेन कथञ्चिदित्युक्तम् । ननु कालान्तरे बाधो भविष्यतीति शङ्कितुरनागतकालविषयकत्वात् तत्रत्यबाधाभावविषयकत्वाभावेन प्रत्यक्षस्य न बाधकत्वमित्येवाभिप्रेतत्वात् तं प्रत्यनागतकालविषयत्वमात्रसाधनेनाप्युक्तशङ्कापरिहारसम्भवात् अतीतग्रहणमनर्थकमित्यत आह **अत्रातीतेति** ॥ **अन्यथा तद्विशिष्टेति** । न चानुमानोपनीतकालमादाय तद्विशिष्टव्यवहारोपपत्तिरिति वाच्यम् । 'पक्षीकर्तुमशक्यत्वान्नानुमा तत्र वर्तते । तदेतदिति सर्वं च दृश्यं वा स्मृतिगोचरम् । साक्षिसिद्धेन कालेन खचितं ह्येव वर्तते' इत्यादिना प्रथमस्य चतुर्थे, काले प्रमाणान्तरप्रवृत्त्यसम्भवस्य निपुणतरमुपपादितत्वादिति भावः ।

**वा०र०— भवेदसत्त्वमिति** मूले असत्त्वं आभासत्वम् । शङ्कितुः इत्यस्येत्येवाभिप्रेतत्वादित्युत्तरेणान्वयः । अतीतवर्तमानयोरपि प्रागुपस्थितेर्व्याचष्टे **अनागतकालेति** । **प्रपञ्चस्य तु इति** । न तेन तत्सिद्धिः इत्यनेन सम्बन्धः । तत्र हेतुः साक्ष्यविषयत्वात् इति योज्यम् । यद्वा न तेन इत्यत्र तस्येति शेषः ।

**स०व्र०— वर्तमानमात्रविषयत्वेनेति** । वर्तमानमात्रग्राहकस्य प्रत्यक्षस्य वर्तमानकाले यदसत्त्वं, तदभावरूपसत्त्वग्राहकत्वसम्भवेऽपि कालत्रयेऽपि यदसत्त्वं, तदभावरूपसत्त्वग्राहकत्वं नोपपद्यते । कालान्तराविषयकत्वेन तत्सम्बध्यसत्त्वाभावग्राहकत्वासम्भवादिति भावः । वर्तमानकाले पारमार्थिकसत्त्वाभावस्यानुमान-

वेद्यत्वात् प्रत्यक्षस्य व्यावहारिकबाधाभावविषयकत्वेनानुमानप्रमेयपारमार्थिकबाधाभावाविषयकत्वात् न तदंशेऽपि बाधकत्वमित्याशयेन कथञ्चिदित्युक्तम् । कालान्तरे बाधकं भविष्यतीति शङ्कितुरनागतकालविषयकत्वेन तत्रत्य-बाधाभावाविषयकत्वात् न प्रत्यक्षस्य बाधकत्वमित्येवाभिप्रेतत्वात् । प्रत्यक्षस्यानागतकालविषयकत्वमात्र-साधनेनाप्युक्तशङ्कापरिहारसम्भवात् अतीतग्रहणमनर्थकमित्यत आह **अतीतेति** ।

**विठ्ठ०**— वर्तमानकालेऽपि शून्यतत्त्वज्ञानवतां बाधो दृश्यत इत्याशयेन **कथञ्चिद्वर्तमानकालीने**-त्युक्तमित्याहुः । अनागतस्यैव प्रस्तुतत्वादाह **अत्रातीतेति** । **अन्यथा तद्विशिष्टेति** । अतीतादिकालस्य साक्षि-भास्यत्वाभावे आसीद्भविष्यतीत्यतीतानागतकालविशिष्टव्यवहारो न स्यात् । न च अनुमानाद्युपनीतकालमादाय विशिष्टव्यवहारोपपत्तिरिति वाच्यम् । पक्षीकर्तुमशक्यत्वान्नानुमानं तत्र वर्तते । **तदेतदिति** । सर्वं च दृश्यं वा स्मृतिगोचरं साक्षिसिद्धेन कालेन खचितं ह्येव वर्तत इत्यादिना आनुमानिकपादे अतीतादिकालस्यानुमानादि-गम्यताया निरस्तत्वादिति भावः ।

**।। इति प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का,**
**तन्निवारकतया प्रत्यक्षस्य सार्वकालीनत्वञ्च ।।**

* * *

**।। अथ च तत्र प्रत्यक्षस्य सार्वकालीनबाधाभावविषयत्वेन साक्षिवेद्यत्वम् ।।**

२८ **सु०**— किमतो यद्येवमवर्तमानोऽपि कालः साक्षिगोचर इत्यत आह **तदिति** ।

## अनु०— तत्सम्बन्धितया सत्त्वमपि

**कालान्तरसम्बन्धितया सत्त्वम् अबाध्यत्वम् । न केवलं वर्तमानकालीनबाधाभावो-ऽनुभववेद्यः, किन्तु सर्वकालगतोऽपीत्यर्थः । तत्कथमित्यत उक्तं दृष्टस्येति ।**

## दृष्टस्य साक्षिगम् ।

प्रत्यक्षादिप्रतीतिविषयस्य । प्रत्यक्षादिप्रतीतीनां प्रामाण्यस्य साक्षिणा ग्रहणादिति भावः ।

**परि०**— अपिपदस्य तत्सम्बन्धितयापीत्यन्वयमुपेत्यार्थमाह **न केवलमिति** । साक्षिगमित्यस्यार्थोऽ**नुभववेद्य इति** । दृष्टपदं ज्ञानमात्रपरमित्युपेत्यार्थमाह **प्रत्यक्षादीति** । 'पश्यार्थैश्चानालोचन' इति ज्ञानमात्रेऽपि दृशेः प्रयोगादिति भावः ।

**श्रीनिधि०**— **अनुभववेद्य इति** । साक्षिवेद्य इत्यर्थः ।

**शे०चं०**— **कालान्तरसम्बन्धितयेति** । अनागतकालसम्बन्धितयेत्यर्थः । नन्वस्त्वेवं साक्षिग्राह्यस्याकाशकालदिगात्ममनःसुखादिरूपप्रपञ्चस्य साक्षिणा त्रिकालाबाध्यत्वरूपसत्त्वसिद्धिः । तदितरस्येन्द्रियलिङ्गशब्दगम्यस्य प्रपञ्चस्य तु साक्ष्यविषयत्वान्न तेन तत्सिद्धिरित्यभिप्रेत्य शङ्कते **तत्कथमिति** । दृष्टस्येत्यस्य प्रत्यक्षप्रमाणदृष्टमात्रार्थत्वेऽनुमानादिविषयस्य धर्माधर्मादेरदृष्टत्वेन दृष्टस्येत्यनेनासङ्ग्रहात् तत्त्रिकालाबाध्यतायाः साक्ष्यसिद्धत्वात् तदसिद्धिरेव स्यादित्यतो विशेषवाचकपदस्य सामान्योपलक्षणतया दृष्टस्येत्यनेनैव तल्लाभान्नानुपपत्तिरित्याशयेन तद्व्याचष्टे **प्रत्यक्षादीति** । ननु प्रत्यक्षादिप्रमाणविषयीकृतत्वमात्रकथनेन कथमिन्द्रियादिगम्यस्य प्रपञ्चस्य त्रिकालाबाध्यतायाः साक्षिसिद्धत्वलाभ इत्यतोऽभिप्रायमाह **प्रत्यक्षादिप्रतीतीनामिति** । **प्रामाण्यस्य** याथार्थ्यस्य । ज्ञानगतस्य याथार्थ्यलक्षणप्रामाण्यस्य स्वतस्त्वेन ज्ञानग्राहकग्राह्यत्वनियमात् साक्षिणश्च ज्ञानग्राहकत्वात् तत्प्रामाण्यग्राहकत्वमावश्यकमिति भावः ।

**वा०र०**— **तदितरस्येति** । आकाशादीतरस्येत्यर्थः । विशेष्यावृत्त्यप्रकारकत्वभ्रमभिन्नज्ञानत्वादिरूपस्य वा यथार्थज्ञानसाधनत्वरूपस्य वा प्रामाण्यस्य साक्षिग्राह्यत्वानङ्गीकारात् विवक्षितं प्रामाण्यपदार्थमाह **प्रामाण्यस्य याथार्थ्यस्येति** । साक्षात् यथावस्थितज्ञेयविषयीकारित्वरूपस्येत्यर्थः ।

**स०व्र०**— **साक्षिणेति** । चक्षुरादेर्वर्तमानमात्रग्राहकत्वेऽपि अस्मदभिमतसाक्षिणः अतीतानागतकालग्राहकताया अपि विद्यमानत्वात् कालत्रयेऽपि यदसत्त्वं, तदभावरूपात्यन्तिकाबाध्यत्वग्राहकत्वस्य सामग्रीसत्त्वप्रयुक्तस्य निर्बाधस्य परित्यागायोगात् । तद्बाधस्यैव च 'सत्त्वं चास्यानुभूतितः' इत्यादिना अभिधानान्नैष दोष इत्यर्थः । एतच्चाभ्युपेत्योक्तम् । सन् घट इत्यादिबाह्यप्रत्यक्षविरोधोऽपि युक्त एव । चक्षुरादिगृहीतस्य वर्तमानकालसत्त्वस्यापि सामान्याभावरूपासत्त्वाभावरूपत्वात् । विशेषस्य प्रत्येकमपि सामान्याभावाभावत्वस्य स्थितत्वात् । अनेनैवाभिप्रायेण 'स्वकाले ह्यस्तितां गृह्णन् साक्षात्कार' इत्यादिवचनमपि व्याख्येयम् । न तु तत्र त्रिकालीनबाधाभावव्याप्यैककालीनबाधाभावग्राहकत्वमभिप्रायः । तथा सति प्रत्यक्षस्य व्याप्यग्राहकत्वापत्त्या 'प्रत्यक्षबाधिताश्चे'त्याद्युपक्रमविरोधित्वात् । प्रत्यक्षबाधिता इत्यस्य प्रत्यक्षसिद्धव्याप्तिकानुमानबाधिता इत्यर्थकल्पनस्य, अस्मदुक्तरीत्या यथास्थितस्यैवोपपन्नतया, असम्भवादिति बोध्यम् ।

**॥ इति प्रत्यक्षस्य सार्वकालीनबाधाभावविषयत्वेन साक्षिवेद्यत्वम् ॥**

* * *

**॥ अथ च तत्रान्ते शुक्तिरजतादेश्च सार्वकालिकबाधाभावविषयत्वाभावात्**
**अनुभवविरोधो दुर्निवारः ॥**

२९ **सु०—** 'न हि विषयस्य त्रैकालिकाबाध्यत्वमनन्तर्भाव्य तत्प्रतीतेः प्रामाण्यं शक्यग्रहणम् । यदि प्रतीतिं गृह्णन् साक्षी तत्प्रामाण्यग्रहणस्वभावत्वात्तद्गृह्णंस्तद्विषयस्य त्रैकालिकाबाध्यत्वं व्यवस्थापयेत् तदा शुक्तिरजतादिप्रतीतेरपि स एव ग्राहक इति तस्या अपि प्रामाण्यं गृह्णीयात् । तथा च तद्विषयस्यापि रजतादेस्त्रैकालिकाबाध्यत्वं सिद्ध्येत्' इत्यतो दृष्टशब्दं व्याख्याति **दृढेति** ।

## अनु०— दृढदृष्टं तु यद्दृष्टं दृष्टाभासस्ततोऽपरम् ।

यन्निर्दोषत्वेनावधृतया प्रतीत्या विषयीकृतं, तदेव दृष्टमित्युक्तम् । कुतः । इतरस्य सम्मुग्ध(स्य)दृष्टस्य दृष्टाभासत्वात् । मुख्यामुख्ययोश्च मुख्यग्रहणस्य न्याय्यत्वात् । कृतव्युत्पादनं चैतत्प्राक् ।

**परि०—** **त्रैकालिकाबाध्यत्वमिति** । त्रिकालसम्बन्धी यो बाधः निषेधः तदभावरूपमबाध्यत्वमित्यर्थः । शङ्कते **यदीति** । **त्रैकालिकाबाध्यत्वं** कालत्रयसम्बन्धिनिषेधाप्रतियोगित्वं, व्यवस्थापयेदित्यर्थः । तुरवधारणे । तदित्यध्याहृतेनान्वेतीत्युपेत्याह **तदेवेति** । ननु अस्त्वेवम् । प्रपञ्चदृष्टिरपि शुक्तिरूप्यदृष्टिरिव किं नेत्यादि चोद्यनिरासायाह **कृतव्युत्पादनं चैतदिति** । 'सत्त्वं चास्यानुभूतित' इत्यादिना 'दृष्टाभासस्ततोऽपरमि'त्यन्ते(त्यने)नोक्तं प्रपञ्चमिथ्यात्वसाधकानां बाधितविषयत्वादिप्रमेयं सर्वं प्रकृत्यधिकरणे 'सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितमि'त्यादेः, 'एवमक्षजमानत्वसिद्धां विश्वस्य सत्यताम् । किमिति स्थापयेन्नायं निर्दोषज्ञानशक्तित' इत्यन्तस्यानुव्याख्यानस्य व्याख्यावसर इति भावः । एतेन बाधभावाभावरूपवैधर्म्यान्न स्वप्नादिवद्विश्वमिथ्यात्वमिति 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रस्य वर्णकान्तरं दर्शितम् ॥ ***मिथ्यात्वहेतूनां बाधितविषयत्वोक्तिः ॥***

**यादु०—** ननु ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्राहकत्वं स्वभावत एव चेत् कथं प्रपञ्चो दृढदृष्टः, शुक्तिरजतादिकं तु सम्मुग्धदृष्टमिति विवेको ज्ञातुं शक्य इत्यत आह **कृतव्युत्पादनमिति** । प्रथमाध्याये 'अतो दोषप्रतीतस्य सत्यत्वं साक्षिणा मतमि'त्यत्र न साक्षी ज्ञानं गृह्णन् प्रमाणमेवैतदिति गृह्णाति, किं तर्ह्यदोषं चेत्

प्रमाणं, सदोषं चेदप्रमाणमिति व्यवस्थया । यदा त्वर्थित्वेन प्रामाण्यं निर्धारयिषितं, तदा सजातीयविजातीयसंवादविसंवादभावाभावलक्षणया परीक्षया दोषाभावं निश्चित्य प्रामाण्यमवधारयति । दोषदर्शने त्वप्रामाण्यम् । प्रपञ्चप्रतीतेश्च प्रयत्नेनान्विष्यापि दोषमपश्यन् प्रामाण्यमेवावधारयतीति तत्सत्यत्वं साक्षिसिद्धम् । न चैवं शुक्तिरजतादीनां, दोषाप्रतीतिदशायां प्रामाण्यानवधारणात् । तत्प्रतीतौ त्वप्रामाण्यनिश्चयात् । यदा तु निष्कम्पप्रवृत्त्यनुरोधेन तत्रापि कदाचित् प्रामाण्यावधारणं तन्मानसमेव, न साक्षिरूपमि'त्यादि व्युत्पादनं कृतं, तत्रैवानुसन्धेयमित्यर्थः ।

**वं०प०**— **शक्यग्रहणं** साक्षिणा ।

**श्रीनिधि०— मुख्यामुख्ययोश्च मुख्यग्रहणस्य न्याय्यत्वादिति** । दृष्टपदेनेति शेषः । **मुख्यं च दृष्टमिति** । **कृतव्युत्पादनमिति** । 'अतो दोषप्रतीतस्य सत्यत्वं साक्षिणां मतमि'त्यस्य व्याख्यानावसरे 'ज्ञानग्राहकः साक्षी व्यवस्थयैव प्रामाण्यं गृह्णातीति न हठात् । दोषाभावे प्रमाणं तद्भावे त्वप्रमाणमिति । अनन्तरं परीक्षादिसहकृतः दोषाभावे प्रामाण्यं तद्भावे तत्सहकृतः अप्रामाण्यं गृह्णाति । न चैवं प्रामाण्यस्य परतस्त्वापातः । परीक्षायाः प्रतिबन्धनिरासमात्रहेतुत्वादि'त्यादिरीत्या कृतव्युत्पादनमित्यर्थः । एतन्निर्दोषप्रतीतेरेव साक्षी प्रामाण्यं गृह्णाति न तु प्रतीतिमात्रस्येत्येतद् प्रमेयम् ।

**शे०चं०**— अस्तु ज्ञानप्रामाण्यग्राहकत्वं साक्षिणः तथाऽपि तेन तत्तज्ज्ञानप्रामाण्यसिद्धिरेव स्यान्न तु तज्ज्ञानविषयप्रपञ्चस्य त्रिकालाबाध्यत्वसिद्धिरित्यतः प्रामाण्यस्योक्तरूपाबाध्यत्वघटितमूर्तिकत्वात् तद्ग्राहकस्य साक्षिणः तत्तज्ज्ञानविषयस्य त्रिकालाबाध्यत्वरूपसत्त्वग्राहकत्वं नानुपपन्नमित्याशयेनाह **न हीति** । **तद्गृह्णन्** प्रतीतेः प्रामाण्यं गृह्णन् । **तद्विषयस्य** प्रतीतिविषयस्य, घटादेरित्यर्थः । न च शुक्तिरजतादिज्ञानानां प्रामाण्यमेव नास्ति किं साक्षिणा गृह्यतामिति वाच्यम् । तथा सति प्रपञ्चगोचराणामपि ज्ञानानां प्रामाण्याभावात् किं साक्षिणा गृह्यत इत्यपि वक्तुं शक्यत्वेन साक्षिणः तत्प्रामाण्याग्राहकत्वप्रसक्त्या साक्षिणा त्रिकालाबाध्यत्वस्य प्रपञ्चेऽप्यसिद्धिप्रसङ्गात् । तस्मात् साक्षिणा प्रपञ्चस्याबाध्यत्वसिद्धिमभिलषता ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्राहकत्वं स्वभाव इत्येव वक्तव्यम् । तथा चोक्तप्रसङ्गः सुस्थ इत्याशयेनोक्तं **तत्प्रामाण्यग्रहणस्वभावत्वादिति** ।

तर्हि ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्राहकत्वं स्वभाव इति गतः पक्ष इत्यत आह **कृतव्युत्पादनं चैतत्प्रागिति** । प्रथमस्य चतुर्थे 'न साक्षी ज्ञानं गृह्णन् प्रमाणमेवैतदिति गृह्णाति । किं तर्ह्यदोषं चेत्प्रमाणं सदोषमप्रमाणमिति व्यवस्थया । यदा त्वर्थित्वेन प्रामाण्यं निर्धारयिषितं तदा सजातीयविजातीयसंवादविसंवादभावलक्षणपरीक्षया दोषाभावं निश्चित्य प्रामाण्यमवधारयति । दोषदर्शने त्वप्रामाण्यम् । प्रपञ्चप्रतीतेश्च प्रयत्नेनान्विष्यापि दोषमपश्यन् प्रामाण्यमवधारयतीति तत्सत्यत्वं साक्षिसिद्धम् । न चैवं शुक्तिरजतादीनां, दोषप्रतीति-

दशायां प्रामाण्यानवधारणात् । तत्प्रतीतौ त्वप्रामाण्यनिश्चयात् । यदा तु निष्कम्पप्रवृत्त्यनुरोधेन तत्रापि कदाचित्प्रामाण्यं निर्धार्यत एव । तथाऽपि नासौ साक्षिरूपावधारणा, अपि तु मानसी'त्यादिना 'अतो दोषप्रतीतस्य सत्यत्वं साक्षिणा मतम्' इत्येतद्ग्रन्थव्याख्यानावसरे कृतव्युत्पादनमेतदित्यर्थः ।

**विठ्ठ०**— नन्वस्तु ज्ञानप्रामाण्यग्रहणं साक्षिणा । ज्ञानविषयस्य त्रैकालिकाबाध्यत्वसिद्धिः कथमित्यत आह **न हि विषयस्येति** । अबाध्यार्थविषयकत्वातिरिक्तस्य दुर्निरूप्यत्वादिति भावः । ननु प्रपञ्चज्ञानं शुक्तिरजतादिज्ञानं च साक्षी गृह्णाति । तस्य च प्रामाण्यग्राहकत्वं स्वभावतः । सति चैवं प्रपञ्चो दृष्टः शुक्तिरजतादिकं तु सम्मुग्धदृष्टमिति कथं विवेक इत्यत आह **कृतव्युत्पादनमिति** । 'अतो दोषप्रतीतस्य सत्यत्वं साक्षिणा मतमित्येतद्व्याख्यानावसरे आनुमानिकपादे न साक्षी ज्ञानं गृह्णन् प्रमाणमेवैतदिति गृह्णाति । किं तर्ह्यदोषं चेत्प्रमाणम्, अदोषं चेदप्रमाणमिति व्यवस्थयैवेत्यादिना ज्ञानं गृह्णन् साक्षी परीक्षया ज्ञाननिर्दोषत्वेऽवधारिते प्रमाणमेवैतदिति गृह्णाति । अदोषत्वावधारणे तु परीक्षासहकृतो प्रमाणमेवैतदिति निश्चीयतीति व्युत्पादनकृतमित्यर्थः ।

**।। इति शुक्तिरजतादेश्च सार्वकालिकबाधाभावविषयत्वाभावात् अनुभवविरोधो दुर्निवारः ।।**
**।। इति प्रत्यक्षस्य वर्तमानमात्रकालविषयत्वेन उक्तविरोधपरिहारशङ्का तन्निवारणञ्च ।।**
**।। इति जडत्वाद्यनुमानानां अनुभुतिविरोध–व्यभिचार–असिद्ध्यादिभिर्दूषणम् ।।**
**।। इति तत्र जडत्वपरिच्छिन्नत्वादिहेतूनां निराकरणम् ।।**

* * *

**।। अथ च विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणे उक्तार्थस्य समर्थनम् ।।**
**।। अथ तत्रादौ दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वं तत्समर्थनञ्च ।।**
**।। अथ तत्राप्यादौ दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वम् ।।**

३० **सु०**— सत्प्रतिपक्षाणि च दृश्यत्वाद्यनुमानानीत्याशयवानाह **भ्रान्तेरिति** ।

**अनु०**— भ्रान्तेः संवृतिसत्यस्य विशेषोऽव्यभिचारवान् ।
तेनाप्यङ्गीकृतः सम्यक् स नः सत्यत्वमेव हि ।।

भ्रान्तिविषयत्वेन सम्प्रतिपन्नाच्छुक्तिरजतादिकादित्यर्थः, **संवृतिसत्यस्य** तथात्वेनाभ्युपगतस्य विश्वस्य **विशेषो** वैलक्षण्यम्, **अव्यभिचारवान्** कदाचित्क्वचिदपि सम्प्रतिपन्नमिथ्याभावे अवर्तमानः, **तेन** शून्यवादिना **अपि, सम्यगिति** असन्देहेन । **स एव** विशेषो,

**नः** अस्माकं, मते विश्वस्य, **सत्यत्वं** 'साधयिष्यती'ति शेषः । ततः सत्प्रतिपक्षाणि दृश्यत्वाद्यनुमानानीति ।

अत्र 'तेनापि सम्यगङ्गीकृतः' इत्यनेन पक्षधर्मता समर्थिता । 'अव्यभिचारवान्' इत्यनेन तु व्याप्तिः ।

अयमत्र प्रयोगः, 'विश्वं कालत्रयाबाध्यम्, प्रातीतिकविलक्षणत्वात्, व्यतिरेकेण शुक्तिरजत(ादि)वदि'ति ।

**परि०**— भ्रान्तेरित्यादिपदानामर्थमाह **भ्रान्तिविषयत्वेनेत्यादिना । मिथ्याभावे** मिथ्यात्वे । बहुव्रीहिसमासः ॥ **कालत्रयाबाध्यमिति** । कालत्रयवर्तिनिषेधाप्रतियोगीत्यर्थः ॥ **प्रातीतिकेति** । प्रतिभासमात्रशरीरत्वेनाङ्गीकृतस्वप्न-रज्जुसर्प-शुक्तिशकलधौतादिविलक्षणत्वादित्यर्थः । एतेन प्रातीतिकवैधर्म्यात् स्वप्नादिवन्न मिथ्यात्वं विश्वस्य, किन्तु सत्यत्वमेवेत्यर्थान्तरं सूत्रस्य दर्शितम् ॥

**श्रीनिधि०**— **सम्प्रतिपन्नमिथ्याभाव इति** । सम्प्रतिपन्नमिथ्यात्व इत्यर्थः । **स एव विशेषो नोऽस्माकमिति** । स च विशेषः प्रमाणगम्यत्वमर्थक्रियाकारित्वं वेति द्रष्टव्यम् । वक्ष्यते चैवम् ।

**शे०चं०**— भ्रान्तिशब्दस्य ज्ञान इवार्थेऽपि परेषां प्रसिद्धेर्भ्रान्तिशब्देनार्थस्य ग्रहणप्राप्तावपि स्वरीत्या तदप्राप्तेर्लक्षणामाश्रित्य तदाह **भ्रान्तिविषयत्वेन सम्प्रतिपन्नादिति** । विश्वस्य संवृतिसत्यत्वासिद्धेस्तथाऽनुवादानुपपत्तिमाशङ्क्याह **संवृतीति** ॥ **प्रातीतिकविलक्षणत्वादिति** । असत्प्रातीतिकविलक्षणत्वादित्यर्थः । अतो न तुच्छे व्यभिचार इति भावः ।

**विट्ठ०**— **सम्प्रतिपन्नमिथ्याभावे इति** । शुक्तिरजतादाविति शेषः । तथा चैवं मूलयोजना । संवृतिसत्यत्वेनाङ्गीकृतस्य विश्वस्य भ्रान्तिविषयाच्छुक्तिरजतादेः सकाशादव्यभिचारवान् विशेषः सर्वथा मिथ्याभूतशुक्तिरजतादावविद्यमानो यो विशेषो वैलक्षण्यं शून्यवादिनापि सम्यगङ्गीकृतः स एव सर्वथा शुक्तिरजतादावविवर्तमानो विशेषो विश्वस्यास्माकं सत्यत्वं साधयिष्यति । शुक्तिरजतावविद्यमानार्थक्रियाकारित्वातिरिक्तस्य पारमार्थिकसत्यस्यान्यस्याभावादिति ।

**॥ इति दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वम् ॥**

* * *

**॥ अथ च तत्र प्रातीतिकसांवृतत्वयोर्वैलक्षण्यबलात् उक्तस्य सत्प्रतिपक्षस्य परिहारशङ्का, तद्वैलक्षण्यस्य अप्रामाणिकत्वात् तत्परिहारशङ्कायाः निराकरणञ्च ॥**

३१ **सु०—** "ननु च 'शुक्तिरजतादीनां प्राक् शून्यतत्त्वज्ञानाच्छुक्त्यादिज्ञानेनैव निवृत्तिः भवति, प्रपञ्चस्य तु शून्यज्ञानेन कदाचिन्निवृत्तिर्भविष्यती'त्येवं मया प्रातीतिकसांवृतयोः वैलक्षण्यमङ्गीकृतम्, न चेदं विश्वसत्यत्वे भवता हेतूकर्तुं शक्यम्, विरोधात्" इत्यत आह **विज्ञानादिति** ।

## अनु०— विज्ञानाद्व्यभिचारोऽस्य कदाचित्स्यादिति प्रमा । नैव दृष्टा

**व्यभिचारः** निवृत्तिः । नायं विशेषोऽङ्गीकर्तुं शक्यते, अप्रामाणिकत्वात् । न हि अप्रामाणिकेन शृङ्गेण अश्वोऽन्यतो वि(शि)शेष्यमाणो दृश्यत इति ।

**परि०—** नैव दृष्टेत्यन्तस्य भावार्थमाह **नायमिति** । प्रपञ्चस्य शून्यज्ञाननिवर्त्यत्वरूपः ।

**वं०प०—** **न हीति** । तथा चाप्रामाणिकेन शून्यज्ञानबाध्यत्वरूपधर्मेण प्रपञ्चो न प्रातिभासिकविलक्षण इत्यर्थः ।

**कं०रा०—** **इदमिति** । शून्यतत्त्वज्ञानबाध्यत्वं प्रातीतिकाद्वैलक्षण्यमित्यर्थः । **विरोधादिति** । उक्त-वैलक्षण्यस्य सत्यत्वविपरीतमिथ्यात्वेन व्याप्तत्वादित्यर्थः । **नायं विशेष इति** । शून्यतत्त्वज्ञानबाध्यत्वरूपो धर्मः प्रपञ्चस्य प्रातीतिकाद्विशेषतया अङ्गीकर्तुं न शक्यते, शून्यतत्त्वज्ञानबाध्यत्वस्याप्रामाणिकत्वादित्यर्थः । अप्रामाणिकस्यापि विशेषत्वं किं न स्यादित्यतोऽप्रामाणिकेन शृङ्गादिना अश्वादेर्विशेष्यमाणत्वाभावेन विशिष्यते व्यावर्त्यते वस्त्वनेनेति विशेषशब्दप्रवृत्तिनिमित्तत्वाभावान्न तस्य विशेषत्वमित्यभिप्रेत्याह **नहीति** ।

**शे०चं०—** **विरोधादिति** । भाविबाधस्य त्रिकालाबाधत्वाभावव्याप्तत्वादित्यर्थः । विज्ञानेन भाविनि काले निवृत्तेः शङ्कितत्वेऽपि व्यभिचारस्याशङ्कितत्वादसदनुवादोऽयमित्याशङ्क्य व्यभिचारशब्दं निवृत्त्यर्थतया व्याचष्टे **व्यभिचार इति** । निवृत्तिर्बाध इत्यर्थः ॥

**वि०ठ०—** **विरोधादिति** । प्रातीतिकविलक्षणशून्यज्ञाननिवर्त्यत्वस्य सत्यत्वविपरीतव्याप्तत्वादिति भावः ।

* * *

॥ अथ प्रातीतिकसांवृतत्वयोर्वैलक्षण्ये अनुमानप्रमाणशङ्का, तत्परिहारश्च ॥

३२ सु०— ननु 'इदं कदाचिद्बाधिष्यते दृश्यत्वाच्छुक्तिरजतादिवत्' इत्यनुमानस्य सत्त्वात् कथमत्र प्रमाणाभाव इत्यतः (तस्यो)स्वोक्तं दोषं स्मारयति **प्रमेति** ।

**अनु०— प्रमा सा च न भवेत्स्वविरोधतः ।**

या च शङ्क्यते सेत्यर्थः ॥ **स्वविरोधत इति** । स्वविषयस्य स्वस्य च बाध्यत्वापादकत्वादित्यर्थः । अन्यथा व्यभिचारापत्तेः ।

यस्य विषयोऽसन्, (यत्) स्वयं च बाध्यं, कथं तत्प्रमाणं भवेत् ।

अतोऽस्य विशेषस्याप्रामाणिकत्वेनाङ्गीकर्तुमशक्यत्वे योऽन्यो विशेषः प्रामाणिकः प्रमाणाविरोधी चाङ्गीकर्तव्यः, सोऽस्माकं सत्यत्वे हेतुर्भविष्यतीति । स च प्रमाणगम्यत्वमर्थक्रियाकारित्वं चेति हृदयम् ।

**परि०— नन्विदमिति** । विश्वमित्यर्थः । आत्मात्मीयवाचित्वात् स्वपदस्यार्थद्वयमाह **स्वविषयस्य स्वस्य चेति** । बाध्यत्वरूपस्वविषयस्य दृश्यत्वरूपस्वस्य च दृश्यत्वेन बाध्यत्वापादकत्वादित्यर्थः ॥ **अन्यथेति** । हेतुसाध्ययोर्दृश्यत्वेऽपि बाध्यत्वाभावे इत्यर्थः । अस्तु बाध्यत्वं साध्यहेत्वोरित्यत आह **यस्येति** ॥ **बाध्यमिति** । असदित्यर्थः । बाधासिद्ध्योः प्राप्तेरिति भावः । **अतोऽस्येति** । शून्यज्ञाननिवर्त्यत्वरूपस्येत्यर्थः ।

**वं०प०— अन्यथा** स्वस्मिन्बाध्यत्वाभावे ।

**श्रीनिधि०— तस्योक्तं दोषमिति** । इयं मा मिथ्या चेत् साध्यसिद्धिर्नेत्यनेनोक्तदोषमित्यर्थः । **अन्यथेति** । स्वस्य स्वविषयस्य वा बाध्यतानापादकत्वे । एवञ्च स्वविरोधत इत्येतत् स्वस्य स्वविषयस्य च विरोधतः निरोधकत्वादिति व्याख्यातं द्रष्टव्यम् ।

**शे०चं०— अन्यथेति** । स्वविषयस्य स्वस्य चाबाध्यत्वादित्यर्थः । स्वविषये स्वस्मिन्नेव चेति शेषः । स्वविषयस्य कदाचिद्बाध्यत्वस्य कदाचिदबाध्यत्वे दृश्यत्वस्य तत्रैव व्यभिचारः । कदाचिद्बाध्यत्व-

स्यादृश्यत्वे चानुमानवैयर्थ्यम् । तस्य साध्यज्ञप्त्यर्थत्वात् । तथा दृश्यत्वस्य कदाचिद्बाध्यत्वाभावे तत्रैव दृश्यत्वहेतोः व्यभिचारात् । दृश्यत्वस्यादृश्यत्वे चाज्ञानासिद्धिप्रसङ्गादिति भावः ॥ **कथं तत्प्रमाणं भवेदिति** । अन्यथा विश्वप्रत्ययस्येव शुक्तिरजतादिप्रत्ययस्यापि प्रामाण्यं स्यात् । असद्विषयत्वाविशेषात् । दृश्यत्वादेरिव चाक्षुषत्वादेरपि शब्दानित्यत्वे प्रामाण्यं स्यात् । उभयोरपि बाध्यत्वाविशेषादिति भावः । ननु तादृशो विशेष एव दुर्निरूप इत्यत आह **स चेति** ।

**वा०र०— स्वविषयस्य कदाचिद्बाध्यत्वस्येति** । एते च षष्ठ्यौ समानाधिकरणे । अथ स्वस्मिन्नपि व्यभिचारमाह **तथा दृश्यत्वस्येति** ।

**वि०— स्वशब्दस्य** स्वस्वीयोभयवाचितामभिप्रेत्याह **स्वविषयस्य स्वस्य चेति** । बाध्यत्वरूपस्य स्वविषयस्य दृश्यत्वरूपस्य स्वस्य दृश्यत्वेनाबाध्यत्वापादकत्वादित्यर्थः । **अन्यथेति** । साध्ये हेतौ च दृश्यत्वस्य सत्त्वेऽपि बाध्यत्वाभाव इत्यर्थः । अस्तु तर्हि बाध्यत्वं साध्यहेत्वोरित्यत आह **यस्येति** । बाध्यं इत्यस्य असदित्यर्थः ।

**॥ इति तद्वैलक्षण्ये अनुमानप्रमाणशङ्का, तत्परिहारश्च ॥**
**॥ इति प्रातीतिकसांवृतत्वयोर्वैलक्षण्यबलात् उक्तस्य सत्प्रतिपक्षस्य परिहारशङ्का, तद्वैलक्षण्यस्य अप्रामाणिकत्वात् तत्परिहारशङ्कायाः निराकरणश्च ॥**

* * *

**॥ अथ च तत्रान्ते उक्तस्य प्रतिपक्षानुमानस्य वक्रोक्तिशङ्का, लाघवार्थत्वेन सत्समाधानश्च ॥**

३३ **सु०— ननु तर्ह्येवमेव कुतो नोच्यते । तथोच्यमाने 'प्रमाणानां तत्त्वावेदकत्वम्, अर्थक्रियायाः सत्त्वम्, असति तदभावः' इत्यादि बहु संविधेयं स्यात् । लाघवार्थं त्वेवमुक्तम् । तदपि यथावसरमुपपादितमेव ।**

**परि०— यथाऽवसरमिति** । 'व्यावहारिकता चास्य स्यादबाध्यत्व एव हि । बाध्यं नार्थक्रियाकारी' इत्यादिप्रकृतिनयानुव्याख्यानावसर इति भावः ॥ ***दृश्यत्वादिमिथ्यात्वहेतूनां प्रतिपक्षोक्तिः ॥***

**वं०प०— एवमेवेति** । भ्रान्तेः प्रपञ्चस्य विशेषः प्रमाणगम्यत्वादिरेवेति कस्मान्नोक्तमित्यर्थः । प्रमाणगम्यत्वाद्भ्रान्तिवैलक्षण्यमित्युक्ते प्रमाणानामतत्त्वावेदकताशङ्कायां तत्त्वावेदकत्वं समर्थनीयम् । तथा अर्थ-

क्रियाकारित्वाद्भ्रान्तिवैलक्षण्यमित्युक्तेऽर्थक्रियाया अपि मिथ्यात्वान्न तया तद्वैलक्षण्यमिति शङ्कायां तस्याः सत्त्वं समर्थनीयम् । अथापि नार्थक्रियाकारित्वेन सत्यतासिद्धिः । स्वाप्नकामिनीसम्भोगादौ व्यभिचारशङ्कायामसतः स्वाप्नकामिनीसम्भोगस्य नार्थक्रियाकारित्वं, किन्तु सत्यस्य तज्ज्ञानस्यैवेति बहु संविधेयमिति तथा नोक्तमित्याह **तथेत्यादिना** ॥ **तदपीति** । प्रमाणानां तत्त्वावेदकत्वादिकमपि ।

**कं॰रा॰— ननु तर्हीति** । यदि प्रमाणगम्यत्वमर्थक्रियाकारित्वं वा प्रातीतिकाद्विश्वस्य विशेष इत्यभिप्रेतम् । तर्हि विमतं सत्यं प्रमाणगम्यत्वादर्थक्रियाकारित्वाद्वेति विशिष्य कुतो नोच्यत इत्यर्थः । **तथोच्यमान इति** । विमतं सत्यं प्रमाणगम्यत्वादर्थक्रियाकारित्वाद्वेत्युच्यमाने अतत्त्वावेदकप्रमाणगम्यत्वस्य विश्वसत्यत्वे हेतूकर्तुमशक्यत्वात् तत्त्वावेदकप्रमाणगम्यत्वं हेतूकर्तव्यम् । तत्र प्रमाणानां तत्त्वावेदकत्वं परं प्रति साधनीयम् । तथार्थक्रियाकारित्वादित्यत्र असत्यार्थक्रियाकारित्वस्येन्द्रजालादौ व्यभिचरितत्वेनार्थक्रिया सत्यत्वेन विशेष्यणीया, तत्रार्थक्रियायाः सत्यत्वं परं प्रति साधनीयम् । तथार्थक्रियाकारित्वेऽपि प्रपञ्चस्यासत्त्वमस्त्विति परेणोक्ते विश्वस्यासत्त्वेऽर्थक्रियाकारित्वं न स्यादित्यनुकूलतर्कसिद्ध्यर्थमसत्यर्थक्रियाविरहोऽपि साधनीय इति यत्नगौरवं स्याल्लाघवार्थत्वे त्वेवं प्रातीतिकवैलक्षण्येन विश्वं सत्यमित्युक्तमिति भावः । **तदपीति** । प्रमाणानां तत्त्वावेदकत्वमर्थक्रियायाः सत्त्वमसत्यर्थक्रियाराहित्यं च तत्तदवसरे उपपादितमेवेत्यर्थः ।

**श्रीनिधि॰— संविधेयं स्यादिति** । व्युत्पादनीयं स्यादित्यर्थः । **तदपीति** । प्रमाणानां तत्त्वावेदकत्वं अर्थक्रियायाः सत्यत्वं चेत्यर्थः ।

**शे॰चं॰**— ननु तर्हि विश्वं कालत्रयाबाध्यं प्रमाणगम्यत्वादर्थक्रियाकारित्वाच्चेत्येव स्पष्टमभिधीयतां, किमनया 'भ्रान्तेः संवृतिसत्यस्य विशेषोऽव्यभिचारवान् । तेनाप्यङ्गीकृत' इति वक्रोक्त्येत्याशङ्कते **ननु तर्ह्येवमेवेति** ॥ **बहु संविधेयं स्यादिति** । परेण प्रपञ्चग्राहकप्रमाणानां तत्त्वावेदकत्वस्यार्थक्रियायाः सत्त्वस्यासति साधकत्वाभावस्यानङ्गीकारात् । तद्व्युत्पादने च प्रयत्नगौरवप्रसङ्गादिति भावः ॥ **लाघवार्थमिति** । प्रपञ्चे प्रातिभासिकवैलक्षण्यस्य परं प्रति सम्मतत्वेन तस्यासाधनीयत्वात् अत्र प्रयत्नलाघवमिति भावः । यद्येवं तर्हि प्रपञ्चग्राहकप्रमाणादेः कथं तत्त्वावेदकत्वादिसिद्धिरित्यतः 'मानत्वं प्रत्यभिज्ञाया अपि सर्वानुभूतिगम्' इत्यादिना तृतीयस्य द्वितीये चक्षुरादेस्तत्रैव 'मानता च कथं न स्यात्स्मृतेर्बाधश्च नात्र ही'त्यादिना मनसः, 'सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् । साक्षिसिद्धस्य न क्वापि बाध्यत्वं तददोषतः' इति प्रथमस्य चतुर्थे 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेत् । न हि बाधः क्वचिद्दृष्टो दुःखाद्यनुभवस्य तु' इत्यादिना द्वितीयस्य तृतीये च साक्षिणः 'तात्कालिकं प्रमाणत्वमक्षजस्य यदा भवेत् । प्रामाण्यस्य च मर्यादा कालतो व्याहता भवेदि'त्यादिना तत्रैवाक्षजस्य, '' 'विश्व सत्यं', 'यच्चिकेत', 'प्रघान्वस्य', 'यथार्थतः' '' इत्यादि श्रुतयः सर्वा विश्वसत्यत्ववाचिका' इत्यादिना प्रथमस्य चतुर्थे । 'वेदवेद्यस्य मिथ्यात्वं यदि नैक्यस्य तत्कथमि'त्यादिना तृतीयस्य

द्वितीये । 'दीर्घभ्रान्तिकरी चेत्स्यादतत्त्वावेदकप्रमा । रज्जुसर्पादिविज्ञानादप्याधिक्यादमानता । स्यादगमस्यानिवर्त्यमहामोहप्रदत्वतः' इत्यादिना चतुर्थस्य द्वितीये च । प्रत्यक्षादिप्रमाणानां तत्त्वावेदकत्वस्य, 'व्यावहारिकमेतस्मात् सत्यमित्येव चागतमि'त्येतद्ग्रन्थतद्व्याख्यानावसरे च 'कार्यस्यैव सत्त्वाभावे किं कारणसत्तयेति चेत् । कुतः प्रमाणात्कार्यसत्त्वाभावो भवता निश्चितः । श्रुत्यादेरेवेति चेत् । न । तस्यैवानेकान्तिकप्रसङ्गगहननिविष्टत्वादि'त्यादिना च कार्यसत्तायाः, 'मिथ्यायाः साधकत्वं च न सिद्धं प्रतिवादिनः', 'न सिद्धं चान्यसाधनमि'त्यादिना जिज्ञासासूत्रे, 'भ्रमत्वे त्वियमुक्तिश्च तदन्तःपतनान्न हि', 'बाध्यं नार्थक्रियाकारि', 'व्यावहारिकता चास्य स्यादबाध्यत्व एव हि', 'न च स्वप्नोऽपि नो मृषा', 'सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम् । तदेवार्थक्रियाकारि तत्सदेवार्थकारकमि'त्यादिना प्रकृत्यधिकरणादौ चासतोऽसाधकत्वस्य च यथावसरं तत्र तत्रोपपादितत्वान्न तदसिद्धिप्रसङ्गोऽपीत्याह **तदपीति** ।

**वा०र०**— चक्षुषः मनसः साक्षिण इत्येतेषां तत्त्वावेदकस्येति वक्ष्यमाणेनान्वयः । तत्रैव तृतीयस्य द्वितीय एव । तत्रैव द्वितीयस्य तृतीय एव । प्राक्प्रत्यक्षमात्रस्य इदानीं सर्वप्रमाणानामिति विशेषात् प्रत्यक्षादीति प्रमाणविशेषणम् । तत्त्वावेदकत्वस्येत्यस्य वक्ष्यमाणेनोपपादितत्वादित्यनेन सम्बन्धः । मूलादेव स्पष्टमलाभात् टीकावाक्यमुदाहरति **कार्यस्यैव सत्त्वाभाव इत्यादिना** । कार्यसत्ताया इत्यस्य उपपादितत्वात् इत्यनेन सम्बन्धः । इत्यादिबहुसंविधेयं इत्यादिपदसङ्ग्राह्यं किमिति विचारणीयम् । तदनुसारेणात्रापि किञ्चित् सतः साधकत्वादिकं अभिप्रेतम् । अतः तत्प्रतिपादकजिज्ञासाधिकरणीयसाधकत्वं सतः तेन इत्यादि वाक्यं उपलक्षणया प्रदर्शनीयमिति ध्येयम् ।

**वि०ठ०**— **ननु तर्ह्येवमेवेति** । प्रमाणगम्यत्वमर्थक्रियाकारित्वं चास्माकं विश्वस्य सत्यत्वं साधयिष्यतीत्येवमेव प्रमाणगम्यत्वापरपर्यायदृश्यत्वादिकं सत्प्रतिपक्षमित्याशयेन कुतो नोच्यते, भ्रान्तेर्विशेषस्तेनाङ्गीकृत इति सामान्यत एव किमर्थमुच्यत इत्यर्थः । **तथोच्यमान इति** । तथा च अतत्त्वावेदकप्रमाणदृष्टत्वार्थक्रियामिथ्यात्वादिपक्षदूषणादिबहुसंविधानसापेक्षतया गौरवापातात् । सामान्योक्तौ तु अतत्त्वावेदकत्वादिपक्षान्तरोल्लेखाभावेन बह्वोपादानस्याकर्तव्यत्वेन लाघवसम्भवादिति भावः । **यथावसरमिति** । अतत्त्वावेदकं मानमिति स्वव्याहतं यतः बाध्यं नार्थक्रियाकारि तत्सदेवार्थसाधकमित्यादौ तत्र तत्रेत्यर्थः ।

**॥ इति उक्तस्य प्रतिपक्षानुमानस्य वक्रोक्तिशङ्का, लाघवार्थत्वेन सत्समाधानञ्च ॥**
**॥ इति दृश्यत्वादिहेतूनां सत्प्रतिपक्षत्वं तत्समर्थनञ्च ॥**

* * *

**।। अथ तत्र एतदनुव्याख्यानस्थश्लोकद्वयस्य प्रकारान्तरेण द्वेधा व्याख्यानम् ।।**

**।। अथ तत्र प्रपञ्चाबाध्यत्वे परिशेषप्रमाणोक्तिपरतया व्याख्यानम् ।।**

३४ **सु०— यद्वा प्रपञ्चस्याबाध्यत्वे परिशेषप्रमाणमनेनोक्तम् । तथा हि । जगतो बाध्यत्वमबाध्यत्वं च प्रसक्तम्, तृतीयप्रकाराभावात् । बाध्यत्वं च प्रसिद्धपदार्थतत्त्वज्ञानेन, अन्येन वा । तत्राद्यं वादिप्रतिवादिभ्यामनभ्युपगतम् । द्वितीयं तु प्रमाणाभावनिरस्तम् । परिशेषादबाध्यत्वमेव सिद्ध्यतीति ।**

**परि०— अनेनोक्तमिति** । 'भ्रान्तेरि'त्यादिश्लोकद्वयेनेत्यर्थः । तत्र आद्यश्लोकतात्पर्यं **तत्राद्यमिति** । वादिना शून्यत्वज्ञाननिवर्त्यत्वस्य, प्रतिवादिना केनापि निवर्त्यत्वाभावस्योपगमादिति भावः । द्वितीयश्लोकतात्पर्यं **द्वितीयं त्विति** ।

**वं०प०— निरस्तं** विज्ञानादिति श्लोकेन । प्रसिद्धपदार्थतत्त्वज्ञाननिवर्त्यत्वमनभ्युपगमेन, तदितर-तत्त्वज्ञाननिवर्त्यत्वं प्रमाणाभावेन प्रपञ्चाद्व्यावर्त्यत इति विवेकः ।

**श्रीनिधि०— अनेनेति** । श्लोकद्वयेनेत्यर्थः । **तत्राद्यं वादिप्रतिपत्तिभ्यामनभ्युपगतमिति** । अनेन आद्यश्लोकस्य तात्पर्यमुक्तं वेदितव्यम् । **द्वितीयं प्रमाणाभावनिरस्तमिति** । अनेन द्वितीयश्लोकस्य तात्पर्यमुक्तं द्रष्टव्यम् ।।

श्रीनृसिंहो दिव्यसिंहः सर्वारिष्टार्थि दुःखहा ।
एकवीरोऽद्भुतबलो यन्त्रमन्त्रैकभञ्जनः ।।

**शे०चं०— अनेनोक्तमिति** । 'भ्रान्तेः संवृतिसत्त्वस्ये'त्यादिश्लोकद्वयेनेत्यर्थः ।। **तत्राद्यमिति** । एतच्च 'भ्रान्तेः संवृतिसत्यस्य विशेषोऽव्यभिचारवान् । तेनाप्यङ्गीकृत' इत्यनेन सूचितमित्यर्थः ।। **द्वितीयं त्विति** । 'विज्ञानाद्व्यभिचारोऽस्य कदाचित्स्यादिति प्रमा । नैव दृष्टे'त्यादिना शून्यज्ञानाबाध्यत्वं सूचितमित्यर्थः । 'स नः सत्यत्वमेव ही'ति परिशेषसिद्धार्थकथनमित्याह **परिशेषादिति** ।

**स०व्र०— परिशेषेति** । 'भ्रान्तेस्संवृतिसत्यस्य' इत्यादिश्लोकद्वयेनेत्यर्थः । **तत्राद्यमिति** । एतच्च 'भ्रान्तेस्संवृतिसत्यस्य विशेषोऽव्यभिचारवान् । तेनाप्यङ्गीकृत' इत्यनेन सूचितमित्यर्थः । **द्वितीयं त्विति** । 'विज्ञानाद्व्यभिचारोऽस्य कदाचित्स्यात्' इति 'प्रमाणेनैव दृष्टा' इत्यादिवाक्यैः शून्यज्ञानाबाध्यत्वं सूचित-मित्यर्थः । 'स नः सत्यत्वमेव हि' इत्येतत् परिशेषसिद्धार्थकथनमित्याह **परिशेषादिति** ।

**विट्ठ०— वादिप्रतिवादिभ्यामभ्युपगतमिति** । तथा च भ्रान्तेर्विशेषः प्रसिद्धशुक्त्यादिपदार्थतत्त्वज्ञाननिवर्त्यत्वाभावरूपो विशेषः संवृतिसत्यस्य तेनाप्यङ्गीकृत इति मूलयोजना सूचिता भवति । **द्वितीयं तु प्रमाणाभावनिरस्तमित्यनेन** विज्ञानादिति श्लोकतात्पर्यं सूचितमिति ज्ञेयम् ।

**॥ इति प्रपञ्चाबाध्यत्वे परिशेषप्रमाणोक्तिपरतया व्याख्यानम् ॥**

* * *

**॥ अथ तत्र व्यापकानुपलब्धिलिङ्गकानुमानपरतया व्याख्यानम् ॥**

**३५ सु०— अथवा व्यापकानुपलब्धिलिङ्गकमनुमानम् (अनेन) एतेन श्लोकद्वयेनोक्तम् । बाध्यत्वं हि प्रसिद्धपदार्थतदितरतत्त्वज्ञाननिवर्त्यत्वेन व्याप्तम् । तच्च व्यापकमनभ्युपगमप्रमाणाभावाभ्यां जगतो व्यावर्तमानं स्वव्याप्यं बाध्यत्वमपि व्यावर्तयतीति ।**

**परि०—** तच्चेत्यादिश्लोकद्वयतात्पर्यं **अनभ्युपगमेति** । वादिप्रतिवाद्यनभ्युपगमेत्यर्थः ॥ *विश्वबाध्यत्वे परिशेषाद्युक्तिः ॥ मिथ्यात्वानुमानिरासः ॥*

**शे०चं०—** किं तद्बाध्यत्वव्यापकं, कथं चात्र तद्व्यावृत्तिरित्याशङ्क्य तद्दर्शयति **बाध्यत्वं हीति** ॥ **प्रसिद्धेति** । प्रसिद्धपदार्थतदितरतत्त्वज्ञाननिवर्त्यस्यान्यतरतत्त्वज्ञाननिवर्त्यत्वेनेत्यर्थोऽवधेयः । क्वचिदन्यतरतत्त्वज्ञाननिवर्त्यत्वेनेत्यपि पाठः ॥ **अनभ्युपगमेत्यादि** ॥ प्रसिद्धपदार्थतत्त्वज्ञाननिवर्त्यत्वस्यानभ्युपगमेन, तदितरपदार्थतत्त्वज्ञाननिवर्त्यत्वस्य प्रमाणाभावेन, व्यावृत्तिसिद्धिरिति विवेकः । इतीत्यस्य, इति व्यापकानुपलब्धिलिङ्गकमिति सम्बन्धः ।

**वा०र०—** विशिष्टव्यापकतायां वैयर्थ्यं मनसि निधायाह **प्रसिद्धेति** । अनभ्युपगमप्रमाणाभावयोरुभयत्र प्रसक्तिं शङ्कानिरासाय विवेकमाह **प्रसिद्धेति** ।

**विट्ठ०— अथवेति** । पक्षे श्लोकद्वययोजना स्फुटैवेति ।

**चषकः— तत्त्वज्ञाननिवर्त्यत्वेन व्याप्तं** तादृशनिवर्त्यत्वनिरूपितव्याप्तिविशेषितम् ।

**॥ इति व्यापकानुपलब्धिलिङ्गकानुमानपरतया व्याख्यानम् ॥**
**॥ इति एतदनुव्याख्यानस्थश्लोकद्वयस्य प्रकारान्तरेण द्वेधा व्याख्यानम् ॥**
**॥ इति विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणे उक्तार्थस्य समर्थनम् ॥**
**॥ इति विश्वमिथ्यात्वे उक्तस्यानुमानस्य निराकरणम् ॥**

* * *

**॥ अथ तत्र विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य निरूपणपूर्वकं निराकरणम् ॥**

**॥ अथ च तत्रादौ तस्य तर्कस्य निरूपणम् ॥**

३६ सु०— एवं प्रपञ्चमिथ्यात्वानुमानानि निराकृत्येदानीं तदनुग्राहकत्वेन, सत्यत्व-प्रत्यक्षस्य प्रतिकूलत्वेन च, परोत्प्रेक्षितं तर्कमपि निराकर्तुमाशङ्कते **भेद इति** ।

**अनु०— भेदो विशेष्यधर्म्यादिग्रहणापेक्षया यदि ।**
**अन्योन्याश्रयताहेतोर्दुर्ग्राह्य इति यत्**

**आदिपदेन** विशेषणप्रतियोगिनोर्ग्रहणम् । **यदि** गृह्यत इति शेषः । 'तर्हीं'ति च ।

अयमर्थः । यदि प्रपञ्चो सांवृतो न स्यात् तदा प्रत्यक्षोऽप्यसौ न स्यात् । तथा हि । अनेकभेदभिन्नो हि प्रपञ्च इष्यते; भेदस्य चाप्रत्यक्षतायां सोऽप्यप्रत्यक्ष एव, विना भेदेन तत्प्रतीतावद्वितीयशून्यप्रतीत्यापत्तेः, न च भेदप्रतीतिरुपपद्यते । भेदो हि प्रतीयमानो घटपटौ भिन्नाविति घटपटयोर्विशेषणतया, घटपटयोर्भेद इति ताभ्यां विशेष्यतया वा प्रत्येतव्यः; भेद इत्येव प्रतीतेरभावात् । यद्वा घटात्पटो भिन्न इति, घटात्पटस्य भेद इति वा घटप्रतियोगितया पटधर्मिकतया च भेदग्रहणमेष्टव्यम् ॥ तत्रोभयत्राप्यन्योन्याश्रयत्वम् । विशेष्ययोर्घटपटयोर्ज्ञाने सति हि तद्विशेषणतया भेदो ज्ञातव्यः, न हि देवदत्तादर्शने दण्डस्य तद्विशेषणतया दर्शनं युज्यते । विशेष्यज्ञानं च भेदापेक्षम्, न हि भेदाप्रतीतौ घटपटाविति द्वित्वविशिष्टार्थप्रतीतिः सम्भवति । एवं विशेष्यतया भेदप्रतीतावपि द्रष्टव्यम् ॥ तथा धर्मिप्रतियोगिज्ञाने सति भेदज्ञानं, तन्निरूप्यत्वात्; भेदज्ञा(न एव)ने सति च धर्मिप्रतियोगिनोर्ज्ञानम् । न हि भेदाग्रहे धर्मिप्रतियोगिभावोऽवगन्तुं शक्यते, तथात्वे घटाद्घटस्य भेद(इत्यपि)प्रतीतिः स्यात् । न च परस्पराश्रयाणि कार्याणि सम्भवन्ति ।

अतो वास्तवत्वे भेदस्य प्रतीत्यनुपपत्तौ प्रपञ्चस्यापि तदापत्तेरविचारितरमणीय-संवृतिमय एवायमङ्गीकरणीय इति ।

परि०— भेदग्रहानुपपत्तिशङ्का प्रकृतानुपयुक्तेत्यत आह **अयमर्थ इति** । भेदो द्वित्वादिरिव व्यासज्यवृत्तिरिति मतेनादिपदेनोक्तं तावदाह **घटपटौ भिन्नाविति** । भेदेन युक्तावित्यर्थः । मूलो-

पात्तमाह **घटपटयोरिति** । युगधर्मो नेति मतेनादिपदोक्तं मूलोपात्तं च क्रमेणाह **यद्वा घटादिति** ॥ **विशेष्यज्ञानं च भेदापेक्षमिति** । विशेष्यत्वेन ज्ञानं चान्योन्यं भेदज्ञानापेक्षमित्यर्थः । धर्मिप्रतियोगितया च ज्ञाने सतीत्यर्थः ॥ **तदापत्तेरिति** । प्रतीत्यनुपपत्त्यापत्तेरित्यर्थः । प्रागुक्तरीत्येति भावः ।

**यादु०**— भेदस्य द्विष्ठत्वपक्षमाश्रित्याह **भेदो हि प्रतीयमान इत्यादि** ॥ **विशेष्यतया वेति** । व्यावर्त्यतया वेत्यर्थः । भेद एकस्य धर्मोऽपरनिरूप्य इति मतमाश्रित्याह **यद्वा घटादिति** ॥ **विशेष्ययोर्घटपटयोरिति** । अयं भावः । भेदो हि संयोगादिवदुभयधर्मः । स चोभयसम्बन्धितयैवावभासते न पृथक् । अत एवोक्तं 'प्राग्भेद इत्येव प्रतीतेरभावादि'ति । उभयसम्बन्धिता च कदाचित्तद्विशेषणता कदाचिद्विशेष्यता । एतदुभयरूपोभयसम्बन्धितया भेदज्ञानमुभयज्ञानाधीनम् । उभयज्ञाने भेदस्य तत्सम्बन्धित्वेन प्रत्येतुमशक्यत्वात् । उभयज्ञानं च भेदज्ञानापेक्षं द्वित्वविशिष्टार्थप्रतीतेर्भेदज्ञानजन्यत्वात् । अतोऽन्योन्याश्रयत्वमिति ॥ **न हि देवदत्तेति** । इदं च देवदत्तविशेषणं दण्ड इति यदा दण्डे देवदत्तविशेषणत्वं प्रकारतया भासते तदभिप्रायकमेवेति ज्ञातव्यम् । तेन दण्डी देवदत्त इति ज्ञाने दण्डो विशेषणतया भासते । न चात्र देवदत्तज्ञानं कारणमिति कश्चिदभ्युपैति । विशेष्यज्ञानस्य विशिष्टज्ञानाहेतुत्वात् । अतः कथमेतदिति शङ्कानवकाशः । दण्डीति ज्ञाने दण्डे विशेषणत्वस्य संसर्गमर्यादया भानेऽप्युक्तज्ञान इव प्रकारत्वेनाभानात् । न च भेदनिष्ठविशेषणतादेरपि संसर्गमर्यादयैव भाने कथं तत्र घटपटरूपविशेष्यज्ञानं कारणं स्यादिति वाच्यम् । ससम्बन्धिकपदार्थेषु विशेषणत्वादिरूपसबन्धिसम्बन्धस्य प्रकारतयैव भानमित्याशयात् । विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादिति तत्त्वनिर्णयटीकायामप्ययमेवाभिप्रायो वर्णनीयः ॥ **भेदापेक्षमिति** । भेदप्रतीत्यपेक्षमित्यर्थः । एतदेवोपपादयति **न हि भेदाप्रतीताविति** । ननु भेदस्य घटपटविशेषणतया प्रतीतिसमये घटपटयोस्तद्विशेष्यत्वमपि प्रतीयत एव । समानसंविद्वेद्यत्वात् । तथा च घटपटविशेषणतया भेदप्रतीतेर्घटपटप्रतीत्यभावेऽभाववद्भेदविशेष्यतया घटपटप्रतीतेरपि भेदप्रतीत्यभावेऽभाव इत्येव कस्माद्भेदप्रतीत्यपेक्षत्वमत्र नोपपादितमिति चेन्नैवं शङ्क्यम् । भेदे हि घटपटविशेषणत्वं यदा प्रकारतया भासते तदा घटपटयोर्विशेष्यत्वं संसर्गमर्यादयैव भासते, न प्रकारत्वेन येनोक्तरीत्या तत्र भेदप्रतीत्यपेक्षा स्यादतोऽत्र द्वित्वप्रतीतिद्वारैव भेदप्रतीत्यपेक्षत्वमुपपादितमिति ध्येयम् ॥ **एवं विशेष्यतयेति** । विशेष्यतारूपघटपटसम्बन्धित्वस्य प्रकारतया भेदप्रतीतावित्यर्थः । द्रष्टव्योऽन्योन्याश्रयत्वमिति शेषः । तद्व्युत्पादनं प्रागेव कृतमत्रानुसन्धेयम् ॥ **तदापत्तेरिति** । प्रतीत्यनुपपत्त्यापत्तेरित्यर्थः ।

**वं०प०**— प्रत्यक्षोऽपि दृश्योऽपीत्यनेन दृश्यत्वरूपहेतूच्छित्तिरूपबाधकमुक्तं वेदितव्यम् । **अप्रत्यक्षतायां** प्रत्यक्षेण गृहीतुमशक्यतायाम् । एवमुत्तरत्र । **सोऽपि** अनेकभेदभिन्नः प्रपञ्चोऽपि । **विशेष्यतया** व्यावर्त्यतया । घटपटयोर्विशेष्यतयैवेति यावत् । एकस्य भेदस्य द्विष्ठत्वपक्षे प्रतीतिमुपपाद्यैकप्रतियोगिकोऽपरधर्मिक इति पक्षे तद्ग्रहणे प्रकारमुपपादयति **यद्वेति** । तदेवोपपादयति **नहीति** ॥ **भेदाप्रतीताविति** । द्वित्वप्रतीतिकार्यत्वाद्भेदप्रतीतेरित्यर्थः ॥ **एवं विशेष्यतयेति** । घटपटयोर्भेदो घटात्पटस्य भेद इत्यत्रेत्यर्थः ।

**तन्निरूप्यत्वादिति** । तस्य भेदस्य धर्मिप्रतियोगिनिरूप्यत्वादित्यर्थः । कुतो न शक्यत इत्यत आह **तथात्व इति** । भेदाग्रहे यदि धर्मिप्रतियोगिभावो ज्ञायत इत्यर्थः ।

**कं०रा०—** घटपटौ भिन्नाविति घटपटविशेषणतया भेदो यदा गृह्यते तदा अन्योन्याश्रयत्वमुपपादयति **विशेष्ययोरिति** । **विशेष्यज्ञानं चेति** । भेदापेक्षया विशेष्यभूतयोर्द्वित्वे विशिष्टयोर्घटपटयोर्ज्ञानं च भेदापेक्षमित्यर्थः । **एवमिति** । घटपटयोर्भेद इति विशेष्यतया भेदप्रतीतावपि विशेषणयोर्घटपटयोर्ज्ञाने सति तद्विशेष्यतया भेदज्ञानं भेदज्ञाने च द्वित्वावच्छिन्नघटपटज्ञानमित्यन्योन्याश्रयत्वं द्रष्टव्यमित्यर्थः । **अविचारितेति** । अनेकभेदभिन्नोऽयं प्रपञ्चः अविचारितरमणीया या संवृतिः तद्विकार एवाङ्गीकार्य इत्यर्थः ।

**श्रीनिधि०—** **निराकर्तुमाशङ्कत इति** । परकीयशङ्कामनुवदतीत्यर्थः । **भेदस्य चाप्रत्यक्षतायां सोऽप्यप्रत्यक्ष एवेति** । न हि धर्मप्रतीतिमन्तरा धर्मिमात्रप्रतीतिर्युक्ता । अन्यथा शुक्लादिप्रतीत्यभावेऽपि पटप्रतीतिः स्यादिति भावः । **अद्वितीयशून्यप्रतीत्यापत्तेरिति** । शून्यं तावत् स्वप्रकाशतया भासते । एवञ्च प्रपञ्चे परस्परं वा अन्यापेक्षया वा भेदस्य सर्वात्मना प्रतीत्यभावे अद्वितीयशून्यस्यैव प्रतीतिरापाद्येतेत्यर्थः । **घटपटयोर्विशेषणतयेति** । अत्र घटपटयोरिति **षष्ठ्यौ ताभ्यामिति** । अवधौ पञ्चमी । घटपटापेक्षया विशेष्यतयेत्यर्थः । **तत्रोभयत्रापीति** । भेदस्य विशेषणविशेष्यग्रहणापेक्षया ग्रहणपक्षे धर्मिप्रतियोगिग्रहणापेक्षया ग्रहणपक्षे चेत्यर्थः । **तन्निरूप्यत्वादिति** । तज्ज्ञानाधीनत्वाद् भेदज्ञानस्येत्यर्थः । **तदापत्तेरिति** । अप्रतीत्यापत्तेरित्यर्थः ।

**शे०चं०—** 'धर्मित्वप्रतियोगित्वतद्भेदा युगपद्यदि । विशेषणं विशेष्यं च तद्भावश्चे'त्युत्तरग्रन्थानुरोधेन आदिशब्दार्थमाह **आदिपदेनेति** । साकाङ्क्षत्वात् प्रसक्तां वाक्याभासतामपेक्षितपूरणेन परिहरति **गृह्यत इति शेष इति** ॥ **तर्हीति चेति** । अत्र विशेष इति वर्तते । भेदस्याप्रत्यक्षत्वेऽपि कुतः प्रपञ्चस्याप्रत्यक्षत्वमित्यत उक्तं **भेदभिन्न इति** । तथाऽपि यत्र भेदोऽङ्गीक्रियते तस्य वस्तुनः प्रत्यक्षाभावमात्रमेव भेदप्रत्ययाभावेन भविष्यति । अन्यत्र तु प्रपञ्चप्रत्यक्षे न बाधकमिति कथं तत्प्रत्यक्षत्वाभावापादनमित्यतः सर्वत्रापि भेदसद्भावं प्रतिपादयितुं तदनेकत्वोक्तिः । नन्वन्योन्याश्रयाद्भेदप्रतीतेरेव निराकरणे त्वन्मतेऽपि भेदप्रतीतिर्न स्यादित्यतो मन्मते भेदस्य सांवृतत्वात्संवृतिवशेन भेदप्रतीतिसम्भवेऽपि त्वया तस्य पारमार्थिकत्वाङ्गीकारान्न तदुपपत्तिरित्याशयात् । ननु घटपटादिभेदस्य प्रत्यक्षत्वान्न तस्याप्रत्यक्षत्वमित्याशङ्क्याह **न चेति** । **भेदप्रतीतिः** प्रत्यक्षरूपा भेदप्रतीतिरित्यर्थः । तत्कुत इत्यतोऽन्योन्याश्रयेण भेदप्रत्यक्षं दूषयिष्यन् द्वित्वावच्छिन्नयोर्घटपटयोर्विशेष्यत्वेन विशेषणत्वेन च प्रतीतिसापेक्षत्वं भेदप्रतीतेरुपपादयितुं भूमिकां तावदारचयति **भेदो हीति** । ननु घटपटोभयविशेषणतया तद्विशेष्यतया च भेदप्रतीत्युदाहरणमसङ्गतम् । न च भेदप्रतीतेर्विशेष्यत्वेन विशेषणत्वेन च घटपटोभयप्रतीतिसापेक्षत्वमुपपादयितुं तदुदाहरणं युक्तमिति वाच्यम् । अस्यास्माद्भेद इति प्रतीत्या भेदस्यान्यतराश्रितत्वेन तत्प्रतीतेर्धर्मित्वेन प्रतियोगित्वेन च तत्प्रतीतिसापेक्षत्वेऽपि विशेष्यत्वादिना तत्प्रतीतिसापेक्ष-

त्वाभावात् । न च घटात्पटस्य भेद इतिवत् पटाद्घटस्य भेद इत्यपि प्रतीतेर्विद्यमानत्वेन नान्यतरमात्राश्रितत्वनिश्चयस्तस्य सम्भवतीति वाच्यम् । अस्माभिर्भेदद्वयाङ्गीकारेण तन्निश्चयसम्भवादिति चेन्न । एकस्यैव भेदस्य द्विष्ठत्वपक्षे उभयोरपि धर्मित्वेन धर्मिप्रतियोगिसापेक्षभेदप्रतीतेर्वक्तुमशक्यत्वेन भेदद्वयाङ्गीकारेणान्यतरमात्राश्रितत्वपक्षेऽपि धर्मिप्रतियोगिभावमनपेक्ष्य सम्बन्धमात्रापेक्षायां च विशेष्यत्वेन विशेषणत्वेन च घटपटोभयप्रतीतिसापेक्षाया एव भेदप्रतीतेर्वक्तव्यत्वेन तदुदाहरणस्य सङ्गतत्वात् । अत एव तत्त्वनिर्णयटीकायामेकस्यैव भेदस्य द्विष्ठत्वपक्षे गत्यन्तराभावादिति, भेदद्वयाङ्गीकारेणान्यतरमात्राश्रयत्वेऽपि धर्मिप्रतियोगिभावमनपेक्ष्य सम्बन्धमात्रापेक्षायां गत्यन्तराभावादिति चोक्तमिति ध्येयम् । न भेदो युगधर्मः किन्त्वेकस्यैव धर्मिप्रतियोगिभावापेक्षा चेत्यस्मिन्मतेऽपि भेदप्रत्यक्षमन्योन्याश्रयेण दूषयितुं भूमिकामारचयति **यद्वेति** ।

**तत्रोभयत्रापीति** । विशेषणविशेष्यभावेन भेदप्रतीतौ धर्मिप्रतियोगिभावेन तत्प्रतीतौ चेत्यर्थः । तत्कथमित्यतो विशेषणविशेष्यभावेन भेदप्रतीतौ तद्विदर्शयिषुर्विशेषणतया तत्प्रतीतौ तावदन्योन्याश्रयत्वमुपपादयति **विशेष्ययोरिति** । घटपटाविति द्वित्वावच्छिन्नयोर्घटपटयोर्विशेष्यतया प्रतीतौ सत्यामित्यर्थः । अत एव तत्त्वनिर्णयटीकायां 'घटपटाविति द्वित्वावच्छिन्नयोर्घटपटयोर्विशेष्यतया प्रतीतौ सत्यमि'त्युक्तमिति ध्येयम् । भेदज्ञानस्य विशेष्यभूतद्वित्वावच्छिन्नघटपटज्ञानापेक्षत्वे नियामकमाह **तद्विशेषणतयेति** । द्वित्वावच्छिन्नघटपटविशेषणतयेत्यर्थः । तद्विशेषणत्वज्ञानस्य विशेष्यज्ञानकार्यत्वात् कार्यस्य च कारणापेक्षत्वाद्युक्तं तद्विशेषणतया भेदज्ञानस्य द्वित्वावच्छिन्नविशेष्यभूतघटपटज्ञानापेक्षत्वम् । अत एव तत्त्वनिर्णयटीकायां 'विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादि'त्युक्तम् । द्वित्वावच्छिन्नयोरिति विशेषणानुपादाने न भेदज्ञानस्य घटपटज्ञानकार्यत्वं सिद्ध्यति । विशेष्यत्वेन विशेष्यप्रतीतित्वावच्छिन्नस्यापि घटपटान्यतरप्रतीतिमात्रस्य सत्त्वेऽपि भेदप्रतीतेरभावेन व्यभिचारात् । विशेषणोपादाने तु नायं दोषः । द्वित्वावच्छिन्नविशेष्यप्रतीतित्वस्यैव कारणतावच्छेदकत्वात् । उक्तस्थले घटपटान्यतरप्रतीतिमात्रस्य सत्त्वेऽपि कारणतावच्छेदकावच्छिन्नस्य कारणस्याभावेन तदप्रसङ्गादिति द्रष्टव्यम् । अत्र तद्विशेषणतयेत्यनेन तद्विशेषणताविषयकत्वमात्रमेव भेदज्ञानस्याभिमतं न तु तद्विशेषणत्वप्रकारकत्वमपि । तथा सति घटपटभेदो विशेषणमिति विशेषणत्वप्रकारकभेदज्ञानस्य विशेष्यभूतघटपटज्ञानापेक्षत्वप्राप्तावपि घटपटौ भिन्नाविति भेदज्ञानस्यातत्प्रकारकत्वेनोक्तयुक्त्या विशेष्यज्ञानापेक्षत्वाप्राप्त्या तदुपजीव्यन्योन्याश्रयत्वानुत्थानापातात् । तद्विशेषणत्वविषयतामात्रविवक्षायां तु नायं दोषः । घटपटौ भिन्नाविति भेदज्ञानस्य तद्विशेषणत्वाप्रकारकत्वेऽपि तद्विशेषणत्वमात्रविषयकत्वेन विशेष्यभूतघटपटज्ञानापेक्षत्वप्राप्त्याऽन्योन्याश्रयप्रसङ्गसम्भवादित्यवधेयम् । तद्विशेषणतयेत्युक्तयुक्तेरप्रयोजकत्वं परिहरति **नहीति** ।

ननु न तावताऽप्यन्योन्याश्रयनिर्वाह इत्यतो विशेष्यज्ञानस्य विशेषणीभूतभेदज्ञानापेक्षतामाह **विशेष्यज्ञानं चेति** । द्वित्वावच्छिन्नघटपटरूपविशेष्यज्ञानं चेत्यर्थः । कुतस्तस्य तदपेक्षत्वमित्यतो दण्डज्ञानाभावे दण्डविशेष्यत्वेन देवदत्तज्ञानादर्शनेन तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादित्याशयेनाह **नहीति** । **द्वित्वविशिष्टार्थप्रतीतिः** भेदविशेष्यत्वेन द्वित्वविशिष्टार्थप्रतीतिरित्यर्थः । तत्त्वनिर्णयटीकायां द्वित्वावच्छिन्नघटपट-

रूपविशेष्यज्ञानस्य भेदज्ञानापेक्षत्वोपपादकतया भेदप्रतीत्यविनाभूतत्वात् द्वित्वप्रतीतेरिति युक्त्यन्तरानुसरणं तु, विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादिति विशेषणत्वेन भेदज्ञानस्य विशेष्यतया घटपटरूपविशेष्यज्ञाना-पेक्षत्वोपपादकयुक्त्यैव द्वित्वावच्छिन्नघटपटरूपविशेष्यज्ञानस्य भेदज्ञानापेक्षत्वं न वक्तुं शक्यमिति नाभिप्रेत्य, किन्तु तस्य प्रकारस्य पूर्वोक्तरीत्या शिष्यैरेव ज्ञातुं शक्यत्वात् किं तदुपन्यासेनेत्यभिप्रेत्य, अनेनापि प्रकारेण भेदप्रतीत्यपेक्षायाः सम्यग्वक्तुं शक्यत्वादित्यभिप्रेत्यैवेति न तद्विरोध इति द्रष्टव्यम् । विशेषणतया भेदप्रतीता-वुक्तमन्योन्याश्रयत्वं विशेष्यतया प्रतीतावप्यतिदिशति **एवं विशेष्यतयेति** । घटपटयोर्भेद इति घटपटयोरिति द्वित्वावच्छिन्नघटपटविशेष्यतया भेदप्रतीतिर्विशेषणीभूतद्वित्वावच्छिन्नघटपटज्ञानापेक्षा । विशेषणीभूतदण्डज्ञाना-भावे तद्विशेष्यतया देवदत्तज्ञानादर्शनेन द्वित्वावच्छिन्नघटपटविशेष्यतया भेदप्रतीतेर्द्वित्वावच्छिन्नघटपटरूप-विशेषणज्ञानकार्यत्वात् । द्वित्वावच्छिन्नघटपटरूपविशेषणप्रतीतिश्च भेदज्ञानापेक्षा देवदत्तादर्शने तद्विशेषणतया दण्डज्ञानादर्शनेन भेदविशेषणतया द्वित्वावच्छिन्नघटपटज्ञानस्य भेदज्ञानकार्यत्वाद्विशेष्यतया भेदप्रतीतावप्यन्यो-न्याश्रयत्वमित्यर्थः ।

एवं विशेषणविशेष्यभावेन भेदग्रहणेऽन्योन्याश्रयतामुपपाद्य धर्मिप्रतियोगिभावेन तद्ग्रहेऽपि तामुपपादयति **तथेति** ॥ **तन्निरूप्यत्वादिति** । भेदस्य ससम्बन्धिकपदार्थत्वेन सम्बन्धिभूतधर्मिप्रतियोगिज्ञानाधीनज्ञानत्वा-दित्यर्थः ॥ घटात्पटस्य भेद इति पटस्य भेदं प्रति धर्मित्वं घटस्य चावधित्वेन प्रतियोगित्वं प्रतीत्यैव भेदः प्रत्येतव्य इति धर्मित्वप्रतियोगित्वप्रतीत्यपेक्षप्रतीतिकत्वमेवात्राभिमतम् । तत्त्वनिर्णयटीकानुसारात् 'न हि भेदाग्रहे धर्मिप्रतियोगिभावोऽवगन्तुं शक्यते' इत्युत्तरग्रन्थानुसाराच्चेति द्रष्टव्यम् ॥ **धर्मिप्रतियोगिनोर्ज्ञानमिति** । धर्मित्व-प्रतियोगित्वयोर्ज्ञानमित्यर्थः । तदेवोपपादयति **न हीति** ॥ घटात्पटस्य भेद इति पटस्य भेदं प्रति धर्मित्वेन घटस्य प्रतियोगित्वेन प्रतिभासः तयोर्भेदाग्रहे न सम्भवतीत्यर्थः । अस्तु भेदाग्रहेऽप्युक्तरीत्या धर्मित्वप्रति-योगित्वप्रतिभास इति वदन्तं प्रत्यनिष्टमाह **तथात्वत इति** । अविशेषादिति भावः । अस्त्वेवं परस्परज्ञानापेक्षया अन्योन्याश्रयत्वम् इत्यतः, तथा सति भेदज्ञानानुपपत्तिः सिद्धा इत्याशयेनाह **न चेति** ॥ **तदापत्तेरिति** । प्रती-त्यनुपपत्त्यापत्तेरित्यर्थः ।

**वा०र०— तद्भावश्चेतीति** । इति चेत्यर्थः । न चान्योन्याश्रयाद्भेदेति न स्यात् इति वाच्यं इति च पाठः । मूलकोशे सत्त्वात् । अन्यथापाठो लेखकायत्तः । **किन्त्वेकस्यैवेति** । धर्म इति वर्तते । **धर्मिप्रति-योगीति** । भेदप्रतीतेरिति शेषः । भेदप्रतीतेः धर्मिप्रतियोगिभावापेक्षा चेति पाठस्तु स्वरस एव । विशेषण-विशेष्यभावेन भेदो न प्रतीयते । किन्तु धर्मिधर्मभावेन, ततश्च विशेषणतया वा विशेष्यतया वा द्वित्वाव-च्छिन्नयोः घटपटयोः ज्ञानं नापेक्षितम्, अपि तु धर्मिप्रतियोगिभावेन तयोर्ज्ञानमपेक्षितमिति भावः । पूर्वमता-द्वैलक्षण्यं भेदस्य युगपद्धर्मत्वाभावेन तत्प्रतीतेः धर्मिप्रतियोगिभावापेक्षया च भवतीति तयोः समुच्चायकोऽयं चशब्दः । **घटपटाविति द्वित्वावच्छिन्नयोरिति** । द्वित्वावच्छिन्नयोर्घटपटयोः घटपटाविति विशेष्यत्वे अनया

प्रतीतिः तत्सापेक्षत्वमिति योजना । अत्र च द्वित्वावच्छिन्नत्वं द्वित्वपर्याप्त्यधिकरणत्वम् । तेन पर्याप्तेर्मिलितोभयमात्रनिष्ठत्वेन एकस्मिन् अभावात् न द्वित्वस्य उभयवृत्तित्वेन अन्यतरस्यापि तदवच्छिन्नतया तयोरन्यतरज्ञानमात्रेण भेदप्रत्ययापत्तिरित्येतत् शङ्कावकाशः । तथा च विशेष्यप्रतीतत्वं न कारणतावच्छेदकम् । किन्तु द्वित्वावच्छिन्नविशेष्यप्रतीतित्वमेव । अन्यतरमात्रप्रतीतिकाले द्वित्वावच्छिन्नविशेष्ययोः प्रतीत्यभावेन उक्तप्रतीतत्वरूपकारणतावच्छेदकावच्छिन्नकारणस्याभावेन भेदप्रत्ययाभावेऽपि उक्तकारणतावच्छेदकावच्छिन्नकारणसद्भावे भेदप्रतीतिरविकलैवेति तस्यास्तत्सापेक्षत्वमिति भावः ।

**इत्युक्तमिति** । यद्यपि घटपटाविति द्वित्वविशिष्टार्थप्रतीतिः सम्भवतीति मूलस्थोत्तरवाक्यानुसारेणापि उपष्टम्भकतया वाच्यः तथापि स्पष्टत्वात् स शिष्यैरेवानुसन्धेयः । उपलक्षणया वा ज्ञातव्यः इत्याशयेन विशेष्ययोरित्यत्रेव मुखतो द्वित्वावच्छिन्नयोरित्यस्य पूरणे उपष्टम्भकं तथाविधमेव तत्त्वनिर्णयटीकास्थलमुपष्टम्भकतयोक्तमित्यदोषः । **भेदज्ञानापेक्षतामाहेति** । अनेन भेदापेक्षमिति मूलगतं भेदपदं तज्ज्ञापनपरमिति व्याख्यातं भवति । **तद्व्यतिरेकेति** । अनेन विशेषणादिप्रतीतेः विशेष्यादीत्युक्तयुक्तिरभिहितेति ज्ञातव्यम् । **युक्त्यन्तरानुसारणं त्विति** । यद्यपि भेदप्रतीतिः कारणं द्वित्वप्रतीतिस्तु कार्येति कार्यकारणभावापन्नद्वित्वभेदप्रतीत्योः अविनाभावोपन्यासेऽपि कार्यकारणभाव एव लब्ध इति विशेषणादिप्रतीतेः इत्युक्तमेवोक्तं तत्त्वनिर्णयटीकायामिति न युक्त्यन्तरत्वम् । तथापि प्रागुक्तरीत्यैव वक्तव्ये किमविनाभावाभिधानेन पूर्वोक्तरीत्यैव वक्तव्यत्वादित्यत्र तात्पर्यम् । अत एवैवमुक्तेः न फलान्तरं कथ्यते सिद्धान्ते । **किन्तु सम्यग्वक्तुमशक्यत्वादिति** । उपपादनाधिक्यमात्रमेवानयोः कार्यकारणभावाभावे तत्प्रतीत्योर्नाविनाभावो युज्यते इति तदुपपादकत्वादित्यवधेयम् । घटपटयोर्भेदः इतीत्यस्य भेदप्रतीतिरित्यनेन सम्बन्धः । द्वित्वावच्छिन्नत्वमभिनयेन दर्शितम् । घटपटयोरितीत्यनेन विशेषणादिप्रतीतेः विशेष्यादिप्रतीतिकार्यत्वादिति तत्त्वनिर्णयटीकोक्तं हेतुं व्यापारयति **विशेषणीभूतेत्यादिना** । **धर्मित्वप्रतियोगित्वप्रतीतीति** । अनेन मूले धर्मिप्रतियोगिपदं धर्मित्वप्रतियोगित्वरूपभावप्रधानमित्युक्तं भवति । **भेदज्ञानानुपपत्तिरिति** । अनेन अन्योन्याश्रयस्य दूषणत्वोपपादनार्थं ज्ञप्तिप्रतिबन्धकत्वमुक्तं भवति । प्रकृते च भेदज्ञानं कारणं धर्मिप्रतियोगिज्ञानं च कार्यमिति भावः ।

**स०व्र०**— ननु अन्योन्याश्रयात् भेदप्रतीतेरेव निराकरणे त्वन्मतेऽपि भेदप्रतीतिर्न स्यादित्यतो मन्मते भेदस्य सांवृतत्वात् संवृतिवशेन भेदप्रतीतिसम्भवेऽपि त्वया तस्य पारमार्थिकत्वाङ्गीकारात् न तदुपपत्तिरित्यभिप्रायेण भेदभिन्न इत्युक्तम् । तथापि यत्र भेदो नाङ्गीक्रियते । तस्य वस्तुनः प्रत्यक्षाभावमात्रमेव भेदप्रत्ययाभावेन भविष्यति । अन्यत्र तु प्रपञ्चप्रत्यक्षे न बाधकमिति कथं प्रत्यक्षत्वाभावापादनमित्यतः सर्वत्रापि भेदसद्भावं प्रतिपादयितुमनेकत्वोक्तिरिति ज्ञेयम् । **उभयत्रापीति** । विशेषणत्वेन प्रतीतौ विशेष्यत्वेन प्रतीतौ चेत्यर्थः । तत्र विशेषणत्वेन भेदप्रतीतौ अन्योन्याश्रयत्वमुपपादयति (तत्र धर्मिप्रतियोगिभावमनपेक्ष्य सम्बन्धमात्रापेक्षायामन्योन्याश्रयत्वमुपपादयति) **विशेष्ययोरिति** । भेदज्ञानस्य विशेष्यीभूतघटपटज्ञानापेक्षत्वे नियामकमाह **तद्विशेषणतयेति** । तद्विशेषणत्वज्ञानस्य विशेष्यज्ञानकार्यत्वात् कार्यस्य च कारणापेक्षत्वात् युक्तं भेद-

ज्ञानस्य विशेष्यीभूतघटपटज्ञानापेक्षत्वमिति भावः । अत्र च घटपटौ भिन्नाविति प्रतीतेर्भेदांशे विशेषणत्वप्रकारकत्वाभावेऽपि तद्विशेषणत्वविषयकत्वमात्रमस्त्येव । तद्विशेषणतयेत्यनेन तद्विशेषणताविषयकज्ञानमात्रस्यैवाभिप्रेतत्वात् (विशेषणत्वेन रूपेण विशेषणज्ञानस्य कार्यत्वेन विशेष्ययोर्घटपटयोरज्ञाने तद्विशेषणत्वेन भेदज्ञानानुपपत्तिरित्यर्थः । न चैवं घटपटभेदो विशेषणमिति ज्ञाने विशेष्यज्ञानापेक्षायामपि घटपटौ भिन्नावित्यत्र न तदपेक्षा, अस्य विशेषणत्वेन ज्ञानत्वाभावादिति वाच्यम् । अस्य विशेषणत्वेन भेदज्ञानत्वमिति भ्रमेणार्थाभिधानात् ।) तद्विशेषणत्वप्रकारकत्वविवक्षायां घटपटभेदो विशेषणत्वेन विशेषणत्वप्रकारकज्ञानस्य विशेष्यीभूतघटपटज्ञानविशेषणत्वज्ञानसापेक्षत्वेऽपि घटपटौ भिन्नौ इति प्रतीतेः तदप्रकारकत्वेन विशेष्यज्ञानापेक्षत्वाभावादिति द्रष्टव्यम् । विशेष्यज्ञानस्य भेदापेक्षत्वमुपपादयति **न हीति** । विशेषणज्ञानस्य विशेष्यज्ञानापेक्षत्वमुपपादयति **न हीति** ॥ एवं भेदज्ञानस्य घटपटज्ञानापेक्षत्वमुपपाद्य घटपटज्ञानस्य भेदज्ञानापेक्षत्वमुपपादयति **विशेष्यज्ञानं चेति** । तत्कुत इत्यत आह **न हीति** । नन्वत्र भेदज्ञानस्य विशेष्यज्ञानापेक्षत्वमितिवत् विशेष्यीभूतघटपटज्ञानस्य भेदज्ञानापेक्षत्वं न वक्तुं शक्यम् । भेद इत्येवाप्रतीत्या विशेषणत्वादिनैव भेदप्रतीतिरिति नियमेन तद्भावस्य घटपटज्ञानापेक्षत्वसम्भवेऽपि घटपटयोः घटः पट इति स्वातन्त्र्येणापि प्रतीतिसम्भवेन विशेष्यत्वादिनैव प्रतीतौ नियामकाभावेन भेदज्ञानापेक्षत्वासम्भवात् । न च घटपटयोः भेदस्य विशेषणविशेष्यभावप्रयोजकभेदापेक्षत्वाभिप्रायेण घटपटज्ञानस्य भेदज्ञानापेक्षत्वमुच्यत इति वाच्यम् । तथा सति घटपटौ भिन्नाविति भेदविशेषणकप्रतीतेः घटपटभेदस्य तद्विशेष्यभूतघटपटयोश्च भेदप्रतीतिसापेक्षत्वेऽपि प्रत्येतव्यघटपटभेदप्रतीत्यपेक्षायाः अभावेनान्योन्याश्रयाभावापातात् तत्कथमिति चेन्न । भेदस्य द्विष्ठत्वपक्षे हि इयमन्योन्याश्रयतोच्यते । द्विष्ठो हि भेदः प्रतीयमानो द्वित्वावच्छिन्नघटपटविशेषणत्वादिना प्रतीयते । तादृशे च भेदज्ञाने घटपटयोः द्वित्वावच्छिन्नयोरेव ज्ञानं कारणं वाच्यम् । तेन विना द्वित्वावच्छिन्नघटपटविशेषणत्वादिना भेदज्ञानानुपपत्तेः । द्वित्वावच्छिन्नघटपटज्ञानं च घटपटगतद्वित्वप्रतीतिजनकघटपटभेदज्ञानं विना न सम्भवतीति प्रत्येतव्यभेदज्ञानापेक्षत्वात् युक्तोऽन्योन्याश्रय इति भावेन द्वित्वविशिष्टेति विशेषणम् । घटपटौ भिन्नावित्यादिप्रतीतौ द्वित्वावच्छिन्नघटपटयोरेव विशेष्यतया प्रतीयमानत्वेन घटपटमात्रस्याविशेष्यत्वात् घटपटप्रतीतिमात्रस्य भेदानपेक्षत्वे विशेष्यीभूतद्वित्वावच्छिन्नघटपटप्रतीतेः भेदप्रतीत्यविनाभूतत्वात् द्वित्वप्रतीतेः भेदप्रतीत्यपेक्षत्वादिति भावः । ननु च विशेषणत्वेन रूपेण विशेषणज्ञानस्य विशेष्यज्ञानकार्यत्ववत् विशेष्यत्वेन रूपेण विशेष्यज्ञानस्यापि विशेषणज्ञानकार्यत्वमावश्यकम् । अत एवोक्तं तत्त्वनिर्णयटीकायाम् 'विशेषणादिप्रतीतेः विशेष्यादिप्रतीतिकार्यत्वादि'ति । तथा च घटपटयोर्विशेष्यभूतयोरज्ञाने तद्विशेषणत्वेन भेदप्रतीतेरसम्भवात् तदर्थं विशेष्यीभूतघटपटप्रतीतिरावश्यकी । तत्प्रतीतिश्च विशेषणीभूतभेदप्रतीत्यधीना । तथा च भेदविशेषणीभूतभेदप्रतीतौ सत्यां तद्विशेष्यतया घटपटप्रतीतिः तत्प्रतीतौ सत्यां च तद्विशेषणतया भेदप्रतीतिरित्यन्योन्याश्रय इति विशेषणादिप्रतीतेः विशेष्यादिप्रतीतिकार्यत्वाभ्युपगमेनैवान्योन्याश्रयस्योपपादयितुं शक्यत्वात् द्वित्वविशिष्टार्थेति विशेषणं व्यर्थम् । न च विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वमिति वाच्यम् । तथा सति भेदप्रतीत्यधीनत्वात् द्वित्वप्रतीतेः विशेष्यभूतद्वित्वावच्छिन्नघटपटप्रतीत्यर्थं भेदप्रतीत्यावश्यकत्वेऽपि भेदप्रतीत्यर्थं घटपटप्रतीतेरनपेक्ष-

त्वेनान्योन्याश्रयाभावापातात् । धर्मिप्रतियोगिभावानपेक्षत्वपक्षे तेनापि रूपेण तदनपेक्षणादिति चेन्न । भावानवबोधात् । भेदप्रतीतौ सत्यां द्वित्वविशिष्टार्थप्रतीतिः । तत्प्रतीतौ च भेदप्रतीतिरित्येवान्योन्याश्रयस्वरूपम् । तत्र च भेदप्रतीतेर्घटपटप्रतीत्यपेक्षत्वस्य प्रकारान्तरेणोपपादयितुमशक्यत्वात् उपपत्त्यर्थमेव विशेषणप्रतीतेर्विशेष्यप्रतीतिकार्यत्वमभ्युपगम्यते । न तु तेनैव रूपेण उक्तरीत्या अन्योन्याश्रयत्वदानार्थं, तस्य प्रकारस्य विशिष्टज्ञानादिसाधारणत्वेन भेदमात्रसाधारणत्वाभावात् । न चैवं 'विशेषणादिप्रतीतेरि'त्यादितत्त्वनिर्णयटीकाविरोधः । तत्र आदिपदेनोक्तार्थस्य विवक्षितत्वादिति वाच्यम् । घटपटौ भिन्नावित्यत्र विशेषणप्रतीतेर्विशेष्यकार्यत्वम् । घटपटयोर्भेद इत्यत्र विशेष्यप्रतीतेर्विशेषणप्रतीतिकार्यत्वमित्यभिप्रायेणैव तत्रादिपदोपादानम् । न तु घटपटौ भिन्नावित्येतत्प्रतीतावेव विशेषणविशेष्यप्रतीतेः विशेष्यविशेषणप्रतीतिसापेक्षत्वमित्यभिप्रायेणादिपदोपादानमिति न तद्विरोध इति भावः ।

**एवमिति** । घटपटयोर्भेद इति विशेष्यत्वेन भेदप्रतीतेर्विशेषणीभूतघटपटज्ञानापेक्षत्वम् । विशेषणीभूतदण्डज्ञानाभावे तद्विशेष्यतया देवदत्तज्ञानादर्शनेन विशेष्यत्वविषयकज्ञानस्य विशेषणज्ञानकार्यत्वात् विशेषणीभूतघटपटयोश्च स्वातन्त्र्येणापि प्रतीत्या भेदविशेषणत्वेनैव तत्प्रतीतिनियमाभावेनोक्तप्रकारेण तज्ज्ञानस्य भेदज्ञानापेक्षत्वासम्भवेऽपि उक्तरीत्या द्वित्वविशिष्टार्थप्रतीतौ प्रत्येतव्यभेदज्ञानापेक्षायाः सत्त्वादिति भावः । घटपटौ भिन्नाविति विशेष्यत्वेन भेदज्ञानस्यापि विशेष्यप्रतीतिकार्यत्वं घटपटयोर्भेदज्ञानविशेष्यत्वेन च तज्ज्ञानस्य विशेषणप्रतीतिकार्यत्वमिति भावेनैव । विशेषणादिप्रतीतेरित्यादिना तत्त्वनिर्णयटीकायामादिपदोपादानम् । न तु घटपटौ भिन्नावित्येतत्प्रतीतावेव विशेषणत्वविशेष्यत्वविषयकज्ञानाय विशेष्यविशेषणत्वप्रतीतिसापेक्षत्वाभिप्रायेणेति न तद्विरोध इति ध्येयम् ।

**विठ्ठ०**— भेदस्य द्विष्ठत्वपक्षमाश्रित्याह **भेदो हि प्रतीयमान इति** । **ताभ्यामिति** । घटपटाभ्यां व्यावृत्ततयेत्यर्थः । भेद एकस्यैव धर्मोऽपरनिरूप्य इति मतमाश्रित्याह **यद्वेति** । **विशेष्ययोर्घटपटयोरिति** । इदमेतद्विशेषणमिति ज्ञानस्य विशेष्यस्वरूपज्ञानाधीनत्वादिति भावः । तदुपपादयति **न हि देवदत्तेति** । **भेदाभेदमिति** । भेदप्रतीत्यपेक्षमित्यर्थः । तदेवोपपादयति **न हि भेदाप्रतीताविति** । द्वित्वप्रतीतेर्भेदप्रतीत्यविनाभूतत्वादिति भावः । **एवं विशेष्यतयेति** । घटपटयोर्भेद इति घटापटाभ्यां व्यावृत्ततया भेदज्ञानेऽपि व्यावर्तकयोर्घटपटयोर्ज्ञाने सत्येव तद्विशेष्यतया भेदो ज्ञातव्यः । द्वित्वावच्छिन्नयोर्घटपटयोर्ज्ञानं च भेदप्रतीतिसापेक्षं अतोऽन्योन्याश्रयत्वमिति द्रष्टव्यमित्यर्थः । यद्वेत्युक्तपक्षे अन्योन्याश्रयत्वमुपपादयति **तथा धर्मीति** ।

**चषकः**— **अनेकभेदभिन्नः** अनेकभेदविशेषितः । 'भेदो हि प्रतीयमान' इत्यादिकं 'न हि भेदाप्रतीतावि'त्यन्तग्रन्थमित्थं व्याकुर्वते । भेदस्य द्विष्ठत्वपक्षमाश्रित्याह **भेदो हि प्रतीयमान इत्यादिना** ॥ **विशेष्यतया वेति** । व्यावर्त्यतया वेत्यर्थः । भेद एकस्य धर्मोऽपरस्य निरूप्य इति मतमाश्रित्याह **यद्वा घटादिति** ॥ **विशेष्ययोर्घटपटयोरिति** । अयं भावः । भेदो हि संयोगादिवदुभयधर्मः स चोभयसम्बन्धितयैवावभासते । न पृथक् । अत एवोक्तं प्राक् 'भेद इत्येव प्रतीतेरभावादि'ति । उभयसम्बन्धिता च कदाचि-

त्तद्विशेषणता कदाचित्तद्विशेष्यता । एतदुभयरूपेणोभयसम्बन्धितया भेदज्ञानं उभयज्ञानाधीनम् । उभयाज्ञाने भेदस्य तत्सम्बन्धित्वेन प्रत्येतुमशक्यत्वात् । उभयज्ञानं च भेदज्ञानापेक्षम् । द्वित्वविशिष्टार्थप्रतीतेर्भेदज्ञान-जन्यत्वात् । अतोऽन्योन्याश्रयत्वमिति । **न हि देवदत्तेति** । इदं च देवदत्तविशेषणं दण्ड इति दण्डे देवदत्त-विशेषणत्वं यत्र प्रकारतया भासते तदभिप्रायकमेवेति बोध्यम् । तेन दण्डी देवदत्त इति ज्ञाने हि दण्डो देवदत्तविशेषणतया भासते । न चात्र देवदत्तज्ञानं कारणमिति कश्चिदभ्युपैति । विशेष्यज्ञानस्य विशिष्टज्ञाना-हेतुत्वात् अतः कथमेतदिति शङ्कानवकाशः । दण्डीति ज्ञाने दण्डे विशेषणत्वस्य संसर्गतया भानेऽप्युक्तज्ञान इव प्रकारत्वेनाभानात् । न च भेदनिष्ठविशेषणतादेरपि संसर्गमर्यादयैव भानात् कथं तत्र घटपटरूपविशेष्यज्ञानं कारणं स्यादिति वाच्यम् । ससम्बन्धिकपदार्थेषु विशेषणत्वादिरूपसम्बन्धिसम्बन्धस्य प्रकारतयैव भानमित्याशयात् । विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादिति तत्त्वनिर्णयटीकायामप्ययमेवाभिप्रायो वर्णनीयः । **भेदापेक्ष-मिति** । भेदप्रतीत्यपेक्षमित्यर्थः । एतदेवोपपादयति **न हि भेदाप्रतीताविती ति** ।

अत्र गुरुपादाः अभावप्रकारकधीसामान्यं प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽभावांशे वैशिष्ट्यं, तादृशप्रतियोगिविशेषितेऽभावेऽधिकरणतावच्छेदकविशिष्टानुयोगिकवैशिष्ट्यं चावगाहत इति विशेषणताव-च्छेदकप्रकारकनिर्णयजन्यतावच्छेदकीभूतविशिष्टप्रतियोगिकवैशिष्ट्यावगाहिबुद्धित्वाक्रान्तं विशेष्यतावच्छेदक-प्रकारकनिर्णयजन्यतावच्छेदकीभूतविशिष्टानुयोगिकवैशिष्ट्यावगाहिबुद्धित्वाक्रान्तं च भवतीत्यभावप्रत्ययो हि विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेत इति दीधितिकारोक्तिं व्याचक्षाणैर्विशिष्टवैशिष्ट्येत्यस्य विशिष्टस्य वैशिष्ट्यं विशिष्टवैशिष्ट्यमित्यर्थापयद्भिः समर्थितम् । इत्थं च भेदस्योभयवृत्तिताकल्पे समूहालम्बनानात्मिकायास्तस्य प्रातिस्विकताकल्पे च तदात्मिकायाः, घटपटौ भिन्नाविति घटः पटाद्भिन्नः पटो घटाद्भिन्न इति च प्रतीतेरुक्तदिशा विशेषणतावच्छेदकप्रकारकनिर्णयविशेष्यतावच्छेदकप्रकारकनिर्णयोभयजन्यतावच्छेदकीभूतधर्मद्वयाक्रान्ततया अन्योन्याश्रयतामभिधित्समानः पीठिकामारचयति **भेदो हीत्यादिना** । घटपटोभयत्वावच्छिन्नप्रकारतानिरूपित-विशेष्यत्वाभिन्नप्रतीतिनिरूपितविशेषणताश्रयो भेद इति वान्वयबोधोऽवसेयः । विशिष्टानुयोगिकवैशिष्ट्याव-गाहिबुद्धौ विशेष्यतावच्छेदकप्रकारकनिर्णयहेतुतां निदर्शनव्यतिरेकोपदर्शनेन समर्थयते **न हीत्यादि** । दण्डनिष्ठ-विशेषणतानिरूपकदर्शनं देवदत्तादर्शने न युज्यत इत्यर्थः । धर्मितावच्छेदकतया देवदत्तमनवगाहमानायाः प्रतीते-र्देवदत्तो न दण्डीति बाधग्रहाप्रतिबध्यतया तादृशबाधग्रहदशायामप्येकत्र द्वयमिति नीत्या दण्डदेवदत्तत्वोभयाव-गाहिन्याः प्रतीतेरापत्त्या दण्डधर्मितावच्छेदकतयैव देवदत्तत्वभानोपगमावश्यम्भावादिति भावः । इत्थं च सुर-सरित इव स्वरसवाहिन्याष्टीकाकृत्पादसरणेर्न क्वापि वाव्रज्या कल्पनीयेत्यभ्यधुरिति तद्दिशा सुधातत्त्वनिर्णय-टीकाद्वयाक्षरानुपूर्वीसामञ्जस्यप्रकारोऽनसूयेन चेतसा विभावनीयः । **भेदापेक्षं** भेदप्रतीतिनियन्त्रितम् ।

**॥ इति विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य निरूपणम् ॥**

* * *

**॥ अथ तत्रान्ते विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य आपादकानभ्युपगमेन द्वेधा निराकरणम् ॥**

**॥ अथ च तत्रादौ तस्य तर्कस्य स्वमतेन निराकरणम् ॥**

**॥ अथ च तत्र वस्तुग्रहे भेदाग्रहाभावात् भेदस्य वस्तुस्वरूपत्वम् ॥**

३७ सु०— निराकरोति **नेति** ।

**अनु०—** न तत् ।

यदुक्तं भेदस्य दुर्ग्राह्यत्वं **तत्** नास्तीत्यर्थः । तत्कथमित्यत आह **स्वरूपमिति** ।

स्वरूपं वस्तुनो भेदो

यत् यस्मात् **भेदो वस्तुनः स्वरूपं** तस्मात्, तस्य वस्तुनो ग्र(हे)हणे सति पश्चाद्भेदग्रह इति नास्ति, किन्तु वस्तुग्रह एव भेदग्रहः । तथा च क्वान्योन्याश्रयत्वं येन भेदो दुर्ग्रहः स्यादिति ।

भेदस्य वस्तुस्वरूपत्वं कुत इति चेत् । यो हि भेदमेव नाङ्गीकुर्यात्, किं तस्यार्द्रकवणिजो वहित्रचिन्तया । यस्तु भेदमङ्गीकृत्य तस्य वस्तुस्वरूपत्वं नाभ्युपैति तं प्रत्याह **यदिति** ।

यन्न तस्य ग्रहेऽग्रहः ।

**यस्माद्वस्तुनो ग्रहे तस्य भेदस्य अग्रहः** नास्ति तस्मात् भेदो वस्तुनः स्वरूपमिति सम्बन्धः ।

अयमत्र प्रयोगः । विमतो भेदो घटस्वरूपं भवितुमर्हति घटग्रहेऽगृह्यमाणत्वरहितत्वात् घटस्वरूपवदेवेति ।

परि०— किं तस्येति । भेदे धर्मिस्वरूपत्वास्वरूपत्वचिन्तयेति योज्यम् । तत्र दृष्टान्तः आर्द्रकेत्यादि । आर्द्रकम् लशुनादि । तद्विक्रेतुः । वहित्रं नाम अनर्घ्यनिकवस्त्वादानोपायरूपा

समुद्रयानभूता नौरुच्यते इति, स्वस्य धनिकयोग्यवस्तुचिन्तया किमपि फलं यथा नास्ति तथेति भावः ।

**गु०दी०— आर्द्रकवणिजो वहित्रचिन्तया** इत्यत्र वहित्रं नौः । 'जगद्बीजवहित्रधृक्' इति मत्स्यनामसु श्रवणात् ।

**यादु०— वहित्रचिन्तयेति** । वहित्रं देशान्तरीयानर्घ्यनानावस्तुपूर्णा नौः । तच्चिन्ता धनवतां तादृशवस्तुवणिजामेवोचिता नार्द्रकवणिजः । तस्य दरिद्रत्वेन घटस्यैवाभावादिति भावः ।

**वं०प०— यस्तु** वैशेषिकादिः ।

**कं०रा०— आर्द्रकवणिज इति** । शृङ्गबेरवणिजो यथा नौचिन्तया प्रयोजनं नास्ति तथा भेदमेवानङ्गीकुर्वाणस्य भेदस्य वस्तुस्वरूपत्वं कुतः प्रमाणसिद्धमिति चिन्तया प्रयोजनं नास्तीति भावः । **विमतो भेद इति** । भेदमात्रपक्षीकारे पटादिधर्मिकभेदस्य घटस्वरूपत्वाभावात् तदंशे बाधः स्यात् तन्निरासाय विमत इत्युक्तम् ।

**श्रीनिधि०—** ननु भेदस्य वस्तुस्वरूपत्वे 'यन्न तस्य ग्रहे ग्रह' इत्यनेन प्रमाणमुच्यते । तदयुक्तं वादिना भेदस्यैवानङ्गीकारेणान्यतररीत्याश्रयासिद्ध्यापत्तेः । प्रश्नोऽप्ययमसम्मतः इत्यतः विकल्पस्याभिप्रेतत्वात् न कोऽपि दोष इति भावेनाह **यो हीत्यादिना** ।

**शे०चं०— वस्तुनः स्वरूपमिति** । धर्मिणः स्वरूपमित्यर्थः । अयं भावः । न भेदो युगधर्मः । किन्त्वेकस्य धर्मोऽपरेण निरूप्यः । घटपटौ भिन्नावित्यत्रापि घटात्पटो भिन्न इत्येवार्थः । एवं घटपटयोर्भेद इत्यत्रापि घटपटधर्मिकं भेदद्वयमेव प्रतीयते । एकवचनं तु घटपटयो रूपमितिवत् समुदायापेक्षम् । स च भेदो धर्मिणः स्वरूपमेवेति । एतच्चोत्तरत्र टीकाकार एव स्पष्टयिष्यतीति ॥ **तथा चेति** । प्रतीतिद्वयाभावादिति भावः ॥ **आर्द्रकवणिज इति** । 'आर्द्रकं शृङ्गबेरं स्यादथ शुण्ठी महौषधमि'त्यभिधानादार्द्रकशब्दः शुण्ठीपरः ॥

**वा०र०— आर्द्रकवणिज इति** मूलम् । यथा द्वीपान्तरादितः आनीयमानाश्च पदार्थाः वणिग्भिः सम्पाद्यन्ते विक्रीयन्ते च सा नौरत्र वहित्रशब्देन विवक्षिता । वहित्रशब्दस्य नद्यादितरणमात्रपरत्वात् । एवं चार्द्रकवणिज उक्तनौसाध्यपदार्थसम्पादनादिप्रयोजनाभावात् सा नौः कुत्र प्रेष्या कदा यास्यतीत्यादिविचारो यथा नावश्यक इत्यर्थः । एतेन विशेषार्थतया अन्यथाख्यातिरित्थं व्याख्यानं निरस्तम् । **आर्द्रकं शृङ्गबेरं स्यादथ शुण्ठी महौषधमित्यादि** । यद्यपि 'आर्द्रकं शृङ्गबेरं स्यात्' इत्यनन्तरं 'अथच्छत्रावितुन्नकं' इति पादः, तदुपरि 'कुस्तुम्बुरुचधान्यादिकमि'ति पादः, तदनन्तरं च 'अथ शुण्ठी महौषधमि'ति पाद इति न टीकोक्तरीत्या

पादद्वयमेलनं युक्तमित्याभाति । तथापि तथाविधोऽपि अमरे पाठोऽस्तीत्याशयेन वा । आर्द्रकं शृङ्गमिति चरणस्याथ शुण्ठीति चरणस्य च फलतः प्रवृत्तिविकाराभावापन्नैकविषयत्वम् । अत एव क्षीरस्वामिनापि । आह च । 'महौषधं शृङ्गबेरं कटुभद्रं तथार्द्रकमि'ति सम्मतिः कथिता । तत्रापि महौषधमिति शुण्ठीनाम्न एवार्द्रकनामताप्राप्त्या एकविषयत्वस्याभिमतत्वप्रतीतेः इति न कश्चिद्दोषः । एवमेव 'स्वरूपं वस्तुनो भेदो यदि'त्येतन्मूलटीकागत 'आर्द्रकं शृङ्गबेरम्' इत्येतद्वाक्यमपि योज्यम् ।

**स०व्र०— घटग्रहे अगृह्यमाणत्वरहितत्वादिति** । ननु प्रथमप्रतीतौ घटस्य न सर्वात्मकमिदं, किन्तु स्वयमेवेत्येवं सर्वव्यावृत्ततयैव प्रतीतिः तत्त्ववादिना अभ्युपगम्यते । अन्यथा संशयाद्यापातात् । घटत्वेन रूपेण घटमात्रप्रतीतौ साक्षिरूपसर्वज्ञानसत्त्वोपपादनानर्थक्यापाताच्च । तथा च सर्ववैलक्षण्यप्रतियोगिभूतसर्वस्य घटग्रहे अगृह्यमाणत्वराहित्येन उक्तहेतोस्तत्र सत्त्वेऽपि घटस्वरूपत्वाभावात् व्यभिचार इति चेन्न । न सर्वात्मकमिदं किन्तु स्वयमेवेत्येवं न वस्तुप्रतीतिः । तथा सति भावाभावलक्षणयोः परस्परातिव्याप्तिप्रसङ्गात् । किन्तु अभिप्रायकथनमेतत् । प्रतीतिरस्तु स्वरूपभेदस्यापि घट इत्येवं घटत्वेनैव रूपेण । तत्र च अगृह्यमाणत्वराहित्याभावान्न व्यभिचारः । फलबलेन घटत्वेन रूपेण भेदज्ञानमेव संशयनिवर्तकमित्यङ्गीकारान्न संशयादिप्रसङ्गः । प्रमेयत्वेन रूपेण घटभावप्रत्यक्षेऽपि प्रतियोगिज्ञानसापेक्षताया दृष्टत्वेन घटत्वेन रूपेण भेदज्ञानेऽपि सर्वरूपप्रतियोगिज्ञानापेक्षोपपत्त्या तदुपपादनस्यापि सामञ्जस्यात् । 'स्वरूपभेदपक्षे वस्तुतः अन्योन्यप्रतियोगिकयोः घटपटस्वरूपभेदयोरन्योन्यप्रतियोगित्वयोग्यघटपटत्वादिरूपेण प्रतीतयोरि'त्यादिना न्यायामृतेऽपि घटत्वादिना प्रतीत्युपपादनमप्यत एवोपपद्यत इति ज्ञेयम् ।

**विठ्ठ०— तथा चेति** । भेदप्रतीतेर्द्वित्वावच्छिन्नविशेष्यादिप्रतीतिसापेक्षत्वे धर्म्यादिप्रतीतिसापेक्षत्वे वा कथञ्चिदन्योन्याश्रयत्वं भवेत् । विशेष्यधर्म्यादिप्रतीतेरेव भेदप्रतीतित्वान्नान्योन्याश्रयत्वमिति भावः । **आर्द्रकवणिक इति** । केवलं दरिद्रस्य तत्तद्दिनमात्रावस्थाय्यार्द्रकादिविक्रयेण तदा तदा जीवमानस्यातिबहुधनसाध्यनानारत्नादिद्रव्यपूर्णनावसम्पादनप्रकारचिन्तयेत्यर्थः ।

**चषकः**— 'आर्द्रकं शृङ्गवेरं स्यादि'त्याभिधानादार्द्रकं शृङ्गवेरं लशुनादीत्यपि स्थितम् । **वहित्रं** नानानर्घ्यवस्त्वादानोपायभूता नौः । **अयमत्र प्रयोग इति** । घटभिन्नत्वाभिन्नत्वकोटिकविमतिविषयीभूतो घटानुयोगिकपटप्रतियोगिकभेदो घटस्वरूपं निरूपितत्वसम्बन्धेन घटज्ञानविशेषितविषयतात्वावच्छिन्नव्याप्यतावच्छेदकस्ववृत्तिज्ञानीयविषयतात्वकत्वात् । ज्ञानीयत्वं च निरूपितत्वसम्बन्धेन ज्ञानविशेषित्वम् । अत्र च घटज्ञानीयविषयतासमानाधिकरणस्तज्ज्ञानीयविषयताकत्वादित्येवोक्तौ घटपटाविति समूहालम्बनीयविषयतामादाय पटेऽनैकान्त्यापत्त्या सामानाधिकरण्यमात्रानिवेशेन व्याप्यत्वपर्यन्तानुधावनम् । विषयतायां प्रातिस्विकया कस्यांश्चित्पटविषयतायां तद्व्याप्यत्वमादायोक्तक्षतितादवस्थ्यापनुत्तये अवच्छेदकपर्यन्तानुधावनमिति समुदिताशयः ।

* * *

## ॥ अथ च तत्र विशेषनिष्ठाया एव व्याप्तेरवधातव्या ॥

३८ **सु०— यदि अत्र तस्य ग्रहे गृह्यमाणत्वादित्येवोच्येत तदा घटपटाविति घटज्ञानेन ज्ञायमानेन पटेनानैकान्तिकत्वं स्यात् । तदर्थं 'तस्य ग्रहेऽग्रहो ने'त्युक्तम् । न हि घटग्रहे गृह्यमाणोऽपि पटो घटग्रहे सर्वथा गृह्यत एवेति नियमोऽस्ति । यज्ज्ञाने यत्सर्वथोपलभ्यते तत्तत्स्वरूपमिति व्याप्तावुच्यमानायां दण्डिज्ञाने दण्डोऽप्यवश्यं स्फुरत्येव, न च असौ दण्डिनः स्वरूपमित्यतो विशेषनिष्ठैव व्याप्तिरभिधातव्या ।**

**परि०—** नञद्वयेन नियमलाभ इति भावेनाह **सर्वथा गृह्यत एवेति नियमोऽस्तीति** । **विशेषनिष्ठैवेति** । यद्घटे गृह्यमाणेऽगृह्यमाणत्वरहितं तत्तदभिन्नं यथा घट(स्व)स्य रूपम् । एवं, भेदः घटस्वरूपं घटे गृह्यमाणेऽगृह्यमाणत्वरहितत्वादित्येवं विशिष्य विशिष्यैव प्रयोगव्याप्ती ध्येये इति भावः ।

**गु०दी०— विशेषनिष्ठैव व्याप्तिरभिधातव्या** इत्यत्र यत्स्वरूपमात्रप्रतीतौ यत्सर्वथा प्रतीयत इति व्याप्तिरभिधातव्येत्यर्थः ।

**यादु०— विशेषनिष्ठैवेति** । यद्घटग्रहे सर्वथाऽगृह्यमाणत्वरहितं तद्घटस्वरूपं, यथा घटस्वरूपमिति विशेषनिष्ठैवेत्यर्थः । स्वभिन्नत्वेनोभयसम्मतविशेषणविशेषितवस्तुस्वरूपनिष्ठैवेत्यर्थः ।

**वं०प०—** तथा च अनैकान्त्यमित्याह **न हीति** ॥ **नियमोऽस्तीति** । 'द्वौ नञावि'ति न्यायेन नियमो लभ्यत इत्यर्थः ॥ **यज्ज्ञाने यत्सर्वथेति** । नियमेनेत्यर्थः ।

**कं०रा०— यज्ज्ञान इति** । यज्ज्ञाने यन्नियमेनोपलभ्यते तत्तस्य स्वरूपमिति सामान्यव्याप्ता- वुच्यमानायां दण्डविशिष्टज्ञाने नियमेन स्फुरन्नपि दण्डो न दण्डविशिष्टस्य स्वरूपमिति व्यभिचारः स्यात् अतो यद्घटग्रहे नियमेन गृह्यमाणं तद्घटस्वरूपं यथा घटस्वरूपमिति विशेषव्याप्तिरेवाभिधातव्येत्यर्थः ।

**श्रीनिधि०— विशेषनिष्ठैवेति** । घटग्रहे अगृह्यमाणरहितत्वं यत्र तत्र तत्स्वरूपत्वं यथा घट इत्येवं व्याप्तिरभिधातव्येत्यर्थः ।

**शे०चं०— नियमोऽस्तीति** । घट इति घटत्वेन घटग्रहे पटग्रहाभावान्न नियम इति भावः ॥ **विशेषनिष्ठैवेति** । स्वभिन्नविशेषविशेषितवस्तुस्वरूपनिष्ठैवेत्यर्थः ।

**वा०र०— विशेषनिष्ठैवेतीति** । यो घटग्रहे अगृह्यमाणत्वरहितः स घटस्वरूपमिति । यथोक्त-साध्ययोः व्याप्तिर्वाच्येत्यर्थः ।

**वि०— घटपटाविति घटज्ञानेन इति** । घटपटसमुदायावलम्बिज्ञानस्यैकत्वादिति भावः । **न हि घटग्रह इति** । घटपटावितिप्रकारकघटज्ञाने पटो गृह्यत इत्येतावता घटज्ञाने पटोऽवश्यं गृह्यत इति न नियमोऽस्ति । अयं घट इति ज्ञाने पटस्फूर्त्यभावादिति भावः । **विशेषनिष्ठैवेति** । यद्घटज्ञाने सर्वथोपलभ्यते तद्घट-स्वरूपं यथा घट इति वस्तुविशेषनिष्ठैवेत्यर्थः ।

**॥ इति तत्र विशेषनिष्ठाया एव व्याप्तेरवधातव्या ॥**

* * *

**॥ अथ च तत्र गौरववशेनारुचौ सत्यां सामान्यव्याप्तावपि दोषाभावप्रदर्शनम् ॥**

३९ **सु०— किञ्च विशिष्टं नाम विशेषणसम्बन्धनिमित्तो विशेष्यस्याकारभेद इति पक्षे न विशिष्टप्रत्यये विशेषणस्फुरणमस्ति, किन्नाम विशेषणज्ञानं विशिष्टज्ञानकारणम्, आशु-भावाच्च न क्रमो लक्ष्यते । यद्वा घटभेदौ पक्षीकृत्य नियमेनान्यतरप्रतीतावन्यतरस्य स्फुरणेन अन्योन्याभिन्नत्वं साध्यम्, न हि दण्डिप्रतीतौ दण्ड(स्य )स्फुरणेऽपि, दण्डप्रतीतौ सर्वथा दण्डि(नः)स्फुरणमस्तीति ।**

**परि०—** सामान्यव्याप्तावपि न दोष इति भावेनाह **किञ्चेति** । ननूभयत्रानैकान्तिकत्वाभाव-साम्येऽपि सामान्यव्याप्तिरेवादौ कुतो नाभिधीयत इत्यत आह **आशुभावाच्चेति** । आशु शीघ्रं धर्मिस्वरूपस्य भेदस्य भावात् ज्ञानात् स्फुरणादिति यावत् । सर्वमतसाधारण्येनाह **यद्वेति** ।

**यादु०—** नन्वेवं गौरवमित्यरुचेराह **किञ्चेति** ॥ **न विशिष्टप्रत्यय इति** । विशिष्टस्याखण्डवस्त्व-न्तररूपत्वादिति भावः । नन्वेवं दण्डादेर्विशेषणत्वमेव कुतः । तत्प्रतियोगिकवैशिष्ट्यस्य विशिष्टज्ञानेऽभानात् । न च जनकीभूतज्ञानविषयत्वमेव विशेषणत्वमिति वाच्यम् । अनुमितिजनकीभूतज्ञानविषयस्यापि व्याप्त्यादेरनु-मितिविषयविशेषणत्वाभावादित्याशयेनाह **यद्वेति** ।

**वं०प०—** किञ्च यत् घटग्रहेऽगृह्यमाणत्वरहितं तद्घटस्वरूपं यथा घटस्वरूपमिति विशेषव्याप्तिर्न विवक्षिता, किन्तु यज्ज्ञाने यत्सर्वथोपलभ्यते तत्तस्य स्वरूपमिति सामान्यव्याप्तिरेव विवक्षिता । न च व्यभि-चारः । दण्डरूपविशेषणसम्बन्धेन दण्डित्वरूपं विशिष्टं नामाकारान्तरं विशेष्ये च जायत इति पक्षे दण्डिज्ञाने

विशिष्टरूपाकारान्तरविषयके दण्डविषयकत्वाभावात् । दण्डविषयकं यद्विशेषणज्ञानं तद्विशिष्टरूपाकारान्तर-विषयकज्ञानकारणमेव । तज्ज्ञानानन्तरं विशिष्टज्ञानं जायते शैघ्र्यात्क्रमो न ज्ञायत इति न व्यभिचार इत्याह **किञ्चेत्यादिना । अन्यतरप्रतीतौ**, घटप्रतीतौ भेदः प्रतीयते तत्प्रतीतौ च घटः प्रतीयत इति नियमेनान्यतर-प्रतीतौ ।

**कं०रा०— न विशिष्टप्रत्यय इति** । तथा च दण्डविशिष्टज्ञाने दण्डरस्यास्फुरणेन तत्र हेत्वभावादेव न व्यभिचार इति सामान्यव्याप्तिरिति वक्तुं शक्येति भावः । ननु विशिष्टज्ञानकारणत्वेन विशेषणज्ञानस्य तत्पूर्वकाल एव सत्त्वे तयोः क्रम उपलभ्यत इत्यत आह **आशुभावादिति । न हि दण्डिप्रतीताविति** । तथा च ययोरन्यतरप्रतीतावन्यतरस्य नियमेन स्फुरणं तयोरन्योन्याभिन्नत्वमिति सामान्यव्याप्तौ न किञ्चिद्बाधकमिति भावः ।

**श्रीनिधि०— किञ्चेति** । एवमपि यद् ज्ञाने यत्सर्वथोपलम्भ्यते तत् तत्स्वरूपमिति व्याप्तावुपमायां अभावसादृश्यज्ञानयोर्नियमेन प्रतीयमाने प्रतियोगिनि विशिष्टस्यानतिरिक्तत्वपक्षे दण्डे च व्यभिचारः स्यादित्यत आह **यद्वेति । न हि दण्डिप्रतीताविति** । एवमभावसादृश्ययोः भासमानयोः प्रतियोगिनोः भाननियमेऽपि प्रतियोगिनि भासमाने तयोर्भाननियमो नास्तीति न व्यभिचार इति द्रष्टव्यम् ।

**शे०चं०—** ननु भेदस्य वस्तुस्वरूपत्ववादिना न घट इत्येव तत्प्रतीतिरङ्गीकर्तुं शक्यते । संशया-द्यनिस्तारापातात् । घटत्वेन रूपेण घटमात्रप्रतीतौ साक्षिरूपसर्वज्ञानोपपादनानर्थक्यापाताच्च । किन्नाम न सर्वा-त्मकमिदं किन्तु स्वयमेवेत्यादितत्त्वनिर्णयटीकानुसारेण सर्वविलक्षणत्वेनैव । तथा च सर्वविलक्षणत्वेन घट-प्रतीतावगृह्यमाणत्वराहित्यस्य प्रतियोगिभूते सर्वस्मिन्सत्त्वेऽपि तस्य घटस्वरूपत्वाभावात् तत्र व्यभिचार इति चेन्न । भेदस्य धर्मिस्वरूपत्वेऽपि सर्वविलक्षणत्वेन रूपेण भेदप्रतीतिः सिद्धान्ते नाभिप्रेता । किन्तु घटत्वेनैव । न सर्वात्मकमित्यादिस्तु न प्रतीत्याकारः किन्त्वभिप्रायकथनमेतत् । कुत इति चेन्न । तथा सत्यभावलक्षणस्य भावेऽतिव्याप्तिप्रसङ्गात् । न च प्रथमप्रतीतौ भेदस्य घटत्वेन प्रतीत्यङ्गीकारे साक्षिरूपसर्वज्ञानोपपादनमनर्थकम् । प्रमेयत्वादिना रूपेणाभावज्ञानस्येव घटत्वेन तज्ज्ञानस्यापि प्रतियोगिज्ञानानपेक्षत्वादिति वाच्यम् । वस्तुतस्तदन-पेक्षत्वेऽप्यभ्युपगमवादेन तदुपवर्णनोपपत्तेः । न चैवं व्यावृत्त्यज्ञानेन सर्वत्र संशयाद्यापात इति वाच्यम् । फल-बलेन घटत्वेन रूपेण तज्ज्ञानस्यैव संशयनिवर्तकत्वाङ्गीकारात् । तत्र चागृह्यमाणत्वराहित्याभावान्न प्रतियोगिभूते सर्वस्मिन् व्यभिचार इति । विशेषनिष्ठव्याप्त्यभ्युपगमे गौरवभयादाह **किञ्चेति** । न विशिष्टप्रत्यये विशेषणस्फुरण-मस्तीति विशिष्टस्य विशेषणादिभिन्नाखण्डपदार्थरूपत्वादिति भावः । नन्वेवं सति दण्डादेर्विशेषणत्वानुपपत्तिः । कारणीभूतज्ञानविषयत्वे सति कार्यीभूतज्ञानविषयत्वस्यैव तन्निर्वचनत्वात् । दण्डादेश्च कारणीभूतज्ञानविषय-त्वात् तत्कथं तज्ज्ञानस्य विशिष्टज्ञानकारणत्वकल्पनम् । न च कारणीभूतज्ञानविषयतामात्रमेव विशेषणत्वं न तु विशिष्टं गौरवात् । तच्च दण्डादेरविकलमिति युक्तमेव तज्ज्ञानस्य कारणत्वमिति वाच्यम् । तथा सत्यनुमिति-

जनकीभूतव्याप्तिज्ञानविषयस्य व्याप्त्यादेरप्यनुमितिविषयविशेषणत्वापातेन अविशिष्टस्य तत्त्वायोगादित्यरुचेराह **यद्वेति** ।

**वा०र०**— उक्तार्थस्य स्पष्टत्वात् तमनभिधाय तद्व्याप्तावेव व्यभिचारमाशङ्क्य निराकरोति **ननु भेदस्येत्यादिना** । **तत्त्वनिर्णयेति** । सामान्यतः सर्ववैलक्षण्ये ज्ञाते एव घटत्वादिज्ञानमित्येतत् तत्त्वनिर्णयटीकानुसारेणेत्यर्थः । एतच्चानुसारकथनं तद्गतिकथनार्थम् । उत्तरत्र तद्गतेः सर्वात्मकमित्यादिना करिष्यमाणत्वादिति ज्ञेयम् । **साक्षिरूपेति** । उक्तस्थलीयटीकायां सामान्यतः सर्वज्ञानस्यैवोक्तावपि यथा युगपदेव दीपसहस्र इत्येतद्वाक्यव्याख्यानावसरे सामान्यतो यत्सर्वविषयं ज्ञानं तत् साक्षिरूपमिति अनुवादोऽस्तीति भावः । अतः सर्वे पदार्थाश्च सामान्यात् साक्षिगोचराः इति स्वप्राधिकरणीयानुव्याख्यानमूले उपपादनमिति वाक्यार्थः । निवर्तकत्वाङ्गीकारात् इत्यनन्तरं तस्मान्न व्यभिचार इतीति पाठः । इतिशब्दः शङ्कानिरासपरिसमाप्तौ । **गौरवभयादिति** । इदं च गुडजिह्विकामात्रम् । वस्तुतस्तु घटः एतत्कालीनः इत्यादि कालदेशपुरुषादिसम्बन्धवैशिष्ट्यबोधस्थले घटग्रहे अगृह्यमाणत्वरहितत्वस्य तत्कालादावपि सत्त्वात् घटस्वरूपत्वाभावाच्च व्यभिचारः । किञ्च घटग्रहणस्य उदाहरणतया करणेऽपि दण्डिनिष्ठभेदस्य दण्डिस्वरूपत्वसाधनावसरे दण्डिग्रहे अगृह्यमाणत्वरहिते दण्डे व्यभिचारः यथाश्रुतसाधनस्यैव प्राप्तो भवतीत्यस्वरसात् इत्यपि ज्ञेयम् । अत एव किञ्चेति पक्षे विशिष्टज्ञानमात्रे व्यभिचारपरिहारः मूले करिष्यते इति ज्ञेयम् ।

एवं विशेषनिष्ठव्याप्तिस्वरूपे व्यभिचाराद्याशङ्कनादिनैव स्वभिन्नविशेषणाविशेषितवस्तुस्वरूपनिष्ठैवेत्यन्यथाख्यात्युक्तार्थोऽपि नेति सूचितम् । तथा हि विमतो भेदो घटस्वरूपमिति प्रागुक्तप्रयोगे विशेषव्याप्तौ घटस्वरूपे दृष्टान्तीकृते सति घटग्रहे गृह्यमाणत्वमात्रस्य घटपटाविति गृह्यमाणे पटे व्यभिचारनिरासाय अगृह्यमाणत्वादिरहितत्वादिति पदमिति प्रतिपादिते सति पश्चात् सामान्यव्याप्तिमाशङ्क्य व्यभिचारेण तदङ्गीकारानुपपत्तेः यथाश्रुतविशेषप्रयुक्तसाध्यसाधनयोरेव व्याप्तिर्वाच्या इत्येवार्थस्य पूर्वोत्तरग्रन्थपर्यालोचनया स्पष्टं प्रतीयमानतया तत्परित्यागेन यज्ज्ञाने यत्सर्वथेति सामान्यव्याप्तौ दण्डीति ज्ञाने भासमानदण्डे व्यभिचारपरिहाराय तद्व्यावर्तनोपयुक्तविशेषणयुक्ततया व्याप्तिर्वाच्या इत्यर्थपरिकल्पनस्य पूर्वोत्तरग्रन्थापरामर्शमूलकत्वमेवेति सुज्ञानत्वात् । स्वभिन्नविशेषणाविशेषितवस्तुनिष्ठेति व्याख्यानेन किमुक्तं भवतीति न प्रतीयते । तादृशं हि वस्तु यावद्विशेष्यभावि विशेषणेन विशिष्टं स्यात् । व्याप्तेश्च तन्निष्ठत्वं तादृशहेतुनिष्ठत्वं वा तादृशदृष्टान्तनिष्ठत्वं वा वाच्यम् । न च तदुभयमपि सम्भवति । तस्य हेतुत्वाभावात् दृष्टान्तत्वाभावाच्च । न च स्वभिन्नविशेषणाविशेषितवस्तुज्ञाने यत् सर्वथा भासते तत् तत्स्वरूपमिति व्याप्तिशरीरविवक्षाभिप्रायेण व्याप्तिघटकवस्तुरूपकथने तात्पर्यात् न दोष इति वाच्यम् । तथा सति भेदस्वरूपपक्षे स्वभिन्नविशेषणविशेषितघटज्ञाने भासमानत्वहेतोः असिद्ध्यापातात् । न हि भेदस्वरूपत्वसाधनावसरे पटभेदे घटाद्भिन्नत्वाभावः सिद्धः । येन तादृशविशेषणाविशेषितत्वं स्यादित्यास्तामिति । **विशेषणादिभिन्नेति** । विशिष्टं विशेष्याश्रितं द्रव्यान्तरं इत्यन्यथाख्यातिस्थलीयसुधायामुक्तेरिति भावः । शङ्कते **नन्वेवमिति** ।

विठ०— एवं सति गौरवमित्यरुच्या सामान्यव्याप्तिपक्षं स्वीकृत्य तत्रोक्तं दण्डे व्यभिचारं निराकरोति **किं चेति** । ननु यदि विशिष्टस्य वस्त्वन्तरतया न विशिष्टज्ञाने दण्डादिविशेषणस्य स्फुरणं किन्तु विशेषणज्ञानस्य विशिष्टज्ञानकारणतया ततः पूर्वभावित्वं तर्हि प्रथमं दण्डज्ञानं पश्चाद्दण्डिज्ञानमिति क्रमप्रतीतिः प्रसज्यत इत्यत आह **आशुभावाच्चेति** । विशिष्टप्रत्यये विशेषणस्य स्फुरणमङ्गीकृत्यापि प्रकृतानुमानोपपत्तिमाह **यद्वेति** । तथा च घटभेदावन्योन्यभिन्नौ यदुभयोर्मध्येऽन्यतरप्रतीतावन्यतरस्य नियमेन प्रतीयमानत्वाद्व्यतिरेकेण घटपटवदित्यनुमानं द्रष्टव्यम् । न चैतद्व्यभिचरितमित्याह **न हि दण्डीति** ।

**॥ इति तत्र गौरववशेनारुचौ सत्यां सामान्यव्याप्तावपि दोषाभावप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनुपपत्तिप्रदर्शनम् ॥**

**॥ अथ भेदस्य वस्तुप्रतीतावप्रतीतत्वे अस्यामुना भेद इति वक्तुमशक्यता ॥**

४० **सु०— भवेदेतद्यदि भेदो वस्तुग्रह एव गृह्येत । न चैवम् । किन्नाम वस्तुप्रतीत्युत्तरकालमेव । निर्विकल्पके (हि) च प्रत्यये वस्तुमात्रमवभासते, भेदस्तु वस्तुदर्शनोत्तरकालं प्रतियोगिस्मरणे सत्यवभासते, यथा सादृश्यमभावश्चेत्यत आह अन्यथेति ।**

## अनु०— अन्यथाऽस्यामुना भेद इति वक्तुं न शक्यते ।

**यदि भेदो वस्तुप्रतीतौ न प्रतीयेत तदाऽस्यामुना भेद इत्युत्तरकालं सविकल्पक(वि)ज्ञानमपि न जायेत । तथा च, तथा व्यवहारोऽपि न स्यात् । अस्यामुनेति (हि) धर्मिप्रतियोगितया वस्तुद्वयमुद्दिश्य भेदो ज्ञायते । न चागृहीतभेदं तथोद्देष्टुं शक्यते, एकस्मिन्नपि तत्प्रसङ्गात् । भेदसत्तामात्रेण तदुपपत्तिरिति चेत् (न) दूरस्थवनस्पत्योरभेदप्रत्ययाभावप्रसङ्गात् । दोषात्तत्र तथेति चेन्न, भेदस्य स्वरूपसत्तयैवोपयोगे दोषस्याकिञ्चित्करत्वादिति ।**

**परि०— निर्विकल्पके हीति** । भेदाद्यग्रहमात्रेण निर्विकल्पक इत्याद्युक्तिः । घटत्वपटत्वादिप्रकारके घटपटादिज्ञाने इत्यर्थः । **वस्तुमात्रमिति** । मात्रपदेन भेदादि व्यावर्त्यते । न तु तन्निष्ठघटत्वादिधर्मोऽपीति ज्ञेयम् ॥ **सविकल्पक(वि)ज्ञानमपीति** । धर्मिप्रतियोगिकोल्लेखिभेदविषयकज्ञानमपीत्यर्थः । वक्तुं न शक्यत इत्युक्तेराह **(तथा च) तथा व्यवहारोऽपीति** ॥ **उद्दि-**

**श्येति** । निरूप्येत्यर्थः । वस्तुद्वयसम्बन्धितयेति यावत् ॥ **दोषादिति** । दूरस्थत्वदोषादित्यर्थः ॥ **उपयोग इति** । ऐक्यप्रत्ययप्रतिबन्धादिकार्यकारित्व इत्यर्थः ।

**यादु०— उद्दिश्येति** । सम्बन्धीकृत्येत्यर्थः । न तु निर्दिश्येत्यर्थः । ज्ञाने तदभावात् ॥ **तत्प्रसङ्गा-दिति** । धर्मिप्रतियोगिभावेन विलक्षणवस्तुद्वयप्रतीतिप्रसङ्गादित्यर्थः ॥ **अकिञ्चित्करत्वादिति** । अत्र दोषस्य किं धर्मिप्रतियोगितया विलक्षणवस्तुद्वयप्रतीतिप्रतिबन्धकतयोपयोग उत अभेदभ्रमजनकतया । नाद्यः । भेदग्रहस्योक्तप्रतीत्यनुकूलत्वे हि तद्विघटकतया दोषः प्रतिबन्धको भवेत् । अन्यस्य तद्विघटनीयस्य तत्राभावात् । कार्यानुकूलकिञ्चिद्विघटकस्यैव प्रतिबन्धकत्वात् न च तदस्ति । भेदस्य स्वरूपसत एवोक्तप्रतीतिजनकत्वाङ्गीकारात् । अत एव न द्वितीयः । स्वरूपसता भेदेनोक्तप्रतीतेर्विरोधिन्या उत्पत्तावभेदभ्रमजननस्यासम्भवात् । न हि विरोधिदर्शनेऽनाहार्यारोपो दोषेण जायमानः क्वचिद् दृष्ट इति भावः ।

**वं०प०— उत्तरकालं** निर्विकल्पकोत्तरकालम् ॥ **यथेति** । प्रतीत्यनन्तरं प्रतियोगिस्मरणे जाते सादृश्यादिकं प्रतीयत इत्यर्थः ॥ **न प्रतीयेतेति** । आदाविति शेषः । तथा अस्यामुना भेद इतीत्यर्थः । **भेदं** वस्तु । **तथा** धर्मिप्रतियोगितया । कुतो न शक्यत इत्यत आह **एकस्मिन्निति** ॥ **तदिति** । घटाद्घट इति धर्मिप्रतियोगितयोद्देशप्रसङ्ग इत्यर्थः ॥ **तदिति** । धर्मिप्रतियोगितयोद्देश्यत्वेत्यर्थः । तथा च भेदज्ञानं नापेक्षितमिति नान्योन्याश्रय इति भावः ॥ **दूरस्थेति** । तत्रापि वास्तवभेदस्य सत्त्वात् इमावित्युद्देश्यत्वसम्भवाद्भिन्नावित्येव प्रतीतिः स्यादित्यर्थः । **दोषादिति** । तथा च तत्र वास्तवभेदे सत्यपि दूरस्थत्वसादृश्यादिदोषवशादुद्देष्टुमशक्यत्वेनाभेदप्रत्यय एव भवतीत्यर्थः ।

**कं०रा०—** नन्वस्यामुना भेद इति धर्मिप्रतियोगिभावभाने स्वरूपसद्भेद एव प्रयोजको न तु भेदग्रहः तथा च अगृहीतभेदस्य वस्तुद्वयस्य धर्मिप्रतियोगिभावभानं युक्तं भेदस्य स्वरूपेण सत्त्वादेकस्मिंस्तथा भानप्रसङ्गोऽपि न तत्र भेदस्य स्वरूपेण सत्त्वादित्याशयेन शङ्कते **भेदसत्तेति** । स्वरूपसद्भेदमात्रेणास्यामुना भेद इति धर्मिप्रतियोगिभावभानाभ्युपगमे दूरस्थवनस्पत्योरपि तथा भानं स्यान्न त्वैक्येन अतो न स्वरूपसद्भेदमात्रेण तथा भानं युक्तमित्यभिप्रेत्य परिहरति **नेति** । **भेदस्येति** । अस्यामुना भेद इति धर्मिप्रतियोगिभावभाने भेदग्रहस्य प्रयोजकत्वे दोषो भेदग्रहप्रतिबन्धद्वारा अस्यामुना भेद इति धर्मिप्रतियोगिभावभानं प्रतिबध्य दूरस्थवनस्पत्योरैक्यप्रत्ययं जनयतीति दोषस्याकिञ्चित्करता स्यात् । स्वरूपसद्भेदस्य तत्प्रयोजकत्वे तु तस्य दोषे सत्यप्यनपायाद्दूरस्थवनस्पत्योरस्यामुना भेद इति धर्मिप्रतियोगिभावभानमेव स्यान्न त्वैक्यप्रत्यय इति दोषस्याकिञ्चित्करत्वमिति भावः ।

**श्रीनिधि०—** ननु 'वस्तुप्रतीत्युत्तरकालमि'त्ययुक्तम् । निर्विकल्पकप्रत्यये वस्तुनो भेदस्य च युगपत्प्रतीतेरित्यत आह **निर्विकल्पकेऽपीति** । **वस्तुदर्शनोत्तरकालमिति** । धर्मिदर्शनोत्तरकालमित्यर्थः । वस्तु-

दर्शनं च प्रतियोगिस्मरणकारणं सम्बन्धिदर्शनन्यायादिति भावः । 'अस्यामुना भेद' इति वक्तुं न युज्यत, इत्ययुक्तम् । तथा ज्ञानस्यैव व्यवहारसामग्रीत्वात् । सत्यां सामग्र्यां कार्यावश्यम्भावादित्यत आह **तदाऽस्य अमुना भेद इत्युत्तरकालमिति** । निर्विकल्पकोत्तरकालमित्यर्थः । **तथा चेति** । व्यवहारलक्षणकार्यानुपपत्तिं वदतो भगवतो मध्वमुनेः तत्कारणसविकल्पकानुपपत्तिरपि अभिमतेति भावः । **भेदस्य स्वरूपसत्तयैव उपयोगे दोषस्याकिञ्चित्करत्वादिति** । दूरस्थत्वादिर्दोषः अस्यामुनेति धर्मिप्रतियोगितया उद्देशहेतुभूतं भेदग्रहणं प्रतिबध्नातीति न भेदप्रत्ययः तत्रेति वक्तव्यम् । भेदज्ञानं च त्वया नेष्यते । न च कारणीभूतभेदस्वरूपप्रतिबन्धकत्वं दोषस्य सम्भवतीति अकिञ्चित्करत्वं तस्येति भावः । अस्यामुनेत्युद्देश एव दोषेण प्रतिबध्यत इति चेत् न । भेदग्रहाभावस्यैव तत्प्रतिबन्धकत्वात् । अन्यथा भेदग्रहेऽपि दूरस्थत्वदोषेण तथोद्देशप्रतिबन्धः स्यात् । दूरस्थत्वाभावेऽपि भेदग्रहे तथोद्देशादर्शनात् । तस्माद्दोषस्य स्वतन्त्रान्वयव्यतिरेकाभावात् । भेदग्रहाभावस्यैव तत्सत्त्वात् । दोषस्य भेदाग्रहप्रयोजकत्वमेव वक्तव्यम् । न तूक्तोद्देशप्रतिबन्धकत्वम् । भेदाग्रहप्रयोजकत्वं च भेदग्रहप्रतिबन्धकतयेत्येव वक्तव्यमन्यथा दोषस्याकिञ्चित्करत्वं दुर्वारमिति ।

**शे०चं०— न चैवमिति** । ततश्च घटग्रहेऽगृह्यमाणत्वात् तद्ग्रहितत्वहेतोरसिद्धिरिति भावः । नन्वेवं सर्वत्र संशयादिप्रसङ्ग इति शङ्कते **किन्नामेति** । वस्तुप्रतीत्युत्तरकालं प्रतीतो भेदः प्रसक्तमपि संशयादिकं निरोत्स्यतीति भावेनोत्तरमाह **वस्त्विति** । वस्तुप्रतीतिभेदप्रतीत्योर्यौगपद्यमेवास्तु किं पौर्वापर्यकल्पनयेत्यतस्तदुपपादयति **निर्विकल्पके हीति** । तदा प्रतियोगिस्मरणाभावेन भेदज्ञानसामग्रीविरहात् । अत एवोत्तरत्र प्रतियोगिस्मरणे सतीति सामग्रीसद्भावोपपादनमिति भावः । ननु वस्तुप्रतीतौ भेदाप्रतीतावपि नास्यामुना भेद इति व्यवहारानुपपत्तिप्रसक्तिः । वस्तुप्रतीत्युत्तरकालमुत्पन्नस्यास्यामुना भेद इति सविकल्पकस्य तादृशव्यवहारहेतुतया तत एव तद्व्यवहारसम्भवादित्यतो भवेदेतदेवं यदि तादृशं भेदसविकल्पकमभ्युपगम्य व्यवहारानुपपत्त्यापादनमत्राभिप्रेतं स्यात् । न चैवं किन्नाम तादृशभेदसविकल्पकं न स्यात् । ततश्च तादृशो व्यवहारो न स्यादित्येवेति नातिप्रसङ्ग इति भावेनापेक्षितपूरणेनोभयानुपपत्तिसमर्पकतया वाक्यं योजयति **यदीत्यादिना** । ननु च वस्तुप्रतीतौ भेदाप्रतीतावप्यस्यामुना भेद इति भेदे सविकल्पकं ज्ञानं भविष्यति । प्राग्भेदज्ञानस्य तत्रोपयोगाप्रतिभासेनाप्रयोजकत्वादित्यतः तस्योपयोगं दर्शयति **अस्येति** ॥ **उद्दिश्येति** । सम्बन्धीकृत्येत्यर्थः । न तु निर्दिश्येत्यर्थः । ज्ञाने तदभावात् । **एकस्मिन्नपीति** । एकस्मिन्नपि घटे घटस्य घटेन भेद इत्युद्देशपूर्वकं भेदसविकल्पस्य तत्साध्यतादृशव्यवहारस्य च प्रसङ्गादित्यर्थः । ननु घटपटयोर्भेदसद्भावादस्यामुना भेद इत्युद्देशपूर्वकप्रतीत्यादिकमुपपद्यते । एकस्मिन्घटे च स्वस्य भेदाभावान्न तथोद्देशादिप्रसङ्ग इति शङ्कते **भेदेति** । तर्हि दूरस्थवनस्पत्योरपि परस्परभेदसद्भावात् तथोद्देशपूर्वकस्यामुना भेद इति भेदप्रत्ययस्य प्रसङ्गादभेदप्रत्ययो न स्यादित्याह **दूरस्थेति** ॥ **अकिञ्चित्करत्वादिति** । दोषस्य किं धर्मिप्रतियोगितया विलक्षणवस्तुद्वयप्रतीतिप्रबन्धकतयोपयोगः । उताभेदभ्रमजनकतया । नाद्यः । भेदग्रहस्योक्तप्रतीत्यनुकूलत्वे हि तद्विघटकतया दोषः प्रतिबन्धको भवेत् । अन्यस्य तद्विघटनीयस्य तत्राभावात् । कार्यानुकूलकिञ्चिद्विघटकस्यैव प्रतिबन्धकत्वात् । न च तदत्र

अस्ति । तत्र भेदस्य स्वरूपसत एवोक्तप्रतीतिजनकत्वाङ्गीकारात् । अत एव न द्वितीयः । स्वरूपसता भेदेनोक्तप्रतीतेर्विरोधिन्या उत्पत्तावभेदभ्रमजननस्यासम्भवात् । न हि विरोधदर्शने सति अनाहार्यारोपो दोषेण जायमानः कचिद्दृष्ट इति भावः ।

**वा०र०— नातिप्रसङ्ग इति भावेनेति** । सविकल्पकादेव व्यवहारसम्भवरूपातिप्रसङ्ग इत्यर्थः । नानुपपत्तिरिति तु स्वरसः पाठः । **अभेदप्रत्ययो न स्यादिति** । अभेदभ्रान्तिरूप इत्यर्थः । **उक्तप्रतीतेरिति** । अस्य अमुना भेद इति उद्देशपूर्वकप्रतीतेरित्यर्थः । आहार्यारोपसम्भवाभिप्रायेणानाहार्य इति विशेषणं मूले । तथा च उत्तरकालमित्यत्र तथा च इत्यस्याभेदज्ञानेत्यर्थः ।

**विट्ठ०— उद्दिश्येति** । सम्बन्धीकृत्येत्यर्थः । न तु निर्दिश्येत्यर्थः, ज्ञाने निर्देशाभावात् । **एकस्मिन्नपीति** । भेदाग्रहाभावेऽपि अस्यामुनेति धर्मिप्रतियोगिभावग्रहणे एकस्मिन्नपि तथाप्रतीतिप्रसङ्गात् भेदग्रहस्यानपेक्षत्वादिति भावः । **दूरस्थवनस्पत्योरिति** । तत्र भेदस्य सत्त्वेनास्यामुष्माद्भेद इति भेदग्रहस्यैव प्राप्तेरिति भावः । भेदस्य स्वरूपसत्तयैवोपयोग इति स्वरूपसत एव भेदस्य धर्मिप्रतियोगितया विलक्षणवस्तुद्वयप्रतीतिजनकत्वमुक्तम् । परेण सति चैवं दूरस्थत्वदोषोऽकिञ्चित्करः तस्योक्तवस्तुद्वयप्रतीतिप्रतिबन्धकत्वायोगात् स्वरूपसद्भेदेनैवोक्तप्रतीत्यङ्गीकारात् । नाप्यभेदभ्रमजनकतया दोषस्योपयोगः स्वरूपसद्भेदजातधर्मिप्रतियोगिप्रतीतेरभेदभ्रमविघटकत्वात् । अतः स्वरूपसत एव भेदस्य धर्म्यादिप्रतीतिजनकतयोपयोगे दोषो अकिञ्चित्कर एवेति भावः । **तथा चेति** । अभेदज्ञाने सत्यप्यस्मादयं भिन्न इति प्रतीतावित्यर्थः ।

**॥ इति भेदस्य वस्तुप्रतीतावप्रतीतत्वे अस्यामुना भेद इति वक्तुमशक्यता ॥**

* * *

**॥ अथ च तत्र भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनन्तरं स्वस्मात्स्वयं भिन्न इति सविकल्पकभेदाग्रहस्य प्रतीतिविरुद्धत्वापादनम् ॥**

**४१ सु०— "न केवलं वस्तुदर्शने भेदस्फुरणमनभ्युपगच्छतः 'अस्यामुना भेद' इति पश्चात्कालीनं सविकल्पकज्ञानं तथा व्यवहारश्च नोपपद्यते, किं तर्हि" इत्यत आह अगृहीत इति ।**

## अनु०— अगृहीतो यदा भेदस्तदा स्वस्मादिति ग्रहः ।
## स्यात्

यदि घटदर्शनेऽपि तद्भेदो न दृष्टस्तद(ाऽ)नन्तरं स्मर्यमाणो गृह्यमाणो वा प्रतियोगी पटोऽपि विना भेदेनोपलब्धव्यः । भेदादर्शने चावश्यमभेदज्ञानं स्यात् । तथा चोत्तरकालं स्वस्मात्स्वयं भिन्न इति सविकल्पको भेदग्रहः स्यादिति ।

अस्त्वेवमित्यत आह **प्रतीतीति** ।

## प्रतीतिविरोधाच्च

चशब्दस्योत्तरत्र सम्बन्धः ।

'पटाद्घटो भिन्न' इत्येव हि सविकल्पिका प्रतीतिरनुभूयते, न जातु 'स्वस्मात्स्वयं भिन्न' इति, अतः; **प्रतीतिविरोधात्** 'एवंविधः सविकल्पकग्रहो नाङ्गीकर्तुमुचित' इति शेषः ।

किञ्च यदि 'स्वस्मात् स्वयं भिन्न' इति सविकल्पको भेदग्रहः स्यात्, तदा कदाचित् तथाविधो वाग्व्यवहारोऽपि स्यात्, न चैवमित्याह **न हीति** ।

## न हि कश्चित्तथा वदेत् ।

एतेन 'किमेकप्रतीतिविरोधः, उत सर्वप्रतीतिविरोधः । नाद्यो व्यभिचारात् । न द्वितीयः असिद्धेः' इत्यपि परास्तम्, कदाऽपि कस्यचिदपि तथा व्यवहाराभावेन विपरीत-व्यवहारेण च सर्वप्रतीतिसिद्धेरिति । अतो वस्तुप्रतीतावेव भेदस्य स्फुरणात् तत्स्वरूप-त्वमेवेति ।

**परि०— चशब्दस्योत्तरत्र सम्बन्ध इति** । 'न ही'त्युत्तरवाक्य इत्यर्थः । तदाह **किञ्च यदीति** ॥ *भेदस्य वस्तुस्वरूपत्वे वस्तुग्रहे भेदाग्रहाभावरूपप्रमाणोक्तिः ॥*

**गु०दी०— तथा च उत्तरकाले स्वस्मात् स्वयं भिन्न** इत्यत्र घटपटयोर्भेदग्रहाभावेऽभेदग्रहस्याव-श्यकत्वेन पटाद्घटो भिन्न इतिवत् घटाद्घटो भिन्न इत्यपि प्रतीतिः स्यादित्यर्थः । उपलक्षणं चैतत् भेदग्रहाभावे एकस्य प्रतियोगितयाऽपरस्य धर्मितया च प्रतीतिर्न स्यादित्यपि द्रष्टव्यम् ।

**यादु०— किञ्चेति** । अनेनोत्तरत्र सम्बन्ध इत्युक्तं दर्शितमिति ज्ञातव्यम् ।

**वं०प०— वस्तुदर्शने** आदाविति शेषः । तथाऽस्यामुना भेद इतीत्यर्थः । घटदर्शने धर्मिभूतघटदर्शने । **तद्भेदः** पटाद्भेदः । **विना भेदेन** धर्मिणो घटस्य सकाशाद्भेदेन विना । **उपलब्धव्यः** न्यायसाम्यादित्यर्थः ॥ **भेदादर्शने चेति** । धर्मिप्रतियोगिनोरिति शेषः । **उत्तरत्र** 'न ही'ति वाक्ये । **एवंविधः** स्वस्मात् स्वयं भिन्न इत्येवंरूपः ॥ **एकस्येति** । एकस्य पुंसः पटाद्घटो भिन्न इति या प्रतीतिस्तद्विरोधः स्वत्स्मात् स्वयं भिन्न इति प्रतीतेरित्यर्थः ॥ **सर्वेति** । सर्वेषां पुंसाम् । एकस्य प्रतीतिविरोधेन वस्त्वभावो न सिद्ध्यति । वास्तवशुक्तिप्रतीतेरिदं रजतमित्येकप्रतीतिविरोधेन शुक्त्यभाव एव सिद्ध्येदिति व्यभिचारादित्याह **नाद्य इति** । **असिद्धेः** सर्वेषां पुंसां घटाद्घटो भिन्न इति प्रतीतेरसिद्धेरित्यर्थः । कस्यचित् स्वस्मात् स्वयं भिन्न इत्यपि प्रतीतिर्भवतीति भावः । एतेनेत्युक्तं विशदयति **कदाऽपीति** । पटाद्घटस्य भेद इति विपरीतव्यवहारेण चेत्यर्थः ।

**कं०रा०— यदीति** । यदि घटदर्शनेऽपि तस्य घटाद्भेदो न दृष्टस्तथा घटदर्शनानन्तरमसन्निकर्षे स्मर्यमाणः सन्निकर्षे तु गृह्यमाणः प्रतियोगिभूतपटोऽपि घटवद्भेदेन विनैवोपलब्धव्यव्यवस्थयोर्भेदादर्शने चावश्यं अभेदज्ञानं स्यात् सति च घटपटयोरभेदज्ञाने घटः पटाद्भिन्न इत्युत्तरकालं सविकल्पकग्रहायोगात् स्वस्मात् स्वयं भिन्न इत्येव सविकल्पकग्रहः स्यादित्यर्थः । **किमेकेति** । अङ्गीकर्तुमनुचितत्वे हेतूकृतः प्रतीतिविरोधः किमेक-प्रतीतिविरोधः उत सर्वप्रतीतिविरोध इत्यर्थः । **व्यभिचारादिति** । पीतः शङ्ख इत्येकपुरुषप्रतीतिविरुद्धस्यापि शङ्खापीतत्वस्याङ्गीकारदर्शनेनैकप्रतीतिविरोधेनाङ्गीकर्तुमनुचितत्वं साधयितुमनर्हमिति भावः । **सर्वप्रतीतिसिद्धे-रिति** । तथा च सर्वप्रतीतिविरोधस्यैव हेतूकरणान्न व्यभिचार इति भावः ।

**श्रीनिधि०— विना भेदेनोपलब्धव्य इति** । धर्म्यादिनेति शेषः । **उत्तरत्र सम्बन्ध इति** । 'न हि कश्चित्तथा वदेत्' इत्यनेन सम्बन्धः । व्यवहाराभावसमुच्चयार्थश्च स इति भावः । एतेनेत्यनेनाभिमतं दर्शयति **कदापीति** ।

**शे०चं०— तथेति** । अस्यामुना भेद इति धर्मिप्रतियोगितयेत्यर्थः ॥ **विना भेदेनेति** । अस्यामुना भेद इति धर्मिप्रतियोगितया वस्तुद्वयमुद्दिश्य भेदेन न ज्ञायेतेत्यर्थः । अगृहीतभेदस्य वस्तुद्वयस्योक्तरीत्या धर्मि-प्रतियोगितयोद्देष्टुमशक्यत्वादिति भावः । अस्त्वेवं घटदर्शनोत्तरकालमुपलभ्यमानस्य पटस्योक्तरीत्या भेदेनाग्रहः । किं तावताऽपीत्यतो भेदाभेदयोः परस्परविरुद्धतयाऽन्यतरनिषेधस्य अन्यतरविधिनान्तरीयकत्वाद्भेदेनाग्रहेऽभेदेन तद्ग्रहः स्यादित्याह **भेदादर्शन इति** । इष्टापत्तिमाशङ्क्य परिहरति **तथा चेति** । **उत्तरकालं** घटदर्शनोत्तर-कालम् ॥ **किञ्चेति** । अनेन चशब्दस्योत्तरत्र सम्बन्ध इति प्रागुक्तं विवृतं भवति । यद्यथाऽनुभूयते तत्कदाचित् तथा व्यवहारविषय इति व्याप्तेरिति भावः । अस्त्येव कदाचित् तथाविधो वाग्व्यवहार इतीष्टापत्तिमाशङ्क्य परिहरति **न चेति** । प्रतीतिविरोधादेव तादृशभेदग्रहाभावसिद्धेः किमतिप्रसङ्गान्तराभिधानेनेत्यतः प्रतीतिविरोधा-नुपपत्तिशङ्कापरिहारेण तद्विरोधोपपादनार्थत्वात् तस्य नानर्थक्यमित्याशयेन तदनुपपत्त्याशङ्कां तत्परिहारकतां च दर्शयति **एतेनेति** । कतिपयप्रतिपत्तृप्रतीतिविरोधो वा सर्वप्रतिपत्तृप्रतीतिविरोधो वेति विकल्पार्थः ॥ **व्यभि-**

चारादिति । कतिपयप्रतिपत्तृप्रतीतिविरुद्धस्यापि सविकल्पकग्रहस्य बहुलमङ्गीकार्यतादर्शनेन यदेकप्रतीतिविरुद्धं तन्नाङ्गीकार्यमिति व्याप्त्यसिद्धेर्नैकप्रतीतिविरुद्धत्वेनानङ्गीकार्यतासाधनं युक्तमिति भावः ॥ **असिद्धेरिति** । कस्य-चित् तथाप्रतीतिसद्भावेन सर्वप्रतीतिविरोधासिद्धेरित्यर्थः । एतेनेत्युक्तं विशदयति **कदाऽपीत्यादिना** ॥ **तथेति** । स्वस्मात् स्वयं भिन्न इति वाग्व्यवहाराभावेनेत्यर्थः ॥ **विपरीतेति** । घटात्पटो भिन्न इत्येव वाग्व्यवहारेणेत्यर्थः ।

**विठ्ठ०**— चशब्दस्योत्तरत्र सम्बन्ध इत्युक्तं दर्शयति **किञ्चेति** । चशब्दस्य किञ्चेत्यर्थ इत्यर्थः ।

* * *

**॥ अथ तत्रादौ भेदप्रतियोगिनोः स्वरूपज्ञाने प्रतियोगिभेदज्ञानापेक्षतया अन्योन्याश्रयाभावः ॥**

४२ **सु०— नन्वेवं भेदस्य वस्तुस्वरूपत्वेन तत्प्रतीतिभेदाभावादितरेतरसापेक्षत्वस्य सुतरामभावान्नान्योन्याश्रयत्वमित्युक्तम् । तत्र किं भेदो धर्मिणः स्वरूपम्, उत प्रतियोगि-नोऽपि । न तावद् द्वितीयः, एकस्यैव भेदस्योभयस्वरूपत्वेऽद्वैतप्रसङ्गात् । आद्ये तु यद्यपि धर्मिज्ञानभेदज्ञानयोः नान्योन्याश्रयत्वं तथाऽपि प्रतियोगिज्ञानापेक्षया अन्योन्याश्रयत्वं कथं परिहरणीयम् ॥ मैवम् । भेदस्य स्वरूपतो ज्ञाने प्रतियोगिविशेषज्ञानानपेक्षणात्, प्रतियोगि-स्वरूपज्ञाने चैतद्भेदज्ञानानपेक्षणात् ।**

**परि०— धर्मिण इति** । पटस्येत्यर्थः ॥ **प्रतियोगिनोऽपीति** । घटस्येत्यर्थः ॥ **अद्वैतेति** । घटपटयोरभेदप्रसङ्गादित्यर्थः । घटाभिन्नभेदस्वरूपत्वात् पटस्य यत् यदभिन्नवस्त्वभिन्नं तत् तदभिन्नं यथा घटाभिन्नपृथुबुध्नोदराकाराभिन्नघटस्वरूपं घटाभिन्नमिति व्याप्तेरिति भावः ॥ **प्रतियोगिज्ञाना-पेक्षयेति** । प्रतियोगिज्ञाने सति धर्म्यभिन्नभेदज्ञानम् । तज्ज्ञाने घटादेः प्रतियोगित्वेन ज्ञानमित्य-न्योन्याश्रयत्वमित्यर्थः ॥ **प्रतियोगिविशेषेति** । प्रतियोगिसामान्यज्ञानापेक्षा त्वस्त्येव । तच्च ज्ञानं 'सर्वं सामान्यतो यस्मात् सर्वैरेवानुभूयत' इत्युक्तेरस्त्येव सर्वप्राणिनामिति भावः ॥ **एतद्भेदेति** । धर्मिस्वरूप-भेदभेदेत्यर्थः । यद्वा धर्मिप्रतियोगिकत्वेन धर्मिनिरूपितभेदज्ञानेत्यर्थः ॥

**यादु०— स्वरूपतो ज्ञान इति** । धर्मिस्वरूपस्येतरव्यावृत्ततया सामान्यतो ज्ञान इत्यर्थः ।

**वं०प०**— धर्मिप्रतीत्यपेक्षयाऽन्योन्याश्रये दत्ते तत्स्वरूपत्वमङ्गीकृत्य तत्परिहारो यथा क्रियते एवं प्रतियोगिप्रतीत्यपेक्षयाऽपि नान्योन्याश्रयः । भेदस्य प्रतियोगिस्वरूपत्वस्याप्यङ्गीकारादिति कश्चिद्वैयात्याद्वदि-ष्यति । तदर्थं प्रतियोगिस्वरूपत्वं धर्मिस्वरूपत्वं नाङ्गीकार्यम् । ततश्च प्रतियोगिप्रतीत्यपेक्षयाऽन्योन्याश्रयः

स्यादेवेत्याशयेन विकल्पयति **उत प्रतियोगिनोऽपीति** । यत् यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तिबलात् प्रतियोगिनो धर्म्यभिन्नभेदाभिन्नत्वे धर्मिप्रतियोगिनोरप्यैक्यं स्यादित्याह **अद्वैतेति** ॥ **नान्योन्याश्रयत्वमिति** । भेदस्य धर्मिस्वरूपत्वेन प्रतीतिद्वयाभावादिति भावः । **भेदस्य स्वरूपतो ज्ञाने** भेदस्य घटस्वरूपत्वेन घटत्वादिना रूपेण ज्ञाने ॥ **प्रतियोगिस्वरूपेति** । वस्तुगत्या प्रतियोगिभूतस्य घटस्य पटत्वेन रूपेणेत्यर्थः ॥ **एतद्भेदेति** । पटप्रतियोगिकघटधर्मिकभेदरूपप्रत्येतव्यभेदेत्यर्थः । प्रतियोगिस्वरूपज्ञानं च तत्स्वरूपभेदेनैवोपपन्नमिति भावः ।

**कं०रा०— एकस्येति** । घटधर्मिकस्य पटादिप्रतियोगिकस्यैकस्य भेदस्य धर्मिप्रतियोग्युभयस्वरूपत्वे तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन घटाभिन्नभेदाभिन्नानां प्रतियोगिभूतघटादीनां पटाभिन्नत्वापत्तेरद्वैतप्रसङ्गादित्यर्थः । **आद्य इति** । घटात्पटो भिन्न इत्यत्र धर्मिणः पटाद्भिन्नत्वेन ज्ञातस्यैव घटस्य प्रतियोगितया भानमिति पक्षे प्रतियोगिघटस्वरूपभूतभेदप्रतीतौ धर्मिणः पटस्य प्रतियोगितया भाने तस्य घटाद्भिन्नत्वज्ञानमावश्यकमित्यर्थः ।

**श्रीनिधि०— अन्योन्याश्रयत्वं कथं परिहरणीयमिति** । तत्प्रकारश्च धर्मिप्रतियोगिज्ञाने सति भेदज्ञानम् । तन्निरूप्यत्वादित्यादिनापि विवृतो द्रष्टव्यः । **भेदस्य स्वरूपतो ज्ञान इति** । 'अस्मादयं भिन्न' इत्यादि प्रतियोग्यादिघटितत्वमन्तरेण भेदत्वेन तज्ज्ञान इत्यर्थः । **एतद्भेदज्ञानानपेक्षणादिति** । एतस्य प्रतियोगिनो भेद एतद्भेदः एतद्धर्मिकभेद इति यावत् । आदौ पदार्थेषु ज्ञायमानेषु यावन्तः प्रतियोगिविशेषाः बुद्धिसन्निहितास्तेभ्यो विशेषत एव भेदो ज्ञायते इतरेभ्यः कस्यापि प्रतियोगिनो बुद्धिसन्निधानाभावेन समस्तव्यावृत्तोऽयमिति सामान्यत एव भेदो ज्ञायत इति भावः ।

**शे०चं०— अद्वैतप्रसङ्गादिति** । यद्यदत्यन्ताभिन्नेन अत्यन्ताभिन्नं तत्तेन अत्यन्ताभिन्नमिति व्याप्त्या घटात्यन्ताभिन्नेन भेदेन अत्यन्ताभिन्नस्य पटस्य घटात्यन्ताभेदप्रसङ्गादित्यर्थः ॥ **नान्योन्याश्रयत्वमिति** । घटप्रतीतेरेव भेदप्रतीतित्वेन प्रतीतिद्वयाभावात् परस्परसापेक्षत्वस्य सुतरामभावादिति भावः ॥ **कथमिति** । भेदस्य प्रतियोगिस्वरूपत्वाभावेन प्रतियोगिप्रतीतेरेव भेदप्रतीतित्वाभावात् प्रतियोगिज्ञानभेदज्ञानयोरुक्तरीत्या परस्परसापेक्षत्वादिति भावः । किं भेदस्य प्रतियोगिनश्च स्वरूपेण ज्ञाने परस्परापेक्षत्वमभिमतं किंवा विशेषरूपेण तज्ज्ञाने तदपेक्षत्वमिति विकल्पद्वयं मनसि निधाय आद्यं निराचष्टे **भेदस्येति** । घटत्वेन भेदज्ञान इत्यर्थः ॥ **प्रतियोगीति** । पटत्वेन पटज्ञान इत्यर्थः ।

**वा०र०— यद्यदत्यन्ताभिन्नेनेति** । यावद्द्रव्यभाविरूपादिना अत्यन्ताभिन्नद्रव्येणात्यन्ताभिन्नस्य तस्यैव द्रव्यस्य तेन रूपादिना अत्यन्ताभिन्नत्वात् व्याप्तिसिद्धिरिति ज्ञेयम् । अधिकविचारस्तु अंशिनोंऽशैरभेदः इत्येतत् अनुव्याख्यानमूलटीकाव्याख्यान एव कृत इति ज्ञेयम् ।

**स०व्र०—** प्रतियोगिज्ञानापेक्षया अन्योन्याश्रयं वदन् प्रष्टव्यः । किं भेदस्य स्वरूपेण प्रतीतौ प्रतियोगिज्ञानापेक्षत्वमित्यभिप्रायः, किं वा विशेषप्रतीतौ, नाद्य इत्याह **भेदस्य स्वरूपतो ज्ञान इति** । ननु स्वरूपतो भेदज्ञानमपि न घट इत्येव । किन्तु न सर्वात्मकमिदं, किन्तु स्वयमेवेत्येवमाकारम् । तत्र च सर्वस्य प्रतियोगित्वात् तज्ज्ञानापेक्षया अन्योन्याश्रयानिस्तार एव । न सर्वात्मकमिदं किं तु स्वयमेवेति धर्मिस्वरूपेण प्रतीयमानस्य भेदस्य सामान्यतः सर्वप्रतियोगिकत्वं 'स्मयमाणगृह्यमाणकतिपयविशेषप्रतियोगिकत्वं ह्यनुभूयत' इत्यादितत्त्वनिर्णयानुसारात् । अन्यथा तद्विरोध इति चेन्न । सामान्यतः सर्वप्रतियोगिकत्वस्यानुभूयमानत्वेन सर्वलक्षणप्रतियोगिज्ञानसापेक्षत्वाभ्युपगमेन तदविरोधात् । सर्वज्ञानस्य साक्षिरूपस्य सर्वदा सत्त्वेन तदपेक्षाया अनपेक्षत्वमित्यभिप्रायेण तदपेक्षणादित्युक्तिसामञ्जस्यात् । न च सामान्यतः सर्वप्रतियोगिकत्ववत् स्मर्यमाणकतिपयविशेषप्रतियोगिकत्वस्याप्यनुभूयमानत्वात् तदपेक्षया स्वरूपप्रतीतावप्यन्योन्याश्रयात् तत्रान्योन्याश्रयत्वमपि कुतो नोच्यत इति वाच्यम् । घटः पटात् भिन्न इत्यादावन्योन्याश्रयपरिहारन्यायेन तदन्योन्याश्रयपरिहारस्यापि ज्ञातुं शक्यत्वेनैव तदनुक्तिः । न तु तस्यासम्भवाभिप्रायेणेति भावः ।

**विठ्ठ०— तत्प्रतीतिभेदाभावादिति** । वस्तुस्वरूपप्रतीतिभेदप्रतीत्योर्भेदाभावादित्यर्थः । **अद्वैतप्रसङ्गादिति** । यद्येनाभिन्नं तदभिन्नस्य तदभिन्नतेति न्यायेन धर्मिप्रतियोगिनोरैक्यप्रसङ्गादित्यर्थः । **प्रतियोगिज्ञानापेक्षयेति** । प्रतियोगिभूतपटादिज्ञाने तत्प्रतियोगिकघटधर्मिकभेदज्ञानं सत्येव भेदज्ञाने धर्मिव्यावृत्ततया प्रतियोगिज्ञानमित्यन्योन्याश्रयत्वमित्यर्थः । अत्र किं प्रतियोगिभेदसामान्यतः स्वरूपावगमेऽन्योन्याश्रयोऽभिधीयते । किं वा विशेषज्ञान इति विकल्पं मनसि निधायाद्य आह **भेदस्य स्वरूपतो ज्ञान इति** । धर्मिस्वरूपस्य सामान्यत इतरव्यावृत्ततया प्रतीतौ प्रतियोगिविशेषाघटिततया भेदस्य स्वरूपत एव ज्ञाने प्रतियोगिसामान्यज्ञानस्य 'सर्वं सामान्यतो यस्मात् सर्वैरेवानुभूयत' इत्युक्तरीत्या सर्वदा विद्यमानत्वेन पटकुड्यादिप्रकारकप्रतियोगिविशेषज्ञानापेक्षत्वात् सामान्यतः प्रतियोगिस्वरूपमात्रज्ञाने च भेदज्ञानानपेक्षणान्नान्योन्याश्रयत्वमिति भावः ।

**।। इति भेदप्रतियोगिनोः स्वरूपज्ञाने प्रतियोगिभेदज्ञानापेक्षतया अन्योन्याश्रयाभावः ।।**

* * *

**।। अथ च तत्रान्ते भेदप्रतियोगिनोः विशेषरूपज्ञानेऽपि असति प्रतिबन्धके अन्योन्यप्रतियोगिकतया विशिष्टभेदप्रतीतौ बाधकाभावः ।।**

४३ **सु०— अस्तु तर्हि विशेषज्ञानेऽन्योन्याश्रयत्वम् । तद्धि घटात्पटो भिन्न इत्युत्पद्यते । तत्र धर्मिणो भेदेन प्रतिपन्नस्य वा प्रतियोगिता, अन्यथा वा । न तावद् द्वितीयः, स्वतोऽपि भेदप्रतीत्यापत्तेः । आद्ये प्रतियोगिस्वरूपभेदप्रतीतौ धर्मिणः प्रतियोगितायां स एव न्यायः । तथा च पटाद्घटस्य भेदप्रतीतौ घटात्पटस्य भेदप्रतीतिरित्यन्योन्याश्रयत्वमिति । मैवम् ।**

वस्तुतोऽन्योन्यप्रतियोगिकयोर्घटपटस्वरूपभेदयोः प्रतीतयोः सतोरसति सादृश्यादौ प्रतिबन्धकेऽन्योन्यप्रतियोगिकतया विशिष्टभेदप्रतीतौ बाधकाभावादिति ।

**परि०— स एव न्याय इति** । धर्मिणः सकाशाद्भेदेन प्रतिपन्नस्य प्रतियोगिता अन्यथा वा । न द्वितीयः । स्वतोऽपीत्युक्तदोषादिति न्याय इत्यर्थः ॥ **तथा चेति** । भेदेन प्रतिपन्नप्रतियोगित्वे सतीत्यर्थः ॥ ***स्वमते भेदबुद्धावन्योन्याश्रयत्वपरिहारः ॥***

**वं०प०—** कथमित्यत आह **तद्धीति** । विशेषज्ञानमित्यर्थः ॥ **धर्मिणः** पटस्य सकाशात् ॥ **भेदेन प्रतिपन्नस्य घटस्य स्वतोऽपीति** । भेदेनाप्रतिपन्नस्यापि प्रतियोगित्व इति शेषः । **प्रतियोगिस्वरूपेति** । पटप्रतियोगिघटधर्मिकेत्यर्थः । **धर्मिणो** घटप्रतियोगिपटधर्मिभेदरूपप्रत्येतव्यभेदे यो धर्मी पटः तस्य प्रतियोगितायां, प्रतियोगिस्वरूपभेदप्रतीतौ प्रतियोगितायां स एव न्यायः, धर्मिणो भेदेन प्रतिपन्नस्य प्रतियोगित्वमन्यथा वेत्युक्त एव न्याय इत्यर्थः । ततश्च पटात् घटस्य भेदप्रतीतौ घटस्य प्रतियोगिकपटधर्मिकभेदरूपप्रत्येतव्यभेदसिद्धिः । एतद्भेदसिद्धौ पटस्य प्रतियोगित्वापत्त्या तत्प्रतियोगिकघटधर्मिकभेदसिद्धिरित्यन्योन्याश्रय इत्याह **तथा चेति** ॥ **वस्तुत इत्यादि** । अयं भावः । न हि प्रत्येतव्यभेदाधिकरणपटप्रतियोगिकभेदवत्त्वेन ज्ञातस्य प्रतियोगित्वमपेक्षितं येनोक्तरीत्या अन्योन्याश्रयः स्यात् किन्तु गोर्गवयसादृश्यज्ञानाभावेऽपि वस्तुतो गवयसादृश्यवतो गोत्वादिना प्रतीतिमात्रेण गवयविसदृशत्वेनाप्रतीतिमात्रेण वा गवयगतसादृश्यप्रतियोगित्वबुद्धिवत् वस्तुतः प्रत्येतव्यभेदाधिकरणप्रतियोगिकभेदवतो घटादेर्घटत्वादिना प्रतीतिमात्रेण प्रतियोगित्वोपपत्तेस्तन्मात्रमेवापेक्षितमित्यर्थः । ननु घटत्वादिना प्रतीतिमात्रेण प्रतियोगित्वज्ञाने पटाद्यभिन्नतया ज्ञातस्यापि घटादेः पटधर्मिकभेदप्रतियोगित्वं ज्ञायेतेति चेन्न । तदा घटत्वादिना ज्ञानाभावात् । पटाद्यैक्येनाप्रतीतस्य घटत्वादिना ज्ञानमात्रेण प्रतियोगित्वमुपपद्यत इति वोच्यमानत्वाददोषः । ननु वास्तवान्योन्यप्रतियोगिकभेदस्य दूरस्थवनस्पत्योः सत्त्वेन तत्राप्ययमस्माद्भिन्नोऽयं चास्माद्भिन्न इत्यन्योन्यप्रतियोगिकतया विशिष्टभेदज्ञानं स्यात् ततश्च अभेदप्रत्ययो न स्यादित्यत उक्तम् **असतीत्यादि** । तत्र च सादृश्यादिप्रतिबन्धकमस्तीत्यर्थः ॥ **विशिष्टेति** । घटात्पटस्य भेद इति घटादिविशिष्टभेदे(दस्ये)त्यर्थः ।

**कं०रा०—** ततः किमित्यत आह **तथा चेति** । उभयोरपि प्रतियोगितया भाने भेदज्ञानस्यावश्यकत्वे सति पटाद्घटस्य भेदप्रतीतौ गृहीतभेदत्वेन पटस्य प्रतियोगितया भानसम्भवात् घटात्पटस्य भेदप्रतीतिः तस्यां च सत्यां पटस्य धर्मिणः सकाशाज्जातभेदत्वेन प्रतियोगितया भानसम्भवात् पटाद्घटस्य भेदप्रतीतिरित्यन्योन्याश्रयत्वमित्यर्थः । इदं रजतमिति भ्रमदशायां शुक्तिरजतस्वरूपभूतयोर्वस्तुतोऽन्योन्याप्रतियोगिकयोर्भेदयोः प्रतीतयोरप्यन्योन्यप्रतियोगिकतया भेदग्रहाभावात् असति सादृश्यादौ प्रतिबन्धक इत्युक्तम् । विशेषदर्शनकाले सतोऽपि सादृश्यस्य प्रतिबन्धकत्वाभावादिदं रजतं नेत्यादिरूपेण अन्योन्यप्रतियोगिकतया भेदग्रहः सम्भवतीति भावः ।

**श्रीनिधि०— विशेषज्ञान इति** । अस्मादयं भिन्न इत्यादिरूपेण ज्ञान इत्यर्थः । **तत्र धर्मिण इति** । अत्र धर्मिण इति पञ्चम्यन्तम् । **वस्तुतोऽन्योन्यप्रतियोगिकयोरिति** । सामान्यतो भेदे ज्ञाते अस्मादयं भिन्न इति विशेषतस्तदज्ञानम् । एवञ्च धर्मिप्रतियोग्यादिविशेषज्ञानस्य भेदज्ञानापेक्षायामपि भेदज्ञानमात्रस्य धर्म्यादिविशेषज्ञानानपेक्षणात् नान्योन्याश्रयत्वमिति भावः । सर्वेऽपि पदार्था ज्ञायमानाः सामान्यतः असङ्कीर्णतयैव ज्ञायन्त इत्युक्तमनुभवसिद्धं च । **असति सादृश्यादौ प्रतिबन्धक इति** । शुक्तिकादौ स्वेतरसमस्तव्यावृत्तमिति सामान्यतो भेदे ज्ञातेऽपि रजतादिप्रतियोगिविशेषे भेदज्ञानं सादृश्येन प्रतिबन्धान्नोत्पद्यते इत्यर्थः । आदिपदेन समानद्रव्याभिघातादि गृह्यते ।

**शे०चं०—** द्वितीयमाशङ्कते **अस्तु तर्हीति** ॥ **अन्यथा वेति** । धर्मिणोऽप्रतिपन्नभेदस्यापि स्वरूपेण प्रतीततामात्रेण वेत्यर्थः । **स्वत इति** । स्वस्येति शेषः । तथा च पटात्पटो भिन्न इति प्रतीत्यापत्तेरित्यर्थः । धर्मिणः पटाद्भिन्नत्वेनाप्रतीतत्वे सति स्वरूपेण प्रतीतत्वस्य पटभेदप्रतियोगिताप्रयोजकस्य पटेऽपि सत्त्वादिति भावः । **धर्मिणः प्रतियोगितायामिति** । घटस्य पटभेदप्रतियोगित्वं हि पटप्रतियोगिकभेदधर्मित्वमेव । ततश्च धर्मिणः पटस्य घटरूपप्रतियोगिस्वरूपभेदप्रतियोगित्वमावश्यकमिति भावः । **स एव न्याय इति** । प्रतियोगिरूपधर्मिणो भेदेन प्रतिपन्नस्य धर्मिभूतस्य प्रतियोगिनः पटस्य प्रतियोगिता, ततोऽप्रतिपन्नभेदस्यापि स्वरूपेण प्रतीततामात्रेण वा । नान्त्यः । तथा सति घटस्यापि घटाद्भेदप्रतीत्यापत्तेः । प्रतियोगिरूपधर्मिणो भेदेनाप्रतिपन्नत्वे सति स्वरूपेण प्रतिपन्नत्वस्य पट इव घटेऽपि सत्त्वादिति भावः । अस्तु तर्हि धर्मिणः पटाद्घटाद्वा घटस्य पटस्य वा प्रतिपन्नभेदस्यैव प्रतियोगितेत्याद्यः पक्ष इत्यत आह **तथा चेति** । उपलक्षणं चैतत् । घटात्पटस्य भेदप्रतीतौ पटाद्घटस्य भेदप्रतीतिरित्यपि द्रष्टव्यम् । न धर्मिणो भेदेन प्रतिपन्नस्य प्रतियोगित्वं ब्रूमः । येनान्योन्याश्रयः स्यात् । नापि स्वरूपेण प्रतीतिमात्रं विवक्षितम् अपि तु विद्यमानभेदत्वमपि । तथा च स्वस्य स्वस्मात्तदभावान्न भेदग्रहादर्शनात् भेदग्रहप्रसङ्ग इत्याशयेन समाधत्ते **मैवमिति** । नन्वेतदप्यप्रयोजकम् । क्षीरनीरयोर्विद्यमानभेदयोरपि स्वरूपग्रहणे भेदग्रहादर्शनात् । तादृशयोर्दूरस्थवनस्पत्योर्भेदग्रहादर्शनाच्चेत्यतः । समानाभिहारादिलक्षणदोषरूपप्रतिबन्धकवशात् तदग्रहणेऽप्यसति प्रतिबन्धके न तदग्रह इति भावेनोक्तम् **असति सादृश्यादौ प्रतिबन्धक इति** ॥ **विशिष्टभेदप्रतीताविति** । घटात्पटो भिन्न इति प्रतीतावित्यर्थः ।

**वा०र०— घटस्य पटभेदेति** । अत्र 'घटस्य पटभेदेन प्रतिपन्नत्वं ही'ति मूलकोशानुसारि पाठः । अन्यादृशस्तु लेखकप्रमादात् । केचित्तु पटभेदप्रतियोगित्वमित्यत्र भेदशब्दं द्वितीयान्तं पठन्ति । एतत्स्थलं शोध्यमस्ति । भेदेन प्रतिपन्नत्वे सतीति पाठः । उभयत्रापि आद्यपक्षं सङ्गृह्णाति । **अस्तु तर्हीति** । धर्मिणः इत्येतत् पञ्चम्यन्तपटोपात्तघटपटोभयविशेषणम् । धर्मिणः पटात्प्रतिपन्नभेदस्य घटस्य धर्मिणो घटात्प्रतिपन्नभेदस्य पटस्येति सम्बन्धः । क्रमेणोभयोपपादनं चेदमिति ज्ञेयम् । द्वितीयविकल्पीयाद्यकल्पदूषणसङ्ग्रहायाह **उपलक्षणं चैतदिति** । न धर्मिण इति पञ्चमीति स्पष्टमेव । क्षीरनीरयोरित्युदाहरणान्तरग्रहणेन प्रागुक्तं मूलकारीयं दूरस्थवनस्पत्योरित्युदाहरणमुपलक्षणमिति सूचयति ।

**विठ्ठ०—** द्वितीयमाशङ्कते **अस्तु तर्हीति** । **स्वतोऽपीति** । भेदेनाप्रतीतस्यापि प्रतियोगिताप्रतीतौ स्वस्यैव स्वगतभेदं प्रति प्रतियोगितया प्रतीतिसम्भवेन स्वतोऽपि भेदप्रतीत्यापत्तेरित्यर्थः । **प्रतियोगिस्वरूप-भेदप्रतीताविति** । पटाद्घटस्य भेद इत्यत्र प्रतियोगिभूतपटस्वरूपभेदप्रतीत्यर्थं धर्मिणो घटस्य प्रतियोगितायां ज्ञातव्यायामित्यर्थः । **स एव न्याय इति** । उक्तविकल्पदूषणन्याय इत्यर्थः । **वस्तुतोऽन्योन्येति** । घटपट-स्वरूपभेदौ यद्यपि वस्तुतः पटघटप्रतियोगिको तथापि पटादिप्रकारकप्रतियोगिविशेषज्ञानं विना प्रागुक्तरीत्या सामान्यतो ज्ञातयोः सतोः पश्चात् प्रतियोगिविशेषस्फूर्त्या अन्योन्यप्रतियोगिकतया विशिष्टभेदप्रतीत्युपपत्तौ विशेषज्ञाननिबन्धनान्योन्याश्रयत्वाप्रसक्त्या बाधकाभावात् । न चैवं तर्हि संशयोच्छेदापत्तिः सर्वत्राप्येवमेव भेदविशेषप्रतीत्युपपत्तेरिति वाच्यम् । सादृश्यादिप्रतिबन्धकसद्भावस्थले तदुपपत्तेरिति भावः ।

**॥ इति भेदप्रतियोगिनोः विशेषरूपज्ञानेऽपि असति प्रतिबन्धके**
**अन्योन्यप्रतियोगिकतया विशिष्टभेदप्रतीतौ बाधकाभावः ॥**
**॥ इति भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनन्तरं स्वस्मात्स्वयं भिन्न इति**
**सविकल्पकभेदाग्रहस्य प्रतीतिविरुद्धत्वापादनम् ॥**
**॥ इति भेदस्य वस्तुप्रतीतावप्रतीतत्वे अनुपपत्तिप्रदर्शनम् ॥**
**॥ इति वस्तुग्रहे भेदाग्रहाभावात् भेदस्य वस्तुस्वरूपत्वम् ॥**
**॥ इति तस्योत्प्रेक्षिततर्कस्य स्वमतेन निराकरणम् ॥**

* * *

**॥ अथ तत्र भेदप्रतीतावन्योन्याश्रयस्य परमतेन (भिन्नभेदवादिमतेन) अपि परिहारः ॥**
**॥ अथ तत्रादौ उक्तस्य अन्योन्याश्रयत्वप्रसङ्गस्य निराकरणम् ॥**

४४ **सु०—** एवं स्वमतेन भेदप्रतीतावन्योन्याश्रयत्वं परिहृत्य भिन्नभेदवादिनां परिहार-माह **धर्मित्वेति** ।

**अनु०—** धर्मित्वप्रतियोगित्वतद्भेदा युगपद्यदि ।
विशेषणं विशेष्यं च तद्भावश्चैव गृह्यते ॥

उपलक्षणं चैतत् । धर्मिप्रतियोगिनौ चे(त्यपि)ति द्रष्टव्यम् ॥ **तद्भावो** विशेषणत्वं विशेष्यत्वं च । अत्र विशेषणविशेष्ययोरन्यतरत्वाद्भेदस्य पृथग्ग्रहणाभावः ॥

अयमर्थः । किं निर्विकल्पकप्रतीतावन्योन्याश्रयत्वमुच्यते उत सविकल्पकप्रतीतौ ।

नाद्यः । तत्र धर्मिप्रतियोगिस्वरूपयोस्तद्भावयोस्तद्भेदस्य भेदयोर्वा युगप(दुभय)दवभासनात् । तथा विशेषण(विशेष्य)भूत(भाव)योर्घटपटयोर्भेदस्य च तद्भावयोश्च युगपत्प्रतीतेः । युगपदेव सर्वस्येन्द्रियसन्निकृष्टत्वात्, दर्शनयोग्यत्वाच्च ।

ननु धर्मिप्रतियोगिनोर्विशेषणविशेष्ययोः (च) तद्भावोऽपरो भिन्नभेदवादिभिर्नेष्यते, तत्कथमेतत् । मैवम् । भूषणकारादिभिस्तस्याङ्गीकृतत्वात् । तेषामेव चायं परिहार इति ।

ननु 'यत्र प्रतियोगी पश्चात्प्रतीयते तत्र युगपदवभासो नास्ती'ति तद्दृष्टान्तेन सर्वत्राप्येवमनुमीयत इति चेन्न, असन्निहितवत् सन्निहितस्याप्यज्ञानसाधने प्रतीतिविरोधात् । यत्र (च) प्रतियोगी न सन्निहितस्तत्रापि धर्मिधर्मित्वभेदानां तावद्युगपत्प्रतीतिर्नानुपपन्ना । तदिदमुक्तं **को विरोध इति** ।

## को विरोधः

द्वितीयं निराकरोति **स्वरूपेणेति** ।

> स्वरूपेण गृहीतो भेद एव तु ।
> अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते ॥

**अस्यामुष्मादिति** उपलक्षणम् । 'अनयोर्भेदो', 'भिन्नाविमावि'त्यपि ग्राह्यम् । निर्विकल्पकप्रतीतार्थानामन्योन्यवैशिष्ट्यमात्रं सविकल्पकज्ञानेऽवभासते नाधिकमिति न तत्रापीतरेतराश्रयत्वमिति । तथा(चा)हुर्भिन्नभेदवादिनः, 'एकस्यामेव निर्विकल्पिकायां संविदि भेदस्य भेदिनोश्च युगपदवभासने सति तत्रैकं भेदिनमव(धिंकृत्वै)धीकृत्यैतस्मादयं भिन्न इति सविकल्पकबोधोदया(त्कथम)न्न व्यतिरिक्तभेदपक्षेऽन्योन्याश्रयत्वमि'ति ।

परि०— **अत्रेति** । 'विशेषणं विशेष्यं च तद्भावश्चे'त्यत्र भेद इति भेदस्य पृथगनुक्तिरित्यर्थः । अस्फुटत्वादाह **अयमर्थ इति** ॥ **निर्विकल्पकेति** । धर्मित्वप्रतियोगित्वादिवैशिष्ट्यानवगाहिप्रतीतावित्यर्थः ॥ न तु सर्वथा निष्प्रकारकेति घटपटत्वादिप्रकारकत्वात् तस्येति ज्ञेयम् ॥ **सविकल्पकेति** । धर्मित्वाद्युल्लेखिज्ञान इत्यर्थः ॥ **तत्रेति** । धर्मित्वाद्यप्रकारकतया निर्विकल्पक-

त्वेनाभिमतप्रतीतावित्यर्थः ॥ **धर्मिप्रतियोगिस्वरूपयोरिति** । घटत्वेन पटत्वेन घटपटस्वरूपयोस्तद्भावयोर्धर्मिप्रतियोगित्वयोरित्यर्थः । घटपटयोर्भेद इति प्रतीतिमुपेत्य वा घटात्पटो भिन्न इति प्रतीतिमुपेत्य वा **तद्भेदस्येति** । घटात्पटो भिन्नः पटाद्घटो भिन्न इति प्रतीतिमुपेत्याह **भेदयोर्वा इति** ॥ **विशेषणविशेष्यभूतयोरिति** । घटपटयोर्भेद इत्यत्र विशेषणभूतयोर्घटपटौ भिन्नावित्यत्र विशेष्यभूतयोरित्यर्थः ॥ **भेदस्य चेति** । विशेष्यभूतस्य विशेषणभूतस्य चेति योज्यम् ॥ **तद्भावयोरिति** । विशेषणत्वविशेष्यत्वयोरित्यर्थः । सन्निहितघटपटाद्याशयेनाह **युगपदेव सर्वस्येति** । सन्निकर्षश्च परमते यथायोगं ध्येयः । असन्निधानस्थलाभिप्रायेण शङ्कते **ननु यत्रेति** ।

**गु०दी०— तद्भावोऽपरो भिन्नभेदवादिभिर्नेष्यत** इत्यत्र धर्मित्वप्रतियोगित्वविशेषणत्वादीनां पदार्थस्वरूपत्वाङ्गीकारादित्यर्थः ।

**वं०प०—** ननु यथा धर्मित्वप्रतियोगित्वतद्भेदा इत्युक्तं तथा विशेषणं विशेष्यं च तद्भावस्तद्भेदाश्चेति कुतो नोक्तं अत आह **अत्रेति** । भेदो हि क(स्य)योश्चिद्विशेषणतया वा विशेष्यतया वा प्रतीयते न भेद इत्येवातो विशेषणं विशेष्यं चेत्युक्त्यैव तद्भेदोऽप्युक्त एवेति भावः ॥ **अ(त)त्रेति** । निर्विकल्पकप्रतीतावित्यर्थः । तथा च धर्मिप्रतियोग्यादिप्रतीतौ सत्यां भेदप्रतीतिद्वयाभावात् एकस्यामेव निर्विकल्पकायां संविदि युगपदेव सर्वेषामवभासनान्नान्योन्याश्रयत्वमिति भावः ॥ **तद्भावयोरिति** । धर्मिप्रतियोगिस्वरूपनिष्ठयोर्धर्मित्वप्रतियोगित्वरूपयोर्धर्मयोरित्यर्थः । एकस्यैव भेदस्य द्विष्ठत्वपक्षाभिप्रायेण **भेदस्य** इत्युक्तम् । घटपटधर्मिकं भेदद्वयमिति पक्षाभिप्रायेण **भेदयोः** इत्युक्तम् । तथा च धर्मिप्रतियोग्यादिभेदस्य भेदयोश्चेत्यर्थः । **तद्भावयोः** घटपटत्वयोः। **नेष्यत इति** । धर्मित्वादेर्गुणादावपि सत्त्वेन द्रव्यादावन्तर्भावायोगात् षट्पदार्थातिरेकः स्यात् अतो धर्मित्वादिरपरो धर्म्यादिस्वरूपाद्भिन्नो नेष्यते अत **एतत्** तद्भाव इति पृथग्गृहणं कथमित्यर्थः । **तस्य** अतिरिक्तधर्मित्वादिरूपधर्मस्य । **यत्र** असन्निहितस्थले । युगपद्धर्मिप्रतियोगिनोरिति शेषः ॥ **सर्वत्रापीति** । सन्निहितस्थलेऽपि यत्र प्रतियोगी सन्निहितः तत्रापीत्यर्थः । एवं युगपदवभासाभावः । तथा च यदा धर्मी प्रतीयते तदा प्रतियोगी न प्रतीयत एव । भेदधर्मिणोर्युगपन्निर्विकल्पकप्रतीतौ प्रतीतत्वात् धर्मिप्रतीत्यपेक्षया अन्योन्याश्रयाभावेऽपि प्रतियोगिप्रतीत्यपेक्षया तु स्यादेव, प्रतियोगिभेदयोर्युगपदप्रतीतत्वेन प्रतीतिद्वयाभावान्नान्योन्याश्रयत्वमिति परिहारायोगादित्यर्थः । अतिप्रसङ्गपराहतत्वादेवं न वाच्यमित्याह **असन्निहितवदिति** । असन्निहितप्रतियोगिवत् । **सन्निहितस्यापि** प्रतियोगिनः । **प्रतीतीति** । प्रतियोगिज्ञानानुभवेत्यर्थः । तथा च प्रतीतिद्वयाभावान्न प्रतियोगिप्रतीत्यपेक्षयाऽप्यन्योन्याश्रय इति भावः । नन्वेवं प्रतीतिविरोधेनासन्निहितवत् सन्निहितस्याप्यज्ञानायोगेऽपि यत्र वस्तुतः प्रतियोगी न सन्निहितः, तत्र प्रतीतिद्वयप्राप्त्या तत्प्रतीत्यपेक्षया अन्योन्याश्रयः स्यादेवेति चेत् तत्राह **यत्र चेति** । तथा च तत्र धर्मिप्रतीत्यपेक्षया अन्योन्याश्रयाभावेऽपि प्रतियोगिप्रतीत्यपेक्षया प्राप्तोऽन्योन्याश्रयस्तु 'वस्तुतोऽन्योन्यप्रतियोगिकयोरित्यस्मदुक्तरीत्या परिहरणीय इति हृदयम् । **तत्रापि** सविकल्पक-

ज्ञानेऽपि । तथा च यदि निर्विकल्पकेऽप्रतीतो धर्मी, प्रतियोगी वा भेदो वा सविकल्पके प्रतीयेत तदा प्रतीतिद्वयप्राप्त्याऽन्योन्याश्रयः स्यात् । न चैवम् । किन्तु धर्म्यादिकं सर्वं निर्विकल्पके प्रतीतमेव । निर्विकल्पकेऽप्रतीतं तु वैशिष्ट्यमात्रमेव सविकल्पकेऽधिकं प्रतीयते । न हि वैशिष्ट्यप्रतीत्यपेक्षयाऽन्योन्याश्रयः । तथा च निर्विकल्पके स्वरूपेण गृहीतो भेद एव अस्यामुष्मादिति विशेषतः अन्योन्यवैशिष्ट्योपेततया एकप्रतियोगिकतयाऽपरधर्मिकतयेति यावत् । सविकल्पके प्रतीयत इति मूलयोजना । ततश्च धर्म्यादिज्ञाने सति भेदज्ञानमिति नास्ति । युगपदमेव सर्वेषां निर्विकल्पकेन भातत्वादिति न सविकल्पकप्रतीतावप्यन्योन्याश्रय इति भावः ।

**कं०रा०—** ननु भिन्नभेदवादिभिः धर्मिप्रतियोग्यतिरिक्तस्य धर्मिप्रतियोगिभावस्य विशेषणविशेष्यातिरिक्तस्य विशेषणविशेष्यभावस्य चानङ्गीकृतत्वात् 'धर्मित्वप्रतियोगित्वतद्भेदा युगपद्यदि । विशेषणं विशेष्यं च तद्भावश्चैव गृह्यत' इत्यत्र धर्मित्वप्रतियोगित्वविशेषणविशेष्यभावानां धर्म्यादितोऽन्यत्वेन ग्रहणं कथमिति शङ्कते **ननु धर्मिप्रतियोगिनोरिति ।**

**श्रीनिधि०—** **अत्रेति** । विशेषणं विशेष्यं चेति वाक्येत्यर्थः । **तद्भेदस्य तद्भेदयोर्वेति** । व्यासज्यवृत्तिरेक एव भेद इति मतानुसारेण भेदस्येति । तत्तद्वृत्ति भिन्न भिन्न एवेति मतानुसारेण भेदयोर्वेति । धर्म्यादीनां युगपदवभासाभावसाधने प्रतीतिविरोध इत्युक्तम् । दृष्टान्तेऽपि न सर्वस्यापि युगपत्प्रतीत्यभावः सम्भवतीत्याह **यत्र प्रतियोगी न सन्निहित इति** । **को विरोध इतीति** । **वैशिष्ट्यमात्रमिति** । अनेन 'एव'शब्दार्थ उक्तो द्रष्टव्यः ।

**शे०चं०—** विशेषणादेरिव धर्म्यादेरप्यत्र सङ्ग्राह्यत्वात् तदग्रहान्मूले न्यूनतामाशङ्क्य धर्मित्वेत्यादेस्तदुपलक्षणत्वेन धर्मित्वादिमात्रपरत्वाभावान्न न्यूनतेत्याशयेन तदुपलक्षणतया व्याख्याति **उपलक्षणं चैतदिति** । पूर्वत्रेवात्रापि भेदस्यावश्यं ग्राह्यत्वात् तदग्रहान्न्यूनतेत्याशङ्क्याह **अत्रेति** । एक एव भेदो द्विष्ठ इति पक्षमाश्रित्याह **तद्भेदस्येति** । भेदद्वयाङ्गीकारेणान्यतरमात्राश्रितत्वपक्षमाश्रित्याह **भेदयोर्वेति** ॥ **तथा विशेषणेति** । घटपटयोर्भेद इत्यत्र घटपटयोर्विशेषणत्वात् घटपटौ भिन्नावित्यत्र तयोर्विशेष्यत्वात् प्रतीतिभेदेन तयोर्विशेषणविशेष्यभावमभिप्रेत्येदमुक्तम् । घटपटयोर्विशेषणविशेष्यभावोक्त्यैव भेदस्यापि तल्लाभात् विशेषणविशेष्यभूतस्य भेदस्येत्यनुक्त्वा भेदस्येत्येवमुक्तमिति ध्येयम् ।

**वा०र०—** **पूर्वत्रेवेति** । तद्भेदा इत्यत्रेवेत्यर्थः । **भेदस्य** विशेषणविशेष्ययोः भेदस्य । **ग्राह्यत्वात्** सङ्ग्राह्यत्वात् । तथा पाठोऽपि क्वचित् । मूले **विशेषणविशेष्ययोरन्यतरत्वादिति** । धर्मित्वप्रतियोगित्वधर्मिप्रतियोगिव्यतिरिक्तः तेषां भेद इव घटपटतद्भेदरूपविशेषणविशेष्यातिरिक्तस्तद्भेदो नास्तीत्यर्थः । मूले **विशेषणविशेष्यभूतयोः घटपटयोः भेदस्य च** इत्यत्रापि विशेषणविशेष्यभूतयोः इत्येतद्वचनविपरिणामेन विशेषणविशेष्यभूतस्य भेदस्येति सम्बध्यत इति ज्ञेयम् । अत्र घटपटयोः इत्येका कोटिः, भेदस्य चेति

अपरा । तदुभयविशेषणं विशेषणविशेष्यभूतयोरिति । तस्य बुद्ध्या विवेकेन विशेषणभूतयोः वा विशेष्यभूतयोः वा घटपटयोः विशेषणभूतस्य विशेष्यभूतस्य वा भेदस्येति सम्बन्धात् घटपटयोर्भेदस्य चेत्यनयोः विशेषण-विशेष्यभूतयोः इत्यर्थः फलितो भवति । घटपटयोः विशेषणविशेष्यभावोक्त्यैवेति टीका तु लिङ्गविपरिमाणा-श्रयणेन विशेषणेत्यादिविशेषणस्य भेदविशेषणत्वाभ्युपगमेन । तदभावेऽपि घटपटयोः तं प्रति विशेषणत्वाद्युक्त्यैव तल्लाभादिति वर्णकान्तराभिप्रायो वा उक्तप्रकारस्यापि उपलक्षणया ग्राह्यत्वाभिप्रायेति न दोषः ।

**स०व्र०— विशेषणविशेष्यभावयोश्चेति** । घटपटौ भिन्नावित्यत्र घटपटयोर्विशेष्यत्वात् घटपटयोर्भेद इत्यत्र च तयोर्विशेषणत्वात् । प्रतीतिभेदेन तयोर्विशेष्यभावमभिप्रेत्येदमुक्तम् । घटपटयोः विशेषणविशेष्य-भावोक्त्या भेदस्यापि तल्लाभात् विशेषणविशेष्यभूतस्य भेदस्येत्यनुक्त्वा भेदस्येवोक्तमिति ध्येयम् ।

**वि०— ननु 'धर्मित्वप्रतियोगित्वतद्भेदा' इत्यत्रेवोत्तरार्धेऽपि भेदपृथग्ग्रहणेन भाव्यम् । भेदग्रहणं विहाय विशेषणविशेष्यविशेषणत्वविशेष्यत्वानामेव ग्रहणं कुत इत्यत आह **अत्रेति** । घटपटौ भिन्नावित्यत्र भेदस्य विशेषणीभूतघटपटस्वरूपत्वात् । घटपटयोर्भेद इत्यत्र विशेष्यघटपटस्वरूपत्वादित्यर्थः । कथमनेन भेदस्य भेदिभ्यां भेद इति पक्षेऽन्योन्याश्रयतापरिहार इत्यत आह **अयमर्थ इति** । **निर्विकल्पकप्रतीताविति** । घट-धर्मिकत्वपटधर्मिकत्वादिवैशिष्ट्यानवगाहिधर्मिप्रतियोगिधर्मित्वप्रतियोगित्वभेदादिस्वरूपतन्मात्रावगाहिप्रतीता-वित्यर्थः । घटपटोभयधर्मिक एक एव भेद इति घटाश्रितः पटप्रतियोगिको भेद एकः, पटधर्मिको घटप्रतियोगिको भेदोऽपर इति भेदद्वयमिति पक्षावनुसृत्य भेदस्य भेदयोर्वेत्युक्तमिति ज्ञेयम् । **तद्भावयोरिति** । विशेषणत्व-विशेष्यत्वयोरित्यर्थः । **युगपदेव सर्वस्येति** । घटपटादिसन्निधानाभिप्रायेणैतदुक्तमिति ज्ञेयम् । तथा च निर्वि-कल्पकभेदप्रतीतौ धर्म्यादिप्रतीतिसापेक्षप्रतीतिकत्वाभावान्नान्योन्याश्रयत्वमिति भावः । **तद्भावोऽपर इति** । धर्मित्वप्रतियोगित्वादिरूप इत्यर्थः । धर्मित्वादेरुपाधिधर्मत्वेन धर्म्यादिस्वरूपत्वेन धर्म्यादिस्वरूपताङ्गीकारादिति भावः । धर्म्यादिसकलसन्निधाने भवेदयं परिहारः असन्निधानस्थले कथमिति शङ्कते **ननु यत्रेति** ।

**४५ सु०— ननु 'किमर्थमयं परमतोपन्यासः । भेदपार्थक्यमन्तरेण विशेषप्रतीतौ अस्माकमप्ययमे(प्येवमे)व परिहार इति ज्ञापनार्थम् । तर्हीदमेव वाक्यं तथा व्याख्याय-ताम् ।' नै(चै)वं शक्य(ङ्क्य)म्, 'तद्भेदश्चे'ति पृथग्भेदग्रहणविरोधात् । विशेषणविशेष्य-भावेन ग्रहणमपि न धर्मिप्रतियोगिप्रकाराद्भिद्यत इति वैशेषिकपरीक्षायामुक्तम् । अतो नात्र व्युत्पादनमपि कृतमिति ।**

**परि०— भेदपार्थक्यमिति** । भेदस्य पार्थक्यं भेदपार्थक्यम् । तदशिष्यं संज्ञाप्रमाणत्वा-दिति निर्देशवत् साधुत्वमस्य ध्येयम् । तेन पूरणगुणेति न निषेधः शङ्क्यः ।। **विशेषेति** । भेदो

धर्मिविशेषो न धर्मिमात्रमित्युपगमेन धर्मिविशेषप्रतीतावित्यर्थः ॥ **इदमेवेति** । धर्मित्वप्रतियोगित्वेत्यादिमूलवाक्यं विंशेषपरत्वेन व्याख्यायतामित्यर्थः । तद्भेदश्चेति विभज्यानुवादः कृतः । तेनैकवचनोपपत्तिः । नैवं शङ्क्यमित्यत्रान्यदपि ज्ञापकमाह **विशेषणेति** । धर्मिप्रतियोगित्वतद्भेदानां तदुपलक्षितधर्मिप्रतियोगिनोश्च पूर्वार्धे ग्रहणेनैव पूर्तौ विशेषणं विशेष्यं च तद्भावश्चेत्युत्तरार्धे विशेषणविशेष्यत्वेन धर्मिप्रतियोगिनोरुक्तिर्व्यर्था । धर्मिप्रतियोगित्वरूपप्रकाराद्विशेषणविशेष्यभावरूपप्रकारो न भिद्यत इति वैशेषिकनये 'अनयोर्भेद इत्यपि । इतोऽमुष्यामुतोऽप्यस्य भेदो दृष्टो द्विधर्मिक' इति ग्रन्थेन प्रागेवोक्त्या पूर्वार्धोक्तानां ग्रहणेनैवोत्तरार्धोक्तग्रहणसम्भवात् तेन ज्ञायते नैवं शक्यमितीत्यर्थः ॥ **अतो नात्रेति** । विशेषणविशेष्यभावस्येति योज्यम् । धर्मिप्रतियोगित्वविशेषणविशेष्यत्वयोरभेदादेवानयोर्भेद इति इमौ भिन्नावित्यपि व्युत्पादनमपि न कृतमित्यर्थः । अस्यामुष्मादिति पुनरुक्त्यैव तल्लाभात् । अन्यथा 'अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते' इति धर्मिप्रतियोगित्वव्युत्पादनवदनयोर्भेद इति इमौ भिन्नाविति विशेषेणैव (गृह्यत इति) विशेषणविशेष्यभावव्युत्पादनं च कुर्यात् । तथा स्वमतसमाधावपि पूर्वत्रेति वक्तुं न शक्यत इत्यत्र अनयोर्भेद इतीमौ भिन्नाविति च वक्तुं न शक्यत इति व्युत्पादनं कुर्यात् । स्वमतसमाधौ परमतसमाधौ चोभयत्र तद्व्युत्पादनं वा अभेदादेव धर्मित्वप्रतियोगित्वव्युत्पादनमात्रमेव कृतमतो न न्यूनतापि शङ्कनीयेति भावः ॥ ***भेदस्य धर्मिस्वरूपत्वेऽप्यन्योन्याश्रयत्वोद्धारः ॥***

**गु०दी०— भेदपार्थक्यमन्तरेण विशेषप्रतीतौ** इत्यत्र भेदपार्थक्यमेकं विहाय विशेषप्रतीतौ विशिष्य भेदप्रतीतावयमेतत्सदृशः परिहार इति निर्विकल्पकप्रतीत्या प्राक् प्रतीतित्वं स तु वदति । अनिरूपितप्रतियोगिविशेषसामान्यप्रतीत्या विशेषप्रतीतिरित्यस्माभिरुच्यत इति भावः ।

**यादु०— तर्हीदमेव वाक्यमिति** । धर्मित्वप्रतियोगित्वतद्भेदा इति वाक्यमेव विशेषप्रतीतावन्योन्याश्रयपरिहारतया व्याख्यायताम् । वस्तुतोऽन्योन्यप्रतियोगिकयोर्घटपटस्वरूपभेदयोरित्यादिना बहिरेव तत्परिहारकथनेन किमिति भावः ॥ **तद्भेदश्चेति पृथग्भेदग्रहणेति** । अत्र यद्यपि तद्भेदा इति वक्तव्यं, तथैव च मूले पाठात् तथाऽपि धर्मित्वं च प्रतियोगित्वं च तद्भेदश्चेति विग्रहोऽत्राभिमत इति प्रदर्शनायैवमुक्तमिति मन्तव्यम् । विशेषणं विशेष्यं चेति पृथग्विशेषणादिग्रहणविरोधाच्च नैवं शक्यमित्याशयेनाह **विशेषणविशेष्यभावेनेत्यादि** ॥ **उक्तमिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक् । अन्योन्यप्रतियोगेन ह्युभयोरपि दृश्यत' इत्यादिनोक्तमित्यर्थः । तथाच विशेषणविशेष्यभावेन भेदग्रहणस्य धर्मिप्रतियोगिप्रकाराद्भेदाभावस्य पूर्वमुक्तत्वात् अत्र च विशेषणादेः पृथग्ग्रहणान्न स्वमतेनायं परिहारो वक्तुं शक्यत इति भावः । विशेषणादिभावेन भेदग्रहणस्य धर्मिप्रतियोगिप्रकाराद्भेदाभाव इत्यत्र न केवलं पूर्वोक्तिरेव ज्ञापिका, किन्त्वत्रत्यमपि ज्ञापकमस्तीत्याह **अत इति** ।

विशेषणादिभावेन भेदग्रहणस्य धर्मिप्रतियोगिप्रकाराद्भेदभावादित्यर्थः ॥ **व्युत्पादनमिति** । 'अन्यथाऽस्यामुना भेद इति वक्तुं न शक्यत' इति यथा व्युत्पादनं कृतं तथा 'अन्यथेमौ भिन्नावित्यादि वक्तुं न शक्यत' इति पृथग्व्युत्पादनं न कृतम् । अन्यथा पृथक् तत्कर्तव्यमित्यर्थः । एतेन विशेषणविशेष्यभावेन भेदग्रहे योऽयमन्योन्याश्रय उक्तः तस्य स्वमते परिहारो मूले नोक्तोऽतो न्यूनतेत्याशङ्काऽपि निरस्ता । विशेषणादिभावेन भेदग्रहस्य धर्मिप्रतियोगिप्रकाराद्भेदाभावेन पृथक् परिहाराभावस्यादोषत्वात् ।

**वं०प०**— उत्तरमाह **भेदपार्थक्येति** । भूषणकारेण भेदो धर्मिस्वरूपात्पृथगित्यङ्गीकृत्य परिहारोऽभिहितः । तावन्मात्रमेवास्माभिस्त्यज्यत इत्यर्थः । **विशेषप्रतीतौ** घटात्पटस्य भेद इति विशेषप्रतीतौ ॥ **अयमेवेति** । धर्मित्वप्रतियोगित्वेत्यनेनोक्तः । यद्यपि परमत इवास्मन्मते न निष्प्रकारकं निर्विकल्पकं नाम ज्ञानमस्ति । तथा च न तद्रीत्या अस्माभिः परिहर्तुं शक्यते । तथाऽपि धर्म्यादय आदौ सविकल्पकज्ञानेनैव समूहालम्बनरूपेण पराभिप्रेतनिर्विकल्पकज्ञानस्थानीयेन युगपदेव प्रतीयन्ते पश्चात् सविकल्पकान्तरेण पूर्वगृहीतानां वैशिष्ट्यमात्रं प्रतीयत इत्युच्यत इति न्यायसाम्यमभिप्रेत्यायमेवेत्युक्तम् । यद्वा निर्विकल्पकमङ्गीकृत्यायमेवास्त्वित्यर्थः । ननु विशेषणादिप्रतीत्यपेक्षयोक्तोऽन्योन्याश्रयः कुतो न परिहृत इति चेन्न । घटपटौ भिन्नौ घटपटयोर्भेद इति विशेषणविशेष्यभावेन ग्रहणं धर्मिप्रतियोगिप्रकारान्न भिद्यते । घटपटौ भिन्नावित्यादेरपि घटात्पटो भिन्नः पटाच्च घटो भिन्न इत्येवार्थस्य संयोगश्चेत्यादिनोक्तत्वात् । तथा च धर्मिप्रतियोगिप्रतीत्यपेक्षयोक्तान्योन्याश्रयपरिहारेणैतस्यापि परिहृतत्वादित्याह **विशेषणेति** ॥

**कं०रा०**— **तद्भेदश्चेतीति** । धर्मित्वप्रतियोगित्वतद्भेदा इत्यत्र धर्मित्वप्रतियोगित्वशब्दाभ्यां धर्मिप्रतियोगिनावप्युपलक्ष्य तद्भेदशब्देन धर्मिप्रतियोगिनोर्भेदोऽपि पृथग्गृहीतः तच्चास्य वाक्यस्य स्वमतोपन्यासपरतायां विरुद्धम् । स्वमते भेदस्य धर्मिस्वरूपत्वेन ततः पार्थक्याभावात् अतः स्वमतोपन्यासपरत्वेन व्याख्यानायोगात् भिन्नभेदवादिमतोपन्यासपरत्वेनैवेदं वाक्यं व्याख्यातमिति भावः । 'विशेषणविशेष्यं च तद्भावश्चैव गृह्यत' इति विशेषणविशेष्यभावेन ग्रहणस्य धर्मिप्रतियोगिप्रकाराद्भिन्नत्वेन कीर्तनं कृतं, तच्च स्वमतविरुद्धमतोऽपि नेदं वाक्यं स्वमतपरत्वेन व्याख्यातुं शक्यमित्याह **विशेषणविशेष्यभावेनेति** ।

**श्रीनिधि०**— **विशेषप्रतीताविति** । भेदस्य विशेषाकारेण प्रतीतावित्यर्थः । **अयमेव परिहार इति** । किं सामान्यप्रतीतावन्योन्याश्रयत्वं उत विशेषप्रतीताविति विकल्प्य उक्तप्रकारेणान्योन्याश्रयतापरिहार इत्यर्थः । सामान्यप्रतीतिः परमते निर्विकल्पकरूपा अस्मन्मते तु सविकल्पकरूपेति तु वैषम्यमात्रम् । **इदमेव वाक्यमिति** । धर्मित्वप्रतियोगित्वतद्भेदा इत्यादिवाक्यमेवेत्यर्थः । **तथा व्याख्यायतामिति** । अन्योन्याश्रयपरिहारत्वेन व्याख्यायताम् । स्वमतेनैवेति शेषः । **तद्भेदश्चेति पृथक् भेदग्रहणविरोधादिति** । मूले तद्भेदा इति वर्तते न तु तद्भेदश्चेति । तथा च कथमिदं प्रतीकग्रहणमिति चेन्न । विग्रहवाक्यानुसारेणेत्यदोषात् । इतोऽपीदं वाक्यं न स्वमतेन व्याख्यातुं शक्यम् । विशेषणं विशेष्यं चेति विशेषणविशेष्यभावेन ग्रहणस्य धर्मिप्रति-

योगिभावेन ग्रहणापेक्षया पृथगुक्तेः । न चायमस्मत्सिद्धान्तः । 'भिन्ना इति तु भेदानां समुदायो हि दृश्यते' इत्यादिना वैशेषिकपरीक्षायां विशेषणविशेष्यभावेन ग्रहणस्य धर्मिप्रतियोगिभावेन ग्रहणापेक्षया वैरूप्याभावस्योक्तत्वादित्याह **विशेषणविशेष्यभावेन ग्रहणमपीति** । **अत इति** । वैशेषिकपरीक्षायां एवं व्युत्पादितत्वादित्यर्थः ।

**शे०चं०— भेदपार्थक्यमन्तरेणेति** । अयमर्थः । यत्र धर्मिप्रतियोगिनौ सन्निहितौ तत्र धर्मिप्रतियोगिनोस्तद्भावयोस्तद्भेदस्य च युगपदेव धीः । इदमनेन सदृशमितिवत् । तथा विशेषणविशेष्यभूतयोर्भेदभेदिनोर्विशेषणविशेष्यभावस्य च युगपदेव धीः । इमौ सदृशावितिवत् । सर्वस्यैवेन्द्रियसन्निकृष्टत्वाद्योग्यत्वाच्च । युगपदनेकज्ञानं च समूहालम्बनरूपमविरुद्धम् । दीपसहस्रविषयकसमूहालम्बनदर्शनात् । यत्र तु धर्मिप्रतियोगिनोरन्यतरस्यासन्निधानं तत्रापि संस्कारसचिवेन्द्रियसन्निकर्षेणैकमेव ज्ञानमुत्पद्यते । तदनेन सदृशमित्यादिवत् । तथा च क्वान्योन्याश्रय इति । एवं च धर्मिप्रतियोगिनौ यत्र न सन्निहितावन्यतरसंस्कारोऽपि यदा नास्ति, तदाऽनेन प्रकारेण युगपज्ज्ञानस्योपपादयितुमशक्यत्वात् स्वरूपं वस्तुनो भेद इत्यादिना प्रकारान्तरेण तदुपपादनं कृतमिति ध्येयम् ॥ **तर्हीदमेव वाक्यमिति** । धर्मित्वप्रतियोगित्वतद्भेदा इति वाक्यमेव विशेषप्रतीतावन्योन्याश्रयपरिहारपरतया व्याख्यायताम् । किमनेन वस्तुनोऽन्योन्याप्रतियोगिकयोर्घटपटरूपभेदयोरित्यादिना बहिरेव तत्परिहारकथनेनेति भावः ॥ **तद्भेदश्चेतीति** । यद्यप्यत्र मूलग्रन्थानुरोधेन तद्भेदा इत्येव वक्तव्यम्, तथाऽपि धर्मित्वं च प्रतियोगित्वं च तद्भेदश्चेति विग्रहोऽत्राभिमत इति प्रदर्शनायैवमुक्तमित्यवगन्तव्यम् । विशेषणविशेष्यभावेन भेदग्रहणस्य धर्मिप्रतियोगिग्रहणप्रकाराद्भेदाभावस्य पूर्वमुक्तत्वात् । अत्र च 'विशेषणं विशेष्यं चे'ति विशेषणविशेष्यभावेन भेदग्रहणस्य धर्मिप्रतियोगिग्रहणप्रकारात् पृथग्ग्रहणाच्च नैतदेव वाक्यं तथा व्याख्यातुं शक्यमित्याशयेनाह **विशेषणविशेष्यभावेन ग्रहणमपीति** । स्वमतेन नायं परिहार इत्यत्रात्रत्यमपि ज्ञापकमाह **अत इति** । स्वमतेनास्य परिहारत्वाभावादित्यर्थः । तथात्वे ह्यन्यथाऽस्यामुना भेद इति वक्तुं न शक्यत इति धर्मिप्रतियोगिभावेन भेदग्रहणोपपादनवदन्यथेमौ भिन्नाविति वक्तुं न शक्यत इति विशेषणविशेष्यभावेन भेदग्रहणोपपादनस्यापि पृथक् कर्तव्यत्वप्रसङ्गादित्यर्थः ।

यद्वा ननु भेदपार्थक्यमन्तरेणास्माकमप्ययमेव परिहार इत्ययुक्तम् । तथा सति विशेषणविशेष्यभावेन ग्रहणस्याप्यत्रोपपादितत्वेन तस्यापि भवदनुमतत्वापातादित्यतो नेदमनिष्टमित्याह **विशेषणविशेष्यभावेन ग्रहणमपीति** । तथा च धर्मिप्रतियोगिभावेन ग्रहणस्य, विशेषणविशेष्यभावेन ग्रहणस्य च एकरूपत्वाद्धर्मिप्रतियोगिभावेन ग्रहणस्य चास्मत्सम्मतत्वात् तदविशिष्टविशेषणविशेष्यभावेन ग्रहणमप्यस्मत्सम्मतमेवेति भावः । भवेदेतदेवं यदि विशेषणविशेष्यभावेन ग्रहणं धर्मिप्रतियोगिप्रकारान्न भिद्यते इति स्यात् तदेव तु कुत इत्यत उक्तं वैशेषिकपरीक्षायामुक्तमिति । तथा च न तदुपपादनमिदानीं कार्यमिति भावः । नन्वेवं विशेषणविशेष्यभावेन ग्रहणस्य भवदनुमततायां तत्र प्राप्तानुपपत्तिपरिहारेण तद्व्युत्पादनमपि भवता कर्तव्यं स्यादित्यतो विशेषण-

विशेष्यभावेन ग्रहणस्य धर्मिप्रतियोगिभावेन ग्रहणाविशिष्टतया तदुपपादनप्रकारेणैवास्याप्युपपादितत्वादेव पृथक् स्वयं तद्व्युत्पादनमपि न कृतमित्याह **अतो नात्रेति** । यत्त्वस्य वाक्यस्य परमतोपन्यासत्वमेवावश्यं वाच्यम् । अत्र विशेषणविशेष्यभावेन ग्रहणस्यापि पृथक् सङ्कीर्तनात् । स्वमते च विशेषणविशेष्यग्रहणस्य धर्मिप्रतियोगिप्रकारादवैषम्यस्य वैशेषिकपरीक्षायामुक्तत्वेन तद्ग्रहणेनैव प्राप्तत्वात् पृथग्विशेषणविशेष्यभावेन ग्रहणमनर्थकमिति विशेषणमिति पूर्ववाक्यं व्याख्याय 'अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते' इत्युत्तरवाक्ये धर्मिप्रतियोगिभावेन ग्रहणवत् विशेषणविशेष्यभावेन ग्रहणस्याकृतत्वाच्चायं परमतोपन्यास एवेति निश्चीयत इत्युत्तरवाक्यव्याख्यानम् । तत्रात एव कण्ठतो नोक्तमित्येव वक्तव्यत्वाद्व्युत्पादनपदास्वारस्यम् । पूर्ववाक्ये विशेषणविशेष्यभावेन ग्रहणे तदनुसारेणोत्तरवाक्येऽपि तस्यावश्यं ग्राह्यत्वादन्यथा पूर्ववाक्येऽपि तद्ग्रहणवैयर्थ्यप्रसङ्गादिति ध्येयम् ।

**वा०र०— भेदपार्थक्यमन्तरेणेतीति** । भेदस्य यत् पृथक्त्वमङ्गीकृतं तत्परेण तत्परित्यज्येतरत्सम्मतमित्यर्थः । क्वान्योन्याश्रय इतीत्यत्र इतिशब्दस्य इत्ययमिति पूर्वेण सम्बन्धः । एवं तर्हि स्वरूपं वस्तुनो भेदो यत्रेत्याद्यनुव्याख्यानोक्तपरिहारानर्थक्यमित्यतः तद्गतिमाह **एवं चेति** । **बहिरेव तत्परिहारकथनेनेति** । तत्र किं भेदः इत्याशङ्कायाः वस्तुतः इत्यादिना अयमेव परिहारः कथित इति भावः । उपलक्षणं चैतत् । भेदपार्थक्यवादिमतकथनपरतया व्याख्यानेन च किमित्यपि द्रष्टव्यम् । **पूर्वमिति** । वैशेषिकपरीक्षायामित्यर्थः । नैवं शक्यमित्येतत्साध्ये हेत्वन्तरमित्याशयं व्यञ्जयन्नाह **नैतदेवेति** । **न तदुपपादनमिति** । प्रकारभेदाभावोपपादनमित्यर्थः । **अन्यथा पूर्ववाक्येऽपीति** । धर्मित्वेत्यारभ्य गृह्यत इत्यन्तस्यैकवाक्यत्वमन्यथा न स्यादिति भावः ।

**स०व्र०— भेदपार्थक्यमन्तरेणेति** । अयमर्थः । यत्र धर्मिप्रतियोगिनौ सन्निहितौ तत्र धर्मिप्रतियोगिस्वरूपयोः तद्भावयोः तद्भेदस्य च युगपदेव धीः, इदमनेन सदृशमितिवत् । तथा विशेषणविशेष्यभूतयोर्भेदभेदिनोर्विशेष्यभावस्य युगपदेव धीः, इमौ सदृशावितिवत् सर्वस्येन्द्रियसन्निकृष्टत्वात् योग्यत्वाच्च युगपदेकज्ञानं च समूहालम्बनमविरुद्धम् । दीपसहस्रविषयकसमूहालम्बनदर्शनवत् । यत्र तु धर्मिप्रतियोगिनोरन्यतरस्यासन्निधानं तत्रापि संस्कारसचिवेन्द्रियसन्निकर्षेणैकमेव ज्ञानमुत्पद्यते तदनेन सदृशमित्यादिवत् । तथा च क्वान्योन्याश्रय इति । एवं च धर्मिप्रतियोगिनौ यत्र न सन्निहितौ अन्यतरसंस्कारोऽपि नास्ति तदा अनेन प्रकारेण युगपज्ज्ञानस्योपपादयितुमशक्यत्वात् स्वरूपं वस्तुनो भेद इत्यादिना प्रकारान्तरेण तदुपपादनं कृतमिति ध्येयम् । ननु भेदपार्थक्यमन्तरेणास्माकमपि अयमेव परिहार इत्ययुक्तम् । तथा सति विशेषणविशेष्यभावेन ग्रहणस्याप्यत्रोपपादितत्वेन तस्यापि भवदनुमतत्वापातादित्यतो नेदमनिष्टापादनमित्याह **विशेषणविशेष्यभावेन ग्रहणमपीति** । तथा च धर्मिप्रतियोगिभावेन ग्रहणस्य विशेषणविशेष्यभावेन ग्रहणमपि सम्प्रतिपन्नमेवेति भावः । स्यादेवं यदि विशेषणविशेष्यभावेन ग्रहणं धर्मिप्रतियोगिप्रकाराभिन्नमित्येतत्स्यात् । तदेव कुत इत्यत उक्तम् **वैशेषिकपरीक्षायामुक्तमिति** । तथा च न तदुपपादनमिदानीं कार्यमिति भावः ।

नन्वेवं विशेषणविशेष्यभावेन ग्रहणस्य भवदनुमतत्वेन तत्र प्राप्तानुपपत्तिपरिहारेण तद्व्युत्पादनमपि कर्तव्यं स्यादित्यतो विशेषणविशेष्यभावेन ग्रहणस्य धर्मिप्रतियोगिभावेन ग्रहणाविशिष्टत्वादेव तद्व्युत्पादन-प्रकारेणैवास्याप्युपपादितत्वादेव तदव्युत्पादनमपि न कृतमित्याह **अतो नात्रेति** । केचित्तु '' 'अस्य वाक्यस्य परमतोपन्यासत्वमेवावश्यं वाच्यम् । तत्र विशेषणविशेष्यभावेन ग्रहणस्यापि पृथक् सङ्कीर्तनात् स्वमते च विशेषणविशेष्यभावेन ग्रहणस्य धर्मिप्रतियोगिप्रकाराभेदस्य वैशेषिकपरीक्षायामुक्तत्वेन तद्ग्रहणेनैव प्राप्तत्वात् पृथक् विशेषणविशेष्यभावेन ग्रहणमनर्थकमि'ति 'अत एव विशेषणे'ति पूर्ववाक्यं व्याख्याय 'अस्यामुष्मादिति पुन-र्विशेषेणैव गृह्यते' इत्युत्तरवाक्ये धर्मिप्रतियोगिभावेन ग्रहणवत् विशेषणविशेष्यभावेन ग्रहणस्याकृतत्वाच्चायं परमतोपन्यास एवेति निश्चीयते'' इति उत्तरवाक्यं व्याचक्षते । तत्पक्षे तत्र 'अत एव कण्ठतो नोक्तमि'त्येव वक्तव्यत्वात् व्युत्पादनपदस्यास्वारस्यम् । पूर्ववाक्ये विशेषणविशेष्यभावेन ग्रहणे तदनुसारेणोत्तरवाक्येऽपि तस्यावश्यं ग्राह्यत्वात् । अन्यथा पूर्वत्र तद्ग्रहणाप्रसङ्गात् इति ध्येयम् ।

**वि०— भेदपार्थक्यमन्तरेणेति** । भेदस्य धर्मिणः सकाशाद्भिन्नत्वपक्षमपहाय सिद्धान्ते भेदस्य धर्म्यैक्येन निमित्तेन भेदस्य धर्मिस्वरूपविशेषतया अस्यामुष्माद्भेद इति विशेषाकारेण प्रतीतावपि स्वरूपेण गृहीतो भेद एव । अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यत इत्युक्त एव परिहारो भेदं प्रति विशेषबलेनोपपद्यत इत्यर्थः । ननु धर्मित्वप्रतियोगित्वतद्भेदा इति वाक्यमेवास्मन्मते भेदस्य विशेषप्रतीतावन्योन्याश्रयपरिहारपरतया व्याख्यायतां किं परमतोपन्यासपरतया व्याख्याय तन्न्यायेनास्मन्मते विशेषप्रतीतावपि परिहार इति बहिरेव कल्पनेनेति शङ्कते **तर्हीदमेवेति** । यदीदं वाक्यमस्मन्मते अन्योन्याश्रयपरिहारकं स्यात् तर्हि भेदभेदिनोरस्माभि-रैक्यस्यैवाभ्युपगतत्वेन धर्मित्वप्रतियोगित्वपदोपलक्षितधर्मिप्रतियोगिनोः सकाशात् पृथग्भेदग्रहणमनुपपन्नं स्यात् । अतो नैतद्वाक्यमेवं व्याख्यातुं शक्यमिति परिहरति **नैवं शक्यमिति** । अत्र मूले धर्मित्वं प्रतियोगित्वं तद्भेद इति विग्रहोऽभिप्रेतः अतस्तद्भेदश्चेति विभज्यानुवादादेकवचनोपपत्तिरिति ध्येयम् । किं च विशेषणं विशेष्यं चेत्युत्तरार्धे विशेषाद्युक्तिर्व्यर्था । धर्मिप्रतियोगिनोरेव भेदस्याविशेषणादित्वमिति । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक् । अन्योन्यप्रतियोगित्वेन ह्युभयोरपि दृश्यत' इति अनयोर्भेद इत्यपि 'इतोऽमुष्मामुतोऽप्यस्य भेदो दृष्टो द्विधर्मिक' इति वैशेषिकपरीक्षायामुक्तत्वात् । तथा च विशेषणविशेष्यभावेन भेदग्रहस्य धर्मप्रतियोगि-प्रकाराद्भेदाभावादत्र विशेषणादेः पृथग्ग्रहणाच्च न स्वमतेनायं परिहारो वक्तुं शक्यत इत्यत आह **विशेषण-विशेष्यभावेनेति** । विशेषणादिभावेन भेदग्रहणस्य धर्मिप्रतियोगिप्रकाराद्भेदाभाव इत्यत्र न केवलं पूर्वोक्तिरेव ज्ञापिका किं त्वत्रापि ज्ञापकमस्तीत्यत आह **अत इति** । अत्रेत्यस्य विशेषणादिभेदग्रहणस्य धर्मिप्रतियोगि-प्रकाराद्भेदाभाव इत्यर्थः । धर्मिप्रतियोगित्वविशेषणविशेष्ययोर्धर्मिप्रतियोगित्वविशेषणविशेष्यत्वयोरभेदादेव इमौ भिन्नावनयोर्भेद इति पृथग्व्युत्पादनं न कृतः अस्यामुष्माद्भेद इति व्युत्पादनेनैव लाभात् । अन्यथा तद्वत् पुनरिमौ भिन्नाविति वक्तुं न शक्यत इत्यादि व्युत्पादनं च कुर्यादिति भावः । केचित्तु विशेषणविशेष्ययोर्धर्मिप्रतियोगि-प्रकाराद्भेदाभावव्युत्पादनम् । अत एव वैशेषिकपरिक्षायां कृतत्वादेव अत्र ग्रन्थे न कृतमित्यर्थ इत्याहुः ।

॥ इति उक्तस्य अन्योन्याश्रयत्वप्रसङ्गस्य निराकरणम् ॥
॥ इति भेदप्रतीतावन्योन्याश्रयस्य परमतेन (भिन्नभेदवादिमतेन) अपि परिहारः ॥
॥ इति विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य आपादकानभ्युपगमेन द्वेधा निराकरणम् ॥

* * *

॥ अथ च तत्र उक्ते अन्योन्याश्रयत्वप्रसङ्गे दूषणान्तरप्रतिज्ञानम् ॥

४६ **सु०—** एवमापादकानभ्युपगमेनान्योन्याश्रयत्वप्रसङ्गं निराकृत्येदानीं दूषणान्तरं प्रतिजानीते **किञ्चेति** ।

## अनु०— किञ्च

अन्यच्चेत्यर्थः ॥ कथमिति चेत् । किमत्र यदि धर्म्यादिप्रतीत्यपेक्षया भेदः प्रतीयेत तदाऽन्योन्याश्रयत्वं स्यादि(त्या)त्येवापाद्यते, किंवा यदि भेदः प्रतीयेत तदाऽन्योन्याश्रयत्वं स्यादिति ।

**परि०—** **एवमापादकानभ्युपगमेनेति** । भेदज्ञानस्य धर्म्यादिज्ञानाधीनत्वेऽन्योन्याश्रय इति परोक्ततर्के यदापादकं तदनभ्युपगमेनेत्यर्थः । भेदस्य वस्तुस्वरूपत्वे तदस्वरूपत्वे युगपज्ज्ञान-स्योक्त्याऽन्याधीनत्वानभ्युपगमादिति भावः ॥

**यादु०—** **आपादकानभ्युपगमेनेति** । भेदज्ञानं यदि धर्म्यादिज्ञानाधीनं स्यात् तदा अन्योन्याश्रयः स्यादिति तर्के यदापादकं भेदज्ञानस्य धर्म्यादिज्ञानाधीनत्वं तदनभ्युपगमेनेत्यर्थः ॥

**शे०चं०—** **आपादकानभ्युपगमेनेति** । धर्म्यादिज्ञानाधीनज्ञानत्वरूपापादकानभ्युपगमेनेत्यर्थः ।

**वा०र०—** मूले **अन्यच्चेत्यर्थ इति** । दूषणमिति शेषः ।

**विट्ठ०—** **आपादकानभ्युपगमेनेति** । भेदज्ञानं यदि धर्म्यादिज्ञानाधीनं स्यात् तदान्योन्याश्रयः स्यादिति तर्के, यदापादनं भेदज्ञानस्य धर्म्यादिज्ञानाधीनत्वं तदनभ्युपगमेनेत्यर्थः । प्रतिज्ञातदोषान्तरकथनपरत्वेन भेदः कथमित्यादि मूलं योजयितुं अन्योन्याश्रयापादनं विकल्पेन पृच्छति **किमत्रेति** ।

४७ सु०— आद्ये दोषमाह भेद इति ।

**अनु०—** भेदः कथं ग्राह्य इति यः परिपृच्छति ।
धर्म्यादिभेदग्रहणात् तेनोक्तोऽन्योन्यसंश्रयः ॥

**कथम्** इत्याक्षेपे । **परिपृच्छति** इति मृदूक्तिः, आक्षिपतीति यावत् । **धर्म्यादिभेदग्रहणात्** धर्म्यादिग्रहणसापेक्षभेदग्रहणात् । कथमिदं लभ्यते । धर्म्यादिपदस्य तद्ग्रहणोपलक्षणत्वात् । आदिपदस्य च कारणार्थस्याऽऽवृत्तेः । तदेतत्परस्परं व्याहतमिति शेषः । तथा हि । भेदो दुर्ग्रह इति प्रतिज्ञाय तदुपपत्तये हीदमुच्यते । अनेन च यदि भेदो धर्म्यादिप्रतीतिमपेक्ष्य प्रतीयेत तदाऽन्योन्याश्रयत्वं स्यात् । तथा च न प्रतीयेतेत्यापादनेन प्रतीयते चातो न धर्म्यादिग्रहणापेक्षा तत्प्रतीतिरिति लब्धं भवेत् । तथा च 'भेदो दुर्ग्रहः', 'प्रतीयते च' इत्येतयोः कथं न पूर्वोत्तरविरोध इति ।

**परि०— कथमिदमिति** । 'धर्म्यादिभेदग्रहणादि'त्यनेन धर्म्यादिभेदग्रहणेत्यादिकमभिधेयं कथं लभ्यत इत्यर्थः । धर्म्यादीत्यत्रादिपदमावर्तते । धर्म्यादीति प्रथममादिपदं प्रतियोगिपरम् । द्वितीयं कारणपरम् । धर्म्यादीति धर्म्यादिग्रहणलक्षकम् । तथा च धर्मिप्रतियोगिग्रहणमादिकारणं यस्य भेदग्रहणस्य तद्धर्म्यादीत्युक्तार्थलाभ इत्याह **धर्म्यादिपदस्येति** । ऐकपद्यमपि समासप्रयोजनमित्युपेत्य पदस्येत्येकवचनोक्तिः ॥ **कारणार्थस्येति** । कारकार्थत्वेनेत्यर्थः । अन्योन्यसंश्रय इत्यनन्तरं शेषमाह **तदेतदिति** ॥ **इदमिति** । अन्योन्याश्रयत्वमित्यर्थः । अनेन चेत्यस्य विवरणम् **इत्यापादनेनेति** । लब्धं भवेदित्यन्वयः ॥ **तथा चेति** । भेदग्रहो दुश्शक इति भेदाप्रतीतिं प्रतिज्ञाय प्रतिज्ञाते च भेद इति भेदप्रतीत्यभ्युपगमे सतीत्यर्थः ।

**गु०दी०— किञ्च भेदः कथं ग्राह्य इति यः परिपृच्छति** इति मूलश्लोकस्येयं योजना । भेदः कथं ग्राह्यः न कथञ्चिदिति यः परिपृच्छत्यस्मान् प्रति प्रत्यवस्थानं करोति भेदप्रतीतेर्दुर्वचनात् । सांवृतो भेदो न परमार्थत इति यो वक्ति तेन प्रतीत्ययोगेन भेदमेवापेक्षता धर्म्यादिभेदग्रहणात् धर्म्यादिसापेक्षभेदग्रहणादुक्तोऽन्योन्यसंश्रयः कथं न कथञ्चित् । असौ वादी पूर्वोत्तरविरुद्धभाषीति । एतदेव स्पष्टयति ।

**यादु०— कारणार्थस्याऽऽवृत्तेरिति** । आवर्तितस्यादिपदस्य कारणत्वमर्थ इत्यर्थः । **इति शेष इति** । ततश्चेयं मूलयोजना । भेदः कथं ग्राह्यो न कथमपीति यः परिपृच्छति आक्षिपति । भेदप्रतीतिरेव नास्तीति प्रतिजानीत

इति यावत् । तेन वादिना तदुपपत्तये धर्म्यादिभेदाग्रहणान्योन्यासंश्रय उक्त आपादितस्तेन च विपर्ययपर्यवसाने भेदप्रतीतिरेव लभ्यते । तथा च तत्प्रतिज्ञानमेतदापादनं च परस्परं व्याहतमिति ।

**वं०प०— कथमिदमिति** । मूले धर्म्यादीत्येव सत्त्वेन धर्म्यादिग्रहणसापेक्षेति कथं लभ्यत इत्यर्थः । सापेक्षत्वलाभार्थमाह **आदिपदस्येति । कारणार्थस्येति** ॥ तथा च धर्म्यादिज्ञानकारणकभेदग्रहणादित्यर्थः । ततश्च धर्म्यादिज्ञानकारणकत्वमेव तत्सापेक्षत्वमिति भावः । **तदुपपत्तये** प्रतिज्ञातभेददुर्ग्रहत्वोपपादनार्थम् ।

**शे०चं०—** आक्षेपस्यैव परेण कृतत्वेन कथंशब्दस्य प्रश्नार्थत्वानुपपत्तेराह **आक्षेपेति** । तर्हि परिपृच्छतीत्यनेन विरोध इत्यतस्तत्तात्पर्यमाह **परीति** ॥ **कथमिति** । ग्रहणसापेक्षत्वप्रत्यायकपादाश्रवणान्न तल्लाभ इति भावः । लक्षणाहेतुभूतविषयविषयिभावरूपशक्यसम्बन्धसूचनाय तद्ग्रहणेत्युक्तम् ॥ **आदिपदस्येति** । अनेनादिपदमावर्तते आवृत्तं च कारणपरम् । अतः सापेक्षत्वस्यापि लाभ इत्युक्तं भवति ॥ **तदेतदिति** । तत्प्रतिज्ञानमेतदापादनं च परस्परव्याहतमित्यर्थः । प्रतिज्ञापादनयोः परस्परविरोधमेवोपदर्शयति **तथा हीत्यादिना** ।

**वा०र०— न तल्लाभ इति** । ग्रहणसापेक्षत्वयोरलाभ इत्यर्थः । ननु आदिपदस्य कारणार्थस्यावृत्तेरिति मूले कारणार्थकमादिपदं तच्चावर्तत इति सम्बन्धः प्रतीयते । न चासौ युक्तः । तथा सति धर्मिकारणकारणग्रहणभेदग्रहणादित्येव श्रुतावृत्तोपलक्षणाभिः प्राप्त्या धर्म्यादिग्रहणसापेक्षभेदग्रहणादित्यर्थलाभादित्यतो मूलाभिप्रेतां योजनां दर्शयति **अनेनादिपदमिति । आवर्तत इति** । सकृदुच्चरितमपि पुनः पठ्यत इत्यर्थः । **आवृत्तं चेति** । आवृत्त्या लब्धं द्वितीयमादिपदमित्यर्थः । एतच्च श्रुतावृत्तिभ्यामित्यादिरूपवैलक्षण्यं सतश्चापीत्येतद्भाष्यमूलटीकाव्याख्यावसरे अस्माभिः प्रपञ्चितम् । **सापेक्षत्वस्यापीति** । धर्म्यादिग्रहणमादिः कारणं यस्येति बहुव्रीहिणा धर्म्यादिग्रहणकारणकत्वप्राप्त्या सापेक्षत्वस्य लाभ इत्यर्थः । ननु धर्म्यादिपदस्य तद्ग्रहणोपलक्षणत्वात् । आदिपदस्य च कारणार्थस्यावृत्तेरिति मूलटीकोक्तयोजनायामपि धर्म्यादिकारणग्रहणभेदग्रहणादित्येव प्राप्तिरिति चेन्न । मूलटीकयोराशयानवबोधात् । तथा हि । पश्चादुक्ताप्यावृत्तिः प्रथमतो योज्या । तत्र धर्म्यादीति यथाश्रुतस्योपलक्षणया धर्म्यादिग्रहणपरत्वं आवृत्तादिपदस्य कारणार्थत्वम् । ततश्च धर्म्यादिग्रहणमादिः कारणं यस्येति बहुव्रीहिणोक्तसापेक्षत्वलाभ इति ।

**विट्ठ०—** परीत्युपसर्गाभिप्रायकथनं **मृदूक्तिरिति** । उक्तिमात्रं मृदुवस्तुतत्वापेक्षयैवेति । कथं शब्दाभिप्रेतमाह **आक्षिपतीति यावदिति । कथं इदमिति** । धर्म्यादिभेदग्रहणादिति मूलपदेन धर्म्यादिभेदग्रहणस्य सापेक्षभेदग्रहणादित्येतत् कथं लभ्यत इत्यर्थः । **आदिपदस्य चेति** । आवर्तितादिपदस्य कारणत्वमित्यर्थ इत्यर्थः । अन्योन्यसंश्रय इत्यतःपरं दोषमाह **तदेतत्परस्परं व्याहतमिति** ॥ **शेष इति** । ततश्चैवं मूलयोजना भेदः कथं ग्राह्यः, न कथमपीति यो भेदं परिपृच्छति, आक्षिपति तेन धर्म्यादिभेदग्रहणसापेक्षभेदग्रहणादन्योन्य-

संश्रय उक्तः स्यात् । **सर्वं व्याहत इति** । व्याहतिमुपपादयितुमाह **तथा हीति** । **तथा च न प्रतीयेतेति** । अन्योन्यप्रतीतिसापेक्षत्वस्य ज्ञप्तिप्रतिबन्धकत्वादिति भावः । अनेनापादनेनेत्यर्थः । **कथं न पूर्वोत्तरविरोध इति** । भेदस्य प्रतीतिरेव न सम्भवतीति प्रतिज्ञाय तर्कस्य विपर्यये पर्यवसानेन पुनर्भेदप्रतीतिमङ्गीकृत्य तस्याः धर्म्यादिप्रतीतिसापेक्षतामात्रनिराकरणे कथं न पूर्वोत्तरविरोध इति भावः ।

४८ **सु०—** द्वितीये पृच्छामः, 'किं परेण क्वापि भेदो न गृहीतः, किं वा क्वचिद्गृहीतः' इति ।

४९ **सु०—** आद्यं दूषयति **अन्यत्वेति** ।

**अनु०— अन्यत्वाग्रहणे प्रोक्तः कथमन्योन्यसंश्रयः ।**

यद्यन्यत्वं क्वापि न गृहीतं तदाऽन्योन्याश्रयत्वापादनमेव न शक्यम्, निराश्रयत्वात् । तद्धि प्रतीतयोर्द्वयोः कार्यकारणभावाश्रयणे सत्यापाद्यते । अन्ततो वादिप्रतिवादिनोः दूष्यदूषकयोरापाद्यापादकयोर्भेदाग्रहेऽनुत्थानमेवापादनस्य ।

द्वितीयं दूषयति **अन्यत्वमिति** ।

**अन्यत्वं यदि सिद्धं स्यात्कथमन्योन्यसंश्रयः ।**

**सिद्धं** प्रतीतम् । अन्योन्याश्रयत्वे हि भेदप्रतीतिरेव न स्यात् । न ह्यन्योन्याश्रयाणि कार्याणि क्वापि दृष्टानि प्रकल्प्यन्ते । तथा च अस्ति चेद्भेदप्रतीतिः नूनमाभासभूतमेवेदमन्योन्याश्रयत्वमप्रतिबन्धकत्वादिति ।

अस्ति भेदप्रतीतिः सा न प्रमेति तु तात्पर्यमिति चेन्न । किमन्योन्याश्रयत्वमन्योन्योत्पादं प्रतिबध्नातीति मतं, किं वा तद्धर्मम् । आद्ये कथमप्रमाऽपि भेदप्रतीतिरुत्पद्यते । न द्वितीयः, अन्ययोरन्योन्याश्रयत्वमन्यत्तु लुप्यत इत्यस्यान्यायत्वात् । सांवृती प्रतिपत्ति-(तीति)रिति चेत्; तत्किं पटः सांवृत इति, येभ्यस्तन्तुभ्यो जातस्तेषामेव कारणं भ(व)विष्यतीति ।

**परि०**— निराश्रयत्वं व्यनक्ति **तद्धीति** । अन्योन्याश्रयत्वमित्यर्थः ॥ **तद्धर्मम्** । प्रमा(ण)-त्वादिरूपमित्यर्थः । नन्वन्योन्याश्रयत्वमुत्पत्तिप्रतिबन्धकं सदपि सांवृतप्रतीतेर्न प्रतिबन्धकमिति भावेन शङ्कते **सांवृतीति** । संवृतिकार्येत्यर्थः । निराह **तत्किमिति** । काकुरयं किंशब्दः ॥ **इतीति** । इतिकृत्वेत्यर्थः ।

**यादु०**— **तद्धर्ममिति** । प्रमात्वमित्यर्थः । नन्वप्रमारूपाभेदप्रतीतिर्न सत्या येनान्योन्याश्रयप्रतिबद्धा स्यात् किन्तु विषयवत् स्वयमपि संवृतिकल्पिता, तत्र चान्योन्याश्रयत्वादिना दौर्घट्यं भूषणमेवेत्याशयेन शङ्कते **सांवृती प्रतीतिरिति** ।

**वं०प०**— **तद्धि** अन्योन्याश्रयत्वम् । तथाच अन्यत्वस्य क्वाप्यग्रहे वस्तुद्वयोपस्थित्यभावेन निराश्रय-त्वात् कुत्र कार्यकारणभावाश्रयणे अन्योन्याश्रयापादनमित्यर्थः । **अन्तत** इति दूषणान्तरम् । अप्रतिबन्धकत्वात् भेदज्ञास्यप्रतिबन्धकत्वादित्यर्थः । **अन्योन्योत्पादं** धर्म्यादिज्ञानभेदज्ञानयोः परस्परमुत्पत्तिम् । **तद्धर्मं** धर्म्यादि-ज्ञानभेदज्ञाननिष्ठं प्रमात्वरूपं धर्मम् । **अन्ययोः** धर्म्यादिज्ञानभेदज्ञानयोः । **अन्यत्तु** । तन्निष्ठं प्रमात्वम् ॥ **लुप्यत इति** । भेदो यदि धर्म्यादिप्रतीत्यपेक्षया प्रतीयेत तदा अन्योन्याश्रयः स्यात् । तथा च भेदप्रतीतेर्धर्म्यादि-प्रतीत्यपेक्षैव निवर्ततां, भेदप्रतीतेः प्रमात्वे किमायातमित्यर्थः । अस्ति मम भेदप्रतीतिः । सा सांवृते तथा चान्योन्याश्रयदुष्टाया अपि भेदप्रतीतेः सांवृतत्वमेवोपपद्यत इत्याशङ्कते **सांवृतीति** । अन्योन्याश्रयदुष्टस्य सांवृतत्वमपि कुतः । सांवृते स न दोष इत्यङ्गीकृतमिति चेत् । अतिप्रसङ्गादित्याह **तत्किमिति** ॥ **तेषा-मेवेति** । तथा च पटस्यापि व्यावहारिकत्वादन्योन्याश्रयस्य च व्यावहारिकत्वाप्रतिबन्धकत्वस्य त्वयोच्यमान-त्वादित्यर्थः ।

**श्रीनिधि०**— नन्वन्योन्याश्रयत्वं अन्योन्योत्पादं प्रतिबध्नातीति । सत्यम् । तत्तु पारमार्थिकयोरेव । न सांवृतयोः । भेदप्रतीतिश्च सांवृतीत्याशङ्क्य परिहरति **सांवृती प्रतीतिरिति चेदिति** ।

**शे०चं०**— **निराश्रयत्वादिति** । निर्विषयत्वादित्यर्थः । कोऽसौ विषयो यदभावादापादनस्याशक्यतेत्याह **तद्धीति** ॥ **तद्धर्ममिति** । प्रमात्वमित्यर्थः ॥ **अन्यायत्वादिति** । प्रतीतिगतेनान्योन्याश्रयत्वेन तत्प्रमात्व-निषेधस्य चोरापराधान्माण्डव्यस्य शूलप्राप्तिवदयुक्तत्वादिति भावः । ननु च अप्रमारूपा भेदप्रतीतिर्न सत्येति नान्योन्याश्रयप्रतिबद्ध्या अप्रमाया विषयवत् स्वयमपि संवृतिकार्यत्वेन तत्रान्योन्याश्रयादिना दौर्घट्यस्य भूषण-त्वेन तदुत्पादस्याविरुद्धत्वादित्याशङ्कते **सांवृती प्रतीतिरिति चेदिति** । प्रतीतेरसत्यत्वेऽपि व्यावहारिकत्वा-दन्योन्याश्रयादिप्रतिबद्धयत्वमेवेति न तदुत्पादो युक्तः । न ह्यन्योन्याश्रयादिदुष्टस्य व्यावहारिकता दृष्टचरी । तथा सति सांवृतस्य पटस्य स्वजनकतन्तुजनकत्वप्रसङ्गात् । यदि चान्योन्याश्रयादिदुष्टस्यापि संवृतिसामर्थ्याद्व्याव-हारिकता स्यादिति मन्यसे । तर्हीश्वरसामर्थ्यादन्योन्याश्रयादिदुष्टस्यापि पारमार्थिकत्वमेव स्यादिति ममापि समानमित्याशयेन परिहरति **तत्किमिति** ।

**विट्ठ०**— निराश्रयत्वमेवोपपादयति **तद्धीति** । प्रतीतयोर्वस्तुनोर्द्वयोः परस्परं कारणाभावाश्रयणे परेण कृते सत्यन्योन्याश्रयत्वमापाद्यत इत्यर्थः । कात्र कथन्तेत्यत उपपादयति **अन्योन्याश्रयत्वे हीति** । **अन्योन्योत्पादमिति** । भेदप्रतीतिधर्म्यादिप्रतीत्योर्मध्ये अन्योन्योत्पादनमित्यर्थः । **तद्धर्ममिति** । प्रमात्वरूपं प्रतीतिधर्ममित्यर्थः । ननु यदि भेदप्रतीतिः सत्या स्यात् तदा अन्योन्याश्रयत्वं तदुत्पत्त्यादिप्रतिबन्धकः स्यात् । अतो न सा प्रतीतिः सत्या स्यात् किन्तु सा प्रतीतिः सांवृतीति अतो नैतद्दूषणमित्याशयेन शङ्कते **सांवृतीति** । संवृतिकार्येत्यर्थः ।

* * *

**॥ अथ च तत्र अस्य दूषणान्तरस्य जात्युत्तरत्वकथनसहितः**
**दूष्यत्वेनोक्तविषयसदृशान्यविषयेष्वपि तद्दोषस्यातिदेशः ॥**
**॥ अथ च तत्रादौ अस्य दूषणस्य जात्युत्तरत्वकथनम् ॥**

५० **सु०— नन्वनेनास्य तर्कस्य किं दूषणमुक्तं स्यादित्यत आह एतादृशस्येति ।**

**अनु०— एतादृशस्य वक्तारावुभौ जात्युत्तराकरौ ।**
**मायी माध्यमिकश्चैव**

**शे०चं०**— **अनेनास्येति** । किञ्च भेदः कथं ग्राह्य इति श्लोकद्वयेनान्योन्याश्रयत्वापादनस्येत्यर्थः ॥

**॥ इति अस्य दूषणस्य जात्युत्तरत्वकथनम् ॥**

* * *

**॥ अथ च तत्र उक्तमाध्यमिकमतैकदेशविषयातिदेशेन तन्मतान्यदेशविषयस्यापि जात्युत्तरता ॥**
**॥ अथ तत्र उक्तमाध्यमिकमतैकदेशविषयवचनसदृशतदन्यदेशकतिपयविषयवचनानां प्रदर्शनम् ॥**
**॥ अथ तत्रादौ तत्सदृशप्रथमविषयवचनप्रदर्शनम् ॥**

५१ **सु०— न केवलमेतज्जात्युत्तरं किन्तु यदन्यदपि तदीयं वचनम् ।**

**परि०**— एतादृशेतिपदस्वारस्यं वक्तुमाह **न केवलमिति** ॥

**विट्ठ०**— एतादृशेति पदप्रयोगाभिप्रायं वक्तुमाह **न केवलमिति** । **जात्युत्तरमिति** । भेदप्रतीतिनिरासायान्योन्याश्रयत्वोपपादनेनैवाश्रयादिभेदसिद्ध्या स्वव्याहतत्वस्य किं च भेदः कथं ग्राह्य इत्यादिनोपपादितत्वादिति भावः ।

## ५१ सु०— तथा हि । भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थेति ।

**परि०— भेदान्तरेति** । भेदभेदिनिरूपितभेदान्तरेत्यर्थः । अनवस्थेत्यनन्तरं अन्यथा वस्त्वेवास्ति न भेद अस्मात् इति योज्यम् । तथा च उभयथाऽपि न भिन्नत्वं विश्वस्येति भावः ॥

**वं०प०—** घटपटनिष्ठो भेदो घटपटाभ्यां भिद्यते । तदुभयप्रतियोगिकभेदवानिति यावत् । इत्येवं भेदान्तरेणायं भेदो भेद्यो भेदवान् । सोऽपि तथेत्यनवस्थेत्याह **भेदस्यापीति** ।

**श्रीनिधि०— भेदान्तरभेद्यत्वेनावस्थेति** । भेदस्य भेदिभ्यामभिन्नत्वे अन्यतरपरिशेषापत्तिरिति कोट्यन्तरे दूषणमन्यत्रोक्तं द्रष्टव्यम् ।

**शे०चं०— भेदस्यापीति** । धर्मभेदवाद इति शेषः ।

**विठ्ठ०— भेदान्तरेति** । भेदभेदिनिरूपितभेदान्तरेत्यर्थः । अत्र भेदान्तरभेद्यत्वाभावे वस्त्वेवास्ति न तु भेद इति स्यादिति ग्राह्यम् ।

**॥ इति तत्सदृशप्रथमविषयवचनप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र तत्सदृशद्वितीयविषयवचनप्रदर्शनम् ॥**

## ५२ सु०— तथा भिन्ने भेदनिवेशश्चेत्तेनैव भेदेन भिन्नतायामात्माश्रयत्वं, भेदान्तराङ्गीकारे त्वनवस्था । अभिन्ने भेदनिवेशश्चेत्स्वतोऽपि पटस्य भेदापत्तिरिति ।

**वं०प०— भिन्ने** वस्तुनि घटादौ ।

**कं०रा०— भिन्न इति** । भेदविशिष्टे भेदनिवेशश्चेत्तत्राप्याधेयभूतभेदेनैव भेदविशिष्टतायामङ्गीक्रियमाणायां विशिष्टाश्रितस्य विशेषणाश्रितत्वनियमेन भेदस्य भेदाश्रयत्वमापतितमित्यात्माश्रयत्वमिति भावः । **भेदान्तरेति** । आधेयभूतभेदादन्येन भेदेन भिन्नतायां स्वीक्रियमाणायां सोऽपि भेदः भेदान्तरविशिष्टे वर्तत इति वक्तव्यं भेदान्तरमप्येवमिति भेदपरम्परारूपाऽनवस्था स्यादित्यर्थः ।

**शे०चं०— आत्माश्रयत्वमिति** । तद्भेदस्य तद्भेदविशिष्टवस्तुवृत्तावंशतः स्ववृत्तेरावश्यकत्वादिति भावः ॥ **भेदान्तराङ्गीकार इति** । अपर्यवसिततत्परम्पराङ्गीकार इत्यर्थः ॥ **अभिन्ने भेदनिवेशश्चेदिति** । पटाद्भिन्ने घटे वर्तमानो भेद यथा पटाद्घटं भिन्द्यात् तथा घटमपि घटाद्भिन्द्यात् समानयोगक्षेमत्वादिति भावः ।

**वा०र०— तद्भेदस्येति** । अत्रात्माश्रयत्वप्रकारोपपादनं तत्त्वसङ्ख्यानटीकागतात्माश्रयत्वेन घटाभाववति घटाभावो नेत्येतत्प्रमेयोपपादनावसरे अस्मदुक्तरीत्या बोध्यम् । मण्डनमिश्रैरित्यादिना नास्तीत्युक्तमित्यन्तम् । ........त्रेति शेषः ।

**विठ्ठ०— अभिन्ने भेदनिवेशश्चेदिति** । पटादिप्रयोगिकभेदाधिकरणे घटे पटादिप्रयोगिकभेदः प्रविशतीत्यङ्गीकार इत्यर्थः ।

**॥ इति तत्सद्दशद्वितीयविषयवचनप्रदर्शनम् ॥**

* * *

**॥ अथ तत्र तत्सद्दशतृतीयविषयवचनप्रदर्शनम् ॥**

५३ **सु०— तथा न तावत्प्रत्यक्षेण भेद एव दृश्यते, 'भेद इत्येव प्रतीतेः' अननुभवात् । वस्तुनोऽपि प्रतीतौ; न तावद्भेदपूर्वं वस्तुप्रतीतिः, उक्तदोषात्; नापि वस्तुप्रतीतिपूर्विका भेदप्रतीतिः, अभेदेन प्रतीते भेदप्रतीतावतिप्रसक्तेः; न च युगपत्, भेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वेन यौगपद्यायोगात् । न च प्रकारान्तरमस्तीति ।**

**परि०— भेदेति** । भेदधीपूर्वकमित्यर्थः ॥ **उक्तदोषादिति** । भेद इत्येव प्रतीतेरननुभवादित्युक्तेरित्यर्थः ॥ **अभेदेनेति** । वस्तुधीपूर्विका भेदधीश्चेद्भेदप्रतीतेः पूर्वं वस्तु अभेदेन प्रतीयत इति वाच्यम् । भेदाभेदौदासीन्येन वस्तुबुद्धेरभावात् । तथा च अभेदेन प्रतीते वस्तुनि भेदधीश्चेत्स्वस्मादपि स्वस्य भेदधीप्रसङ्ग इत्यर्थः ।

**यादु०— भेदपूर्वं वस्त्विति** । भेदप्रतीतिपूर्विका वस्तुप्रतीतिरिति नेत्यर्थः ॥ **उक्तदोषादिति** । भेदप्रतीतेरननुभवादित्युक्तदोषादित्यर्थः ॥ **अभेदेन प्रतीत इति** । भेदप्रतीतेः पूर्वं प्रतीयमाने वस्तुन्यभेद एव प्रतीयते । भेदाभेदौदासीन्येन वस्तुप्रतीतेरभावादित्याशयः ॥

**वं०प०— अभेदेनेति** । वस्तुप्रतीत्यनन्तरं भेदः प्रतीयत इत्युक्ते आदौ तद्वस्त्वभेदेनैव प्रतीतमित्यायातीति ज्ञेयम् ।

**कं०रा०— न तावदिति** । न तावद्भेदप्रतीतिपूर्वकं वस्तुप्रतीतिः सम्भवेति भेदमात्रगोचरप्रतीतेरननुभवादित्युक्तदोषादित्यर्थः । **अभेदेनेति** । वस्तुप्रतीतिपूर्विकाऽभेदप्रतीतिरिति पक्षे वस्तुप्रतीतिदशायां भेद-

प्रतीत्यभावेनाभेदप्रतीतौ तद्भेदबुद्धिप्रसङ्गादित्यर्थः । **न च युगपदिति** । वस्तुतद्भेदयोर्युगपत्प्रतीतिरित्यपि न । भेदबुद्धिं प्रति वस्तुबुद्धेः धर्मिज्ञानतया कारणत्वेन तयोर्यौगपद्यायोगादित्यर्थः ।

**श्रीनिधि०— वस्तुनोऽपीति** । अपिपदेन भेदसमुच्चयः । **उक्तदोषादिति** । भेद इत्येव प्रतीतेरननुभवादित्युक्तदोषादित्यर्थः । भेदप्रतीतिपूर्वं वस्तुप्रतीतौ भेद इत्येव पूर्वं प्रतीतिः स्यात् । न च सा अनुभूयत इति भावः । **भेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वादिति** । अस्यामुना भेद इत्युद्दिश्य भेदो ज्ञातव्यः । तथोद्देशश्च धर्मिप्रतीतिमन्तरानुपपन्न इति भावः ।

**शे०चं०—** भेदवस्तुनोः किमेकैकग्राहकं प्रत्यक्षं उत उभयग्राहकम् । उभयग्रहपक्षेऽपि युगपत् क्रमेण वा, क्रमपक्षेऽपि किं पूर्वं किमपरमिति विकल्प्य दूषयद्भिर्मण्डनमिश्रैर्भेदग्राहकत्वमेव प्रत्यक्षस्य नास्तीत्युक्तं; तदनुवदति **तथेति** । वस्त्वेवेति तु पक्षस्तदनर्थबीजमिति परित्यक्तः ॥ **वस्तुनोऽपीति** । धर्मिप्रतियोगिरूपवस्तुनोऽपीत्यर्थः ॥ **भेदपूर्वमिति** । भेदप्रतीतिपूर्विका वस्तुप्रतीतिरित्यर्थः ॥ **उक्तदोषादिति** । भेद इत्येव प्रतीतेरननुभवादित्युक्तदोषादित्यर्थः ॥ **अभेदेन प्रतीत इति** । भेदप्रतीतेः पूर्वं प्रतीयमाने वस्त्वन्यभेद एव प्रतीयते । भेदाभेदौदासीन्येन वस्तुप्रतीतेरभावादित्याशयः ॥ **अतिप्रसक्तेरिति** । पटाभेदेन प्रतीते घटे पटभेदप्रतीत्यभ्युपगमे घटाभेदेन प्रतीते घटेऽपि घटभेदप्रतीत्यापत्तेरित्यतिप्रसङ्गादित्यर्थः ॥ **न च युगपदिति** । युगपद्भेदस्य वस्तुनश्च प्रतीतिरपि नेत्यर्थः ।

**वा०र०—** ननु भेद इत्येव प्रतीतिवत् वस्त्वेवेत्यपि भेदप्रतीतिपक्षः कुतो नाशङ्कित इत्यत आह **वस्त्वेवेति त्विति** । **तदनर्थेति** । तस्यानर्थबीजम् । कुतः स्वरूपत्वेन प्रतीतावुक्तशङ्कानवकाशादित्यतः तत्परित्याग इत्यर्थः ।

**स०व्र०— उक्तदोषादिति** । भेद इत्येव प्रतीतेरननुभवादित्युक्तदोषादित्यर्थः ।

**विठ्ठ०—** भेद इत्येव प्रतीत्यभावेऽपि इदं वस्त्विति प्रतीतौ भेदोऽपि प्रतीयत इत्यतः क्रमेण विकल्पं सूचयन् दूषयति **वस्तुनोऽपीति** । **भेदपूर्वं वस्त्विति** । भेदप्रतीतिपूर्विका वस्तुप्रतीतिरिति न भेद इत्येव प्रतीतिरननुभवादित्युक्तदोषादित्यर्थः । **अभेदेन प्रतीत इति** । भेदप्रतीतेः पूर्वं प्रतीयमानवस्तु अभिन्नतया प्रतीयत इति वक्तव्यं, भेदाभेदोदासीन्येन प्रतीतेरेवाभावात् । अभिन्नतया प्रतीते च भेदप्रतीतेर्व्याहतत्वात् तादृशस्य चाङ्गीकारेऽतिप्रसङ्गादिति भावः । **न च प्रकारान्तरमिति** । भेदप्रतीतिपूर्वकत्वादिप्रकारत्रयं विना प्रकारान्तरस्याभावात् प्रकारत्रयस्य चादूषितत्वान्न प्रतिक्षेपेण भेदप्रतीतिर्युज्यत इति भावः ।

**॥ इति तत्सद्दशतृतीयविषयवचनप्रदर्शनम् ॥**

* * *

॥ अथ तत्रान्ते तत्सदृशचतुर्थविषयवचनप्रदर्शनपूर्वकं तादृशान्याधिकविषयाणामप्यस्तित्वसूचनम् ॥

५४ **सु०— तथा सत्तावत्कारणं वा, कारणे सत्ता वा । आद्ये कारणस्यासत्त्वम् । द्वितीयेऽसत एव कारणत्वमित्यादि ।**

**परि०— सत्तावदिति** । मतुप् । सत्ताविशिष्टे कारणत्वं वा कारणत्वविशिष्टे सत्ता वा इत्यर्थः । 'अन्तर्भावितसत्त्वं चेत्कारणं सदसत्ततः । नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः' इत्युक्तेरिति भावः ।

**गु०दी०— आद्ये कारणस्यासत्त्वम्** इत्यत्र कारणं सत्तावदिति विशेषणविशेष्यतया व्यवहार-कारणपदार्थभूतं कारणमसदेवेति प्राप्तमित्यर्थः । सत्त्वाधारतया प्रागुच्यमानकारणमसदेवेति प्राप्तमित्यर्थः ।

**यादु०— सत्तावत्कारणं वेति** । सत्ताविशिष्टं कारणं वेत्यर्थः ॥ **कारणे सत्ता वेति** । कारणे बीजादौ सत्ता नान्तर्भवति किन्तु सत्ता तटस्थैवोपलक्षणमिति वेत्यर्थः ॥ **आद्ये कारणस्येति** । सत्ताविशिष्टे कारणे न सत्ता, आत्माश्रयत्वप्रसङ्गात् । अतः सत्ताविशिष्टस्य कारणस्यासत्त्वमेव प्राप्तमित्यर्थः ॥ **असत एव कारणत्वमिति** । कारणसत्तायास्तटस्थतयोपलक्षणत्वेऽसत एव बीजादेः कारणत्वमायातमित्यर्थः ॥

**वं०प०— सत्तावत्** सत्ताविशिष्टम् । **सत्ता** वा उपलक्षणमिति शेषः । तथा च सत्तोपलक्षित-मित्यर्थः ॥ **आद्य इति** । सत्ताविशिष्टे सत्ताया आत्माश्रयप्रसङ्गेनाभावादित्यर्थः । द्वितीये सत्ता उपलक्षणतया कारणेऽस्ति, वस्तुतो नास्तीति प्राप्तम् । तथा च असत एव कारणत्वम् ।

**कं०रा०— सत्तावदिति** । सत्ताविशिष्टं कारणं वा तदविशिष्टं कारणं वेत्यर्थः । **आद्य इति** । सत्ताविशिष्टस्य कारणत्वे विशेषणीभूतसत्ताया अपि कारणत्वात् तस्याश्च सत्तारहितत्वात् सतो विशेष्यस्य कारणत्वेन कारणस्य सत्त्वमेवेति नियमाभावेऽपि कारणस्यासत्त्वमात्रप्राप्तेः असतः कारणत्वमागतमिति भावः । **द्वितीय इति** । सत्त्वाविशिष्टं कारणमिति द्वितीयपक्षे सत्त्वस्योपलक्षणत्वेनाविद्यमानत्वावश्यम्भावात् सत्तारहित-स्यैव कारणत्वप्राप्तेः असत एव कारणत्वं सिद्धमिति भावः ।

**शे०चं०**— श्रीहर्षीयं जात्युत्तरवचनमप्युदाहरति **तथेति** । बीजमित्येव नाङ्कुरस्य कारणम् । किन्तु सद्बीजमिति सद्वादिना विशेष्यते । तत्र विकल्पयति **सत्तावत्कारणं वेति** । कारणस्वरूपे सत्तान्तर्गत्यनन्त-र्गतिभ्यां सत्ताविशिष्टं कारणं तदुपलक्षितं वेति विकल्पार्थः ॥ **आद्य इति** । अन्तर्भावितसत्त्वस्य कारणत्वे सत्ताविशिष्टे सत्तासमवायाभावात् कारणमसदेव स्यात् । सत्तासमवायस्यैव सद्व्यवहारप्रयोजकत्वात् । तथाहि । विशिष्टं किं विशेषणविशेष्यतत्सम्बन्धा एव, किं वा तदन्यत् । आद्येऽपि किं सैव सत्ता सत्तान्तरं वा । आद्ये अंशतो विशेषणांशेऽपि स्ववृत्तिप्रसङ्गः । यदि विशिष्टमन्यत् तर्हि सत्तायाः सत्ताविशिष्टे वृत्त्यभावप्रसङ्गः ।

विशेषणत्वात् स्वस्मिन् स्ववृत्त्यभाववत् स्वविशिष्टे स्ववृत्त्यभावनियमदर्शनात् । यदि च या सत्ता विशिष्टे वर्तते तदपि तामन्तर्भाव्य विशिष्टं कारणम्, अनन्तर्भाव्य वेत्युक्तदोषानतिवृत्तिरेवेत्यसत्त्वं कारणस्यापन्नमित्याशयः ॥ **असत एव कारणत्वमिति** । सत्तोपलक्षितं सत्तारहितं बीजं कारणमिति स्वयमेवाङ्गीकारादिति भावः ।

**स०व्र०—** बीजमित्येव नाङ्कुरस्य कारणम् । किन्तु सद्बीजमिति सद्वादिना विशेष्यते । तत्र वाच्यं किं कारणस्वरूपे सत्ताविशिष्टस्य कारणत्वमभिप्रेतम् उत सत्तायाः कारणस्वरूपे अप्रवेशात् सत्तोपलक्षितस्य वेति विकल्पं निधायाह **तथेति** । तथा सत्ताविशिष्टमधिष्ठानम्, सत्तोपलक्षणम् वा । आद्ये सत्त्वविशिष्टे सत्त्वाभावादसदधिष्ठानमिति प्राप्तम् । अथ सत्त्वमधिष्ठानकोटौ न प्रवेश्यते, तर्हि असदधिष्ठानमस्तु । सत्त्वासत्त्वयोरधिष्ठानकोटावप्रवेशादित्येवं सर्वस्य स्वव्याहतत्वादित्यर्थः । **आद्य इति** । अन्तर्भावितसत्त्वस्य कारणत्वे सत्ताविशिष्टे सत्तासमवायासम्भवात् । कारणमसदेव स्यात् । सत्तासमवायस्यैव सद्व्यवहारप्रयोजकत्वाभ्युपगमात् । तथा हि विशिष्टं किं विशेषणविशेष्यतत्सम्बन्धा एव उतान्यत् । आद्येऽपि किं सैव सत्ता, किं वा सत्तान्तरम् । आद्ये अंशतो विशेषणांशेऽपि स्ववृत्तिप्रसङ्गः । यदि विशिष्टमन्यत् तर्हि सत्तायाः सत्ताविशिष्टे वृत्त्यभावप्रसङ्गः । विशेषणत्वात् स्वस्मिन् स्ववृत्त्यभाववत् स्वविशिष्टे स्ववृत्त्यभावनियमदर्शनात् । यदि चान्या सत्ता विशिष्टे वर्तते, तदाऽपि तामन्तर्भाव्य विशिष्टं कारणमनन्तर्भाव्य वेत्युक्तदोषानतिवृत्तिः स्थिरैवेत्यसत्त्वं कारणस्येति भावः । **सत्तावत्कारणं वेति** । सत्ताविशिष्टं कारणमित्यर्थः । कारणे सत्ताविशेषणं कारणस्वरूपान्तर्गतेति यावत् । **कारणे सत्ता वेति** । कारणे सत्तोपलक्षणमित्यर्थः । **आद्ये कारणस्यासत्त्वमिति** । यदि सत्ता विशेषणं तदा सत्त्वविशिष्टे सत्ताऽसम्भवात् कारणमसदेव स्यात् । सत्तासमवायात् सद्व्यवहाराभ्युपगमादित्यर्थः । अन्तर्भावितसत्त्वं कारणम्, अनन्तर्भावितसत्त्वं वेति विकल्पाभिप्रायः । सत्ताऽपि कारणमित्यायातम् । सत्तायां न सत्तेत्यसदपि कारणमित्यर्थः । **द्वितीय इति** । यदि सत्तोपलक्षणम्, तदा कारणकोटौ सत्त्वाप्रवेशात् उपलक्षणतया तस्य बहिर्भावात् केवलं बीजस्वरूपमसदेव कारणमिति तत्कारणत्वं भग्नं स्यादित्यर्थः ।

**वि०ठ०— सत्तावत्कारणमिति** । सत्ताविशिष्टं कारणमित्यर्थः । **कारणे सत्ता वेति** । कारणे बीजादौ न सत्तान्तर्भवति । किन्तु तटस्थैव सत्ता उपलक्षणतया कारणव्यावर्तकेत्यर्थः । **आद्ये कारणस्येति** । सत्ताविशिष्टे कारणे न सत्ता सम्भवति । आत्माश्रयप्रसङ्गात् । अतः सत्ताविशिष्टस्य कारणस्यासत्त्वमेव प्राप्तमिति भावः । **असत एव कारणत्वमिति** । कारणे सत्तायाः तटस्थतयोपलक्षणत्वे असत एव बीजादेः कारणत्वमायातमिति भावः । तदुक्तं परेण, 'अन्तर्भावितसत्त्वं चेत् कारणं तदसत् ततः । नान्तर्भावितसत्त्वं चेत् कारणं तदसत्तत' इति ।

**॥ इति तत्सदृशचतुर्थविषयवचनप्रदर्शनपूर्वकं तादृशान्याधिकविषयाणामप्यस्तित्वसूचनम् ॥**

**॥ इति उक्तमाध्यमिकमतैकदेशविषयवचनसदृशतदन्यदेशकतिपयविषयवचनानां प्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र 'एतादृशस्य' इत्यनुव्याख्यानस्थपदस्य पूर्वोत्तरत्रोक्तानां सर्वेषां विषयवचनानां समानदोषप्रदर्शनार्थता सोपपत्तिका ॥**

५५ **सु०—** तत्सर्वं जात्युत्तरमिति ज्ञापयितुं 'एतादृशस्ये'त्युक्तम्; सर्वस्यापि स्वव्याघातकत्वात्, भेदस्य सत्तायाश्च स्वरूपातिरिक्तयोरयुक्तयोः [(क्तायाः) (क्ततायाः) (अयुक्तायाः)] एवाङ्गीकरणाच्च ।

**परि०—** कथं तत्सर्वं जात्युत्तरमित्यत आह **सर्वस्यापीति** । भेदस्य दुर्ग्रहत्वं प्रतिज्ञाय तत्प्रतीतौ यदन्योन्याश्रयत्वमुक्तं तत्तावद्व्याहतमिति 'किं च भेद' इत्यादिव्याख्यावसरे व्यक्तमुक्तम् । यदपि भेदस्यापीत्यनेनानवस्थापादनं तत्रापि परेण वादिप्रतिवादिनोर्दूष्यदूषणयोरापाद्यापादकयोर्भेदस्यावश्यमङ्गीकार्यत्वेनानवस्थात्माश्रयत्वादिदोषाणां साम्यात्स्वव्याहतिर्व्यक्तैव । यदपि सत्तावदित्यादिनोक्तं तदपि 'नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्तत' इति न्यायामृतोक्तदिशा सत्ताविशिष्टस्य वाधिष्ठानत्वं तदविशिष्टस्य वाधिष्ठानत्वमिति त्वदुक्तविकल्पदोषयोर्जगदुपादानकारणतया जगदारोपाधिष्ठानतया वाङ्गीकृतशून्यतत्त्वेऽपि सुवचत्वेन शून्यस्य सद्रूपस्यापि कारणत्वाधिष्ठानत्वयोरनापत्तेर्वक्तुमशक्यत्वात् । तथा(हि) सत्त्वविशि(ष्टस्य का-)ष्टे कारणत्वमुत तद्रहित(स्येति) इति विकल्पदोषयोः साम्येन सत एव कारणत्वमित्यपि सुवचत्वात् स्फुटैव व्याहतिः । तथा च सिद्धमपि दूषणासमर्थमुत्तरं जातिरित्युक्तजातिलक्षणे साधारणासाधारणरूपद्विविधसामर्थ्यमध्ये स्वव्याहतिरूपसाधारणसामर्थ्याक्रान्तत्वाज्जात्युत्तरमेवेदमिति भावः । असाधारणसामर्थ्यं च युक्ताङ्गहीनत्वमयुक्ताङ्गाधिक्यमविषयवृत्तित्वं चेति त्रिविधम् । तन्मध्ये द्वितीयमप्यस्तीत्याह **भेदस्य सत्तायाश्चेत्यादि** ।

**यादु०—** **सर्वस्यापीति** । भेदो दुर्ग्राह्य इति प्रतिज्ञाय तदुपपत्तये यदन्योन्याश्रयत्वमापादितं तत्तावत्स्वव्याघातकमिति 'किञ्च भेदः कथं ग्राह्यः' इत्यादिनोपपादितम् । यच्च भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थेत्युक्तं तदभेदस्याप्यभेदिभ्यामभेदान्तराङ्गीकारेऽनवस्थेत्यपि वक्तुं शक्यत्वात् स्वव्याघातकम् । तथा भिन्ने भेदनिवेशश्चेत्यादिकमपि स्वव्याघातकम् । अभेदोऽपि किमभिन्ने वर्तते उत तद्रहिते । आद्येऽपि तेनैवाभेदेनाभिन्नतायामात्माश्रयत्वम् । अभेदान्तराङ्गीकारे त्वनवस्था । द्वितीये तु घटपटयोरप्यभेदापत्तिरित्यपि वक्तुं शक्यत्वात् । तथा न तावत् प्रत्यक्षेण भेद एव दृश्यते, भेद इत्येव प्रतीतेरननुभवादित्यादिनोक्तमपि स्वव्याघातकम् । बिम्बप्रतिबिम्बयोर्न तावत्प्रत्यक्षेणाभेद एव दृश्यते । अभेद इत्येव प्रतीतेरननुभवात् । वस्तुनोऽपि प्रतीतौ न तावदभेदपूर्वं वस्तुप्रतीतिः उक्तदोषात् । नापि वस्तुप्रतीतिपूर्विकाऽभेदप्रतीतिः । भेदेन प्रतीतेऽभेदप्रतीतावतिप्रसक्तेः । न च युगपत् । अभेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वेन यौगपद्यायोगात् । न च प्रकारान्तरमस्तीति साम्यात् । तथा

सत्तावत्कारणं कारणे सत्ता वेत्यादिनोक्तमपि स्वव्याहतम् । असत्तावत्कारणं वा कारणेऽसत्ता वा । आद्ये कारणस्य सत्त्वम् । आत्माश्रयत्वप्रसङ्गेनासत्ताविशिष्टे असत्त्वाभावात् । द्वितीये तु सत एव कारणत्वम् । असत्त्वस्योपलक्षणत्वेन कारणकोटावप्रवेशादिति साम्यादिति सर्वस्यापि स्वव्याघातकत्वादित्यर्थः । असाधारणमयुक्ताङ्गाधिकत्वं चाह **भेदस्य सत्तायाश्चेति** ॥

**वं०प०— सर्वस्यापीति** । तथा हि । भेदस्याप्यभेदान्तराभेद्यत्वेऽनवस्था । तथाऽभिन्नेऽभेदनिवेशश्चे-त्तेनैवाभेदेनाभिन्नतायामात्माश्रयत्वम् । अभेदान्तराङ्गीकारेऽनवस्था । भिन्नेऽभेदनिवेशश्चेद्भिन्नयोरपि घटपटयोः परस्परमभेदापत्तिः । तथा न तावत्प्रत्यक्षेणाभेद एव दृश्यते । अभेद इत्येव प्रतीतेरभावात् । वस्तुनोऽपि प्रतीतौ न तावदभेदपूर्वं वस्तुप्रतीतिः । उक्तदोषात् । नापि वस्तुप्रतीतिपूर्विकाऽभेदप्रतीतिः । तर्हि तद्वस्तु आदौ भेदेनैव प्रतीयत इत्यायातम् । तथा च भेदेन प्रतीतेऽभेदप्रतीतावतिप्रसक्तेः । न च युगपत् । अभेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वेन यौगपद्यायोगात् । न च प्रकारान्तरमस्ति । तथाऽसत्ताविशिष्टं कारणम् । कारणेऽसत्ता वा । आद्येऽसत्ता विशिष्टेऽसत्ताया आत्माश्रयेणाभावात् सत एव कारणत्वम् । द्वितीयेऽसत्त्वस्योपलक्षणतया कारणे तन्नास्तीति प्राप्तम् । तथा च सत एव कारणत्वमित्येवं सर्वस्यापि स्वव्याघातकत्वाज्जात्युत्तरत्वमि-त्यर्थः । जात्युपयुक्तायुक्ताङ्गाधिकत्वं दर्शयति **भेदस्येत्यादि** ।

**कं०रा०—** ननु भेदस्यापि भेदान्तरभेद्यत्वे अनवस्थेत्यादि परकीयवचनस्य सर्वस्य कथं जात्युत्तर-मित्यत आह **सर्वस्यापीति** । पराभिमतस्याभेदस्याभेदान्तरमादाय अभिन्नत्वे अनवस्था । तथा अभिन्ने अभेद-निवेशश्च । एतेनैवाभेदेन अभिन्नतायामात्माश्रयत्वम् । भेदान्तराङ्गीकारे त्वनवस्था अभिन्ने अभेदनिवेशश्चेद्घटस्य पटाभेदापत्तिः । तथा न तावत्प्रमाणेनाभेद एव दृश्यते । अभेद इत्येव प्रतीतेरननुभवाद्वस्तुनोऽपि प्रतीतौ न ताव-दभेदप्रतीतिपूर्वकं वस्तुप्रतीतिरुक्तदोषात् । नापि वस्तुप्रतीतिपूर्वकमभेदधीः अभेदबुद्धिपूर्वकाले वस्तुनोऽभिन्नतया प्रतीतत्वावश्यम्भावात् भिन्नतया प्रतीते च वस्तुन्यभेदप्रतीतेरयोगात् । तथात्वेऽतिप्रसक्तेः । न च युगपद्वस्त्व-भेदयोः प्रतीतिः, अभेदबुद्धिं प्रति वस्तुबुद्धेर्मिथ्याज्ञानत्वेन कारणतया यौगपद्यायोगात् । न च प्रकारान्तर-मस्ति । तथा सत्त्वविशिष्टं कारणम् उत असत्त्वोपलक्षितं आद्ये विशेषणीभूतासत्त्वस्यापि कारणत्वादसत्त्वे चासत्त्वाभावेन तस्य सत्त्वात् सतः कारणत्वसिद्धिः । द्वितीये उपलक्षणस्याविद्यमानत्वावश्यम्भावेन असत्त्व-रहितस्यैव कारणत्वप्राप्तेः सत एव कारणत्वं सिद्धमित्यादेरपि वक्तुं शक्यत्वात् परकीयवचनस्य सर्वस्यापि स्वव्याघातकत्वमिति भावः । अनेन सिद्धमपि दूषणासमर्थमुत्तरं जातिरिति जातिलक्षणे दूषणासमर्थपदोक्तयोः साधारणासाधारणयोरसामर्थ्ययोर्मध्ये यत्सकलजातिसाधारणं स्वव्याहतिरूपमसामर्थ्यं प्रदर्शितं भवति । **भेद-स्येति** । भेदस्य भेदान्तरभेद्यत्वे अनवस्थेत्यादिकं सत्तावत्कारणं वा कारणे सत्ता वेति च वदता परेणायुक्ताया एव भेदसत्तयोर्वस्तुस्वरूपातिरिक्ततायाचङ्गीकृतत्वाच्च परोक्तीनां जात्युत्तराणीति भावः । अनेनायुक्ताङ्गाधिकत्व-रूपमसाधारणमसामर्थ्यं दर्शितम् ।

**शे०चं०**— असामर्थ्यविहीनस्य कथं जात्युत्तरत्वमित्यतः साधारणासामर्थ्यसद्भावादित्याह **सर्वस्यापीति**। तत्रान्योन्याश्रयत्वापादनस्य पूर्वोत्तरविरुद्धत्वमाकर एव स्पष्टम् ॥ यच्च धर्मभेदवादे भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थापादनं तदप्यभेदस्याप्यभेदिभ्यामभेदान्तरस्याङ्गीकारेऽनवस्थाप्रसञ्जनस्य समानत्वात् स्वव्याघातकमेव । **यच्च** भिन्ने भेदनिवेशश्चेदित्यादिकमात्माश्रयत्वादिप्रसञ्जनं तदप्यभेदः किमभेदवति वर्तते उत तद्रहिते । आद्येऽपि तेनैवाभेदेनाभिन्नतायामात्माश्रयत्वम्, अभेदान्तराङ्गीकारे त्वनवस्था । द्वितीये तु घटस्य घटेनेव पटेनाप्यभेदापत्तिरित्यात्माश्रयत्वादिप्रसञ्जनसाम्यात् स्वव्याघातकम् । यच्च न तावत्प्रत्यक्षेण भेद एव प्रतीयते भेद इत्येव प्रतीतेरननुभवादित्यादि प्रत्यक्षस्य भेदग्राहकत्वखण्डनं तदपि बिम्बप्रतिबिम्बयोर्न तावदभेद एव प्रत्यक्षेण दृश्यते । अभेद इत्येव प्रतीतेरननुभवात् । वस्तुनोऽपि प्रतीतौ न तावदभेदपूर्वं वस्तुप्रतीतिः उक्तदोषत्वात् । नापि वस्तुप्रतीतिपूर्विकाऽभेदप्रतीतिः, भेदेन प्रतीतेऽभेदप्रतीतावतिसक्तेः । न च युगपत्; अभेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वेन तदयोगात् । न च प्रकारान्तरमस्तीति त्वदभिप्रेताया अभेदस्य प्रत्यक्षताया अपि निराकरणसाम्यात् स्वव्याघातकम् । यच्च सत्तावत्कारणं नेत्यादिनोक्तं तदप्यसत्त्वविशिष्टं कारणं वा तदुपलक्षितं वा । आद्ये कारणस्य सत्त्वमात्माश्रयप्रसङ्गेनासत्त्वविशिष्टेऽसत्त्वाभावात् । द्वितीये तु सत एव कारणत्वमसत्त्वोपलक्षितमसत्त्वरहितं कारणमिति त्वयैवाङ्गीकारादित्यपि प्रत्यवस्थानसाम्यात् । **स्वव्याघातकत्वादिति** । सर्वस्याप्युत्तरस्य स्वव्याघातकत्वादित्यर्थः । असाधारणमसामर्थ्यमप्याह **भेदस्य सत्तायाश्चेति** ।

**वा०र०**— सर्वस्यापीत्यनेन अन्योन्याश्रयत्वापादनस्यापि सङ्ग्रहादाह **तत्रान्योन्येति** । **स्पष्टमिति** । किञ्च भेद इत्यादिना तदुपपादनात् अनुव्याख्यान इत्याशयः । अथ परेण भेदपक्षेऽभिहितदूषणानि समन्यायतया अभेदपक्षेऽप्युपपादयन् स्वव्याघातमुपपादयति **यच्च धर्मभेदवादे**त्यादिना **स्वव्याघातकत्वादित्यर्थ** इत्यन्तेन ।

**स०व्र०**— **सर्वस्यापीति** । अभिन्ने अभेदनिवेशश्चेत् असतोऽपि घटस्याभेदापत्तिरिति । तथा अभेदप्रमाणेन अभेद एव न दृश्यते । अभेद इत्यप्रतीतेः । वस्तुनोऽपि प्रतीतौ न तावदभेदपूर्वं वस्तुप्रतीतिः ।

**विठ्ठ०**— **सर्वस्यापीति** । भेदत्वप्रतीतेरन्योन्याश्रयतया दुर्ग्रहत्वस्य भेदप्रतीत्यङ्गीकारपर्यवसानेन स्वव्याहतत्वं प्रागुपपादितम् । यदपि 'भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थे'त्युक्तम्, तदपि वादिप्रतिवादिनो दूष्यदूषकयोरापाद्यापादकयोर्भेदस्य परेणाप्यवश्यमङ्गीकार्यत्वेनानवस्थादिसाम्यात् स्वव्याघातकम् । अनयैव रीत्योत्तरत्रापि स्वव्याहतिर्द्रष्टव्या । अथवा पराङ्गीकृताभेदभेदस्याप्यभेदान्तराङ्गीकारेऽनवस्थेत्यपि वक्तुं शक्यत्वात् स्वव्याघातकम् । यदपि 'भिन्ने भेदनिवेशश्चे'त्यादि तदपि अभिन्ने भेदनिवेशश्चेत्तेनैवाभेदेनाभिन्नतया आत्माश्रयत्वम् । अभेदाङ्गीकारेऽनवस्थापि वक्तुं शक्यत्वात् 'भिन्ने अभेदनिवेशश्चेद्घटयोरप्यभेदापत्तिरि'ति वक्तुं शक्यत्वाद्व्याघातम् । यच्च तथा न तावत्प्रत्यक्षेण भेदो दृश्यत इत्यादि तदपि बिम्बप्रतिबिम्बयोर्न तावत् प्रत्यक्षेणाभेदो दृश्यते । अभेद इत्येव प्रतीतेरननुभावात् । वस्तुनोऽपि प्रतीतौ न तावदभेदपूर्वं वस्तुप्रतीतिरुक्तदोषात् नापि वस्तुप्रतीतिपूर्विका अभेदप्रतीतिः, भेदेन प्रतीते अभेदेन प्रतीतावतिप्रसक्तेः । न च युगपत् ।

भेदप्रतीतिं प्रति वस्तुप्रतीतेः कारणत्वेन यौगपद्यायोगात् । न च प्रकारान्तरमस्तीत्यादि साम्यात् तथा सत्तावत्कारणं कारणे सत्ता वेत्यादिनोक्तमपि स्वव्याहतम् । जगदारोपाधिष्ठानत्वेन शून्यस्य वा ब्रह्मणो वा कारणत्वमिति पक्षेऽपि किं सत्तावज्जगदधिष्ठानम्, अधिष्ठाने सत्ता वा । आद्ये अधिष्ठानस्यासत्त्वम् । द्वितीये त्वसत एवाधिष्ठानत्वमित्यपि वक्तुं शक्यत्वात् । तदुक्तं न्यायामृते 'अन्तर्भावितसत्त्वं चेदधिष्ठानमसत् ततः । नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्तत' इति सिद्धमपि दूषणासमर्थमुत्तरं जातिः । असामर्थ्यं च द्विविधम् । साधारणमसाधारणं च । साधारणं स्वव्याहतिः । आसाधारणं युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वादिकम् । तत्र साधारणमुक्त्वा असाधारणमयुक्ताङ्गाधिकत्वं चाह **भेदस्य सत्तायाश्चेति** ।

**॥ इति 'एतादृशस्य' इत्यनुव्याख्यानस्थपदस्य पूर्वोत्तरत्रोक्तानां सर्वेषां विषयवचनानां समानदोषप्रदर्शनार्थता सोपपत्तिका ॥**

* * *

**॥ अथ च तत्रान्ते उक्तस्य जातिदोषस्य अन्तर्भाव्यविभागानां प्रदर्शनम् ॥**

५६ **सु०— कतमेयं जातिरिति चेन्न; सामान्यलक्षणसद्भावेऽस्य निर्बन्धस्य व्यर्थत्वात्, अहेतुप्रसङ्गनित्यसमास्वन्तर्भावाच्च ।**

**परि०—** ननु साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदभिन्नासु चतुर्विंशतिजातिषु मध्ये क्वान्तर्भावोऽस्येति पृच्छति **कतमेति** ॥ **अहेतुप्रसङ्गनित्यसमास्विति** । समपदं प्रत्येकमन्वेति । यदि धर्म्यादिप्रतीत्यपेक्षया भेदः प्रतीयते तदा अन्योन्याश्रयमि(तिआद्यापा)त्यापादने तु 'यद्धर्म्यादिबुद्धेरहेतुत्वचोदनम्' तथा 'न तावत्प्रत्यक्षेणे'त्यादिना यद्वस्तुप्रतीतेर्भेदधीरूपसाध्यं प्रति पूर्वापरसहभावविकल्पेनाहेतुत्वचोदनं तदुभयमहेतुसमायामन्तर्भवति । हेतोः साध्यापेक्षया पूर्वापरसहभावनिरासेनाहेतुत्वचोदनमहेतुसम इति तल्लक्षणात् । उक्तं हि । 'हेतोर्विकल्पसाध्यार्थपूर्वापरसहोदयम् । त्रेधापि तस्य हेतुत्वभङ्गो हेतुसमो भवेदि'ति । अन्योन्याश्रयत्वापादनरूपाद्यपक्षेऽपि भेदधियं विना धर्म्यादिधीर्न युक्तेति वदतो भेदधियं प्रति धर्म्यादिबुद्धेः पूर्वापरसहभावनिरासस्याभिप्रेतत्वात् । यदपि भेदस्यापीत्यादिनानवस्थापादनं तत्प्रसङ्गसमायामन्तर्भवति । अनवस्थाभासप्रसञ्जनं प्रसङ्गसम इति तल्लक्षणात् । 'अनवस्थाभासवाचः प्रसङ्गसमजातिते'त्युक्तेः । भिन्ने भेदनिवेश इत्युक्तानवस्थापि प्रसङ्गसमा जातिरेव । यदपि सत्तावत्कारणं वे(त्यादि)ति विकल्पेन दोषाभिधानं तस्यायं फलितार्थः । सत्ता सत्तावती न वा । आद्यस्यात्माश्रयत्वापसिद्धान्तयो-

रापत्तेरयोगेन सत्ताया असत्त्वापत्त्या न कारणस्य सत्तावैशिष्ट्यमिति । द्वितीयेऽपि सत्ताया असत्त्वापत्त्या न कारणं सत्ताविशिष्टमिति । तथा च सत्तारूपधर्मस्य तदतद्रूपविकल्पानुपपत्त्या कारणाख्यधर्मिणः सत्ताविशिष्टत्वभङ्गोक्त्या नित्यसमान्तर्भावो व्यक्त एवेति ।

**यादु०— सामान्यलक्षणेति** । स्वव्याघातकमुत्तरं जातिरिति सामान्यलक्षणसद्भाव इत्यर्थः । **अहेतुप्रसङ्गेति** । भेदप्रतीतावन्योन्याश्रयत्वापादनं यत्, तत् तावदहेतुसमान्तर्भूतम् । साधनस्य साध्यार्थापेक्षया पूर्वभावमङ्गीकारयित्वा साध्यस्यापि साधनापेक्षया पूर्वभावमुपपाद्य, अन्योन्याश्रयत्वापादनेनाहेतुत्वचोदनमहेतुसम इति तल्लक्षणस्यात्र सत्त्वात् । धर्म्यादिप्रतीतिरूपसाधनस्य भेदप्रतीतिरूपसाध्यापेक्षया पूर्वभावोऽवश्यमङ्गीकार्यः । अन्यथा साधनत्वासम्भवात् । न च तत् सम्भवति । भेदप्रतीतिरूपसाध्याभावे धर्म्यादिप्रतीतिरूपसाधनस्याप्यसम्भवात् । ततश्चान्योन्याश्रयत्वापत्त्या न भेदो गृहीतुं शक्य इति त्वयोक्तत्वात् । न च 'हेतोर्विकल्प्य साध्यार्थपूर्वापरसहोदयम् । त्रेधाऽपि तस्य हेतुत्वभङ्गो हेतुसमो भवेदि'ति हेतोस्त्रैकाल्यासिद्धेरेव तल्लक्षणतयाऽभियुक्तैरुक्तत्वात् कथमेतदिति वाच्यम् । तत्र हेतोः साध्यसहभावपश्चाद्भावपक्षयोः अहेतुत्वाभिधानस्यैतज्जात्यारोप्यान्योन्याश्रयत्वापादनानुपपादकतया हेतोः पूर्वभाव एव स्वीकार्य इत्यस्योपपादनार्थमेवोक्तत्वेन लक्षणान्तर्गतत्वेनानभिप्रेतत्वात् । तथा च पूर्वोक्तलक्षणमेवैतल्लक्षणप्रणेतॄणामभिप्रेतमिति काऽत्र कथन्ता । नन्वयुक्तमेव साध्यस्य पूर्वभावमुपपाद्य अन्योन्याश्रयत्वापादनमेतज्जातिलक्षणान्तर्गतम् । अन्यथा सदुत्तरान्योन्याश्रयत्वापादनस्याप्येतज्जातिरूपतापत्तेः । न च प्रकृते भेदप्रतीतिरूपसाध्यस्य धर्म्यादिप्रतीतिरूपसाधनापेक्षया पूर्वभावोऽयुक्तः । भेदस्याप्रतीतावस्यामुष्मादिति वैलक्षण्येन धर्म्यादिप्रतीतेरेवासम्भवादित्युक्तत्वात् । तथा च कथमिदमहेतुसमान्तर्भूतमिति चेन्न । भेदस्य धर्मिस्वरूपताया उपपादितत्वेन धर्मिप्रतीतेरेव भेदप्रतीतितया त्वयोपपादितस्यापि भेदप्रतीतेर्धर्मिप्रतीत्यपेक्षया पूर्वभावस्यायुक्ततमत्वात् । अस्यामुष्मादिति वैलक्षण्यप्रतीतेश्च प्रकारान्तरेणोपपादितत्वात् । तदिदमुक्तं 'भेदस्य स्वरूपातिरिक्तताया अयुक्ताया एवाङ्गीकारादि'ति । तस्मान्न किञ्चिदत्रानुपपन्नमिति । भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थेत्यापादनं तु प्रसङ्गसमान्तर्भूतम् । 'अनवस्थाभासवाचः प्रसङ्गसमजातिते'त्युक्तत्वात् । न च 'सिद्धे दृष्टान्तहेत्वादौ साधनप्रश्नपूर्वकमि'ति पूर्वभागस्यात्राभावात् कथमेतदिति वाच्यम् । तस्य स्फुटप्रतीत्यर्थत्वेन लक्षणशरीरानन्तर्गतत्वात् । अन्यथाऽननुगमापत्तेः । अत एव पद्धतौ 'अनवस्थाभासप्रसञ्जनं प्रसङ्गसम' इत्येवोक्तम् । यच्च भिन्ने भेदनिवेश इत्याद्यसत एव कारणत्वमित्यन्तं खण्डनत्रयं तन्नित्यसमान्तर्भूतम् । तथाहि । 'धर्मस्य तदतद्रूपविकल्पानुपपत्तितः । धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेदि'ति हि तल्लक्षणम् । अत्र चाद्ये खण्डने प्रपञ्चो भिन्न इत्युक्ते भेदरूपधर्मस्य भिन्नाश्रितत्वाभिन्नाश्रितत्वविकल्पानुपपत्त्या प्रपञ्चरूपधर्मिणस्तद्विशिष्टत्वभङ्गाभिधानात् । द्वितीये तु भेदप्रतीतौ वस्त्वपि प्रतीयत इत्युक्ते न तावद्भेदपूर्वं वस्तुप्रतीतिरित्यादिविकल्पानुपपत्त्या भेदप्रतीतिरूपधर्मिणो वस्तुविषयकत्वरूपधर्मवैशिष्ट्यभङ्गाभिधानात् । तृतीयेऽपि सद्बीजादिकारणमित्युक्ते सत्तारूपधर्मस्य विशेषणत्वोपलक्षणत्वविकल्पानुपपत्त्या धर्मिणो बीजादेस्तद्वैशिष्ट्यभङ्गाभिधानादिति ।

**कं०रा०— कतमेति** । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदेन चतुर्विंशतिप्रकाराणां जातीनां मध्ये कस्यां जातौ परोक्तिरन्तर्भवतीत्यर्थः । **सामान्यलक्षणेति** । सिद्धमपि दूषणासमर्थमुत्तरं जातिरिति जातिसामान्यलक्षणस्य परोक्तौ सत्त्वेन तस्या जातित्वे सिद्धे तत एव परस्य निगृहीततया जातिविशेषान्तर्भावप्रयासस्य व्यर्थत्वेन तत्प्रश्नस्यैवायोगादिति भावः । सिद्धमपि दूषणासमर्थमुत्तरं जातिरित्यत्र सिद्धमिति विशेषणं छलोत्तरव्यवच्छेदार्थम् । तथाहि आढ्योऽयं नवकम्बलत्वादिति केनचिदुक्ते नूतनत्वपरस्य नवशब्दस्य सङ्ख्याविशेषपरत्वं परिकल्प्य कुतोऽस्य नवकम्बलाः प्रत्यक्षविरुद्धत्वादिति छलवादी दूषयति । छलवादिनो हि नवकम्बलवत्त्वं न साध्यसाधकमसिद्धत्वादिति विवक्षितं तत्रासिद्धत्वादिति छलोत्तरात्मकत्वहेतोर्वाद्यभिप्रेतनवकम्बलत्वरूपपक्षवृत्तित्वाभावेनासिद्धत्वात् सिद्धत्वविशेषणेन भवति तद्व्यवच्छेदः । दूषणासमर्थमिति विशेषणं तु सदुत्तररूपहेत्वाभासव्यवच्छेदार्थमिति द्रष्टव्यम् । जातिसामान्यलक्षणलक्षिताया अपि परोक्तेः परिगणितजातिविशेषान्तर्भावाभावे जातित्वं दुर्लभं स्यादित्यतोऽन्तर्भावमाह **अहेत्विति** । यत्तावद्भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थेत्युक्तं तत्रेदं पर्यवसितं भेदस्यापि भिन्नत्वव्यवहारोत्पादकं भेदान्तरं वाच्यं तस्यापि तदुत्पादकं भेदान्तरं वाच्यमित्येवमनवस्था स्यादिति । तच्चानवस्थाप्रसञ्जनं सिद्धस्यापि पक्षादेरुत्पादकज्ञापकानवस्थाप्रसञ्जनं प्रसङ्गसम इति प्रसङ्गसमजातिलक्षणलक्षितत्वात् तत्रान्तर्भवति । यच्च भिन्नभेदनिवेशश्चेतनैव भेदेन भिन्नतायामात्माश्रयत्वापत्त्या भेदान्तरेण भिन्नत्वं वाच्यम् । तथा च अनवस्थेत्युक्तं तत्रेदं पर्यवसितं भेदस्थितिकारणं भेदान्तरविशिष्टं वस्त्विति वाच्यम् । तद्भेदस्थितिकारणमपि भेदान्तरविशिष्टमिति वाच्यमित्येवं स्थितिकारणभेदानवस्थेति तदप्यनवस्थाप्रसञ्जनं पूर्वोक्तजातावन्तर्भवति । तल्लक्षणमुत्पादकशब्देन स्थितिकारणस्यापि गृहीतत्वात् । यदपि न तावद्भेदप्रतीतिपूर्वकं वस्तुप्रतीतिरित्याद्युक्तं तत्रेदं पर्यवसितं भेदप्रतीतेर्वस्तुज्ञानात्पूर्वभावस्तावन्न सम्भवति । भेद इत्येव प्रतीतेरननुभवान्नापि पश्चाद्भावः भेदप्रतीतिपूर्वकाले वस्तुप्रतीतेरभेदविषयत्वावश्यम्भावेनाभेदेन प्रतीते वस्तुनि भेदबुद्धेरयोगात् तथात्वेऽतिप्रसक्तेः । न च वस्तुभेदयोर्युगपत्प्रतीतिः यौगपद्ये वस्तुप्रतीतेर्भेदबुद्धिं प्रत्यहेतुत्वापत्तेरिति । एतच्च अहेतुसमजातावन्तर्भवति । हेतोः साध्यपूर्वापरसहभावनिरासेन अहेतुत्वचोदनमहेतुसम इति तल्लक्षणलक्षितत्वात् । यच्चान्यदुक्तं सत्तावत्कारणं वेत्यादि तस्य कारणतायाः सत्तागतत्वतदगतत्वविकल्पानुपपत्त्या सतः कारणत्वभङ्गपर्यवसिततया विवक्षितस्य कस्यचिद्धर्मस्य तद्रूपतां विकल्प्य तद्दूषणेन धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमजातिलक्षणलक्षितत्वात् तत्रान्तर्भाव इति भावः । न च वाच्यं कारणत्वस्य विशेषणीभूतसत्तागतत्वपक्षे सत्तायां सत्ताविरहेण असतः कारणत्वलाभेऽपि सतो विशेष्यस्य कारणत्वेन धर्मिणस्तद्विशिष्टत्वभङ्गाभावान्न नित्यसमान्तर्भाव इति । सदेव कारणमिति सन्मात्रवृत्तित्वेन सिद्धान्तिना विवक्षितस्य कारणत्वस्य यद्वैशिष्ट्यं तस्य तस्मिन्नपि पक्षे भग्नतया नित्यसमान्तर्भावोपपत्तेरिति ।

**शे०चं०— सामान्यलक्षणेति** । स्वव्याहतमुत्तरं जातिरिति जातिसामान्यलक्षणेत्यर्थः । अजातित्वे जातिसामान्यलक्षणस्य तत्रातिव्याप्तिः स्यादिति भावः ॥ **अहेतुप्रसङ्गनित्यसमास्विति** । अयमाशयः । भेदो

विशेष्यधर्म्यादीत्यादिना शङ्कितस्यान्योन्याश्रयत्वप्रसञ्जनस्याहेतुसमायामन्तर्भावः । यद्यपि यत्र साधनस्य साध्यापेक्षया पूर्वापरसहभावनिरासेनाहेतुत्वचोदनम् अन्योन्याश्रयत्वं चारोप्यं तत्रैवाहेतुसमप्रवृतिः । यथा धूमवत्त्वज्ञानमग्निमत्त्वज्ञानात् किं पूर्वभावि, उत अनन्तरभावि, उत सहभावि । नाद्यः । साध्याभावे तस्य साधनत्वायोगात् । न द्वितीयः । साधनाभावे च साध्यस्य तत्त्वायोगात् । न तृतीयः । अविशेषेण साध्यसाधनभावायोगादिति । अत्र तु साधनस्य साध्यात्पूर्वापरसहभावनिरासेनाहेतुत्वाचोदनात् । अन्योन्याश्रयत्वस्य प्रसञ्जनीयत्वेन तस्यात्रारोप्यत्वाभावाच्चास्य नाहेतुसमायामन्तर्भावः । तथाऽप्यत्र तथा प्रसञ्जनस्याप्रवृत्तावपि तादृशप्रसञ्जनप्रवृत्तियोग्यत्वमकुण्ठितमेव । तत्रेवेहापि साधनं धर्म्यादिज्ञानं साध्याद्भेदज्ञानात् किं पूर्वभावि, किं वाऽन्तरभावि किं वा सहभावि । नाद्यः । कार्याभावे तस्य कारणत्वायोगात् । न द्वितीयः । कारणाभावे कार्यस्य तत्त्वायोगात् । न तृतीयः । अविशेषेण साध्यसाधनभावायोगादिति कारणीभूतधर्म्यादिज्ञानस्य कार्यभूतभेदज्ञानात्पूर्वापरसहभावनिरासेनाहेतुत्वप्रसञ्जनस्य तत एवान्योन्याश्रयत्वस्य तत्रारोप्यतायाश्च वर्णयितुं शक्योपपादनमेवेत्याशयात् । धर्मभेदवादे भेदस्य भेदान्तरभेदत्वेऽनवस्थापादनस्य तु प्रसङ्गसमायामन्तर्भावः । अनवस्थाभासप्रसञ्जनस्यैव प्रसङ्गसमत्वात् । अज्ञायमानानामेव भेदानां प्राथमिकभेदप्रतीतिरूपमूलक्षतेरभावेन प्रकृतानवस्थाया वस्तुतोऽनवस्थात्वानुपपत्त्या तदाभासत्वावश्यम्भावेन तत्प्रसञ्जनस्याप्यनवस्थाभासप्रसञ्जनत्वसम्भवात् । यद्यप्यत्र तेनैव भेदेन भेद्यत्वे आत्माश्रयत्वप्रसञ्जनमेवास्ति न त्वनवस्थाप्रसञ्जनं, तथाऽपि तेनैव भेदेन भेद्यताया आत्माश्रयप्रसञ्जकत्वेन प्रकृते आश्रयणायोगात् । भेदान्तरभेद्यत्वमेव त्वया वाच्यम् । तथा चानवस्थेत्यत्र प्रवृत्तिप्रकाराश्रयणेऽस्त्येवानस्थाभासप्रसञ्जनत्वमित्याशयात् । भिन्ने भेदनिवेश इत्यादिदूषणस्यापि प्रसङ्गसमायामन्तर्भावः । भेदान्तरभिन्ने भेदवृत्तावनवस्थाप्रसञ्जनात् । यद्यपि चात्र तेनैव भिन्नत्वे आत्माश्रयत्वप्रसञ्जनम् । अभिन्ने भेदनिवेशश्चेत् स्वतोऽपि भेदापत्तिप्रसञ्जनं चास्ति न त्वनवस्थाप्रसञ्जनम् । तथाऽप्यभिन्ने भेदनिवेशस्य स्वतोऽपि भेदापत्तिप्रसञ्जकतया तेनैव भेदेन भिन्ने भेदनिवेशस्यात्माश्रयत्वप्रसञ्जकतया परेण वक्तुमशक्यत्वाद्भेदान्तरभिन्न एव भेदनिवेशो वाच्यः । तथा चानवस्था स्यादिति अत्रैतद्दूषणप्रवृत्तिप्रकाराश्रयणेऽस्त्येवानवस्थाभासप्रसञ्जनत्वमित्याशयात् । प्रत्यक्षं किं भेदमेव गोचरयेदित्यादिदूषणस्याप्यहेतुसमायामन्तर्भावः । यद्यप्यत्र साधनस्य साध्यात्पूर्वापरसहभावनिरासेनाहेतुत्वप्रसञ्जनाभावान्नास्याहेतुसमायामन्तर्भावः सम्भवति, तथाऽप्यत्र प्रत्यक्षसिद्धधर्मिप्रतियोगिरूपवस्तुज्ञानं भेदज्ञानात्पूर्वभावि किं वा सहभावि । नाद्यः । साध्याभावे तस्य साधनत्वायोगात् । न द्वितीयः । साधनाभावे साध्यस्य तत्त्वायोगात् । न तृतीयः । अविशेषेण साध्यसाधनभावायोगादित्येतद्दूषणप्रवृतिप्रकाराश्रयणे साधनस्य साध्यात्पूर्वापरसहभावनिरासेनाहेतुत्वप्रसञ्जनत्वमस्त्येवेत्याशयात् । सत्तावत्कारणमित्यादिदूषणस्य नित्यसमायामन्तर्भावः । यद्यपि 'धर्मस्य तदतद्रूपविकल्पानुपपत्तितः । धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेदि'ति नित्यसमलक्षणमिह यथाश्रुते नास्तीति नास्य तत्रान्तर्भावो वक्तुं युक्तः । तथाऽपि सत्तावत्कारणमित्यादेः सत्तारूपधर्मस्य कारणत्वमस्ति न वा । आद्येऽसदपि कारणम् । सत्तायाः सत्ताविरहेणासत्त्वात् । द्वितीये सत्ताया सदाकारप्रत्ययोऽपि न जननीय इति तन्मात्रप्रमाणायाः सत्ताया विलोपे सर्वं कारणमसदेवेति प्राप्तमित्यभिप्रायकत्वात् । सत्त्वरूपधर्मस्य कारणत्वाकारणत्वविकल्पानुपपत्त्या

धर्मिणः कारणीभूतबीजादेः सत्तावैशिष्ट्यभङ्गप्रसक्त्या नित्यसमत्वमस्त्येवेत्याशयात् । सम्मतश्चायं प्रकारो ग्रन्थकारस्य यत्, यथाश्रुतप्रकारेण तस्य तस्य दूषणस्य तत्र तत्र जातावन्तर्भावासम्भवेऽप्युक्तरीत्या तत्र तत्र प्रवृत्तिप्रकारान्तराश्रयणे तस्य तस्य तत्रान्तर्भावोऽस्त्येवेति । अत एव कतमेयं जातिरिति प्रश्नोऽन्तर्भावश्चेति परिहारश्च श्लिष्टौ । अन्यथा तदसामञ्जस्यप्रसङ्गात् । अत्र च टीकायां यथायोगमिति पूरणान्न काचित्कुसृष्टिरिति ध्येयम् ।

**वा०र०**— परोक्तदूषणानां जातिष्वन्तर्भावं वक्तुं यथाश्रुतेऽन्तर्भावानुपपत्तिमाशङ्क्य पर्यवसानान्तराश्रयणेन तत्तज्जातौ तस्य तस्यान्तर्भावमुपपादयति **अयमाशय** इत्यादिना **न काचित् कुसृष्टिरित्यवधेयमि**त्यन्तेन ।

**स०व्र०**— (....ग्रन्थपातः) **अहेतुप्रसङ्गनित्यसमास्विति** । अनवस्थाभासप्रसञ्जनमिति लक्षणे अनवस्थाशब्दस्य आत्माश्रयोपलक्षणत्वेन तत्प्रसञ्जनस्यापि प्रसङ्गसमत्वात् । तेनैव भेदेन भिन्नतायामात्माश्रयत्वमित्याद्यात्माश्रयापादनस्यापि प्रसङ्गसमायामेवान्तर्भावः । सत्तावत्कारणमित्यादेश्च 'धर्मस्य तदतद्रूपे'-त्याद्युक्तलक्षणस्य नित्यसमायामन्तर्भावः । 'हेतोः साध्यापेक्षया पूर्वभावित्वादि'ति तल्लक्षणे हेतुसाध्यपदयोः कार्यकारणमात्रोपलक्षणत्वात् । भेदपूर्वं वस्तु गोचरयेदित्यादेः अहेतुसमेऽन्तर्भाव इति बोध्यम् ॥

**विठ्ठ०**— जातेश्चतुर्विंशतिप्रभेदभिन्नत्वात् तन्मध्ये अस्याः कुत्रान्तर्भाव इत्याशङ्क्योत्तरमाह **कतमेति** । **अहेतुप्रसङ्गनित्यसमास्विति** । तत्र तावद्धर्म्यादिप्रतीतिर्भेदप्रतीतौ साधनम्, भेदप्रतीतिश्च धर्म्यादिप्रतीतिसाधनमित्यन्योन्याश्रयत्वमित्यापादनस्य वस्तुनोऽपि प्रतीतौ न तावद्भेदपूर्वं वस्तुप्रतीतिरुक्तदोषादित्यारभ्य, न च प्रकारान्तरमस्तीत्यन्तस्य चाहेतुसमान्तर्भावः । हेतोः साध्यात्पूर्वापरसहभावनिरासेनाहेतुत्वचोदनमहेतुसम इति तल्लक्षणसद्भावात् । न चैवं सत्यन्योन्याश्रयापादनं सर्वत्राप्ययुक्तं स्यात् । अहेतुसमजातित्वप्रसङ्गादिति वाच्यम् । अत्र भेदस्य धर्मिस्वरूपताया उपपादितत्वेन धर्मिप्रतीतेरेव भेदप्रतीतितया भेदप्रतीते धर्मिप्रतीत्यपेक्षया पूर्वापरादिभावस्य युक्तत्वेनात्रायुक्ताङ्गाधिकत्वस्य स्वव्याहतेश्चोपपादितत्वेन जातिलक्षणसद्भावादस्य जातित्वमेव । न चैवं सर्वत्रेत्यदोष इति । भेदस्यापि भेदान्तरभेद्यत्वेऽनवस्थेत्यापादनं 'भिन्ने भेदनिवेशे'त्युक्तानवस्थापादनं च प्रसङ्गसमान्तर्भूतम् । 'अनवस्थाभासप्रभञ्जनं प्रसङ्गसम' इति तल्लक्षणस्य सत्त्वात् । तथा 'न तावत्प्रत्यक्षेण भेदो दृश्यत' इत्यादेः 'सर्वस्य भिन्नभेदनिवेशश्चेदि'त्युक्तस्य नित्यसमान्तर्भावः । विवक्षितस्य कस्यचित् तद्धर्मस्य तदतद्रूपतां विकल्प्य तद्दूषणेन धर्मिणस्तद्विशिष्टत्वभङ्गाभिधानान्नित्यसमत्वम् । 'न तावत्प्रत्यक्षेणे'त्यादावपि भेदप्रतीतौ वस्त्वपि प्रतीयत इत्युक्ते 'न तावद्भेदपूर्वं वस्तुप्रतीतिरि'त्यादिविकल्पानुपपत्त्या प्रभेदप्रतीतिरूपधर्मिणो वस्तुविषयकत्वरूपधर्मवैशिष्ट्यभङ्गाभिधानात् । सत्तावत्कारणमित्यादौ च सत्तारूपधर्मस्य विशेषणत्वोपलक्षणत्वविकल्पानुपपत्त्या कारणस्य बीजादेर्धर्मिणस्तद्वैशिष्ट्यभङ्गाभिधानमिति ।

**॥ इति उक्तस्य जातिदोषस्य अन्तर्भाव्यविभागानां प्रदर्शनम् ॥**

**॥ इति उक्तमाध्यमिकमतैकदेशविषयातिदेशेन तन्मतान्यदेशविषयस्यापि जात्युत्तरता ॥**

**॥ इति अस्य दूषणान्तरस्य जात्युत्तरत्वकथनसहितः दूष्यत्वेनोक्तविषय-सदृशान्यविषयेष्वपि तद्दोषस्यातिदेशः ॥**

**॥ इति उक्ते अन्योन्याश्रयत्वप्रसङ्गे दूषणान्तरप्रतिज्ञानम् ॥**

**॥ इति विश्वमिथ्यात्वोक्तानुमानानुग्राहकत्वेन सत्यत्वप्रत्यक्षप्रतिकूलत्वेन चोत्प्रेक्षितस्य अन्योन्याश्रयताहेतोर्दुर्ग्राह्यत्वरूपस्य तर्कस्य निरूपणपूर्वकं निराकरणम् ॥**

**॥ इति प्रकारान्तरेणाप्येतदधिकरणीयचतुर्थसूत्रव्याख्यानम् (विश्वमिथ्यात्वेऽभिहितानुमानदूषकत्वेन) ॥**

**॥ इति उक्तार्थस्य सर्वस्य व्याहतत्वशङ्कायाः निरासः (एतदधिकरणीयतृतीयचतुर्थसूत्रयोर्व्याख्यानम्) ॥**

**॥ इति उक्तार्थस्य सर्वस्य व्याहतत्वशङ्का तन्निरासश्च ॥**

**॥ इति उपन्यस्तस्य माध्यमिकमतस्य निरसनम् ॥**

* * *

**॥ अथ च उक्तेन माध्यमिक-शून्यवादनिरासेन मायावादस्यापि निरस्तत्वकथनम् ॥**

**अथ तत्र 'मायी' इत्यनुव्याख्यानस्थपदस्य व्याकरणदृष्ट्या साधुताप्रदर्शनम् ॥**

## ५७ सु०— मायाशब्दस्य व्रीह्यादित्वान्मायीति साधुः ।

**परि०**— ननु 'अस्मायामेधास्रजो विनिरि'ति मायाशब्दान्मत्वर्थविनिप्रत्ययोक्तेर्मायावीति वाच्यं कथं मायीतीन्प्रत्ययः । 'अत इतिठनावि'त्यकारान्तादेव इनो विधानेन प्राप्त्यभावाच्चेत्यत आह **मायाशब्दस्येति** । 'व्रीह्यादिभ्यश्चे'ति सूत्रे व्रीह्यादिभ्य इनिप्रत्ययविधानात् मायाशब्दस्य व्रीह्यादिगणे पठितत्वात् इन्प्रत्यये 'यस्येति चे'त्यकारलोपे मायीति साधुरित्यर्थः ॥

**यादु०**— मायीतिशब्दस्य साधुत्वं पूर्वोक्तं स्मारयति **मायाशब्दस्येति** ।

**वं०प०**— ननु 'अत इनिठनावि'त्याकारान्तादेव इनेर्विधानात् मायाशब्दस्य च आकारान्तत्वात् कथमतदन्तादिनिरित्यत आह **मायेति** । व्रीह्यादिगणे आकारान्तादपीनिरस्ति । वनमालीति दर्शनादित्यर्थः ।

**कं०रा०**— ननु मायाशब्दस्य अदन्तत्वाभावेन 'अत इनि ठनावि'ति इनिप्रत्ययाप्राप्तेर्मायीतिशब्दः कथं साधुरित्यत आह **मायाशब्दस्येति** । 'व्रीह्यादिभ्यश्चे'ति व्रीह्यादिभ्य इनिप्रत्ययस्य विहितत्वात् मायाशब्दस्य च व्रीह्यादित्वेन इनिप्रत्ययप्राप्तेर्मायीतिशब्दः साधुरिति भावः ।

**श्रीनिधि०**— ननु 'अत इनिठनावि'त्यत्र तपरकरणात् 'माया'शब्दस्य च आकारान्तत्वात् कथं 'इनि'प्रत्यय इत्यत आह **व्रीह्यादित्वादिति** । व्रीह्यादेराकृतिगणत्वादिति भावः ।

**शे०चं०**— ननु 'अस्मायामेधास्रजो विनिरि'ति मायाशब्दाद्विनिप्रत्ययस्मरणात्, तस्मिन्सति मायावीति भवितव्यं मायीति तु कथम् । न च दण्डीत्यादिवदिनिप्रत्यये मायीति रूपनिष्पत्तिरिति वाच्यम् । अतदन्तत्वान्मायाशब्दस्य 'अत इनिठनावि'त्यनेन तस्मात् तदप्राप्तेरित्यतस्तेन तदप्राप्तावपि अनदन्तेभ्यश्चेत्यनेन तत्प्राप्तिसम्भवान्नानुपपत्तिरित्याशयेन तत्प्रसञ्जकमाह **मायाशब्दस्येति** ॥ **व्रीह्यादित्वादिति** । व्रीह्यादिगणे पठितत्वादित्यर्थः ।

**स०व्र०**— ननु 'अस्माया-मेधा-स्रजो-विनिरि'ति विनिप्रत्यये 'मायावीति' स्यात् मायीति कथम् । न च दण्डीत्यादाविव 'इनि'प्रत्यये मायीत्यपि साध्विति वाच्यम् । तद्विधायकाभावात् । 'अत इति-ठनावि'त्यत्र अत इति तपरकरणेनात्र तपरासम्भवादित्यत्राह **मायाशब्दस्येति** ।

**विठ्ठ०**— ननु 'अस्मायामेधास्रजो विनिरि'ति मायाशब्दान्मत्वर्थे विनिप्रत्ययोक्तेर्मायावीति वक्तव्यं मायीति कथमित्यत आह **मायाशब्दस्येति** । 'व्रीह्यादिभ्यश्चे'ति सूत्रे इनो विधानात् मायाशब्दस्य च व्रीह्यादिगणे पठितत्वादिन्प्रत्यये, 'यस्येति चे'ति मायाशब्दाकारलोपे मायीति साध्वित्यर्थः ।

**॥ इति 'मायी' इत्यनुव्याख्यानस्थपदस्य व्याकरणदृष्ट्या साधुताप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र 'मायी च'इत्यनुव्याख्यानोक्तचकारबोध्यातिदेशज्ञापनम् ॥**

**५८ सु०— 'शून्यवादिनिरासे(नैव)न मायावादोऽपि निरस्तो वेदितव्यः' इत्यतिदेशज्ञापनाय 'मायी चे'त्युक्तम् ।**

**कं०रा०**— ननु शून्यवादिनिरासस्य प्रकृतत्वात् माध्यमिक इति वक्तव्ये मायी चेति किमर्थमुक्तमित्यत आह **शून्यवादीति** ।

**श्रीनिधि०— मायी चेत्युक्तमिति** । अनेन 'माध्यमिकश्चे'ति 'च'शब्दो भिन्नक्रम इत्युक्तं भवति ।

**शे०चं०**— 'अपरः शून्यमखिलमि'त्युपक्रमानुसारेण माध्यमिकस्यैवोपसंहारे ग्रहणमुचितं मायी चेत्यधिकमित्याशङ्क्यातिदेशज्ञापनार्थत्वान्न तस्यानर्थक्यमित्याशयेनातिदेशप्रकारं दर्शयन्नेव तत्सूचकतया तदानर्थक्यं परिहरति **शून्येति** ।

**॥ इति 'मायी च'इत्यनुव्याख्यानोक्तचकारबोध्यातिदेशज्ञापनम् ॥**

* * *

**॥ अथ च तत्रान्ते अनुव्याख्यानोक्त'एव'शब्दस्योत्तरवाक्येऽन्वयप्रदर्शनम् ॥**

५९ **सु०—** एवशब्दस्योत्तरत्र सम्बन्धः ।

**परि०—** उत्तरत्रेति । उपेक्ष्यावित्यत्रेत्यर्थः ।

**श्रीनिधि०—** उत्तरत्र सम्बन्ध इति । उपेक्ष्यावित्यनेन सम्बन्ध इत्यर्थः ।

**विठ्ठ०—** उत्तरत्रेति । उपेक्ष्यावित्यत्र सम्बन्ध इत्यर्थः ।

**॥ इति अनुव्याख्यानोक्त'एव'शब्दस्योत्तरवाक्येऽन्वयप्रदर्शनम् ॥**
**॥ इति उक्तेन माध्यमिक-शून्यवादनिरासेन मायावादस्यापि निरस्तत्वकथनम् ॥**

* * *

**॥ अथ तत्र एतदधिकरणीयोक्तव्याख्याने कतिपयशङ्कास्तन्निरासश्च ॥**
**॥ अथ च तत्र अस्यान्योन्याश्रयत्वादेः सूत्रकृतैव निराकरणकरणाभावे कारणप्रदर्शनम् ॥**

६० **सु०—** ननु एतदन्योन्याश्रयत्वादिकं सूत्रकृतैव कुतो न निराकृतमित्यत आह **तदिति** ।

**अनु०—** तदुपेक्ष्यौ बुभूषुभिः ।

तस्माज्जात्युत्तराकरत्वादुपेक्ष्यावेव, न तु परिहाराय प्रतिवादीकर्तव्यौ । एतदुक्तं भवति । सदलमेव पूर्वपक्षिवचनं निराकर्तव्यं भवति न निर्दलम्, अन्यथाऽतिप्रसङ्गात् । एतच्च जात्युत्तरत्वेन निर्दलमित्युपेक्षितं सूत्रकृता ।

**कं०रा०—** एतदन्योन्याश्रयादिकमिति । भेदग्रहणे शून्यवाद्युक्तमन्योन्याश्रयादिकमित्यर्थः । **जात्युत्तरत्वेनेति** । पराभिमताभेदग्रहणेऽपि तदुक्तरीत्या अन्योन्याश्रयादेर्वक्तुं शक्यत्वेन स्वव्याघातकत्वाज्जात्युत्तरत्वमिति भावः ।

**श्रीनिधि०—** अन्यथा अतिप्रसङ्गादिति । 'माता वन्ध्या', 'मूकोऽहम्' इत्याद्युन्मत्तादिवाक्यस्यापि निराकर्तव्यतापत्तेरिति भावः ।

**शे०चं०**— **उपेक्ष्यावेवेति** । अनेनैव शब्दस्योत्तरत्र सम्बन्ध इत्युक्तं विवृतं भवति । एवशब्द-व्यावर्त्यमुपदर्शयति **न त्विति** । तच्छब्दपरामृष्टजात्युत्तराकरत्वस्य कथं सूत्रकारं प्रत्यनिराकर्तव्यतायां प्रयोजकता । तथात्वे वा भाष्यकाराणामपि तत्रोपेक्षैव कर्तुमुचिता । तत्किमिति तन्निराकरणं तेषामित्यत आह **एतदुक्तं भवतीति** ।

**विठ्ठ०**— जात्युत्तराकरत्वेऽप्युपेक्ष्यत्वं कुतः, उपेक्ष्यत्वे च भाष्यकारीयं निराकरणमयुक्तं स्यात् इत्यत आह **एतदुक्तं भवतीति** ।

**॥ इति अस्यान्योन्याश्रयत्वादेः सूत्रकृतैव निराकरणकरणाभावे कारणप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र अस्यान्योन्याश्रयत्वादेः अस्माभिर्निराकरणे तु कारणप्रदर्शनम् ॥**

६१ **सु०**— अस्माभिस्तु शिष्यव्युत्पादनाय निराकृतमिति ।

**॥ इति अस्यान्योन्याश्रयत्वादेः अस्माभिर्निराकरणे तु कारणप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्र शून्यवादमायावादयोर्वैषम्याभावात् निरसनातिदेशस्य साधुताप्रदर्शनम् ॥**

६२ **सु०**— स्यादेतत्; शून्यवादी शून्यं जगत्कारणं मन्यते, मायावादी तु ब्रह्म, तत्कथं 'नासतोऽदृष्टत्वादि'त्यादिशून्यवादनिरासस्य मायावादेऽतिदेशः । मतवैषम्येऽतिदेशासम्भवादित्यत आह **यदिति** ।

**अनु०— यच्छून्यवादिनः शून्यं तदेव ब्रह्म मायिनः ।**

'तस्मादतिदेशो युक्त' इति शेषः । तत्कथमित्यत आह **न हीति** ।

**न हि लक्षणभेदोऽस्ति निर्विशेषत्वतस्तयोः ।**

लक्षणभेदेन हि विप्रतिपन्नो भेदो बोधनीयः; न (च) असौ शून्यब्रह्मणोः सम्भवति, द्वयोरपि निर्विशेषत्वाङ्गीकारात् ।

'ननु निर्विशेषत्वेन बाह्यलक्षणभेदाभावेऽपि सत्यज्ञानानन्तानन्दात्मकत्वं ब्रह्मणः स्वलक्षणं मायावादिनाऽङ्गीकृतम्, न शून्यस्य शून्यवादिना; तेन ब्रह्मशून्ययोर्भेदो भविष्यति' इत्यत आह **अनृतादीति** ।

## अनृतादिविरोधित्वमुभयोश्च स्वलक्षणम् ।

**ब्रह्मणः सत्यज्ञानाद्यात्मकत्वं नामानृतजडादिविरोधित्वमेवाभिमतं मायावादिनोऽन्यस्यासम्भवात्, 'अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धमि'ति तद्व्याख्यानाच्च । अनृतादिविरोधित्वं च शून्यवादी शून्यस्यापि मन्यते, 'जाड्यसंवृतिदुःखान्तपूर्वदोषविरोधि यदि'ति वचनात् । ततो नैतदपि भेदकमिति युक्त एवातिदेशः ।**

**परि०**— अभिमतं मायावादिन इत्येतद्धेतुद्वयोक्त्या व्यनक्ति **अन्यस्येति** । सत्यत्वज्ञानत्वादिधर्मस्याखण्डत्वविरोधेनासम्भवादिति भावः । 'अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धम् । अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमी'ति भाष्यकृतैव मुरारिशतके सत्यादिपदानामर्थाभिधानादित्यर्थः । दुःखतेत्यस्य भावभवित्रोरभेदेन दुःखेत्यर्थो ध्येयः ॥ **इति वचनादिति** । व्यक्तमेतत् तत्त्वोद्योते ।

**यादु०**— **अन्यस्यासम्भवादिति** । परजातिरूपस्य सत्यत्वापरजातिरूपस्य ज्ञानत्वस्यापरिच्छिन्नपरिमाणवत्त्वादिरूपस्यानन्तत्वस्य च निर्धर्मकेऽसम्भवादित्यर्थः । दुःखताविरुद्धमित्यत्र स्वार्थे तद्धित इति ज्ञातव्यम् ॥ **व्याख्यानाच्चेति** । वैदिकानां सत्यज्ञानानन्तशुद्धमुक्तानन्दपदानामिति शेषः । अस्य 'अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमी'त्युत्तरार्धेनान्वयः ।

**वं०प०**— **बाह्येति** । स्वरूपातिरिक्तस्य जगदादिबाह्यपदार्थघटितस्य जगत्कारणत्वादिरूपलक्षणस्योभाभ्यामुभयोरङ्गीकारेण तद्भेदाभावेऽपीत्यर्थः ।

**कं०रा०**— **बाह्येति** । स्वरूपबहिर्भूतलक्षणाभावेऽपीत्यर्थः । **स्वलक्षणमिति** । स्वरूपभूतलक्षणम् ।

**श्रीनिधि०**— **अन्यस्यासम्भवादिति** । निर्विशेषत्वाङ्गीकारादिति भावः । **व्याख्यानाच्चेति** । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति वाक्यस्येति शेषः ।

**शे०चं०**— तत्कथमित्यतः क्रमेण युक्तितद्व्याख्यानाभ्यामभिमततामुपपादयति **अन्यस्येत्यादिना** ॥ **अन्यस्यासम्भवादिति** । परजातिरूपस्य सत्यत्वस्यापरजातिरूपस्य ज्ञानत्वस्यापरिच्छिन्नपरिमाणवत्त्वरूपा-

नन्तत्वस्य च निर्धर्मके ब्रह्मण्यसम्भवादित्यर्थः । दुःखताविरुद्धमित्यत्र स्वार्थे तल्प्रत्ययः । तद्व्याख्यानाच्चेत्यत्र तच्छब्दः आवर्तनीयः । तथा च तेषां वैदिकसत्यज्ञानानन्तशुद्धमुक्तानन्दपदानां तद्व्याख्यानात् तस्य मायावादिनो व्याख्यानाच्चेत्यर्थः । 'अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमी'त्युत्तरार्धेन सम्बन्धः । कथमेत-दवगतमित्यतस्तद्वाक्यादेवेत्यभिप्रेत्य तदुदाहरति **जाड्येति** ॥ **एतदपीति** । सत्यज्ञानानन्तानन्दात्मकत्वरूपं स्वलक्षणमपीत्यर्थः । न केवलं बाह्यलक्षणमित्यपेरर्थः ।

**वा०र०— युक्तितद्व्याख्यानाभ्यामिति** । युक्त्या तस्य मायावादिनो व्याख्यानेन चेत्यर्थः । एवं प्रघट्टकमवतार्य आदिवाक्यं व्याख्यातुमुपादत्ते **अन्यस्यासम्भवादितीति** । .....त्रोक्तमिदम् । **उत्तरार्धेनेति** । सङ्क्षेपशारीरकप्रथमश्लोकोऽयम् ।

**विठ्ठ०—** अनृतादिविरोधित्वमेवाभिमतमित्येतद् द्वेधोपपादयति **अन्यस्येति** । सत्यत्वज्ञानत्वा-परिमाणत्वादिभावधर्माणां निर्विशेषे असम्भवादिति भावः । दुःखतेत्यस्य भावभवित्रोरभेदेन दुःखेत्यर्थो ध्येयः । तत्त्वोद्योतटीकोक्तेः । वैदिकानां सत्यज्ञानानन्तशुद्धमुक्तानन्दपदानां सङ्करेणैव मुरारिशतके व्याख्यानादित्यर्थः । अस्यार्धस्य 'अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमी'त्युत्तरार्धेनान्वयः ।

**॥ इति शून्यवादमायावादयोर्वैषम्याभावात् निरसनातिदेशस्य साधुताप्रदर्शनम् ॥**

* * *

**॥ अथ च तत्रान्ते एतत्सूत्रव्याख्यानस्योत्सूत्रितत्वनिरासः ॥**

**॥ अथ तत्र 'व्यभिचारो न चेद्भवेत्' इत्यनुव्याख्यानेनोक्तस्य 'दृश्यत्वस्य सत्यत्वे मिथ्यात्वेनासाधकत्वापादन'स्योत्सूत्रितत्वशङ्का तन्निरासश्च ॥**

६३ **सु०—** स्यादेतत् । प्रपञ्चमिथ्यात्वानुमाननिरासार्थं 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रम् । तत्र "यत् 'भ्रान्तेः संवृतिसत्यस्ये'ति दूषणमुक्तम्, तदेव वैधर्म्यादिति सूत्रे प्रतीयते; यत्पुनरुक्तं 'दृश्यत्वस्य सत्यत्वे तत्रैव व्यभिचारप्रसङ्गात् तस्य मिथ्यात्वं वाच्यम्, तथा चासाधकत्वमि'ति, तत्सूत्रे न दृश्यते; तत्कथमेतद्व्याख्यानम्" इत्यत आह **स्ववाक्येति** ।

**अनु०—** स्ववाक्याभावसंवादान्न कृत्यं प्रतिवादिनः ।
तत्पक्ष इति वैधर्म्यान्न स्वप्नादिवदित्यजः ।
अप्रयत्नान्निराचक्रे

अत्र 'वाक्यमि'ति हेतुवाक्यार्थो दृश्यत्वं लक्ष्यते । 'तत्पक्ष' इति विषयसप्तमी, तन्मिथ्यात्वसाधनविषय इति यावत् । 'इति'शब्दो हेतौ । **अप्रयत्नात्** प्रयत्नमविधाय, **'वैधर्म्याच्च न स्वप्नादिवदि'त्येव निराचक्र इति सम्बन्धः ।**

**एतदुक्तं भवति । दृश्यत्वस्य मिथ्यात्वं शून्यवादिनैवाभ्युपगतम् । मिथ्याभूतस्य (च) असाधकत्वं सुप्रसिद्धमेव । अत ए(वै)तद्विषये सद्वादिनः किमपि कृत्यं नास्त्येव, स्फुट-दूषणव्युत्पादने सूत्रत्वव्याघातात् । तस्मादेतद्दूषणव्युत्पादने सूत्रकृता प्रयत्नो न विहितः । अस्माभिस्तु तदभिप्रायः स्फुटीकृत इति ।**

**परि०—** 'स्ववाक्याभावसंवादादि'त्यस्यार्थः **दृश्यत्वस्य मिथ्यात्वमित्यादि** । तत्पक्ष इत्यस्यार्थ **एतद्विषय इति** । दृश्यत्वस्य मिथ्यात्वविषय इत्यर्थः । प्रतिवादिन इत्यस्यार्थः **सद्वादिन इति** । प्रपञ्चस्य सत्यत्ववादिन इत्यर्थः ।

**वं०प०—** **इत्येवेति** । भ्रान्तिवैलक्षण्येनैव सत्यत्वं साधितवान् । न तु दृश्यत्वस्य हेतोः सत्यत्वमिथ्यात्वे विकल्प्य तद्दूषणविषये प्रयत्नं चकारेति भावः ॥ **सूत्रत्वेति** । अस्पष्टन्यायसूचनादेव हि सूत्रमित्यर्थः ।

**श्रीनिधि०—** **अत्र वाक्यमितीति** । स्ववाक्याभावसंवादादित्यत्रत्यस्य वाक्यपदस्य समस्तस्य निष्कृष्य प्रथमान्तेन ग्रहणं द्रष्टव्यम् । तन्मिथ्यात्वसाधनविषय इति यावदिति । तस्य प्रतिज्ञावाक्यार्थस्या-सत्त्वसाधनविषय इत्यर्थः । **प्रयत्नमविधायेति** । अनेन ल्यब्लोपनिमित्ता पञ्चमीत्युक्तं भवति । **दृश्यत्व-मिथ्यात्वं शून्यवादिनैवाभ्युपगतमिति** । अनेन स्ववाक्याभावसंवादादिति व्याख्यानं द्रष्टव्यम् ।

**शे०चं०—** **दूषणमिति** । सत्प्रतिपक्षादिरूपमित्यर्थः ॥ **तत्कथमिति** । सूत्रार्थकथनरूपत्वाभावादिति भावः ॥ **प्रयत्नमविधायेति** । अनेनाप्रयत्नादिति मूले ल्यब्लोपनिमित्ता पञ्चमीत्युक्तं भवति ।

**वा०र०—** **सूत्रार्थेति** । तथा सति उत्सूत्रं भाष्यं स्यादिति भावः । **ल्यब्लोपेति** । ल्यबन्तलोपे-त्यर्थः । एतच्चाशेषत इत्येतदाद्यपद्यमूलटीकाप्रपञ्चे प्रपञ्चितमस्माभिः ।

**विठ्ठ०—** प्रकृते तत्पक्ष इत्युक्तं तदभिमतं दर्शयन् विषयसप्तमीत्युक्तं विवृणोति **तन्मिथ्यात्वेति** । ननु यदि प्रयत्नो न विहितस्तदा निराचक्र इत्यनुपपन्नमित्यतः सारवत्त्वं सूत्रलक्षणं स्फुटदोषव्युत्पादने च तद्व्याहन्यत सूचनामात्रं तु कर्तव्यं न स्वप्नादिवदिति तन्मते सर्वमिथ्यात्वोक्त्या च दृश्यत्वस्य मिथ्यात्वसाधनकत्वं च सूचितमेव । अतो निराचक्र इत्युपपन्नतरमित्याशयेनाह **एतदुक्तं भवतीति** ।

॥ इति 'व्यभिचारो न चेद्भवेत्' इत्यनुव्याख्यानेनोक्तस्य 'दृश्यत्वस्य सत्यत्वे मिथ्यात्वेनासाधकत्वापादन'स्योत्सूत्रितत्वशङ्का तन्निरासश्च ॥

* * *

॥ अथ च तत्र 'सत्त्वञ्चास्यानुभूतितः', 'मिथ्यात्वे मा न काचन' इत्यनुव्याख्यानोक्तदोषद्वयस्याप्युत्सूत्रितत्वशङ्का तन्निरसनञ्च ॥

६४ सु०— तथाऽपि 'सत्त्वं चास्यानुभूतित' इति यत्प्रपञ्चमिथ्यात्वस्य प्रत्यक्षविरुद्धत्वमुक्तम्, यच्च 'मिथ्यात्वे मा न काचने'ति निष्प्रमाणत्वं, तदुभयं सूत्रे न दृश्यत इत्यत आह **चेति** ।

**अनु०— चेति दृष्टिविरुद्धताम् ।**
**निष्प्रमाणत्वमप्यस्य सूचयामास विश्वकृत् ॥**

**अस्य** मिथ्यात्वस्य ।

नन्वनुक्तसमुच्चयार्थेन 'च'शब्देनेदं दूषणद्वयं सूचितमिति यथा व्याख्यायते तथा तदपि 'च'शब्दार्थतया व्याख्यायताम्, किमनुक्तत्वाङ्गीकारेण । मैवम्, 'न कृत्यं प्रतिवादिनः' इत्युक्तत्वात् ।

सूत्रे हेतुविशेषस्यानुपादानान्निष्प्रमाणकत्वं ज्ञापितमित्यस्तु, किं 'च'शब्दस्योभयसूचकत्वग्रहणेन । न, सति शब्दे सावकाशज्ञापकादरणानुपपत्तेः ।

परि०— शङ्कते **सूत्र इति** । 'वैधर्म्याच्चे'ति सूत्रे दृश्यत्वजडत्वपरिच्छिन्नत्वादिमिथ्यात्वहेतूनां मध्येऽन्यतमाभावरूपहेतुविशेषस्यानुपादानात् (साधकभावाभाव)बाधकाभावरूपस्वप्नादिवैधर्म्यान्न मिथ्यात्वं विश्वस्येति निष्प्रमाणत्वं ज्ञापयितुं शक्यमिति भावः । किमिति भिन्नं पदम् । चशब्दस्येति विभागः । निराह **नेति** ॥ **सावकाशेति** । भ्रान्तेः संवृतिसत्यस्येत्यादिनोक्तरीत्या पराङ्गीकृतार्थक्रियाकारित्वादिरूपस्वप्नशुक्तिदुर्वर्णादिवैलक्षण्यपरत्वेनापि सावकाशवैधर्म्यशब्दरूपज्ञाप(कान्तराणामित्य)कानादरणादित्यर्थः ॥

**गु०दी०— सूत्रे हेतुविशेषस्यानुपादानात्** इत्यस्य सूत्रे 'वैधर्म्यात्' इति सत्यत्वसाधकप्रमाणमेवोक्तम् । जगन्मिथ्यात्वे हेतुविशेषस्य कस्याप्यनुक्तेः । दूषयितुमप्यननुवादात् । 'स्वप्नादिवत्' इति तदुदितदृष्टान्त एव दूषितः । न तु तदुदितमिथ्यात्वसाधकप्रमाणस्य । न शङ्का नापि समाधानम् । किन्तूपेक्षैव कृता । तेन ज्ञायते मिथ्यात्वे किमपि प्रमाणं नास्तीति सूत्रकृतो भाव इति । प्रमाणविरोधस्य तु चशब्देनैव सूचनम् । अनन्तजीवेष्वनन्ता विज्ञानसन्ततयः तत एकैकस्यामपि सन्ततौ घटज्ञानं पटज्ञानमित्याद्याकारेण ज्ञानभेदस्य च विद्यमानत्वादित्यर्थः ।

**यादु०— शङ्कते सूत्रे हेतुविशेषस्येति** । दूष्यत्वेन दृश्यत्वाद्यन्यतमहेतुविशेषस्यानुपादानादित्यर्थः । तथा च सूत्रे स्वप्नादिवदिति दृष्टान्तमात्रमुक्तं न कोऽपि हेतुविशेष उक्तः । तेन ज्ञायते स्वप्नादिदृष्टान्तेन मिथ्यात्वसाधकं यावत्साधनं तावत् सर्वमप्यत्र दूष्यतयाऽभिमतमिति । तेन च मिथ्यात्वं निष्प्रमाणकमिति ज्ञापितमित्यस्तु, किं चशब्दस्यैतदर्थकत्ववर्णनेनेति भावः ॥ **सति शब्द इति** । अनुक्तसमुच्चयवाचकचशब्दे सतीत्यर्थः । अत्र मिथ्यात्वे प्रमाणसामान्याभावो ज्ञापनीयः । स च अनुक्तसमुच्चायकेन चशब्देन शक्त्यैव ज्ञाप्यते । स्वप्नादिवदिति दृष्टान्तमुक्त्वा हेतुविशेषानुपादानं तूक्तरीत्याऽनुमानसामान्याभावज्ञापकतया सावकाशं, न प्रमाणसामान्याभावज्ञापनायालम् । अतो न तदादरणं भाष्यकृता कृतमित्यर्थः ।

**वं०प०— तदपीति** । दृश्यत्वं सत्यं मिथ्या वेत्येतदपीत्यर्थः ॥ **इत्युक्तत्वादिति** । तथा च स्फुटदूषणस्य सूचितत्वं न वक्तव्यमिति भावः ॥ **उभयेति** । 'एकसत्त्वे द्वयमिह नास्ती'ति न्यायेनेदम् । तथा च प्रमाणविरुद्धत्वमेव सूचितमित्यस्तु । न निष्प्रमाणकत्वसूचनमित्यर्थः ॥

**कं०रा०—** विरुद्धत्वाप्रमाणकत्वरूपदूषणद्वयमित्यर्थः । **तदपीति** । दृश्यत्वस्य सत्यत्वे तत्रैव व्यभिचारप्रसङ्गात् तस्य मिथ्यात्वं वाच्यम् । तथा च असाधकत्वमित्येतद्दूषणमपि वैधर्म्याच्चेति चशब्दार्थतया व्याख्यायतां किं तस्यानुक्तत्वाङ्गीकारेणेत्यर्थः । **न कृत्यमिति** । दृश्यत्वस्य मिथ्यात्वं शून्यवादिनैवाभ्युपगतं मिथ्याभूतस्य साधकत्वं सुप्रसिद्धमेव । अत एव तद्विषये वादिनः किमपि कृत्यं नास्तीत्युक्तरीत्या अस्य दूषणस्य स्फुटत्वात् स्फुटदूषणव्युत्पादने च सूत्रत्वव्याघातापत्त्या नेदं दूषणं सूत्रस्थ'च'शब्दार्थत्वेन व्याख्यातुं शक्यमिति भावः । ननु वैधर्म्याच्चेति सूत्रे विश्वस्य स्वप्नादितः सामान्यतो वैधर्म्यमुपात्तं न त्वनेनाकारेण वैधर्म्यमिति विशेषः अतो विशेषानुपादानाद्विश्वमिथ्यात्वे किमपि प्रमाणं नास्तीति ज्ञाप्यते यदि हि विश्वमिथ्यात्वे किञ्चित्प्रमाणं स्यात् तदा विश्वस्य स्वप्नादिसाधर्म्यप्राप्तेः सामान्यतो वैधर्म्योपादानाय अनेन विशेषतो वैधर्म्यमुपादेयम् । स्यादेव च विशेषानुपादानाद्विश्वमिथ्यात्वस्य प्रत्यक्षविरुद्धत्वं निष्प्रमाणकत्वं च सूचितमित्यङ्गीकारेणेत्याशयेन **शङ्कते सूत्र इति** । पराङ्गीकृतेन स्वप्नादिरूपप्रातीतिकाद्वैलक्षण्यमात्रेण विश्वसत्यत्वं साधनं न तु प्रमाणदृष्टत्वादिरूपवैलक्षण्यविशेषेण तथात्वे प्रमाणतत्त्वावेदकत्वादिकं बहु संविधेयं स्यादित्याशयेन सूत्रे

विशेषानुपादानस्योपपत्त्या तस्य सावकाशत्वात् सति 'च'शब्दे सावकाशज्ञापकस्यानादरणीयत्वात् विश्वमिथ्यात्वस्य निष्प्रमाणकत्वं सूत्रस्थ'च'शब्दसूचितमित्येवाङ्गीकार्यमित्याशयेन परिहरति **न सतीति** ।

**श्रीनिधि०— तथा तदपीति** । इयं प्रमा मिथ्या चेत् साध्यसिद्धिर्नेत्यादिना उक्तमित्यर्थः । **सावकाशज्ञापकादरणानुपपत्तेरिति** । दृष्टान्तमात्रमुपादाय हेतुविशेषस्यानुपादानं तु इदमपि ज्ञापयति । हेतुविशेषे उपात्ते तन्मात्रस्य निराकरणं सूत्रे इत्यपि ज्ञायेत । तदनुपादाने तु एतद्दृष्टान्तानुसारेण यो यो हेतुरस्ति तस्य सर्वस्यापि निराकरणमिति ज्ञातुं शक्यमिति । एवञ्च कस्यार्थे हेतुविशेषस्यानुपादानमिति सन्दिह्यते न तु अन्यतरार्थत्वमिति निश्चयः । विनिगमकाभावात् । तस्मात् निष्प्रमाणत्वेनेदं निरवकाशं ज्ञापकमिति 'च'शब्दार्थतया व्याख्यानं युक्तमिति ॥

**शे०चं०— सूत्रे हेतुविशेषस्येति** । 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रे सूत्रकारेण हेतुर्विशिष्य नोक्तः तेन तदभावो ज्ञापितो भवति । यदि हेतुविशेषोऽपि स्यात् तर्हि सूत्रकारस्तमप्युपादद्यादिति विशिष्य हेत्वनुक्त्यैव निष्प्रमाणत्वज्ञापनसिद्धेर्न तत्सूचकत्वं चशब्दस्येत्यर्थः । दृष्टान्तोक्त्या हेतुरपि सामान्यत उक्त एवेति कथं तदनुक्तिरिति शङ्कापरिहाराय विशेषपदम् । **सावकाशेति** । किं हेत्वभावादेव तदनुक्तिः किंवा दृष्टान्तोक्त्यैव हेतुरपि सुज्ञान इत्यभिप्रायेणेति शङ्काकवलितत्वान्नानुक्तिमात्रेण निष्प्रमाणकत्वसिद्धिरित्यर्थ इति बहवः । वस्तुतस्तु दूष्यत्वेन दृश्यत्वाद्यन्यतमस्य हेतुविशेषस्यानुपादानादित्यर्थः । ततश्च सूत्रे स्वप्नादिवदिति दृष्टान्तमात्रमुक्तं न कोऽपि हेतुविशेष उक्तः । तेन ज्ञायते स्वप्नादिदृष्टान्तेन मिथ्यात्वसाधकं यावत् साधनं तावत् सर्वमप्यत्र दूष्यतयाऽभिमतमिति । तेन च मिथ्यात्वं विश्वस्य निष्प्रमाणकमिति ज्ञापितमित्यस्तु, किं चशब्दस्यैतदर्थकत्ववर्णनेनेति शङ्काग्रन्थार्थः । अत्र हि मिथ्यात्वे प्रमाणसामान्याभावो ज्ञापनीयः । स चानुक्तसमुच्चायकेन चशब्देन शक्त्यैव ज्ञाप्यते । स्वप्नादिवदिति दृष्टान्तमुक्त्वा हेतुविशेषानुपादानं तूक्तरीत्या अनुमानसामान्याभावज्ञापकतया सावकाशत्वान्न प्रमाणसामान्याभावज्ञापनायालमित्यतो न तदादरणं भाष्यकृता कृतमिति परिहारग्रन्थार्थः ॥

**वा०र०—** सूत्रे हेतुविशेषस्येत्यादिशङ्कासमाधानग्रन्थं निष्कृष्य स्वरीत्या व्याचष्टे **वस्तुतस्त्विति** ।

**स०व्र०— सूत्रे हेतुविशेषस्येति** । 'वैधर्म्याच्च न स्वप्नादिवत्' इति सूत्रे हेतुः विशिष्य नोक्तः सूत्रकारेण । तेन तदभावो ज्ञापितो भवति । यदि हेतुविशेषोऽपि स्यात् तर्हि सूत्रकारस्तमुपादद्यादिति विशिष्य हेत्वनुक्त्यैव निष्प्रमाणत्वज्ञापनमस्त्वित्यर्थः । दृष्टान्तोक्त्या हेतुरपि सामान्यत उक्त एवेति कथं तदनुक्तिरित्यतो विशेषपदमिति ध्येयम् । **सावकाशेति** । किं हेत्वभावादेव तदनुक्तिः किं वा दृष्टान्तोक्त्यैव हेतुरपि सुज्ञान इत्यभिप्रायेणेति शङ्कायाः सावकाशत्वात् नानुक्तिमात्रेण निष्प्रमाणकत्वासिद्धिरिति भावः ।

**विठ्ठ०— तथा तदपीति** । इयं च मा मिथ्या चेत्साध्यसिद्धिर्नेत्यत्र यद्दृश्यत्वस्य मिथ्यात्वे साधकत्वं नेत्युक्तं दूषणं तदप्यर्थः । मैवं चशब्देनोक्तत्वाङ्गीकारे सूत्रत्वव्याघातः स्यात् । दूषणस्य स्फुटत्वेन तत्र सद्वादिनः कृत्याभावस्योक्तत्वादित्याशयेन परिहरति **मैवमिति** । ननु 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रे दूष्यत्वेन दृष्टान्तमात्रमुपात्तं न हेतुर्विशेषः अतोऽत्र सूत्रे दृश्यत्वादिहेतुविशेषस्य दूष्यतयानुपादानात् स्वप्नादिदृष्टान्तेन सर्वमिथ्यात्वे साध्ये यावत्साधनजातं तत्सर्वं दूष्यतयाभिमतम्, ततश्च हेतुविशेषानुपादानेनैव सूत्रकृता मिथ्यात्वस्य निष्प्रमाणत्वं ज्ञापितमित्येवास्तु चशब्दस्य किं दृष्टिविरुद्धत्वनिष्प्रमाणकत्वरूपोभयसूचकत्वग्रहणेन । अन्यतरस्य अन्यथासिद्धत्वादित्याशयेन शङ्कते **सूत्रे हेतुविशेषस्येति** । परिहरति **नेति** । **सति शब्द इति** । अनुक्तसमुच्चयवाचके चशब्दे सति हेतुविशेषानुपादानरूपज्ञापकस्यानुभवमात्रभावज्ञापकतया सावकाशत्वेन किमपि प्रमाणमस्तीत्यस्य ज्ञापकत्वाभावेन सावकाशत्वात् सावकाशस्यानारम्भणं भाष्यकृता कृतमित्यर्थः ।

**॥ इति 'सत्त्वश्चास्यानुभूतितः', 'मिथ्यात्वे मा न काचन'**
**इत्यनुव्याख्यानोक्तदोषद्वयस्याप्युत्सूत्रितत्वशङ्का तन्निरसनश्च ॥**

* * *

**॥ अथ 'स्वप्नादिवत् इति सौत्रपदस्य' स्वप्नवत् इति व्याख्याने**
**अभिप्रायोद्घाटनम् ॥**

६५ **सु०—** 'स्वप्नादिवदि'ति सूत्रं स्वप्नवदिति व्याख्यातम् । कोऽत्राभिप्रायः । उच्यते । 'बहुस्थलेषु गृहीतेयं व्याप्तिरित्यतो न व्यभिचारमर्हती'ति पूर्वपक्षिणोऽभिमानं सूचयितुं सूत्रकारेण 'आदि'पदं प्रयुक्तम्; तथाऽपि प्रयोगवेलायामेक एव दृष्टान्त उपादेयोऽन्यथाऽऽधिक्यं प्रस(ज्यते)ज्येतेति । यथाऽऽह, 'हेतूदाहरणादिकम् अधिकमि'ति । एतज्ज्ञापनाय भाष्यकारेण 'स्वप्नवदि'त्येवोक्तमिति सर्वं सुस्थम् ॥

६५ **परि०— स्वप्नवदिति व्याख्यातमिति** । 'दृश्यत्वाद्विमतं मिथ्या स्वप्नवच्चे'त्यत्रेति भावः ॥

**कं०रा०— हेतूदाहरणेति** । हेत्वधिकमुदाहरणादिकं चाधिकं नाम निग्रहस्थानमित्यर्थः ।

**वं०प०— स्वप्नवदिति** । 'दृश्यत्वाद्विमतं मिथ्या स्वप्नवच्चेदि'त्यनेन व्याख्यातमित्यर्थः ॥

**विठ्ठ०— स्वप्नवदिति व्याख्यातमिति** । स्वप्नवच्चेदियं च मेत्यत्रेत्यर्थः । उक्तार्थे कणादसूत्रं संवादयति **यथाऽऽहेति** ।

॥ इति 'स्वप्नादिवत् इति सौत्रपदस्य' स्वप्नवत् इति व्याख्याने अभिप्रायोद्घाटनम् ॥
॥ इति एतत्सूत्रव्याख्यानस्योत्सूत्रितत्वनिरासः ॥
॥ इति एतदधिकरणीयोक्तव्याख्याने कतिपयशङ्कास्तन्निरासश्च ॥
॥ इति माध्यमिकमतनिराकरणम् (चतुर्धाविभक्तसौगतमतेषु तृतीयमतस्य निराकरणम्) ॥

## ॥ इति असदधिकरणम् ॥

## ॥ २-२-८ ॥

* * *

# श्रीमन्न्यायसुधा-परिमळ-प्रशंसनम्

प्रतिवाक्यं प्रतिपदमनेकाकूतगर्भिता ।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

— श्रीराघवेन्द्रतीर्थाः

**श्रीकरोऽयं ग्रन्थः । तत्र वयमेव साक्षिणः ॥**

— श्रीवादिराजतीर्थाः

यदुतापसलभ्यमनन्तभवैः तदुतोपरतत्त्वमिहैकपदात् ।
जयतीर्थकृतौ प्रवणो न पुनर्भवभाग् भवतीति मतिर्हि मम ॥

— श्रीविष्णुतीर्थाः

**सुधा वा पठनीया । वसुधा वा पालनीया ॥**

धीर श्रीराघवेन्द्र त्वदतुलरसनारङ्गनृत्यत्स्वयंभू-
योषाधम्मिल्लभारश्लथकुसुमततीस्त्वद्गिरस्सङ्गिरामः ।
याभिस्सम्मिश्रिताभिर्निरवधिवसुधा विश्रुता सा सुधाऽपि
क्षोणीगीर्वाणगम्यं परिमलमतुलं साम्प्रतं संप्रपेदे ।